BIBLIOTHECA BUDDHICA. IV.

मध्यमकवृत्तिः

MŪLAMADHYAMAKAKARIKĀS

(MĀDHYAMIKASŪTRAS)

DE

NAGARJUNA

avec la PRASANNAPADA Commentaire de CANDRAKIRTI.

PUBLIÉ PAR

Louis de la Vallée Poussin,

PROFESSEUR À L'UNIVERSITÉ DE GAND, MEMBRE DE LA SOCIÉTÉ ASIATIQUE ET DE LA ROYAL ASIATIC SOCIETY.

I.

ST.-PÉTERSBOURG, 1903.

Commissionnaires de l'Académie Impériale des Sciences:

J. Glasounof, M. Eggers & Cie. et **C. Ricker** à St.-Pétersbourg,
N. Oglobline à St.-Pétersbourg et Kief,
M. Klukine à Moscou,
E. Raspopof à Odessa,
N. Karbasnikof à St.-Pétersbourg, Moscou, Varsovie et Vilna,
N. Kymmel à Riga,
Luzac & Cie. à Londres,
Voss' Sortiment (G. Haessel) à Leipsic.

Prix: 1 Rbl. = 2 Mrk. 50 Pf.

Imprimé par ordre de l'Académie Impériale des sciences.
Décembre 1903. N. Doubrovine, Secrétaire perpétuel.

Imprimerie de l'Académie Impériale des sciences.
Vass.-Ostr., 9 ligne, № 12.

Abbréviations et sources fréquemment citées.

Abhidh. k. v.	= Abhidharmakoçavyākhyā, Mss. Burnouf et de la Société Asiatique.
Akutobhaya	= Commentaire de Nāgārjuna sur ses Mādhyamikasūtras (Tandjour, Mdo XVII).
Aṅg. n.	= Aṅguttaranikāya.
Apte	= Sanskrit-english dictionary.
Atthasāl.	= Atthasālinī.
Bhāvaviveka	= Commentaire des Mādhyamikasūtras (Tandjour, Mdo, XVIII).
Bhāmatī	= Edition de 1891 (Calcutta, Saraswati Press).
Bodhic. ṭ.	= Commentaire du Bodhicaryāvatāra, Chap. IX (publié par L. de la Vallée Poussin, dans Bouddhisme. Études et Matériaux).
Bodhic. p.	= Commentaire complet du même texte (publié dans *Bibl. Indica*). — Bodhic. p. IX renvoie à l'édition partielle qui précède.
Calc.	= Ms. de la Madhyamakavṛtti (Prasannapadā), Calcutta.
Cambr.	= Ms. de la Madhyamakavṛtti (Prasannapadā), Cambridge.
Candra Dās	= Dictionnaire tibétain (1903).
Childers	= Pali Dictionary.
Çikṣās.	= Çikṣāsamuccaya.
Çlokavārt.	= Mīmāmsaçlokavārtika (*Caukhambā S. S.*).
Desgodins	= Dictionnaire thibétain-latin-français par les missionnaires catholiques du Thibet.
Dharma s. et Dh.-s.	= Dharmasaṁgraha (Anecd. Oxon. Aryan Series I. 5).
Dh.-saṅ et Dh.-saṅ	= Dhamasaṅgaṇi (P. T. S.) et la traduction de M[rs] Rhys Davids (Manual of Buddhist Psychology).
Divyāv. et Div. Av.	= Divyāvadāna.
Foucaux	= Exemplaire du dictionnaire tibétain de Schmidt, ayant appartenu à Foucaux et annoté par lui.
Feer	= Analyse du Kandjour (*Annales Musée Guimet*, II.).
Itiv.	= Itivuttaka.
J. P. T. S.	= Journal of the Pali Text Society.
Kathāv. a.	= Kathāvatthu (P. T. S.) et commentaire (J. P. T. S.).

Lalita.	=	Lalitavistara.
Laṅkāv.	=	Laṅkāvatāra (*Buddhist Text Society*).
Majjh. N.	=	Majjhima Nikāya.
Mhv.	=	Mahāvastu.
Milinda	=	Milinda-pañho.
Minayeff	=	Recherches, trad. Assier de Pompignan
M. Vyut.	=	Mahāvyutpatti (publiée par Minayeff, Vol. I. и de son Буддизмъ)
Nanjio	=	Catalogue of the Chinese translation of the ... Tripiṭaka.
Nyāyabh.	=	Nyāyabhāṣya.
Nyāyab. ṭ	=	Nyāyabinduṭīkā (*Bibl. Indica*).
Nyāyak	=	Nyāyakandalī, Commentaire du Praçastapādabhāṣya, *Vizianagaram S. S.*).
Nyāyav. tātp	=	Nyāyavārtikatātparyaṭīkā (*Vizianagaram S. S.*).
Paris	=	Ms. de la Madhyamakavṛtti (Société Asiatique).
Prajñāp	=	Aṣṭasāhasrikā prajñāpāramitā.
Puggalap.	=	Puggalapaññatti.
Saṃ. N.	=	Saṃyutta Nikāya.
Sāṃkhyas.	=	Saṃkhyasūtras.
Sarvadarç. s.	=	Sarvadarçanasaṃgraha (*Bibl. Indica* 1858) et traduction du Bauddhadarçana dans Muséon 1901–2
Subhāṣitas.	=	Subhāṣitasaṃgraha (publié par C. Bendall dans le Muséon, 1903–4).
Sumaṅg. vil.	=	Sumaṅgalavilāsinī.
Tantravārt	=	Mīmāṃsātantravārtika.
Tarkas	=	Tarkasaṃgraha (*Bombay S. S.*).
Tār.	=	Tāranātha, Histoire du Bouddhisme, traduite par A. Schiefner.
Tib. / tibétain	=	Version tibétaine de notre texte (Tandjour, Mdo XXIII).
Vis-m	=	Visuddhimagga.
Warren	=	Buddhism in translations.
Wassilieff	=	Bouddhisme (traduction allemande, 1860).
W. K. F.	=	Sanskrit-Wörterb. in kürz. Fassung (Böhtlingk). St. Petersburg.

प्रसन्नपदा नाम माध्यमिकवृत्तिः[1]

I.

प्रत्ययपरीक्षा नाम प्रथमं प्रकरणं ॥

[आर्यमञ्जुश्रिये कुमारभूताय नमः[2] ।]

यो[3] ऽन्तद्वयावासविधूतवासः[4] संबुद्धधीसागरलब्धजन्मा ।
सद्धर्मतोयस्य[5] गभीरभावं यथानुबुद्धं कृपया जगाद ॥

[Tib. 2a] यस्य दर्शनतेजांसि परवादिमतेन्धनं ।
दहन्त्यद्यापि लोकस्य मानसानि तमांसि च ॥

---

1) D'après la transcription du Tib.: *Mūlamādhyamikavṛtti*.

2) D'après le Tib.; formule commune à tous les ouvrages de cette section du **Tandjour**. Paris et Camb. *namo buddhāya*; Calc. *namaḥ çrīvajrasattvāya | namo ratnatrayāya*.

3) Mètre **Upajāti**, mélange d'**Indravajrā** et d'**Upendravajrā** (**H. Jacobi**).

4) Mss. *yo 'ntardaya°*; le Tib. གང་ཞིག་ མཐའ་གཉིས་གནས་ལ་གནས་ བསལ་ ཞིང confirme la conjecture: *yo 'ntadvaya°*. — *āvāsa* (exigé par le mètre) = *vāsa*. — Les couples d'antas sont bien connus, cp. par exemple **Mahāvastu** III. 448. 10, et **Saṁyutta** N. III. 135. 12: *Sabbam atthīti . . . ayam eko anto; sabbam natthīti ayam dutiyo anto. Ete te Kaccāna ubho ante anupagamma majjhena dhammam deseti: avijjāpaccayā saṅkhārā* . . . . . . — L'accord presque littéral des deux textes est digne de remarque. — **Saṁ.** N. II. 20. 33, 63. 27. — Voyez infra ad V. 8.

5) དམ་ཆོས་མཛོད་ཀྱི་ = *saddharmakoṣasya*.

यस्यासमज्ञानवचःशरौघा निघ्नन्ति निःशेषभवारिसेना[1]।
त्रिधातुराज्याश्रयमादधाना विनेयलोकस्य सदेवकस्य ॥
नागार्जुनाय[2] प्रणिपत्य तस्मै तत्कारिकाणां विवृतिं करिष्ये ।
[3]उत्तानसत्प्रक्रियवाक्यनद्धा तर्कानिलाव्याकुलिता प्रसन्ना[4] ॥

तत्र ' न स्वतो नापि परतो न द्वाभ्यां ' इत्यादि वक्ष्यमाणं शास्त्रं[5]। [Tib. 2b] तस्य कानि संबन्धाभिधेयप्रयोजनानि ' इति प्रश्ने ' मध्यमकावतार[6]विहितविधिना अद्वयज्ञाना-लंकृतं महाकरुणोपाय[7]पुरःसरं प्रथमचित्तोत्पादं[8] तथागतज्ञानोत्पत्तिहेतुमादिं[9] कृत्वा या-

---

1) སྲིད་པའི་དགྲ་སྡེ་ On peut lire: *bhava-arisenā*; l'armée des ennemis = *bhava*, *saṃsāra*; cf. *saṃsāraçatru* (Avad. Kalpalatā 1, 1); plus probable que: *bhavāri* = ennemi de la vie mondaine (P. W.) = *tīrthya*, opposé à *vineya* (convertissable).

2) Bibliographie dans Grünwedel, Mythologie du Bouddhisme, p. 205, n. 31.

3) Tib. སླ་བ་དང་། སྦྱོར་ལེགས་དག་གིས་ ' '; *uttāna*, léger, facile à comprendre (s'oppose à *gambhīra*, Sarvadarç. s. 23. 9, et trad. (Muséon, 1901) note 158; Saṁ. N. III. 139. 24; M. Vyut. 63. 25. Cf. Mhv. III. 408. 18; Wassilieff, Buddh. 327); *satprakriya*, d'irréprochable étymologie (cf. Apte s. voc. *prakriyā* = etymological formation).

4) Tib. རབ་ཏུ་གསལ་བ་ Cf. Dhvanyāloka (Ed. Kāvyamālā, 1891) p. 82: *prasādas tu svacchatā çabdārthayoḥ* (H. Jacobi).

5) Voyez infra p. 12. 13.

6) Dans Tandjour, Mdo, XXIII; voyez Muséon, 1900, 2, pp. 226—236.

7) °*upāya*° manque dans Tib.

8) Il y a dix *cittotpādas* correspondant aux dix *bhūmis*. — Comp. Çikṣās. 9. 4, 212. 13; Mhv. I. 110. 4, et Maitreyavimokṣa cité Bodhic. p. I. 11 (*bodhicittotpādamahāratna*, °*mahāçūra*); ibid. III. 8, 10 etc. — Dh. saṅ. 1418: *daça cittuppādā* (E. Hardy).

9) འབྱུང་བའི་ རྒྱུར་གྱུར་པ་ ཐོག་མར་ མཛད་ནས་ = °*utpatter hetubhūtam ādiṃ kṛtvā*. — Cf. Mhv. I. 489; Çikṣās. 292. 5.

वदाचार्यार्यनागार्जुनस्य विदिताविपरीतप्रज्ञापारमितानीतेः[1] करुणया परावबोधार्थं शास्त्रप्रणयनं । इत्येष तावच्छास्त्रस्य संबन्धः[2] ।

यच्छास्ति व[ः] क्लेशरिपूनशेषान् संत्रायते दुर्गतितो भवाच्च ।
तच्छासनात्त्राणगुणाच्च शास्त्रं । एतद्द्वयं चान्यमतेषु नास्ति ॥ इति[3] ॥

स्वयमेव चाचार्यो वक्ष्यमाणसकलशास्त्राभिधेयार्थं सप्रयोजनमुपदर्शयन् तदविपरीतसंप्रकाशनेन माहात्म्यमुद्भाव्य तत्स्वभावाव्यतिरेकवर्तिने[4] परमगुरवे तथागताय शास्त्रप्रणयननिमित्तकं प्रणामं कर्तुकाम आह ।

अनिरोधमनुत्पादमनुच्छेदमशाश्वतं ।
अनेकार्थमनानार्थमनागममनिर्गमं[5] ॥
यः प्रतीत्यसमुत्पादं ।

इत्यादि[6] ॥ [2a] तदत्रानिरोधाद्यष्टविशेषणविशिष्टः प्रतीत्यसमुत्पादः शास्त्राभिधेयार्थः ।

---

1) ཚུལ = *nīti* = *vidhi* (ci-dessus 2. 6): qui connait exactement la manière dont il faut enseigner la P. P. (pour opérer le salut des créatures).

2) Dans le Vedāntasāra le *sambandha* (འབྲེལ་བ) est la relation entre la chose à démontrer (ici l'*aikya*) et l'instrument de démonstration (*tatpratipādakopaniṣad*); il a pour *lakṣaṇa* le *bodhyabodhakabhāva* de ces deux termes (p. 20, trad. Col. Jacob, 1881). Mais Nyāyabinduṭīkā, p. 2. l. 19: *upāyopeyabhāvaḥ prakaraṇaprayojanayoḥ sambandhaḥ*: le *sambandha* consiste en ceci que le traité est un moyen convenable pour réaliser le but. — Cf. Bodhic. p. 2, note 2; Çlokavārt. p. 6; et la théorie classique des quatre *anubandhas* (Tarkas. (B.S.S.) p. 70).

3) Cette strophe manque dans la version tibétaine. — La lecture *va[ḥ]* est douteuse, *vai*? *ca*?. — *çās* + *trā* = *çāstra*. On peut comparer Aṇubhāṣya, 14. 1: *çāstīti çāstram vedaḥ*; et Tantravārt. 174. 7. — Sur *çāsana*, Bodhic. p. 76. 5.

4) La sublimité du Tathāgata réside en ceci qu'il a correctement enseigné le Pratītyasamutpāda; avec la nature intime du Pratītyasamutpāda, le Tathāgata est inséparablement associé (Voir Comm. ad VII. 16).

5) Voyez la trad. de cette stance dans Brahmajālasūtra (Nanjio 1087), De Groot, Code du Mahāyāna, p. 87.

6) Voir infra p. 11. 13.

सर्वप्रपञ्चोपशमशिवलक्षणं[1] निर्वाणं शास्त्रस्य प्रयोजनं निर्दिष्टं ।

तं वन्दे वदतां वरं । इत्यनेन प्रणामः ।

इत्येष तावच्छ्लोकद्वयस्य[2] समुदायार्थः ॥

अवयवार्थस्तु विभज्यते । [Tib. 3a]

[3]तत्र निरुद्धिर्निरोधः । क्षणभङ्गो[4] निरोध इत्युच्यते ।

उत्पादनमुत्पादः । आत्मभावोन्मज्जन[मित्यर्थः] ।

उच्छित्तिरुच्छेदः । प्रबन्धविच्छित्तिरित्यर्थः ।

शाश्वतो नित्यः । सर्वकाले स्थाणु[5]रित्यर्थः ।

एकश्चासावर्थश्चेत्येकार्थो ऽभिन्नार्थः । न पृथगित्यर्थः ।

नानार्थो[6] भिन्नार्थः । पृथगित्यर्थः ।

आगतिरागमः । विप्रकृष्टदेशावस्थितानां संनिकृष्टदेशागमनं ।

निर्गतिर्निर्गमः । संनिकृष्टदेशावस्थितानां विप्रकृष्टदेशागमनं[3] ।

---

1) Voir infra V. 8, XXV. 24 et Comm ad XXVII. 30. — Comp. Rāmatāp. Up. (Weber, Mém. Acad. de Berlin 1864) p. 338. 10: . . . *na prajñam*, *nāprajñam*, . . . *alakṣaṇam* . . ., *prapañcopaçamam*, *advayam*. . .

2) Voir infra 11. 13.

3—3) Ces explications suivent, dans le tibétain, la discussion du mot *pratītyasamutpāda*. — Voyez p. 11, n. 1.

4) Expression fréquente dans les sources brahmaniques, Mīmāṁsāvārtika, 1, 3; Atmatattvaviveka, p. 1. Nyāyakusumāñjali, p. 16. 2 etc. — Voyez notamment Çlokavārt. p. 839: *ye 'pi sthūlavināçānām anyathānupapattitaḥ* | *kalpayanty antarā sūkṣmaṃ vināçitvaṃ pratikṣaṇam*; et ibid. pp. 424, 786. — Cf. Laṅkāvatāra (Buddhist T. S.) p. 43: *dvividho* . . . *vijñānānāṃ nirodho bhavati* | *yad uta prabandhanirodhaḥ* (*la*)*kṣaṇanirodhaç ca*. — Même distinction pour l'*utpāda* et la *sthiti*. — Cp. Yogasūtra III. 13 (H. Jacobi).

5) Mss.: *sthānu* (*sthāsnu*?).

6) Voyez Dh. Saṅgaṇi, trad., 72 note 2: *nānattasaññāna*. — Sarvadarç. s. 12. 13; Nyāyavārt. tātp. 430. 4 (IV. 1, 33. 34).

एतिर्गत्यर्थः[1]। प्रतिः प्राप्त्यर्थः[2]। उपसर्गवशेन धात्वर्थविपरिणामात्[3]।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
गङ्गासलिलमाधुर्यं सागरेण यथाम्भसा॥[4]

प्रतीत्यशब्दोऽत्र ल्यबन्तः[5] प्राप्तावपेक्षायां वर्तते। समुत्पूर्वः पदिः[6] प्रादुर्भावार्थ इति समुत्पादशब्दः प्रादुर्भावे वर्तते॥ ततश्च हेतुप्रत्ययापेक्षो भावानामुत्पादः प्रतीत्यसमुत्पादार्थः[7]॥

अपरे तु ब्रुवते। इतिर्गमनं विनाशः। इतौ साधव इत्याः[8]। प्रतिर्वीप्सार्थः[9]। इत्येवं तद्धितान्तमित्यशब्दं व्युत्पाद्य। प्रति प्रति इत्यानां विनाशिनां समुत्पाद इति वर्णयन्ति[10]।

---

1) Tib. ཨེ་ཏེ་ནི་.... Cf. Dhātup. 4. 35, et infra 5.7, 7.6. — Pour toute cette discussion, comparez Abhidharmakoçav., Ms. de la Soc As, foll. 232 sqq. — Voyez Viçuddhimagga, XVII (J.P.T.S. 1891, p. 137: First a great deal of space is given to the consideration of the word Paticcasamuppāda).

2) Tib. ཕྲད་པའི་དོན་ཏེ. Abhidh. k. v. *pratiḥ prāptyartha iti prāptidyotaka ity arthaḥ.*

3) Abhidh. k. v. *anekārthā hi dhātavaḥ . pratiç copasargaḥ prāptidyotaka ity ayam [i-dhātuḥ] gatyartham ujhitvā prāptyartham āpadyate.*

4) Cf. Siddhāntakaumudī, ad VIII. 4, 18 (H. Jacobi).

5) Pāṇ. VII. 1. 37. — (Mss *ityavantaḥ*).

6) Abhidh. k. v. *padi sattārtha iti pādaḥ sattāyām iti.*

7) Abhidh. k. v. *pratyayaṃ prāpya samudbhavaḥ pratītyasamutpādaḥ.*

8) Cp. Pāṇ. IV. 4, 98.

9) ཟློས་པ་; cp. Pāṇ. I. 4. 90. et Goldstücker, Dict. s. voc. *abhidhāna* (244 b 2).

10) Cette explication du mot *pratītya* est celle que Burnouf nous a fait connaître: elle est attribuée par l'Abhidharmakoçav. (fol. 234 b 1) au philosophe Sautrāntika Çrīlābha (Wass. p. 281; Tār. p. 67); cf. Introduction p. 623 (ibid. discussion de l'expression tibétaine): *anye punar iti . bhadantaÇrīlābhaḥ pratir vīpsārtha iti . nānāvacinām adhikaraṇānāṃ sarveṣāṃ kriyāguṇābhyāṃ vyāptum icchā vīpsā . tām ayaṃ pratir dyotayati . itau gatau sādhava ityāḥ . tatra sādhur iti yat-pratyayaḥ . itau vinaṣṭau sādhavaḥ . anavasthāyina ityarthaḥ . sam-upasargaḥ samavāyārthaṃ dyotayati . ut-pūrvaḥ padiḥ prādurbhāvārthaḥ dhātvarthapariṇāmāt tāṃ tāṃ sāmagrīṃ pratīti prater vīpsārthatāṃ darçayati . ityānāṃ vinaçvarāṇāṃ samavāyenotpādaḥ pratītyasamutpādaḥ . na kaçcid dharma eka utpadyate sahotpādaniyamāt.*

तेषां 'प्रतीत्यसमुत्पादं वो[1] भिक्षवो देशयिष्यामि' 'यः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति'[2] इत्येवमादौ विषये वीप्सार्थस्य संभवात् समाससद्भावाच्च स्याद्व्यापिनी व्युत्पत्तिः[3]। इह[4] तु [2b] 'चक्षुः प्रतीत्य रूपाणि[5] चोत्पद्यते चक्षुर्विज्ञानं' इत्येवमादौ विषये साक्षादङ्गीकृतार्थविशेषे[6] चक्षुः प्रतीत्येति प्रतीत्यशब्द एकचक्षुरिन्द्रियहेतुकायामप्येकविज्ञानोत्पत्तावभीष्टायां कुतो वीप्सार्थता॥ प्राप्त्यर्थस्त्वनङ्गीकृतार्थविशेषे ऽपि प्रती-

---

1) Tib. ཁྱེད་ལ; Mss. *bodhi bhikṣavo....* — Cette première formule (... *deçayiṣyāmi*) = Saṁ. N. II. 1. 5. 2. 13. = Abhidh. k. v. (236a 6) .... *pratītyasamutpādam cā* (sic) *bhikṣavo deçayiṣyāmīty adhikṛte...*

2) Le Çālistambasūtra (Kand. Mdo XVI, fol. 190b, et Abhidh. k. v. 231a 9; — voyez Minayeff, Recherches, 218 n. 2) répète une formule ancienne: *Athāyuṣmān Çāriputro Maitreyaṃ bodhisattvaṃ etad avocat: Çālistambham avalokya, Maitreya, bhagavatā bhikṣubhyaḥ sūtram idam uktam: «yo, bhikṣavaḥ, pratītyasamutpādaṃ paçyati, sa dharmaṃ paçyati; yo dharmaṃ paçyati, sa buddhaṃ paçyati» ity uktvā bhagavān tūṣṇīṃ babhūva....*

Cette formule est donnée in extenso infra ad VII. 16 d'après l'*āgama*; pour la seconde partie (*yo dharmaṃ ... sa buddham*), comp. Itivuttaka 91, 12 (Minayeff), Mahāparinibbāṇas. 60 (H. Oldenberg, Buddh. Stud. 677), Saṁyutta N. III, 120 (§ 13), et Saddhammasaṁgaho 62, 8 (J. P. T. S. 1890); l'identification du *dharma* et du *pratītyasamutpāda* nous est connue par Majjhima N. I. 191. 1.

3) Dans ces deux exemples, le mot *pratītya* fait partie d'un composé, et on peut lui attribuer un sens distributif: leur (*teṣām* = *apareṣām*) explication étymologique parait préférable (*jyāyasī* = ལེགས་པ).

4) Même argumentation Abhidh. k. v. (234b 5): *pratir vīpsārtha ity evamādikā kalpanā 'traiva pratītyasamutpādasūtre yujyate . iha kathaṃ bhaviṣyati: cakṣuḥ pratītya rūpāṇi cotpadyate cakṣurvijñānam iti? na hi pratītyānāṃ cakṣūṃṣi pratītyacakṣūṃṣīti samāsaḥ saṃbhavaty arthāyogāt . cakṣur hi pratītya rūpāṇi prāpya cotpadyate cakṣurvijñānam ity ayam artho gamyate.* Quel est ce Pratītyasamutpādasūtra, quels sont les autres textes (sūtrāntara: Mahānidānaparyāyasūtra, Sahetusapratyayasanidānasūtra) discutés dans l'Abhidh. k. v. et opposés au premier, nous essaierons de le dire dans une note finale — Signalons toutefois le fragment: *çakṣuḥ pratītya rūpāṇi cotpadyate āvilo manaskāro mohaja iti sūtre vacanāt* (Abhidh. k. v. 227b 2).

5) Le Tib. traduit: *cakṣū rūpaṃ ca pratītya.* — Nombreuses références: Saṁ. N. II p. 72 et suiv., IV. 33, 67. 86; Milinda 56. 26; etc.

6) = ཞལ་གྱིས་བཞེས་པ་ *aṅgīkar, abhyupagam.* — Le sens de cette phrase est éclairé par l'explication, p. 8, 5.

त्यशब्दे [Tib. 8b] संभवति ' प्राप्य संभवः[1] प्रतीत्य समुत्पाद[1] इति । अङ्गीकृतार्थविशेषे ऽपि संभवति ' चक्षुः प्रतीत्य चक्षुः प्राप्य चक्षुः प्रेक्ष्येति[2] व्याख्यानात् ।' तद्धितान्ते[3] चेत्यशब्दे ' चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं ' इत्यत्र प्रतीत्यशब्दस्याव्ययत्वाभावात् समासासद्भावाच्च विभक्तिश्रुतौ सत्यां ' चक्षुः प्रतीत्यं[4] विज्ञानं रूपाणि च ' इति निपातः[5] स्यात् । न चैतदेवं । इत्यव्ययस्यैव ल्यबन्तस्य व्युत्पत्तिरभ्युपेया ॥

यस्तु[6] ' वीप्सार्थत्वात्प्रत्युपसर्गस्य[7] ' इतेः[8] प्राप्त्यर्थत्वात् ' समुत्पादशब्दस्य च संभवार्थत्वात्[9] ' तांस्तान् प्रत्ययान् प्रतीत्य समुत्पादः[1] प्राप्य संभव[1] इत्येके । प्रति प्रति वि-

---

1) = འབྱུང་བ་

2) མིག་དང་ གཟུགས་ལ་ བལྟོས་ནས་ = *cakṣū rūpaṃ cāpekṣya.*

3) = དེ་ལ་ཕན་པ་ (*hita* = utile).

4) = བརྟེན་པ remplace le བརྟེན་ནས་ de la formule précédente, l. 3. — *Pa* est le soi-disant article et représente ici la vibhakti ou indice casuel; *nas* est l'indice du gérondif (= tvā).

5) = an irregular form, irregularity [Apte]; Tib.: འདོན་པ་ = *pāṭha*, leçon au moins aussi vraisemblable.

6) L'ācārya désigné de si sommaire façon par Candrakīrti est ce semble Bhāvaviveka (Bhavya), auteur de la Prajñāpradīpamūlamadhyamakavṛtti (Tandjour, Mdo XVIII, foll. 44b—299b) livre dont est extrait le présent passage (*vīpsārthatvāt . . . ity anye*) (fol. 45b 8). Une variante intéressante: རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་ ཞེས་བྱ་བ་ལ་ ཁ་ཅིག་ ན་རེ་ རྟེན་ཅིང་ ཞེས་བྱ་བའི་ ཚིག་གི་ཕྲད་ནི་ ཟློས་པའི་ དོན་ ཡིན་པའི་ཕྱིར་དང་། ''' au lieu de ཉེ་བར་བསྒྱུར་བ་ (= *upasarga*).

7) *prati* = རྟེན་ཅིང་

8) ≐ འབྲེལ་པ་, équivalent artificiel; hbrel-pa ne peut correspondre qu'à *sam*, cf. Burnouf, *loc. cit.*

9) སྐྱེ་བ་

नाशिनामुत्पादः प्रतीत्यसमुत्पाद इत्यन्ये । इति परव्याख्यानमनूद्य दूषणमभिधत्ते । तस्य परपक्षानुवादाकौशलमेव तावत्संभाव्यते ॥ किं कारणं । यो हि प्राप्त्यर्थं प्रतीत्यशब्दं[1] व्याचष्टे नासौ प्रतिं वीप्सार्थं व्याचष्टे ' नाप्येतिं प्राप्त्यर्थं । किं तर्हि प्रतिं प्राप्त्यर्थं ' समुदितं च प्रतीत्यशब्दं प्राप्तावेव वर्णयति ।

तेनेदानीं प्राप्यसंभवः[2] प्रतीत्यसमुत्पाद[2] इत्येवं व्युत्पादितेन प्रतीत्यसमुत्पादशब्देन यदि [Tib. 4a] निरवशेषसंभ[3]विपदार्थपरामर्शो विवक्षितः ' तदा तां तां हेतुप्रत्यय[4]सामग्रीं प्राप्य संभवः प्रतीत्य समुत्पाद इति वीप्सासंबन्धः क्रियते । अथ वि[3a]शेषपरामर्शः ' तदा चक्षुः प्राप्य[5] रूपाणि चेति न वीप्सायाः संबन्ध इति ॥ एवं तावदनुवादाकौशलमाचार्यस्य ॥

[6]एतद्वा [अ]युक्तं ' किं च[6] ' [7]अयुक्तमेतत् ' चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमिति ' अत्रार्थद्वयासंभवात्[7] ' इति यदुक्तं दूषणं तदपि नोपपद्यते । किं कारणं ।

---

1) Le Tib. lit: *pratītyasamutpādaçabdam.*

2) འབྱུང་བ་ = *sambhava* = *samutpāda.*

3) *sambhavin*, W.K.F. möglich = *utpādābhimukha, utpitsu* (Abhidh. k. v. 232b).

4) རྒྱུ་དང་རྐྱེན་གྱི་ཚོགས་པ་

5) Tib. བརྟེན་ནས་ = *pratītya*

6—6) Manque dans Tib.

7--7) Paris, Calc. ... *vijñānam ityatrāha yārthābhisambhavād iti veti yaduktam* ...; Cambr. *yārthabhisambandhaditi* ... Tib.: དེ་ཡང་ མི་རུང་སྟེ་ མིག་དང་ གཟུགས་ལ་ བརྟེན་ནས་ མིག་གི་རྣམ་པར་ཤེས་པ་ འབྱུང་ ཞེས་གསུངས་པ་འདི་ལ་ དོན་གཉིས་ག་ མེད་པའི་ཕྱིར་རོ་ et les mêmes lectures dans Bhāvaviveka (fol. 45b 5, avec la seule variante གཟུགས་རྣམས་ལ་ = *rūpāṇi*), où ce passage suit les explications reproduites plus haut par Candrakīrti (p. 7, n. 6), précédé par les mots གཞན་མ་ཡིན་པ་ནི་; c'est-à-dire, littéralement, *a-paraḥ*: ce terme désignant Bhāvaviveka, l'auteur luimême, par opposition aux *eke* et aux *anye* (7. 7, 8. 1). — Cp. 9. 6.

कथमने[नै]व[1] तत्प्राप्ते[ः] संभव इति युक्त्यनुपादानेन प्रतिज्ञामात्रत्वात् ॥ अथायमभिप्रायः स्यात् । अरूपित्वाद्विज्ञानस्य चक्षुषा प्राप्तिर्नास्ति । रूपिणामेव तत्प्राप्तिदर्शनादिति । एतदपि न युक्तं । प्राप्तफलोऽयं भिक्षुः । इत्यत्रापि प्राप्त्यभ्युपगमात् । प्राप्यशब्दस्य चापेक्ष्यशब्दपर्यायत्वात् । [2] प्राप्त्यर्थस्यैव आचार्यार्यनागार्जुनेन प्रतीत्यशब्दस्य ।

तत्तत्प्राप्य यदुत्पन्नं [नोत्पन्नं] तत्स्वभावतः ।[3]

इत्यभ्युपगमात् । [ततो][4] दूषणमपि नोपपद्यते । इत्यपरे[5] ॥

यच्चापि स्वमतं व्यवस्थापितं[6] । किं तर्हि । [7] अस्मिन् सति इदं भवति । अस्योत्पादाद् इदमुत्पद्यत[7] इति [8] इदंप्रत्ययतार्थः प्रतीत्यसमुत्पादार्थ इति । तदपि नोपपद्यते । प्रती-

1) Mss. *katham anavate(t)prāptesambhava*.... La lecture est plus que douteuse; car le Tib. ཇི་ལྟར་ མེད་ ཅེས་བྱ་བའི་ རིགས་པ་ མ་བཀོད་པས་ ··· = *katham abhāva* (= *asambhava*?) *iti yuktyanupādānāt*. . . .

2) D'après le Tib. *prāpyetyarthasya eva* ཕྲད་ནས་ ཞེས་བྱ་བ་ དོན་ཉིད་དུ་

3) cité dans Subhāṣitasaṃgraha 28 (*āryanāgārjunapādair uktam*) = Yuktiṣaṣṭikakārikā, 20 B (Mdo XVII. fol. 23 b 1).

4) ཞལ་གྱིས་ བཞེས་པའི་ཕྱིར་རོ །དེས་ན་ སྐྱོན་ཡང་·····

5) = Nous autres... Cp. la même formule fol. 10 a in fine et p. 8, note 7.

6) Ce passage (*kiṃ tarhi . . . pratītyasamutpādārthaḥ*) suit immédiatement dans Bhāvaviveka (fol. 45 b 5) la phrase citée supra p. 8, note 7.

7—7) Cette formule est celle que nous lisons dans le Çālistambas. (d'après Mdo XVI): *tatra katamaḥ* [*pratītyasamutpādaḥ*]? *pratītyasamutpādo nāma* [*yad idam: asmin sati, idaṃ bhavati, asyotpādād idam utpadyate*], *yad idam avidyāpratyayāḥ saṃskārāḥ*. . . . . . Les mots entre parenthèses d'après le Tib.; ils manquent dans la citation Abhidh. k. v. 231 b 2. — Elle est donnée plus complète dans Mahāvastu II. 285. 7: *yad idam: imasya sato, idaṃ bhavati; imasya asato, idaṃ na bhavati; imasyotpādād idam utpadyate; imasya nirodhād idaṃ nirudhyati iti pi . avidyāpratyayāḥ saṃskārāḥ* . . . A ce texte se superpose notamment Majjhima N. III. 63. 26.

Les explications, Abhidh. k. v. 234 b et 235, sont intéressantes.

Voyez aussi Bodhic. ṭ. 307. 9: *atrāyaṃ dharmasaṃketo yad asmin sati . . . utpadyata iti . etena bhagavataiva idampratyayatāmātralakṣaṇaḥ kāryakāraṇabhāvo 'pi darçitaḥ*. — Cp. Bodhic. p. VI. 27; et ci-dessous foll. 15 b init. et 47 a (VII. 15).

8) Tib. རྐྱེན་འདི་དང་ལྡན་པ་ཉིད་; cf. Mhv. III. 314. 4; Bodhic. ṭ. note ad 249. 19; Childers, s. voc. *idappaccayā*; Saṃyutta N. II. 25; Sarvadarç. s. 21. 1. (trad. Muséon, 1901, note 188).

त्यसमुत्पादशब्दयोः प्रत्येकमर्थविशेषानभिधानात् । तद्व्युत्पादस्य [Tib. 4b] च विवक्षितत्वात्[1] ।

अथापि रूढिशब्दं[2] प्रतीत्यसमुत्पादशब्दमभ्युपेत्य अरण्येतिलकादिवदेवमुच्यते[3] । तदपि नोपपन्नं । अवयवार्थानुगतस्यैव प्रतीत्यसमुत्पादस्य आचार्येण ।

तत्तत्प्राप्य यदुत्पन्नं नोत्पन्नं तत्स्वभावतः ।

इत्यभ्युपगमात् । अथ ।

अस्मिन् सतीदं भवति ह्रस्वे दीर्घं यथा सति ।

इति व्याख्यायमानेन ननु तदेवाभ्युपगतं भवति । ह्रस्वं प्रतीत्य ह्रस्वं प्राप्य[4] ह्रस्वमपेक्ष्य दीर्घं भवतीति । ततश्च यदेव [3b] दूष्यते तदेवाभ्युपगम्यत इति न युज्यते ॥

इत्यलं प्रसङ्गेन ॥

तदेवं हेतुप्रत्ययापेतं भावानामुत्पादं परिदीपयता भगवता अहेत्वेकहेतुविषमहेतुसंभूतत्वं स्वपरोभयकृतत्वं च भावानां निषिद्धं भवति[5] । तन्निषेधाच्च सांवृतानां[6] पदार्थानां यथावस्थितं सांवृतं स्वरूपमुद्भावितं भवति । स एवेदानीं सांवृतः प्रतीत्यसमु-

1) Mss. *vivarjitatvāt*; Tib. བརྗོད་པར་འདོད་པའི་ཕྱིར

2) གཏིང་ཚུགས་པའི་སྒྲ Cf. Nyāyakoça, s. voc. *rūḍha*; opposé à *yaugikaçabda* (s. voc. *yoga* 3). — Tarkasaṃgraha, p. 343.

3) Tib. དགོན་པའི་ཐིག་ལེ. — Cf. Pāṇ. II. 1. 44.

4) Le Tib. lit. *hrasvaṁ prāpya, hrasvaṁ pratītya*. . . — Comp. Laṅkāvatāra 59. 9; Nyāyasūtras IV. 1. 39, II. 1. 41.

5) Comp. Visuddhimagga, XVII, trad. par Warren, Buddhism, p. 169. — Abhidh. k. v. (231b 7): *yo 'yaṁ* . . *pratītyasamutpādaḥ* . . *nikāyāntarīyair* (= *āryamahīçāsakaiḥ*) *nityaḥ parikalpyate* . . .

6) Sur *saṁvṛti* et *sāṁvṛta*, cf. infra XXIV. 8 et suiv.; Dh. s. 95; Bodhic. ṭ. IX, Index s. voc.; Çiks. 264. 3; Wassilieff, 293; Kern, Manual, 127; Childers, s. voc. *sammuti*. — Çlokavārt. 217 (le Mādhyamika sūtra XXIV. 8 est cité 218, Comm. l. 10); Bhāmatī (éd. 1891) 372. 5; Ved. Kalpataru 286. 23; Ātmatattvaviveka (éd. 1873) 84. 10; Sāṃ. pr. bh. 15. 14 et ad I. 157.

त्पादः · स्वभावेनानुत्पन्नत्वाद् आर्यज्ञानापेक्षया नास्मिन्निरोधो विद्यते · यावन्नास्मिन्निर्गमो विद्यते · इत्यनिरोधादिभिरष्टाभिर्विशेषणैर्विशिष्यते [Tib. 5a][1]। यथा च निरोधादयो न सन्ति प्रतीत्यसमुत्पादस्य तथा सकलशास्त्रेण प्रतिपादयिष्यति।

अनन्तविशेषणसंभवे ऽपि प्रतीत्यसमुत्पादस्य · अष्टानामेवोपादानमेषां प्राधान्येन विवादाङ्गभूतत्वात्॥

यथावस्थितप्रतीत्यसमुत्पाददर्शने सति आर्याणामभिधेयादि[2]लक्षणस्य प्रपञ्च[3]स्य सर्वथोपरमात् · प्रपञ्चानामुपशमो ऽस्मिन्निति · स एव प्रतीत्यसमुत्पादः प्रपञ्चोपशम इत्युच्यते॥

चित्तचैत्ता[4]नां च तस्मिन्नप्रवृत्तौ ज्ञानज्ञेयव्यवहारनिवृत्तौ जातिजरामरणादिनिरवशेषोपद्रवरहितत्वात् · शिवः॥

यथाभिहितविशेषणस्य प्रतीत्यसमुत्पादस्य देशनाक्रियया ईप्सिततमत्वात् कर्मणा निर्देशः[5]·

अनिरोधमनुत्पादमनुच्छेदमशाश्वतं।
अनेकार्थमनानार्थमनागममनिर्गमं॥
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवं।
देशयामास संबुद्धस्तं वन्दे वदतां वरं[6]॥

---

1) Ici se placent dans le Tib. les explications données plus haut p. 4, 5–12.

2) D'après Tib. *abhidheyābhidhānalakṣaṇalakṣyādiprapañcānām sarvathoparamāt.*

3) *prapañca, prapañcayati,* cf. infra XI. 6, XVIII. 9.

4) Sur ces deux termes et leur valeur technique, cf. infra 18b in fine (*citta, caitasa*); Abhidh. k. v. (Fujishima, Bouddhisme Japonais, p. 5 et Dh. s. appendice); Sarvadarç. s. 20. 9; Nyāyabinduṭ. 14. 4; Anandagiri ad Brah. s. II. 2. 21.

5) Cf. Pāṇ. I 4. 49. — Tib. ལས་སུ་ བསྟན་ཏེ་

6) Tib. གང་གིས་ རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་ ། འགག་པ་མེད་པ་ སྐྱེ་མེད་པ ། ཆད་

यथोपवर्णितप्रतीत्यसमुत्पादावगमाच्च[1] तथागतस्यैवैकस्याविपरीतार्थवादित्वं [Tib. 5b] पश्यन् सर्वपर[2]प्रवादांश्च बा[4a]लप्रलापानिवावेत्य अतीव प्रसादानुगत आचार्यो भूयो भगवन्तं विशेषयति वदतां वरमिति ॥

अत्र च निरोधस्य पूर्वं प्रतिषेधः उत्पादनिरोधयोः पौर्वापर्यावस्थायाः सिद्ध्यभावं द्योतयितुं । वक्ष्यति हि

पूर्वं जातिर्यदि भवेज् जरामरणमुत्तरं ।
निर्जरामरणा जातिर्भवेज् जायेत चामृतः ॥ इति[3] ।

तस्मान्नायं नियमो यत्पूर्वमुत्पादेन भवितव्यं पश्चान्निरोधेनेति[4] ॥ इदानीमनिरोधादिविशिष्टप्रतीत्यसमुत्पादप्रतिपिपादयिषया उत्पादप्रतिषेधेन निरोधादिप्रतिषेधसौकर्यं मन्यमान आचार्यः प्रथममेवोत्पादप्रतिषेधमारभते ।

उत्पादो हि परैः परिकल्प्यमानः स्वतो वा परिकल्प्येत परत उभयतो ऽहेतुतो वा परिकल्प्येत[5] । सर्वथा च नोपपद्यत इति निश्चित्याह

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन के चन ॥ १[6]

པ་མེད་པ་ རྟག་མེད་པ། འོང་བ་མེད་པ་ འགྲོ་མེད་པ།། ཐ་དད་དོན་མིན་ དོན་ཅིག་མིན། སྤྲོས་པ་ཉེར་ཞི་ ཞི་ བསྟན་པ། རྫོགས་པའི་སངས་རྒྱས་ སྨྲ་རྣམས་ཀྱི། དམ་པ་ དེ་ལ་ ཕྱག་འཚལ་ལོ།།

1) Tib. ˈˈ ཐུགས་སུ་ཆུད་པའི་ཕྱིར།

2) *para* = ཕ་རོལ་པོ་

3) infra XI. 3. — Mss. *jāyeta vā mṛtaḥ* — mais Tib. མ་ཤི་བར་ ཡང་ སྐྱེ་བར་ འགྱུར

4) Tib. *yaj janma pūrvaṁ bhavati, jarāmaraṇaṁ paçcāt.*

5) Le même procédé de discussion infra XII. 1.

6) Tib. བདག་ལས་ མ་ཡིན་ གཞན་ལས་ མིན། གཉིས་ལས་ མ་ཡིན་ རྒྱུ་མེད་

तत्र जात्विति कदा चिदित्यर्थः। क्वचनशब्द आधारवचनः, क्वचिच्छब्दपर्यायः। [केचनशब्द आधेयवचनः, केचिच्छब्दपर्यायः](1)॥ ततश्चैवं संबन्धः, नैव स्वत उत्पन्ना जातु विद्यन्ते भावाः क्व चन के चन। एवं प्रतिज्ञात्रयमपि योज्यं॥

ननु च, नैव स्वत उत्पन्ना, इत्यवधार्यमाणे परत उत्पन्ना इत्यनिष्टं प्राप्नोति। न प्राप्नोति, प्रसज्य(2)प्रतिषेधस्य विवक्षितत्वात् [Tib. 6a] परतोऽप्युत्पादस्य प्रतिषेत्स्यमानत्वात्। यया चोपपत्त्या स्वत उत्पादो न संभवति, सा

तस्माद्धि तस्य भवने न गुणोऽस्ति कश्चिज्
जातस्य जन्म पुनरेव च नैव युक्तं(3)।

इत्यादिना मध्यमकावतारादिद्वारेणावसेया॥

མེད། དངོས་པོ་ གང་དག་ གང་ན་ཡང་། སྐྱེ་བ་ ནམ་ཡང་ ཡོད་མ་ཡིན༎ — Ce sūtra est cité Bodhic. p. IX. 242. 4, 347. 8, 368. 3 et Subhāṣitas. 17. 5, oú la thèse est longuement établie. Il est intéressant de comparer la discussion du Nyāya-sūtra IV. 1. 22: *animittato bhāvotpattiḥ kaṇṭakataikṣṇyādidarçanāt*; Nyāyakusumāñjali I. 4.

1) Tib. གང་དག་ ཅེས་བྱ་བའི་ སྒྲ་ནི་ རྟེན་པའི་ཚིག་སྟེ། སུ་དག་ ཅེས་བྱ་བའི་ སྒྲའི་ རྣམས་གྲངས་སོ། — *Akutobhaya*, Commentaire de Nāgārjuna (Mdo XVII, foll. 34—114): གང་དག་ ཅེས་བྱ་བ་ནི་ དངོས་པོ་འགའ་ཡང་ངོ་།

2) Tib. མེད་པར་དགག་པ་ བརྗོད་པར་འདོད་པ་; cf. W. K. F. s. voc. et VI (*prasajyāyaṁ pratiṣedha*, Pat. ad Pāṇ. I. 4. 57); Nyāyakoça s. voc., *nañarthaḥ*: marque *atyantābhāva* (*bhūtale ghaṭo nāsti*), *saṁsargābhāva* (*caitro na pacati*); cf. Tarkas. p. 369; Bhāmatī 299. 2; Nyāyav. tātp. 232. 19, 496. 11, 511. 11; M. Vyut. 199. 10; = négation sans plus. — Même argumentation dans Bhāvaviveka (fol. 48a 3): དགག་པ་ འདི་ནི་ མེད་པར་དགག་པའི་ དོན་དུ་ བལྟ་བར་བྱ་སྟེ། དགག་པ་ གཙོ་ཆེ་བའི་ཕྱིར།

3) = Madhyamakāvatāra VI. 8. — Voyez Muséon, 1900, p. 230.

आचार्यबुद्धपालितस्त्वाह[1] । न स्वत उत्पद्यन्ते भावाः । तदुत्पादवैयर्थ्यात् । अतिप्रसङ्ग[2]दोषाच्च । न हि स्वात्मना [4b] विद्यमानानां पदार्थानां पुनरुत्पादे प्रयोजनमस्ति । अथ सन्नपि जायेत । न कदा चिन्न जायेत । इति[3] ॥

अत्रैके[4] दूषणमाहुः । तदयुक्तं[5] । हेतुदृष्टान्तानभिधानात् । परोक्तदोषापरिहाराच्च[6] ।

---

1) La Madhyamakavṛtti de Buddhapālita (dont Candrakīrti est d'après la légende une réincarnation, Tār. p. 137) se trouve dans Tandjour, Mdo XVII foll. 178—317. Tāranātha constate une relation d'école entre ce docteur et Candrakīrti (p. 148). Le passage reproduit ici s'écarte légèrement du texte de Buddhapālita (fol. 182a l. 6): au lieu de *atiprasaṅgāt* nous avons *janmānavasthānāt* et in fine: གལ་ཏེ་ ····· མི་འགྱུར་བས་ དེ་ཡང་ མི་འདོད་དེ — La première de ces deux variantes est confirmée par Bhāvaviveka (fol. 48b 4) qui reproduit, pour le combattre, le raisonnement de Buddhapālita: འདི་ལས་ གཞན་དེ (= Buddhapālita) དངོས་པོ་རྣམས་ བདག་གི་བདག་ཉིད་ལས (= *svātmanaḥ*) སྐྱེ་ མེད་དེ། ··· ་དང་། སྐྱེ་བ་ ཐུག་པ་མེད་པར་ འགྱུར་བའི་ཕྱིར་རོ། ཞེས་ རྣམ་པར་ བཤད་པ་ཕྱེད་དོ། དེ་ནི་ རིགས་པ་ མ་ཡིན་ཏེ། གཏན་ཚིགས་དང་·····

2) Mss. doṣāt. — *doṣa* manque dans Tib.

3) Tib. དངོས་པོ་རྣམས་ བདག་ལས་ སྐྱེ་བ་ མེད་དོ། དེ་དག་གི་ སྐྱེ་བ་ དོན་མེད་ པ་ཉིད་དུ་ འགྱུར་བའི་ཕྱིར་ དང་། ཤིན་ཏུ་ཐལ་བར་འགྱུར་བའི་ཕྱིར་རོ། དངོས་པོ་ བདག་གི་ བདག་ཉིད་དུ་ ཡོད་པ་རྣམས་ལ་ནི་ ཡང་སྐྱེ་བ་ལ་ དགོས་པ་ མེད་དོ། ཅི་སྟེ་ ཡོད་ཀྱང་ སྐྱེ་ན་ ནམ་ཡང་ མི་སྐྱེ་བར་ མི་འགྱུར་རོ།

Comparez la discussion de la svata utpatti, dans Bodhic. IX. p. 241, Subhāṣitasaṃgraha et Abbidh. k. v. (fol. 232b): *utpannasya punar utpattau kalpyamānāyām anavasthāprasaṅgaḥ . dvitīye tṛtīye kṣaṇe punaḥ punar utpadyata ity aniṣṭaprasaṅgaḥ.*

4) eke = Bhāvaviveka-ādayaḥ.

5) Tib. གཏན་ཚིགས་ དང་ དཔེ་ མ་བརྗོད་པའི་ཕྱིར་ དང་ ། གཞན་གྱིས་ སྨྲས་པའི་ ཉེས་ མ་བསལ་བའི་ཕྱིར་རོ། ཐལ་བར་འགྱུར་བའི་ ཚིག་ ཡིན་པའི་ཕྱིར། སྐབས་ཀྱི་དོན་ལས་ བཟློག་པས་ བསྒྲུབ་པར་བྱ་བ་ དང་ དེའི་ཆོས་ བཟློག་པའི་དོན་མངོན

प्रसङ्गवाक्यत्वाच्च[1] प्रकृतार्थविपर्ययेण विपरीत[ार्थ]साध्यतद्धर्मव्यक्तौ[2] परस्मादुत्पन्ना[3] भावा जन्मसाफल्यात्' जन्मनिरोधाश्चेति कृतान्त[4]विरोधः स्यात् ॥

सर्वमेतद्दूषणमयुज्यमानं वयं पश्यामः । कथं कृत्वा ' तत्र यत्तावदुक्तं हेतुदृष्टान्तानभिधानादिति तदयुक्तं । किं कारणं ' यस्मात्परः स्वत उत्पत्तिमभ्युपगच्छन्[5] [6]विद्यमानस्य पुनरुत्पादे प्रयोजनं[6] पृच्छ्यते । स्वत इति हेतुत्वेन तदेव चोत्पद्यत इति ' न च विद्यमानस्य पुनरुत्पत्तौ प्रयोजनं पश्यामः ' अनवस्थां च पश्यामः । न च त्वयोत्पन्नस्य पुनरुत्पाद इष्यते ऽन[वस्था] चाप्यनिष्टेति ' तस्मान्निरुपपत्तिक एव त्वद्वादः[7] स्वाभ्युपगमविरुद्धश्चेति । [Tib. 6b] [8]किं [तन्मात्रेण] चोदिते परो नाभ्युपैति यतो हेतुदृष्टान्तोपादानसाफल्यं स्यात् । अथ स्वाभ्युपगमविरोध[9]चोदनयापि परो न निवर्तते ' तदापि निर्लज्जतया हेतुदृष्टान्ताभ्यामपि नैव निवर्तेत । न चोन्मत्तकेन सहास्माकं विवाद इति ॥

པས། དངོས་པོ་རྣམས་ གཞན་ལས་ སྐྱེ་བར་ འགྱུར་བ་དང་། སྐྱེ་བ་ འབྲས་བུ་དང་བཅས་པ་ཉིད་དུ་ འགྱུར་བ་ དང་། སྐྱེ་བ་ཐུག(ས)པ་ཡོད་པར་འགྱུར་བའི་ཕྱིར། གྲུབ་པའི་མཐའ་ དང་འགལ་བར་ འགྱུར་རོ། — Variante dans Bhāvaviveka .. གླགས་ཡོད་པའི་ཚིག་ ... [même équivalent sanscrit: *prasaṅga°*]. Comparez les passages parallèles, infra fol. 10a.

6) Mss. *°hārāt*. — Réponse à cette deuxième objection, 18. 3.

1) Tib.: = *°tvāt*. — Réponse à cette objection.

2) Mss. *°vyakto*, *°vyaktā*. — *mṅon-pas* = *vyakteḥ*.

3) Mss. *utpanno*.

4) Tib. = *siddhānta°*; de même infra ad 14,5; mais Bhāvaviveka: མཛད་པའི — janmanirodhāt ne correspond pas au Tib. skye-ba thug(s)-pa . . .: Bhāvaviveka lit *thug-pa*, peut être *zug-pa* (*hdzugs*).

5) Tib. = *icchan*.

6–6) Manque dans Tib.

7) ou *tvadvivādaḥ*. — Mss. *tadavādaḥ*. — Tib. ཁྱེད་ཅག་གི་རྩོད་པ་.

8) Camb. *kim iti codite*; Paris, Calc. *kimiyam iti codite*. — Tib འདི་དག་ཙམ་ཞིག་གིས བརྗོད་པ་ན་

9) Mss. *viruddhacodanayā*, cf. infra 11. 14, 13. 5. — «Même quand on lui démontre qu'il est en contradiction . . .».

[1] तस्मात् प्रियानुमानतामेवात्मन आचार्यः प्रकटयति ' अस्थाने ऽप्यनुमानं प्रवेशयन्[2] । न च माध्यमिकस्य स्वतः[3] स्वतन्त्रमनुमानं कर्तुं युक्तं पक्षान्तराभ्युपगमाभावात् । तथोक्तमार्यदेवेन[4] '

सदसत्सदसच्चेति यस्य पक्षो न विद्यते ।
उपालम्भश्चिरेणापि तस्य वक्तुं न शक्यते ॥

विग्रहव्यावर्तन्यां[5] चोक्तं ' [5a]

यदि का चन प्रतिज्ञा स्यान्मे तत[6] एव मे भवेद्दोषः ।
नास्ति च मम[7] प्रतिज्ञा तस्मान्नैवास्ति मे दोषः ॥
यदि किं चिदुपलभेयं प्रवर्तयेयं निवर्तयेयं वा ।
प्रत्यक्षादिभिरर्थैस्तदभावान्मे ऽनुपालम्भः ॥ इति ।

यदा चैवं स्वतन्त्रानुमानानभिधायित्वं माध्यमिकस्य तदा कुतो ' नाध्यात्मिकान्या-[8]यतनानि स्वत उत्पन्नानि ' इति स्वतन्त्रा प्रतिज्ञा यस्यां सांख्याः प्रत्यवस्थास्यन्ते[9] [Tib.

---

1) Mss. *sarvathā priya°*. — Tib. དེའི་ཕྱིར་...

2) Mss. *praveçayena na ca*. — Tib. འཆད་པར་བྱེད་པ་ན་; soit: *dhar*, *bhar*, *grah* (halten, gebrauchen).

3) Manque dans Tib. Cf. infra 16 11, 18. 5.

4) Catuhçatake XVI. 25 (Tandjour, Mdo XVIII, fol. 18b) — voyez Muséon, 1900, 2, p. 240.

5) stances 29 et 30 (Tandjour, Mdo XVII, fol. 32a), voyez Muséon, ibidem, p. 217. = Nanjio, 1251. — Mètre Aryā.

6) Mss. *tadeṣa*.

7) Mss. *me*. (Corrections de M. H. Jacobi).

8) Dh. s. XXIV; Childers, s. voc. (*cha ajjhattikāni āyatanāni*, *salāyatanaṁ*).

9) Tib. གང་ལ་ གྲངས་ཅན་པ་དག་གིས་ ཕྱིར་བཟློག་པར་བྱེད་པར་འགྱུར་བ་ Candrakīrti vise l'argumentation de Bhāvaviveka; nous la reproduisons dans son ensemble:

7 a] ' को ऽयं प्रतिज्ञार्थः ' किं कार्यात्मकात्[1] स्वत उत कारणात्मकादिति । किं चातः ' कार्यात्मकाच्चेत् सिद्धसाधनं[2] ' कारणात्मकाच्चेद् विरुद्धार्थता ' कारणात्मना विद्यमानस्यैव

(a) འདིར་ སྦྱོར་བའི་ ཚིག་ཏུ་ འགྱུར་བ་ ནི་ དོན་དམ་པར་ ནང་གི་སྐྱེ་མཆེད་རྣམས་ བདག་ལས་ སྐྱེ་བ་ མེད་པར་ ངེས་ཏེ། ཡོད་པའི་ཕྱིར། དཔེར་ན་ ཤེས་པ་ཡོད་པ་ཉིད་ བཞིན་ནོ། (a)

(b) གལ་ཏེ་ [fol. 48 b] གཏན་ཚིགས་ ཡོད་པ་ཉིད་ ནི་ མི་མཐུན་པའི་ ཕྱོགས་ལས་ ལྡོག་པ་ མ་བསྟན་པས་ གཏན་ཚིགས་ཉིད་ མ་ཡིན་ནོ་ ཞེ་ན། མེད་པ་ཁོ་ནའི་ཕྱིར་ དེ་ལ[ས]་ ལྡོག་པ་མེད་པས་ འདི་ དང་ ཐམས་ཅད་ལ་ ཉེས་པ་ མེད་དོ། (b)

འདིར་ གྲངས་ཅན་དག་ལས་ ཁ་ཅིག་ ཕྱིར་ཟློག་པར་བྱེད་དེ། དམ་བཅས་པ་ འདིའི··
(= *ko 'yaṃ pratijñārthaḥ*. — jusque: *sarvasyotpattimata ùtpādād iti*); et ensuite:

(c) དེ་ནི་ བཟང་པོ་ མ་ཡིན་ཏེ། བདག་ལས སྐྱེ་བ་ ཙམ་ དགག་པའི་ཕྱིར་རོ། རྒྱུའི་བདག་ཉིད་ལས་ན་ ཡང་ བདག་དང་གཞན་དུ་གྱུར་པ་ལས་ ཀྱང་ སྐྱེ་བ་ སེལ་བའི་ཕྱིར་རོ། ཤེས་པ་ཡོད་པ་ཉིད་ ནི་ ནུས་པའི་མཚན་ཉིད་དང་ལྡན་པ་ ཡོངས་སུ་བཟུང་བའི་ཕྱིར་ ཡང་ ཉེས་པ་ མེད་དོ། Suit l'argument de Buddhapālita introduit par འདི་ལས་ གཞན་ནི···· (voyez p. 14, ligne 8 de la note 1).

La phrase (a—a) est reproduite par Candrakīrti infra p. 25. 9—26. 1.
(b—b) = *vidyamānatvād iti hetur vipakṣanivartanāpratipādanān na hetur iti cet . abhāvād eva tato 'nivartanād atra [pakṣe] sarvatra cādoṣaḥ*. = Le hetu proposé, *vidyamānatvāt*, n'est pas hetu, parce qu'on ne montre pas qu'il y ait nivartana de ce hetu à l'égard du vipakṣa [svata utpanna]. — A cette objection, nous répondons: Il n'y a pas [démonstration du] nivartana [du hetu] à l'égard de ce [vipakṣa] par suite de la non existence [de ce vipakṣa]: donc il n'y a pas vice en ce qui regarde le pakṣa [ādhyātmikāny āyatanāni] et toute chose [existante].
c—c) = *na tad bhadraṃ, svata utpattimātraniṣedhāt, kāraṇātmakād ity ātmabhūtād anyabhūtād vāpy utpattiparihārāt . caitanyam iti çaktilakṣaṇavatparāmarçād apy adoṣaḥ*. = L'argumentation des Sāṃkhyas est mauvaise; car 1° nous nions tout uniment que la chose naisse d'elle même, 2° dire que la chose naît kāraṇātmakāt, c'est nier qu'elle naisse de soi ou d'autrui [car le kāraṇa n'est ni identique au kārya, ni différent du kārya]. Quant à l'exemple *caitanyavat*, il est irréprochable. . . .

1) Mss. *kiṃ kāryātmakaḥ svata . . . °ātmaka iti* | . . . *°ātmakaç cet . . .* | *kāraṇātmakaç cet* . . . Tib. ཅི་ བདག་ལས་ ཅེས་བྱ་བ་ འབྲས་བུའི་ བདག་ཉིད་ལས་སམ··

2) Il est clair que la chose n'est pas produite d'elle-même en tant que produite. — Cf. 21. 9. — Comp. l'argumentation Nyāyakandalī, 197. 10.

सर्वस्योत्पत्तिमत उत्पादादिति[1] ॥ *कुतो ऽस्माकं विद्यमानत्वादिति*[2] हेतुर्यस्य [सिद्धसाधनं] विरुद्धार्थता [वा] स्यात् । यस्य सिद्धसाधनस्य यस्याश्च विरुद्धार्थतायाः परिहारार्थं यत्नं करिष्यामः । तस्मात्परोक्तदोष[ा]प्रसङ्गादेव[3] तत्परिहार आचार्यबुद्धपालितेन [न][4] वर्णनीयः ॥

अथापि[5] स्यात् । माध्यमिकानां पक्षहेतुदृष्टान्तानामसिद्धेः स्वतन्त्रानुमानानभिधायित्वात्स्वत उत्पत्तिप्रतिषेधप्रतिज्ञातार्थसाधनं[6] मा भूदुभयसिद्धेन वानुमानेन परप्रतिज्ञा[6]निराकरणं । परप्रतिज्ञायास्तु[7] स्वत एवानुमानविरोधचोदनया[8] स्वत एव पक्षहेतुदृष्टान्तदोषरहितैः[9] पक्षादिभिर्भवितव्यम् ॥ ततश्च तदनभिधानात् तद्दोषापरिहाराच्च स एव दोष इति ॥

---

1) སྐྱེ་བ་ དང་ ལྡན་པ་ཐམས་ཅད་ ནི་ རྒྱུའི་བདག་ཉིད་དུ་ ཡོད་པ་ ཁོ་ན་ སྐྱེ་བའི་ ཕྱིར་རོ. — Bhavaviveka: skye-ba-can ... kho-na-las. — Car toutes les choses qui prennent naissance, prennent naissance [d'elles-mêmes], pour autant qu'elles existent sous la forme de cause. — La double objection de *siddhasādhana* et de *viruddhārthatā* est examinée ci-dessous p. 21 11.

2) *vidyamānatvāt* est dans l'hypothèse du contradicteur le hetu de cette *svatantrapratijñā* du Mādhyamika: *na ādhyātmikāni* . . . (16. 11, 26. 1).

3) Tib. ཐལ་བར་ མི་ འགྱུར་བ་

4) Tib. བརྗོད་པར་བྱ་བ་ མ་ ཡིན་ནོ།

5) Objection, lignes 5—9.

6) Le Tib. lit *pratijñā*, non pas *pratijñātārtha*.

7) གཞན་གྱི་ དམ་བཅའ་བ་ལ་ རང་གི་ རྗེས་སུ་དཔག་པས་ འགལ་བ་ བརྗོད་པར་ ནི་ བྱ་དགོས་པས་: *parapratijñāyāṃ sva-anumānena virodha[sya] abhidhānenaiva bhavitavyam.*

8) Cf. infra p. 21. 13. — Peut-être: °*codanāyāṃ svata*...

9) D'après Tib. — Mss. *dṛṣṭāntapekṣārahitaiḥ*. — *svataḥ* (རང་ཉིད་ལ་) = à leur point de vue.

(1)उच्यते । नैतदेवं । किं कारणम् । यस्माद्यो हि यमर्थं प्रतिजानीते तेन स्वनिश्चयवदन्येषां निश्चयोत्पादनेच्छया ययोपपत्त्यासावर्थोऽधिगतः सैवोपपत्तिः परस्मा(2)युपदेष्टव्या । तस्मादेष तावन्न्यायः । यत्परे(3)णैव स्वाभ्युपगतप्रतिज्ञातार्थसाधनमुपादेयं [5b] । (4)न चायं परं प्रति [हेतुः] । हेतुदृष्टान्तासंभवात्(5) प्रतिज्ञा(6)नुसारतयैव केवलं स्वप्रतिज्ञातार्थसाधनमुपादत्त(4) इति निरुपपत्तिकपक्षाभ्युपगमात् स्वात्मानमेवायं केवलं विसंवादयन् न शक्नोति परेषां निश्चयमाधातुमिति । इदमेवास्य स्पष्टतरं दूषणं यदुत स्वप्रतिज्ञातार्थसाधनासामर्थ्यमिति किमत्रानुमान(7)बाधोद्भावनया प्रयोजनम् ॥

अथाप्यवश्यं स्वतोऽनुमान(8)विरोधदोष उद्भावनीयः ॥

---

1) Réponse, lignes 1—7.

2) Mss. *parasmād upa*°. — Tib. གཞན་ལ་. — Comparer Nyāyakandalī, 198. 18, citée ci-dessous p. 23. n. 3, l. 11.

3) Tib. ཕ་རོལ་པོ = l'objectant, le Sāṃkhya. — Voir ci-dessous, p. 23, n. 3.

4—4) Tib.: འདི་ནི་ གཞན་ལ་ གཏན་ཚིགས་ ཀྱང་ མ་ ཡིན་ནོ། གཏན་ཚིགས་ དང་ དཔེ་ མེད་པའི་ཕྱིར་ རང་གི་ དམ་བཅའ་བའི་ དོན་[7b]གྱི་ སྒྲུབ་པར་བྱེད་པ་ ནི་ ཁས་ འཆེས་པའི་ རྗེས་སུ་འབྲངས་པ་ འབའ་ཞིག་ ཉེ་བར་བཀོད་པ་ ཡིན་ཏེ།

«Mais la même raison n'existe pas en ce qui regarde l'*autre*»: l'adversaire, qui affirme, doit prouver, — non pas le Mādhyamika; et «faute de présenter argument et exemple, la preuve du contenu de sa proposition n'étant que son obstination à s'y attacher, il adopte un *pakṣa*...

5) Tib. མེད་པ = *asaṃbhava, abhāva.*

6) Mss. *svāpratijñāmātrasāratayaiva kevalaṃ svapratijñātārthamātram upādatte.*

7) '' རྗེས་སུ་དཔག་པས = *anumānena.*

8) Le Tib. supprime *doṣa* et lit *svānumāna* (རང་གི་''; cf. infra p. 21. 6), ce qui revient au même: «la contradiction inhérente à notre raisonnement». — Ceci est une remarque du contradicteur.

सो ऽप्युद्भावित एवाचार्यबुद्धपालितेन[1]। [कथमिति चेत्]' न स्वत उत्पद्यन्ते भावाः' तदुत्पादवैयर्थ्यादिति वचनात्। अत्र[2] हि तदित्यनेन स्वात्मना विद्यमानस्य परामर्शः। [कस्मादिति चेत्'] तथा[3] हि तस्य [सं]ग्रहेण[ोक्त]वाक्यस्यैतद्विवरणवाक्यं' न[4] हि स्वात्मना विद्यमानानां पुनरुत्पादे प्रयोजनमिति। अनेन च वाक्येन साध्यसाधनधर्मानुगतस्य परप्रसिद्धस्य साधर्म्य[5]दृष्टान्तस्योपादानम्। तत्र स्वात्मना विद्यमानस्येत्यनेन हेतुपरामर्शः। उत्पादवैयर्थ्यादित्यनेन साध्यधर्मपरामर्शः॥

तत्र यथानित्यः शब्दः कृतकत्वात्[6]। कृतकमनित्यं दृष्टं' यथा घटः' तथा च कृतकः शब्दः' तस्मात्कृतकत्वादनित्य इति कृतकत्वमत्रोपनयाभिव्यक्तो हेतुः[7]।

---

1) Cf. supra p. 14. 1.

2) Mss. *atra hi svata ity anena*... Tib. དེ་ལ་ དེ་དག་ ཅེས་བྱ་བ་ འདིས་ ནི་ རང་གི་བདག་ཉིད་དུ···· *de-dag* correspond à *de-dag-gi* (*teṣām*) de la phrase précédente (*teṣām utpādavaiyarthyāt*).

3) Mss.: *tatra hy atra graheṇa kuvakyasya*....., *tathā hi tasya*....., *tathā hy asya*..... — Faut-il écarter l'interprétation: *tasya grahena* = «en employant le mot tad»? — cf. la note précédente. — La restitution très hypothétique s'appuie sur le tibétain:

འདི་ལྟར་·········ཞེས་བྱ་བ་ འདི་ནི་ མདོར་བཞག་པའི་ ངག་ དེའི་ འགྲེལ་པའི་ ངག་ ཡིན་ལ = *tathā: na hi svātmanā vidyamānānāṃ punarutpāde prayojanam iti, etat saṃkṣepataḥ nihsrtasya vākyasya tasya vivaraṇavākyam».* — La phrase *na hi svātmanā*.......... donne l'explication de *tadutpādavaiyarthyāt* — (*saṃgrah*, cf infra p. 23. 1: *yathoditam artham saṃgṛhya*).

4) Sic Tib. — Mss. *kiṃ hi*..., mais cf. p. 14. 2.

5) Exemple qui donne un cas analogue; *sādhana* = *svātmanā vidyamānatva*; *sādhya* = *utpādavaiyarthya*; *parāmarça*: le fait de prendre en considération.

6) Tib. བྱས་པ་ མི་རྟག་པའི་ཕྱིར་རོ = *kṛtakānityatvāt.*

7) Mss. °*vyakto*. D'après Tib. °*vyaktaṃ*, en accord avec *kṛtakatvam*. ཉེ་བར་སྦྱར་བ = *upanaya*, cf. Tarkas. p. 265.

एवमिहापि ' न स्वत उत्पद्यन्ते भावाः स्वात्मना विद्यमानानां [Tib. 8a] पुनरुत्पादवैयर्थ्यात् ' इह स्वात्मना विद्यमानं पुरो ऽवस्थितं घटादिकं पुनरुत्पादानपेक्षं दृष्टं ' तथा च मृत्पिण्डाद्यवस्थायामपि यदि [6a] स्वात्मना विद्यमानं घटादिकमिति मन्यसे तदापि तस्य स्वात्मना विद्यमानस्य नास्त्युत्पाद इति । एवं स्वात्मना विद्यमानत्वेनोपनयाभिव्यक्तेन पुनरुत्पादप्रतिषेधाव्यभिचारिणा हेतुना स्वत[1] एव सांख्यस्यानुमानविरोधोद्भावनमनुष्ठितमेवेति ॥

तत्किमुच्यते ' तदयुक्तं हेतुदृष्टान्तानभिधानादिति ॥

न च केवलं हेतुदृष्टान्तानभिधानं न संभवति ' परोक्तदोषापरिहार[2]दोषो न संभवति । कथं कृत्वा ' सांख्या हि नैवाभिव्यक्तरूपस्य पुरो ऽवस्थितस्य घटस्य पुनरभिव्यक्तिमिच्छन्ति '[3] तस्यैव चेह दृष्टान्तत्वेनोपादानं सिद्धरूपत्वात्[3] ' अनभिव्यक्तरूपस्य च शक्तिरूपापन्नस्योत्पत्तिप्रतिषेधविशिष्टसाध्यत्वात् कुतः सिद्धसाधनपक्षदोषाशङ्का कुतो वा हेतोर्विरुद्धार्थताशङ्केति[4] ।

तस्मात्स्वतो[5] ऽनुमान[वि]रोधचोदनायामपि यथोपवर्णितदोषाभावात्[6]परोक्तदोषापरिहारासंभव एव ' इत्यसंबद्धमेवैत[7]द्दूषणमिति विज्ञेयम् ।

---

1) Tib. རང་ཉིད་ཀྱིས་ རྗེས་སུ་....

2) Voir supra p. 14. 4. — D'après Tib. °*aparihāro na*..., cf. p. 19, n. 8.

3–3) དེ་ཉིད་ འདེར་ དཔེ་ཉིད་དུ་ གྲུབ་པའི་ངོ་བོ་ཡིན་པའི་ཕྱིར་ ལ།; le mot *upādānam* n'est pas traduit.

4) Voir supra p. 17. 2.

5) རང་གི་ རྗེས་སུ་དཔག་པས་ འགལ་ བརྗོད་པ་ན་ ཡང་ = *svānumānena virodhodbhāvanāyām api.*

6) Mss. *doṣābhāvata*, °*bhāvatavata*. Tib. = *doṣānabhidhānāt*.

7) *etad*: Tib. འདི་དག་ (duel) = les deux premières objections, ci-dessus p. 14. 4.

घटादिकमित्यादिशब्देन निरवशेषोत्पित्सुपदार्थसंग्रहस्य विवक्षितत्वादनैकान्तिकतापि पटादिभिर्नैव[1] संभवति[2] ॥ [Tib. 8b].

अथ वायमन्यः प्रयोगमार्गः[3] । पुरुषव्यतिरिक्ताः पदार्थाः स्वत उत्पत्तिवादिनः । तत एव[4] । न स्वत उत्पद्यन्ते । स्वात्मना विद्यमानत्वात् । पुरुषवत्[5] । इतीदमुदाहरणमुदाहार्यम्[6] ॥

यद्यपि चाभिव्यक्तिवादिन उत्पादप्रतिषेधो न बाधकः । तथाप्यभिव्यक्तावुत्पादशब्दं निपात्य । पूर्वं पश्चाच्चानुपलब्ध्युपलब्धिसाधर्म्येण उत्पादशब्दे[6b]नाभिव्यक्तेरेवाभिधानादयं प्रतिषेधो नाबाधकः[7] ॥

कथं पुनरयं यथोक्तार्थाभिधानं विना व्यस्तविचारो लभ्यत[8] इति चेत् । तदु-

---

1) Mss. *ghaṭādibhir.* — Tib. སྣམ་བུ་

2) *pakṣa* = *sarva utpitsupadārthaḥ* (*çaktirūpapannāḥ*), *hetu* = *svātmanā vidyamānatvāt*, *dṛṣṭānta* = *puro 'vasthitaṃ ghaṭādikam.*

3) *prayoga*, cf. Nyāyabinduṭ. 47. 6, 48. 1. — Ce nouveau mode de démonstration complète le raisonnement; et l'opposition établie par le Sāṃkhya (*svata utpattivādin*) entre le *puruṣa* et les autres *padārthas*, permet d'éviter l'objection: «Votre raisonnement est *kevalānvayin*, donc *anupasaṃhārin*, puisque le *dṛṣṭānta* est *sarva.*» [Note de M. H. Jacobi.] — Tarkas. p. 305.

4) Tib. omet *tata eva.* Faut-il maintenir ces deux mots? j'en doute.

5) Mss. *puruṣavadatīdam ud°*; *°vedatīvam ud°.*

6) *pakṣa* = *padārthaḥ*, *hetu* = *svātmanā vidyamānatvat*, *dṛṣṭanta* = *puruṣa.*

7) Tib. = *na bādhakaḥ.* — Les partisans de l'*abhivyakti* (manifestation d'une chose qui existe antérieurement) diront que la réfutation de l'*utpāda* ne les atteint pas: nous dirons de l'*abhivyakti* ce que nous avons dit de l'*utpāda*, et notre objection portera (na abādhaka). — Cf. Bodhic. ṭ. IX. 134, 135, où ce raisonnement est développé.

8) Mss. *yathoktaḥ svābhidhānaṃ vinai vyasthaṃ vicāro.* La confusion ***stha*** = ***sta*** est fréquente. — Tib. ཡང་ ཇི་སྐད་སྨྲས་པའི་ དོན་གྱི་ བརྗོད་པར་བྱེད་པ་མེད་པར་ རྣམ་པར་དཔྱོད་པ་ འདི་ལྟ་བུ་ འདི་ ཇི་ལྟར་ རྙེད་ ཅེ་ན། = ... ***vinaivaṃvidho vicāraḥ***..... — ***vyastavicāra***, cette argumentation in extenso?

च्यते ' अर्थवाक्यानि[1] तानि महार्थानि यथोदितमर्थं संगृह्य प्रवृत्तानि ' तानि च व्याख्यायमानानि यथोक्तमर्थात्मानं प्रसूयन्त इति नात्र किं चिदनुपात्तं संभाव्यते[2]।

प्रसङ्गविपरीतेन चार्थेन परस्यैव संबन्धो ' नास्माकं स्वप्रतिज्ञाया अभावात्[3]। ततश्च सिद्धान्त[4]विरोधासंभवः ' परस्य च यावद्बहवो दोषाः प्रसङ्गविपरीतापत्त्यापद्यन्ते तावदस्माभिरभीष्यत एवेति।

---

1) Mss. *atha vākyāni hṛtāni*. Tib. དོན་གྱི་ ངག་འདི་དག་ དེ་ དོན་ཆེན་པོ་ཅན་ ཡིན་པས་ = ...*tāni mahārthatvād yathoditam*... . — L'*arthavākya* en cause est le raisonnement de Buddhapālita, ci-dessus p. 14. 1; le *mahāvākya* du système, c'est la formule de Nāgārjuna, p. 12. 13. — Voir Dict. de St.-Pétersbourg, s. voc. *arthavāda*, *mahārtha*.

2) Tib. མ་བསྟན་པ་''མི་ སྲིད་དོ། *na*...*anupadiṣṭam*... *saṃbhavati*. — *srid* dans le même emploi, trad. du Nyāyabindu, ad p. 3. 5. 8.

3) Notre adversaire est lié à une opinion qui, par conséquence logique, est contradictoire; mais nous, qui n'affirmons rien...... L'emploi du *prasaṅgasādhana* (cf. p. 15. 1, 19. 1, et ci-dessous notamment foll. 9b, 10a) est décrit dans la Nyāyakandalī, 198. 12: *athocyate: prasaṅgasādhanam idam; prasaṅgasādhanaṃ ca na svapakṣasādhanāyopādīyate, kiṃ tu parasyāniṣṭāpādanārtham; parāniṣṭaṃ ca tadabhyupagamasiddhair eva dharmādibhiḥ çakyam āpādayitum . tatra pramāṇena svapratītir anapekṣaṇīyā, na hy evaṃ paraḥ pratyavasthatum arhati: tavāsiddhā dharmādayo, nāhaṃ svasiddheṣv api teṣu pratipadya iti — atra brūmaḥ: kiṃ prasaṅgasādhanam anumānaṃ tadanyad vā? yady anyat, kvāpy uktalakṣaṇeṣu pramāṇeṣv antarbhāvo varṇanīyo, vaktavyaṃ vā lakṣaṇāntaram; yadi tv anumānam eva, tadā svapratītipūrvakam eva pravartate, svaniçcayavad anyeṣāṃ niçcayotpipādayiṣayā sarvasya parārthānumānasya pravṛtteḥ*.....

Le *prasaṅga* n'est pas un *sādhana: prasaṅgo hi na sādhanaṃ, hetor abhāvāt*; *yathāhur: asti prasaṅgo na prasaṅgasādhanam iti* (Nyāyavārt. tātp. 407. 27).

Le Mādhyamika ne cherche qu'à mettre son adversaire en contradiction avec lui-même; il n'a ni *pratijñā* ni *hetu* qui lui soient propres. C'est pour cela que Candrakīrti repousse le *prayoga* de Bhāvaviveka (p. 16. 12 et infra p. 25. 9).

Bhāvaviveka et son école (*Svātantrikas*) prétendent établir la thése *mādhyamika* (Nāgārjuna, ci-dessus 12. 13) par des arguments personnels, *svatantra*. Buddhapālita, chef des *Prāsaṅgikas*, n'emploie que le raisonnement par l'absurde (*parasyāniṣṭāpādana*). Les deux écoles doivent leur nom à cette opposition sur le terrain logique. C'est ce qu'a bien vu Wassilieff, p. 320 (351) 20, malgré quelques hésitations.

Sur le *prasaṅga*, M. Vyut. 199. 116, Sarvadarçanas. (trad. dans Muséon 1901—2) p. 13 du tiré à part.

4) Plus haut *kṛtānta* (p. 15 n. 4) contre le Tib.

कुतो नु खल्वविपरीताचार्यनागार्जुनमतानुसारिण आचार्यबुद्धपालितस्य सावकाशवचनाभिधायित्वं यतो ऽस्य परो ऽवकाशं लभेत। निःस्वभावभाववादिना [1] सस्वभावभाववादिनः[1] प्रसङ्ग आपद्यमाने कुतः प्रसङ्गविपरीतार्थप्रसङ्गिता[2]। न हि शब्दा दाण्डपाशिका[3] इव वक्तारमस्वतन्त्रयन्ति[4]' [Tib. 9a] किं तर्हि सत्यां शक्तौ[5] वक्तुर्विवक्षामनुविधीयन्ते। ततश्च परप्रतिज्ञाप्रतिषेधमात्रफलत्वात्प्रसङ्गापादनस्य नास्ति प्रसङ्गविपरीतार्थापत्तिः[6]।

तथा चाचार्यो भूयसा प्रसङ्गापत्तिमुखेनैव परपक्षं निराकरोति स्म'

नाकाशं विद्यते किं चित्पूर्वमाकाशलक्षणात्।
अलक्षणं प्रसज्येत स्यात्पूर्वं यदि लक्षणात्[7]॥
रूपकारणनिर्मुक्ते रूपे रूपं प्रसज्यते।
अहेतुकं न चास्त्यर्थः कश्चिदहेतुकः क्व चित्[8]॥

तद्यथा'

---

1) Mss. °*nādinaḥ*, °*nādinā*; cf. Bodhic. ṭ., index s. voc.

2) Tib. ཐལ་བ་ལས་ བཟློག་པའི་ དོན་ཅན་དུ་ ཐལ་བར་ ག་ལ་ འགྱུར་ཏེ་ = *prasaṅgena viparītarthatāprasaṅgaḥ kutaḥ*; soit, en reprenant les termes employés plus haut (p. 23. 8): *prasaṅgaviparītārthena sambandhaprasaṅgaḥ kutaḥ*.

3) = Veilleur de nuit, jusqu'ici dans le Deçīn. 2. 99, cf. W. K. F. s. voc. *daṇḍapāçaka*, *dāṇḍapāçika*.

4) Mss. *asvamantrayanti*. — Tib. དབང་མ་ཡིན་པར་ བྱེད་པ་ མ་ ཡིན་ནོ།

5) Tarkas. p. 338.

6) Plus haut °*āpattyā* (23.4) = བསྒྲུབ་བས, *āpadyamāne* (24.3) = བསྒྲུབས་པ་ན; ici: དོན་དུ་འགྱུར་བ་ཡོད་པ་; de même 23.4 *āpadyante* = འགྱུར་བ་. — *arthāpatti*, voir Nyāyabhāṣya II. 2. 1: *arthād āpattir*, *arthāpattiḥ* . *āpattiḥ*, *prāptiḥ*, *prasaṅgaḥ* . *yathābhidhīyamāne 'rthe yo 'nyo 'rthaḥ prasajyate*, *so 'rthāpattiḥ*.

7) = V. 1.

8) = IV. 2. — La lecture de tous les Mss. est *āhetukam*, *āhetukaḥ*; de même infra. — Bhagavadgītā 18. 22 *ahaituka* (cité par M. J. Speyer, Avadānaçataka 76. note 9). — Samādhirāja 14. 32, Rāṣṭrapālaparipṛcchā 16. 13, Prajñāpāramitā 256. 13, 273. 2, etc.: *ānimitta* (*samādhi*).

भावस्तावन्न निर्वाणं जरामरणलक्षणम् ।

प्रसज्येतास्ति भावो हि न जरामरणं विना[1] ॥ इत्यादिना ॥

अथार्थवाक्यत्वादाचार्यवाक्यानां महार्थत्वे सत्यनेकप्रयोगनिष्पत्तिहेतुत्वं परिकल्प्यते[2] । आचार्यबुद्धपालितव्याख्यानान्यपि[3] किमिति न तथैव परिकल्प्यन्ते[4] । अथ स्याद्वृत्तिकाराणामेष न्यायो [7a] यत्प्रयोगवाक्यविस्तराभिधानं कर्तव्यमिति[5] ॥

एतदपि नास्ति । विग्रहव्यावर्तन्यां[6] वृत्तिं कुर्वताप्याचार्येण प्रयोगवाक्यानभिधानात् ॥ अपि चात्मनस्तर्कशास्त्राति[7]कौशलमात्रमावि[श्चिकीर्षया][8] अङ्गीकृतमध्यमकदर्शनस्यापि यत्स्वतन्त्रप्रयोगवाक्याभिधानं तदतितरामनेकदोषसमुदायास्पदमस्य तार्किकस्योपलक्ष्यते । कथं कृत्वा ।[9] [तत्र] यत्तावदेवमुक्तं । [अत्र] प्रयोगवाक्यं भवति । न पर[म]ार्थ[त]

1) = XXV. 4.

2) Par l'auteur de la présente Vṛtti. — རྟོག་... = *kalpyate.*

3) ངག་དག་ = *vākyāni.*

4) De telle sorte que notre *prayoga* (ci-dessous l. 9) soit justifié. — C'est le *pūrvapakṣavādin*, Bhāvaviveka, qui a la parole. — ཡོངས་སུ་ རྟོག་ = *parikalpyante.*

5) Ponctué d'après le Tib.

6) Mss. *vigrahavyāpattibhyām.* — Voir p. 16, n. 5. — La Vṛtti, Mdo XVII, foll 138—156, est de Nāgārjuna.

7) P. et Calc. °*çāstrādi*, Camb. *ati* = Tib. ཤིན་ཏུ་

8) Mss. °*mātramāvikhyăsāraṅgī*°. Tib. ཙམ་ཞིག་ བསྟན་པར་ འདོད་པས་ = °*mātranidarçanecchayā.*

9) Mss. *yat tāvad eva yukiaṃ prayogavākyatva tad bhavati.* Tib. དེ་ལ་ རེ་ཞིག་ གང་ འདི་སྐད་ཅེས། འདིར་ སྦྱོར་བའི་ཚིག་ཏུ་ འགྱུར་བ་ནི། དོན་ དམ་ པར་... ། སྐྱེས་པ་ཡོད་པ་ཉིད་ བཞིན་ནོ། ཞེས་སྨྲས་པ་ ཡིན་ནོ། Extrait de Bhāvaviveka, reproduit ci-dessus p. 17, l. 1 de la note.

आध्यात्मिकान्यायतनानि [Tib. 9b] स्वत उत्पन्नानि ' विद्यमानत्वात् ' चैतन्यवदिति[1]। किमर्थं पुनरत्र परमार्थत इति विशेषणमुपादीयते।

लोकसंवृत्या[2]भ्युपगतस्योत्पादस्याप्रतिषिध्यमानत्वात् ' प्रतिषेधे चाभ्युपेतबाधाप्रसङ्गादिति चेत्। नैतद्युक्तं संवृत्यापि स्वत उत्पत्त्यनभ्युपगमात्।

यथोक्तं सूत्रे[3] ' स चायं बीजहेतुको ऽङ्कुर उत्पद्यमानो न स्वयंकृतो न परकृतो नोभयकृतो नाप्यहेतुसमुत्पन्नो नेश्वरकालाणुप्रकृतिस्वभावसंभूत इति।

तथा '

बीजस्य सतो यथाङ्कुरो न च यो बीजु स चैव अङ्कुरो।
न च अन्यु ततो न चैव तदेवमनुच्छेद अशाश्वत धर्मता॥ इति[4]

इहापि वक्ष्यति।

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत्।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं॥ इति[5]।

परमतापेक्षं[6] विशेषणमिति चेत् ' तदयुक्तं ' संवृत्यापि तदीय[7]व्यवस्थानभ्युपग-

---

1) Mss. *caitanyavāditi.*

2) Voir infra XXIV. 8.

3) Dans le Çālistambasūtra; voir Bodhic. ṭ. ad IX. 142 (p. 370. 23). Çikṣās. 219. 10. — Le Tib. lit *neçvarakṛto na kālapariṇāmito*..., comme le Çālist.

4) Lalitavistare, 210. 3–5; cette stance est citée infra ad II. 28, XXI. 20; cf. Çikṣās. 238. 10, 239. 4 et les remarques *in loc.* Mètre Vaitalīya. Je suis incapable de rétablir le quatrième pāda (Mss. *cchedam açāçvata*), à moins de lire *açaçvadharmatā* — ce qui ne va pas sans difficulté.

5) = XVIII. 7 (var. *nocchedo*).

6) Tib. གཞན་གྱི་ ལུགས་ལ་ བལྟོས་ཏེ་ et གཞན་གྱི་ གཞུང་ལ་···

7) དེ་དག་གི་

मात् । सत्यद्वयाविपरीतदर्शनपरिभ्रष्टा एव हि तीर्थिका यावदुभयथापि निषिध्यन्ते तावद्गुणा एव संभाव्यत इति[1] । एवं पर[6]मतापेक्षमपि विशेषणाभिधानं न युज्यते ।

न चापि लोकः स्वत [7b] उत्पत्तिं प्रतिपन्नो यतस्तदपेक्षयापि विशेषणसाफल्यं स्यात् ' लोको हि स्वतः परत इत्येवमादिकं वि[Tib. 10a]चारमनवतार्य कारणात्कार्यमुत्पद्यत इत्येतावन्मात्रं प्रतिपन्नः ' एवमाचार्यो[2] ऽपि व्यवस्थापयामास ' इति सर्वथा विशेषणवैफल्यमेव[3] निश्चीयते ॥

अपि च यदि संवृत्योत्पत्तिप्रतिषेध[4]निराचिकीर्षुणा विशेषणमेतदुपादीयते ' तदा स्वतो ऽसिद्धाधारे पक्षदोष आश्रयासिद्धो वा हेतुदोषः स्यात्[5] ' परमार्थतः स्वत[6]श्चक्षुरायतनानामनभ्युपगमात्[7] ॥ संवृत्या चक्षुरादिसद्भावाददोष इति चेत् । परमार्थत इत्येतत्तर्हि कस्य विशेषणं ॥ सांवृतानां चक्षुरादीनां परमार्थत उत्पत्तिप्रतिषेधाद् ' उत्पत्तिप्रतिषेधविशेषणे परमार्थग्रहणमिति चेत् । एवं तर्ह्येवमेव वक्तव्यं स्यात् ' सांवृ-

---

1) Tib. ཡོན་ཏན་ཉིད་ ཡོད་པར་ རྟོགས་སོ་ ce qui confirme la lecture *guṇa* (littéralement: *guṇa eva astitvena kalpyate*). On peut traduire: ...aussi longtemps ils trouvent que tout va bien. — *ubhayathā* = གཉི་གའི་ སྒོ་ནས་

2) Bhāvaviveka?

3) Tib. = *vaiyarthyam.*

4) *pratiṣedha* manque dans Tib., évidemment par erreur.

5) La lecture des Mss. n'est pas constante, ici et infra 30. 10. 15 (*asiddhādhāra°*, *°asiddho vā hetu°*). Il faut, je crois, lire *asiddhādhāraḥ pakṣa°* (cf. 28. 4), *°asiddho vā*.... Cf. Tarkas. 309; Nyāyab. ṭ. 68. — Tib. རང་ལ་ གཞི་ མ་གྲུབ་པའི་ ཕྱོགས་ཀྱི་ ཉེས་པ་འམ། གཞི་ མ་གྲུབ་པའི་ གཏན་ཚིགས་ཀྱི་ སྐྱོན་དུ་ འགྱུར་ཏེ། *svataḥ*, au point de vue du Mādhyamika. Ce *viçeṣaṇa paramārthataḥ* ne peut avoir de *viçeṣya* puisque la chose n'existe pas *paramārthataḥ*; de même, dans l'exemple classique, *gagaṇa* fait du lotus une non-chose.

6) Tib. རང་གིས་ དོན་དམ་པར་...

7) Ponctué d'après Tib.

तानां चक्षुरादीनां परमार्थतो नास्त्युत्पत्तिरिति । न चैवमुच्यते । उच्यमानेऽपि परैर्वस्तु-[1]सतामेव चक्षुरादीनामभ्युपगमात् प्रज्ञप्तिसतामनभ्युपगमात् परतो[2]ऽसिद्धाधारः पक्षदोषः स्यादिति न युक्तमेतत् ॥

अथ स्यात् । यथानित्यः शब्द इति धर्मधर्मिसामान्यमेव[3] गृह्यते न विशेषः ।

---

1) Mss. ... *parairucya satām* ... *prajñaptisatāṃ dhyānenābhyupagamāt*. Tib. སྨྲ་ན་ཡང་ཕ་རོལ་པོ་དག་གིས ···· རྫས་སུ་ཡོད་པ་ཉིད་དུ་ཁས་བླངས་པའི་ཕྱིར་དང་། བཏགས་པར་ཡོད་པར་ཁས་མ་བླངས་པའི་ཕྱིར། གཞན་ལ་·····

rdzas = *vasu*, *dravya* (D. a.), matter, real substance, reality (Jäschke s. voc.); soit *vastusat* en opposition à *prajñaptisat*; notons toutefois que vastu (p. 31. 12) est traduit par དངོས་. — *prajñapti*, cf. Wass. p. 229 (lire sans doute བཏགས་ dans le passage discuté de Tār.) et 281.

Prajñapti = *prajñāpanam*, M. Vyut. 245. 93. 94. — Pour le sens que le mot présente dans notre passage, voir Çikṣās. 257. 7. *vyavahāramātram etat, nāmadheyamātram, saṃketamātram, saṃvṛtimātram, prajñaptimātram.* — Laṅkāvatāra 30. 16, 39. 5 (°*mātra*). — Bodhic. ṭ. 270. 6 (°*sanmātra*). — Dīgha N. IX. 53. *itimā kho Citta lokasamaññā lokaniruttiyo lokavohārā lokapaññattiyo yāhi Tathāgato voharati aparāmasan ti.* — Milinda 25. 11. — Comp. les expressions *upādāya prajñapti*, *upādāya prajñapyamāna*, ci-dessous notamment foll. 65a, 84b, 90a, 102a-b et ad XV. 3 (fol. 165a).

A ce qui n'a qu'une existence de raison, de convention, d'énonciation, s'oppose le *paramārthasat*, *dravyasat*, *vastusat* (Wass. 281, Bhamatī 13. 11).

2) Pour les autres: གཞན་ལ་ = pour nos adversaires: ཕ་རོལ་པོ་ (cf. la note ci-dessus et 29, n. 3). — Sur l'importance de la *parato 'siddhi* et de la *svato 'siddhi*, voir la discussion ci-dessous fol. 9b.

Voyez la loi (Nyāyab. ṭ. 68) *yaḥ parasya siddhaḥ sa hetuḥ* et M. Vyut. 199. 88 sqq.

3) L'argumentation (*pūrvapakṣa*) peut se résumer ainsi: quand un docteur affirme: *anityaḥ çabdaḥ*, il prend le *dharma* et le *dharmin* dans leur acception générale (le son = ce qui s'entend ... *çabdatve sati çabdaḥ*), et la discussion est possible même avec un adversaire qui attribue à l'*anityatva* et au son des *viçeṣaṇas* differents: le *pakṣa* et le *pakṣadharma* sont *siddhas*; de même dans le cas actuel. — Sur la valeur des termes *sāmānya* et *viçeṣa* voyez les Comm. ad Sāṃkhyasūtra I. 138: *sāmānyena tāvad ātmani vivādo nāsti, viçeṣe hi vivādo 'neka eko vyāpako 'vyāpaka ityādiḥ*...... = There is ... no dispute about there being

विशेषग्रहणे हि सत्यनुमानानुमेयव्यवहाराभावः स्यात्। तथा हि ' यदि चातुर्महाभौतिकः शब्दो गृह्यते स परस्यासिद्धः[1] ' यथाकाशगुणो गृह्यते स बौद्धस्य स्वतोऽसिद्धः।[2] तथा वैशेषिकस्य शब्दानित्यतां प्रतिज्ञानानस्य यदि कार्यः शब्दो गृह्यते स परतोऽसिद्धः[3] ' [Tib. 10b] अथ व्यङ्ग्यः स स्वतोऽसिद्धः[4]। एवं यथासंभवं वि[8a]नाशोऽपि यदि सहेतुकः स बौद्धस्य स्वतोऽसिद्धः[5]। अथ निर्हेतुकः स परस्यासिद्ध[6] इति ।' तस्माद्यथात्र धर्मधर्मिसामान्यमात्रमे[व गृह्यते ' ए]वमिहापि धर्मिमात्रमुत्सृष्टविशेषणं ग्रहीष्यत इति चेत्। न चैतदेवं '

---

a Self as such (*sāmānyena tāvad ātmani na vivādaḥ*) for the dispute is [only] about its pecularities (*viçeṣa*), whether it be multitudinous or one.... — Wo hinsichtlich [der Existenz] eines Dinges an sich kein Streit obwaltet, [sondern nur über die Art, wie dasselbe zu denken ist].....

1) Pour l'adversaire du Bouddhiste. — Lecture confirmée par le Tib. དེ་ ཕ་རོལ་པོ་ལ་ མ་གྲུབ་པའི

2) D'après le Tib. *sa bauddhasyāsiddhaḥ*, mais infra, l. 5: དེ་ སངས་རྒྱས་པ་ རང་ལ་ མ་གྲུབ་པ་ ཡིན་ལ། — Définitions du *çabda* dans les diverses écoles, voir Nyāyabhāṣya II. 2. 12, Praçastapādabh. 287.

3) Pour l'adversaire du Vaiçeṣika. — Tib. comme plus haut (p. 28, n. 2), དེ་ གཞན་ལ་ མ་གྲུབ་པའི

4) Pour le Vaiçeṣika. — *vyaṅgyaḥ* (= *abhivyaktidharmaka*) *çabdaḥ*, thèse du Mīmāṃsaka (cf. Vaiç. s. II. 2. 28, 30).

5) Les écoles ne s'entendent ni sur le *dharmin* (*çabda*), ni sur le *dharma* (*vināça*). Pour les bouddhistes, la destruction est *ahetuka*, *akāraṇa*. Voir infra XXI. 4 (Cp. XI. 4). — Abhidharmak v. (Ms. de la Soc. As.) 269b 6...*utpattyanantaravināçi rūpaṃ, cittacaittavat . ākasmiko hi bhāvānāṃ vināçaḥ; akasmādbhava ākasmikaḥ, ahetuka ity arthaḥ . sādhanaṃ cātra: ahetuko vināçaḥ, abhāvatrād, atyantābhāvavat.* — Suit la réfutation de l'opinion opposée. — Nyāyabindu 106. 3, 37. 19 (Nyāyakandalī 78). — Nyāyavart. tātp. 383. 19 *svakāraṇād ayaṃ bhāvo vinaçvaro jāyate, 'vinaçvaro vā; vinaçvaraç cen, vināçaṃ prati na hetum apekṣate...; avinaçvaraç cet, ...nāsya hetuçatair api çakyo vināçaḥ kartum.* — Mīmāṃsāçlokav. 736. — Çaṃkara ad Brahmasūtras II. 2. 23.

6) Mss. *sa parato 'siddhaḥ*. Tib. དེ་ ཕ་རོལ་པོ་ལ་ མ་གྲུབ་པ་ ཡིན་ནོ

यस्माद्यदैवोत्पादप्रतिषेधो ऽत्र साध्यधर्मो ऽभिप्रेतः ' तदैव धर्मिणस्तदाधारस्य विपर्यासमात्रासादितात्मभावस्य प्रच्युतिः स्वयमेवानेनाङ्गीकृता । भिन्नौ हि विपर्यासाविपर्यासौ । तद्यदा विपर्यासेनासत्सत्त्वेन गृह्यते तैमिरिकेणेव केशादि[2] ' तदा कुतः सद्भूतपदार्थलेशस्याप्युपलब्धिः । यदा चाविपर्यासादभूतं नाध्यारोपितं वितैमिरिकेणेव केशादि ' तदा कुतो ऽसद्भूतपदार्थलेशस्याप्युपलब्धिर्येन तदानीं संवृतिः स्यात् ।

अत एवोक्तमाचार्यपादैः

यदि किं चिदुपलभेयं प्रवर्तयेयं निवर्तयेयं वा ।
प्रत्यक्षादिभिरर्थैः ' तदभावान्मे ऽनुपालम्भः ॥ इति[3]

यतश्चैवं भिन्नौ विपर्यासाविपर्यासौ ' अतो विदुषामविपरीतावस्थायां विपरीतस्यासंभवात्कुतः सांवृतं चक्षुर्यस्य धर्मित्वं स्यात् ' इति न व्यावर्तते ऽसिद्धाधारे पक्षदोषः आश्रयासिद्धो वा हेतुदोषः[4] ' इत्यपरिहार एवायं । [Tib. 11a] 111894

निदर्शनस्यापि नास्ति साम्यं । तत्र हि शब्दसामान्यमनित्य[ता]सामान्यं चाविवक्षितविशेषं द्वयोरपि संविद्यते । न त्वेवं चक्षुःसामान्यं शून्यताशून्यतावादिभ्यां संवृत्याङ्गीकृतं नापि परमार्थतः ' इति नास्ति निदर्शनस्य साम्यं ।

यथायमसिद्धाधारपक्षदोषोद्भावने विधिः[5] ' एष एव सत्त्वादित्यस्य हेतोरसिद्धार्थतोद्भावने [ऽपि] योज्यः ॥

---

1) Tib. = *tathā*.

2) *viparyāsa*, voir Bodhic. ṭ. 239. 10 (= *saṃvṛti, avidyā, moha*); l'exemple des *taimirikas* (*timira*, maladie des yeux) est classique, cf. *ibid.* 245. 3–10, 248. 7.

3) Voir supra p. 16. 9.

4) Cf. p. 27 n. 5.

5) Mss. *eṣa eva sattvādibhyaḥ svahetor.* Tib. དེ་ཉིད་ནི་ ཡོད་པའི་ཕྱིར་ ཞེས་བྱ་བའི་ གཏན་ཚིགས་ འདི་ལ་ མ་གྲུབ་པའི་ སྐྱོན་ བརྗོད་པ་ལ་ ཡང་ སྦྱར་བར་བྱའོ = ..*asiddhidoṣodbhāvane* (cf. p. 32, n. 4). — *sattvāt* = *vidyamānatvāt* (p. 26, l. 1).

इत्थं चैतदेवं यत्स्वयमप्यनेनायं यथोक्तार्थो ऽभ्युपगतस्तार्किकेन । सन्त्येवाध्यात्मि[8b]कायतनोत्पादका हेत्वादयः ' तथा तथागतेन[1] निर्देशात् ' यद्धि यथा तथागतेनास्ति निर्दिष्टं तत्तथा ' तद्यथा शान्तं निर्वाणमिति ॥ अस्य परोपक्षिप्तस्य साधनस्येदं दूषणमभिहितमनेन ' को हि भवतामभिप्रेतो ऽत्र हेत्वर्थः ' संवृत्या तथा तथागतेन निर्देशात् ' उत परमार्थत इति । संवृत्या चेत् ' स्वतो हेतोरसिद्धार्थता[2] । परमार्थतश्चेत् '

न सन्नासन्न सदसद्धर्मो निर्वर्तते यदा ।

सदसदुभयात्मककार्यप्रत्ययत्व[3]निराकरणात् ' तदा '

कथं निर्वर्तको हेतुरेवं सति हि युज्यते ॥[4]

नैवासौ निर्वर्तको हेतुः ' इति वाक्यार्थः । ततश्च परमार्थतो निर्वर्त्यनिर्वर्तकत्वासिद्धेः ' असिद्धार्थता विरुद्धार्थता वा हेतोरिति ।

यतश्चैवं स्वयमेवामुना [Tib. 11b] न्यायेन हेतोरसिद्धिरङ्गीकृतानेन ' तस्मात्सर्वेष्वेवानुमानेषु वस्तुधर्मोपन्यस्त[5]हेतुकेषु स्वत एव हेत्वादीनामसिद्धत्वात्सर्वाण्येव साधनानि व्याहन्यन्ते । तद्यथा ' न परमार्थतः परेभ्यस्तत्प्रत्ययेभ्य आध्यात्मिकायतनजन्म[6] ' परत्वात् ' तद्यथा पटस्य[7] । [8]अथ वा ' न परे परमार्थेन विवक्षिताः चक्षुराद्याध्यात्मिकायत-

---

1) M. Robert Chalmers a exposé les étymologies du mot Tathāgata d'après Buddhaghoṣa, J. R. A. S. 1898, p. 103 sqq. Voir p. 106 (sous le № 6) la glose: *tathāvāditayā tathāgato* [Sumaṅgalav. 59.31, 66; cp. Rhys Davids, Dialogues, 40 note, 73 note 2]. — Voir aussi Wenzel (Nāgārjuna's Friendly Epistle, J. P. T. S. 1888, p. 7) qui cite Maheçvara ad Amarakoça: *tathā satyaṃ gataṃ jñātaṃ tasya.*

2) Vous donnez une raison qui, d'après votre opinion même, n'existe pas.

3) Tib. = *pratyayanir°.*

4) = I. 7 (fol. 24 a).

5) Tib. དངོས་པོ་ ཆོས་ གཏན་ཚིགས་སུ་ བཀོད་པའི་ རྗེས་སུ་'': *vastu-dharma-hetu-nyasta-anumāna.*

6) Ex conj. *°āyatanānāṃ j°*

7) Tib. = *ghaṭa.*

8–8) Tib. ཡང་ན་ དོན་དམ་པར་ གཞན་གྱིས་ བརྗོད་པར་འདོད་པ་ མིག་ལ་སོགས་

ननिर्वर्तकाः प्रत्यया इति प्रतीयन्ते[8)] ' परत्वात् ' तद्यथा तत्त्वादय इति । परत्वादिकमत्र[(1)] स्वत एवासिद्धं ।

यथा चानेन ' उत्पन्ना एवाध्यात्मिका[(2)] भावाः ' [(3)]तद्विषयिविशिष्टव्यवहारकरणाद् ' इत्यस्य पराभिहितस्य हेतोरसिद्धार्थताम्[(4)]उद्भावयिषुणेदमुक्तं[(5)] । अथ समाहितस्य योगिनः प्रज्ञाचक्षुषा भावयाथात्म्यं पश्यत उत्पादगत्यादयः सन्ति परमार्थत इति साध्यते ' तदा [(3)]तद्विषयिविशिष्टव्यवहारकरणादिति हेतोरसिद्धार्थता ' गतेरप्यु[9a]त्पादनिषेधादेव निषेधादिति[(6)] ।' एवं स्वकृतसाधनेऽपि ' [परमार्थतो] ऽगतं नैव गम्यते ' अध्वत्वात् ' गताध्ववदिति ' [(7)]अध्वत्वहेतोः स्वत एवासिद्धार्थता योज्या ।

[(8] न परमार्थ[त]ः [साश्रयं] चक्षु [रूपं] पश्यति ' चक्षुरिन्द्रियत्वात् ' तद्यथा तत्सभागं[8)] ।

པའི་ ནང་གི་སྐྱེ་མཆེད་ འགྲུབ་པར་བྱེད་པ་དག་ རྐྱེན་ མ་ཡིན་པར་ ངེས་ཏེ། = *atha vā paramārthataḥ parair vivakṣitāç cakṣurādyadhyātmikayatanasādhakāḥ pratyayā asattvena niçcitāḥ.* — La lecture *paraiḥ* est intétessante. — Le Tib. suggère la lecture *pratiyate* (= *niçcīyate*); mais voyez l'étymologie du mot *pratyaya*, Sarvadarç. s.. 21. 1—2. et infra note ad I. 2. (fol. 22 a).

1) Tib. = *paratvam ityādikam.* — Voir le Chap. XV où est discutée la notion du *paratva.*

2) Tib. = *ādhyātmikāyatana.*

3) Mss. *tadvisayăvi°.* Tib. དེ་དག་གི་ ཡུལ་ དང་ ལྡན་པའི་ ཐ་སྙད་ ཁྱད་པར་ ཅན་བྱེད་པའི་ཕྱིར

4) Tib. = *asiddhim.*

5) Tib. ···བརྗོད་པར་འདོད་པས། འདི་སྐད་དུ་ འོན་ཏེ་ དོན་དམ་པར་ རྣལ་འབྱོར···

6) Tib. = *ity uktam.* — Cf. note 5.

7) Mss. *iti* | *atha hetoḥ svato 'siddha°.* Tib. ཞེས་བྱ་བའི་ གཏན་ཚིགས་ ལམ་ ཉིད་ རང་ཉིད་ལ་ མ་གྲུབ་པའི་····

8—8) Mss. *na paramārtha[ta]ḥ sabhāgaṃ cakṣuḥ paçyati cakṣurindriyatvāt tadyathā tatsabhāgam.* Tib. དོན་དམ་པར་ བརྟེན་པ་དང་བཅས་པའི་ མིག་ནི་ གཟུགས་ ལ་ བལྟ་བར་ མི་བྱེད་དེ། མིག་གི་ དབང་པོ་ ཡིན་པའི་ཕྱིར། དཔེར་ན་ དེ་ དང་ མཚུངས་

तथा ' न चक्षुः [Tib. 12a] प्रेक्षते रूपं ' भौतिकत्वात् '[1] रूपवत् ।

खरस्वभावा न मही ' भूतत्वात् ' तद्यथानिल[2] इत्यादिषु हेत्वाद्यसिद्धिः स्वत एव योज्या[3] ॥

सत्त्वादिति चायं हेतुः परतोऽनैकान्तिकः[4] । किं सत्त्वात् ' चैतन्यवन्त्याध्यात्मिकान्यायतनानि स्वत उत्पद्यन्तां ' उताहो घटादिवत् स्वत उत्पद्यन्तामिति । घटादीनां साध्यसमत्वान्नानैकान्तिकतेति चेत् ' नैतदेवं तथानभिधानात् ॥

པ་ བརྟེན་ཏོ ། — *brten* = *pratyaya*, *āçraya*; *de-daṅ-mtshuṅs-pa* = *tatsama*, °*samāna*, ˊ*sadṛça*.

Le texte paraît sûr, l'interprétation est difficile. — Voir M. Vyut. 109. 43 *ekajātīyavijñāna*, 44 *sabhāga*, 51 *tatsabhāga*, 114. 6 *sabhāgahetu*. — Abhidharmakoçak., Ms. de la Soc. As. 359b 1 (au cours d'une discussion sur les trois chemins, passé, présent, à venir): *kāritraṃ punaḥ cakṣurādīnāṃ darçanādīnīti, rūpādīnām api svendriyagocaratvaṃ kāritram . yady evam iti vistaraḥ . yadi kāritreṇa vyavasthāpitāḥ (adhvānaḥ) tatsabhāgasya cakṣusaḥ kiṃ kāritram? yad dhi kāritralakṣaṇaṃ svakarma na karoti tatsabhāgaṃ cakṣuḥ, tasya ca nāsti kāritraṃ darçanalakṣaṇaṃ, kathaṃ tat pratyutpannam anāgataṃ syād? ity abhiprāyaḥ . phaladānapratigraha (?) iti . tac cakṣuḥ svaniṣyandaphalaṃ parigṛhṇāti, ākṣipati, phalaṃ ca dadāti, niṣyandaphalam anantaraṃ dadāti puruṣakāraphalaṃ ca . yady api darçanakāritraṃ na karoti, anyat tu phalaṃ karotīti. . . .*

1) D'après Tib. — Mss. *sarūpavat*. — Visuddhimagga (B. T. S.) 13. 25 *cakkhu rūpaṃ na passati, acittakattā; cittaṃ na passati, acakkhukattā* = Warren 297 = Atthasālinī 400. 1 (où la ponctuation est incorrecte). Cp. Sp. Hardy, Manual, 419.

2) D'après Tib. — Mss. *tadyathā nalina*.

3) Comp. le raisonnement que donne Dignāga comme exemple de *pratyakṣaviruddha* (Vācaspatimiçra, Tātparyaṭ. 31.1) *açrāvaṇaḥ çabdaḥ, kṛtakatvāt, ghaṭādivat*. — Çlokav. 365.

4) Tib. ''' གཏན་ཚིགས་ འདི་ ཡང་ པ་རོལ་པོའི་ ལྟར་ན ། ''' ། ཞེས་ མ་ངེས་པ་ ཡིན་ནོ་ *hetur ayam api pakṣavādinaḥ pakṣe* | *kim* . . | *iti na niçcitaḥ* = cet argument (*sattvāt*) présente au point de vue de l'adversaire le défaut d'*anaikāntikatā*, car la question *kim* . . .*utpadyantām* demeure indéterminée (*para* = གཞན་ = པ་རོལ་པོ་).

ननु च यथा परकीयेष्वनुमानेषु दूषणमुक्तं ' एवं स्वानुमानेष्वपि यथोक्तदूषणप्रसङ्गे सति स एवासिद्धाधारासिद्धहेत्वादिदोषः प्राप्नोति ' ततश्च य उभयोर्दोषो न तेनैकश्चोद्यो [1]भवतीति सर्वमेतद्दूषणमयुक्तं जायत इति ।

उच्यते ।[2] स्वतन्त्रमनुमानं ब्रुवतामयं दोषो जायते ' न वयं स्वतन्त्रमनुमानं प्रयुञ्ज्महे[3] परप्रतिज्ञानिषेधफलत्वादस्मदनुमानानाम्[4] ।

तथा हि[5] ' परं चक्षुः पश्यतीति प्रतिपन्नः स तत्प्रसिद्धेनैवानुमानेन निराक्रियते ' चक्षुषः स्वात्मादर्शनधर्ममिच्छसि ' परदर्शनधर्माविनाभावित्वं चाङ्गीकृतं ' तस्माद्यत्र यत्र स्वात्मादर्शनं तत्र तत्र परदर्शनमपि नास्ति ' तद्यथा घटे । अस्ति च चक्षुषः स्वात्मादर्शनं ' तस्मात्परदर्शनमप्यस्य नैवास्ति । ततश्च [Tib. 12b] स्वा[त्मा]दर्शनविरुद्धं नीलादिपरदर्शनं स्वप्रसिद्धेनैवानुमानेन विरुध्यत इति ।

एतावन्मात्रमस्मदनुमानैरुद्भाव्य[9b]त इति कुतो ऽस्मत्पक्षे यथोक्तदोषावतारो[6] यतः समानदोषता स्यात् ।

किं पुनरन्यतर[7]प्रसिद्धेनाप्यनुमानेनास्त्यनुमानबाधा[8] । अस्ति सा[9] च स्वप्रसिद्धे-

1) *Ce nyaya est cité* Sarvadarçanas. 142. 9 *yaç cobhayoḥ samo doṣo . .* — *La même pensée est exprimée dans le vers cité par* Aniruddha, *ad* Sāṃkhya-s. I. 6. — *Voir aussi* Çlokav. p. 341 (stance 252).

2) རང་རྒྱུད་ཀྱི་ རྗེས་སུ་དཔག་པ་. — Cf. Wass Buddh. p. 320.

3) Mss. *prayuñjāmahe.*

4) Dans le Tib. manque °*asmad*°.

5) Ms. *paraç cakṣuḥ.* Le tibétain (གཞན་ མིག་ ལྟ་བོ་ ཞེས་བྱ་བར་ རྟོག་པ་ དེ་ནི) ne confirme pas nettement la correction: on attend གཞན་ལ་, d'après l'analogie de ce qui suit.

6) བརྗོད་པར་བྱ་བ་ ཡིན་པས.

7) Tib. གང་ཡང་རུང་བ་ = *anyatama* (d'après Jäschke). — Cf. M. Vyut. 199. 88.

8) Tib. ' ' ' ཞེ་ན |

9) Mss. *asti sāra*

नैव हेतुना । न परप्रसिद्धेन । लोकत एव दृष्टत्वात् । कदा चिद्धि लोके ऽर्थिप्रत्यर्थिभ्यां प्रमाणीकृतस्य साक्षिणो वचनेन जयो भवति पराजयो वा । कदा चित्स्ववचनेन । परवचनेन तु न जयो नापि पराजयः । यथा च लोके तथा न्याये ऽपि । लौकिकस्यैव व्यवहारस्य न्यायशास्त्रे प्रस्तुतत्वात् । अत एव च कैश्चिदुक्तं । न परतः [1] प्रसिद्धिबलादनुमानबाधा । पर[1]सिद्धेरेव निराचिकीर्षितत्वादिति ॥ [2] यस्तु मन्यते । य एव [3] उभयविनिश्चितवाची स प्रमाणं दूषणं वा । नान्यतरप्रसिद्धसंदिग्धवाची । इति । तेनापि लौकिकीं [4] व्यवस्थाम[5]नुरुध्यमानेन[ानुमाने] यथोक्त एव न्यायो ऽभ्युपेयः ।

[6] तथा हि नोभयप्रसिद्धेनैवागमेन आगमबाधा । किं तर्हि स्वप्रसिद्धेनापि । स्वार्थानुमाने तु सर्वत्र [Tib. 13a] स्वप्रसिद्धिरेव गरीयसी । नोभयप्रसिद्धिः ।

---

1) Tib. གཞན་ལ་ གྲགས་པ་··· — Lire *paraprasiddher*.

2) *yas tu manyate.....* Sans doute Dignāga, voir Mīmāṃsāçlokav. et Pārthasārathimiçra dans Nyāyaratnākara, p. 289 sqq. Le bouddhiste expose cette thèse que la *paraprasiddhi* suffit à la validité du raisonnement: *nanu sarvaṃ bhavatsiddham mayedaṃ sādhanaṃ kṛtam? kimartham madasiddhyā tvaṃ vikalpyātrāttha dūṣaṇam?... parapratipattyarthaṃ hi sādhanaṃ, tad asya parāsiddhir doṣo, na svāsiddhir iti* — Kumārila répond: ..*kimarthaṃ nyayavid bhavān? nāçrauṣīḥ «sādhanatvaṃ kiṃ prasiddhasya dvayor api»?... bhavadvṛddhair eva hi Dignāgācāryair «yo vādiprativādiniçcito hetuḥ sa sādhanam» ity uktam...* = It was Dignāga, *bhavadvṛddha*, who affirmed that an hetu which is admitted by both parties in a discussion may be accepted as helping the establishment of a proposition». (K. B. Pathak, J. Bombay As. Soc., L.). — Nyāyabinduṭ. 68. 1 *parārtho hi hetūpanyāsaḥ: tena yaḥ parasya siddhaḥ sa hetur vaktavyaḥ.* La définition du parārthanumāna par Dignāga: *parārthanumanaṃ tu svadṛṣṭārthaprakāçanam* (= Pramāṇasamuccaya III. 1) suppose la svaprasiddhi: *svapratipannam eva prāçnikebhyaḥ pratipādanīyam.*

3) Mss. *ya eva bhubhaya°.*

4) Tib. འཇིག་རྟེན་གྱི་ ཐ་སྙད་ཀྱི་ རྣམ་པ་བཞག་པ་ = *laukika-vyavahāra-vyavasthā.*

5) Tib. བརྟེན་ནས = *pratītya* = *anurudhyamānena.*

6) Mss. *yathā hi nobhayaprasiddhena vāgamena.* — *āgamabadhā* = ལུང་ གིས་ གནོད་པ་ = *āgamena bādhā.*

अत एव तर्कल[1]क्षणाभिधानं निःप्रयोजनं ' यथा[2]स्वप्रसिद्धयोपपत्त्या बुद्धैस्तद्[3]नभिज्ञविनेयजनानुग्रहात् । इत्यलं प्रसङ्गेन ' प्रकृतमेव व्याख्यास्यामः ।

परतोऽपि नोत्पद्यन्ते भावाः ' पराभावादेव । एतच्च '

न हि स्वभावो भावानां प्रत्ययादिषु विद्यते[4] '

इत्यत्र प्रतिपादयिष्यति ' ततश्च पराभावादेव नापि परत उत्पद्यन्ते । अपि च

अन्यत्प्रतीत्य यदि नाम परो ऽभविष्यज्
जायेत तर्हि बहुलः शिखिनो ऽन्धकारः ।
सर्वस्य जन्म च भवेत्खलु सर्वतश्च
तुल्यं परत्वमखिले [ऽ]जनके ऽपि यस्मात् ॥

इत्यादिना [10a] [मध्यम[5]कावतारात्] परत उत्पत्तिप्रतिषेधो ऽवसेयः ॥

आचार्यबुद्धपालितस्तु व्याचष्टे ' न परत उत्पद्यन्ते भावाः ' सर्वतः सर्वसंभवप्रसङ्गात् ।[6]

आचार्यभावविवेको दूषणमाह[7] ' तदत्र प्रसङ्गवाक्यत्वात्[8] ' साध्यसाधनविपर्ययं

---

1) Cf. Tarkas. p. 361 et suiv.

2) Tib. རང་ལ་ ཇི་ལྟར་ གྲགས་པ་

3) Tib. དེ་ཁོ་ན་ མི་ཤེས་པ་ = *atattvajña*.

4) — I. 3 (infra fol. 22b initio).

5) D'après le tibétain. — Cette stance est la 14ème du Chap. VI; voir ci-dessus p. 13, n. 3.

6) Mdo XVIII, fol. 182a l. 8 (cf. p. 14, note 1); reproduit dans Bhāvaviveka (fol. 49b 5) avec les variantes: *na parato 'pi...*; *kasya hetoḥ*; *sarvataḥ*...

7—7) Extrait de Bhāvaviveka:

དེས་ན་ དེ་ལ་ (a ཐལ་བར་ འགྱུར་བའི་ ངག་ ཡིན་པའི་ཕྱིར། (b བསྒྲུབ་པར་ བྱ་བ་ དང་ སྒྲུབ་པར་བྱེད་པ་ བཟློག་པར་ བྱས་ན། དངོས་པོ་རྣམས་ བདག་གམ་ གཉིས་སམ་ རྒྱུ་མེད་པ་ལས་ སྐྱེ་བར་ འགྱུར་བ་ དང་ ། འགའ་ཞིག་ལས་ འགའ་ཞིག་ སྐྱེ་བར་འགྱུར

कृत्वा ' स्वत उभयतो ऽहेतुतो वा उत्पद्यन्ते भावाः कुतश्चित्कस्य चिदुत्पत्तेः ' इति(1) प्राक्पक्षविरोधः। अन्यथा(2) सर्वतः सर्वसंभवप्रसङ्गात् ' इत्यस्य साधनदूषणान्तः(3)पातित्वात् ' असंगतार्थमेतत्(7)।

(4 (5) एतदप्यसंगतार्थं ' पूर्वमेव प्रतिपादितत्वात् ' दूषणान्तःपातित्वाच्च परप्रतिज्ञातार्थदूषणेनेति यत्किं(6) चिदेतत्। इति न पुनर्यत्न आस्थीयते4) ॥

བའི་ཕྱིར་ ཕྱོགས་གོང་མ་ c) དང་ འགལ་བར་ འགྱུར་རོ། གཞན་དུ་ན་ ཡང་ ཐམས་ཅད་ ལས་ ཐམས་ཅད་ སྐྱེ་བར་ འགྱུར་བའི་ཕྱིར་རོ། དེ་བས་ན་ d) དེ་ལ་ སྒྲུབ་པ་ དང་ (e སུན་འབྱིན་པ་ཉིད་ མེད་པའི་ཕྱིར། དེའི་ དོན་ འབྲེལ་པ་ མེད་པ་ ཡིན་ནོ། Dans **Bhāvaviveka** (fol. 49b 5) le texte présente des variantes de traducteur: (a བླགས་ ཡོད་པའི་ ཚིག་ ཡིན་··· (b སྒྲུབ་པ (c སང་མ (d ཞེས་བྱ་བ་ (ce qui est plus littéral) (e སུན་དབྱུང་བ་

8) Les formules *na svata utpadyante bhāvāḥ, na parata....* sont des *prasaṅgavākyas* (voir ci-dessus p. 15. 1), car elles entrainent des conséquences logiques: Devadatta ne mange pas pendant le jour, donc il mange pendant la nuit. (Voir Nyāyabh. cité p. 24, n. 6) — Nyāyav. tātp. 483. 12: *yatpratiṣedhāya prasaṅgasādhanaṃ pratiṣedhyaṃ sādhayati.*

1) *iti* manque dans le Tib.

2) Tib. = *anyathāpi.*

3) D'après Tib. ...*atra sādhana-dūṣaṇatā-abhāvāt.*

4—4) འདི་ ཡང་ དོན་འབྲེལ་པ་ མེད་པ་ མ་ ཡིན་ནོ། གོང་ ཁོ་ནར་ བསྟན་ཟིན་ པའི་ཕྱིར་ [13b] དང་། གཞན་གྱིས་ དམ་བཅས་པའི་ དོན་ སུན་འབྱིན་པར་ བྱེད་པ་ཡིན་ དང་། སུན་འབྱིན་པ་ཉིད་ ཀྱང་ ཡིན་པའི་ཕྱིར་ འདི་ནི་ ཀྱི་ནའོ། དེས་ན་ སླར་ ཡང་··

5) Mss. *etad am apy.* Le tibétain comporte une négation *etad apy asaṃgatārthaṃ nāsti* (*etat* = les raisonnements de **Buddhapālita**, comme l. 3); mais on peut comprendre: *etat* = ce que **Bhāvaviveka** vient de dire. Cf. ci-dessous p. 39 l. 4.

6) *yat kiṃ cit* n'est pas traduit dans le tibétain qui donne *anarthakam* (*hīnam*) *etat* [gyi-na-ba].

द्वाभ्यामपि नोपजायन्ते भावाः । उभयपक्षाभिहितदोषप्रसङ्गात्[1] । प्रत्येकमुत्पादासामर्थ्याच्च । वक्ष्यति हि ।

स्यादुभाभ्यां कृतं दुःखं स्यादेकैक[कृतं] यदि । इति[2] ।

अहेतुतो ऽपि नोत्पद्यन्ते ।

हेतावसति कार्यं च कारणं च न विद्यते[3] ।

इति[4] वक्ष्यमाणदोषप्रसङ्गात् ।

गृह्येत नैव च जगद्यदि हेतुशून्यं
स्याद्यद्वदेव गगनोत्पलवर्णगन्धौ ।[5]

इत्यादिदोषप्रसङ्गाच्च ।

आचार्यबुद्धपालितस्त्वाह । अहेतुतो नोत्पद्यन्ते भावाः सदा च सर्वतश्च सर्वसंभवप्रसङ्गात्[6] ।

अत्राचार्यभावविवेको[7] दूषणमाह । अत्रापि प्रसङ्गवाक्यत्वात्[8] । यदि विपरीतसाध्य-

---

1) Buddhapālita: གཉི་གའི་ སྐྱོན་དུ་ ཐལ་བར་ འགྱུར་བའི་ཕྱིར །

2) = XII. 9.

3) = VIII. 4.

4) Tib. = *ityādinā.*

5) Madhyamakāvatara, VI. 99 (fol. 253a 7); voir Muséon, loc. cit.

6) Buddhapālita (fol. 182b 1) ajoute *sarvarambhavaiyarthyadoṣāc ca.* Cf. ci-dessous p. 39, l. 2.

7-7) གལ་ཏེ་ བསྒྲུབ་པར་བྱ་བ་ དང་ སྒྲུབ་པར་བྱེད་པ་ བཟློག་པ་ གསལ་བ་ ངག་གི་ དོན་ཏུ་མངོན་པར་འདོད་ན། དེའི་ཚེ་ འདི་སྐད་དུ། དངོས་པོ་རྣམས་ རྒྱུ་ལས་ སྐྱེ་བར་ འགྱུར་བ་ དང་། ལན་འགའ་ ཁ་ཅིག་ལས་ ཁ་ཅིག་ སྐྱེ་བར་ འགྱུར་བ་ དང་། རྩོམ་པ་ འབྲས་བུ་དང་བཅས་པ་ཉིད་དུ་ འགྱུར་བའི་ཕྱིར་རོ། ཞེས་ བསྟན་པར་ འགྱུར་ ན། བཤད་པ་ དེ་ནི་ མི་ རིགས་ ཏེ། སྔར་སྨྲས་པའི་ སྐྱོན་ དུ་ འགྱུར་བའི་ཕྱིར་རོ། ཞེས་ སུན་འབྱིན་པར་ སྨྲའོ॥ La discus-

साधनव्यक्तिवाक्यार्थ[1] इष्यते तदेतदुक्तं भवति । हेतुत उत्पद्यन्ते भावाः कदा चित्कुतश्चित्कस्य चिदुत्पत्तेः । आरम्भसाफल्याच्च[2] इति । सेयं व्याख्या[3] न युक्ता प्रागुक्तदोषादिति[7] ॥

तदेतदयुक्तं पूर्वोदित[4]परिहारात् । इत्यपरे ॥

यच्चापीश्वरादीनामुपसं[5]पदर्थं तदपि न युक्तं । ईश्वरादीनां स्वपराभिमतेषु यथाभ्युपगममसत्[10b]भावादिति [Tib. 14a] ॥ तस्मात्प्रसाधितमेतत् । नास्त्युत्पाद इति ॥ उत्पादासंभवाच्च सिद्धोऽनुत्पादादिविशिष्टः प्रतीत्यसमुत्पाद इति ॥

अत्राह । यद्येवमनुत्पादादिविशिष्टः प्रतीत्यसमुत्पादो व्यवस्थितो भवद्भिः । यत्तर्हि भगवतोक्तं । अविद्याप्रत्ययाः संस्काराः । अविद्यानिरोधात्संस्कारनिरोध इति[6] ।

तथा ।

अनित्याश्च ते संस्कारा उत्पादव्ययधर्मिणः ।
उत्पद्य हि निरुध्यन्ते तेषां व्युपशमः सुखः[7] ॥

---

sion de l'*ahetupakṣa* commence dans Bhāvaviveka fol. 50a 5, finit fol. 52b 3 où sont introduits les Sāṃkhyas (distinction de l'*utpatti* et de l'*abhivyakti*). — Le présent passage a jusqu'ici échappé à mes recherches.

8) *yadi*.. ... Ceci est le développement du prasaṅgavākya (voir p. 15. 1 et p. 37, n. 8). A prendre comme *sādhana* la formule *ahetuto notpadyante bhāvāḥ* (= *sādhya* de Buddhapālita), on obtient *hetuta utpadyante*.

1) Tib. = *abhīṣyate*. Cp. 15. 1.

2) Mss. *ārambhasadbhāvād iti*, °*saṃbhavād iti*.

3) C'est-à-dire la *vyākhyā* que donne Buddhapālita du *mahāvākya* de Nāgārjuna.

4) སྔར་འཕན་ བཏབ་ཟིན་པའི་ཕྱིར་རོ་ — apare (གཞན་དག་), cf. supra p 9 l. 5.

5) Tib. གང་ ཡང་ ····· ཉེ་བར་བསྒྲུབ་པའི་ཕྱིར་ ཡིན་ནོ་ ཞེས་བྱ་བ་ དེ་ ཡང་···

6) Formule classique du Pratītyasamutpāda.

7) Cité dans Ms. Dutreuil de Rhins, C^{ro} 44 (Senart, J. As., Sept. 1898, p. 300) avec variantes *anica vata*... | *upaji ti nirujhati tesa uvaçamo suho* ||

तथा [1] उत्पादाद्वा तथागतानामनुत्पादाद्वा तथागतानां स्थितैवैषा धर्माणां धर्मता [2]। एको धर्मः सत्त्वस्थितये यदुत चत्वार आहाराः [3]। द्वौ धर्मौ लोकं पालयतो ह्रीश्चापत्राप्यं चेत्यादि [4]।

तथा परलोकादिहलोकागमनमिहलोकाच्च परलोकगमनमिति ।

एवं निरोधादिविशिष्टः प्रतीत्यसमुत्पादो देशितो भगवता स कथं न निरुध्यत [5] इति ॥

यत [6] एवं निरोधादयः प्रतीत्यसमुत्पादस्योपलभ्यन्ते [7] अत एवेदं मध्यमकशास्त्रं

---

1) Voir **Sarvadarçanas.** 21.8 (trad. n. 141), **Bodhic. ṭ.** ad IX. 150 (p. 377.7) **Abhidharmak. v.** (Soc. As.) 231b (avec la lecture: *sthitaiveyam* ...), **Çikṣās.** 236. 16; et pour la formule *utpādād vā*. . **Çikṣās.** 16. 18, **Prajñāp.** 273. 21. Le Tib. (ཆོས་རྣམས་ཀྱི་ ཆོས་ཉིད་ དེ་ནི་ གནས་པ་ ཁོ་ན་སྟེ) confirme la lecture *eṣā*; l'ingénieuse traduction de Gough (*eṣām*) doit être abandonnée. — **M. Vyut.** 94. 15 *sthitaiṣā dharmadhātusthititā.* — La formule de la *sthitatā* des *dharmas*, insérée dans le **Çālistambasūtra** et bien connue des Commentateurs brahmaniques, fait partie d'un ancien *dharmaparyāya;* voir notamment **Aṅg. N.** I. 286. 6 (III. 134), **Saṃ. N.** II. 25. 19, **Kathāvatthu** VI. 2 et Comm., **Laṅkāvatāra** 144 in fine.

2) Tib. ajoute ཞེས་བྱ་བ་དང་

3) Trois, quatre ou cinq nourritures. Cf. **Dharmas.** LXX, **M. Vyut.** 118, **Childers** 20a, **Warren** 243, **Dh. Saṅ.** § 58, 71, **Kathāv.** 509, **Majjh. N.** I. 261. 4 *cattāro 'me bhikkhave bhūtānaṃ vā sattānaṃ ṭhitiyā sambhavesinaṃ vā anuggahāya, katame cattāro.....*, **Abhidh. k. v.** (Soc. As.) fol. 250b 7, **Mhv.** III. 65. 17, **Si-do-in-dzou** (Musée Guimet) p. 126, etc.

4) Voir **Itivuttaka** № 42. *Dve-me bhikkhave sukhā dhammā lokaṃ pālenti, katame dve? Hiri ca ottappañ ca.* **Aṅg. N.** I. p. 51, Iᵃ p. 116 et **Atthasālinī** § 318 (avec la lecture *sukkā* [= *çuklā*] *dhammā*). — Cf. **Çikṣās.** 105, n. 2, 136. 1, 192. 1, Mᵈᵉ **Rhys Davids, Dh.-saṇi**, p. 20 note, **Mhv.** I. 462.

5) Le Tib. fournit une lecture préférable: *virudhyate* (འགལ་ལ་བ). Le sens paraît être *kathaṃ na sūtravirodhaḥ*.

6) Mss. *yata evāha, yata evāhi*.

7) Tib. ཡོད་པར་ ཐོས་པར་ འགྱུར་བ; *thos-pa* = *çru*, expression plus technique. — «C'est parce que l'Écriture parle du *nirodha*....»

प्रणीतमाचार्येण नेय(1)नीतार्थसूत्रान्तविभागोपदर्शनार्थं। तत्र य एते प्रतीत्यसमुत्पाद[स्योत्पाद]ादय उक्ता न ते विगताविद्यातिमिरा[ना]स्रवविषयस्वभावापेक्षया ' किं [Tib. 14b] तर्ह्यविद्यातिमिरोपहतमतिनयनज्ञानविषयापेक्षया।

तत्त्वदर्शनापेक्षया तूक्तं भगवता(2) ' एतद्धि भिक्षवः परमं सत्यं यदुत अमोषधर्म निर्वाणं ' सर्वसंस्काराश्च मृषा मोषधर्माणः ' इत्यादि(3)।

तथा ' नास्त्यत्र तथता वा ' अवितथता(4) वा ' मोषधर्मकमप्येतत्(5) ' प्रलोप(6)धर्मकमप्येतत् ' मृषाप्येतत् ' मायेयं(7) बाललापिनी ' इति।

तथा '

(8)फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा।
मरीचिसदृशी संज्ञा संस्काराः कदली(9)[11a]निभाः।
मायोपमं च विज्ञानमुक्तमादित्यबन्धुना(8)॥ [इति](10)

---

1) དྲང་བའི་ དོན་གྱི་ མདོ; ངེས་པའི་ དོན་གྱི་ མདོ. Cf infra p. 43. 4 et ad XV. 11 (fol. 82a *fine*); M. Vyut. 74. 4, Bodhic. ṭ. IX, s. voc. *neyārthatā*, Madh. avatāra, fol. 253a. — Cf. Vāgbhaṭālaṃkāra II. 12.

2) Voir infra XIII. 1; cité ad Bodhic. IX. 2 (p. 244. 13) avec d'inadmissibles lectures. — Cf. M. Vyut. 245. 907, 908 *mṛṣā moṣadharmiṇaḥ*.

3) Mss. *iti* |

4) Confirmé par Tib. ཕྱིན་ཅི་མ་ལོག་དེ་བཞིན་ཉིད་ (= *aviparītatathatā*).

5) Cf. Çikṣās. 261. 8 *mṛṣāmoṣadharme bālopalāpanam*; M. Vyut. 245. 906 *balollāpanam*; Majjh. II. 261 *aniccā. . . .kāmā tucchā musā moghadhammā, māyākatam etaṃ, bhikkhave, bālalāpanam*; Suttanipāta 757.

6) Manque dans le Tib. — Cf. Lalitavistara 209. 4.

7) Tib. འདྲིད་དག་ (pluriel). — Cf Saṃ. N. III. 143. 5.

8—8) Cité dans Saṁyuttanikāya III. 142 (22, 95, 15) — avec les variantes *marīcikūpamā* (cp. M. Vyut. 139. 7), *kadalūpamā*, *dīpitādicca*°.

9) Voir M. Vyut. 139. 15 *kadalīskandha*, Bodhic. I. 12, Kern, Lotus p. 141, Friendly Epistle, st. 58 (J. P. T. S. 1886); *phenapiṇḍa, budbuda, marīci*, M. Vyut. 139, 24. 14. 5.

10) Le Tib. ajoute ཞེས་བྱ་བ་དང་ = iti, et continue en prose: *evaṁ bhikṣur*

एवं धर्मान् वीक्षमाणो भिक्षुरारब्धवीर्यवान्
दिवा वा यदि वा रात्रौ संप्रजानन् प्रतिस्मृतः ।
[1]प्रतिविध्येत्पदं शान्तं संस्कारोपशमं शिवं (॥ इति)

निरात्मकत्वाच्च धर्माणामित्यादि ।

यस्यैवं देशनाभिप्रायानभिज्ञतया संदेहः स्यात् । का ह्यत्र देशना तत्त्वार्था का नु खल्वाभिप्रायिकीति । यश्चापि मन्दबुद्धितया नेयार्थां देशनां नीतार्थामवगच्छति । तयोरुभयोरपि विनेयजनयोराचार्यो युक्त्यागमाभ्यां[2] संशयमिथ्याज्ञानापाकरणार्थमिदं[3]मारब्धवान् ।

तत्र न स्वत[4] इत्यादिना युक्तिरुपवर्णिता ।

तन्मृषा मोषधर्म यद्भगवानित्यभाषत ।
सर्वे च मोषधर्माणः संस्काराः । तेन ते मृषा ॥[5]
पूर्वा प्रज्ञायते [Tib. 15a] कोटिर्नेत्युवाच महामुनिः ।
संसारोऽनवराग्रो हि नास्त्यादिर्नापि पश्चिमं ॥[6]

---

arabdhavīryaḥ smṛti-samprajanya(ཤེས་བཞིན་)-*vān divā rātrau ca dharmān pratīkṣamāṇaḥ* (ཆོས་ལ་ སོ་སོར་རྟག ...) *çāntam sarvasaṃskāra-upaçama-padaṃ dharmāṇām anātmatāṃ prekṣiṣyate*(རྟགས་བར་འགྱུར་རོ). *ityadi.*

La stance qui précède (*phenapiṇḍa°*) et ce passage — que je crois en prose dans l'original [le pada *evam dharmān vīkṣamāno* est très incorrect] — sont cités infra ad XXVI. 3 où le tib. présente une lacune.

1) Mss. *pratibimbe pade, pratividhyapade.* — Cf. Çikṣās. 195. 12, 317. 10, 214 n. 5; Pāli: *paṭivedho*, *°vijjhati* (J. P. T. S. 1884, p. 72, Aṅg. N. IV. 228. 9 et Index).

2) Par le raisonnement et par l'Ecriture; voir, pour cette formule, J. A., 1902, II p. 253, n. 3.

3) *idam çāstram.*

4) Ci-dessus 14. 1.

5) infra XIII. 1.

6) infra XI. 1.

कात्यायनाववादे चास्तीति नास्तीति चोभयं ।
प्रतिषिद्धं भगवता भावाभावविभाविना[1] ॥

इत्यादिना आगमो वर्णितः ।

उक्तं चार्याक्षयमतिसूत्रे ' कतमे सूत्रान्ता नेयार्थाः कतमे नीतार्थाः[2] । ये सूत्रान्ता मार्गावताराय निर्दिष्टा इम उच्यन्ते नेयार्थाः[3] । ये सूत्रान्ताः फलावताराय निर्दिष्टा इम उच्यन्ते नीतार्थाः । यावच्चे सूत्रान्ताः शून्यतानिमित्ताप्रणिहितानभिसंस्कारजातानुत्पादाभाव[निरात्म]निःसत्त्वनिर्जीवनिःपुद्गलास्वामिक[4]विमोक्षमुखा निर्दिष्टाः ' त उच्यन्ते नीतार्थाः । इयमुच्यते भदन्त शारद्वतीपुत्र नीतार्थसूत्रान्तप्रतिशरणता ' न नेयार्थ[सूत्रान्त]प्रतिशरणता[5] ' इति ।

---

1) infra XV. 7 (Mss : .. ca asti nāstiti ...).

2) Voir Wass, pp. 327, 328, dont la source tibetaine cite l'Akṣayamatinirdeça: «Die Bücher, in welchen von dem Nicht-Ich, wie von Ich unter verschiedenen Ausdrücken gelehrt wird, wie: Ich, Existenz, Leben, lebender Mensch, Pudgala, der Handelnde, der Empfindende u. s. w, diese Bücher enthalten den schragen Sinn».

3) Le copiste abrège. Tib. མདོ་སྡེ་ གང་དག་ བདག་དང་། སེམས་ཅན་དང་། སྲོག་དང་། གསོ་བ་དང་། སྐྱེས་བུ་དང་། གང་ཟག་དང་། ཤེད་ལས་སྐྱེས་དང་། ཤེས་བདག་དང་། བྱེད་པ་པོ་དང་། ཚོར་བ་པོ་དང་། སྒྲ་ རྣམ་པ་སྣ་ཚོགས་སུ་ བཀད་པ་ དང་། བདག་པོ་མེད་པ་ལ་ བདག་པོ་དང་ བཅས་པར་ བསྟན་པ་ དེ་དག་ནི་ དྲང་བའི་ དོན་ ཞེས་ བྱའོ། *yeṣu sūtrānteṣv ātma-sattva-jīva-poṣa-puruṣa-pudgala-manuja-manuṣya-kāraka-vedakā nānaçabdair akhyāyante, yeṣu cāsvāmikaṃ sasvāmikatvena nirdiṣṭaṃ, te neyārthāḥ.*

4) Mss. °*ābhyāmika*, °*sika*. Tib. གང་ཟག་མེད་པ་དང་། བདག་པོ་མེད་པས་ ན། རྣམ་པར་ཐར་པའི་ སྒོའི་ བར་དུ་ བསྟན་པ་ དེ་དག་ནི་. — La syntaxe de cette phrase paraît troublée. — *bdag-po*, proprietor, lord (Jaschke), *prabhu*, *pati*, *adhipa*, *adhipati*, *grāmaṇī* (D. a.), *svāmin* (Çālist. s.). — *vimokṣamukha*, M. Vyut. 73: *çūnyatā*, *animittam*, *apraṇihitam*.

5) རྟེན་པ་ to place confidence, to rely on. — Les quatre pratisaraṇas, M. Vyut. § 74, Dharmasaṃgraha LIII, Abhidh. k. v. (Ms. Burn. 473b), cité J. As. 1902, II p. 269.

तथा चार्यसमाधिराजसूत्रे ।

नीतार्थसूत्रान्तविशेष जा[11b]नति
यथोपदिष्टा सुगतेन शून्यता ।
यस्मिन् पुनः पुद्गलसत्त्वपूरुषा
नेयार्थतो[1] जानति सर्वधर्मान्[2] ॥ [Tib. 15b]

तस्मादुत्पादादिदेशनां[3] मृषार्थां प्रतिपादयितुं प्रतीत्यसमुत्पादानु[4]दर्शनमारब्धवानाचार्यः

ननु चोत्पादादीनामभावे सति यदि सर्वधर्माणां मृषात्वप्रतिपादनार्थमिदमारब्धवानाचार्यः ' नन्वेवं सति यन्मृषा न तदस्तीति न सन्त्यकुशलानि कर्माणि ' तदभावान्न सन्ति दुर्गतयः ' न सन्ति कुशलानि कर्माणि ' तदभावान्न सन्ति सुगतयः ' सुगतिदुर्गत्यसंभवाच्च नास्ति संसार इति सर्वारम्भवैयर्थ्यमेव स्यात् ।

उच्यते । संवृतिसत्यव्यपेक्षया लोकस्येदंसत्या[5]भिनिवेशस्य प्रतिपक्षभावेन मृषार्थता भावानां प्रतिपाद्यते ऽस्माभिः । नैव त्वार्याः कृत[6]कार्याः किं चिदुपलभन्ते यन्मृषा अमृषा वा स्यादिति ॥ अपि च ' येन हि सर्वधर्माणां मृषात्वं[7] परिज्ञातं ' किं तस्य कर्माणि[8] सन्ति संसारो वास्ति ' न चाप्यसौ कस्य चिद्धर्मस्यास्तित्वं नास्तित्वं वोपलभते ।

1) Mss. *neyārthatā*, °*tām*; Tib. དྲང་བའི་དོན་དུ་

2) Cette stance est citée infra ad XV. 11 (82a in fine); elle ne se trouve pas dans la partie actuellement publiée du Samādhirāja (Fasc. I), où la finale: *jānatha sarvadharmān*, est commune.

3) Le Tib. a le pluriel.

4) Mss. °*anupadarçanam*; Tib. རྗེས་སུ་སྟོན་པ་

5) འདི་ བདེན་པར་ ཞེན་པའི་···

6) manque dans le Tib.

7) Tib. = *mṛṣārthatā*.

8) Tib. = *karma*.

यथोक्तं भगवतार्यरत्नकूटसूत्रे[1] । चित्तं हि काश्यप परिगवेष्यमाणं न लभ्यते[2] ' यन्न लभ्यते तन्नोपलभ्यते[3] ' यन्नोपलभ्यते तन्नैवातीतं नानागतं न प्रत्युत्पन्नं ' यन्नैवातीतं नानागतं न प्रत्युत्पन्नं तस्य नास्ति स्वभावः ' यस्य नास्ति स्वभावस्तस्य नास्त्युत्पादः ' यस्य नास्त्युत्पादस्तस्य नास्ति निरोधः ' इति विस्तरः ।

यस्तु विपर्यासानुगमान्[4] [Tib. 16a] मृषात्वं धर्माणां नावगच्छति ' प्रतीत्यभावानां[5] स्वभावमभिनिविशते ' [12a] स धर्मेष्विदंसत्याभिनि[वेशाद्भिनि]विष्टः[6] सन् कर्माण्यपि करोति संसारे ऽपि संसरति विपर्यासावस्थितत्वान्न भव्यो[7] निर्वाणमधिगन्तुं ॥

किं पुनर्मृषास्वभावा अपि पदार्थाः संक्लेशव्यवदाननिबन्धनं भवन्ति ।[8] तद्यथा मायायुवतिस्तत्स्वभावानभिज्ञानां ' तथागतनिर्मितश्चोपचितकुशलमूलानां[9] ।

---

1) traduit par Burnouf, Intr. 562. — Voir Çikṣās. 233. 15 (235, n. 1); cp. 261. 4; Bodhic. ṭ. IX. 106 (p. 338. 16).

2) རྙེད་

3) དམིགས་པ་

4) Camb. *abhyupagamāt.*

5) Mss. *pratītyabhāvānāṃ*. Tib. = *bhāvānāṃ svabhāvaṃ parikalpya abhi°* རང་བཞིན་ ཡོད་པར་ རྟོགས་ནས་ མངོན་པར་ཞེན་པ།

6) Tib. ཆོས་རྣམས་ལ་ འདི་བདེན་པར་ མངོན་པར་ཞེན་པ་ཉིད་ཀྱི་ སྒོ་ནས་ མངོན་པར་ ཞེན་པར་ འགྱུར་དང་ །

7) སྐལ་བ་ཅན་. — Cp. Çikṣās. 209, n. 7 (*mi-bsal-ba*) et Pāli *abhabbo* (Aṅg. N. IV. 370. 2, Pugg. p. I. 13, 14).

8) Tib. = ... *bhaviṣyanti yathā māyā* .... *saṃkleçahetur bhavati, tathāgata°* ..... *vyavadānahetuḥ*. — *saṃkleça* = ཀུན་ནས་ཉོན་མོངས་པ་; *vyavadāna* = རྣམ་པར་བྱང་བ་

9) སྤྲུལ་པ་. — Cf. Mhv. I p. 521; Prajñāp. 442. 14; Kern, Lotus, p. 225, n. 1; Laṅkāv. 22. 3; Divy. 166. 7; M. Vyut. 139. 2; Kathāv. XVIII. 2 *abhinimmito jino.*

उक्तं हि दृढाध्याशयपरिपृच्छासूत्रे[1] । तद्यथा कुलपुत्र मायाकारनाटके प्रत्युपस्थिते मायाकारनिर्मितां[2] स्त्रियं दृष्ट्वा कश्चिद्रागपरीतचेताः पर्षच्छारद्य[3]भयेनोत्थायासनादपक्रामेत् । सो ऽपक्रम्य तामेव स्त्रियमशुभतो मनसिकुर्यात् । अनित्यतो दुःखतः शून्यतो ऽनात्मतो मनसिकुर्यात् । इति विस्तरः ॥

विनये[4] च । यन्त्रकारकारिता यन्त्रयुवतिः सद्भूतयुवतिशून्या सद्भूतयुवतिरूपेण प्रतिभासते । तस्य च चित्रकारस्य कामरागास्पदीभूता ॥ तथा मृषास्वभावा अपि भावा बालानां संक्लेशव्यवदान[5]निबन्धनं भवन्ति ॥

---

1) ལྷག་པའི་བསམ་པ་བསྟན་པ '''' = *adhyāçayanirdeçasūtra*. Ce passage est cité avec variantes, d'après le Dṛdhaçaya°, infra ad XXIII. 14 (fol 144a *in fine*). — Adhyāçayasaṃcodanasūtra (བསྐུལ་བ) voir Çikṣās.

2) M. Vyut. 245. 836 *dakṣo māyākāro māyakarānterasī rā*. — Bodhic. IX. 31 (p. 271. 22): *māyastriyām rāgas tatkartur api jāyate*.

3) *çāradya* = Pāli *sārajja*, cf. Childers, s. voc., Çikṣās 296. 7 et Bodhic. p. VIII. 118: *adhyatiṣṭhad ato nathaḥ svanāmapy Avalokitaḥ parṣacchāradyabhayam apy apanetuṃ janasya hi* — c'est pourquoi Avalokita a consacré son nom pour que ce nom écarte...... — Cinq *bhayas* sont énumérés Dh.-s. LXXI, mais les lectures des Mss., comme celles de l'éditeur, sont incorrectes; l'Abhidh. k. v. (Soc. As. fol. 307b 3) nous donne la même liste: *ājīvikabhaya, açloka°* (= *akīrti°*), *pariṣacchāradya°* (= *sabhāyāṃ sāṁkucityam*), *durgati°*, *maraṇa°*. — Le commentaire de Bodhic. VIII. 118 n'existe pas en sanscrit. Pour autant que j'entende la version tibétaine, il donne deux explications: la première correspond à celle de l'Abhidh. k. (བསྐུམས་པ' = *saṁkuñcana*); la seconde glose འཁོར་བ' (*parṣad*) par འགྲོ་བ' et འཇིག་རྟེན་པ' = *gati, sattva, loka*. — Quatre frayeurs, Puggalap., Comm. ad I, xi (d'après Dh.-s. p. 50): *duggati°*, *vaṭṭa°*, *kilesa°*, *upavāda°*. — Cinq frayeurs (du meurtre, etc.) Aṅg. N. IV. 406. — Çikṣās. 198. 7–11, 296.

4) Tib. འདུལ་བ་ལས་

5) °*vyavadāna*° manque dans Tib., se rapporte en effet à l'exemple précédent.

तथार्यरत्नकूटसूत्रे[1]। अथ खलु तानि पञ्चमात्राणि भिक्षुशतानि[2] भगवतो धर्मदेशनामनवतरन्त्यनवगाहमानान्यनधिमुच्यमानानि उत्थायासनेभ्यः [Tib. 16b] प्रक्रान्तानि। अथ भगवान् [तस्यां वेलायां] येन मार्गेणैते भिक्षवो गच्छन्ति स्म तस्मिन् मार्गे द्वौ भिक्षू निर्मिमीते स्म।

अथ तानि पञ्च भिक्षुशतानि येन [मार्गेण] तौ द्वौ भिक्षू [निर्मितकौ][3] तेनोपसंक्रामन्ति स्म। उपसंक्रम्य ताववोचन्' कुत्रायुष्मन्तौ गमिष्यथः॥ निर्मितकाववोचतां' गमिष्याव आवामरण्यायतनेषु' तत्र ध्यानसुख[12b]स्पर्शविहारैर्[4]विहरिष्यावः। यं हि भगवान् धर्मं देशयति तमावां नावतरावो नावगाहावहे नाधिमुच्यावहे उत्त्रस्यावः संत्रासमापद्यावहे॥ अथ तानि पञ्च भिक्षुशतान्येतदवोचन्' वयमप्यायुष्मन्तौ भगवतो धर्मदेशनां नावतरामो नावगाहामहे नाधिमुच्यामहे उत्त्रस्यामः संत्रस्यामः संत्रासमापद्यामहे। तेन वयमरण्यायतनेषु ध्यानसुखस्पर्शविहारैर्विहरिष्यामः॥ निर्मितकाववोचतां' तेन ह्यायुष्मन्तः संगास्यामो न विवदिष्यामः। अविवादपरमा[5] हि श्रमणस्य धर्माः। ******[6]॥ कस्यायुष्मन्तः प्रहाणाय प्रतिपन्नाः। तान्यवोचन्' रागद्वेषमोहानां प्रहाणाय वयं प्रति-

---

1) Tib. དཀོན་མཆོག་བརྩེགས་པ་ལས་ — Voir le même texte cité infra ad XVII. 33.

2) Le Tib. ajoute བསམ་གཏན་ཐོབ་པ་ = *dhyāna lābhin*, cf. Kathāv. a. 38. 8.

3) Les mots entre parenthèses, d'après le tibétain et la citation ad XVII. 33. — *nirmitaka*, Prajñāp. 442. 14.

4) *sukhasparçaṃ viharati*, voir M. Vyut. 245. 649, 255. 3. 5 et Çikṣās. 200. 18 où M. Bendall signale Lal.-v. 357. 12 et Mhv. I. 623.

5) *avivāda*. Cp. Çikṣās. 263. 18 *yan na vivadati tac chramaṇadharmam anusaratīti* (cf. 195. 7, 281. 14) — M. Vyut. 245 1159 — Lotus, XIV. 33: I am to utter an infallible word; refrain from disputing (vivāda, remplacé dans le Ms. par viṣāda) about it: the science of the Tathāgata is beyond reasoning. — *avivāda* = *ācāra* défini dans le Sarvadarç. (15. 11): *gurūktasyaṅgīkaraṇa*. — Les six *vivadamūlas*, Majjh. N. II. 245. — Tout le monde se dispute, fors les moines, *ibid.* p. 120.

6) cf. infra fol. 100a. Notre texte est abrégé.

पन्नाः ॥ [Tib. 17a] निर्मितकाववोचतां ' किं पुनरायुष्मतां संविद्यन्ते रागद्वेषमोहा यान् क्षपयिष्यथ । तान्यवोचन् ' न ते ऽध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यन्ते नापि तेऽपरिकल्पिता उत्पद्यन्ते ॥ निर्मितकाववोचतां ' तेन ह्यायुष्मन्तो मा कल्पयत [मा विकल्पयत] ' यदा चायुष्मन्तो न कल्पयिष्यथ न विकल्पयिष्यथ तदा न रंक्ष्यथ न विरंक्ष्यथ ' यश्च न रक्तो न विरक्तः स शान्त इत्युच्यते । शीलमायुष्मन्तो न संसरति न परिनिर्वाति ' समाधिः प्रज्ञा विमुक्तिर्विमुक्ति[1]ज्ञानदर्शनमायुष्मन्तो न संसरति न परिनिर्वाति । एभिश्चायुष्मन्तो धर्मैर्निर्वाणं सूच्यते । एते च धर्माः शून्याः प्रकृतिविविक्ताः ' प्रजहीतैतामायुष्मन्तः संज्ञां यदुत परिनिर्वाणमिति । मा च संज्ञायां[2] संज्ञां कार्ष्ट ' मा च संज्ञायां[2] संज्ञां परिज्ञासिष्ट ' यो हि संज्ञायां संज्ञां परिजानाति संज्ञा[3]बन्धनमेवास्य तद्भव[13a]ति । संज्ञावेदयितनिरोध[4]समापत्तिमायुष्मन्तः समापद्यध्वम् । संज्ञावेदयितनिरोधसमापत्तिसमापन्नस्य भिक्षोर्नास्त्युत्तरीकर[5]णीयमिति वदावः ॥

[6]अथ तेषां पञ्चानां भिक्षुशतानामनुपादाया[7]स्रवेभ्यश्चित्तानि विमुक्तान्यभूवन् । तानि [Tib. 17b] विमुक्तचित्तानि येन भगवांस्तेनोपसंक्रान्तानि ' उपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्यैकान्ते न्यसीदन् ।

1) Ce sont les cinq *lokottaraskandhas*; voir Dh.-s. XXIII et sources citées *in loc.* (Lire M. Vyut. 4.)

2) Mss. *saṃjñayāḥ*; Tib. འདུ་ཤེས་ལ་

3) D'après le Tib. *saṃjñāyāṃ paribandhanam.*

4) Tib. འདུ་ཤེས་ དང་ ཚོར་བ་ འགོག་པའི་ སྙོམས་པར་འཇུག་པ་ = *saññāvedayitanirodho*, Childers 288b 4.

5) = pāli *uttariṃ karaṇīyam* = གོང་དུ་ བྱ་བ

6) Le Tib. (comme aussi fol. 100a): *asmin khalu dharmaparyāye bhāṣyamāṇe teṣāṃ pañcānām* .....

7) *anupādāya*; Tib. ལེན་པ་མེད་པར་ = *anādāya.* — L'expression est bien connue, voir M. Vyut. 129. 3.

अथायुष्मान् सुभूतिस्तान् भिक्षूनेतदवोचत् ' कुत्रायुष्मन्तो गताः कुतो वागताः । तेऽवोचन् ' न क्वचिद्गमनाय न कुतश्चिदागमनाय भदन्त सुभूते भगवता धर्मो देशितः ॥ आह ' को नामायुष्मतां शास्ता । आहुः ' यो नोत्पन्नो न परिनिर्वास्यति ॥ आह ' कथं युष्माभिर्धर्मः श्रुतः । आहुः ' न बन्धनाय न मोक्षाय[1] ॥ आह ' केन यूयं विनीताः । आहुः ' यस्य न कायो न चित्तं ॥ आह ' कथं यूयं प्रयुक्ताः । आहुः ' नाविद्याप्रहाणाय न विद्योत्पादनाय ॥ आह ' कस्य यूयं श्रावकाः । आहुः ' येन न प्राप्तं नाभिसंबुद्धं ॥ आह ' के युष्माकं सब्रह्मचारिणः[2] । आहुः ' ये त्रैधातुके[3] नोपविचरन्ति ॥ आह ' कियच्चिरेणायुष्मन्तः परिनिर्वास्यन्ति । आहुः ' यदा तथागतनिर्मिताः परिनिर्वास्यन्ति ॥ आह ' कृतं युष्माभिः करणीयं । आहुः ' अहंकारममकारपरिज्ञानतः ॥ आह ' क्षीणा युष्माकं क्लेशाः । आहुः ' अत्यन्तक्षयात्सर्वधर्माणां ॥ आह ' धर्षितो युष्माभिर्मारः । आहुः ' स्कन्धमारानुपलम्भात्[4] ॥ आह ' परिचरितो युष्माभिः शास्ता [Tib. 18a] । आहुः ' न कायेन न वाचा न मनसा ॥ आह ' विशोधिता युष्माभिर्दक्षिणीयभूमिः[5] । [13b] आहुः ' अग्राहतोऽप्रतिग्राहतः ॥ आह ' उत्तीर्णो युष्माभिः संसारः । आहुः ' अनुच्छेदतोऽशाश्वततः ॥ आह ' प्रतिपन्ना[6] युष्माभिर्दक्षिणीयभूमिः । आहुः ' सर्वग्राहविनिर्मुक्तितः ॥ आह । किंगामिन आयुष्मन्तः । आहुः ' [7]यंगामिनस्तथागतनिर्मिताः ॥ इति ह्यायुष्मतः सुभूतेः परि-

---

1) Prajñāp. 22. *māyāpuruṣasya vijñānam. .abaddham amuktam.*

2) Kathāv. a. 39 in fine: *dve brahmacariyavāsā maggabhāvanā ca pabbajjā ca.*

3) On distingue le *kāma*°, le *rūpa*° et l'*arūpāvacara* (Dh. saṅ; Abhidh. saṅ. dans J. P. T. S. 1884).

4) Voir Çikṣās. 198. 10 et Mhv. III. 273. 2 et 281. 7, une énumération de quatre Māras: *skandhamāra, kleça*°, *mṛtyu*°, *devaputra*°. Pour les sources palies, Childers, p. 241 (*abhisaṅkhāra*°).

5) Tib. ཡོན་གནས་ཀྱི་ ས་ སྦྱངས་སམ. Voir Childers, s. voc. *dakkhiṇeyyo, dakkhiṇāvisuddhi*; Çikṣās. *dakṣiṇīya.*

6) *pratipanna* = ཞུགས་པ་

7) Mhv. III. 206. 16 *yaṃsukhī bhavān... taṃsukhī vayam api, yaṃduḥkhī...* — Kathāv. a. VII. 8 *taṃsaṃvattanīya.*

पृच्छतस्तेषां भिक्षूणां विसर्जयतां तस्यां पर्षदि अष्टानां भिक्षुशतानामनुपादायास्रवेभ्यश्चित्तानि विमुक्तानि द्वात्रिंशतश्च प्राणिसहस्राणां विरजो विगतमलं धर्मेषु धर्मचक्षुः विशुद्धं[1]। इति ॥

इत्येवं मृषास्वभावाभ्यां तथागतनिर्मिताभ्यां भिक्षुभ्यां पञ्चानां भिक्षुशतानां व्यवदाननिबन्धनं कृतमिति[2]।

उक्तं चार्यवज्रमण्डायां[3] धारण्यां। तद्यथा मञ्जुश्रीः काण्डं च प्रतीत्य मथनीं च प्रतीत्य पुरुषस्य हस्तव्यायामं [च] प्रतीत्य धूमः[4] प्रादुर्भवतीति ' अग्निरभिनिर्वर्तते ' स चाग्निसंतापो न काण्डसंनिश्रितो न मथनीसंनिश्रितो न पुरुषहस्तव्यायामसंनिश्रितः[5]। एवमेव मञ्जुश्रीरसद्विपर्यासमोहितस्य पुरुषपुद्गलस्योत्पद्यते रागपरिदाहो द्वेषपरिदाहो मोहपरिदाहः। स च परिदाहो नाध्यात्मं न बहिर्धा नोभयमन्तरेण स्थितः ॥

अपि तु मञ्जुश्रीर्यदुच्यते मोह इति तत्केन कारणेनोच्यते मोह इति। [Tib 18b] अत्यन्तमुक्तो हि मञ्जुश्रीः सर्वधर्मैर्मोहस्तेनोच्यते मोह इति[6] ॥ तथा नरकमुखा मञ्जुश्रीः सर्वधर्मा इदं धारणीपदं[7] ॥ आह। कथं भगवन्निदं धारणीपदं ॥ आह। नरका मञ्जुश्रीर्बा-

---

1) C'est-à-dire qu'ils réalisent le *dharme dharmānudarça*.

2) Voir ci-dessus 46. 6.

3) Tib. རྡོ་རྗེ་སྙིང་པོ་ལས་ = *vajramaṇḍāt*. — Voir Nanjio, Nos 372, 373 (587, 524 A. D.); Kandjour, Mdo X, fol. 455—474 (A. M. G. II. 250); Burn., Intr. p. 543. Un fragment de cette citation est reproduit infra ad XXIII. 13. — Sur la valeur du mot *maṇḍa* dans l'expression *bodhimaṇḍa*, dont celle-ci est dérivée, Bodhic. p., p. 58, note 3. — *Dhāraṇī*, voir Kern, Lotus, 311, note; Suzuki, Açvaghoṣa's Discourse..., 136. n. 3: «Here Dhârani means simply any epigrammatic proposition which will serve as a key to the deep significance of the Doctrine».

4) Même comparaison Lalita 211. 3—4.

5) Mss. *saṁniḥçrita*, °*niḥsṛta*, °*niçrita*; cf. Mhv. I. 433, 456.

6) «Voila de bien mauvaise grammaire pour appuyer des théories qui ne valent pas mieux» (Burnouf).

7) «...cet axiome de la Dhāraṇī» (Burnouf).

लपृथग्जनैरसद्विपर्यासविठपिताः[1] स्वविकल्पसंभूताः ॥ ग्राह । कुत्र भगवन्नरकाः समवसृ[14 a]रन्ति ॥ भगवानाह । ग्राकाशसमवसरणा मञ्जुश्रीर्नरकाः । तत्किं मन्यसे मञ्जुश्रीः स्वविकल्पसंभूता नरका उत स्वभावसंभूताः ॥ ग्राह । स्वविकल्पेनैव भगवन् सर्वबालपृथग्जना नरकतिर्यग्योनियमलोकं संजानन्ति । ते चासत्समारोपेण दुःखां वेदनां वेदयन्ति दुःखमनुभवन्ति त्रिष्वप्यपायेषु ।

यथा चाहं भगवन्नरकान् पश्यामि तथा नारकं दुःखं । तद्यथा भगवन् कश्चिदेव पुरुषः सुप्तः स्वप्नान्तरगतो नरकगतमात्मानं संजानीते ' स तत्र क्वथितायां[2] संप्रज्वलितायामनेकपौरुषायां[3] लोहकुम्भ्यां[4] प्रक्षिप्तमात्मानं संजानीयात् ' स तत्र खरां कटुकां तीव्रां दुःखां वेदनां वेदयेत् ' स तत्र मानसं परिदाहं संजानीयात् [Tib. 19 a] ' उत्त्रसेत् संत्रासमापद्येत । स तत्र प्रतिविबुद्धः समानः[5] ग्रहो दुःखमहो दुःखमिति क्रन्देत् शोचेत् परिदेवेत् ॥ ग्रथ तस्य मित्रज्ञातिसालोहिताः परिपृच्छेयुः ' केन तत्ते दुःखमिति ॥ स तान्मित्रज्ञातिसालोहितानेवं वदेत्[6] ' नैरयिकं दुःखमनुभूतं । स तानाक्रोशेत्परिभाषेत् ' ग्रहं च नाम नैरयिकं दुःखमनुभवामि । यूयं च मे उत्तरि[7] परिपृच्छथ केनैतत्तव दुःखमि-

1) Cf. *viṭhapana* (M. Vyut. 245, 827, 10. 31) = *viṣṭhapana* (W. K. F.); °*nā*, Çikṣās. 180. 4, 236. 1; *cittaviṭhapitatva*, Pañcakrama, III, ṭipp. l. 18.

2) Voir M. Vyut. 245. 755—6. — Paris *kathitāyām* = «dont on parle tant» (Burnouf).

3) *pauruṣa* = la charge qu'un homme peut porter (P. W.). — Tib. སྐྱེས་བུ་ དུ་མ་ དང་ ལྡན་པ་ = «remplie d'hommes».

4) Camb. *kuṇḍī*; ལྕགས་ཀྱི་བུམ་པ་; cf. Kāraṇḍavyūha 9. 6, Çikṣās. 75. 8. Bodhic. p. VI. 89.

5) *samāna*, cf. Burn. Lotus 409, Div. Av. 651. 6 (P. W.); le tib. lit *sa-māna* (= avec orgueil).

6) Mss. *vedayet*; Tib. སྨྲ་བར་བགྱིད་

7) *uttari*, cf. Mhv. III. 396. 9.

ति ॥ अथ ते मित्रज्ञातिसालोहितास्तं पुरुषमेवं वदेयुर्मा भैर्भोः पुरुष सुप्तो हि त्वं ' न त्वमितो गृहात्क्व चिन्निर्गतः ॥ तस्य पुनरपि स्मृतिरुत्पद्यते सुप्तोऽहमभूवं । वितथमेतन्मया परिकल्पितमिति[1] । स पुनरपि सौमनस्यं प्रतिलभते ।

तद्यथा भगवन् स पुरुषोऽसत्समारोपेण सुप्तः स्वप्नान्तरगतो नरकगतमात्मानं संजानीयात् ' ए[14b]वमेव भगवन् सर्वबालपृथग्जना असद्[2]रागपर्यवनद्धाः स्त्रीनिमित्तं कल्पयन्ति । ते स्त्रीनिमित्तं कल्पयित्वा ताभिः सार्धं रममाणमात्मानं संजानन्ति । तस्य बालपृथग्जनस्यैवं [Tib. 19b] भवत्यहं पुरुष इयं स्त्री ममैषा स्त्री । तस्य तेन छन्द[3]रागपर्यवस्थितेन चित्तेन भोगपर्येष्टिं[4] चित्तं क्रामयति । स ततोनिदानं कलहविग्रहविवादं संजनयति । तस्य प्रदुष्टेन्द्रियस्य[5] वैरं संजायते । स तेन संज्ञाविपर्यासेन कालगतः समानो बहूनि कल्पसहस्राणि नरकेषु दुःखां वेदनां वेदयमानमात्मानं संजानाति ।

तद्यथा भगवन् तस्य पुरुषस्य मित्रज्ञातिसालोहिता एवं वदन्ति ' मा भैः मा भैः भोः पुरुष सुप्तो हि त्वं ' न त्वमितो गृहात् कुतश्चिन्निर्गत[6] इति । एवमेव भगवन् बुद्धा भगवन्तश्चतुर्[7]विपर्यासविपर्यस्तानां सत्त्वानामेवं धर्मं देशयन्ति ' नात्र स्त्री न पुरुषो न सत्त्वो न जीवो न पुरुषो न पुद्गलः । वितथा इमे सर्वधर्माः ' असन्त इमे सर्वधर्माः । विठपिता इमे

---

1) Mss. *parikalpitamanubhūtam iti.*

2) *asat* = བདེན་པ་མ་ལགས་པ་ = *asatya*, avec quelque emphase.

3) *aprāpteṣu viṣayeṣu prārthanā chandaḥ, prāpteṣu rāgaḥ* (Abhidh. k. v. Soc. As., 236 d 8).

4) Mss. *paryasti*° (= °*stikā** = Ruhebett*. — P. W.). Mais Tib. ཚོལ་བ་ = chercher. ཡོངས་སུ་ · · · = *paryeṣaṇa.*

5) *praduṣṭa* = གདུག་པ་, donc de *duṣ* et non de *dviṣ.*

6) Sic Mss.

7) Sur les quatre *viparyāsas*, voir Muséon, 1900, p. 236 et Yogas. II. 5, Aṅg. N. II. 52, Çikṣās. 198. 11, Friendly Epistle, st. 48, Abhidh. k. v. (Soc. As.) 347 a 5—b 8.

सर्वधर्माः । मायोपमा इमे सर्वधर्माः । स्वप्नोपमा इमे सर्वधर्माः । निर्मितोपमा इमे सर्वधर्माः । उदकचन्द्रोपमा इमे सर्वधर्मा इति विस्तरः ॥ त इमां तथागतस्य धर्मदेशनां श्रुत्वा विगतरागान् सर्वधर्मान् पश्यन्ति । विगतमोहान् सर्वधर्मान् पश्यन्ति[1] । अस्वभावाननावरणान् । [Tib. 20 a] ते आकाशस्थितेन चेतसा कालं कुर्वन्ति[2] । ते[3] कालगताः स[15a]मानाः निरुपधिशेषे निर्वाणधातौ परिनिर्वान्ति । एवमहं भगवन्नारकान् पश्यामि । इति ॥

उक्तं चार्योपालिपरिपृच्छायां[4] ।

भय दर्शित नैरयिकं मे सत्वसहस्र सवेजित नैके ।
न च विद्यति कश्चिह सत्व यो च्युतु गच्छति घोरमपायं[5] ॥
न च कारकु कारण सन्ति येहि कृता असितोमरशस्त्राः ।
कल्पवशेन तु पश्यति तत्र कायि पतन्ति अपायित शस्त्राः[6] ॥

---

1) M. Vyut. 10. 14. 16.

2) Tib. = *maraṇakālam kurvanti.*

3) Tib = *te kālam kṛtvā samanantaram.* .

4) Ce fragment est cité ad VIII. 12 et XII. 10. — Voir aussi III. 7, VII. 12. L'Upālipariprcchā citée dans Çikṣās. est en prose. (Cf. la note de M. Bendall, 164. 8). — Mètre Dodhaka, irrégulier, les pādas impairs présentant le schème ⏑⏑⏑ | —⏑⏑ | —⏑⏑ | ——.

5) Mss. *ghoruyapāyam, ghoram...* Tib. = *nairayike bhaye mayā deçite 'nekāni sattvasahasrāṇi saṃvejitāni...*

6) གང་དག་ རལ་གྲི་ མདའ་ཆེན་ མཚོན་ འཕེན་པའི།
གསོད་པ་ བྱེད་པ་ ཡོད་པ་མ་ཡིན་ཏེ།
རྟོག་པའི་ དབང་གིས་ ངན་སོང་ དེ་དག་ན།
ལུས་ལ་ འབབ་ མཐོང་ དེ་ན་ མཚོན་ཆ་ མེད།།

soit: *ye asi-tomara-çastra-kṣepaṇa-apaghāta-kārakāḥ,* [*te*] *na santi; kalpavaçena durgatiṣu tāsu kāye patanti* [*çastrāṇi*] *paçyati; tatra çastrāṇi na santi.*

चित्रमनोरमसज्जितपुष्पाः[1] स्वर्णविमान ज्वलन्ति मनोज्ञाः ।
तेष्वपि कारकु नास्तिह कश्चि तेऽपि च स्थापित कल्पवशेन ॥
कल्पवशेन विकल्पितु[2] लोकः संज्ञग्रहेण विकल्पितु बालः[3] ।
सो च[4] ग्रहो अग्रहो असभूतो मायमरीचिसमा हि विकल्पाः[5] ॥ इति ।

तदेवमेते ऽस्वभावा भावाः स्वविपर्यासविठपिता बालानां संक्लेशहेतवो भवन्ति संसार इति स्थितं ।[6]

यथा च मृषास्वभावानां पदार्थानां संक्लेशव्यवदानहेतुत्वं तथा मध्यमकावतारा[7]द्विस्तरेणावसेयं ।

अत्राह । यदि स्वतः परत उभयतोऽहेतुतश्च नास्ति भावानामुत्पादस्तत्र कथमविद्याप्रत्ययाः संस्कारा इत्युक्तं भगवता ॥ उच्यते [Tib. 20b] । संवृतिरेव न तत्त्वं ।[8]

किं संवृतेर्व्यवस्थानं वक्तव्यं ॥ इदंप्रत्ययता[9]मात्रेण संवृतेः सिद्धिरभ्युपगम्यते । न तु पक्षचतुष्टयाभ्युपगमेन सस्वभाववादप्रसङ्गात् । तस्य चायुक्तत्वात् । इदंप्रत्ययतामात्रा-

---

1) Mss. *saṃjñita*, *sajjitā çreṣṭhaḥ*; Tib. མེ་ཏོག་ ཁ་བྱེ་འབྱེད་; *sajjita* = *vikasita*?

2) *vikalpita* = རྣམ་པར་ བརྟགས་

3) Mss. *vasaḥ*, *balaḥ*. — Tib. བྱིས་པ་ རྣམ་པར་ཕྱེ་ (*vi-bhaj.*).

4) Mss. *bho ca*, *sāra*, *sa ca*, *so ca*. — Tib. དེ་ ཡང་

5) Mss. °*samo*...°*kalpaḥ*; °*samā*...°*kalpāḥ*.

6) Voir ci-dessus 46. 7.

7) Voir ci-dessus 13. n. 3.

8) Mss. *saṃvṛti evā na*.... D'après le Tib. *etad eva saṃvṛtir na tattvam eva*. — Comp. infra Tib. fol. 26a.

9) Voir ci-dessus 9. n. 7 et 8.

भ्युपगमे हि सति हेतुफलयोरन्योन्यापेक्षत्वान्नास्ति स्वाभाविकी सिद्धिरिति नास्ति सस्वभाववादः। अत एवोक्तं

स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकं।
तार्किकैरिष्यते दुःखं त्वया तूक्तं प्रतीत्यजं॥ इति[1]।

इहापि [15b] वक्ष्यति।

प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकं।
कर्म प्रवर्तते नान्यत्पश्यामः सिद्धिकारणं॥ इति॥[2]

भगवताप्येतावन्मात्रमेवोक्तं। तत्रायं धर्मसंकेतो यदुतास्मिन् सतीदं भवति' अस्योत्पादादिदमुत्पद्यते' यदुताविद्याप्रत्ययाः संस्काराः संस्कारप्रत्ययं विज्ञानमित्यादि[3]॥

अत्र केचित्परिचोदयन्ति। अनुत्पन्ना भावा इति किमयं प्रमाणजो निश्चय उताप्रमाणजः। तत्र यदि प्रमाणज इष्यते तदेदं वक्तव्यं' कति प्रमाणानि किंलक्षणानि किंविषयाणि किं स्वत उत्पन्नानि किं परत उभयतो ऽहेतुतो वेति। अथाप्रमाणजः स न युक्तः' प्रमाणाधीनत्वात्प्रमेयाधिगमस्य[4]। [Tib. 21a] अनधिगतो ह्यर्थो न विना प्रमाणैरधिगन्तुं शक्यत इति प्रमाणाभावादर्थाधिगमाभावे सति कुतोऽयं सम्यग्निश्चय इति न युक्तमेतदनुत्पन्ना भावा इति। यतो वायं निश्चयो भवतो ऽनुत्पन्ना भावा इति भविष्यति तत एव ममापि सर्वभावाः सन्तीति' यथा चायं ते निश्चयोऽनुत्पन्नाः सर्वधर्मा इति तथैव

1) Citation non identifiée, mais comp. le sūtra XII. 1.

2) = VIII. 12.

3) Voir supra p. 9 n. 7.

4) Voir Col. Jacob, Laukikanyāyāñjali, p. 30 *mānādhīnā meyasiddhiḥ*; Sarvadarç. s. 8. 12 *ekākinī pratijñā hi pratijñātaṃ na sādhayet*; Nyayavārt. 345. 11.

ममापि सर्वभावोत्पत्तिर्भविष्यति[1]। अथ ते नास्ति निश्चयोऽनुत्पन्नाः सर्वभावा इति ' तदा स्वयमनिश्चितस्य परप्रत्य[ा]यना[2]संभवाच्छास्त्रारम्भवैयर्थ्यमेवेति सन्त्यप्रतिषिद्धाः[3] सर्वभावा इति ॥

उच्यते। यदि कश्चिन्निश्चयो ना[मा]स्माकं स्यात्[4] ' स प्रमाणजो वा स्यादप्रमाणजो वा। न त्वस्ति। किं कारणं। इहानिश्चयसंभवे सति स्यात्तत्प्रतिपक्षस्तदपेक्षो निश्चयः। यदा त्वनिश्चय एव तावदस्माकं नास्ति ' तदा [16a] कुतस्तद्विरुद्धा[5]विरुद्धो निश्चयः स्यात्संबन्ध्यन्तरनिरपेक्षत्वात् खरविषाणस्य ह्रस्वदीर्घतावत्। यदा चैवं निश्चयस्या-

---

1) «Vous n'avez pas de preuves? nous aussi nous nous en passerons.» C'est l'objection proposée Vigrahavyavartani, stance 18 (= *yadi bhavatām hetvabhāve svabhāvapratiṣedhaḥ siddhaḥ, asmakam api hetvabhāve svabhāvaḥ sidhyati*) et réfutée st. 69.

Comp. Nyāyasutra II. 1. 8 et suiv., et surtout les explications de Vācaspatimiçra (Tātparyaṭ. 248. 25): *sarvair eva vadibhiḥ svasiddhāntavyavasthapanāya pramaṇāny abhyupagantavyani, tadabhāve tadvyavasthanupapatteḥ . yasya tu svapakṣa eva nasti, nāsau laukiko na parikṣaka: ity unmattavad upekṣaṇīyaḥ* — L'attitude des philosophes bouddhiques est expliquée avec précision: *ayam atra pūrvapakṣiṇo Mādhyamikasyābhisaṃdhiḥ: yady api mama viçvavicarasahatvavādinaḥ pramāṇaṃ nāma na kiṃ cid asti vicarasahaṃ, tathapi lokasiddhāny eva pramāṇāni tair eva pramaṇaiḥ paryalocyamanāni vicaraṃ na sahante: so 'yaṃ pramaṇānām aparādho yani svavirodhena viliyante na mamāparadha iti.* — M. Garbe a résume la discussion des Sāṃkhyas et des Mādhyamikas, Die Saṃkhya-Philosophie, p. 203. 20.

2) Tib. གཞན་ ངོ་རྡུ་རྒྱུད་པར་བྱེད་པ་ མི་སྲིད་པའི་ཕྱིར་ = *parāvabodhana*°. Voir Böhtlingk, s. voc. *pratyayanā*, M. Vyut. 215. 742 (°*arthaḥ*), Bodhic. p. VIII. 101, ad fin.

3) Calc. *apratiddhā*; Camb., Paris *aprasiddhā*. Tib. དེས་ན་ དངོས་པོ་ཐམས་ཅད་ བཀག་པ་མེད་པར་ ཡོད་པ་ ཡིན་ནོ་ = par conséquent tous les êtres, n'étant pas niés, existent.

4) གལ་ཏེ་ ཁོ་བོ་ཅག་ལ་ ངེས་པ་ ཞེས་བྱ་བ་ འགག་ཞིག་ ཡོད་པར་འགྱུར་ན་ནི་ — *hgay-zhig*, erreur pour *hga*-.

5) D'après le Tib. *tadviruddho niçcayaḥ* = དེ་ དང་ འགལ་བ་ .

भावः ' तदा कस्य प्रसिद्ध्यर्थं प्रमाणानि परिकल्पयिष्यामः । कुतो वैषां संख्या लक्षणं विषयो वा भविष्यति ' स्वतः परत उभयतो [ऽहेतुतो] वा समुत्पत्तिरिति सर्वमेतन्न वक्तव्यमस्माभिः [Tib. 21 b] ॥

यद्येवं निश्चयो नास्ति सर्वतः ' कथं पुनरिदं निश्चितरूपं वाक्यमुपलभ्यते भवतां ' न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतो भावा भवन्तीति ॥ उच्यते ' निश्चितमिदं वाक्यं लोकस्य स्वप्रसिद्धयैवोपपत्त्या नार्याणां ।

किं खल्वार्याणामुपपत्तिर्नास्ति । केनैतदुक्तमस्ति वा नास्ति वेति । परमार्थो ह्यार्य[ाणां] तूष्णींभावः[1] ' ततः कुतस्तत्र प्रपञ्चसंभवो[2] यदुपपत्तिरनुपपत्तिर्वा स्यात् ।

यदि ह्यार्या उपपत्तिं न वर्णयन्ति केन खल्विदानीं परमार्थं लोकं बोधयिष्यन्ति ॥

न खल्वार्या लोकसंव्यवहारेणोपपत्तिं वर्णयन्ति ' किं तु लोकत एव या प्रसिद्धोपपत्तिस्तां परावबोधार्थमभ्युपेत्य तयैव[3] लोकं बोधयन्ति । यथैव हि विद्यमानामपि शरीराशुचितां विपर्यासानुगता रागिणो नोपलभन्ते शुभाकारं चाभूतमध्यारोप्य परिक्लिश्यन्ते ' तेषां वैराग्यार्थं तथागतनिर्मितो देवो वा शुभसंज्ञया प्राक् प्रच्छादितान् कायदोषानुपवर्णयेत्[4] ' सन्त्यस्मिन्काये केशा[5] [इत्या]दिना । ते च तस्याः शुभसंज्ञाया विमुक्ता[6] वैराग्यमासाद-

---

1) Mss. *āryas tūṣṇīm°*; Tib. འཕགས་པ་རྣམས་ཀྱི་. — Aṅg. N. IV. 153. 9 ..*ariyaṃ vā tuṇhībhāvaṃ nātimaññati.* A ce silence s'oppose la *dhammī kathā.* — Le *paramārtha* est indicible, *akṣaravarjita.* — On sait d'ailleurs que les Tathāgatas gardent le silence, Laṅkāv. 17. 15 et sources citées J. R. A. S. 1902, p. 374, n. 1.

2) D'après le Tib. *tasmād yatropapattyanupapattyasaṃbhavas tatra prapañcasaṃbhavaḥ kutaḥ.*

3) Mss. *masaiva, mamaiva.* Tib. དེ་ཉིད་ཀྱིས་

4) Mss. *kāmadoṣān.* Tib. ལུས་ཀྱི་.

5) Comparer Bodhic. ṭ. 295. 4, Majjh. N. III. 90, Çikṣās. 228, etc.

6) Mss. *°sañjñāyāṃ viṣamā*; Tib. གཙང་བའི་ འདུ་ཤེས་ དེ་ དང་ བྲལ་བས་

पेयुः । एवमिहाप्यार्यैः सर्वथाप्यनुपलभ्यमानात्मकं [16b] भावानामविद्यातिमिरोपहतमतिनयनतया विपरीतं [Tib. 22a] स्वभावमध्यारोप्य क्व चिच्च कं चिद्विशेषमतितरां परिक्लिश्यन्ति पृथग्जनाः । तानिदानीमार्यास्तत्प्रसिद्धयैवोपपत्त्या परिबोधयन्ति । यथा विद्यमानस्य घटस्य न मृदादिभ्य उत्पाद इत्यभ्युपेतमेवमुत्पादात्पूर्वं विद्यमानस्य[1] विद्यमानत्वान्नास्त्युत्पाद इत्यवसीयतां । यथा च परभूतेभ्यो ज्वालाङ्गारादिभ्यो ऽङ्कुरस्योत्पत्तिर्नास्तीत्यभ्युपेतमेवं विवक्षितेभ्यो ऽपि बीजादिभ्यो नास्तीत्यवसीयतां ।

अथापि स्यादनुभव एषोऽस्माकमिति ॥ एतदप्ययुक्तं । यस्मादनुभव एष मृषा[2] । अनुभवत्वात् । तैमिरिकद्विचन्द्राद्यनुभ[व]वदिति । ततश्चानुभवस्यापि साध्यसमत्वात्तेन प्रत्यवस्थानं न युक्तमिति[3] ।

तस्मादनुत्पन्ना भावा इत्येवं तावद्विपरीतस्वरूपाध्यारोपप्रतिपक्षेण प्रथमप्रकरणारम्भः । इदानीं क्व चिद्यः कश्चिद्विशेषोऽध्यारोपितस्तद्विशेषापाकरणार्थं शेषप्रकरणारम्भः । गन्तृगन्तव्यगमनादिकोऽपि[4] निरवशेषो विशेषो नास्ति प्रतीत्यसमुत्पादस्येति प्रतिपादनार्थं ॥

अथ स्यादेष एव प्रमाणप्रमेयव्यवहारो लौकिकोऽस्माभिः [Tib. 22b] शास्त्रेणानुवर्णित[5] इति ॥ तदनुवर्णनस्य तर्हि फलं वाच्यं ॥ कुतार्किकैः[6] स नाशितो विपरीतलक्षणा-

---

1) Les Mss. ajoutent *ghaṭasya*, qui manque dans le Tib.

2) Tib. = *mṛṣārthaḥ*.

3) Le Tib. place ici les mots *tatprasiddhayaivopapattyā bodhayanti*. (Voir ci-dessus l. 3.)

4) Chapitre II.

5) Je ne sais de quel *çāstra* il est question, ni quel est l'objectant. — Tib. ཁོ་བོ་ཅག་གི་ བསྟན་བཅོས་སུ་ = *asmākaṃ çāstre.*

6) Tib. རྟོག་གེ་པ་ = *tārkika.*

भिधानेन ' तस्यास्माभिः सम्यग्लक्षणमुक्तमिति चेत् ॥ एतदप्ययुक्तं । यदि हि कुता[1]र्किकैर्विपरीतलक्षणप्रणयनं [2]कृतं लक्ष्यवैपरीत्यं लोकस्य स्यात् ' तदर्थं प्रयत्नसाफल्यं स्यात् ' न चैतदेवमिति व्यर्थ एवायं प्रयत्न इति ।

अपि च ' यदि प्रमाणाधीनः प्रमेयाधिगम[17a]स्तानि प्रमाणानि केन परिच्छिद्यन्त इत्यादिना विग्रहव्यावर्तन्यां विहितो दोषः[3] । तदपरिहारात् सम्यग्लक्षणद्योतकत्वमपि नास्ति ।

किं च यदि स्वसामान्यलक्षणद्वयानुरोधेन प्रमाणद्वयमुक्तं ' यस्य तल्लक्षणद्वयं किं लक्ष्यम[4]स्ति ' अथ नास्ति । यद्यस्ति तदा तदपरं [5]प्रमेयमस्तीति कथं प्रमाणद्वयं[6] । अथ नास्ति लक्ष्यं ' तदा लक्षणमपि निराश्रयं नास्तीति कथं प्रमाणद्वयं । वक्ष्यति हि '

लक्षणासंप्रवृत्तौ च न लक्ष्यमुपपद्यते ।
लक्ष्यस्यानुपपत्तौ च लक्षणस्याप्यसंभवः ॥ इति[7] ॥

---

1) Tib. རྟོག་གེ་ངན་པ་ = *kutārkika.*

2) D'après Tib. °*praṇayanat kṛta*°: ··· བརྗོད་པས་ བྱས་པའི་ མཚན་ཉིད་བྱ··· —

3) Voir p. 16 n. 5. Comparer pour le sens la st. 31 de la **Vigrahavyāvartanī** (= *yadi bhavatām arthaḥ pramāṇair eva sidhyante, bhavatpramāṇany api katham sidhyante vada*). Notre version tibétaine (qui donne l'indication བརྟག་པ་ལས་) n'est pas rythmée.

4) Paris, Camb. *kiṃ lakṣaṇam*; mais Tib. མཚན་གཞི་

5) *tadaparam*... = དེ་དག་ལས་ གཞན་པའི་ གཞལ་བྱ་ཡོད་པས་ = *tayor aparasya prameyabhāvāt* ... — Si la chose à laquelle appartiennent le *svalakṣaṇa* et le *samānyalakṣaṇa* est un *lakṣya*, il nous faut alors, outre le pramāṇa qui connaît le *svalakṣaṇa* (1er *prameya*) et celui qui connaît le *sāmānyalakṣaṇa* (2ème *prameya*), un troisième *pramāṇa* qui connaisse la chose à laquelle appartiennent les deux *lakṣaṇas* (3ème *prameya*). «Comment donc y aurait-il deux *pramāṇas*?»

6) Voir ci-dessous fol. 20a (Tib. 26b *init.*). — *pramāṇa*, traduit plus haut par ཚད་མ་, a ici pour équivalent མཚན་མ་.

7) = V. 4.

अथ स्यान्न लक्ष्यतेऽनेनेति लक्षणं ' किं तर्हि कृत्यल्युटो बहुलमिति[1] कर्मणि ल्युटं कृत्वा लक्ष्यते तदिति लक्षणं ॥[2] एवमपि तेनैतस्य[3] लक्ष्यमाणत्वासंभवाद्येनैतल्लक्ष्यते तस्य करणस्य कर्मणोऽर्थान्तरत्वात् ' स एव दोषः [Tib. 23a] ।

अथ स्यात् ' ज्ञानस्य करणत्वात्तस्य च स्वलक्षणान्तर्भावादयमदोष इति ॥ उच्यते । इह भावानामन्यासाधारणमात्मीयं यत्स्वरूपं तत्स्वलक्षणं[4] ' तद्यथा पृथिव्याः काठिन्यं वेदनाया विषयानुभवो विज्ञानस्य विषयप्रतिविज्ञप्तिः[5] ' तेन हि तल्लक्ष्यत[6] इति कृत्वा प्रसिद्धानुगतां च व्युत्पत्तिमवधूय कर्मसाधनमभ्युपगच्छति[7] । विज्ञानस्य च करणभावं प्रतिपद्यमानेनेत्युक्तं भवति ' स्वलक्षणस्यैव कर्मता स्वलक्षणान्तरस्य करणभा[17b]-

---

1) Pāṇ. III. 3. 118. — Tib. བྱེད་པ་དང་ལྱུ་ཊ་ནི་ཕྱལ་ཆེའོ.

2) Mss. *tena evam.* — *tena* manque dans Tib.

3) D'après Tib. *tenaiva.*

4) Définition classique: Nyāyabinduṭ. 15. 19.

5) Définitions classiques. — Pour le *kāṭhinya* de l'élément terre, voir notamment Sarvadarç. s. 21. 5, Bodhic. ṭ. 327. 12, Çikṣās. 245. 2 (nombreuses autorités), Majjh. N. I. 185. — Abhidh. k. v. (Soc. As.) 241b 7: *vedanānubhava iti*; Çikṣās. 233. 10. — Abhidh. k. v. (Ms. Burnouf) 28a: *vijñānaṃ prativijñaptir iti vijñānaskandhaḥ... pratir vīpsārthaḥ. viṣayaṃ viṣayaṃ pratīty arthaḥ*, et Soc. As. 239b 8 *vijñānaṃ prativijñaptir man[a]āyatanaṃ ca tat.*

6) Ex conj. — Mss. *tena hi tad vā na lakṣyate.* — Tib. བཤད་པར་བྱ་སྟེ། རེ་ཞིག་ འདིར་ ཇི་ལྟར་ དེས་ དེ་ མཚོན་པར་བྱེད་པའི་ [··· སའི་]སྲ་བ་ དང་། ཚོར་བའི་ མྱོང་བ་ དང་།··· ལྟར་ བདག་ཉིད་ཀྱི་ རང་གི་ ངོ་བོ··· གང་ ཡིན་པ་ དེ་ནི་ རང་གི་མཚན་ ཉིད་ ཡིན་ནོ། རབ་ཏུ་གྲགས་པ་ དང་ རྗེས་སུ་འབྲེལ་བའི་··· = *ucyate: tāvad iha yathā tena tal lakṣyate, [...pṛthivyāḥ] kāṭhinyam, vedanāyā anubhavo.....iva, ātmīyasvarūpam....yat tat svalakṣaṇaṃ, prasiddhām anugatāṃ ca..... — bhāvānām* n'est pas traduit dans le Tib., par contre *re-zhig* (*tāvat*) manque dans la version sanscrite que nous avons proposée.

7) = ལས་སུ་སྒྲུབ་པ་

वश्येति[1]। तत्र यदि विज्ञानस्वलक्षणं करणं तस्य व्यतिरिक्तेन कर्मणा भवितव्यमिति स एव दोषः।

अथ स्यात्' यत्पृथिव्यादिगतं काठिन्यादिकं विज्ञानगम्यं तत्तस्य कर्मास्त्येव तच्च स्वलक्षणाव्यतिरिक्तमिति ॥ एवं तर्हि विज्ञानस्वलक्षणस्य कर्मत्वाभावात्प्रमेयत्वं न स्यात्' कर्मरूपस्यैव स्वलक्षणस्य प्रमेयत्वात्। ततश्च द्विविधं प्रमेयं स्वलक्षणं सामान्यलक्षणं च[2]' इत्येतद्विशेष्य वक्तव्यं' किं चित्स्वलक्षणं प्रमेयं यल्लक्ष्यत इत्येवं व्यपदिश्यते' किं चिदप्रमेयं[3] यल्लक्ष्यतेऽनेनेति व्यपदिश्यत इति ॥ अथ तदपि कर्मसाधनं' तदा तस्यान्येन करणेन भवितव्यं' ज्ञानान्तरस्य [Tib. 23 b] करणभावपरिकल्पनायाम[4]नवस्थादोषश्चापद्यते।

अथ मन्यसे स्वसंवित्तिरस्ति' ततः[5] स्वसंवित्त्या ग्रहणात्कर्मतायां सत्यामस्त्येव प्रमेयान्तर्भाव इति ॥ उच्यते' विस्तरेण मध्यमकावतारे[6] स्वसंवित्तिनिषेधात्' स्वलक्षणं

---

1) Le Tib. ne marque pas le génitif (°*lakṣaṇasya*, °*antarasya*). Mss. °*sauva*, °*stha*, °*sya*: རང་གི་ མཚན་ཉིད་ ཁོ་ན་ ལས་ཉིད་ ཡིན་ཞིང་། རང་གི་ མཚན་ཉིད་ གཞན་ནི་ བྱེད་པའི་ ངོ་བོ་ ཡིན་ནོ = *svalakṣaṇam eva karmatā, anyat svalakṣaṇaṃ karaṇabhāvaḥ.* — *zhiṅ* = *ca.*

2) Ex conj. — Mss. *sāmānyalakṣaṇaṃ labhyetadviçeṣya*...... Tib. སྤྱིའི་ མཚན་ཉིད་དོ། ཞེས་བྱ་བར། རང་གི་ མཚན་ཉིད་ ཅུང་ཟད་ཅིག་ནི་ གཞལ་བྱ ···· ··· ཞེས་བརྗོད་པ་ གང་ཡིན་པའོ་ ཞེས་ ཁྱད་པར་ འདི་ ཙམ་ཞིག་ བརྗོད་པར་བྱ་ དགོས་སོ་ = *sāmānyalakṣaṇaṃ ca . iti svalakṣaṇaṃ kiṃ cit prameyam....iti vyapadiṣṭaṃ yad asti . iti viçeṣyaitanmātraṃ vaktavyam.*

3) Mss. *kiṃci(t)pra*°. Tib. གཞལ་བྱ་ མ་ ཡིན་ཏེ་

4) Mss. *tadānityādoṣa* ཐུག་པ་མེད་པ་

5) D'après Tib. *tatas tayā sva*°.

6) Voir *supra* p. 13, n. 3. Cp. fol. 232 b 2. = དེ་ཕྱིར་ རང་རིག་ ཡོད་པ་

स्वलक्षणान्तरेण लक्ष्यते तदपि स्वसंवित्त्या इति न युज्यते । अपि च ' तदपि नाम ज्ञानं स्वलक्षणव्यतिरेकेणासिद्धेरसंभवाल्लक्ष्याभावे निराश्रयलक्षणाप्रवृत्त्यसंभवात् सर्वथा नास्तीति कुतः[2] स्वसंवित्तिः ।

तथा चोक्तमार्यरत्नचूडपरिपृच्छायां[3] । स चित्तम[4]समनुपश्यन् [18a] चित्तधारां[5] पर्येषते कुतश्चित्तस्योत्पत्तिरिति । तस्यैवं भवति । आलम्बने सति चित्तमुत्पद्यते । तत्किमन्यदालम्बनमन्यच्चित्तं ' अथ यदेवालम्बनं तदेव चित्तं । यदि तावदन्यदालम्बनमन्यच्चित्तं तदा द्विचित्तता भविष्यति । अथ यदेवालम्बनं तदेव चित्तं ' तत्कथं चित्तेन[6] चित्तं समनुपश्यति । न च[7] चित्तं चित्तं सम[8]नुपश्यति । तद्यथापि नाम तयैवासिधारया सैवासिधारा न

མ་ཡིན་ན་ = *tasmād asatyāṃ svasaṃvittau.* — Sur la *svasaṃvitti* (= °*saṃvedana*), dogme essentiel des Yogācaras, voir sources citées p. 62, n. 3, et notre traduction du Sarvadarçana, (Muséon 1901—2), notes 70—72; Vedantakalpataru 293. 5.

1) Tib. = *tad api tayā svasaṃvittyā lakṣyata iti*...

2) Mss. *tataḥ*. — Tib. ག་ལ་

3) Quarante deuxième traité du དཀོན་བརྩེགས་ (Ratnakūṭa), quatrième division du Kandjour. A. M G. p. 218. — Cette citation a été traduite par Burnouf, Intr. 561. — Voir Bodhic p. ad IX. 18, Çikṣās. 235. 1, notes (La référence à l'Abhidh. k. v. que m'emprunte M. Bendall est le résultat d'une confusion). — M. Vyut. 65. 38, Nanjio 28. 47 (A. D. 265—316).

4) Mss. et Burnouf *cittaṃ sam*°. — Tib. ཡང་དག་པར་རྗེས་སུ་མ་མཐོང་བས་

5) *dhārā* = རྒྱུད་ et ci-dessous རྒྱུད་ — Comp. Laṅkāvat. 51. 10 *na çakyaṃ svacittavikalpadṛçyadhārā draṣṭum*; 59. 16 *svacittadṛçyadhārāviçuddhyartham*... — Burnouf: le tranchant de la pensée ou de l'esprit. — *cittadhārā* = °*latā* (= ci-dessous, 63. 4) — *dhārā* = *saṃtāna* = *pravāha*; voir J. As. 1902, II. 280, n. 1.

6) Sic Mss. — Çikṣas. (235. 6) et Bodhic. p. ...*cittaṃ cittam*...

7) Sic Mss. — Çikṣās. et Bodhic. p. *na hi cittam.*

8) D'après Tib. *paçyati.*

शक्यते छेत्तुं ' न तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं शक्यते स्प्रष्टुं[1] ' एवमेव न तेनैव चित्तेन तदेव चित्तं शक्यं द्रष्टुं । तस्यैवं योनिशः प्रयुक्तस्य या चित्तस्यानवस्था[2]नतानुच्छेदाशाश्वतता [Tib. 24 a] न कूटस्थता[3] नाहेतुकी न प्रत्ययविरुद्धा न ततो नान्यतो न[4] सैव नान्या तां चित्तधारां चित्तलतां[5] चित्तधर्मतां चित्तानवस्थिततां चित्ताप्रचारतां चित्तादृश्यतां चित्तस्वलक्षणतां तथा जानाति तथा पश्यति यथा तथतां न च निरोधयति[6] । तां च चित्तविवेकतां तथा प्रजानाति तथा पश्यति ' इयं कुलपुत्र [बोधिसत्त्वस्य] चित्ते चित्तानुपश्यना[7] स्मृत्युपस्थानमिति ॥

तदेवं नास्ति स्वसंवित्तिस्तदभावात् किं केन लक्ष्यते ॥

किं च ' भेदेन वा तल्लक्षणं लक्ष्यात्स्यादभेदेन वा । तत्र यदि तावद्भेदेन तदा लक्ष्याद्भिन्नत्वादलक्षणवल्लक्षणमपि न लक्षणं । लक्षणाच्च भिन्नत्वादलक्ष्यवल्लक्ष्यमपि न

---

1) Ces exemples sont indiqués par Vācaspati (Bhāmatī 379. 8, Nyāyav. tātp. 255. 23, 466. 19. — Çikṣ. s. 235, n. 5. — Sumaṅgalavilās. 235 fine. — Çlokavārt. 287.

2) Mss. °*sthānatāmocchedāç*°. — Je n'ose corriger . . .*cittasya anavasthā, anucchinnā, açāçvatā*, . .; la version tibétaine nous y invite peut-être.

3) Sāṃkhyas. VI. 13: il y a deux espèces de *nitya*: *kūṭasthanitya ātmā, pariṇāminityā prakṛtiḥ*. — Voir Dīgha, II 26, Sumaṅgalav. I. 105, Oldenberg, Bouddha² p. 379. note

4) Mss. ***nasyaiva*** = དེ་ཉིད་ ཀྱང་ མ་ཡིན.

5) Mss. °*latā*, °*laksyatā*, °*lakṣaṇatā*. — Tib. འཁྲི་ཤིང་.

6) དེ་བཞིན་ཉིད་ ཇི་ལྟ་བ་ དེ་བཞིན་དུ་ སེམས་དེ་དག་ དབེན་པ་ཉིད་དུ་ རབ་ཏུ་ཤེས་ དེ་བཞིན་དུ་ མཐོང་བ་ འདི་ནི་ = ***tathatā yathā tathā cittāni tāni vivekatayā prajānāti, tathā paçyati, iyam***. . .

7) Mss. °*paçyanā nāsmṛty*°, leçon qui a trompé Burnouf. — Tib.: རྗེས་སུ་ལྟ་བའི་ དྲན་པ་ཉེ་བར་གཞག་པའི་ སྤྱོད་པ་ ཡོངས་སུ་དག་པའོ་ = . . . °*smṛtyupasthānacaryā pariçuddhā*. — Cp. Dh. s. XLIV; Kern, Manual 248, 255; Çikṣās. Chap. XIII, p. 228. note 2; Jäschke 189b; Bodhic. IX. 103—6; Visuddhimagga (J. P. T. S. 1886, p. 102—4, 151. 158).

लक्ष्यं । तथा लक्ष्याद्भिन्नत्वाल्लक्षणस्य लक्षणनिरपेक्षं लक्ष्यं स्यात्ततश्च न तल्लक्ष्यं लक्षणनिरपेक्षत्वात् खपुष्पवत् [18b] ॥ अथाभिन्ने लक्ष्यलक्षणे ' तदा लक्षणादव्यतिरिक्तत्वाल्लक्षणस्वात्मवद्विहीयते लक्ष्यस्य लक्ष्यता । लक्ष्याच्चाव्यतिरिक्तत्वाल्लक्ष्यस्वात्मवल्लक्षणमपि [Tib. 24b] न लक्षणस्वभावं । यथा चोक्तं '

लक्ष्याल्लक्षणमन्यच्चेत् स्यात्तल्लक्ष्यमलक्षणं ।
तयोरभावोऽ[न]न्यत्वे विस्पष्टं कथितं त्वया ॥ इति[1] ।

न च विना तत्त्वान्यत्वेन लक्ष्यलक्षणसिद्धावन्या गतिरस्ति ' तथा च वक्ष्यति '

एकीभावेन वा सिद्धिर्नानाभावेन वा ययोः ।
न विद्यते ' तयोः सिद्धिः कथं [नु] खलु विद्यते ॥ इति[2] ॥

अथवोच्यते ' [अवाच्यत]या[3] सिद्धिर्भविष्यतीति चेन्नैतदेवं । अवाच्यता हि नाम परस्परविभागपरिज्ञानाभावे सति भवति । यत्र च विभागपरिज्ञानं नास्ति ' तत्रेदं लक्षणमिदं लक्ष्यमिति विशेषतः परिच्छेदासंभवे सति द्वयोरप्यभाव एवेति । तस्मादवाच्यतयापि नास्ति सिद्धिः ।

अपि च ' यदि ज्ञानं करणं विषयस्य परिच्छेदे कः कर्ता ' न च कर्तारमन्तरेणास्ति

---

1) Stance non identifiée. — Prajñāp. 10. 21 *lakṣaṇasvabhāvena lakṣaṇaṃ virahitaṃ, lakṣyasvabhāvena lakṣyaṃ virahitam.* — Sur les rapports du *lakṣaṇa* et du *lakṣya*, voir Nyāyakandalī (Praçastapādabhāṣya) p. 28. Le sophisme bouddhique est défini: *prasiddhāç cet padārthā na lakṣaṇīyāḥ; aprasiddhā natarām açakyatvāt.*

2) = II. 21.

3) ཅི་སྟེ་ བརྗོད་དུ་མེད་པ་ཉིད་དུ་ འགྲུབ་པར་ འགྱུར་རོ་ ཞེ་ན. — Comp. Bodhic. ṭ. 297. 9 ...*skandhebhyas tattvānyatvābhyām avācyaṃ pudgalanāmānam ātmānam icchanti.* — Dhvanyāloka (Kāvyamāla) p. 233. *anirdeçyatvaṃ sarvalakṣaṇaviṣaye bauddhānāṃ prasiddham.* — Vedāntakalpataru 284. 5. *bhedābhedābhyām anirvācyenopakārenopakṛtaṃ kāraṇaṃ kāryam anirvācyaṃ karotīty uktam. tad ayuktam, bhedaniṣedhe 'bhedāpatter abhedaniṣedhe ca bhedaprasaṅgād ity āçaṅkya bauddhaṃ prati pratibandham āha.*

कारणादीनां संभवः[1] छिदिक्रियायामिव ॥ अथ चित्तस्य तत्र कर्तृत्वं परिकल्प्यते । तदपि न युक्तं । यस्मादर्थमात्रदर्शनं चित्तस्य व्यापारोऽर्थविशेष[2][दर्शनं] चैतसानां ।

तत्रार्थदृष्टिर्विज्ञानं तद्विशेषे[3] तु चैतसाः ।

इत्यभ्युपगमात् । एकस्यां हि प्रधानक्रियायां साध्यायां यथास्वं गुणक्रियानिर्वृत्तिद्वारेणाङ्गीभावोपगमात् करणादीनां करणादित्वं[4] । [Tib. 25a] न चेह ज्ञानविज्ञानयोरेका प्रधानक्रिया । किं तर्ह्यर्थमात्रपरिच्छित्तिर्विज्ञानस्य प्रधानक्रिया । ज्ञानस्य त्वर्थविशेषपरिच्छेद इति नास्ति ज्ञानस्य करण[19a]त्वं नापि चित्तस्य कर्तृत्वं । ततश्च स एव दोषः ॥

अथ स्यात् । अनात्मानः सर्वधर्मा इत्यागमात् कर्तुः सर्वथाभावात् । कर्तारमन्तरेणापि विद्यत एव क्रियादिव्यवहार इति ॥ एतदपि नास्ति । आगमस्य सम्यगर्थानवधारणात् । एतदेवोक्तं मध्यमकावतारे ॥

---

1) Mss. *sambhedaḥ*. — Tib. བྱེད་པ་ལ་སོགས་པ་རྣམས་ ཡོད་པ་ ཡང་ མ་ཡིན་ཏེ་

2) དོན་གྱི་ ཁྱད་པར་ ལྟ་བ་ནི་

3) Sic Mss. — Tib. དེ་ལ་ དོན་མཐོང་ རྣམ་པར་ཤེས། དེ་ཡི་ ཁྱད་པས་ སེམས་ལས་བྱུང་ | = ...*tadviçeṣāt tu*.... — Voir ci-dessus 11, note 4.

Nyayabinduṭ. 14. 4: *svasaṃvedanam akhyātum aha: cittam arthamātragrahi, caittā viçeṣāvasthāgrahiṇaḥ sukhādayaḥ*. — Vedāntakalpataru 278. 26. — Kathāvatthu VII. 3. — Abhidh. k. v. (Ms. Burnouf) fol. 28a *vijñānam upalabdhir vastumātragrahaṇam; vedanādayas tu caitasā viçeṣagrahaṇarūpāḥ* — Voir Yogasūtra I. 43–44 *arthamātranirbhāsā (nirvitarkā) samāpattiḥ: deçakāladharmādirahito dharmimātratayā....arthaḥ pratibhāti yasyām* (Bhojaraja).

Comp. Abhidh. k. v. cité Dh.-s. XXVIII (p. 41) *nimittodgrahaṇātmiketi [saṃjñā].nimittam vastuno 'vasthāviçeṣo nīlatvādi tasyodgrahaṇaṃ paricchedaḥ*. — Voir Atthasālinī 291, 308 et les notes de Mrs Rhys Davids ad Dh. Saṅgani 4, 5. — Le *vijñāna* est distingué du *jñāna*, ci-dessous ad XXV. 16 *nimittālambanaṃ vijñānam*.

Soient les équivalences: *cittam = vijñānam = nirvikalpakajñānam = arthamātragrāhi; caitasāḥ = jñānam = savikalpakajñānam = arthaviçeṣagrāhi.*

Voir ci-dessous p. 74, n. 6.

4) D'après le Tib. = *karaṇādīnāṃ yathāsvam guṇa....drāreṇa ekasyā.. sādhyāyā aṅgībhāvopagamāt karaṇāditvam.*

अथापि स्यात् । यथा शिलापुत्रकस्य(1) शरीरं राहोः शिर इति शरीरशिरोव्यतिरिक्तविशेषणासंभवेऽपि विशेषणविशेष्यभावोऽस्ति । एवं पृथिव्याः स्वलक्षणमिति स्वलक्षणव्यतिरिक्तपृथिव्यसंभवेऽपि भविष्यतीति ॥ नैतदेवमतुल्यत्वात् । शरीरशिरःशब्दयोर्हि बुद्ध्यादिपाण्यादिवत्(2)सहभाविपदार्थान्तरसापेक्षतया प्रवृत्तौ शरीरशिरःशब्दमात्रालम्बनो बुद्ध्युपजननः(3) सहचारिपदार्थान्तरसाकाङ्क्ष एव वर्तते । कस्य शरीरं कस्य शिर इति । इतरोऽपि विशेषणान्तर(4)संबन्धनिराचिकीर्षया शिलापुत्रकराहुविशेषणध्वनिना लौकिकसंकेतानुविधायिना प्रतिकर्तुः काङ्क्षामपहरतीति युक्तं । इह तु काठिन्यादिव्यतिरिक्तपृथिव्याद्यसंभवे [Tib. 25b] सति न युक्तो विशेषणविशेष्यभावः ।

तीर्थिकैर्व्यतिरिक्त(5)लक्षणाभ्युपगमात्तदनुरोधेन विशेषणाभिधानमदुष्टमिति चेत् ।

---

1) M. Vyut. 245. 1109. — Rājamārtaṇḍa, I. 9. — Sāṃkhyaprav. bh. 84 27, 148. 1: *rāhoḥ çiraḥ, çilāputrasya çarīram, puruṣasya caitanyam*; expressions métaphoriques [vikalpa]: Im Falle der Statue oder ähnlicher Dinge wird [das possessive Verhaltniss] durch das Mittel [der Sinneswahrnehmung] widerlegt, welches den Gegenstand in seiner Eigenschaft [d. h. die Thatsache, dass der Körper die Statue ist,] erkennen lehrt, und deshalb liegt [in solchen Fällen] nur eine Ausdrucksweise vor, bei welcher die thatsächliche Identitat in das Gewand des possessiven Verhaltnisses gekleidet wird. Wenn man aber sagt: mein Körper. ...

2) Mss. °*pāṇyādimat*°. — Tib. ···སོགས་པ་ལྟར་ ལྷན་ཅིག···

3) Mss. *buddhyapajananaḥ*, *buddhyupa*°. — སྒྲ་ཙམ་ལ་ དམིགས་པའི་ བློ་སྐྱེས་པ་ ལྟ་ཞིག། གང་གི་ ལུས་······། ཅིག་ཤོས་ ཀྱང་······ Si *lta-zhig* peut remplacer *hga-zhig*, *la-la-zhig*, il s'oppose à [*g*]*cig-ços* (itara = eka-tara), et nous avons: «Un homme intelligent (*blo-skyes-pa? buddhimān janaḥ*) entend prononcer le mot tête et se demande: la tête de qui?. .»

4) ཉེ་བར་ གཞག་ དང་ འབྲེལ་བ··· gzhag-pa (hjog-pa) précédé de ñe-bar = *upasthita* — «Dans le désir d'écarter la pensée que [le mot tête] est immédiatement en rapport avec un déterminatif».

5) Mss. °*vyatiriktalakṣya*°. Tib. མཚན་གཞི་ ཐ་དད་པར་ ཁས་བླངས་པའི་ཕྱིར

नैतदेवं । न हि तीर्थिकपरिकल्पिता युक्तिविधुराः पदार्थाः स्वसमयेऽभ्युपगन्तुं न्याय्याः । प्रमाणान्तरादेरप्यभ्युपगमप्रसङ्गात्[1] ।

अपि च पुद्गलादिप्रज्ञप्तिवत्[2] सशरीरोपादानस्य[3] शिलापुत्रकस्य[ो]पादातुर्लौकिकव्यवहाराङ्गभूतस्य विशेषणस्याविचारप्रसिद्धस्य सद्भावात्[4] । शिरउपादानस्य च राहोरुपादातुः [19b] सद्भावादयुक्तमेतन्निदर्शनं ॥

शरीरशिरोव्यतिरिक्तस्यार्थान्तरस्यासिद्धेस्तन्मात्रस्योपलम्भात् सिद्धमेव निदर्शनमिति चेत् । नैतदेवं । लौकिके व्यवहार इत्थंविचाराप्रवृत्तेरविचारतश्च[5] लौकिकपदार्थानामस्तित्वात् । यथैव हि रूपादिव्यतिरेकेण विचार्यमाण आत्मा न संभवति[6] । अपि च लोकसंवृत्या स्कन्धानुपादायास्यास्तित्वं । एवं राहुशिलापुत्रकयोरपीति नास्ति निदर्शनासिद्धिः ॥ एवं पृथिव्यादीनां यद्यपि काठिन्यादिव्यतिरिक्तं विचार्यमाणं लक्ष्यं नास्ति लक्ष्यव्यतिरेकेण च लक्षणं निराश्रयं तथापि संवृतिरेवेति । परस्परापेक्षया[7] तयोः सिद्ध्या सिद्धिं व्यवस्थापयांबभूवुराचार्याः । अवश्यं चैतदेवमभ्युपेयं । अन्यथा हि संवृतिरुप-

---

1) Nous aurions à admettre d'autres pramāṇas que le *pratyakṣa* et l'*anumana*, à savoir le *çabda* (?). — Voir ci-dessous 69. 1.

2) གང་ཟག་ལ་ སོགས་པར་ བཏགས་པ་ལྟར

3) Mss. *sa*, *sva*, n'est pas traduit dans la version tibétaine et peut être écarté (cp. çira-up°). — Tib. = *api ca çarīra-upādāna-viçeṣaṇa[sya] laukikavyavahārangıbhūta-avicāra-prasiddha[sya] upādātṛ-çilāputraka[sya], çira-upādāna-[sya] upādātṛ-rāhoç ca pudgala-ādi-prajñapti-vat sadbhāvān nidarçanam etad ayuktam.*

4) Mss. *avicāraprasiddhasyāsad°*. — Tib. མ་བརྟགས་ན་ གྲགས་པ་ ····· ཡོད་པའི་ཕྱིར

5) *vicāra* = རྣམ་པར་དཔྱོད་པ་

6) Voir Chapitre XVIII.

7) བལྟོས་པ་ཙམ་གྱིས་ = *apekṣāmātreṇa*.

पत्त्या[1] न विरुध्येत । [Tib. 26a] तदेव तत्त्वमेव स्यान्न संवृतिः[2] ॥ न चोपपत्त्या विचार्यमाणानां शिलापुत्रकादीनामेवासंभवः । किं तर्हि वक्ष्यमाणया युक्त्या रूपवेदनादीनामपि नास्ति संभव इति तेषामपि संवृत्या शिलापुत्रक[ादिवन्न][3]ास्तित्वमास्थेयं स्यात् । न चैतदेवमित्यसदेतत्[4] ॥

अथ स्यात् । किमनया सूक्ष्मेक्षिकया[5] । नैव हि वयं सर्वप्रमाणप्रमेयव्यवहारं[6] सत्यमित्याचक्ष्महे । किं तु लोकप्रसिद्धिरेषा[7]मुना न्यायेन व्यवस्थाप्यत इति ।

उच्यते । वयमप्येवं ब्रूमः । किमनया सूक्ष्मेक्षिकया लौकिकव्यवहारेऽवतारिकया[8] । तिष्ठतु तावदेषा विपर्यासमात्रासादितात्मभावसत्ताका संवृतिर्मुमुक्षूणां मोक्षावाहक[9]कुशल-

---

1) *upapatti* = འཐད་པ་ = *yukti.*

2) འདི་ན་ ཁོ་ན་ཉིད་དུ་ འགྱུར་གྱི་ ཀུན་རྫོབ་ཏུ་ མི་འགྱུར་རོ་

3) Mss. °*putraka ivastitvam āstheyam* — Tib. དེ་དག་ཀྱང་ མཆེ་གུ་ལ་ སོགས་པ་བཞིན་དུ་ ཀུན་རྫོབ་ཏུ་ ཡོད་པ་མ་ཡིན་པ་ཉིད་དུ་ ཁས་བླངས་པར་འགྱུར་ད།

4) La version tibétaine ajoute: བརྟེན་ནས་ བཏགས་པར་ རྣམ་པར་བཞག་པ་ འདི་ཡང་ དབུ་མ་ལ་འཇུག་པ་ལས་ རྒྱས་པར་ བསྟན་པས་ དེ་ཉིད་ལས་ ཡོངས་སུ་བཙལ་བར་བྱའོ། = *etad apy upādayaprajñaptivyavasthānaṃ vistareṇa Madhyamakāvatāre nirdiṣṭam* (བསྟན་པ་?) *iti tata eva paryavaseyam.*

5) = ཞིབ་མོར་དཔྱད་པ་. Sur les formations en *-ikā* (*varākikā*, *jāgarikā*, °*ghātika*, °*mukhika*), voir Bodhic. ṭ. 373. 22 et ad VII. 54; Çikṣās. 52. 18, 191. 6, 267. 15, 269. 2; Div. 330. 2. Cp. Mhv. I. 522, II. 498

6) Mss. *sarvata apramāṇa*°. — Tib. ཚད་མ་ དང་ གཞལ་བྱའི་ ཐ་སྙད་ ཐམས་ཅད་ བདེན་པ་ ཡིན་ནོ་…

7) Mss. *prasiddhir eṣā*, *eva*. Tib. རབ་ཏུ་གྲགས་པ་ འདི་

8) N'est signalé (P. W.) que dans le composé *raṅga*°.

9) Mss. *mokṣogahaka*, °*vāhaka* (འདྲེན་པར་བྱེད་པ).

मूलोपचयहेतुर्यावन्न तत्त्वाधिगम इति। भवांस्त्वेतां संवृति[20a]परमार्थसत्यविभागदुर्विदग्धबुद्धितया क्व चिदुपपत्तिमवतार्यान्यायतो नाशयति। सोऽहं संवृतिसत्यव्यवस्थावैचक्षण्याल्लौकिक एव पक्षे स्थित्वा संवृत्येकदेशनिराकरणोपक्षिप्तोपपत्त्यन्तरा[1]न्तरमुपपत्त्यन्तरेण विनिवर्तयन् लोकं वृद्ध इव लोकाचारात्परिभ्रश्यमानं भवन्तमेव निवर्तयामि न तु संवृतिं॥ तस्माद्यदि लौकिको व्यवहारस्तदावश्यं [Tib. 26b] लक्षणवल्लक्ष्येणापि भवितव्यं। ततश्च स एव दोषः। अथ परमार्थस्तदा लक्ष्याभावाल्लक्षणद्वयमपि नास्तीति कुतः प्रमाणद्वयं॥

अथ शब्दानामेवं क्रियाकारकसंबन्धपूर्विका व्युत्पत्तिर्नाङ्गीक्रियते। तदिदमतिकष्टं। तैरेव क्रियाकारकसंबन्धप्रवृत्तैः शब्दैर्भवान् व्यवहरति शब्दार्थं क्रियाकरणादिकं[2] च नेच्छतीति। अहो बतेच्छामात्रप्रतिबद्धप्रवृत्तिता भवतः॥

यदा चैवं प्रमेयद्वयमव्यवस्थितं[3] तदा [स्व]सामान्यलक्षण[।]विषयत्वेनागमादीनां प्रमाणान्तरत्वं[3)]॥

किं च घटः प्रत्यक्ष इत्येवमादिकस्य लौकिकव्यवहारस्यासंग्रहाद्[4][ना]र्यव्यवहाराभ्युपगमाच्चाव्यापिता[5] लक्षणस्येति न युक्तमेतत्।

---

1) Tib. = *upapattyantaram upa°*

2) Tib. = *kriyakarakadiçabdartham* — *karaka* = བྱེད་པ་པོ

3—3) དེའི་ཚེ་ ལུང་ལ་སོགས་པ་ རང་ དང་ སྤྱིའི་ མཚན་ཉིད་ཀྱི་ ཡུལ་ཅན་ མ་ ཡིན་པ་ཉིད་ཀྱི་ སྒོ་ནས་ ཚད་མ་ གཞན་ཉིད་ མ་ཡིན་པ་ མ་ཡིན་ནོ། = ... *na pramanantaratvabhāvaḥ.*

4) ...*asaṁgrahād*, voir ci-dessous 71. 3. — *anārya* = འཕགས་པ་ མ་ ཡིན་ པའི་

5) མ་ཁྱབ་པ་ཉིད་དུ་ འགྱུར་ཏེ། དེས་ན་ འདི་ནི་ མི་རིགས་སོ — *iti* = *tataḥ* = *des-na.*

अथ स्यात् ' घटोपादाननीलादयः प्रत्यक्षाः प्रत्यक्षप्रमाणपरिच्छेद्यत्वात् । ततश्च यथैव कारणे कार्योपचारं[1] कृत्वा बुद्धानां सुख उत्पाद[2] इति व्यपदिश्यते ' एवं प्रत्यक्षनीलादिनिमित्तकोऽपि घटः कार्ये कारणोपचारं कृत्वा प्रत्यक्ष इति व्यपदिश्यते ॥ नैवंविधे विषय उपचारो युक्तः । उत्पादो हि लोके सुखव्यतिरेकेणोपलब्धः ' स च संस्कृतलक्षणा[3]स्व[20b]भावत्वादनेकदुष्करशतहेतुत्वादसुख एव ' स सुख[4] [Tib. 27a] इति व्यपदिश्यमानोऽसंबद्ध एवेत्येवंविषये युक्त उपचारः । घटः प्रत्यक्ष इत्यत्र तु न हि घटो नाम कश्चिद्योऽप्रत्यक्षः पृथगुपलब्धो यस्योपचारात्प्रत्यक्षत्वं स्यात् ॥

नीलादिव्यतिरिक्तस्य घटस्याभावादौपचारिकं[5] प्रत्यक्षत्वमिति चेत् ' एवमपि सुतरामुपचारो न युक्त उपचर्यमाणस्याश्रयस्याभावात् । न हि खरविषाणात्तैक्ष्ण्य[6]मुपचर्यते ।

अपि च ' लोकव्यवहाराङ्गभूतो घटो यदि नीलादिव्यतिरिक्तो नास्तीति कृत्वा तस्यौपचारिकं प्रत्यक्षत्वं परिकल्प्यते ' नन्वेवं सति पृथिव्यादिव्यतिरेकेण नीलादिकमपि नास्तीति नीलादेरस्यौपचारिकं प्रत्यक्षत्वं कल्प्यतां । यथोक्तं[7] ।

---

1) M. Vyut. 245. 571–572.

2) Mss. *utpadaya.* — Tib. སངས་རྒྱས་རྣམས་ དེ་ འབྱུང་བ་ བདེ་ ཞེས་ — Exemple classique. Visuddhim. XVII (Warren, Buddhism, 194): Karma is called existence because it causes existence, just as the birth of a Buddha is called happy because it results in happiness. — Abhidh. k. v. (Soc. As.) 211a 2, *saṃgatau saṃnipate samavaye kāraṇe kāryopacāraḥ, sparça iti; yatha sukho buddhānām utpada iti.* — L'absence de *buddhotpāda* est un *akṣaṇa* (Dh.-s. LXXXIV) par excellence. *buddhotpādo 'tidurlabhaḥ* (Bodhic. p. 10. 8). — Les applications du mot *sukha*, Atthasal. § 99 et 301.

3) Voir Chapitre VII.

4) དེ་ལ་ བདེ་བ་ ཞེས་ = *tasmin sukham iti* = *sa sukha iti.*

5) M. Vyut. 245. 683. — Abhidh. k. v. (Soc. As.) 339a 7: *upacāre bhava aupacārikaḥ.*

6) Mss. *taicakṣu, taicatvam* — Tib. རྭ་ལ་རྫོན་པོ་

7) = Catuḥçataka, d'Áryadeva, XIV. 14 (Muséon, 1900, p. 240); cité dans le comm. du Madhyamakāvat. 344b 5.

रूपादिव्यतिरेकेण यथा कुम्भो न विद्यते ।

वाय्वादिव्यतिरेकेण तथा रूपं न विद्यते ॥ इति ।

तस्मादेवमादिकस्य लोकव्यवहारस्य लक्षणेनासंग्रहादव्याप्तिरेव लक्षणस्येति । तत्त्वविदपेक्षया हि (1 प्रत्यक्षत्वं घटादीनां नीलादीनां च नेष्यते 1)। लोकसंवृत्या त्वभ्युपगन्तव्यमेव प्रत्यक्षत्वं घटादीनां ॥ यथोक्तं शतके[(2)]।

सर्व एव घटोऽदृष्टो रूपे दृष्टे हि जायते ।

ब्रूयात् कस्तत्त्वविन्नाम घटः प्रत्यक्ष इत्यपि[(3)] ॥

एतेनैव विचारेण सुगन्धि मधुरं मृदु ।

प्रतिषेधयितव्यानि सर्वाण्युत्तमबुद्धिना [Tib. 27b] ॥ इति ॥

अपि चापरोक्षार्थवाचित्वात्प्रत्यक्षशब्दस्य साक्षादभिमुखोऽर्थः प्रत्यक्षः । प्रतिगतमक्षमस्मिन्निति कृत्वा घटनीलादीनामपरोक्षाणां प्रत्यक्षत्वं सिद्धं भवति[(4)]। तत्परिच्छेद-

---

1) Ce demi-çloka (?) est traduit en prose dans le Tib. — Voir Nyāyavārt. 42. 15 sqq la discussion de la définition du *pratyakṣa* donnée par Vasubandhu, *Vasubandhava pratyakṣalakṣaṇa* (a). Nyāyav. tātp. 151. 21, 352 13, 100. 13 *yadi yasya vyapadiçyate jñānaṃ tat pratyakṣam, tato ghaṭa ity api jñānaṃ pratyakṣam prasajyeta. tad api ghaṭasya vyapadiçyate, na tu tato ghaṭād bhavati: tasya vicārāsahatayā paramarthasattvābhāvena, saṃpratisato vijñanaṃ prati karaṇatvābhāvat.* (b) — Voir infra, p. 74, n. 6. — Le seul *kalpanāpoḍha* (*nirvikalpaka*), essentiellement innommable (*abhilāpasaṃsargāyogya*), est *pratyakṣa*.

(a) = *tato 'rthād vijñānaṃ pratyakṣam.* (b) Le *ghaṭa* ne supporte pas l'examen (vicāra-asaha, voir p. 67 l 7); il n'existe que dans la *lokaprasiddhi* (voir p 74 n. 1), c'est à dire *avicārataḥ*. — Le *saṃpratisat*, le simultané, ne peut être *viṣaya* de la connaissance, car le simultané n'est pas *karaṇa*; et en vertu du principe *nākāraṇaṃ viṣayaḥ* (Bodhic. p. IX. 22).

2) Chapitre XIII. 1. 2. — Voir Wassilieff, 332 (364) sous § 8.

3) Mss. *ghaṭo dṛṣṭo . . . brūyāt ka ta sya cin nāma* (*tat kasya cin*) .... *ghaṭo 'pratyakṣa ity api.* — གཟུགས་མཐོང་ཚེ་ན་ བུམ་པ་ ནི། ཐམས་ཅད་ ཁོ་ན་ མཐོང་མི་འགྱུར། བུམ་པ་ མངོན་སུམ་ ཞེས་བྱ་འདང་། དེ་ཉིད་རིགས་པ་ སུ་ཞིག་ སྨྲ།།

4) Voir diverses explications étymologiques dans Nyāyakoça, notamment Praçastapādabh. 186. 12 (*akṣam akṣaṃ pratītyotpadyate*); Nyāyavārt. 30. 4

क[21a]स्य ज्ञानस्य तृणतुषाग्निवत्[1]प्रत्यक्षकारणत्वात् प्रत्यक्षत्वं व्यपदिश्यते ॥ यस्त्वक्षमक्षं प्रति वर्तत इति प्रत्यक्षशब्दं व्युत्पादयति तस्य ज्ञानस्येन्द्रियाविषयत्वा[द्] विषयविषय[2]त्वा]च्च न युक्ता व्युत्पत्तिः ' प्रतिविषयं तु स्यात् प्रत्यर्थमिति वा[3] ॥

अथ स्यात् ' यथोभयाधीनायामपि विज्ञानप्रवृत्तावाश्रयस्य पटु[4]मन्दतानुविधानाद्विज्ञानानां तद्विकारविकारित्वादाश्रयेणैव व्यपदेशो भवति ' चक्षुर्विज्ञानमिति[5] । एवं यद्यप्यर्थमर्थं प्रति वर्तते ' तथाप्यक्षमक्षमाश्रित्य वर्तमानं विज्ञानमाश्रयेण[6] व्यपदेशात् प्रत्यक्षमिति भविष्यति । दृष्टो ह्यसाधारणेन व्यपदेशो भेरीशब्दो यवाङ्कुर[7] इति ॥

नैतत्पूर्वेण तुल्यं । तत्र हि विषयेण विज्ञाने व्यपदिश्यमाने रूपविज्ञानमित्येवमादिना विज्ञानषट्कस्य[8] भेदो नोपदर्शितः स्यात् ' मनोविज्ञानस्य चक्षुरादिविज्ञानैः सहैक-

---

(*akṣasyākṣasya prati viṣayaṃ vṛttiḥ pratyakṣam* ..; *pratigatam akṣaṃ pratyakṣam*); Nyāyav. tātp. 64. 26; 65. 6. 12. Comp. Nyāyabinduṭ. 7. 15 *pratigatam āçritam akṣam...; akṣāçritatvaṃ ca vyutpattinimittam çabdasya, na tu pravṛttinimittam: anena tv...arthasākṣātkāritvaṃ lakṣyate.* — *akṣa* = organe des sens, voir Index du Harṣacarita (dans J. R. A. S. 1899 p. 507).

1) Cp. *tiṇaggi*, *thusaggi*, Majjh. N. I. 259. 28. 30.

2) ཤེས་པ་ ནི་ དབང་པོའི་ ཡུལ་ཅན་ མ་ཡིན་པའི་ཕྱིར་ དང་། ཡུལ་གྱི་ ཡུལ་ཅན་ ཡིན་པའི་ཕྱིར་ = Le jñāna n'a pas pour viṣaya les sens, mais bien les viṣayas.

3) ཡུལ་སོ་སོ་བ་འམ་ དོན་སོ་སོ་བ་ཉིད་ ཅེས་བྱ་བར་ ནི་ མི་ འགྱུར་རོ་ . . . . *na syāt* ... La négation est difficile à expliquer.

4) *paṭu* = གསལ་བ. — *manda* = ཞན་པ་.

5) Comp. Nyāyavārt. tatp 74. 16: *yathā cakṣuṣā indriyatvena jñānaṃ vyapadiçyate cākṣuṣam iti. ..; evaṃ yathā rupeṇārthena vyapadiçyate jñānam rūpajñānam iti...*

6) Mss. *āçrayasya.* — Tib. བརྟེན་གྱིས་.

7) Nyāyavārt. 34. 16 *ṛtvādikāraṇasaṃnidhānāt prādurbhavann aṅkuro na ṛtvādibhir vyapadiçyate, 'pi tv asādhāraṇena bījena vyapadiçyate yavāṅkura iti.....*

8) Mss. *ṣaṭkāsya.*

विषयप्रवृत्तत्वात्। तथा[1] हि नीलादिविज्ञान[Tib. 28a]षट्के विज्ञानमित्युक्ते साकाङ्क्ष एव[2] प्रत्ययाज्जायते किमेतद्रूपीन्द्रियजं[3] विज्ञानमाहोस्विन्मानसमिति। आश्रयेण तु व्यपदेशे मनोविज्ञानचक्षुरादि[4]विज्ञानविषयप्रवृत्तिसंभवेऽपि परस्परभेदः सिद्धो भवति।

इह तु प्रमाणलक्षणविवक्षया कल्पनापोढमात्रस्य[5] प्रत्यक्षत्वाभ्युपगमे सति विकल्पकादेव[6] तद्विशेषत्वाभिमतत्वा[7]दसाधारणकारणेन व्यपदेशे सति[8] न किं चित्प्रयोजनमुपलक्ष्यते। प्रमेयपरतन्त्रायां च प्रमाणसंख्याप्रवृत्तौ प्रमेयाकारानुकारितामा[21b]त्रतया च समासादितात्मभावसत्ताकयोः[9] प्रमाणयोः स्वरूपस्य व्यवस्थापनान्नेन्द्रियेण व्यपदेशः किं चिदुपकरोतीति सर्वथा विषयेणैव व्यपदेशो न्याय्यः॥

[10]लोके प्रत्यक्षशब्दस्य प्रसिद्धत्वाद्विवक्षितेऽर्थे प्रत्यर्थशब्दस्य[1]प्रसिद्धत्वादाश्रयेणैव

---

1) Mss. *tadā hi nīlādiviṣayaṣaṭkā vi°*. — འདི་ལྟར་ སྔོན་པོ་ལ་སོགས་པའི་ རྣམ་པར་ཤེས་ལ་ དྲུག་ལ་ རྣམ་པར་ཤེས་པ་ ཞེས་བརྗོད་ན་ནི།

2) ཤེས་པ་ རེ་བ་ དང་ བཅས་པ་ ཡིད་དུ་ འགྱུར་ལ་

3) Mss. *rūpendriya, rupīndriya* = གཟུགས་ཅན་

4) Le sens est certain *manovijñānasya.....°viṣaye....*

5) Définition de Dharmakīrti: *pratyakṣam kalpanāpoḍham abhrāntam*. Voir Nyāyabindu 103. 3, 8. 20; Pathak, On the authorship of the Nyāyabindu, J. A. S. Bombay, LI. 56; et pour les autres sources Sarvadarçana, traduction, note 152. — M. Vyut. 199. 62—63.

6) རྣམ་པར་རྟོག་པ་ལས་ = *vikalpād*.

7) Camb. *tadviçeṣasya*. — Tib. འདི་ཁྱད་པར་དུ་

8) Donné par nos trois copies; manque dans Tib.

9) Mss. *samāhādita°, samādita°*. — རྙེད་པ་ = *labh*. — Voir 68. 8.

10) Mss. *āloke.....vivakṣite 'rthapratyakṣaçabdasya prasiddhatvād āçrayeṇaiva...* — Tib. འཇིག་རྟེན་ན་ བརྗོད་པར་འདོད་པའི་ དོན་ལ་ མངོན་སུམ་གྱི་ སྒྲ་ རབ་ཏུ་གྲགས་པའི་ཕྱིར་ དང་། དོན་སོ་སོ་ ཞེས་བྱ་བའི་ སྒྲ་ མ་ གྲགས་པའི་ཕྱིར་···· རྟེན་ཁོ་ ན་····

व्युत्पत्तिराश्रीयत इति चेत् ' उच्यते ' अस्त्ययं प्रत्यक्षशब्दो लोके प्रसिद्धः । स तु यथा लोके तथास्माभिरुच्यत एव । यथास्थितलौकिकपदार्थतिरस्कारेण तु तद्व्युत्पादे क्रियमाणे प्रसिद्धशब्दतिरस्कारः प्रसिद्धः[1] स्यात् ' ततश्च प्रत्यक्षमित्येवं[2] [न] स्यात् । एकस्य च चक्षुर्विज्ञानस्यैकेन्द्रियक्षणाश्रयस्य[3] प्रत्यक्षत्वं न स्याद्वीप्सार्थाभावात् ' एकैकस्य च प्रत्यक्षत्वाभावे बहूनामपि न स्यात् ॥

कल्पनापोढस्यैव च ज्ञानस्य प्रत्यक्षत्वाभ्युपगमात् ' तेन च [Tib. 28b] लोकस्य संव्यवहाराभावात्[4] ' लौकिकस्य च प्रमाणप्रमेय[व्यवहार][5]स्य व्याख्यातुमिष्टत्वात् ' व्यर्थैव प्रत्यक्षप्रमाणकल्पना संजायते ॥ चक्षुर्विज्ञानस[म]ङ्गी नीलं जानाति नो तु नीलमिति[6] चागमस्य प्रत्यक्षलक्षणाभिधानार्थस्याप्रस्तुतत्वात्[7] ' पश्चा-

---

1) *prasiddha* omis dans le Tib. — *lokaprasiddhi* = weltliche Annahme, welche als Ausdruck zugelassen wird, obgleich sie keine Genauigkeit in sich enthalt (Wass. 332 = 364. 1).

2) Mss. *pratyartham ity evaṃ syat.* — Tib དེའི་ཕྱིར་ མངོན་སུམ་ ཞེས་བྱ་བ་ དེ་ལྟར་ མི་ འགྱུར་རོ །

3) Voir Nyāyabinduṭ. 12. 21 sqq.

4) འཇིག་རྟེན་པའི་ ཐ་སྙད་བྱེད་པ་ མེད་པའི་ཕྱིར. — *lokavyavahara* = weltliche Bedingung (Wass. 332 = 364. 3).

5) ཐ་སྙད.

6) Mss. *iti cāgamasya.* — La lecture peut à peine être correcte, car *iti* fait partie de l'*agama.* — Tib. མིག་གི་ རྣམ་པར་ཤེས་པ་ དང་ ལྡན་པས་ སྔོན་པོ་ ཤེས་ཀྱི་ སྔོན་པོ་ སྙམ་དུ་ ནི་ མ་ ཡིན་ནོ་ ཞེས་བྱ་བའི་ ལུང་ཡང་ '' = . . . ***nīlam iti*** (sñam-du) ***ity āgamasyapi.***

Cet āgama est cité d'après l'Abhidharma dans Nyāyabindupūrvapakṣasaṃkṣepa (Tand. Mdo CXI, fol. 108b) avec la variante སྔོན་པོའོ་ སྙམ་དུ་ Suit un autre fragment དོན་ལ་ དོན་དུ་ ཤེས་ཀྱི་ དོན་ལ་ ཆོས་སུ་ འདུ་ཤེས་པ་ མ་ ཡིན་ནོ་ -- ***arthe 'rthaṃ jānāti na tv arthe dharmaṃ saṃjānāti***, et un commentaire: ***nīlaṃ***

नामिन्द्रियविज्ञानानां जडत्वप्रतिपादकत्वाच्च । नागमादपि कल्पनापोढस्यैव विज्ञानस्य प्रत्यक्षत्वमिति न युक्तमेतत् । तस्माल्लोके यदि लक्ष्यं यदि वा स्वलक्षणं[1] सामान्यलक्षणं वा सर्वमेव साक्षादुपलभ्यमानत्वादपरोक्षं । अतः प्रत्यक्षं व्यवस्थाप्यते तद्विषयेण[2] ज्ञानेन सह । द्विचन्द्रादीनां त्वतैमिरिकज्ञानापेक्षयाऽप्रत्यक्षत्वं[3] । तैमिरिकाद्यपेक्षया तु प्रत्यक्षत्वमेव ॥

परोक्षविषयं तु ज्ञा[22a]नं साध्याव्यभिचारिलिङ्गोत्पन्नमनुमानं । साक्षादतीन्द्रियार्थविदामाप्तानां यद्वचनं स आगमः । सादृश्यादननुभूतार्थाधिगम उपमानं गौरिव गवय इति यथा[4] ।

तदेवं प्रमाणचतुष्टयाल्लोकस्यार्थाधिगमो व्यवस्थाप्यते ॥

तानि च परस्परापेक्षया सिध्यन्ति । सत्सु प्रमाणेषु प्रमेयार्थाः । सत्सु प्रमेयेष्वर्थेषु प्रमाणानि [Tib. 29a] । नो तु खलु स्वाभाविकी प्रमाणप्रमेययोः सिद्धिरिति तस्माल्लौकिकमेवास्तु यथादृष्टमित्यलं प्रसङ्गेन । प्रस्तुतमेव व्याख्यास्यामः । लौकिक एव दर्शने स्थित्वा बुद्धानां भगवतां धर्मदेशना ॥

---

janati, arthe 'rtham janati ity etābhyāṃ dvabhyām aviparitavisayapratipādanad «abhrāntam» ity [pratyakṣam] ucyate. na tu nīlam iti, na dharmaṃ saṃjānati ity etabhyāṃ dvābhyām abhilapasaṃsṛṣṭārthagrahaṇapratiṣedhāt «kalpanapodham» ity ucyate. (Voir Nyāyabindu, p. 10.) — Abhidh. k. v. (Soc. As.) 241a 5. *manovijñanena nilaṃ vijanātīty abhidheyaṃ* **vijānātīty** *arthaḥ; nīlam iti ca vijānatīty asyarthasyedam nāmeti vijānāti. — nilaṃ janati* = arthamātrajñānam, *nilam iti jānāti* = arthaviçeṣajñānam. Voir ci-dessus p. 65 n. 3 et p. 71 n. 1 — Kathav. XI. 6, l'expression *cakṣurvijñānasamaṅgi* = °*samanvāgata* Mhv., Index et I. 396.

Notre auteur nie que cet *agama* établisse le *pratyakṣatva* du seul *kalpanāpodha.*

7) aprastutatvāt = སྐབས་མ་ཡིན་པའི་ཕྱིར་ དང་

1) Mss. *yadi vā lakṣaṇaṃ svasāmānyalakṣaṇaṃ va.*

2) དེའི་ ཡུལ་ཅན་གྱི་.

3) *taimirikajñāna, a*°, Bodhic. ṭ. 248. 2. — Voir ci-dessus p. 30, n. 2.

4) Comparer les définitions classiques. — M. Vyut. 199. 5. 6.

अत्राहुः स्वयूथ्याः[1] । यदिदमुक्तं न स्वत[2] उत्पद्यन्ते भावा इति । तद्युक्तं स्वत उत्पत्तिवैयर्थ्यात् । यच्चोक्तं न[3] द्वाभ्यामिति । तदपि युक्तमेकांश[वैकल्यात्][4] । अहेतुपक्ष[5]-स्त्वेकान्तनिकृष्ट इति तत्प्रतिषेधोऽपि युक्तः । यत्तु खल्विदमुच्यते नापि[6] परत इति । तदयुक्तं । यस्मात्परभूता एव भगवता [भावा]नामुत्पादका निर्दिष्टाः ।

चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरं ।
तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चमः[7] ॥ २

---

1) རང་གི་སྡེ་པ་དག་ Cp. Bodhic. ṭ. 249. 9 (IX. 4) où ce terme, dans la bouche du commentateur mādhyamika, désigne les Vijñānavadins. — Bodhic. VII. 5 *svayūthyān māryamānāṃs tvaṃ kramenaiva na paçyasi?* — *yūthaṃ vargaḥ, tatrabhavā yuthyāḥ yaiḥ saha bālyādyavasthāyāṃ krīḍitahasitādinā vicaritam.* — L'Akutobhaya donne au 2ème sūtra le 3ème rang (contre la leçon de l'édition des Karikas, Mdo XVII, et les autres commentateurs). *tatra abhidharmajñair ucyate: catvarah pratyayā....* Buddhapalita (182b 2), dont s'inspire visiblement notre auteur, a simplement: smras-pa = *ucyate.* — Bhavaviveka (53b 1): *idānīm āhuḥ svayūthyāḥ.*

2) Ci-dessus 14. 1.

3) Ci-dessus 38. 1.

4) Mss. *ekāmçahaveḥ.* — Tib. ཡན་ལག་གཅིག་ མ་ཚང་བའི་ཕྱིར་རོ — Buddhapālita ཕྱོགས་གཅིག་ ཉམས་པའི་ཕྱིར་རོ

5) Ci-dessus 38. 4.

6) Ci-dessus 36. 3.

7) རྐྱེན་རྣམས་ བཞི་ སྟེ་ རྒྱུ་དང་ ནི། དམིགས་པ་ དང་ ནི དེ་མ་ཐག། བདག་པོ་ ཡང་ ནི་ དེ་བཞིན་ ནོ། རྐྱེན་ལྔ་པ་ ནི་ ཡོད་མ་ཡིན།།

L'étymologie du mot pratyaya est exposée Sarvadarçana 21.1, Bhamatī (ad II. 2. 19) 354. 23, Vedāntakalpataru 273. 18. (*hetum anyaṃ praty ayate gacchatīti itarasahakāribhir milito hetuḥ pratyayaḥ, — pratyayo hetūnāṃ samavāyaḥ*), Anandagiri *kāryaṃ praty ayate janakatvena gacchatīti pratyayaçabdasya hetuvācitvam.*

En principe, *hetu = pratyaya.* Abhidh. k. v. (Burnouf) 133b 7 *hetūnāṃ pratyayānāṃ ca kaḥ prativiçeṣaḥ.na kaç cid ity āha.uktaṃ hi bhagavatā: dvau hetū dvau pratyayau samyagdṛṣṭer utpādāya....hetuḥ pratyayo nidānaṃ kāra-*

तत्र निर्वर्तको हेतुरिति लक्षणात्, यो हि यस्य निर्वर्तको बीजभावेनावस्थितः स तस्य हेतुप्रत्ययः। उत्पद्यमानो धर्मो येनालम्बनेनोत्पद्यते स तस्यालम्बनप्रत्ययः। कारणस्या[न]न्तरो निरोधः कार्यस्योत्पत्तिप्रत्ययः, तद्यथा बीजस्या[न]न्तरो निरोधोऽङ्कुरस्योत्पादप्रत्ययः[1]। यस्मिन् सति यद्भवति तत्तस्याधिपतेयमिति त एते चत्वारः प्रत्ययाः॥ ये चान्ये पुरोजात[2]सहजातपश्चाज्जातादयस्त एतेष्वेवान्तर्भूताः। ईश्वरादयस्तु प्रत्यया एव न संभवन्तीति। अत ए[22b]वावधारयति, प्रत्ययो नास्ति पञ्चम इति॥ तस्मादेभ्यः परभूतेभ्यो [Tib. 29b] भावानामुत्पत्तिरस्ति परत उत्पत्तिरिति॥

अत्रोच्यते, नैव हि भावानां परभूतेभ्यः प्रत्ययेभ्य उत्पत्तिरिति। यस्मात्,

---

nam nimittam lingam upaniṣad iti paryāyāḥ. — Mais 473a 4 *hetur āsannaḥ pratyayaḥ, viprakṛṣṭas tu pratyaya evajanako hetuḥ, pratyayas tv ālambanamātram (?) ity apare; paryāyāv etāv ity apare.* — 156b 9 *dvividhā hi pratyayā janakaç cājanakāç ca, alambanapratyayaç cājanaka alambanamatratvāt.. .hetur api janakaç cājanakaç ca.* — Nettipakaraṇa III. A § 15.

Voir M Vyut § 115 (*hetu, samanantara, ālambana, adhipati*). — Laṅkavatāra (B. T. S.) 85 17 explication du sextuple hetu *bhaviṣyaddhetuḥ... hetukṛtyaṃ karoti...; saṃbandhahetuḥ...ālambanakṛtyaṃ karoti ..; lakṣaṇahetuḥ...anantarakriya° .; kāraṇahetuḥ . adhipatyadhikārakṛtyaṃ karoti..... adraṇartimpavat; vyañjanahetuḥ ..; upekṣāhetuḥ. ..* — 86. 14 *hetvalambanānantaradhipatipratyayādibhiḥ. .. kramavṛttyā notpadyante, ...yugapad vā notpadyante.* — 87. 3 *na hy atrotpadyate kiṃ cit pratyayair na nirudhyate* — Visuddhimagga (Warren, J. P. T. S. 1893) p. 109 quatre pratyayas (des Kammatthānas): *kamma, citta, ahāra, utu*; p. 138, liste de vingt-quatre pratyayas de l'avidyā, dont les quatre premiers: *hetu, ārammaṇa, adhipati, anantara;* le cinquième. *samanantara.* — Kathāv. XV. 1 2.

Voir Mrs Rhys Davids, Dh Saṅgaṇi p. 274 *hetu-hetu, pratyaya°, uttama°, sādhāraṇa°.*

Les quatre pratyayas de la connaissance, Sarvadarç. s. 20. 2 (traduction Muséon, note 122). Abhidh. k. v. (Ms. Burnouf) fol. 13a 10 *caturbhir eva hi pratyayair hetusamanantarālambanādhipatipratyayaiç cittacaittā utpadyamanā utpadyante. teṣam anyataravaikalye 'py anutpatteḥ samanantarapratyayavaikalyad ity apare....*

1) Voir Nyāyas. IV. 1. 14.

2) Respectivement Nos 10, 6 et 11 de la liste du Visuddhimagga p. 109.

न हि स्व[भावो] भावानां प्रत्ययादिषु विद्यते ।
अविद्यमाने स्वभावे परभावो न विद्यते[1] ॥ इति । ३

यदि हि हेत्वादिषु परभूतेषु प्रत्ययेषु समस्तेषु व्यस्तेषु व्यस्तसमस्तेषु हेतुप्रत्ययसामग्र्यां[2] अन्यत्र वा क्व चिद्भावानां कार्याणामुत्पादात्पूर्वं सत्त्वं स्यात्, स्यात्तेभ्य उत्पादः । न चैवं यदुत्पादात्पूर्वं संभवः[3] स्यात् । यदि स्याद्गृह्येत चोत्पादवैयर्थ्यं च स्यात्, तस्मान्न चास्ति भावानां प्रत्ययादिषु स्वभावः । अविद्यमाने च स्वभावे नास्ति परभावः । भवनं भाव उत्पादः, परेभ्य उत्पादः परभावः, स न विद्यते । तस्मादयुक्तमेतत् पर[भूते][4]भ्यो भावानामुत्पत्तिरिति ॥

अथ वा भावानां कार्याणामङ्कुरादीनां बीजादिषु प्रत्ययेषु सत्स्वविकृतरूपेषु नास्ति स्वभावो निर्हेतुकत्वप्रसङ्गात् ।

तत्किमपेक्षं परत्वं प्रत्ययादीनां, विद्यमानयोरेव हि मैत्रोपग्राहकयोः[5] परस्परापेक्षं परत्वं, न चैवं बीजाङ्कुरयोर्यौगपद्यं । तस्मादविद्यमाने [Tib. 30a] स्वभावे कार्याणां परभावः परत्वं बीजादीनां नास्तीति परव्यपदेशाभावादेव न परत उत्पाद इति । तस्मादागमाभिप्रायानभिज्ञतैव परस्य, न हि तथागता युक्तिविरुद्धं वाक्यमुदाहरन्ति । आगमस्य चाभिप्रायः प्रागेवोपवर्णितः ॥

---

1) དངོས་པོ་རྣམས་ཀྱི་ རང་བཞིན་ ནི། རྐྱེན་ལ་སོགས་ལ་ ཡོད་མ་ཡིན། བདག་གི་ དངོས་པོ་ ཡོད་མིན་ན། གཞན་དངོས་ ཡོད་པ་ མ་ཡིན་ནོ — Voir ci-dessus 36. 5 — Comp. Çikṣas. 358. 3 *ātmatvaṃ na svataḥ siddhaṃ kim apekṣya paro bhavet?* — La notion du *paratra* est discutee Chap. XV.

2) Mss. *samagryām* Tib. ཚོགས་པ་ལས་ གཞན་འགའ་ཞིག་ལ་

3) *saṃbhavaḥ syāt* = ཡོད་པར་འགྱུར་བ་

4) = གཞན་དུ་གྱུར་པ་དག་ལས.

5) *upagrāhaka* (ཉེར་སྐྱུས་?) semble nouveau.

तदेवं प्रत्ययेभ्य उत्पादवादिनि प्रतिषिद्धे ' क्रियात उत्पादवादी मन्यते ' न चक्षुरा[23a]दयः प्रत्ययाः साक्षाद्विज्ञानं जनयन्ति ' विज्ञानजनिक्रियानिष्पादकत्वात्तु प्रत्यया उच्यन्ते[1] । सा च[2] क्रिया विज्ञानं जनयति । तस्मात् प्रत्ययवती विज्ञानजनिक्रिया विज्ञानजनिका[3] न प्रत्ययाः । यथा परिक्रिया[4] ओदनस्येति ॥

उच्यते '

क्रिया न प्रत्ययवती[5] ।

यदि क्रिया काचित्स्यात्सा चक्षुरादिभिः प्रत्ययैः प्रत्ययवती विज्ञानं जनयेत् । न त्वस्ति । कथं कृत्वा ' इह क्रियेयमिष्यमाणा जाते वा विज्ञान इष्यते अजाते वा जायमाने वा । तत्र जाते न युक्ता ' क्रिया हि भावनिष्पादिका ' भावश्चेन्निष्पन्नः किमस्य क्रियया '

जातस्य जन्म पुनरेव च नैव युक्तं '

इत्यादिना च मध्यमकावतारे प्रतिपादितमेतत्[6] ॥ अजातेऽपि न युक्ता '

कर्त्रा विना जनिरियं [Tib. 30b] न च युक्तरूपा '

1) Voir ci-dessus p. 77 n. 7 l. 2.

2) Mss. *bhāvakriyā*. — Tib. བྱ་བ་ དེས་ ཀྱང་''''

3) Mss. *janikāmapra°*. — Tib. སྐྱེད་པར་བྱེད་པ་ ཡིན་གྱི་ རྐྱེན་དག་ ནི་ མ་ ཡིན་ནོ །

4) འབྲས་ཆན་གྱི་ འཚེད་པའི་ བྱ་བ་ — *hbras-chan* = rice-wine, rice-beer (Jaschke), mais = gekochter Reis (Schmidt) = riz cuit à l'eau (Desgodins). *htshed-pa* ou *htshod-pa* = to cook in boiling water. — *parikriyā* = *pākakriyā* C'est la cuisson qui fait le riz cuit, et non pas les *pratyayas* de la cuisson: feu, eau etc.

5) Premier pāda du quatrième sūtra.

6) Voir ci-dessus 13. 8. — Comp. Prajñāp., citée Çikṣās. 262 12 *nāham utpannasya dharmasyotpattim icchāmi na cānutpannasya*.

इत्यादिवचनात्[1] ॥ जायमानेऽपि भावे क्रिया न संभवति । जाताजातव्यतिरेकेण जायमानाभावात् । यथोक्तं ।

जायमानार्धजातत्वाज्जायमानो न जायते ।

अथ वा जायमानत्वं सर्वस्यैव प्रसज्यते ॥ इति[2] ॥

यतश्चैवं त्रिषु कालेषु जनिक्रियाया असंभवस्तस्मान्नास्ति सा ॥ अत एवाह । क्रिया न प्रत्ययवती । इति ।

विशेषणं नास्तीति विना विशेष्यं ।

इत्यादिना प्रतिपादितमेतन्मध्यमकावतारे[3] । न हि वन्ध्यापुत्रो गोमानित्युच्यते ॥ यद्येवमप्रत्ययवती तर्हि भविष्यतीति । एतदप्ययुक्तमित्याह ।

नाप्रत्ययवती क्रिया[4] ।

यदा प्रत्ययवती नास्ति तदा कथमप्रत्ययवती निर्हेतुका स्यात् । न हि तन्तुमयः पटो न युक्त इति विरणमयो[5] ऽभ्युपगम्यते । तस्मात् क्रिया न [23b] भावजनिका ॥

अत्राह । यद्येवं क्रियाया असंभवः । प्रत्ययास्तर्हि जनका भविष्यन्ति भावानामिति । उच्यते ।

प्रत्यया नाक्रियावन्तः[6] ।

यदा क्रिया नास्ति तदा क्रियारहिता अक्रियावन्तो निर्हेतुकाः प्रत्ययाः कथं जनकाः ॥ अथ क्रियावन्त एव जनका इति । उच्यते ।

---

1) Madhyamakāvatāra VI. 19 (Muséon, 1900, p. 232). La stance est citée tout entière ci-dessous Chap. XXVI. 1 (fol. 172b).

2) Stance non identifiée.

3) VI. 57. — Mss. *viçeṣaṇaṃ nāstīti vinā viçeṣaṇam, ... vinā viçeṣāḥ mity.*

4) Deuxième pāda du quatrième sūtra.

5) Les Mss. hésitent entre viraṇa (Lexx.) et vīraṇa (*bīraṇa*, Sam. N. III. 137. 21) = འཇག་མ = schlechtes, grobes Gras (Schmidt). — Laṅkāvatāra 85. 5: ... *ghaṭo mṛtpiṇḍāt; evaṃ tantubhyaḥ paṭaḥ, vīraṇebhyaḥ kaṭaḥ...* (voir ci-dessous).

6) Troisième pāda du sūtra.

क्रियावन्तश्च सन्त्युत(1) ॥ ४

नेति प्रकृतेनाभिसंबन्धः। उतशब्दोऽवधारणे। तत्र क्रियाया अभाव उक्तः ' कथं क्रियावत्त्वं प्रत्ययानामिति ॥ यथा च [Tib. 31 a] विज्ञानजनिक्रियोक्ता ' एवं परिक्रियादयोऽपि भावा उक्ता वेदितव्या इति नास्ति क्रियातोऽपि समुत्पत्तिर्भावानामिति भवत्युत्पादाभिधानमर्थशून्यं ॥

अत्राह। किं न(2) एतेन क्रियावन्तः प्रत्यया इत्यादिविचारेण। यस्माच्चक्षुरादीन् प्रतीत्य प्रत्ययान् विज्ञानादयो भावा जायन्ते ' तस्माच्चक्षुरादीनां प्रत्ययत्वं तेभ्यश्चोत्पादो विज्ञानादीनामिति ॥ एतदप्ययुक्तमित्याह।

उत्पद्यते प्रतीत्येमानितीमे प्रत्ययाः किल।
यावन्नोत्पद्यत इमे तावन्नाप्रत्ययाः कथं(3) ॥ ५

यदि चक्षुरादीन् प्रत्ययान् प्रतीत्य विज्ञानमुत्पद्यत इत्यस्येमे प्रत्यया उच्यन्ते ' ननु यावत्तद्विज्ञानाख्यं कार्यं नोत्पद्यते तावदिमे चक्षुरादयः कथं नाप्रत्ययाः। अप्रत्यया एवेत्यभिप्रायः। न चाप्रत्ययेभ्य उत्पत्तिः सिकताभ्य इव तैलस्य।

---

1) བྱ་བ་ རྐྱེན་དང་ལྡན་པ་ མེད། རྐྱེན་དང་མི་ལྡན་ བྱ་བ་ མེད། བྱ་བ་མི་ལྡན་ རྐྱེན་ མ་ ཡིན། བྱ་བ་ལྡན་ ཡོད་ འོན་ཏེ་ན ‖

2) ང་བ་ཅག་ལ་ ཅི་དགོས་ = Que *nous* importe...

3) འདི་དག་ལ་ བརྟེན་ སྐྱེ་བས་ ན། དེའི་ཕྱིར་ འདི་དག་ རྐྱེན་ ཅེས་ གྲགས། ཇི་སྲིད་ མི་ སྐྱེ་ དེ་སྲིད་དུ། འདི་དག་ རྐྱེན་མིན་ ཇི་ལྟར་ མིན ‖ Buddhapālita, 185a 1; Bhāvaviveka, 57a 7; Akutobhaya, 40a, fournit la variante: ཇི་སྲིད་ མི་བསྐྱེད་ = *yāvan notpādayantīme.*

Une des formes caractéristiques de ce sophisme, clef de voûte de la dialectique mādhyamika, Bodhicaryāv. IX. 114: *pitā cen na vinā putrāt, kutaḥ putrasya sambhavaḥ? putrābhāve pitā nāsti, tathāsattvam tayor dvayoḥ.* Voir la ṭīkā, 345. 20 — Nyāyasūtras II. 1. 41, IV. 1. 39.

अथ मतं ' पूर्वमप्रत्ययाः सन्तः किं चिदन्यं प्रत्ययमपेक्ष्य प्रत्ययत्वं प्रतिपद्यन्त इति । एतदप्ययुक्तं । यत्तत्प्रत्ययान्तरमप्रत्ययस्य[1] प्रत्ययत्वेन कल्प्यते ' तदपि प्रत्ययत्वे सत्यस्य प्रत्ययो भवति । तत्राप्येषैव चिन्तने[2]ति न युक्तमेतत् ॥

किं चेह[24a]मे चक्षुरादयो विज्ञानस्य प्रत्ययाः कल्प्यमानाः सतो वास्य कल्प्येरन्नसतो वा ' सर्वथा च न युज्यत [Tib. 31b] इत्याह ।

नैवासतो नैव सतः प्रत्ययोऽर्थस्य युज्यते ।

कस्मादित्याह ।

असतः प्रत्ययः कस्य सतश्च प्रत्ययेन किं[3] ॥ ६

असतो ह्यर्थस्याविद्यमानस्य कथं प्रत्ययः स्यात् । भविष्य[4]ता व्यपदेशो भविष्यतीति चेत् । नैवं '

भविष्यता चेद्व्यपदेश इष्टः
शक्तिं विना नास्ति हि भाविता[5]स्य '

इत्यादिनोक्तदोषत्वात् ॥ सतोऽपि विद्यमानस्य लब्धजन्मनो निष्फलैव प्रत्ययकल्पना ॥

---

1) D'après Tib. *apratyayasya tasya.* — Le nouveau *pratyaya* que l'on suppose pour rendre *pratyaya* cet *apratyaya.* ...

2) Mss. *cintayati na..* Tib. དཔྱད་པ་ = *vicāra, nirūpaṇa....* Voir Apte s. voc. *cintanā.*

3) མེད་དམ་ ཡོད་པའི་ དོན་ལ་ ཡང་ ། རྐྱེན་ ནི་ རུང་བ་ མ་ཡིན་ནོ། མེད་ན་ གང་གི་ རྐྱེན་དུ་ འགྱུར ། ཡོད་ན་ རྐྱེན་གྱིས་ ཅི་ཞིག་བྱ ། Ce sūtra est cité ad VII. 20. — Buddhapālita 185a 6; Bhāvaviveka 58a 1. — Comparez la stance Sarvad. s. 14. 18: *na sataḥ kāraṇāpekṣā...*

4) Comp. Abhidh. k. v. (Soc. As) 223a 2: ... *bhāvinyāpi saṃjñayā ... bhaviṣyatyāpi saṃjñayā nirdeçaḥ kriyate...*; les expressions *saṃskṛtam abhisaṃskaroti, odanaṃ pacati* sont données comme exemples.

5) = Madhyamakāvatāra, VI. 58 (Stance omise dans l'article cité du Muséon) — bhāvitā = འབྱུང་འགྱུར. Voir W. K. F. supplément.

एवं समस्तानां प्रत्ययानां कार्योत्पादनसामर्थ्येनाप्रत्ययत्वमुद्भाव्य। अतः परं व्यस्तानामप्रत्ययत्वं प्रतिपाद्यते ॥

अत्राह । यद्यप्येवं प्रत्ययानामसंभवः। तथाप्यस्त्येव लक्षणोपदेशात्प्रत्ययप्रसिद्धिः। तत्र निर्वर्तको हेतुरिति[1] लक्षणमुच्यते हेतुप्रत्ययस्य। न चाविद्यमानस्य लक्षणोपदेशो युक्तो बन्ध्यासुतस्येवेति ॥ उच्यते। स्याद्धेतुप्रत्ययो यदि तस्य लक्षणं स्यात्। यस्मात्

न सन्नासन्न सदसन्धर्मो निर्वर्तते यदा ।
कथं निर्वर्तको हेतुरेवं सति हि युज्यते[2] ॥ ७

तत्र निर्वर्तक उत्पादकः। यदि निर्वर्त्यो धर्मो निर्वर्तेत तमुत्पादको हेतुरुत्पादयेत्। न तु निर्वर्तते। सदसदुभयरूपस्य निर्वर्त्यस्याभावात् ॥ तत्र सन्न निर्वर्तते विद्यमानत्वात् । असन्नप्यविद्यमानत्वात् [Tib 32a] । सदसन्नपि परस्परविरुद्धस्यैकार्थस्याभावात्। उभयपक्षाभिहितदोषत्वाच्च ॥ यत एवं कार्यस्योत्पत्तिर्नास्ति हेतुप्रत्ययोऽप्यतो नास्ति । ततश्च यदुक्तं। लक्षणसंभवाद्विद्यते हेतुप्रत्यय इति। तदेवं सति न युज्यते ॥

इदानीमालम्बनप्रत्ययनिषेधार्थमाह[3] ।

---

1) Akutobhaya རྒྱུའི་རྐྱེན་ནི་བསྐྱེད་པའི་དོན་གྱིས་སོ = *hetupratyayo jananārtham.*

2) གང་ཚེ་ཆོས་ནི་ཡོད་པ་དང་། །མེད་དང་ཡོད་མེད་མི་འགྲུབ་པ། །ཇི་ལྟར་སྒྲུབ་བྱེད་རྒྱུ་ཞེས་བྱ། །དེ་ལྟ་ཡིན་ན་མི་རིགས་སོ།། ce qui donne la lecture: *katham nirvartako hetur ity evam sati na yujyate* — Voir ci-dessous l. 13 — Ce sūtra est cité ci-dessus p. 31. 6 et ad VII. 20.

3) Voir p. 76 note 7. — Akutobhaya: དམིགས་པའི་རྐྱེན་ནི་རྟེན་གྱི་དོན་གྱིས་སོ: *L'ālambanapratyaya* a pour but d'être un point d'appui. — Nanjio, Nos 1173. 1174. — Dignāga est l'auteur d'un traité en huit çlokas *Ālambanaparīkṣā* (Tandjour, Mdo XCV) et de sa vṛtti; il y a une ṭīkā de Vinītadeva (Dulvalha), Mdo CXII. La doctrine est toute idéaliste: ni les atomes, ni les composés d'atomes ne peuvent être objet de la connaissance. — Sur la lecture *ālambana* (Pāli *ārammaṇa*), voir Mhv. I. 470.

अनालम्बन एवायं सन्[1] धर्म [24 b] उपदिश्यते।
अथानालम्बने धर्मे कुत आलम्बनं पुनः[2]॥ ८

इह सालम्बनधर्माः कतमे। सर्वचित्तचैत्ता इत्यागमात्[3]। चित्तचैत्ता येनालम्बनेनोत्पद्यन्ते यथायोगं रूपादिना स तेषामालम्बनप्रत्ययः॥ अयं च विद्यमानानां वा परिकल्प्येताविद्यमानानां वा॥ तत्र विद्यमानानां नार्थस्तदालम्बनप्रत्ययेन। धर्मस्य ह्युत्पत्त्यर्थमालम्बनं परिकल्प्यते। स चालम्बनात्पूर्वं विद्यमान एवेति। अथैवमनालम्बने धर्मे स्वात्मना प्रसिद्धे किमस्यालम्बनयोगेन परिकल्पितेन। इत्यनालम्बन एवायं सन् विद्यमानो धर्मः चित्तादिकः केवलं सालम्बन इत्युच्यते भवद्भिः स्वमनीषिकया[4]। न त्वस्यालम्बनेन कश्चित्संबन्धोऽस्ति॥ अथाविद्यमानस्यालम्बनं परिकल्प्यते। तदपि न युक्तं। [5]अनालम्बन [Tib. 32b] एवायमित्यादि[5]। अविद्यमानस्य हि नास्त्यालम्बनेन योगः।

---

1) Mss. *sa dharma*, *sarvadharma*.

2) ཡོད་པའི་ ཆོས་ འདི་ དམིགས་པ་ ནི། མེད་པ་ ཁོ་ནར་ ཉེ་བར་ བསྟན། ཅི་སྟེ་ ཆོས་ ནི་ དམིགས་མེད་པ། དམིགས་པ་ཡོད་པར་ ག་ལ་ འགྱུར༎ Lectures confirmées par l'édition des Kārikās, Mdo XVII. — Akutobhaya དེ་ལྟར་ ཆོས་འདི (*san* n'est pas traduit); Buddhapālita ཡོད་པའི་ཆོས་ནི (*ayam* n'est pas traduit).

3) Je n'ai pas identifié cet āgama, que cite aussi Bhāvaviveka. — Comp. Dh.-sñi 1185. 1508. (States that have a concomitant object of thought = *sāram-maṇa*). Le № 1509 de la Dh.-sñi est cité, d'après le Çāstra (བསྟན་བཅོས་ལས) par Bhāvaviveka (fol. 60b). — Akutobhaya (40b 5) = . . . *ye dharmā deçitās, te 'nālambanaikarasāḥ*. — Voir Kathāvatthu IX. 3. 5.

4) = Eigenes Gutdunken. (Böhtlingk, q. v).

5—5) ཆོས་ འདི་ དམིགས་པ་ མེད་པར་ ནི། ཡོད་པ་ ཁོ་ནར་ ཉེ་བར་ བསྟན། ཞེས་བྱ་བ་ལ་སོགས་པ་ལ་ = *anālambana evāyaṃ sann evopadiçyata ityādi.*

[1]अनालम्बन एवायं सन् धर्म उपदिश्यते ।

भवद्भिः सालम्बन इति वाक्यशेषः[1]।

अथानालम्बने धर्मे कुत आलम्बनं पुनः ।

अथशब्दः प्रश्ने । कुत इति हेतौ । तेनायमर्थः । अथैवमनालम्बने धर्मेऽसत्यविद्यमाने भूयः कुत आलम्बनं । [2]आलम्बनकाभावादालम्बनस्याप्यभाव इत्यभिप्रायः ।

कथं तर्हि सालम्बनाश्चित्तचैत्ताः । सांवृतमेतल्लक्षणं न पारमार्थिकमित्यदोषः ॥

इदानीं [3]समनन्तरप्रत्ययनिषेधार्थमाह ।

अनुत्पन्नेषु धर्मेषु निरोधो नोपपद्यते ।

नानन्तरमतो युक्तं निरुद्धे प्रत्ययश्च कः ॥[4] ९

1—1) ཆོས་ འདི་ དམིགས་པ་མེད་པར་ ནི། ཡིན་པ་ སྟེ་ གྱུར་པ་ ཁོ་ན་ ཁྱེད་ ཀྱིས་ ཉེ་བར་བསྟན་ཏེ། དམིགས་པ་དང་བཅས་པར་ ཞེས་བྱ་བ་ནི་ ཚིག་གི་ ལྷག་མའོ་ = *dharmo 'yam anālambanaḥ san bhūta eva bhavadbhir upadiçyate; sālambana iti vākyaçeṣaḥ.*

2) Le mot *ālambanaka* (དམིགས་པར་བྱེད་པ་) est nouveau.

3) Notre texte ne distingue pas *samanantara* (མཚུངས་པ་དེ་མ་ཐག་པ་) et *anantara*; voir p. 76 n. 7. — Glose de l'Akutobhaya: དེ་མ་ཐག་པའི་ རྐྱེན་ ནི་ བར་དུ་མ་ཆོད་པའི་ དོན་གྱིས་སོ = *anantarapratyayo nirantaratvārtham.* — D'après la définition de notre texte, = *kāraṇasyānantaro nirodhaḥ.* Comparer Nyāyabhāṣya IV. 1. 14 ... *na ced bījopamardo 'nkurakāraṇam, anupamarde 'pi bījasyāṅkurotpattiḥ syād iti.* Réfutation 15 et suiv.). — Kathāv. X. 1 (Aṭṭhakathā, p. 133): pour éviter le *saṃtativicchedo,* l'interruption de la série des moments intellectuels, les Andhakas répondent affirmativement à la question: Can five skandhas arise when the five already arisen have not ceased? (Rhys Davids, Schools of Buddhist Belief).

4) ཆོས་རྣམས་ སྐྱེས་པ་ མ་ ཡིན་ན། འགག་པ་ འཐད་པར་ མི་ འགྱུར་རོ། དེ་ཕྱིར་ དེ་མ་ཐག་ མི་ རིགས། འགགས་ ན་ རྐྱེན་ ཡང་ གང་ཞིག་ ཡིན॥

तत्र पश्चिमे श्लोकस्यार्धे पादव्यत्ययो द्रष्टव्यः ' चशब्दश्च [25a] भिन्नक्रमो निरुद्धे चेति । तेनैवं पाठः ' निरुद्धे च प्रत्ययः कः ' नानन्तरमतो युक्तमिति । श्लोकबन्धार्थं त्वेवमुक्तं ॥

तत्र कारणस्यानन्तरो निरोधः कार्यस्योत्पादप्रत्ययः समनन्तरप्रत्ययलक्षणं ॥ अत्र विचार्यते । अनुत्पन्नेषु धर्मेषु कार्यभूतेष्वङ्कुरादिषु निरोधो नोपपद्यते कारणस्य [Tib. 33a] बीजादेः । यद्येतदेवं तदा कारणस्य निरोधाभावादङ्कुरस्य कः समनन्तरप्रत्ययः ॥ अथानुत्पन्ने ऽपि कार्ये बीजनिरोध इष्यते ' एवं सति निरुद्धे बीजेऽभावीभूतेऽङ्कुरस्य कः प्रत्ययः । को वा बीजनिरोधस्य प्रत्यय इति ॥ उभयमेतदहेतुकमित्याह ' निरुद्धे च कः प्रत्यय इति । चशब्दोऽनुत्पन्नशब्दापेक्षः । तेनानुत्पन्ने चाङ्कुरे बीजादीनां निरोध इष्यमाणे ऽप्युभयमेतदहेतुकमापद्यत इति नानन्तरमतो युक्तं ॥ अथ वा न स्वतो नापि परत इत्यादिनोत्पादो निषिद्धस्तमभिसंधायाह ।

अनुत्पन्नेषु धर्मेषु निरोधो नोपपद्यते ।
नानन्तरमतो युक्तमिति ।

अपि च

निरुद्धे प्रत्ययश्च कः ॥

इत्यत्र पूर्वकमेव व्याख्यानं ॥

इदानीमधिपतिप्रत्यय(1)स्वरूपनिषेधार्थमाह । [बीजादीनां](2)

भावानां निःस्वभावानां न सत्ता विद्यते यतः ।
सतीदमस्मिन् भवतीत्येतन्नैवोपपद्यते ॥ १०(3)

---

1) *svarūpa* n'est pas traduit dans le Tibétain.

2) D'après le Tibétain.

3) དངོས་པོ་ རང་བཞིན་མེད་རྣམས་ཀྱི ། ཡོད་པ་ གང་ཕྱིར་ ཡོད་མིན་ན། འདི་ ཡོད་པས་ ན་ འདི་ འབྱུང་ ཞེས ། བྱ་བ་ འདི་ནི་ ཐད་མ་ཡིན ||

इह यस्मिन् सति यद्भवति[1] तत्तस्याधिपतेयमित्यधि[2]पतिप्रत्ययलक्षणं । भावानां च प्रतीत्यसमुत्पन्नत्वात्स्वभावाभावे कुतस्तद्यदस्मिन्निति कारणत्वेन व्यपदिश्यते ' कुतस्तद्यदिदमिति कार्यत्वेन । तस्मान्नास्ति लक्षणतोऽपि प्रत्ययसिद्धिः ॥

अत्राह [Tib. 33b] ' तन्त्वादिभ्यः पटादिकमुपलभ्य पटादेस्तन्त्वादयः प्रत्यया इति [25b] । उच्यते । पटादिफलप्रवृत्तिरेव स्वरूपतो[3] नास्ति ' कुतः प्रत्ययानां प्रत्ययत्वं सेत्स्यति । यथा च पटादिफलप्रवृत्तिरसती तथा प्रतिपादयन्नाह ।

न च व्यस्तसमस्तेषु प्रत्ययेष्वस्ति तत्फलं ।
प्रत्ययेभ्यः कथं तच्च भवेन्न प्रत्ययेषु यत् ॥ ११[4]

तत्र व्यस्तेषु तन्तुतुरीवेमतसरशलाकादिषु प्रत्ययेषु पटो नास्ति ' तत्रानुपलभ्यमानत्वात् ' कारणबहुत्वाच्च कार्यबहुत्वप्रसङ्गात् । समुदितेष्वपि तन्त्वादिषु नास्ति पटः ' प्रत्येकमवयवेष्वविद्यमानत्वात् ' एकस्य कार्यस्य खण्डश उत्पत्तिप्रसङ्गात् । तस्मात्फलाभावान्न सन्ति प्रत्ययाः स्वभावत[5] इति ॥

अथासदपि तत्तेभ्यः [प्रत्ययेभ्यः प्रवर्तते ।]

---

1) Buddhapālita ajoute: *yasminn asati yan na bhavati.*

2) *adhipati* བདག་པོ་, *adhipateyam* བདག་པོ་ཉིད་ (Çikṣās. 28. 14. 117. 3: a Palicism not hitherto noted in Sanskrit) — Voir p. 76 n. 7. — Akutobhaya ··· དབང་བྱེད་པའི་ དོན་གྱིས་སོ = *adhipatipratyayo 'dhikaraṇārtham.*

3) *svarūpato* n'est pas traduit dans le Tib.

4) རྐྱེན་རྣམས་ སོ་སོ་ འདུས་པ་ལ། འབྲས་བུ་ དེ་ནི་ མེད་པ་ ཉིད། རྐྱེན་རྣམས་ལ་ ནི་ གང་ མེད་པ། དེ་ ནི་ རྐྱེན་ལས་ ཇི་ལྟར་ སྐྱེ ॥ Buddhapālita remarque (188a 7) ཉིད = ཁོ་ན. Soit la lecture *naiva vyasta*°.

5) *svabhāvataḥ* n'est pas tr·duit dans le Tib.

इत्यभिप्रायः स्यात्।

[अप्रत्ययेभ्यो ऽपि कस्मान्नाभि]प्रवर्तते फलं[1] ॥ १२

अप्रत्ययेष्वपि नास्ति फलमिति । अप्रत्ययेभ्योऽपि वीरणादिभ्यः[2] कस्मान्नाभिप्रवर्तते पट इति नास्ति फलप्रवृत्तिः स्वरूपतः[3] ॥

अत्राह। यद्यन्यत्फलं स्यादन्ये च प्रत्ययास्तदा किं प्रत्ययेषु फलमस्ति नास्तीति स्याच्चिन्ता[4] । नास्ति तु व्यतिरिक्तं फलं । किं तर्हि प्रत्ययमयमेवेति ॥ उच्यते।

फलं च प्रत्ययमयं प्रत्ययाश्चास्वयंमयाः । [Tib. 34 a]

फलमस्वमयेभ्यो यत्तत्प्रत्ययमयं कथं[5] ॥ १३

यदि प्रत्ययमयं प्रत्ययविकारः फलमिति व्यवस्थाप्यते तदयुक्तं । यस्मात्तेऽपि प्रत्यया अस्वयंमया अप्रत्ययस्वभावा इत्यर्थः ॥ तन्तुमयो हि पट इत्युच्यते[6] । स्यात् पटो यदि

1) Mss. *athāsad api tat tebhyaḥ pravartate phalam ity abhiprāyaḥ syāt. apratyayeṣv api*... — D'après notre version tibétaine, le sūtra tout entier doit précéder la phrase *ity abhiprāyaḥ syāt*, laquelle manifestement ne porte que sur les deux premiers pādas.

D'après notre version, l'édition des Kārikās (Mdo XVII) et la traduction de Buddhapālita (188b 7): ཅི་སྟེ་ འབྲས་བུ་ དེ་ མེད་ ཀྱང་། རྐྱེན་ དེ་དག་ལས་ སྐྱེ་ འགྱུར་ན། རྐྱེན་མིན་ལས་ ཀྱང་ འབྲས་བུ་ ནི། ཅི་ཡི་ཕྱིར་ ན་ སྐྱེ་ མི་འགྱུར ||
L'Akutobhaya (41a 5) et Bhāvaviveka (62o 5) lisent le premier pāda: ཅི་སྟེ་ དེ་ནི་ མེད་པར་ ཀྱང་, sans la répétition du mot *phala*.

2) *vīraṇa* = འཇག་མ་

3) *svarūpataḥ* manque dans Tib.

4) ཅི······བསམས་པར་གྱུར་ན་

5) འབྲས་བུ་ རྐྱེན་གྱི་ རང་བཞིན་ན། རྐྱེན་རྣམས་ བདག་གི་ རང་བཞིན་ མིན། བདག་དངོས་མིན་ལས་ འབྲས་བུ་ གང་། དེ་ནི་ ཇི་ལྟར་ རྐྱེན་རང་བཞིན|| Notre traduction lit à tort: *de-ni de-ltar* ... — *raṅ-bzhin* = *svabhāva*. — L'Akutobhaya, Buddhapālita et Bhāvaviveka lisent: *rkyen-las hbyuṅ*, *raṅ-las hbyuṅ*.

6) Tib. = *paṭe paṭas tantumaya iti*.

तत्तव एव स्वभावसिद्धाः स्युः ' ते त्वंशमया[1] अंशविकारा न स्वभावसिद्धाः ' ततश्च तेभ्यो-ऽस्वयंमये[भ्यो ऽ]स्वभावेभ्यो यत्फलं पटाख्यं तत्कथं तन्तुमयं भविष्यति ॥ यथोक्तं [26a][2] '

पटः कारणतः सिद्धः सिद्धं कारणमन्यतः।
सिद्धिर्यस्य स्वतो नास्ति तदन्यज्जनयेत्कथं ॥ इति[3]।

तस्मान्न प्रत्ययमयं

फलं संविद्यते ॥ अप्रत्ययमयं तर्ह्यस्तु।

नाप्रत्ययमयं फलं।

संविद्यते[4]।

इति तन्तुमयो यदा पटो नास्ति तदा कथं वीरणमयः स्यात्[5] ॥

अत्राह। मा भूत्फलं ' प्रत्ययाप्रत्ययनियमस्तु विद्यते। तथा च भवान् ब्रवीति ' यस्मात्फलं प्रत्ययेभ्यः प्रवर्तते अप्रत्ययेभ्यो ऽपि कस्मान्नाभिप्रवर्तत इति। न चासति फले पटकटाख्ये[6] तन्तुवीरणानां प्रत्ययानां प्रत्ययत्वं युक्तं ' अतः फलमप्यस्तीति [Tib 34b] ॥ उच्यते। स्यात्फलं यदि प्रत्ययाप्रत्यया एव स्युः ' सति हि फल इमेऽस्य प्रत्यया इमेऽप्रत्यया इति स्यात्। तच्च विचार्यमाणं नास्तीति

फलाभावात्प्रत्ययाप्रत्ययाः कुतः[7] ॥ १४

---

1) Mss. *aṃçumayā*, *aṃçuvikārā*, Tib. ཆ་ཤས་ཀྱི་ རང་བཞིན་ ཆ་ཤས་ཀྱི་རྣམ་པར་འགྱུར་བ་

2) Même citation dans Buddhapālita, 189b 1. — Pour les deux derniers pādas, comp. Çūnyatāsaptati, Mdo XVII, 27b 5.

3) ཞེས་བཤད་དོ་ = *ity āha.*

4) Le texte du sūtra est établi d'après le tibétain.

5) དེའི་ཚེ་ འགལ་བ་ འཇག་མའི་ རང་བཞིན་དུ་ ཇི་ལྟར་འགྱུར་ = *tadā kathaṃ viruddhavīraṇamayaḥ.* ...

6) *kaṭa* = རེ་ལྡེ་, étoffe de poils de yak et de chèvre.

7) དེ་ཕྱིར་ རྐྱེན་གྱི་རང་བཞིན་ མིན། རྐྱེན་མིན་རང་བཞིན་ འབྲས་བུ་ ནི། ཡོད་མིན་ འབྲས་བུ་མེད་པས་ན། རྐྱེན་མིན་ རྐྱེན་དུ་ ག་ལ་ འགྱུར ॥

प्रत्ययाश्चाप्रत्ययाश्चेति समासः ॥ तस्मान्नास्ति भावानां स्वभावतः[1] समुत्पत्तिरिति ।

यथोक्तमार्यरत्नाकरसूत्रे[2] ।

शून्यविद्य[3] न हि विद्यते क्व चि ' अन्तरीक्षि[4] शकुनस्य वा पदं ।
यो न विद्यति सभावतः क्व चि[5] ' सो न जातु परहेतु भेष्यति ॥
यस्य नैव हि सभावु लभ्यति ' सो ऽसभावु परपच्चयः[6] कथं ।
अस्वभावु परं[7] किं जनोष्यति ' एष हेतु सुगतेन देशितः ॥
सर्व धर्म अचला दृढं स्थिता[8] ' निर्विकार निरुपद्रवाः शिवाः ।
अन्तरीक्षपथतुल्य ऽजानका[9] ' तत्र मुह्यति जगं अजानकं ॥
शैलपर्वत यथा अकम्पिया ' एवं[10] धर्म अविकम्पियाः सदा ।
नो च्यवन्ति न पि चोपपद्ययु[11] ' एवं धर्मणा[12] जिनेन देशिता[ः] ॥

1) *svabhāvataḥ* omis dans le Tib.

2) Kandjour, Mdo, VIII. foll. 333—456 (Feer, p. 218). — Voir ci-dessous ad VIII. 6. — Ratnākara est un des seize hommes vertueux «énumérés dans le Lotus, chap. I (Kern, p. 4). — Mètre Rathoddhatā -⏑-⏑⏑⏑-⏑-⏑⏑ |

3) Mss. *vidye*. Tib. གང་ན་ འང་ སྟོང་པ་ རིག་པ་ མེད་པ་ དེ = *yasmin* (*yatra*) *api çūnyavin na vidyate*.

4) Mss. °*rikṣe*, °*rikṣe*, °*kṣi*; cf. Mhv. II. 341. 22.

5) གང་ན་ འང་ ངོ་བོ་ཉིད་ འགའ་ ཡོད་མེད་པ་ = *yasminn api na kaç cit svabhāvo vidyate*.

6) Mss. *parapratyayaḥ*; de même *svabhāva* corrigé pour le mètre.

7) Mss. *paru*, *paraṃ*. — *parāṃ kiṃ*.

8) C'est-à-dire que la nature fixe des *dharmas* est d'être *acalas*.

9) ཤེས་པ་ མེད་པ་ Voir Mhv. I. 34. 12, Prajñāp. 275. 12 *yadā.....sarvadharmā ajānakā apaçyakās, tadā....*

10) *evāṃ dharma*.

11) Mss. *yu*, *yū* (cf. l'aoriste pāli), *yum*.

12) Mss. *dharmata*; = **dharmāṇaḥ*; Tib. ཆོས་རྣམས་ དེ་བཞིན་ = *evaṃ dharmāḥ*.

इत्यादि । तथा[1] ।

यो न पि जायति ना चुपपद्यी ' नो च्यवते न पि जीर्यति [26b] धर्मः ।
तं जिनु देशयती नरसिंहः ' तत्र निवेशयि[2] सत्वशतानि ॥
यस्य सभावु न विद्यति कश्चि ' नो परभावतु केन चि लब्धः ।
नान्तरतो न पि बाह्यिरतो वा ' लभ्यति तत्र निवेशयि नाथः ॥
शान्त गती कथिता सुगतेन ' नो च गती उपलभ्यति का चि ।
तत्र च वोक्षरसो गतिमुक्तो [Tib. 35a] ' मुक्तकु मोचयसी बहुसत्वान् ॥

इति विस्तरः ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ[3] प्रत्ययपरीक्षा नाम प्रथमं प्रकरणं ॥

---

1) Le même fragment est cité ad XIII. 6. — Metre Dodhaka -⏑⏑-⏑⏑-⏑⏑-- |

2) དེ་ལ་ བཀོད་ -- Variante (ad XIII. 6): *nideçayi satva maharṣiḥ.*

3) Lecture préférable à celle que nous avons adoptée p. 1.

II.

गतागतपरीक्षा नाम द्वितीयं प्रकरणं

अत्राह[1] । यद्यप्युत्पादप्रतिषेधात्प्रतीत्यसमुत्पादस्यानिरोधादिविशेषणासिद्धिः[2] । तथाप्यनागमानिर्गमप्रतीत्यसमुत्पादसिद्धये लोकप्रसिद्धगमनागमनक्रियाप्रतिषेधार्थं किंचिदुपपत्त्यन्तरमुच्यतामिति ॥ उच्यते । यदि गमनं नाम स्यान्नियतं तद्गते वाऽध्वजाते परिकल्प्येतागते गम्यमाने वा । सर्वथा च न युज्यत इत्याह ।

गतं न गम्यते तावदगतं नैव गम्यते ।
गतागतविनिर्मुक्तं गम्यमानं न गम्यते[3] ॥ १

तत्रोपरतगमिक्रियमध्वजातं गतमित्युच्यते । आविश्यमानं वर्तमानगमिक्रियया[4] गम्यत इत्युच्यते । यद्गतमुपरतगमिक्रियं तद्वर्तमानगमिक्रियायोगवाचिना गम्यत इत्यनेन शब्देनोच्यमानमसंबद्धमिति कृत्वा गतं तावद्गम्यत इति न युज्यते । तावच्छब्देन च प्रतिषेधक्रमं दर्शयति ॥

---

1) Buddhapālita 190a 1.

2) Voir ci-dessus p. 58. 10.

3) རེ་ཞིག་སོང་ལ་མི་འགྲོ་སྟེ། མ་སོང་ལ་འང་འགྲོ་བ་མེད། སོང་དང་མ་སོང་མ་གཏོགས་པར། བགོམ་པ་ཤེས་པར་མི་འགྱུར་རོ།། Lire au deuxième pāda *yaṅ* et non *aṅ*.

4) Mss. *gamikriyayā vartamānaṃ*. — Voir infra ad VI. 14 (fol. 46b au début).

अगतमपि[1] न गम्यते। अगतं ह्यनुपजातगमिक्रियमनागतमुच्यते ' गम्यत इति च वर्तमानं ' अतोऽना[27a]गतवर्तमानयोरत्यन्तभेदादगतमपि [Tib. 35b] गम्यत इति न युज्यते। यद्यगतं कथं गम्यतेऽथ गम्यते न तदगतमिति॥

गम्यमानेऽपि नास्ति गमनं यस्मात '

गतागतविनिर्मुक्तं गम्यमानं न गम्यते।

इह हि गन्ता यं देशमतिक्रान्तः स तस्य देशो गतो ' यं च नातिक्रान्तः सोऽस्यानागतः। न च गतागतव्यतिरेकेण तृतीयमपरमध्वजातं पश्यामो गम्यमानं नाम। यतश्चैवं गम्यमानं न गम्यते ' गम्यत इति न प्रज्ञायते ' तस्मान्नास्ति गम्यमानं। अतो न तद्गमिक्रियया आविश्यते न गम्यत इति नास्ति गम्यमानेऽपि गमनं॥ अथ स्याद्गन्तुर्गच्छतो यश्चरणाक्रान्तो देशः स गम्यमानः स्यादिति। नैवं ' चरणयोरपि परमाणुसांघातत्वात्[2]। अङ्गुल्यग्रावस्थितस्य परमाणोर्यः पूर्वो देशः स तस्य गतेऽन्तर्गतः। पार्ष्ण्यवस्थितस्य चरमपरमाणोर्य उत्तरो देशः स तस्यागतेऽन्तर्गतः। न च परमाणुव्यतिरेकेण चरणमस्ति तस्मान्नास्ति गतागतव्यतिरेकेण गम्यमानं। यथा चैवं चरणे विचार ' एवं परमाणूनामपि पूर्वापरदिग्भागसंबन्धेन विचारः कार्य इति[3]॥ अथार्धगतं गम्यमानं ' उक्तमुत्तरं ज्ञायमानविचारेण[4]। तस्माद्गम्यमानं न गम्यत इति सिद्धं॥

तत्राह [Tib. 36a]। गम्यत एव गम्यमानं ' इह हि

चेष्टा यत्र गतिस्तत्र गम्यमाने च सा यतः।
न गते नागते चेष्टा गम्यमाने गतिस्ततः[5]॥ २

1) Mss. *agatam iti.*

2) Mss. *sāṃghātatvāt*, *sāṃhāt-tvāt*. — P. W. **sāṃghāta*.

3) Voir Bodhic. IX. 47.

4) Voir ci-dessus p. 80. 8.

5) གང་ན་ གཡོ་བ་ དེ་ན་ འགྲོ། དེ་ ཡང་ གང་ཕྱིར་ བགོམ་པ་ལ། གཡོ་བ་སོང་ མིན་ མ་སོང་ མིན། དེ་ཕྱིར་ བགོམ་པ་ འགྲོ་བ་ ཡོད།།

तत्र चेष्टा चरणोत्क्षेप[प]रिक्षेपलक्षणा। यतो व्रजतो गन्तुर्यत्र देशे चेष्टा गतिस्तत्रैव देशे ' सा च चेष्टा न गतेऽध्वनि संभवति नाप्यगते किं तु गम्यमा[27b]न एव ' ततश्च गम्यमाने गतिः । यत्र हि गतिरुपलभ्यते तद्गम्यमानं ' तच्च गमिक्रियया आविश्यते । तस्माद्गम्यमानमेव गम्यत इति ॥ एकोऽत्र गमि[(1)]र्ज्ञानार्थः ' अपरश्च देशान्तरसंप्राप्त्यर्थ इति ॥

एवमपि परिकल्प्यमाने गम्यमानं न गम्यत इत्याह '

गम्यमानस्य गमनं कथं नामोपपत्स्यते ।
गम्यमाने द्विगमनं यदा नैवोपपद्यते[(2)] ॥ ३

इह हि गमिक्रियायोगादेव गम्यमानव्यपदेशमिच्छति भवांस्तच्च गम्यत इति ब्रवीति । एका चात्र गमिक्रिया ' तया गम्यमानव्यपदेशो भवतु काममध्वनो ' गम्यत इति भूयः क्रियासंबन्धो गम्यमानस्य न युज्यत इति

गम्यमानस्य गमनं कथं नामोपपत्स्यते ॥

कारणमाह ।

गम्यमाने द्विगमनं यदा नैवोपपद्यते ॥ इति[(3)] ।

गम्यमानमिति गम्यत इत्यर्थः । [(4] द्विगतं गमनं द्विगमनं [4)] । एकस्या गमिक्रियाया गम्यमानमित्यत्रोपयुक्तत्वाद्द्वितीयाया अभावाच्च ' गम्यत [Tib. 36b] इत्ययं व्यपदेशो

1) Comparer l'étymologie des mots *tathāgata, sugata*.

2) བགོམ་ལ་ འགྲོ་བ་ ཡིན་པར་ ནི། ཇི་ལྟ་བུར་ན་ འཐད་པར་འགྱུར། གང་ཚེ་ འགྲོ་བ་ མེད་པ་ཡི། བགོམ་པ་ འཐད་པ་ མེད་ཕྱིར་རོ།། = *gamyamānaṃ hy agamanaṃ yadā naivopapadyate* (Mdo XVII et les Commentaires). — Il faut préférer cette leçon. — Voir les notes suivantes et la glose *vinā gamanena* (p. 95. 1).

3) Le tibétain traduit comme ci-dessus (voir note 2) et ajoute འགྲོ་བ་མེད་པ་ ནི་ འགྲོ་བ་ དང་ བྲལ་བའོ = *agamanaṃ gamanarahitam*. Suit *gamyamānam iti*......

4—4) Cette phrase n'est pas traduite dans le tibétain.

विना गमनेन यदा नैवोपपद्यते । तदा गम्यमानं गम्यत इति परिपूर्णो वाक्यार्थो नास्तीत्यभिप्रायः । गम्यमानमित्येतावन्मात्रमेव संभवति द्वितीयक्रियाभावात् न तु गम्यत इति ॥

अथ गम्यत इत्यत्रैव गमिक्रियासंबन्ध इष्यते । एवं सति गम्यमानव्यपदेशे नास्ति क्रियासंबन्ध इति न परिपूर्णता(1) वाक्यार्थस्येत्याह् ।

गम्यमानस्य गमनं यस्य तस्य प्रसज्यते ।
ऋते गतेर्गम्यमानं गम्यमानं हि गम्यते(2) ॥ ४

यस्य वादिनो गम्य[28a]मानस्य गमनमिति पक्षः । गम्यमाने संज्ञाभूते(3) गमिक्रियाशून्ये यो गमिक्रियामाधेयभूतामिच्छति । तस्य पक्ष ऋते गतेर्गम्यमानमिति प्रसज्यते । गतिरहितं गमनं स्यात् । यस्मादस्य गम्यमानं हि गम्यते । हि शब्दो यस्मादर्थे । यस्माद्ग गतिरहितमेव गम्यमानं सत्तस्य वादिनो गम्यते । गम्यत इत्यत्र क्रियोपयोगात् । तस्माद्गतिरहितं गम्यमानं प्रसज्यते ॥

अथोभयत्रापि क्रियासंबन्ध इष्यते गम्यमाने गम्यत इत्यत्र च । एवमपि

गम्यमानस्य गमने प्रसक्तं गमनद्वयं ।
येन तद्गम्यमानं च यच्चात्र गमनं पुनः(4) ॥ ५

1) Marqué de l'astérisque dans Böhtlingk; pour le sens, voir *paripūrṇa-bhasin*, °*artha*.

2) གང་གི་ བགོམ་པ་ལ་ འགྲོ་བ། དེ་ཡི་ བགོམ་ལ་ འགྲོ་མེད་པར། ཐལ་བར་ འགྱུར་ཏེ་ གང་གི་ཕྱིར། བགོམ་ལ་ འགྲོ་བ་ ཡིན་ཕྱིར་རོ།།

3) Mss. *saṃjñābhūte*. — Tib. མིང་ཅན་དུ་ གྱུར་པ (= *nāma-vad-bhūte*) correspond à *saṃjñibhūte*; *can* représente le suffixe *-in* — *saṃjñā* = hdu-çes-pa.

4) བགོམ་ལ་ འགྲོ་བ་ ཡོད་ན་ནི། འགྲོ་བ་ གཉིས་སུ་ ཐལ་ འགྱུར་ཏེ། གང་གིས་ དེ་ བགོམ་གྱུར་པ་ དང་། དེ་ལ་ འགྲོ་བ་ གང་ ཡིན་པའོ།།

येन गमनेन योगाद्गम्यमानव्यपदेशं प्रतिलभतेऽध्वा तदेकं गमनं । तत्र गम्यमाने-ऽधिकरणभूते[1] द्वितीयं गमनं येन सोऽध्वा गम्यते । एतद्गमनद्वयं गम्यमानस्य गमने सति प्रसक्तं ॥

भवतु गमनद्वयं ' [Tib. 37a] को दोष इति चेत् । अयं दोषो ' यस्मात् '

द्वौ गन्तारौ प्रसज्येते प्रसक्ते गमनद्वये ।

किं पुनः कारणं गन्तृद्वयप्रसङ्ग इत्याह ।

गन्तारं हि तिरस्कृत्य गमनं नोपपद्यते[2] ॥ ६

यस्मादवश्यं क्रिया स्वसाधनमपेक्षते कर्म कर्तारं वा । गमिक्रिया चैवं कर्तर्यवस्थिताऽतो गन्तारमपेक्षते । नास्ति चैकस्मिन्नेव गच्छति देवदत्ते द्वितीयः कर्तेति । अतः कर्तृद्वयाभावान्नास्ति गमनद्वयं । ततश्च गम्यमानं गम्यत इति नोपपद्यते ॥

अथ स्यात् ' यदायं देवदत्तः स्थितः [3] स न[नु] भाषते [ननु] पश्यति ' न[नु] [3] तदेको ऽनेकक्रियो दृष्टः । एवमेकस्मिन् गन्तरि क्रियाद्वयं भविष्यति । इति [28b] ॥

नैवं । शक्तिर्हि कारको न द्रव्यं ' क्रियाभेदाच्च तत्साधनस्यापि शक्तेः सिद्ध एव भेदः । न हि स्थितिक्रियया वक्ता स्यात् ॥ द्रव्यमेकमिति चेत् । भवत्वेवं ' न तु द्रव्यं

---

1) བགྲོད་པའི་ གཞིར་གྱུར་པའི་ བགོམ་པ་ དེ་ལ་: *tasmin gamyamāne gamana-āçraya-bhūte.* — གཞི = *ādhāra*, cf. ci-dessous 97. 4, 99. 11.

2) འགྲོ་བ་ གཉིས་སུ་ ཐལ་འགྱུར་ན། འགྲོ་བ་པོ་ ཡང་ གཉིས་སུ་ འགྱུར། གང་ཕྱིར་ འགྲོ་བ་མེད་པར་ ནི། གྲོ་བ་ འཐད་པར་ མི་འགྱུར་ཕྱིར།། Il faut lire *hgro-po med-par ni.*

3—3) Cette phrase manque dans la version tibétaine qui lit: *tadaikaḥ kartā. ...* -- Mss. ... *sthitaḥ sa na bhāṣate paçyati na tadaiko. ...*

कारकः[1], किं तर्हि शक्तिः, सा च भिद्यत एव। अपि च सदृशक्रियाद्वयकारकत्वं नैकदैशिकस्य[2] दृष्टं, अतो नैकस्य गन्तुर्गमनद्वयं॥

अत्राह। यद्यप्येवं तथापि गन्तरि देवदत्ते गमनमुपलभ्यते देवदत्तो गच्छतीति व्यपदेशात्, ततश्च विद्यत एव गमनं गमनाश्रयगन्तृसद्भावात्॥ उच्यते। स्यादेवं यदि गमनाश्रयो गन्ता स्यात्, [न त्वस्ति][3]। कथमित्याह [Tib. 37b]।

गन्तारं चेत्तिरस्कृत्य गमनं नोपपद्यते।
गमनेऽसति गन्ताथ कुत एव भविष्यति[4]॥ ७

गन्तारमन्तरेण निराश्रयं गमनमसदित्युक्तं, ततश्च गन्तारं चेत्तिरस्कृत्य प्रत्याख्याय गमनं नास्ति, असति गमने कुतो निर्हेतुको गन्ता। अतो नास्ति गमनं॥

अत्राह। विद्यत एव गमनं तद्वतस्तेन व्यपदेशात्। इह गन्ता गमनेन युक्तः तद्योगाच्च गच्छति। यदि गमनं न स्याद्गमनवतो देवदत्तस्य गच्छतीति व्यपदेशो न स्यात्, दण्डाभावे दण्डिव्यपदेशाभाववत्॥ उच्यते। स्याद्गमनं यदि गच्छतीत्येवं व्यपदेशः स्यात्। यस्मात्,

गन्ता न गच्छति तावदगन्ता नैव गच्छति।
अन्यो गन्तुरगन्तुश्च कस्तृतीयो हि गच्छति[5]॥ ८

---

1) Mss. *kārakam*; mais nous avons, comme plus haut, བྱེད་པ་པོ་

2) *aikadaiçika*, mot nouveau. — གཅིག་དུས་གཅིག་ཏུ་ rend la lecture douteuse (*dus* = *kāla*).

3) དེ་ནི་ མེད་དོ།

4) གལ་ཏེ་ འགྲོ་པོ་ མེད་འགྱུར་ན། འགྲོ་བ་ འཐད་པར་ མི་འགྱུར་ཏེ། འགྲོ་བ་ མེད་ན་ འགྲོ་བ་པོ། ཡོད་པ་ཉིད་དུ་ ག་ལ་ འགྱུར༎

5) རེ་ཞིག་ འགྲོ་པོ་ མི་ འགྲོ་སྟེ། འགྲོ་བ་པོ་མིན་ འགྲོ་བ་ མིན། འགྲོ་པོ་ འགྲོ་བ་མིན་ལས་ གཞན། གསུམ་པ་ གང་ཞིག་ འགྲོ་བར་འགྱུར༎

इह गच्छतीति गन्ता । स तावन्न गच्छति । यथा च न गच्छति तथोत्तरेण श्लोकत्रयेण प्रतिपादयिष्यति ॥ अगन्तापि न गच्छति । अगन्ता हि नाम यो गमिक्रियारहितः । गच्छतीति च गमिक्रियायोगप्रवृत्तः शब्दः । यश्च[29a]सावगन्ता कथं गच्छति । अथ गच्छति नासावगन्तेति ॥ तदुभयव्यतिरिक्तो गच्छतीति चेन्नैवं । को हि नाम गन्तुरगन्तुर्विनिर्मुक्तस्तृतीयोऽस्ति यो गच्छतीति कल्प्येत । तस्मान्नास्ति गमनं ॥

अत्राह । नागन्ता गच्छति नाप्युभयरहितः [Tib. 38a] । किं तर्हि गन्तैव गच्छतीति ॥ एतदप्यसत् । किं कारणं । यस्मात् ।

गन्ता तावद्गच्छतीति कथमेवोपपत्स्यते ।
गमनेन विना गन्ता यदा नैवोपपद्यते (1) ॥ ९

गन्ता गच्छतीत्यत्र वाक्य एकैव गमिक्रिया तया च गच्छतीति व्यपदिश्यते । गन्तेति तु व्यपदेशे नास्ति द्वितीया गमिक्रियेति । गमनेन विना गन्ताऽगच्छन् गन्तेति यदा न संभवति तदा गन्ता गच्छतीति न युज्यते । कामं गच्छतीत्यस्तु । गन्तेति तु न संभवतीति तदयुक्तं ॥

अथ गतियोगात्सगतिक एव गन्ता ॥ तथापि द्वितीयगमिक्रियाभावाद्गच्छतीति व्यपदेशो न स्यादित्याह ।

पक्षो गन्ता गच्छतीति यस्य तस्य प्रसज्यते ।
गमनेन विना गन्ता गन्तुर्गमनमिच्छतः (2) ॥ १०

---

1) གང་ཚེ་ འགྲོ་བ་ མེད་པར་ནི། འགྲོ་བོ་ འཐད་པར་ མི་འགྱུར་ ན། རེ་ཞིག་ འགྲོ་བོ་ འགྲོའོ་ ཞེས། ཇི་ལྟར་ འཐད་པ་ཉིད་དུ་ འགྱུར།།

2) གང་གི་ ཕྱོགས་ལ་ འགྲོ་བ་པོ། འགྲོ་བ་ དེ་ལ་ འགྲོ་མེད་པའི། འགྲོ་བོ་ ཡིན་པར་ ཐལ་འགྱུར་ཏེ། འགྲོ་བོ་ འགྲོ་བར་ འདོད་ཕྱིར་རོ།།

यस्य वादिनो गमिक्रियायोगादेव गन्तेति यतः । तस्य गन्तुर्गमनमिच्छतः स[गमन](1)-गन्तृव्यपदेशाद्गमनेन विना गन्ता गच्छतीति स्यात् । द्वितीयगमिक्रियाभावात् । (2)अतो गन्ता गच्छतीति न युज्यते । गच्छतीत्येतस्यार्थे गन्तेतिशब्दो गमनेन विना गन्तेत्यत्र वाक्ये(3) ॥

अथोभयत्रापि गतियोग इष्यते गन्ता गच्छतीति । एवमपि ।

गमने द्वे प्रसज्येते गन्ता यद्युत गच्छति ।
गन्तेति चोच्यते येन गन्ता सन्यच्च गच्छति(4) ॥ ११

येन गमनेन [Tib. 38b] योगाद्गन्तेत्युच्यते व्यपदिश्यते तदेकं गमनं । गन्ता भवन् यच्च गच्छति यां [29b] च गतिक्रियां करोति । तदेतद्गमनद्वयं प्रसक्तं । अतो गन्तृद्वयप्रसङ्ग इति पूर्ववद्दूषणं वक्तव्यं । तस्मान्नास्ति गच्छतीति व्यपदेशः ॥

अत्राह । यद्यप्येवं तथापि देवदत्तो गच्छतीति व्यपदेशसद्भावाद्गमनमस्तीति ॥

नैवं । यस्माद्देवदत्ताश्रयैवैषैव चिन्ता(5) किमसौ गन्ता सन् गच्छति उतोऽगन्ता गच्छति तद्व्यतिरिक्तो वेति सर्वथा च नोपपद्यत इति यत्किं चिदेतत् ॥

अत्राह । विद्यत एव गमनं तदारम्भसद्भावात् । इह देवदत्तः स्थित्युपमर्देन गमन-

1) འགྲོ་བ་པོའི་ བརྗོད་པ་ འགྲོ་བ་དང་བཅས་པས་

2) Camb. *ato ga yantā gacchatīti na yujyate. gacchatīti na yujyate. gacchatīti etasyārthe....* Paris, Calc. *ato gacchatīti na yujyate.*

3) C'est-à-dire: dans la phrase *gamanena vinā gantā*, le mot *gantā* a le sens de ce mot *gacchati* (de la phrase *gantā gacchati*).

4) གལ་ཏེ་ འགྲོ་པོ་ འགྲོ་ འགྱུར་ན། འགྲོ་བ་ གཉིས་སུ་ ཐལ་འགྱུར་ཏེ། གང་ག[ས་] འགྲོ་པོར་ མངོན་པ་ དང་། འགྲོ་པོར་གྱུར་ནས་ གང་ འགྲོ་བའི།།

5) Mss. °*āçrayaiva naiva cintā* = དཔྱད་པ་ འདི་ཉི་.

मारभते । न चाविद्यमानकूर्मरोम[1]प्रावारादिकमारभते ॥ उच्यते । स्याद्गमनं यदि तदारम्भ एव स्याद्यस्मात् '

गते नारभ्यते गन्तुं गन्तुं नारभ्यतेऽगते ।
नारभ्यते गम्यमाने गन्तुमारभ्यते कुह[2] ॥ १२

यदि गमनारम्भो भवेत्तद्गते वाध्वन्यारभ्येत ' [अगते वा] ' गम्यमाने वा ॥ तत्र गते गमनं नारभ्यते ' तद्धि नामोपरतगमिक्रियं । यदि तत्र गमनमारभ्येत तद्गतमित्येवं न स्यादतीतवर्तमानयोर्विरोधात् ॥ अगतेऽपि गमनं नारभ्यते ऽनागतवर्तमानयोर्विरोधात् ॥ नापि गम्यमाने तदभावात् क्रियाद्वयप्रसङ्गात् [Tib. 39 a] कर्तृद्वयप्रसङ्गाच्च ॥ तदेवं सर्वत्र गमनारम्भमपश्यन्नाह ' गन्तुमारभ्यते कुहेति ॥

यथा च गमनं न संभवति तथा प्रतिपादयन्नाह ।

[न पूर्वं][3] गमनारम्भाद्गम्यमानं न वा गतं ।
यत्रारभ्येत गमनमगते गमनं कुतः[4] ॥ १३

इह देवदत्तो यदावस्थित आस्ते स तदा गमनं नारभते । तस्य गमनारम्भात्पूर्वं न गम्यमानमध्वजातमस्ति न च गतं यत्र गमनमारभ्येत । तस्माद्गतगम्यमानाभावादेन-

1) རུས་སྦལ་གྱི་ སྤུ་ ཡོད་པ་མ་ཡིན་པའི་ གོས་. — Mss. *pravārya*, *pracārya* — *pravāra* = *wollenes Zeug (P. W) = an upper or outergarment usually of cotton — Même comparaison VIII, au début; XI. 2, XVII. 25 (variante *prāvaraṇa*). Voir Bṛhadāraṇyakopaniṣadbhaṣyav., p. 475, v. 240; p. 1488, v. 624; Khaṇḍanakhaṇḍakhādya, p. 726 (Communiqué par M. G. A. Jacob).

2) སོང་ལ་ འགྲོ་བའི་ རྩོམ་ མེད་དེ། མ་སོང་བ་ལ་ འང་ འགྲོ་རྩོམ་ མེད། བགོམ་ལ་ བརྩོམ་པ་ ཡོད་མིན་ན། གང་དུ་ འགྲོ་བ་ རྩོམ་པར་བྱེད།།

3) Mss. *agasti gamanārambhāt*.

4) འགྲོ་བ་ རྩོམ་པའི་ སྔ་རོལ་ན། གང་དུ་ འགྲོ་བ་ རྩོམ་འགྱུར་པ། བགོམ་པ་ མེད་ཅིང་ སོང་བ་ མེད། མ་སོང་ འགྲོ་བ་ ག་ལ་ ཡོད།།

योर्न गमनारम्भः ॥ अथ स्याद्यद्यपि [30a] गमनारम्भात्पूर्वं न गतं न गम्यमानं तथाप्यगतमस्ति ' तत्र गमनारम्भः स्यादिति ॥ उच्यते । अगते गमनं कुतः । अनुपजातगमिक्रिगमनारब्धगमिक्रियमगतं । तत्र गमनारम्भ इत्यसंबद्धमेतदित्याह ' अगते गमनं कुत इति ॥

यद्यपि गतागतगम्यमानेषु गमनारम्भो नास्ति ' गतागतगम्यमानानि तु सन्ति । न चासति गमने एतानि युज्यन्त इति ॥ उच्यते । स्याद्गमनं यद्येतान्येव स्युः । सति हि गमिक्रियाप्रारम्भे यत्रोपरता गमिक्रिया तद्गतमिति परिकल्प्येत ' यत्र वर्तमाना तद्गम्यमानं ' यत्राजाता तदगतमिति । यदा तु गमिक्रियाप्रारम्भ एव नास्ति ' तदा

गतं किं गम्यमानं [Tib. 39b] किमगतं किं विकल्प्यते ।
अदृश्यमान आरम्भे गमनस्यैव सर्वथा[1] ॥ १४

प्रारम्भेऽनुपलभ्यमाने किं मिथ्याध्वत्रयं परिकल्प्यते ' कुतो वा तद्व्यपदेशकारणं गमनमित्ययुक्तमेतत् ॥

अत्राह । विद्यत एव गमनं तत्प्रतिपक्षसद्भावात् । यस्य च प्रतिपक्षोऽस्ति तदस्ति ' आलोकान्धकारवत् पारावारवत् संशयनिश्चयवच्च । अस्ति च गमनस्य प्रतिपक्षः स्थानमिति ॥ उच्यते । स्याद्गमनं यदि तत्प्रतिपक्षः स्थानं स्यात् । कथमिहेदं स्थानं गन्तुरगन्तुस्तदन्यस्य वा परिकल्प्येत ' सर्वथा च न युज्यत इत्याह ।

गन्ता न तिष्ठति तावदगन्ता नैव तिष्ठति ।
अन्यो गन्तुरगन्तुश्च कस्तृतीयोऽथ तिष्ठति[2] ॥ १५

---

1) འགྲོ་རྩོམ་ རྣམ་པ་ཐམས་ཅད་དུ། སྣང་བ་ མེད་པ་ཉིད་ཡིན་ན། སོང་བ་ ཅི་ཞིག་ བགོམ་པ་ ཅི། མ་སོང་ ཅི་ཞིག་ རྣམ་པར་བརྟག།

2) རེ་ཞིག་ འགྲོ་པོ་ མི་ སྡོད་དེ། འགྲོ་བ་པོ་མིན་ སྡོད་པ་ མིན། འགྲོ་པོ་ འགྲོ་པོ་ མིན་ལས་ གཞན། གསུམ་པ་ གང་ཞིག་ སྡོད་པར་འགྱུར།

यथा गन्ता न तिष्ठति तथोत्तरेण श्लोकेनाख्यास्यति ॥ अगन्तापि न तिष्ठति ' स हि तिष्ठत्येव ' तस्य किमपरया स्थित्या प्रयोजनं । एकया स्थित्याऽगन्ता अपरया तिष्ठतीति स्थितिद्वयप्रसङ्गात् स्थातृद्व[30b]यप्रसङ्ग इति पूर्ववद्दोषः ॥ गन्त्रगन्तृव्यतिरिक्तश्चान्यो नास्ति ॥

अत्राह । नागन्ता तिष्ठति ' नापि गन्तुरगन्तुश्चान्यः ' किं तर्हि गन्तैव तिष्ठतीति ॥ नैवं ' यस्मात् ।

गन्ता तावत्तिष्ठतीति कथमेवोपपत्स्यते । [Tib. 40a]
गमनेन विना गन्ता यदा नैवोपपद्यते[(1)] ॥ १६

यदायं तिष्ठतीत्युच्यते तदा स्थितिविरोधि गमन[म]स्य नास्ति ' विना च गमनं गन्तृव्यपदेशो नास्ति । अतो गन्ता तिष्ठतीति नोपपद्यते ॥

अत्राह । विद्यत एव गमनं [त]न्निवृत्तिसद्भावात् । इह गतेर्निवर्तमानः स्थितिमारभते । गमनाभावे तु न ततो निवर्तेत ॥ उच्यते । स्याद्गमनं यदि तन्निवृत्तिरेव स्यात् । [न त्वस्ति][(2)] यस्मात् ।

न तिष्ठति[(3)] गम्यमानान्न गतान्नागतादपि ।

तत्र गन्ता गतादध्वनो [न] निवर्तते गत्यभावात् ' अगतादपि गत्यभावादेव । गम्यमानादपि न निवर्तते तदनुपलब्धेर्गमिक्रियाभावाच्च । तस्मान्न गतिनिवृत्तिः ॥

---

1) གང་ཚེ་ འགྲོ་བ་མེད་པར་ ནི། འགྲོ་བོ་ འཐད་པར་ མི་འགྱུར་ ན། རེ་ཞིག་ འགྲོ་བོ་ སྡོད་དོ་ ཞེས། ཇི་ལྟར་ འཐད་པ་ཉིད་དུ་འགྱུར། ‖

2) དེ་ནི་མེད་དོ. Peut-être avons-nous tort de rétablir dans le texte cette formule qui va de soi.

3) La lecture *na tiṣṭhati* est démentie par le tibétain *ldog-pa* qui correspond à *nivartate* de notre commentaire. Il est difficile d'introduire la négation (*na nivartate gamyamānāt*); mais la syntaxe des Kārikās ne l'exige pas impérieusement. — Voir ci-dessous p. 104. 3. 15.

अत्राह । यदि गमनप्रतिद्वन्द्विस्थित्यभावाद्गतिरसती ' एवं तर्हि गमनप्रसिद्धये स्थितिं साधयामस्तत्सिद्धौ गमनसिद्धिः । तस्माद्विद्यत एव स्थानं प्रतिद्वन्द्विसद्भावात् ' स्थितेर्हि प्रतिद्वन्द्वि गमनं ' तदस्ति ' ततश्च स्थितिरपि प्रतिद्वन्द्विसद्भावात् ॥ एतदप्ययुक्तं ' यस्मात् ।

[गमनं] सं[प्र]वृत्तिश्च निवृत्तिश्च गतेः समा (1) ॥ १७

अत्र हि यद्गमनं स्थितिसिद्धये वर्णितं तद्गत्या समं गतिदूषणेन तुल्यमित्यर्थः । यथा गन्ता न तिष्ठति तावदित्यादिना गतिप्रसिद्धये स्थितेर्हेतुत्वेनोपात्तायाः [Tib. 40b] दूषणमुक्तं ' एवमिहापि स्थितिप्रसिद्धये गमन[स्य] हेतुत्वेनोपात्त[स्य] स्थाता (2) न गच्छति तावदित्यादिना श्लोकद्वयपाठपरिवर्तेन (3) दूषणं वक्त[31a]व्यमिति नास्ति गमनं ' तदभावात्प्रतिद्वन्द्विनी स्थितिरपीति । एवं तावद्गमनं गत्या तुल्यं प्रत्याख्येयं ॥

अथ स्यात् ' विद्यत एव स्थानं तदारम्भसद्भावात् । इह गत्युपमर्देन स्थानमारभ्यते ' कथं तन्न स्यात् ॥ उच्यते । संप्रवृत्तिश्च (4) गतेः समा वाच्या । तत्र यथा पूर्वं गते नारभ्यते गन्तुमित्यादिना (5) गमनारम्भो निषिद्धः ' एवमिहापि '

स्थिते नारभ्यते स्थातुं स्थातुं नारभ्यतेऽस्थिते ।
नारभ्यते स्थीयमाने स्थातुमारभ्यते कुह ॥ (6)

---

1) བཀག་ལས་ ལྡོག་པར་ མི་འགྱུར་ཏེ། སོད་ དང་ མ་སོད་ལས་ ཀྱང་ མིན། འགྲོ་བ་ དང་ ནི་ འཇུག་པ་ དང་། ལྡོག་པ་ ཡང་ ནི་ འགྲོ་ དང་ མཚུངས།།

2) Böhtlingk: Nom. masc. nicht belegt.

3) C'est-à-dire: *sthātā na gacchati tāvad asthātā naiva gacchati, anyaḥ sthātur asthātuç ca kas tṛtīyo 'tha gacchati*; *sthātā tāvad gacchatīti katham evopapatsyate, sthānena (?) vinā sthātā yadā naivopapadyate.*

4) = *sthānasaṃpravṛtti*, voir ci-dessous p. 104. 1.

5) II. 12.

6) Ce sūtra, comme ceux qui suivent (p. 104. 8 etc.), pas plus que ceux que nous avons restitués dans une note précédente, ne compte parmi les *kārikās* telles que la version tibétaine du Mūlamadhyamaka et le colophon nous les font connaître.

इत्यादिना श्लोकत्रयपरिवर्तेन स्थानसंप्रवृत्तिरपि गतेः समा ॥ स्थाननिवृत्तिरपि गतिनिवृत्त्या समा प्रत्याख्येया । यथा गतिनिषेधे '

न तिष्ठति[(1)] गम्यमानान्न गतान्नागतादपि '

इति गतेर्दूषणमुक्तं ' एवं स्थितिनिषेधेऽपि '

न गच्छति[(1)] स्थीयमानान्न स्थितान्नास्थितादपि ।

इति गत्या तुल्यं [Tib. 41a] दूषणमिति नास्ति स्थितिः । तदभावात्कुतो गतिप्रतिपक्षस्थितिसद्भाववादिनां गतेः सिद्धिरिति ॥

अपि च यदि गमनं स्याद्गन्तृव्यतिरेकेण वा स्यादव्यतिरेकेण वा । सर्वथा च विचार्यमाणं न संभवतीत्याह ।

यदेव गमनं गन्ता स एवेति न युज्यते ।
अन्य एव पुनर्गन्ता गतेरिति न युज्यते ॥[(2)] १८

कथं पुनर्न युज्यत इत्याह ।

यदेव गमनं गन्ता स एव हि भवेद्यदि ।
एकीभावः प्रसज्येत कर्तुः कर्मण एव च ॥[(3)] १९

येयं गमिक्रिया सा यदि गन्तुरव्यतिरिक्ता नान्या स्यात् ' तदा कर्तुः क्रियायाश्चैकत्वं स्यात् ' ततश्चेयं क्रियायं कर्तेति विशेषो न स्यात् । न च छिदिक्रियायाश्छेत्तुश्चैकत्वं[(4)] । अतो यदेव गमनं स एव गन्तेति न युज्यते ॥

---

1) Le traducteur tibétain a lu *na nivartate* = ལྡོག་པར་ མི་ འགྱུར

2) འགྲོ་བ་ དེ་ དང་ འགྲོ་བ་པོ། དེ་ཉིད་ ཅེས་ ཀྱང་ བྱར་ མི་ རུང་། འགྲོ་བ་ དང་ ནི་ འགྲོ་བ་པོ། གཞན་ཉིད་ ཅེས་ ཀྱང་ བྱར་ མི་ རུང་།།

3) གལ་ཏེ་ འགྲོ་བ་ གང་ ཡིན་པ། དེ་ཉིད་ འགྲོ་པོ་ ཡིན་འགྱུར་ན། བྱེད་པ་པོ་ དང་ ལས་ཉིད་ ཀྱང་། གཅིག་པ་ཉིད་དུ་ ཐལ་བར་འགྱུར།།

4) Mss. *chidi°*, *chedikriyā*. — Dhātup. 7. 3: *chidir dvaidhīkaraṇe*.

अन्यत्वमपि गन्तृगमनयोर्यथा नास्ति तथा प्रतिपादयन्नाह ।

अन्य एव पुनर्गन्ता गतेर्यदि विकल्प्यते ।
गमनं स्यादृते गन्तुर्गन्ता स्याद्गमनादृते [1] ॥ २०

यदि हि गन्तृगमन[31 b]योरन्यत्वं स्यात् ' तदा गमननिरपेक्षो गन्ता स्यात् ' गन्तृनिरपेक्षं च गमनं गृह्येत पृथक्सिद्धं घटादिव पटः । न च गन्तुः पृथक्सिद्धं गमनं गृह्यत इति । अन्य एव पुनर्गन्ता गतेरिति न युज्यत इति प्रसाधितमेतत् ॥ तदेवं ।

एकीभावेन [Tib. 41 b] वा सिद्धिर्नानाभावेन वा ययोः ।
न विद्यते तयोः सिद्धिः कथं नु खलु विद्यते [2] ॥ २१

ययोर्गन्तृगमनयोर्यथोदितेन न्यायेन एकीभावेन वा नानाभावेन वा नास्ति सिद्धिः ' तयोरिदानीं केनान्येन प्रकारेण सिद्धिरस्तु । अत आह ' तयोः सिद्धिः कथं नु खलु विद्यत इति । नास्ति गन्तृगमनयोः सिद्धिरित्यभिप्रायः ॥

अत्राह । इह देवदत्तो गन्ता गच्छतीति लोकप्रसिद्धं ' तत्र यथा वक्ता वाचं भाषते कर्ता क्रियां करोतीति प्रसिद्धं ' एवं यया गत्या गन्तेत्यभिव्यज्यते तां गच्छतीति न यथोक्तदोषः ॥ तदप्यसत् । यस्मात् ।

गत्या ययोच्यते गन्ता गतिं तां स न गच्छति ।

---

1) གལ་ཏེ་ འགྲོ་ དང་ འགྲོ་བ་པོ། གཞན་པ་ཉིད་དུ་ རྣམ་བརྟགས་ན། འགྲོ་པོ་མེད་པའི་ འགྲོ་བ་ དང་། འགྲོ་བ་མེད་པའི་ འགྲོ་པོར་ འགྱུར།།

2) གང་དག་ དངོས་པོ་ གཅིག་པ་ དང་། དངོས་པོ་ གཞན་པ་ཉིད་དུ་ ནི། གྲུབ་པར་གྱུར་པ་ ཡོད་མིན་ན། དེ་ཉིད་ གྲུབ་པ་ ཇི་ལྟར་ ཡོད།། Cité ci-dessus p. 64. 8.

यथा गत्या देवदत्तो गन्तेत्यभिव्यज्यते ' स गन्ता संस्तां[ ] [1][तां]वन्न गच्छति न प्राप्नोति यदि वा न करोतीत्यर्थः।

यस्मान्न गतिपूर्वोऽस्ति।

गतेः पूर्वो गतिपूर्वः। यदि गन्ता गतेः पूर्वं सिद्धः स्यात् ' स तां गच्छेत्[2]। कथं। यस्मात् '

[3]कश्चित् किं चिद्धि गच्छति[4] ॥ २२

कश्चिद्देवदत्तः किं चिदर्थान्तरभूतं ग्रामं नगरं वा गच्छतीति दृष्टं। न चैवं यया गत्या गन्तेत्युच्यते तस्याः पूर्वं सिद्धरूपो गतिनिरपेक्षो गन्ता नामास्ति यस्तां गच्छेत् ॥

अथ मन्यसे यया गत्या गन्तेत्यभिव्यज्यते तामेवासौ न गच्छति ' किं तर्हि ततोऽन्यां गतिमिति ॥ एतदप्ययुक्तं यस्मात् '

गत्या ययोच्यते गन्ता [Tib. 42a] ततोऽन्यां [32a] स न गच्छति।
गती द्वे नोपपद्येते यस्मादेके प्रगच्छति[5] ॥ २३

1) དེ་ནི་ འགྲོ་བ་ མ་ ཡིན་ཏེ་ — Le traducteur tibétain a lu: ..*vyajyate sa tāṃ na gacchati na prāpnoti.*

2) དེ་ དེར་ འགྲོ་བར་ འགྱུར་ཞིག་གོ །ཇི་ལྟར་ ཞེ་ན། གང་གི་ཕྱིར། གང་ཞིག་ གང་དུ་ འགྲོ་བར་ འགྱུར།

3) *kaṁ* d'après les Mss.

4) འགྲོ་བ་ གང་གིས་ འགྲོ་བར་ མངོན། འགྲོ་བ་ དེ་ནི་ དེ་ འགྲོ་མིན། གང་ ཕྱིར་ འགྲོ་བའི་ སྔ་རོལ་ མེད། གང་ཞིག་ གང་དུ་ འགྲོ་བར་འགྱུར།།

5) འགྲོ་བ་ གང་གིས་ འགྲོ་བར་ མངོན། དེ་ལས་ གཞན་པ་ དེ་ འགྲོ་ མིན། གང་ཕྱིར་ འགྲོ་བ་ གཅིག་ པུ་ལ། འགྲོ་བ་ གཉིས་སུ་ མི་ འཐད་དོ།།

यया गत्या गन्ताभिव्यज्यते ततोऽन्यामपि स गन्ता सन्न गच्छति । गतिद्वयप्रसङ्गात् । यया गत्या गन्ताभिव्यज्यते गन्ता सन् यां चापरां गच्छतीत्येतद्गतिद्वयं प्रसक्तं । न चैकस्मिन् गन्तरि गतिद्वयमित्ययुक्तमेतत् । एतेन वक्ता वाचं भाषते कर्ता क्रियां करोतीति प्रत्युक्तं[1] ॥

तदेवं ।

सद्भूतो गमनं गन्ता त्रिप्रकारं न गच्छति ।
नासद्भूतोऽपि गमनं त्रिप्रकारं स गच्छति[2] ॥ २४
गमनं [सद्]सद्भूतः त्रिप्रकारं न गच्छति ।

तत्र गम्यत इति गमनमिहोच्यते । तत्र सद्भूतो गन्ता यो गमिक्रियायुक्तः । असद्भूतो गन्ता यो गमिक्रियारहितः । सदसद्भूतो य उभयपक्षीयरूपः[3] । एवं गमनमपि त्रिप्रकारं गमिक्रियासंबन्धेन वेदितव्यं ॥ तत्र सद्भूतो गन्ता सद्भूतमसद्भूतं सदसद्भूतं त्रिप्रकारं गमनं न गच्छति । एतच्च कर्मकारकपरीक्षायामाख्यास्यते[4] । एवमसद्भूतोऽपि गन्ता त्रिप्रकारं गमनं न गच्छति । सदसद्भूतोऽपीति तत्रैव प्रतिपादयिष्यति । यतश्चैवं गन्तृगन्तव्यगमनानि विचार्यमाणानि न सन्ति ।

तस्माद्गतिश्च गन्ता च गन्तव्यं च न [Tib. 42b] विद्यते[5] ॥ २५

---

1) Paris, Calc. *prayuktam*; Camb. *pratyayuktam*. Tib. དགག་པ་ཡིན་ནོ

2) འགྲོ་བོ་ ཡིན་པར་གྱུར་པ་ནི། འགྲོ་ རྣམ་གསུམ་དུ་ འགྲོ་ མི་ བྱེད། མ་ཡིན་པར་ནི་གྱུར་ དེ་ ཡང་། འགྲོ་ རྣམ་གསུམ་དུ་ འགྲོ་མི་བྱེད།།

3) Mss. °*pakṣeyarūpa*.

4) Chapitre VIII.

5) ཡིན་དང་མ་ཡིན་གྱུར་པ་ ཡང་། འགྲོ་ རྣམ་གསུམ་དུ་ འགྲོ་ མི་བྱེད། དེ་ཕྱིར་ འགྲོ་ དང་ འགྲོ་བོ་ དང་། བགྲོད་པར་བྱ་བ་ ཡོད་མ་ཡིན།།

यथोक्तमार्याक्षयमतिनिर्देशसूत्रे[1]। अगतिरिति भदन्त शारद्वतीपुत्र संकर्षणापदमेतत्। गतिरिति भदन्त शारद्वतीपुत्र निष्कर्षणापदमेतत्। यत्र न संकर्षणापदं न निष्कर्षणापदं तदार्याणां पदमपदयोगेन अनागतिरगतिश्चार्याणां गतिरिति॥

यदि बीजमेवाङ्कुरे संक्रमति[2] बीजमेव तत्स्यान्न यदङ्कुरः शाश्वतदोषप्रसङ्गश्च। अथाङ्कुरोऽन्यत आगच्छति [32b] अहेतुकदोषप्रसङ्गः स्यान्न चाहेतुकस्योत्पत्तिः खरविषाणस्येव॥

अत एवाह भगवान्।

बीजस्य सतो यथाङ्कुरो न च यो बीजु स चैव अङ्कुरो।
न च अन्यु ततो न चैव तदेवमनुच्छेद अशाश्वत धर्मता॥ इति[3]
मुद्रात्प्रतिमुद्र दृश्यते मुद्रसंक्रान्ति न चोपलभ्यते।
न च तत्र न चैव सान्यतो एवं संस्कार ऽनुच्छेदशाश्वताः॥ इति [च][4]।

तथा[5]।

आदर्शपृष्ठे तथ तैलपात्रे निरीक्षते नारिमुखंमलंकृतं[6]।

---

1) ''' བསྟན་པའི་མདོ. Sur le °*nirdeçasūtra*, voir Çikṣās. 278. 4 et sources citées p. 11, n. 6.

2) Je conserve la lecture des Mss., confirmée par M. Vyut. 223. 15. 16 et Bodhic. p. ad II. 9 *pūrvaṃ ca pāpaṃ samatikramāmi· ...samatikramāmīty uktaṃ çābdavyavahāreṣv anādarāt.* — Sur la *saṃkrānti*, voir le fragment Çālistambasūtra cité J. As. 1902, II, p. 272 n. 2, ci-dessus p. 25 n. 3. Le mot *saṃkrāmati* est employé dans Mhv. (I. 442) pour marquer le passage d'une *bhūmi* à une autre.

3) = Lalitav. 210. 4—5; voir ci-dessus p. 26, n. 4.

4) = Lalitav. 210. 8—9; cité Bodhic. ṭ 342. 3 et Çikṣās. 229. 3 dont nous adoptons la lecture et l'interprétation métrique (à un détail près: *saṃskāra 'nucchedaçāçvatāḥ* au lieu de *saṃskār ' ānūched 'āçāçvatāḥ*). — *anyato* correspond au tibétain གཞན་ལ་ (= *anyatra*), དེ་ལ་ = *tatra*. On n'aperçoit la *mudrāsaṃkrānti* ni dans le cachet, ni dans l'empreinte.

5) Ces deux stances (citées Chap. XXIII, *ad fin.*) sont extraites du Samādhirāja, p. 29. 4—9 de l'edition de la B. T. S.

6) *nārimukhamm alaṃkṛtam*, lecture correcte. Le *m* est doublé *metri causa* d'après l'analogie du redoublement de *n* en sanscrit après voyelle brève et devant voyelle (Observation de M. Kern).

सो तत्र रागं जनयित्व बालो[(1)] प्रधावितो कामि गवेषमाणो ॥
मुखस्य संक्रान्ति यदा[(2)] न विद्यते बिम्बे मुखं नैव कदाचि लभ्यते ।
मूढो[(3)] यथा सो जनयेत रागं तथोपमान् जानथ सर्वधर्मान् ॥ इति ।

तथा [समाधिराजसूत्रे[(4)] ऽपि] ।

तस्मि कालि सो दशबलो [अ]नघो
जिनु भाषते इमु समाधिवरं[(5)] ।
सुपिनोपमा भवगती[(6)] सकला
न हि कश्चि[(7)] जायति न चो[(8)] म्रियते ॥

न च सत्त्वु लभ्यति न जीवु नरो
इमि धर्म[(9)] फेनकदलीसदृशाः [Tib. 43a] ।
मायोपमा गगनविद्युसमा
[(10)]दकचन्द्रसंनिभ मरीचिसमाः ॥

---

1) Les Mss. portent *bālā.*

2) དེར་ = *tatra.*

3) རྨོངས་པ་དེ་དག ··· = *mūḍhā yathaite janayanti rāgam.*

4) Cette indication est fournie par le tibétain; d'ailleurs les stances qui suivent sont répétées au cours du traité (Chap. IX, XXI, XXIII *ad fin.*) et la source est quelquefois nommée.

Metre: ⏑⏑–⏑–⏑⏑⏑⏑–⏑–

5) Variante: *bala*; mais Tib. མཆོག་

6) Mss. *bhagavatī*; mais Tib. སྲིད་པའི་འགྲོ་བ་ — *sakalā* n'est pas traduit.

7) འདི་ལ་ = *atra.*

8) Mss. *ca, vo, co.*

9) Mss. *imu, imi, dharma, dharmi.*

10) *daka* = *udaka*, voir *(u)daka*, *(a)raṇya*, *(a)sau* (?), Çikṣās. 57. 2, 204. 15, 329. 13; Mhv. I. 463. 4.

न च अस्मि लोकि मृतु कश्चि नरो
परलोक संक्रमति गच्छति वा ।
न च कर्म नश्यति कदा चि कृतं
(1) फलु देति कृष्णशुभ संसरतो ॥

न च शाश्वतं न च उच्छेद (2) पुनो
न च कर्मसंचयु (3) न चापि स्थितिः
न च सो पि कृत्व पुनरास्पृशति (4)
न च अन्यु (5) कृत्व पुन वेदयते ॥

न च संक्रमो न च पुनागमनं
न च सर्वमस्ति न च नास्ति पुनः ।
न च दृष्टिस्थान (6) गतिशुद्धिरिह (7)
न च सत्व चारसुपशान्तगति (8) ॥

---

1) = *phalaṁ dadāti.* — Mss. *phaludeti*, *phaladevi*; Tib. འབྲས་བུ་ སྨིན་ = *phalavipākaḥ*.

2) *puno* (= *punar*) n'est pas traduit dans le tibétain.

3) = བསགས་

4) *ā-sparç.* = leicht berühren (Böhtlingk).

5) Mss. *anyu kṛtva*, *kṛtya.* — Le tibétain a བྱས་པ་, *anyakṛtam* (opposé à བྱས་ནས་ de la ligne précédente).

6) *dṛṣṭisthāna*°.

7) Mss. *ihā*, *iho* = འདི་ན.

8) Mss. *coru*°. — Tib. སེམས་ཅན་ དཔྱོད་པ་ རབ་ཞི་ འཇིག་པ་ མེད། = *na sattvavicārapraçāntigatiḥ*. — དཔྱོད་པ་ (d'après Foucaux) = *carca*, donné par les lexiques comme équivalent à *carcā* = Besprechung, Unterredung (Böhtlingk).

सुपिनोपमं क्हि तिभवं वसिकं (1)
लघुभग्नम······ मायस[33a]मं (2) ।
न च ग्रागतं न च इक्होपगतं
शून्यानिमित्त सद संततियो (3) ॥

[illegible] धात [illegible]मित्तपदं
सुगतान गो[illegible] जिना[illegible] गुणा (6) ।
बल धारणी द[illegible]
(8) बुद्धानियं वृषभिता पर[illegible]

---

1) = *vaçika* = vide = སྙིང་པོ་མེད = *asāra.*

2) Mss. °*bhagnamanityena m*° མྱུར་དུ་ འཇིག་ཅིང་ མི་རྟག་ སྒྱུ་མ་བཞིན = *laghubhanguram anityaṃ māyāsamam* = *laghubhanguramm anıca m*°??

3) Mss. *saṃtetiyo.* Tib. རྒྱུན་རྣམས་ རྟག་ཏུ་ སྟོང་ཞིང་ མཚན་མ་ མེད་ = *saṃtatayaḥ sadā çūnyā evānimittāḥ.*

4) Scandez: *anŭpăda.*

5) Mss. *sugatānu, jinānu*; Tib. རྒྱལ་བའི་ ཡོན་ཏན་ justifie la lecture *jinānāṃ* (*jinasya?*) *guṇāḥ.*

6) Cette ligne, dans le tibétain, est la première de la stance.

7) སྟོབས་ དང་ གཟུངས་ རྣམས དང་ ནི་ སྟོབས་བཅུའི་ སྟོབས་ = *balaṁ dhāraṇyaç caiva daçabalabalaṁ ca.* — Je suppose que l'indice du pluriel *rnams* devrait suivre le mot *stobs-bcu* (*daçabala*).

8) = *buddhān ' iyam* = *buddhānām iyam* = འདི་ ནི་ སངས་རྒྱས་

[1] वरशुक्लधर्मगुणसंनिचयो

गुण[2]ज्ञानधारणिबलं परमं ।

ऋद्धो[3]विकुर्वणविधिः[4] परमो

वरपञ्चभिज्ञप्रतिलाभनयः। इति विस्तरः॥

इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ गतागतपरीक्षा नाम द्वितीयं प्रकरणं [Tib. 43b] ॥

---

1) Mss. vanaçukla, caraçukla, [illegible]çukla.

2) [illegible] gunaḥ [illegible]

3) [illegible] བསྒྱུར་བ་ Vgl. Mhv. I. 425

4) [illegible] — བྱ་བ་

[illegible]RECTIONS.

[[illegible]isoire.]

P. 1	[illegible]	
» 3, n. 2	[illegible]	
» 4, » 6	[illegible]	
» 5, » 1	» [illegible]	
» 13, » 2	» M. V[illegible]	
» 15, » 6	» 21.8 au [illegible]	
» 1	Ajoutez 36.13	
» 2	» Cf. 38.12–39.1	
» 4	Lire 23.4 au lieu de 14.5	
» 9	» 18.7, 21.13 au lieu de 11.14, 13.5	
» 20, l. 2	» *tatra hi tad ity anena*	
» 27, n. 5 in fine	» *gagana*	
» 32, notes, ligne 3	» *intéressante*	
» 35, l. 9	» *svārthānumāne*	
n. 2, l. 9	» *a hetu*; l. 11, référence inexacte.	
» 36, titre	» *pratyayaparīkṣā*	
» 47, n. 5	» plutôt: [*nirmitau*]	
» 50, » 1	» °*aṅudarçana*	
» 52, » 3	» *chandaḥ*	
» 63, l. 7	» °*çyanāsmṛty*°	
» 9	» *syād abhedena*	
» 64, n. 3, l. 5	» *kāraṇam*	
» 75, » 6	Ajoutez: Voir 65.3, 71 n. 1	

III.

चक्षुरादीन्द्रियपरीक्षा नाम तृतीयं प्रकरणं

[redacted] च गन्तव्यं च न विद्यते । तथापि प्रवचनसिद्ध्यपेक्षया[1] [redacted] र्म उच्यते ।

[redacted]

इन्द्रियाणि षडेतेषां [redacted] ॥ १

तस्मात्सन्ति दर्शनादीनि स्वभावत इति ॥ उच्यते । न [redacted] पश्य-न्तीति दर्शनं चक्षुः । तस्य च रूपं विषयत्वेनोपदिश्यते । यथा दर्शनं रूपं न पश्यति तथा प्रतिपादयन्नाह ।

स्वमात्मानं दर्शनं हि तत्तमेव न पश्यति ।[4]
न पश्यति यदात्मानं कथं द्रक्ष्यति तत्परान् ।[5] २

---

1) *pravacana* = l'Écriture. — Rājendralāla Mitra a traduit le commencement de ce chapitre dans Buddhist Nep. Lit. p. 170.

2) ལྟ་ དང་ ཉན་ དང་ སྣོམ་པ་ ལ་། མྱོང་བར་བྱེད་ དང་ རེག་བྱེད་ ཡིད། དབང་པོ་ དྲུག་ སྟེ་ དེ་དག་གི ། སྤྱོད་ཡུལ་ བལྟ་བར་བྱ་ལ་སོགས།། Mdo XVII: *byed-la-sogs.*

3) འདིར་ མིག་ ནི་ ལྟ་བས་ན་ ལྟ་བར་བྱེད་པ་ ཡིན་ལ་ = *iha cakṣur eva darçanāt paçyatīti.*

4) Mss. *sva ātmānam.... tattem eva...*; Rājendralāla lit *tattvam eva*, «the truth of his own self».

5) ལྟ་ དེ་ རང་གི་ བདག་ཉིད་ ནི། དེ་ལ་ ལྟ་བ་ མ་ཡིན་ཉིད། གང་ཞིག་ བདག་ ལ་ མི་ལྟ་བ། དེ་ གཞན་དག་ལ་ ཇི་ལྟར་ ལྟ།། Mdo XVII: *raṅ-gi brtag-ñid, de lta lta-ba* et *gaṅ-zhig dag-la mi lta-bar.*

तत्र तदेव दर्शनं स्वात्मानं न पश्यति स्वात्मनि क्रियाविरोधात्[1] । ततश्च स्वात्मादर्शनाच्छ्रोत्रादिवत्[2] नीलादिकं न पश्यति । तस्मान्नास्ति दर्शनं ॥

यद्यपि स्वात्मानं दर्शनं न पश्यति ' तथाप्यग्निवत्परान् द्रक्ष्यति । तथा ह्यग्निः परात्मानमेव दहति न स्वात्मानं ' एवं दर्श[33b]नं परानेव द्रक्ष्यति न स्वात्मानमिति[3] ॥

एतदप्ययुक्तं यस्मात् '

न पर्याप्तोऽग्निदृष्टान्तो दर्शनस्य प्रसि[illegible]
[illegible] न युज्यत[illegible]
[illegible]नगतागतैः[4] ॥ ३ [Tib. 44a]

सह दर्शनेन वर्तत इति सदर्शनः । योऽयमग्निदृष्टान्तो दर्शनप्रसिद्धये भवतोपदिष्टः । सोऽपि सह दर्शनेन दार्ष्टान्तिकार्थेन प्रत्युक्तो दूषितः । केन पुनरित्याह ' गम्यमानगतागतैः । यथा गतं न गम्यते नागतं न गम्यमानं[5] ' एवमग्निनापि दग्धं न दह्यते नादग्धं दह्यत इत्यादिना समं वाच्यं ॥ यथा च न गतं नागतं न गम्यमानं गम्यते ' एवं '

न दृष्टं दृश्यते तावददृष्टं नैव दृश्यते ।
दृष्टादृष्टविनिर्मुक्तं दृश्यमानं न दृश्यते[6] ॥

इत्यादि वाच्यं ॥

---

1) Même principe Sāṃkhyas. v., I. 43; Bodhic. ṭ, IX. 18, p. 261. 8.

2) Cette comparaison rappelle le *rasacakṣurnyāya* (Bodhic. VII. 61).

3) Voir ci-dessus 34. 6.

4) ལྟ་བ་རབ་ཏུ་བསྒྲུབ་པའི་ཕྱིར། མེ་ཡི་དཔེས་ནི་ནུས་མ་ཡིན། སོང་དང་མ་སོང་བགོམ་པ་ཡིས། དེ་ནི་ལྟ་བཅས་ལན་བཏབ་པོ།

5) Voir ci-dessus II. 1.

6) Ne doit pas être considéré comme une *kārikā*, n'étant pas traduit dans Mdo XVII (Mūlamadhyamakakārikās).

यथा च गन्ता न गच्छति तावदित्याद्युक्तं[1]। एवं न दग्धा[2] दहति तावदित्यादि वाच्यं। एवं न द्रष्टा पश्यति तावदित्यादिनाग्निदृष्टान्तेन सह गम्यमानगतागतैर्यस्मात्समं दूषणमतोऽग्निवद्दर्शनसिद्धिरिति न युज्यते ततश्च सिद्धमेतत्' स्वात्मवद्दर्शनं परानपि न पश्यतीति ॥ [redacted]एवं तदा'

ना[redacted]ि यदा किं चन दर्शनं।
[redacted] युज्यते ॥ ४[3]

यदा चैवमप[redacted]ोऽमपश्यतो दर्शनत्वायोगात् [redacted] दिवत् पश्यतीति दर्शनमिति [redacted]नशब्दादन[redacted] नुरोधेन [Tib. 44b] दर्शनं पश्यतीति [redacted] दर्शनमित्येवं कथमेतत्तु युज्यत इति पठितव्यं ॥

किं चान्यत्' इह पश्यतीति दर्शनमित्युच्यमाने दर्शनक्रियया दर्शनस्वभावस्य वा चक्षुषः संबन्धः परिकल्प्येत' अदर्शनस्वभावस्य वा। उभयथा च न युज्यत इत्याह।

पश्यति दर्शनं नैव नैव पश्यत्यदर्शनं।

दर्शनस्वभावस्य तावद्दृशिक्रियायुक्तस्य[4] भूयः पश्यतीत्यादिना संबन्धो नोपपद्यते' दृशिक्रियाद्वयप्रसङ्गात्' दर्शनद्वयप्रसङ्गाच्च। अदर्शनमपि न पश्यति' दर्शनक्रियारहितत्वादङ्गुल्यग्रवदित्यभिप्रायः ॥ यदा

---

1) Voir ci-dessus II. 8.

2) Mss. *na dagdham dahyate tāvat...evaṃ na darçanaṃ paçyate tāvat.* — Tib. རེ་ཞིག་ སྲེག་པོ་ མི་ སྲེག་ སྟེ་ ..... རེ་ཞིག་ ལྟ་པོ་ མི་ ལྟ་ སྟེ་

3) གང་ཚེ་ ཅུང་ཟད་ མི་ ལྟ་བ། ལྟ་བར་བྱེད་པ་ མ་ ཡིན་ནོ། ལྟ་བས་ ལྟ་བར་ ཉིད་ ཅེས་བྱར། དེ་ནི་ ཇི་ལྟར་ རིགས་པར་ འགྱུར།།

4) *dṛçir prekṣaṇe* (Dhātup. 1. 1037).

पश्यति दर्शनं नैवं नैव पश्यत्यदर्शनं ।

तदा ।

दर्शनं पश्यतीत्येवं कथमेतत्तु युज्यते ॥

इत्यनेनैव संबन्धः ॥ ये तु मन्यन्ते निर्व्यापारं ह्रीदं धर्ममात्रमुत्पद्यमानमुत्पद्यत इति । नैव किं चित्कश्चिद्विषयं पश्यति क्रियाया अभावात्तस्मा[illegible]पश्यतीति सिद्धमेतत्प्रसाध्यत इति । अत्रोच्यते । यदि क्रि[illegible]यात् । तदा धर्ममात्रमपि न स्यात् । क्रियावि[illegible] धर्ममात्रं भवि-[illegible]युपगम्यतां । अथ तत्त्वचिन्ता [illegible]युपगम्यतां (1) ॥ यथोक्तं शतके (2) ।

[Tib. 45a] शाश्वतो नास्ति नास्ति सर्वगते (3) क्रिया ।

निष्क्रियो नास्तितातुल्यो (4) नैरात्म्यं किं न ते प्रियं ॥ इति ।

तस्मान्नायं विधिर्बाधकः (5) परस्य । नाप्यस्माकं सिद्धसाधनदोषः ॥

---

1) Il n'existe pas de *dharma*, de *dravya* (voir ci-dessus p. 96 l. 13) indépendamment de la *kriyā*. Voir la stance: *kṣaṇikāḥ sarvasaṃskārā asthirāṇāṃ kutaḥ kriyā, bhūtir yaiṣāṃ kriyā saiva kārakaṃ saiva cocyate* (citée Bodhic. p. IX. 6, Nyāyabindupūrvapakṣa, Mdo XCI fol. 118b, partiellement dans Bhāmatī, 361.3, Vedāntakalpataru, 278.9, Tantravārtika 170.10, Upadeçasāhasrī, p. 309) = «tous les saṃskāras sont momentanés et comment attribuer l'action au momentané? leur devenir (*bhūti*) c'est l'acte (= le fait d'être le résultat du complexe [*sāmagrī*] des causes), c'est ce qu'on appelle aussi la puissance (le fait d'être un des coefficients d'un effet postérieur)». Syādvādamañjarī (Chow. S. S.) 134 .... *kāraṇaṃ saivocyata iti vacanāt, bhavanaṃ teṣāṃ* (*paramāṇūnāṃ*) *aparotpattau kāraṇam iti cet*... — La lecture *kārakaṃ* me paraît confirmée par le tibétain *byed-pa*; *byed-pa-po* ou *byed-po* = *kārakaḥ*.

Si on recherche la réalité (*tattvacintā*, *vicāra*), il faut donc nier la *bhūti* des *saṃskāras* (= *dharmamātra*): étant *asthiras*, ils ne sont ni causés (*kriyā*) ni causes (*kāraka*); au point de vue de la vérité de l'expérience (*vyavahārasatya*) *dharma* = *kriyā*. — Voir la définition Sarvadarç. s. (trad. note 37) *çaktir hi bhāvalakṣaṇam* et J. As., 1903, II p. 376.

2) X. 17. — Voir Muséon, 1900, p. 239.

3) ཀུན་ཏུ་ འགྲོ་བ་ བྱ་བ་ མེད.

4) Mss. *nāsti nātulyo*; mais tibétain མེད་ དང་ མཚུངས་

5) Mss. *vidhir na b°*. — Tib. = *tasmād ayaṃ parasya vidhir na bādhakaḥ*.

अत्राह । नैव हि पश्यती[34 b]ति दर्शनमिति कर्तृसाधनमभ्युपगम्यते । किं तर्हि पश्यत्यनेनेति दर्शनमिति करणसाधनं । ततश्चोक्तदोषाप्रसङ्गः । यश्चानेन दर्शनेन करणभूतेन पश्यति स द्रष्टा । एष च विद्यते विज्ञा[न]मात्मा वा । कर्तृसद्भावाच्च दर्शनमपि सिद्धमिति [illegible]ते ।

[illegible]व द्रष्टा चाप्युपगम्यतां ॥ ५[1]

यथा [illegible][2] दर्शनस्य दूषणमुक्तमेवं द्रष्टुरपि दर्शनवद्दूषणं वेदितव्यं । तद्यथा [illegible]

स्वमात्मानं नै[illegible]

न पश्यति यदात्मानं कथं [illegible]

इत्यादि वाच्यं । तस्माद्दर्शनवद्द्रष्टापि नास्तीति सि[illegible] ॥

अत्राह । विद्यत एव द्रष्टा तत्कर्मकरणसद्भावात् । इह यन्नास्तीति न तस्य कर्मकरणे विद्येते तद्यथा वन्ध्यासूनोः । अस्ति च द्रष्टुः करणं दर्शनं द्रष्टव्यं च कर्म । तस्माच्चैत्रवद्विद्यमानकर्मकरणो विद्यत एव द्रष्टेति ॥ उच्यते । नैव हि द्रष्टव्यदर्शने विद्येते तत्कुतो द्रष्टा स्यात् । द्रष्टृसापेक्षे हि द्रष्टव्यदर्शने [Tib. 45b] । स च निरूप्यमाणः ।

[तिरस्कृत्य][3] द्रष्टा नास्त्यतिरस्कृत्य च दर्शनं ।

इह द्रष्टा नाम यदि कश्चित्स्यात् । स दर्शनसापेक्षो वा स्यान्निरपेक्षो वा । तत्र यदि दर्शनसापेक्षोऽतिरस्कृत्य दर्शनमिष्यते । तथा सिद्धस्य वा दर्शनापेक्षा स्यादसिद्धस्य वा । तत्र सिद्धो द्रष्टा न हि दर्शनमपेक्षते । किं सिद्धस्य सतो द्रष्टुः पुनर्दर्शनापेक्षा कुर्यात् ।

---

1) ལྟ་བ་ལྟ་ཉིད་མ་ཡིན་ཏེ། ལྟ་བ་མིན་པ་མི་ལྟ་ཉིད། ལྟ་བ་ཉིད་ཀྱིས་ལྟ་པོ་ཡང་། རྣམ་པར་བཤད་པར་ཤེས་པར་བྱ།།

2) Voir ci-dessus III. 2.

3) D'après le tibétain. — Le vers est, pour le moins, irrégulier.

न हि सिद्धं पुनरपि साध्यत इति । अथासिद्धोऽपेक्षेत ' असिद्धत्वाद्वन्ध्यासुतवद्दर्शनं नापेक्षते। एवं तावदतिरस्कृत्य दर्श[35a]नमपेक्ष्य द्रष्टा नास्ति ॥ तिरस्कृत्यापि [1] दर्शननिरपेक्षत्वादित्युक्तं प्राक् ॥ तदेवं तिरस्कृत्य[ातिरस्कृत्य] वा दर्शनं यदा द्रष्टा नास्ति तदा '

द्रष्टव्यं दर्शनं चैव द्रष्टर्यसति ते कुतः ॥ ६ [2]

द्रष्टर्यसति निर्हेतुके द्रष्टव्यदर्शने न संभवत[illegible]द्भावाद्द्रष्टा प्रसेत्स्यति ॥

अत्राह । विद्येते एव द्रष्ट[illegible]

[illegible] [3]

[illegible]समवः ॥ ७

[illegible] दर्[illegible] प्रतीत्य विज्ञानमुत्पद्यते [4]। त्रयाणां संनिपातात्सास्र- [5]
[6] वस्पर्शः ' [7] स्पर्शसहजा वेदना ' तत्प्रत्यया तृष्णेति ' एवं चत्वार्यपि [8] भवाङ्गानि द्रष्टव्य-

---

1) Sic Mss. — Lire d'après le tibétain *darçanaṃ drastā na sidhyati*. . .

2) མ་སྐྱེས་ལྟ་བོ་ཡོད་མིན་ཏེ། ལྟ་བ་སྐྱེས་པར་གྱུར་ཀྱང་ངོ། ལྟ་བོ་མེད་ན་ལྟ་བྱ་དང་། ལྟ་བ་དེ་དག་ག་ལ་ཡོད།།

3) ཇི་ལྟར་པ་དང་མ་དག་ལ། བརྟེན་ནས་བུ་ནི་འབྱུང་བཤད་པ། དེ་བཞིན་མིག་དང་གཟུགས་བརྟེན་ནས། རྣམ་པར་ཤེས་པ་འབྱུང་བར་བཤད།།

4) Voir ci-dessus p. 6, n. 4.

5) Quels sont ces trois? D'après le sautrāntika Çrīlābha 1⁰ *indriyārthakṣaṇa*, 2⁰ *vijñānotpattikṣaṇa*, 3⁰ *vedanotpattikṣaṇa*. (Abhidh. k. v. 241a). — D'après d'autres docteurs 1⁰ le *mana-indriya niruddha*, 2⁰ le *dharma* (*rūpādi*), 3⁰ le *manovijñāna* actuel; sont causes: *mana-indriya, rūpa*; est effet: *manovijñāna*.

6) ཟག་པ་ཟག་པ་དང་བཅས་པ་ — M. Vyut. 109. 59 *āsrava*, 105 *sāsrava*, 106 *anāsrava*. — Çikṣās. 221. 2 et note: *sāsravaṃ manovijñānam*. — Il y a trois *āsravas* (kāma, bhava, avidyā), Itiv. § 56. 7. — L'acte *anāsrava* est stérile (*avipāka*), Abhidh k. v. (Soc. As.) fol. 308a 6. — Un sūtra cité ibid. 276b 8: *sāsravā dharmāḥ katame yāvad eva cakṣur yāvad eva rūpāṇīti*, donne lieu à discussion

[Tib. 46 a]दर्शनहेतुकानि विद्यन्ते । तस्मात्कार्यसद्भावाद्द्रष्टव्यदर्शने विद्येते इति ॥
उच्यते । स्यातामेते यदि विज्ञानादिचतुष्टय[मे]व स्याद्यस्मात् ।

द्रष्टव्यदर्शनाभावाद्विज्ञानादिचतुष्टयं ।

[illegible]नि ।

[illegible]ऽपि न स्त इत्युक्तं । अतः कुतो विज्ञानादिचतुष्टयं विज्ञानस्प[illegible] विज्ञानादीनि ॥

अत्राह । स[illegible] इह तृष्णाप्रत्ययमुपादान[illegible] उपादानभवजातिजरामरणादि[illegible] । तस्मात्सन्ति [illegible] तत्कार्यसद्भावात् ॥ उच्यते । स्युरुपादि[illegible]चतु[illegible] तु द्रष्टव्यदर्शनाभावाद्विज्ञानादिचतुष्टयं नैवास्ति त[illegible]

उपादानादीनि भविष्यन्ति पुनः कथं ॥ ८ [1]

न सन्त्युपादानादीनीत्यर्थः ॥ इदानीं दर्शनवच्छेषायतनव्याख्या[35 b]नातिदेशा[2]-र्थमाह ।

à propos de l'Arhat: le *sāṃtānika rūpa* de l'Arhat (*cakṣurāyatanādi*) et le *rūpa* externe (bois, mur) sont *anāsravas.* — Le contact est *sāsrava* quand le vijñāna est *āsravāṇāṃ kleçānāṃ niçraya.*

7) M. Vyut. 245. 1140 ***cakṣuḥsaṃsparçajā vedanā.*** Abhidh. k. v. (242 a 3) *cakṣuḥsaṃsparçaṃ pratītyotpadyate: cakṣuḥsaṃsparçajā vedaneti.* — Si la *vedanā* naît du *saṃsparça,* comment peut-elle être *sparçasahajā* comme le dit notre texte? L'Abhidharmakoça discute en effet le *sahotpannatva* (simultanéité) et le *janya-janakabhāva* (relation de cause à effet): l'ombre de l'*aṅkura* est simultanée à l'*aṅkura* qui est sa cause (théorie du *sahabhūhetu*).

8) སྲིད་པའི་ ཡན་ལག་ བཞི་པོ་. — Voir Abhidh. saṅgaha (J. P. T. S. 1884) V, 12, 16 ***bhavaṃgakkhaya.***

1) བལྟ་བྱ་ ལྟ་བ་ མེད་པའི་ཕྱིར། རྣམ་པར་ཤེས་ལ་སོགས་པ་ བཞི། ཡོད་མིན་ཉེ་བར་ལེན་ལ་སོགས། ཇི་ལྟ་བུར་ན་ ཡོད་པར་འགྱུར།།

2) བསྒྲི་བ'. Voir Schmidt, *s. voc.*

व्याख्यातं श्रवणं घ्राणं रसनं स्पर्शनं मनः ।
दर्शनेनैव जानीयाच्छ्रोतृश्रोतव्यकादि च ॥ इति[1] । ६

उक्तं हि भगवता ।

न चक्षुः [Tib. 46b] प्रेक्षते रूपं मनो धर्मान्न वेत्ति च ।
एतत्तु परमं सत्यं यत्र लोको न [illegible]
सामग्र्या दर्शनं [illegible]
[illegible] रूपतः चक्षुर्विज्ञानमिहोपजायते ।
न[ा] चक्षुषि रूप निश्रितं रूपसंक्रान्ति[5] न चैव चक्षुषि ॥
नैरात्म्यऽशुभाश्च[6] धर्मि ये तेष्वात्मेति शुभाश्च कल्पिताः ।
विपरीतमसद्विकल्पितं चक्षुर्विज्ञान ततोऽपि जायते ॥

---

1) ལྟ་བས་ཉན་དང་སྣོམ་པ་དང་། མྱང་བར་བྱེད་དང་རེག་བྱེད་ཡིད། ཉན་པ་པོ་དང་མཉན་ལ་སོགས། རྣམ་པར་ཤེས་པར་ཤེས་པར་བྱ།།

2) ས་དེ་དོན་དམ་འཛིན་པ་ནི། ཉེ་བར་བཏགས་པར་རྟོགས་པར་འགྱུར།། *bhūmiṃ tāṃ paramārthagrāhaka upacārabhūtāṃ bodhayiṣyati.* Cette traduction paraît, pour le moins, libre. — *prāha* est douteux. — Le sens est certain: là où le Maître enseigne que le *darçana* résulte d'un complexe de causes, c'est là un enseignement conventionnel de la réalité.

3) Mètre Vaitalīya.

4) D'après le tibétain, *rūpaṃ ca.*

5) *saṃkrānti* = ⏑–⏑

6) Mss. *nairātmyasvabhāvāç ca dharmi ye … dharmi eteṣu rātmetī.* Tib. བདག་མེད་མི་སྡུག་ཆོས་འདི་དག །སྣང་ཡང་བདག་དང་སྡུག་ཅེས་བརྟགས།

विज्ञाननिरोधसंभवं(1) विज्ञानउपादव्ययं(2) विपश्यति ।
न कहिं चि गतं न चागतं शून्यमायोपम(3) योगि पश्यति ॥

तथा चार्योपालिपृच्छायां । (4)

स[illegible] पश्यति चक्षुस्तत्र न पश्यति(6) प्रत्ययवैकल्येन ।
[illegible] तेन संयोगवियोगविकल्पः(7) ॥
[illegible] मनोरम(8)चित्रविशिष्टं ।
येन च यो[illegible] कदाचि ॥

---

1) D'après le tibétain °*sambhavaṃ*. [illegible]

2) *utpāda-vyaya.* — Pour le mètre: jñ[illegible] nir[illegible] saṃbhava = འབྱུང་, utpāda = འཕེལ་, vyaya = ཟད་.

3) = *çūnyāmāyopāmā.*

4) Voir ci-dessus p. 53 n. 4. — Les deux premières stances sont citées Chap. XIV in fine.

5) Mss. °*saṃyoge.* — མིག་ ནི་ ཐམས་ཅད་ལྡན་ན = *cakṣur eva sarvasaṃyogi* (*sarvasaṃyuktam*).

6) Le deuxième et le troisième pāda: མིག་གིས་ གཟུགས་རྣམས་ མཐོང་བ་ གང་ ཡིན་པའང་། མཚན་མོ་ རྐྱེན་རྣམས་མེད་ན་ མཐོང་ མི་ འགྱུར་ = *yāny api rūpāni cakṣuṣā dṛçyante, rātrau, pratyayānām abhāve, na dṛçyante.* — Même version ci-dessous ad XIV 8, où les Mss. donnent simplement *cakṣuḥ prapaçyati* pour le troisième pāda. — *ālokasamāçrita* de la ligne suivante confirme la leçon du tibétain.

7) *saṃyogaviyoga,* ལྡན་ དང་ བྲལ་བ.

8) ཡིད་ འོང་ དང་། ཡིད་དུ་མི་འོང་ སྣ་ཚོགས་ . . .

9) དེ་ལྟར་ སྣང་ལ་ བརྟེན་ཏེ་ མཐོང་བས་ ན། དེ་ཕྱིར་ = *evam ālokasamāçritam paçyati yasmāt, tasmāt....*

यो पि च श्रूयति शब्दु मनोज्ञः सो पि च नान्तरि ज्ञातु पविष्टः ।
संक्रमणं न च लभ्यति तस्य कल्पवशात्तु[1] समुच्छ्रितु शब्दः[1] ॥ इति ।

[तथा[2] ।]

गीतं न नृत्यमपि वाद्यकृतं न याह्यं
स्वप्नोपमा हि रतयोऽबुधमोह[3] [illegible]
संकल्पलालस गता [illegible]
किं क्लेशदाम [illegible]

[illegible] प्रसन्नपादायां मध्यमकवृत्तौ
[illegible]

[illegible] Tib. = *çabdānām* [illegible]*ah*.
D'après le tibétain. — Mètre Vasantatilakā.
Tib. = *mohanasya rateç ca hetuḥ*.

IV.

स्कन्धपरीक्षा नाम चतुर्थं प्रकरणं

अत्राह [illegible] चक्षुरादीनीन्द्रियाणि न सन्ति । न स्कन्धा अप्रतिषेधात् । तदन्तर्गतानि चे[illegible]विष्यतीति ॥ उच्यते । स्युरेव यदि स्कन्धाः स्युः । तत्र रूप[illegible]

रूपका[illegible]

रूपेणापि न निर्मु[illegible]

तत्र रूपं भौतिकं[2] । तस्य कारण[illegible] भौतिकं रूपं रूपशब्दगन्धरसस्प्रष्टव्याख्यं नोपलभ्यते [illegible] पटः । रूपेणापि न निर्मुक्तं रूपात्पृथग्भूतं रूपकारणमुपलभ्यते ॥

तदेतत्प्रतिज्ञाद्वयं प्रसाधयितुकाम आह ।

रूपकारणनिर्मुक्ते रूपे रूपं प्रसज्यते ।
अहेतुकं[3] । न चास्त्यर्थः कश्चिदहेतुकः क्व चित् ॥ २[4]

---

1) གཟུགས་ཀྱི་ རྒྱུ་ནི་ མ་གཏོགས་པར། གཟུགས་ ནི་ དམིགས་པར་ མི་ འགྱུར་ར། གཟུགས་ ཞེས་བྱ་བ་ མ་གཏོགས་པར། གཟུགས་ཀྱི་ རྒྱུ་ ཡང་ མི་ སྣང་ངོ།།

2) *rūpa* [élément] est employé dans le sens de *bhautika* [corps] (= *ghaṭādi*, voir ci-dessus 71. 6 et aussi 126. 1). — Çaṃkara, II. 2. 18 (p. 532. 8). — On distingue le *bāhya* et le *sāṃtānika* (ci-dessus p. 118 n. 6).

3) Je maintiens la leçon des Mss. que je croyais devoir sacrifier p. 24, n. 8. — On trouve en effet la même lecture *āhetuka* dans Subhāṣitasaṃgraha fol 21 (édité par M. C. Bendall, dans Muséon 1903. IV). — Signalons *ānimitta*, M. Vyut. 30. 14, 82. 7.

4) གཟུགས་ཀྱི་ རྒྱུ་ ནི་ མ་གཏོགས་པར། གཟུགས་ ན་ གཟུགས་ ནི་ རྒྱུ་མེད་པར། ཐལ་བར་འགྱུར་ཏེ་ དོན་ གང་ ཡང་། རྒྱུ་མེད་པ་ ནི་ གང་ ནའང་ མེད།།

यथा घटादर्थान्तरभूतः पटो न घटहेतुकः ' एवं रूपकारणचतुर्महाभूतव्यतिरिक्तं भौतिकं रूपमिष्यमाणं न भूतहेतुकं स्यात्। न चास्त्यर्थः कश्चिदहेतुकः क्व चित्। तस्मादहेतुकत्वदोषप्रसङ्गान्न रूपकारणनिर्मुक्तं रूपमभ्युपेतव्यमिति॥

इदानीं रूपेणापि विनिर्मुक्तं यथा रूपकारणं नास्ति तथा [illegible]ह।

रूपेण तु विनिर्मुक्तं यदि [Tib. 47b] स्य[illegible]

यदि कार्यरूपविनिर्मुक्तं रूपकारणं स्यात्त[illegible] घटहेतकं न भवति ' एवं कार्यात्पृथग्भूतं कारण[illegible]

[illegible]

[illegible]कार्य[36b]प्रवृत्तिर्हेतुः ' कार्यनिरपेक्षाच्च [illegible]वृत्तिः। यच्चाकार्यकं कारणं तन्निर्हेतुकत्वान्नरोरगतुरगविषाणवन्नास्त्येवेत्याह।

नास्त्यकार्यं च कारणं॥ इति[1]। ३

अथ चेदं रूपस्य कारणमिष्यमाणं सति वा रूपे कारणत्वेनेष्यतेऽसति वा। उभयथा च नोपपद्यत इत्याह।

रूपे सत्येव रूपस्य कारणं नोपपद्यते।
रूपेऽसत्येव रूपस्य कारणं नोपपद्यते[2]॥ ४

सति वा संविद्यमाने रूपे किं रूपकारणेन प्रयोजनं। असत्यसंविद्यमाने रूपे किं

---

1) གལ་ཏེ་ གཟུགས་ ནི་ མ་གཏོགས་པར། གཟུགས་ཀྱི་ རྒྱུ་ ཞིག་ ཡོད་ན་ནི། འབྲས་བུ་མེད་པའི་རྒྱུར་ འགྱུར་ཏེ། འབྲས་བུ་མེད་པའི་ རྒྱུ་ མེད་དོ།།

2) གཟུགས་ ཡོད་ན་ ཡང་ གཟུགས་ཀྱི་ ནི། རྒྱུ་ ཡང་ འཐད་པར་ མི་ འགྱུར་ཉིད། གཟུགས་ མེད་ན་ ཡང་ གཟུགས་ཀྱི་ ནི། རྒྱུ་ ཡང་ འཐད་པར་ མི་ འགྱུར་ཉིད།།

रूपकारणेन प्रयोजनं । कस्य वा तत्कारणमिति परिकल्प्यते । तस्मादसत्यपि रूपे रूपकारणं नोपपद्यते ॥

अथ स्यादसत्यप्येवं रूपकारणं न संभवति । तथापि कार्यं रूपं संविद्यते तत्सद्भावात्कारणमपि [illegible]ीति ॥ स्यादेवं यदि कार्यं रूपं स्यान्न त्वस्ति यस्मात् ।

[illegible] नैव नैवोपपद्यते ।

रूप[illegible]ति कारणे कुतो निर्हेतुकं कार्यं [Tib 48a] रूपं भवेत् । नैव [illegible]येनाहेतुकवादस्याभ्युपगमः [illegible]पति ॥ यतश्चैवं रूपं सर्वथा वि[illegible]

तस्मात्

तत्त्वदर्शी योगी

रूपगतान् कांश्चिन्न विकल्पान् विकल्पयेत् ॥[1] ५

सप्रतिघाप्रतिघसनिदर्शनानिदर्शनातीतानागतनीलपीतादिविकल्पान् रूपालम्बनान् कांश्चित्परिकल्पयितुमर्हतीत्यर्थः ।

अपि चेदं रूपकारणमिष्यमाणं सदृशं कार्यं निष्पादयेदसदृशं वा । उभयथा च नोपपद्यत । इत्याह ।

न [37a] कारणस्य सदृशं कार्यमित्युपपद्यते ।
[न कारणस्यासदृशं कार्यमित्युपपद्यते[2] ॥] ६

---

1) རྒྱུ་མེད་པ་ཡི་ གཟུགས་དག་ནི། འཐད་པར་མི་ རུང་ རུང་མིན་ཉིད། དེ་ཕྱིར་གཟུགས་ཀྱི་རྣམ་པར་རྟོག །འགའ་ཡང་ རྣམ་པར་བརྟག་མི་བྱ॥ = *niḥkāraṇāni rūpāṇi......*

2) འབྲས་བུ་ རྒྱུ་ དང་ འདྲ་བ་ ཞེས། བྱ་བ་ འཐད་པ་ མ་ཡིན་ནོ། འབྲས་བུ་ རྒྱུ་ དང་ མི་འདྲ་ ཞེས། བྱ་བར་ འཐད་པ་ མ་ཡིན་ནོ॥

तत्र रूपकारणं कठिनद्रवोष्णचलस्वभावं । भौतिकं तु चक्षुराद्याध्यात्मिकं पञ्चचक्षुर्विज्ञानाद्याश्रयरूपप्रसादात्मकं[1] बाह्यं तु रूपाद्यायतनादिकं चक्षुर्विज्ञानादिग्राह्यलक्षणं न महाभूतस्वभावमिति । अतो भिन्नलक्षणत्वान्निर्वाणवत्[2] कार्यकारणयोः सादृश्यमेव नास्तीति

न कारणस्य सदृशं कार्यमित्युपपद्यते ।

न चापि सदृशानां शालिबीजादीनां परस्प[illegible]

न कारणस्य सदृशं का[illegible]

[illegible] कार्यमित्युपपद्यते ।

[illegible]यः ॥

यथा चेदं रूपं विचार्यमाणं सर्वथा नोपपद्यते । एवं वेदनादयोऽपीत्यतिदिशन्नाह ।

वेदनाचित्तसंज्ञानां संस्काराणां च सर्वशः ।
सर्वेषामेव भावानां रूपेणैव समः क्रमः[3] ॥ ७

---

1) *rūpaprasāda* = གཟུགས་དང་བ''', comme Çikṣās. 250, n. 3. — Les exemples cités par Candra Dās établissent que *nañ-ba* = *āyatana*. — Aux sources indiquées par M. Bendall (Dh.-Saṅi § 597, Atthasāl. pp. 72. 306), ajouter M. Vyut. 101. 22, Abhidh. s. VI. 1 (J. P. T. S., 1884) *pasādasaṁkhātaṁ pañcavidham p[illegible] ajjhattikarūpaṁ nāma*, et Abhidh. k. v. (Soc. As.) 239 b 8 *tadvijñānāçrayā rūpaprasādāç ca cakṣurādayaḥ* = *ṣaḍāyatana*.

2) Confirmé par le tibétain.

3) ཚོར་ དང་ འདུ་ཤེས་ འདུ་བྱེད་ དང་། སེམས་ དང་ དངོས་པོ་ ཐམས་ཅད་ ཀྱང་། རྣམ་པ་དག་ ནི་ ཐམས་ཅད་དུ། གཟུགས་ཉིད་ཀྱི་ ནི་ རིམ་པ་ མཚུངས༎

वेदनादिकमपि सर्वं रूपविचारेणैव समं बोध्यं । यथैव श्लोकस्य धर्मस्य शून्यता प्रतिपादयितुमिष्टा माध्यमिकेन तथैव सर्वधर्माणामपीति । अतः ।

विग्रहे यः परीहारं कृते शून्यतया वदेत् ।
स[illegible]परिहृतं समं साध्येन जायते[1] ॥ ८

तत्र [illegible] । शून्यतया करणभूतया रूपं निःस्वभावमित्येवं सस्वभाववादि[illegible]कां ब्रूयात् ' वेदनादयस्तावत्सन्ति तद्वद्रूपमप्यस्तीति ' तदेतत्स[illegible]द्वेदनादीनामपि सद्भावः साध्येन रूपसद्भावेन समो वेदितव्यः [illegible]न [37b] विचार्यमाण[illegible] स्पर्शप्रत्यया वेदना विज्ञानसहजा [illegible] सं[illegible]ज्ञानं स्वकारणात्स्पर्शादेस्तत्त्वान्यत्वादिना [illegible]नास्तीति[illegible] भवति । [Tib. 49a] यथा वेदनादयः साध्यसमा एवं लक्ष्यलक्षणा[illegible]वादयो ऽपि सर्व एव पदार्था रूपेण साध्येन समा इति । कुतः परस्य परीहारः संभवेत् । सर्वं[2] वचनमस्य साध्यसमं भवतीति सर्वत्र शास्त्रे परीहारेण साध्यसमत्वं माध्यमिकेनाभिधेयमित्याचार्यः शिक्षयति[3] ॥

यथा च परपक्षदूषणे विहितोऽयं विधिरेवं व्याख्यानकालेऽपीत्याह ।

व्याख्याने य उपालम्भं कृते शून्यतया वदेत् ।
सर्वं तस्यानुपालब्धं समं साध्येन जायते[4] ॥ ९

---

1) སྟོང་པ་ཉིད་ཀྱིས་ བརྩད་བྱས་ཚེ། གང་ཞིག་ ལན་འདེབས་ སྨྲ་བྱེད་པ། དེ་ཡི་ ཐམས་ཅད་ ལན་བཏབ་མིན། བསྒྲུབ་པར་བྱ་ དང་ མཚུངས་པར་འགྱུར།།

2) སྨྲས་པའི་ ལན་ ཐམས་ཅད་

3) བརྗོད་པར་བྱ་

4) སྟོང་པ་ཉིད་ཀྱིས་ བཤད་བྱས་ཚེ། གང་ཞིག་ སྐྱོན་འདོགས་ སྨྲ་བྱེད་པ། དེ་ཡི་ ཐམས་ཅད་ སྐྱོན་བཏགས་མིན། བསྒྲུབ་པར་བྱ་ དང་ མཚུངས་ པར་ འགྱུར།།

व्याख्यानकालेऽपि यः शिष्यदेशीयश्चोद्यमुपालम्भं कुर्यात्तस्यापि तच्चोद्यमुपालम्भाद्यं पूर्ववत्साध्यसमं वेदयितव्यं । यथोक्तं ।

भावस्यैकस्य यो द्रष्टा द्रष्टा सर्वस्य स स्मृतः ।
एकस्य शून्यता यैव सैव सर्वस्य शून्यता ॥ इति[1] ।

आर्यगगणगञ्जसमाधिसूत्रेऽपि[2] ।

एकेन धर्मेण पु सर्वधर्मान्
अनुगच्छते मायमरीचिसा[illegible]
अग्राह्यतुच्छानलि[illegible]
[illegible] ।
[illegible]स[3] तथैव सर्वत्र पेषिता बुद्धिः ।
सर्वे च तत्स्वभावा धर्म विशुद्धा गगणाकल्पाः ॥
एकेन [Tib. 49b] सर्वं जानाति सर्वमेकेन पश्यति ।
कियद्बह्व पि भावित्वा[4] न तस्योत्पद्यते मदः ॥ इति ।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ स्कन्धपरीक्षा नाम चतुर्थं प्रकरणं ॥

---

1) Comparer la citation Syādvādamañjarī (Chow. S. S.) pp. 4. 112 *eko bhāvaḥ sarvathā yena dṛṣṭaḥ sarve bhāvāḥ sarvathā tena dṛṣṭāḥ.*

2) Voir Çikṣās., Index I.

3) Mss. *yatha jñāta tvayā ātmasaṁjñā.* — Mètre Āryā.

4) Mss. *bhāvayitvā na tasyopapadyate damaḥ.* — ཇི་སྙེད་ མང་པོ་ བཤད་བྱས་ ཀྱང་ = *bhāṣayitvā.*

V.

धातुपरीक्षा नाम पञ्चमं प्रकरणं

अत्राह । धातवः सन्ति प्रतिषेधाभावात् । उक्तं च भगवता[1] । षड्धातु[38 a]रयं महाराज पुरुषपुद्गल इत्यादि । ततश्च प्रवचनपाठाद्धातुवत्स्कन्धायतनान्येव सन्तीति ॥ उच्यते । स्युः स्कन्धायतनानि यदि धातव एव स्युः । कथमित्याह ।

नाकाशं विद्यते किं चित्पूर्वमाकाशलक्षणात् ।
अलक्षणं प्रसज्येत स्यात्पूर्वं यदि लक्षणात्[2] ॥ १

तत्र षड् धातव उक्ताः पृथिव्यप्तेजोवाय्वाकाशविज्ञानाख्याः । तत्राकाशमधिकृत्योच्यते दूषणं स्वरूपनिरूपणात् ॥ इहाकाशस्यानावरणं लक्षणमुच्यते[3] । यद्यस्मात्पूर्वमाकाशमनावरणलक्षणाल्लक्ष्यं स्यात् । तत्र लक्षणप्रवर्तन[ाद]नावरणलक्षणात्पूर्वं नाकाशं लक्ष्यरूपमिति । यदा चैवं ।

नाकाशं विद्यते किं चित्पूर्वमाकाश[illegible]
अलक्षणं प्रसज्येत स्यात्पू[illegible]

तथा ह्यलक्षणं प्रवर्त[illegible]मित्याह ।

[illegible]विद्यते क्व चित् ॥ इति ।

---

1) Voi[illegible]trasamāgama, Bodhic. ṭ., 236. 24; Çikṣās. 244, 11.

2) ནམ་མ[illegible]མཚན་ཉིད་ སྔ་རོལ་ན། ནམ་མཁའ་ ཅུང་ཟད་ ཡོད་མ་ཡིན། གལ་ཏེ་ མཚན་ལས་ སྔར་ གྱུར་ན། མཚན་ཉིད་མེད་པར་ ཐལ་བར་འགྱུར།། — Cité ci-dessus 24. 8.

3) Voir Çaṃkara ad II. 2. 24. — Çlokavārt. p. 770 *bauddhānām idam darçanam varaṇābhāvamātram ākāçam iti.* — Çālistamba. — Dh.-Saṅ. 638, Atthasāl. 647 (*rūpaparicchedalakkhaṇa, rūpamariyādapaccupaṭṭhāna*), Mme Rhys Davids, Psychology, p. xlviii.

अत्राह । लक्षणप्रवृत्तिर्लक्ष्ये भवेत्तत्सद्भावाल्लक्ष्यमप्यस्तीति ॥ एतदपि नास्ति यस्मात् ।

असत्यलक्षणे भावे क्रमतां कुह लक्षणं(1) ॥ २

लक्षणात्पूर्वमलक्षणो भावो नास्तीत्युक्तं ' ततश्चासत्यसंविद्यमाने [अल]क्षणे लक्षणरहिते भावे [कु](2)हेदानीं लक्षणं प्रवर्ततामिति नास्ति लक्षणप्रवृत्तिः ॥ अपि चेदं लक्षणं प्रवर्तमानं सलक्षणे वा प्रवर्तेतालक्षणे वा । उभयथा च नोपपद्यत इत्याह ।

नालक्षणे लक्षणस्य प्रवृत्तिर्न सलक्षणे ।
सलक्षणालक्षणाभ्यां नाप्यन्यत्र प्रवर्तते(3) ॥ ३

तत्रालक्षणे खरविषाणवन्न लक्षणप्रवृत्तिः । सलक्षणेऽपि भावे न लक्षणप्रवृत्तिरुपप[38b]द्यते प्रयोजनाभावात् ' किं हि लक्षणवतः प्रसिद्धस्य भावस्य पुनर्लक्षणाकृत्यं स्यादित्यनवस्थातिप्रसङ्गश्चैवं(4) स्यात् । न ह्यसौ कदा चिन्न सलक्षणः स्यादिति सदैव लक्षणप्रवृत्तिः प्रसज्येत ' न चैतदिष्टं । तस्मात्सलक्षणेऽपि भावे न लक्षणप्रवृत्तिरुपपद्यते ' [प्रयोजना(5)भावात्] ॥ तत्रैव स्यात् ' सलक्षणालक्षणाभ्यामन्यत्र प्रवर्तिष्यत [Tib. 50b]

[illegible] न्यत्र प्रवर्तते ।

1) མཚན་[illegible] ཀུན་དུའང་ ཡོད་མ་ཡིན། མཚན་ཉིད་མེད་པའི་ དངོས་ མེད་ན། [illegible]༎

2) Mss. *bhāve hyadānīm.*

3) མཚན་ཉིད་མེད་ལ་ མཚན་ཉིད་ནི། མི་ འཇུ[illegible]ཅས་ལ་ མིན། མཚན་བཅས་ མཚན་ཉིད་མེད་པ་ལས། གཞན་ལའང་ འཇུག་པར་ མ[illegible]གྱུར་རོ༎

4) Mss. *ityaṁnavasthādityapra°.* — Tib. དེ་ལྟར་ན་ ཐུག་པ་མེད་པར་ ཐལ་བར་ ཡང་ འགྱུར་རོ = *evam anavasthāprasaṅgo 'pi syāt.*

5) Mss. *prayojano pra tatraiva.* — Tib. དགོས་པ་ མེད་པའི་ཕྱིར། དེ་ལ་

किं कारणं ' असद्भावात् । यदि सलक्षणो नालक्षणः ' अथालक्षणो न सलक्षणः । अतः सलक्षणश्चासलक्षणश्चेति विप्रतिषिद्धमेतत् । न च विप्रतिषिद्धं संभवति । तस्मा-दसंभवादेव सलक्षणे चालक्षणे च लक्षणप्रवृत्तिर्नोपपद्यत इति ॥

अथापि स्यात् ' यद्यपि न लक्षणप्रवृत्तिः ' तथापि लक्ष्यमस्तीति ॥ एतदपि नास्ति यस्मात् ।

लक्षणासंप्रवृत्तौ च न लक्ष्यमुपपद्यते ।

यदा लक्षणप्रवृत्तिरेव नास्ति तदा कथं लक्ष्यं स्यान्नैव संभवतीत्यभिप्रायः ॥

अत्राह । लक्षणप्रवृत्तिस्त्वया निषिद्धा न तु लक्षणं ' ततश्च विद्यते लक्ष्यं लक्षण-सद्भावात् ॥ उच्यते ।

लक्ष्यस्यानुपपत्तौ च लक्षणस्याप्यसंभवः[1] ॥ ४

लक्षणासंप्रवृत्तौ च न लक्ष्यमुपपद्यते '

इति प्रतिपादितं । तदा ।

लक्ष्यस्यानुपपत्तौ च लक्षणस्याप्यसंभवः ।

निराश्रयत्वात् ॥ यदा चैवं लक्षणं नास्ति तदा [illegible] तन्न । यतश्चैतदेवं '

तस्मा[illegible]

इति निगमनं[2] [illegible]लक्षणे न स्तस्तथा[39 a]काशमस्ति ' भावरूपं च भवद[illegible] वा स्यात् । तस्माल्लक्ष्यलक्षणोऽपि[3] ष्ट इति । एतदप्य-युक्तमित्याह ।

---

1) མཚན་ཉིད་འཇུག་པ་མ་ཡིན་ན། མཚན་གཞི་འཐད་པར་མི་འགྱུར་རོ། མཚན་གཞི་འཐད་པ་མ་ཡིན་ན། མཚན་ཉིད་ཀྱང་ནི་ཡོད་མ་ཡིན།།

2) = མཇུག་བསྡུས་པ་

3) Contre la grammaire.

लक्ष्यलक्षणनिर्मुक्तो नैव भावोऽपि विद्यते।[1] ५

लक्ष्यलक्षणे यथा न स्तस्तथोक्तं प्राक्। यदानयोरभावस्तदा लक्ष्यलक्षणरहित-त्वादाकाशकुसुमवन्नास्त्याकाशं॥

यद्याकाशं भावो न भवत्यभावस्तर्ह्यस्तु॥ एतदपि नास्ति। यस्मात्

अविद्यमाने भावे च कस्याभावो भविष्यति।

यदाकाशं भावो न भवति तदा भावस्यासत्त्वे कस्याभावः कल्प्यतां। वक्ष्यति हि।[2]

भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति।

भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः॥ इति।

तस्माद्भावाभावादभावोऽप्याकाशं न संभवति॥ रूपाभावश्चाकाशमिति व्यवस्था-प्यते। यद्यपि रूपं स्यात्तदा रूपाभाव आकाशमिति स्यात्। यदा च यथोक्तेन न्यायेन रूपमेव नास्ति। तदा कस्याभाव आकाशं स्यात्॥

अत्राह। विद्येते एव भावाभावौ तत्परीक्षकसद्भावात्। अस्ति च भवान् भावा-[illegible]भावयोः परीक्षकः। य एव आह।

[illegible]ने च [Tib. 51b] कस्याभावो भविष्यति।

[illegible]परीक्षयावपि भावाभावौ विद्येते इति॥

उच्यते। एत[illegible]

भावाभावविधर्मा च [illegible]

---

1) དེ་ཕྱིར་ མཚན་གཞི་ ཡོད་མིན་ཏེ། མཚན་ཉིད་ ཡོད་པ་ཉིད་ མ་ཡིན། མཚན་གཞི་ མཚན་ཉིད་ མ་གཏོགས་པར། དངོས་པོ་ ཡང་ ནི་ ཡོད་མ་ཡིན།།

2) Ci-dessous Chapitre XV. 5. — Voir XXV. 8.

3) *vidharman* = *visadṛçadharman*. — P. W.: gegen das Gesetz sich verfahrend.

4) Mss. *bhāvābhāvacca vetti kaḥ*. — *avaiti*, voir ci-dessous *avagamaka*.

5) དངོས་པོ་ ཡོད་པ་ མ་ཡིན་ན། དངོས་མེད་ གང་གི་ ཡིན་པར་འགྱུར། དངོས་

स्यातां भावाभावौ यदि । तदा तयोः परीक्षको भावो वा स्यादभावो वा । यदि भाव इष्यते तस्य ।

लक्ष्यलक्षणनिर्मुक्तो नैव भावोऽपि विद्यते ।

इत्युक्तं दूषणं । अथाभावः ।

अविद्यमाने भावे च कस्याभावो भविष्यति ।

इत्यत्रोक्तमेतद्दूषणं । न च [39b] भावाभावविसदृशधर्मा कश्चित्तृतीयः पदार्थोऽस्ति योऽनयोरवगमकः इति नास्ति भावाभावयोः परीक्षकः ॥

अत एवोक्तं भगवता ।

भावान्भावानिति यः प्रजानति
स सर्वभावेषु न जातु सज्जते ।
यः सर्वभावेषु न जातु सज्जते
स आनिमित्तं स्पृशते समाधिमिति[1] ॥

तथा[2] ।

[3]येऽपि च चित्तयि शून्यकधर्मान्
सोऽपि कुमार्गप्रपन्नकु बालः ।
अक्षरकीर्तित शून्यकधर्माः
ते च अन [illegible]

དང་ དངོས་མེད་ [illegible] དངོས་ དང་ དངོས་མེད་ ཀྱིས།། — D'après Mdo XVII *mi-h*[illegible].

1) Cette stance est citée ci dessous fol. 79 a et 82b. — Les Mss. hésitent entre *prajāyati* et *prajānāti* — *ānimitta* (མཚན་མ་མེད) est correct, voir ci-dessus p. 24, n. 8 et 123, n. 3.

2) Les deux stances qui suivent sont citées fol. 103b et Chap. XXI *in fine.*

3) Tib. གང་དག་ ''' དེ་དག་ = *ye*.. .*te*.

शान्त पशान्त य चित्तपि धर्मान् [Tib. 52a]
सोऽपि च चित्त(1) न जातु न भूतः ।
चित्तवितर्कणा(2) सर्वि पपञ्चाः
सूक्ष्म(3) अचिन्तिय बुध्यथ(4) धर्मान् । इति विस्तरः ॥

इदानीं प्रतिपादितमर्थं निगमयन्नाह ।

(5)तस्मान्न भावो नाभावो न लक्ष्यं नापि लक्षणं ।

आकाशं ।

इति । यथा चाकाशं । एवं ।

आकाशसमा धातवः पञ्च ये परे(6) ॥ ७

पृथिव्यादिधातवो ये पञ्च परे ऽवशिष्यन्ते । तेऽप्याकाशवद्भावाभाव[ल]क्ष्य[लक्ष]-(7)णपरिकल्पस्वरूपरहिताः परिज्ञेया इत्यर्थः ॥ तदेवं पदार्थानां स्वभावे व्यवस्थितेऽवि-द्यातिमिरोपहतमतिनयनतयाऽनादिसंसाराभ्यस्ततया(8) भावाभावादिविपरीतदर्शना निर्वा-णानुग[ा]म्यविपरीतनैः(9)स्वभाव्यदर्शनसन्मार्गपरिभ्रष्टाः ।

[illegible] cittu, cinta = སེམས་དཔའ. — na jātu = ནམ་ཡང་

[illegible]

4) Varia[illegible]

5) Mss. *yasmān*.

6) དེ་ཕྱིར་ ནམ་མཁའ་ དངོས་པོ་ མེད། དངོས་མེད་ [illegible] ཚན་གཞི་ མེད། མཚན་ཉིད་ མ་ཡིན་ ཁམས་ ལྔ་པོ། གཞན་ གང་དག་ ཀྱང་ ནམ་མཁའ་མཚུངས།།

7) Mss. °*abhāvakṣyaṇapari*°. — Tib. = °*abhāvalakṣyalakṣaṇarahitāḥ parijñeyāḥ*. — *parikalpasvarūpa* n'est pas traduit, et le texte est certainement altéré: les *dhātus* sont *parikalpasvarūpa* parce qu'ils sont *bhāva*. . . . .*lakṣaṇarahita*.

8) D'après le Tib. il faut lire: °*abhyastabhāva*°.

9) Mss. °*viparītanaibhaga*.

अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः ।
भावानां ते न पश्यन्ति द्रष्टव्योपशमं शिवं[1] ॥ ८

द्रष्टव्योपशमं शिवलक्षणं सर्वकल्पनाजालरहितं ज्ञानज्ञेयनिवृत्तस्वभावं शिवं परमार्थस्वभावं । परमार्थमजरममरमप्रपञ्चं निर्वाणं शून्यतास्वभावं ते न पश्यन्ति मन्दबुद्धितया । अस्तित्वं नास्तित्वं चाभिनिविष्टाः [40a] सन्त इति ।

यथोक्तमार्यरत्नावल्यां ।

नास्तिको दुर्गतिं याति सुगतिं यात्यनास्तिकः ।
यथाभूतपरिज्ञानान्मोक्षमद्वयनिःश्रितः ॥ इति[2] ॥

आर्यसमाधिराजे[3] चोक्तं भगवता । [Tib. 52b]

अस्तीति नास्तीति उभेऽपि अन्ता
शुद्धी अशुद्धीति इमेऽपि अन्ता ।
तस्मादुभे अन्त विवर्जयित्वा
मध्येऽपि स्थानं न करोति पण्डितः[4] ॥
अस्तीति नास्तीति विवाद एषः
शुद्धी अशुद्धीति अयं विवादः ।

---

1) སྣོ་ཆུང་ གང་[illegible] དང་ མེད་ཉིད་དུ། བྱ་བ་ ངས་ དེ་ བལྟ་[illegible]

[illegible]mation (*aparāda*, *samāropa*) constituent les deux *antas* ([illegible]) et prolongent le *saṃsāra*, étant des vues également inexactes[illegible]connaissance des choses telles qu'elles sont, c'est le chemin du *mokṣa* (= [illegible]*vāṇa* = *paramārtha* = *tattva*).

3) = p. 30, 7--10, de l'édition de la B. T. S.; ces stances sont citées ci-dessous fol. 80b. — Le tibétain a °*sūtra*.

4) On ne peut pas dire que le sage (*paṇḍita* = *mādhyamika*) prenne une position intermédiaire, car, puisqu'il n'y a plus d'*antas*, il n'y a plus de *madhya*. Le chemin milieu est, par le fait, un pur néant.

विवादप्राप्त्या[1] न दुखं प्रशाम्यते[2]

अविवादप्राप्त्या[1] च[3] दुखं निरुध्यते[4] ॥ इति ।

तस्मादसंभव[5] एव यत्सांसारिकेण मार्गेण निर्वाणमधिगम्यत इति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ धातुपरीक्षा नाम पञ्चमं प्रकरणं ॥

---

1) Mss. (ici et fol. 80) *prāptā*; B. T. S. *prāptyā*; Tib. རྩོད་པར་ འགྱུར་བ = *viradan*.

2) B. T. S. *nirudhyate*; fol. 80b *praçāmyati*; Tib. ཞི.

3) Mss. (ici et fol. 80) *na*.

4) B. T. S. *smṛter upasthānakathaṃ kathetvā*.

5) Mss. *asaṃbha eva*, *asambhava yat*. — *mārgeṇa* dans Cambridge seul

VI.

रागरक्तपरीक्षा नाम षष्ठं प्रकरणं

अत्राह । विद्यन्त एव स्कन्धा[यतन]धातवः । कुतः । तदाश्रयसंक्लेशोपलब्धेः ॥ इह यन्नास्ति न तदा[श्रय]संक्लेशोपलब्धिरस्ति बन्ध्याडुहितुरिव बन्ध्यासूनोः । सन्ति च रागादयः क्लेशाः संक्लेशनिबन्धनं ॥ (1) यथोक्तं भगवता ' (2) बालो भिक्षवो ऽश्रुतवान् पृथग्जनः प्रज्ञप्तिम(3)नुपतितः चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयान्यभिनिविशते ' सोऽभिनिविष्टः सन् रागमुत्पादयति ' रक्तः सन् रागजं द्वेषजं मोहजं कर्माभिसंस्क(4)रोति कायेन वाचा मनसेति विस्तरः ॥

---

1) Voir Çikṣās. 252. 10 et note; Bodhicaryāv t IX p. 308–9; cf. dessous VIII initio et XXVI. 10.

2) Voir la note suivante.

3) Abhidharma k. v. (Soc. As.) 236d 7 [redacted] logue au nôtre: *bālo 'çrutavān pṛthagjana i*[redacted] *pupattir laukikā prajñā nāsti sa bāl*[redacted]*n. yasya-dhigamajā satyābhisamayajā* [redacted]*m anupatita iti yathā saṃjñā yathā v*[redacted]*. teṣām iti kāmādīnām chandarāga iti.* [redacted]

Le tib[redacted] Voir ci-dessus p. 28, n. 1. — *prajñaptisat* = [redacted] (Bodhicaryāv VIII. 101).

(a) [redacted] *papattilohikā.*

4) Il est dit de *l'anuçaya* (Abhidh. k. v., Soc. As., 338b 1): *karmabhavam abhinirharatīti = taṃ punarbhavābhinirvṛttaye janayatīti.* — Je crois que l'expression *karma abhisaṃskaroti*, qui ne se dit pas de *l'arhat* mais d'un *pṛthagjana anuçayavān*, comporte la même notion; voir Mhv. I, 26. 7 et la note p. 391: on souffre dans l'enfer parce qu'on y emporte un *karman abhisaṃskṛta*, un *karman* fécond. — L'expression *stambhaṃ mantreṇa abhisaṃskṛtya* = *sādhayitvā* peut être comparée.

उच्यते । स्युः स्कन्धायतनधातवो यदि रागादय एव क्लेशाः[1] स्युः[2] ॥ इह्यपं रागः परिकल्प्यमानो बालपृथग्जनैः सति रक्ते[3] नरे परिकल्प्येतासति वा । [Tib. 53a] उभयथा च न युज्यत इत्याह ।

रागाद्यदि भवेत्पूर्वं रक्तो रागतिर[40b]स्कृतः ।

तं प्रतीत्य भवेद्रागो रक्ते रागो भवेत्सति[4] ॥ १

तत्र रागः सक्तिरध्यवसानं सङ्गोऽभिनिवेश इति पर्यायाः । रक्तो रागाश्रयः । स यदि रक्तो रागात्पूर्वं रागतिरस्कृतो रा[ग]रहितो भवेत्, तदा तं रागतिरःकृतं रक्तं प्रतीत्य रागो भवेत् । एवं सति रक्ते रागो भवेदिति युक्तं । न त्वेवं संभवति यद्रागरहितो रक्तः स्यादर्हतामपि रागप्रसङ्गात् ॥

यद्येवं सति रक्ते न रागः, असति तर्हि रक्ते रागोऽस्तु । एतदप्ययुक्तमित्याह ।

रक्तेऽसति पुना रागः कुत एव भविष्यति ।

यदा सति रक्ते रागो नास्ति, तदा कथमसति रक्ते निराश्रयो रागः सेत्स्यति । न [illegible] संभवतीति ॥

[illegible] पि रक्तोऽस्त्यप्रतिषेधात् । न च राग-

मत्सरूणा र[illegible]ते । स्याद्रागो यदि रक्तः स्यात्,[5] यस्मादयं रक्त इष्यमाणः सति वा राग[illegible] परिकल्प्येतासति वा । उभयथा च नोपपद्यत इत्याह ।

---

1) Manque dans le tibétain.

2) Le tibétain ajoute: *na tu santi*

3) *nare* manque dans le tibétain.

4) གལ་ཏེ་ འདོད་ཆགས་ སྔ་རོལ་ན། འདོད་ཆགས་མེད་པའི་ ཆགས་ ཡོད་ན། དེ་ལ་ བརྟེན་ནས་ འདོད་ཆགས་ ཡོད། ཆགས་ཡོད་ འདོད་ཆགས་ ཡོད་པར་འགྱུར།།

5) Le tibétain ajoute: *na tv asti.*

सति वासति वा रागे रक्तोऽप्येष समः क्रमः[1] ॥ २

तत्र यदि सति रागे रक्तः परिकल्प्येत । तत्राप्येष एव रागानुपपत्तिक्रमोऽनन्तरोक्तो रक्तेऽपि तुल्यः ।

रक्ताद्यदि भवेत्पूर्वं रागो रक्ततिरस्कृतः ।

इत्यादि[2] । अथासति रागे रक्त इष्यते । एतदप्ययुक्तं । यस्मात्

रागेऽसति पुना रक्तः कुत एव भविष्यति । इति[3] ।

तस्माद्रक्तोऽपि नास्ति । रागरक्ताभावाच्च स्कन्धादयोऽपि न सन्तीति ॥

अत्राह । नैव हि रागरक्तयोः पौर्वापर्येण संभवो यत इदं दूषणं स्यात् । किं तर्हि रागरक्तयोः सहैवोद्भवः । चित्तसहभूतेन रागेण हि चित्तं रज्यते । तच्च रक्तमिति । अतो विद्येते एव रागरक्ताविति ॥ उच्यते । एवमपि ।

सहैव पुनरुद्भूतिर्न युक्ता [41 a] रागरक्तयोः ।

सहोत्पादोऽपि न युक्तो रागरक्तयोः । यस्मात् ।

भवेतां रागरक्तौ हि निरपेक्षौ परस्परं[4] ॥ ३

सहभावात् । सव्येतरगोविषाणवदित्यभिप्रायः ॥ अपि [redacted]
एकत्वे परिकल्प्येत पृथक्त्वे वा । तत्र [redacted]

नैकत्वे [redacted]

1) ཆགས་[redacted]མ་གྱུར་ན། འདོད་ཆགས་ཡོད་པར་ག་ལ་འགྱུར། ཆགས་པ་ལ་ཡང་འདོད་ཆགས་ནི། ཡོད་དམ་མེད་ཀྱང་རིམ་པ་མཚུངས།།

2) Ci-dessus VI. 1.

3) Ci-dessus VI. 2.

4) འདོད་ཆགས་དང་ནི་ཆགས་པ་དང་། ལྷན་ཅིག་ཉིད་དུ་སྐྱེ་མི་རིགས། འདི་ལྟར་འདོད་ཆགས་ཆགས་པ་དག། ཕན་ཚུན་བལྟོས་པ་མེད་པར་འགྱུར།།

कस्मात्पुनर्नास्तीत्याह ।

न तेनैव हि तत्सह ।

न [Tib. 54a] हि रागस्वात्मा रागाद्व्यतिरिक्तो रागेण सहेति व्यपदिश्यते ॥ इदानीं पृथक्त्वेऽपि सहभावाभावमाह ।

पृथक्त्वे सहभावोऽथ कुत एव भविष्यति[(1)] ॥ ४

न हि पृथग्भूतयोरालोकान्धकारयोः संसारनिर्वाणयोर्वा सहभावो दृष्ट इति ॥ किं चान्यत् ।

एकत्वे सहभावश्चेत् । स्यात्सहायं विनापि सः ।
पृथक्त्वे सहभावश्चेत् । स्यात्सहायं विनापि सः[(2)] ॥ ५

यद्येकत्वे सहभावः स्यात् । तदा यत्र यत्रैकत्वं तत्र तत्र सहभाव इत्येकस्यापि सहभावः स्यात् । पृथक्त्वेऽपि सहभाव इष्यमाणे । यत्र यत्र पृथक्त्वं तत्र तत्र सहभाव इत्यश्वादिव्यतिरिक्तस्य पृथगवस्थितस्य गोरसहायस्य सहभावः स्यात् ॥ किं च ।

पृथक्त्वे सहभावश्च यदि किं रागरक्तयोः ।
[redacted] पृथक्पृथग्भावः सहभावो[(3)] यतस्तयोः[(4)] ॥ ६

[redacted] ཅིག་ མེད། ཅི་སྟེ ཐ་དད་ཉིད་ ཡིན་ན། ལྷན་ཅིག [redacted]

2) གལ་ཏེ་ གཅིག་པུ་ ལྷན་ཅིག་ན། གྲོགས་ [redacted] འགྱུར་རོ། གལ་ཏེ་ ཐ་དད་ ལྷན་ཅིག་ན། གྲོགས་མེད་པར་ ཡང་ དེར་ འགྱུར་རོ།།

3) Mss. *sahabhāvas tatas tayoḥ*. — Lecture confirmée par le tibétain; mais voir le commentaire.

4) གལ་ཏེ་ ཐ་དད་ ལྷན་ཅིག་ན། ཅི་ཕྱིར་ འདོད་ཆགས་ཆགས་པ་དག། ཐ་དད་ ཉིད་དུ་ གྲུབ་འགྱུར་རམ། དེས་ན་ དེ་གཉིས་ ལྷན་ཅིག་ འགྱུར།།

पृथक्के सहभावश्च रागरक्तयोः परिकल्प्यते। किमनयोः सिद्धः पृथक्पृथग्भावः। किं रागनिरपेक्षो रक्तः सिद्धो यतस्तयोः सहभावः स्यात्। पृथक्पृथक्सिद्धयोरेव हि गवाश्वयोः सहभावो दृष्टः। न चैवं रागरक्तौ पृथक्पृथक्सिद्धाविति नास्त्यनयोः सहभावः॥

अथ वा पृथक् पृथगसिद्धयोर्न सह[Tib. 54b]भाव इति कृत्वा।

सिद्धः पृथक् पृथग्भावो यदि वा [41b] रागरक्तयोः।

परिकल्प्यते भवता। किमिदानीं सहभावेनाकिंचित्करेण परिकल्पितेनेत्याह।

सहभावं किमर्थं तु परिकल्पयसे तयोः॥[1] ७

रागरक्तयोः सिद्ध्यर्थं सहभावः परिकल्प्यते। स च पृथक्पृथगसिद्धयोर्नास्तीति पृथक्पृथक्सिद्धिरभ्युपगम्यते त्वया। नन्वेवं सति सिद्धत्वात्किमनयोः सहभावेन कृत्यं॥

अथ।

पृथङ्न सिध्यतीत्येवं सहभावं विकाङ्क्षसि।

पृथक् पृथग्रागरक्तयोः सिद्धिर्नास्तीति कृत्वा यद्यनयोः सहभावमि[illegible] पृथक्पृथगसिद्धयोर्नास्तीति।

सहभावप्रसिद्ध्यर्थं पृथक्त्वं भ[illegible]

नन्वेवं सति [illegible]सिद्धौ सत्यां कस्य सिद्धिरस्तु। यावता [illegible]

---

1) གལ་ཏེ་ འདོད་ཆགས་ཆགས་པ་དག །ཐ་དད་ཉིད་དུ་ གྲུབ་འགྱུར་ན། དེ་དག་ལྷན་ཅིག་ཉིད་དུ་ནི། ཅི་ཡི་ཕྱིར་ན་ ཡོངས་སུ་རྟོག།

2) ཐ་དད་ གྲུབ་པར་ མ་གྱུར་པས། དེ་ཕྱིར་ ལྷན་ཅིག་ འདོད་བྱེད་ན། ལྷན་ཅིག་རབ་ཏུ་བསྒྲུབ་པའི་ཕྱིར། ཐ་དད་ཉིད་དུ་ ཡང་ འདོད་དམ།

पृथग्भावाप्रसिद्धेश्च सहभावो न सिध्यति ।
कतमस्मिन् पृथग्भावे सहभावं सतीच्छसि[1] ॥ ९

नास्त्येव स पृथग्भावः सहभावानपेक्षो यस्मिन् पृथग्भावे सति सहभावसिद्धिः स्यादित्यसंभावयन्नाह[2] ।

कतमस्मिन् पृथग्भावे सहभावं सतीच्छसि ॥

तदेवं यथोदितविचारपरामर्शेन रागरक्तयोरसिद्धिं निगमयन्नाह ।

एवं रक्तेन रागस्य सिद्धिर्न सह नासह । इति ।

यथा च रागरक्तयोर्न पौर्वापर्येण [Tib. 55a] सिद्धिर्नापि सहभावेन ' एवं सर्वभावानामपीत्यतिदिशन्नाह ।

रागवत्सर्वधर्माणां सिद्धिर्न सह नासह[3] ॥ १०

इति द्वेषद्विष्टमोहमूढादीनां रागरक्तवदसिद्धिर्योज्यते[4] [42a] ॥

[redacted] यथोक्तं[5] भगवता ।

[redacted] ལྐབ་མི་འགྱུར། ཐ་དད་

དངོས་པོ་ གང་ ཡོད་ན། ཇི [redacted]

2) Voir P. W. *sub voc.* — མི་སྲིད་པར་ [redacted]

3) དེ་ལྟར་ འདོད་ཆགས་ཆགས་པ་དག། ལྷན་ཅིག་ ལྷན་ཅིག་མིན་ མི་འགྲུབ། འདོད་ཆགས་བཞིན་དུ་ ཆོས་རྣམས་ཀུན། ལྷན་ཅིག་ ལྷན་ཅིག་མིན་ མི་འགྲུབ॥ = *evam rāgaraktayoḥ siddhir*...

4) སྦྱར་བར་བྱའོ།

5) Samādhirāje; B. T. S. p. 28,1-11 (cf. 25.7) et ci-dessous XXIII, *ad finem*. — Notre texte est abrégé. — Cf. Çikṣās. 263.

यो रज्येत यत्र वा रज्येत येन वा रज्येत । यो दुष्येत[1] यत्र वा दुष्येत येन वा दुष्येत । यो मुह्येत यत्र वा मुह्येत येन वा मुह्येत । स तं धर्मं न समनुपश्यति तं धर्मं नोपलभते । स तं धर्ममसमनुपश्यन्ननुपलभमानोऽरक्तोऽदुष्टोऽमूढोऽविपर्यस्तचित्तः समाहित इत्युच्यते । तीर्णः[2] पारग इत्युच्यते । क्षेमप्राप्त इत्युच्यते । अभयप्राप्त इत्युच्यते । यावत् क्षीणास्रव इत्युच्यते । निःक्लेशो वशीभूतः सुविमुक्तचित्तः सुविमुक्तप्रज्ञ आजानेयो महानागः कृतकृत्यः कृतकरणीयः अपहृत[3]भारोऽनुप्राप्तस्वकार्थः परिक्षीणभवसंयोजनः सम्यगाज्ञासुविमुक्तचित्तः सर्वचेतोवशिता[4]परमपारमिप्राप्तः श्रमण इत्युच्यते । इति विस्तरः ॥

तथा[5] ।

ये रागदोष[6]मद[7]मोहसभाव[8] जात्वा[9]
संकल्पहेतुजनितं वितथप्रवृत्तं ।
न विकल्पयन्ति न विरागमपोह्य तेषाम् [Tib. 55b]

---

1) La confusion entre *dviṣ* et *duṣ* est [redacted]
ཞེ་སྡང་ = *dviṣ*.

2) B. T. S. [redacted]

3) Mss. [redacted] du « Porteur du fardeau »

4) Mhv. [redacted]

5) Mètre [redacted]

6) Mss. *dveṣa*.

7) Mss. *tathā moha*, Tib. རྨོངས་པ་.

8) Mss. *svabhāva*.

9) Mss. *jñātvā*.

---[(1)] सर्वभवभावविभावितानामिति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ रागरक्तपरीक्षा नाम षष्ठं प्रकरणं ॥

---

1) Mss. *teṣāmāçusarva°*, *°āsu°*. — *apīha* à la troisième ligne paraît douteux. — Tib. ཆགས་བྲལ་ མི་འགྱུར་བའི། སྒོམ་པ་ དེ་དག་ གནས་ ནི་ དངོས་པོ་ཐམས་ ཅད་ ཡིན།། = *na virāgayanti vibhāvitānāṃ teṣāṃ sthānam eva sarvabhārāḥ* (??)

VII.

संस्कृतपरीक्षा नाम सप्तमं प्रकरणं

अत्राह । विद्यन्त एव संस्कृतस्वभावाः स्कन्धायतनधातव उत्पादादिसंस्कृतलक्षणसद्भावात् । उक्तं[1] हि भगवता त्रीणीमानि भिक्षवः संस्कृतस्य संस्कृतलक्षणानि[2] ' संस्कृतस्य भिक्षव उत्पादोऽपि प्रज्ञायते ' व्ययोऽपि स्थित्यन्यथात्वमपि[3] ' इति । न चाविद्यमानस्य खरविषाणस्येव जात्यादिलक्षणम[42 b]स्ति । तस्मात्संस्कृतलक्षणोपदेशाद्विद्यन्त एव स्कन्धायतनधातव इति ॥

उच्यते । स्युः स्कन्धायतनधातवः संस्कृतस्वभावास्तावकेन मतेन यदि जात्यादिलक्षणमेव भवेत् । इहायमुत्पादः संस्कृतलक्षणत्वेनेष्यमाणः संस्कृतो वा तल्लक्षणत्वेनेष्यते ऽसंस्कृतो वा । तत्र '

यदि संस्कृत उत्पादस्तत्र युक्ता त्रिलक्षणी ।

त्रयाणां लक्षणानां समाहारस्त्रिलक्षणी [redacted] सर्वसंस्कृताव्यभिचारिणीति [redacted] त्पादेऽपि त्रिलक्षणी [redacted] संस्कृतलक्षणत्वं ॥

---

1) Même [redacted] n. k. v. (Soc. As.) 231 b 8: *yo 'yam utpādaḥ pratītyasamutpa*[redacted]*ntarīyair nityaḥ parikalpyate sa saṃskṛtalakṣaṇam uktam. trīṇīmāni* [redacted] — Voir Aṅg. N. I p. 152: *tiṇ' imāni bhikkhave....uppādo paññāyati vayo paññāyati ṭhitassa aññathattaṃ paññāyati.....* — Le même texte dans Majjhima. — Cité Kathāv. I p. 61... *ṭhitānaṃ aññathattaṃ.*

Sur *anyathābhāva*, voir Saṃ. N. II p. 274; Bhāmati, 11. 9.

2) *saṃskṛta°* n'est pas traduit dans le tibétain.

3) གནས་པ་ལས = *sthiter a°*.

4) Mss. *rūpādival lakṣ(y)ate. ut°.*

[Tib. 56a] अथोत्पादेऽपि त्रिलक्षणी नेष्यते । तदा त्रिलक्षणीरहितत्वादाकाशवत् संस्कृतलक्षणत्वमस्यावहीयत इत्याह ।

अथासंस्कृत उत्पादः कथं संस्कृतलक्षणं ॥ १ [1]

इति । नैतत्संस्कृतलक्षणमित्यभिप्रायः ॥

अपि चेम उत्पादादयः संस्कृतस्य लक्षणत्वेन परिकल्प्यमाना व्यस्ता वा पृथग्वा लक्षणत्वेन परिकल्प्येरन् । समस्ता वा सहभूता वा । उभयथा च न युज्यत इत्याह ।

उत्पादाद्यास्त्रयो व्यस्ता नालं लक्षणकर्मणि ।
संस्कृतस्य समस्ताः स्युरेकत्र कथमेकदा ॥ २ [2]

तत्र व्यस्ता लक्षणकर्मणि न युज्यन्ते ॥ यद्युत्पादकाले स्थितिभङ्गौ न स्यातां । तदा स्थितिभङ्गरहितस्याकाशस्येव संस्कृतलक्षणत्वेनानुपपन्न एवोत्पादः ।

अथ स्थितिकाल उत्पादभङ्गौ न स्तस्तदा तद्रहितस्य स्थितिः स्यात् । उत्पादभङ्गरहितश्च पदार्थो [43a] नास्त्येवेति नास्याविद्यमानस्य खपुष्पवत् स्थितिर्युज्यते । [illegible] च । स्थितियुक्तस्य पश्चादनित्यतयापि योगो न स्यात् । तद्विरोधिधर्माक्रान्तत्वात् ॥ [illegible] भूत्वा पश्चादशाश्वत इति । न चैकपदार्थः शाश्वतश्चाशाश्वतश्च युक्त [illegible] नुत्पन्नस्य स्थितिरहितस्य खपुष्पस्य [Tib. 56b] [illegible] व्यस्ता नालं लक्षणकर्मणि । नालं न पर्याप्ता इत्यर्थः ॥

---

1) གལ་ཏེ་ སྐྱེ་བ་ འདུས་བྱས་ ན། དེ་ལ་ མཚན་ཉིད་གསུམ་[illegible]འགྱུར། ཇི་སྟེ་ སྐྱེ་བ་ འདུས་མ་བྱས། ཇི་ལྟར་ འདུས་བྱས་མཚན་ཉིད་ ཡིན།།

2) སྐྱེ་བ་ལ་སོགས་ སོ་སོ་ཡིས། འདུས་བྱས་ མཚན་ཉིད་བྱ་བར་ ནི། ནུས་མིན་ གཅིག་ལ་ དུས་གཅིག་ཏུ། འདུས་པ་ ཡང་ ནི་ ཇི་ལྟར་ རུང་།།

इदानीं समस्ता अपि न युज्यन्त इत्याह ।

समस्ताः स्युरेकत्र कथमेकदा ।

एकत्र पदार्थे ' एकस्मिन् काले ' परस्परविरुद्धत्वाद्रागवैराग्यवदालोकान्धकारवद्वा न युज्यन्त इत्यभिप्रायः । यस्मिन्नेव क्षणे पदार्थो जायते तस्मिन्नेव तिष्ठति विनश्यति चेति कः सचेताः प्रतिपद्यते । तस्मात्समस्तानामप्युत्पादादीनां संस्कृतस्य लक्षणकर्मणि नास्ति सामर्थ्यं ॥

अथ यदुक्तं यदि संस्कृत उत्पाद इत्यादि[1] ' तेन यद्युत्पादादीनां त्रिलक्षणी प्राप्ता प्रसक्ता ततः को दोषः । अथासंस्कृत एवमप्यदोष इति ॥ उच्यते ।

उत्पादस्थितिभङ्गानामन्यत्संस्कृतलक्षणं ।
अस्ति चेदनवस्थैवं नास्ति चेत्ते न संस्कृताः[2] ॥ ३

ननु च पक्षद्वयेऽपि विहित एव दोषः ' तत्र किं पुनरुक्ताभिधानेनेति । सत्यमुक्तो दोषः ' स खलु नाचार्येण किं तर्हि वृत्तिकारेण ॥

[3] अथ पूर्वप्रतिज्ञातमेव दूषणान्तराभिधानेन स्पष्टीकरणार्थं [redacted] भिहितवान् । यद्युत्पादस्थितिभङ्गानामन्यदुत्पादादिकं संस्कृतलक्ष [redacted] मप्यन्यत्तेषामप्यन्यदित्यपर्यवसानदोषः[4] स्यात् [redacted] उत्तरकालमपरं भवेदिति व्यवस्था [redacted] यभिप्रायः ॥ अथ वा पूर्वं मुख्यत्वादुत्पा [redacted] । नास्ति चेत्ते न संस्कृता इति गतार्थमेतत् [redacted]

1) VII. 1.

2) སྐྱེ་ དང་ [redacted] དང་ འཇིག་རྣམས་ལས། འདུས་བྱས་མཚན་ཉིད་ གཞན་ཞིག་ ན། གལ་ཏེ་ ཡོད་ན་ ཐུག་པ་མེད། མེད་ན་ དེ་དག་ འདུས་བྱས་ མིན།།

3) Au lieu de ཅི་སྟེ = *atha*, le tibétain porte རྣམ་པ་གཅིག་ཏུ་ན་.

4) *teṣām apy anyat* non répété dans le tibétain.

अत्राहुः सांमितीयाः[1] । सन्ति चोत्पादादीनामुत्पादादयो ' न चानवस्थाप्रसङ्गो लक्षणानुलक्षणानां[2] परस्परनिष्पादकत्वात् । यस्मादिह संस्कृतधर्मः कुशलः क्लिष्टो वा उत्पद्यमान आत्मना पञ्चदश उत्पद्यन्ते[3][4] । स धर्मस्तस्य चोत्पादः समन्वागमः स्थितिर्जरा ऽनित्यता । यद्यसौ धर्मः क्लिष्टो भवति तस्य मिथ्याविमुक्तिः । अथ शुभस्तस्य सम्यग्विमुक्तिः । यदि नैर्याणिको भवति तस्य नैर्याणिकता । अथानैर्याणिक[स्तस्यानैर्याणिक]तेत्येष परिवारः । इदानीमुत्पादस्यापर उत्पादः ' यावद[नैर्याणिकता[5]]नैर्याणिकतेत्येष [परिवारस्य[6]] परिवारः ॥ तत्र योऽयं मौल उत्पादः स आत्मानं विहायान्यान्[7] चतुर्दश धर्मान् जनयति । उत्पादोत्पादसंज्ञकस्त्वनुलक्षणभूत [Tib. 57b] उत्पादो मौलमेवोत्पादं जनयति । एवं यावदनैर्याणिकता चतुर्दश धर्मान्न निर्याणयति ' न तन्निर्वाणं प्रा-

---

1) མང་པོས་བཀུར་བ་. = Wassilieff 231 (254) ཀུན་གྱིས་བཀུར་བ (Sammatīyas). — Cf. 79 (85), 233 (251), 254 (280, n. *ad finem*). — Voir Kern, Bouddhisme, App. — Les Sāṃmitīyas (je conserve la lecture de nos Mss.) représentent le Petit Véhicule dans la Madhyamakavṛtti.

[redacted] མཐུན་པའི་མཚན་ཉིད་

[redacted] ཉིད་ དང་ བཅོ་ལྔ་ སྐྱེ་བར་འགྱུར་ཏེ། ཆོས་ དེ་ ཉིད་ [redacted] *māne ātmanā [saha] pañcadaça utpadya*[redacted] *saṃskṛta* = quinze *dharmas*.

4) Soit un [redacted] *la*) *utpāda* (1) *samanvāgama* (2), *sthiti* [redacted] *yagvimukti* (6), *nairyāṇikatā* ou *anairyāṇika*[redacted] un *parivāra* composé des *anulakṣaṇas*: *utpādotpāda*, … [redacted] *ryāṇikatā*. — Soit 1 + 7 + 7 = 15.

5) ངེས་པར་འབྱུང་བ་མ་ཡིན་པའི་ ངེས་པར་འབྱུང་བ་མ་[redacted]་ཉིད *anairyāṇika-a°*; mais nous avons ci-dessous la même lecture correspondant au sanscrit *°katā-a°*.

6) འཁོར་གྱི་ འཁོར་.

7) Mss. *viharasyonyān*. = མ་གཏོགས་པ་.

पयति इत्यर्थः । [अ]नैर्याणिक(1)तानैर्याणिकता(2) (3तु प्रापयति अनैर्याणिकता(4)मनैर्याणिकतामेवेति3) ॥

तदेवमुत्पादादीनामनवस्थां परिहरन्नाह ।

उत्पादोत्पाद उत्पादो मूलोत्पादस्य केवलं ।
उत्पादोत्पादमुत्पादो मौलो जनयते पुनः(5) ॥ ४

द्विविधो ह्युत्पादः । एको मौल(6) उत्पादः । अपरश्च उत्पादोत्पादसंज्ञकः । उत्पादस्योत्पादः उत्पादोत्पाद इति कृत्वा । तत्र योऽयमुत्पादोत्पादसंज्ञक उत्पादः स मूलोत्पादस्य केवलमुत्पादकः । तं चेदानीमुत्पादोत्पादाख्यमुत्पा[44a]दं मौल उत्पादो जनयति । तदेवं परस्परनिर्वर्तनादस्ति च त्रिलक्षणो उत्पादादीनां न चानवस्थाप्रसङ्ग इति ॥

---

1) Tibétain, comme ci-dessus p. 148 n. 5. — Mss. °*katā 'n*°. — Le mot est formé comme *utpādotpāda*.

2) Mss. °*katām tu prāpayati* |

3—3) ཁོ་ན་ ངེས་པར་འབྱུང་བར་མི་བྱེད་དོ་ ཞེས་བྱ་བའི་ བར་དུ་ ཡིན་ནོ། = *na niryaṇayati* ....

4) Mss. °*katā 'n*°. — L'*anairyāṇikaṭā-anairyāṇikatā* fait atteindre l'*anairyānikata* à l'*anairyāṇikatā*. De même l'*utpādotpāda* engendre le *maula utpāda*.

5) སྐྱེ་བའི་སྐྱེ་བས་ རྩ་བ་ཡི། སྐྱེ་བ་ འབའ་ཞིག་ སྐྱེད་པར་བྱེད། རྩ་བའི་སྐྱེ་བས་ སྐྱེ་བ་ཡི། སྐྱེ་བ འདང་ སྐྱེད་པར་བྱེད་པ་ཡིན།། Mdo XVII termine le premier pada: *skye-ba-yis*.

Le *maula utpāda* crée les quatorze autres *dharmas* (six *lakṣaṇas*, sept *anulakṣanas*, le *saṁskṛta*); il est créé par l'*utpādotpāda*.

6) རྩ་བའི་སྐྱེ་བ་

अत्रोच्यते ।

उत्पादोत्पाद उत्पादो मूलोत्पादस्य ते यदि ।
मौलेनाजनितस्तं ते स [Tib. 58a] कथं जनयिष्यति[1] ॥ ५

यदि तथोत्पादस्योत्पादो मूलोत्पादस्य जनक इति मतं ' स कथमिदानीं मौलेनोत्पादेनानुत्पादितः सन्नुत्पादो[त्पादो] मौलं जनयिष्यति ॥ अथ मन्यसे उत्पादित एव मौलेनोत्पादेनोत्पादो[त्पादो] मौलं जनयिष्यति । एतदप्यसदित्याह ।

स ते मौलेन जनितो मौलं जनयते यदि ।
मौलः स तेनाजनितस्तमुत्पादयते कथं[2] ॥ ६

स उत्पादोत्पादसंज्ञक उत्पादो मौलेन जनितो यदि मौलं जनयति ' स मौल उत्पादोत्पादेनाजनितो ऽविद्यमानः कथमुत्पादोत्पादं जनयिष्यति । तस्मान्मौलेन जनितः सन्नुत्पादोत्पादो मौलं जनयतीति न युज्यते । ततश्च परस्परनिर्वर्त्यनिर्वर्तकत्वाभावात्स एवानवस्थाप्रसङ्ग इति नास्त्युत्पादः ॥

अत्राह । उत्पद्यमान एव मूलोत्पाद उत्पादोत्पादं उत्पादयति ' स एवोत्पादोत्पादो मूलोत्पादं जनयिष्यतीति ॥ उच्यते ।

अयमुत्पद्यमानस्ते काममुत्पादयेदिमं ।
यदीममुत्पादयितुमजातः शक्नुयादयं[3] ॥ ७

---

1) གལ་ཏེ་ ཁྱོད་ཀྱི་ སྐྱེ་བའི་སྐྱེས། རྩ་བའི་སྐྱེ་བ་ སྐྱེད་བྱེད་ན། ཁྱོད་ཀྱི་ རྩ་བས་མ་བསྐྱེད་ དེས། དེ་ནི་ ཇི་ལྟར་ སྐྱེད་པར་བྱེད།།

2) གལ་ཏེ་ ཁྱོད་ཀྱི་ རྩ་བ་ཡིས། བསྐྱེད་པ་ དེ་ཡིས་ རྩ་བསྐྱེད་ན། དེས་ མ་བསྐྱེད་པའི་ རྩ་བ་དེས། དེ་ནི་ཇི་ལྟར་ སྐྱེད་པར་བྱེད།།

3) གལ་ཏེ་ མ་སྐྱེས་པ་ དེ་ཡིས། དེ་ སྐྱེད་པར་ ནི་ བྱེད་ ནུས་ ན། ཁྱོད་ཀྱི་ སྐྱེ་བཞིན་པ་ དེ་ཡིས། དེ་ བསྐྱེད་པ་ ནི་ འདོད་ལ་ རག།།

काममयं मूलोत्पाद उत्पद्यमान उत्पादयेदुत्पादं पद्यगमेवाज्ञातः शक्नुया[द्]परम-ज्ञातमुत्पादयितुं ' उत्पद्यमानो हि नामानागतः । स चाज्ञातः कथमुत्पादयिष्यतीति न युक्तमेवैतदित्यभिप्रायः । एवमुत्पादोत्पादेऽपि वाच्यं ।

अत्राह । नैव ह्युत्पादस्यापर[1] उत्पादोऽस्ति [44b] यतो ऽनवस्थाप्रसङ्गः स्यात् । किं तर्हि

प्रदीपः स्वपरात्मानौ संप्रकाशयिता[2] यथा ।
उत्पादः स्वपरात्मानावुभावुत्पादयेत्तथा[3] ॥ ८

यथा प्रदीपः प्रकाशस्वभावत्वादात्मानं प्रकाशयति घटादींश्च ' एवमुत्पादोऽप्युत्पादस्वभावत्वादात्मानमुत्पादयिष्यति परं चेति ॥ उच्यते । स्यादेतदेवं यदि प्रदीपः स्वपरात्मानौ संप्रकाशयेत् । [Tib. 58b] न चैवं यस्मात् ।

प्रदीपे नान्धकारोऽस्ति यत्र चासौ प्रतिष्ठितः ।
किं प्रकाशयति दीपः प्रकाशो हि तमोवधः[4] ॥ ९

इह प्रकाशो नाम तमस्य[5] वधः । तमश्च प्रदीपस्वात्मनि तावन्न संभवति ' विरोधात् ' यत्तमो [नि]घ्नतः[6] स्वात्मप्रकाशत्वं स्यात् । न चापि प्रदीपो यत्र देशे तिष्ठति तत्र

---

1) Mss. *utpādasyāyaca ut°*. — སྐྱེ་བ་ལ་ ནི་ སྐྱེ་བ་ གཞན་ ཡོད་པ་མ་ཡིན་ཏེ.

2) Mss. *kaçayitu.*

3) ཇི་ལྟར་ མར་མེས་ རང་ དང་ གཞན། སྣང་བར་བྱེད་པ་ དེ་བཞིན་དུ། སྐྱེ་བའང་ རང་ དང་ གཞན་གྱི་དངོས། གཉིས་ཀ་ སྐྱེད་པར་བྱེད་པ་ཡིན།།

4) མར་མེ་དང་ནི་ གང་དག་ན། དེ་ འདུག་པ་ན་ མུན་པ་མེད། མར་མེས་ ཅི་ཞིག་ སྣང་བར་བྱེད། མུན་པ་ སེལ་བས་ སྣང་བྱེད་ཡིན།།

L'exemple de la lampe est l'argument favori des Vijñānavādins en faveur de la *svasaṃvitti* ou *svasaṃvedana*.

5) *tama*, *°sya*, donné dans les Lexx. (= Rāhu). — La lecture reste plus que douteuse.

6) Voyez la ligne suivante.

तमोऽस्ति ' यत्तमो निघ्नतः प्रदीपस्य परप्रकाशकत्वं स्यात् । अतोऽपि नास्ति प्रदीपस्य स्वपरात्मप्रकाशकत्वं । यदा चैवं तदा प्रदीपवदुत्पादस्य स्वपरात्मोत्पादकत्वं न संभविष्यति ' इति अयुक्तमेतत् ।

अत्राह ॥ यदेतदुक्तं ' प्रदीपे नान्धकारो ऽस्तीति ' एतदसत्यन्धकारघाते युक्तमेव वक्तुं । यस्मात्तूत्पद्यमानेनैव प्रदीपेन तमो निहतं ' तत्र प्रदीपे नान्धकारोऽस्ति ' यत्र च प्रदीपोऽस्ति तत्राप्यन्धकारो नास्तीति युज्यते । यदि प्रदीपेन नान्धकारघातः कृतः ' तदानुत्पन्न इव प्रदीपे उत्पन्नेऽपि घटादयो नोपलभ्येरन् ' अन्धकारघाताभावात्प्रागवस्थायामिव । तस्मादस्त्येवान्धकारघातलक्षणं प्रकाशनं प्रदीपस्य । तच्चानेनोत्पद्यमानेन प्रदीपेन कृतमिति ॥ उच्यते ।

कथमुत्पद्यमानेन प्रदीपेन तमो हतं ।
नोत्पद्यमानो हि तमः प्रदीपः प्राप्नुते यदा[1] [Tib. 59a] ॥ १०

इहालोकान्धकारयोर्युगपद्याभावात् प्राप्तेरभावः । यदा चैवं प्राप्तेरभाव[45a]स्तदा कथं केन प्रकारेणेदानीमुत्पद्यमानेन प्रदीपेन तमो हतमिति दुःखं परिकल्पयितुं । यस्माच्चैवमुत्पद्यमानः प्रदीपः तमो न प्राप्नोति ' तस्मान्नैवाप्राप्तत्वात्प्रदीपः किं चिदपि प्रकाशयतीत्यवसीयतां ।

अथ मन्यसे यथाऽप्राप्त[ा]मेवाविद्यां ज्ञानं निहन्ति[2] ' अप्राप्तमेव रूपं चक्षुः पश्यति ' अप्राप्तमेवायो ऽयस्कान्तो मणिराकर्षति । एवमप्राप्तमेवान्धकारं प्रदीपो निहनिष्यती[3]ति ॥ एतदप्यसारमित्याह ।

---

1) གང་ཚེ་ མར་མེ་ སྐྱེ་བཞིན་པ། མུན་པ་ དང་ ནི་ ཕྲད་མེད་ན། ཇི་ལྟར་ མར་མེ་ སྐྱེ་བཞིན་པས། མུན་པ་ སེལ་བར་བྱེད་པ་ཡིན།།

2) འཇོམས་པ་

3) སེལ་བ་, de même ci-dessous p. 153.

अप्राप्यैव प्रदीपेन यदि वा निहतं तमः ।
इहस्थः सर्वलोकस्थं स तमो निहनिष्यति[1] ॥ ११

यद्यप्राप्यैव प्रदीपेन तमो निहतं ' एवं सति ' इहस्थ एव प्रदीपः सर्वलोकस्थं तमो निहनिष्यति ' अप्राप्तत्वात्समीपस्थमिवेत्यभिप्रायः । एतेन न्यायेन ज्ञानेनाविध्या[घा]तः चक्षुषा रूपदर्शनमयस्कान्तमणिना अयआकर्षणमिवेत्येवमादिकं साध्यसमं ज्ञेयं ॥

अथाप्राप्तावपि सत्यामयस्कान्तमणिप्रभृतीनां योग्यदेशावस्थितानामेव स्वकार्यकृत्त्वं भविष्यतीति चेत् ' तदपि न युक्तं । अप्राप्तौ हि सत्यां विप्रकृष्टदेशान्तरावस्थितवद्[2]व्यवहितदेशान्तरावस्थितवच्चाप्राप्तत्वाद्योग्यदेशावस्थितानामपि [Tib. 59b] योग्यदेशावस्थितत्वं न युक्तमिति कुतो योग्यदेशावस्थितानां[3] [स्व]कार्यकृत्त्वं प्रसेत्स्यति ॥

दृष्टमेतल्लोकत इति चेन्नैतदेवं । यथा हि भवान् परिकल्पयति न तथा लोके दृष्टं । यस्मान्न लोकः प्राप्त्य[4]प्राप्तिचिन्ता[5]मेवमादौ विषयेऽवतार्य प्रदीपादीनां प्रकाशकत्वादिकं कल्पयति । यथोदितं तु विचारमनवतार्य प्रदीपेन तमो हतं चक्षुषा रूपदर्श[45b]नं अयस्कान्तमणिना अयआकर्षणमित्यादीच्छति ॥ पश्यतु वा लोक एवं । तत्त्वविचारकाले तु लोकस्याप्रामाण्यान्न तेन बाधा शक्यते कर्तुं ॥ एवं तावदप्राप्य प्रकाशनमयुक्तं ॥

---

1) མར་མེ་ སྣང་བ་མེད་པར་ ཡང་། གལ་ཏེ་ མུན་པ་ སེལ་བྱེད་ ན། འཇིག་རྟེན་ཀུན་ལ་ གནས་པའི་ མུན། འདི་ན་ འདུག་པ་ དེས་ བསལ་འགྱུར།།

2) Mss. °*avasthitavyava*°, *avasthitadvadvyava*°. — གནས་པ་ དང་། བར་དུ་ ཆོད་པའི་ ཡུལ་གཞན་ན་ གནས་པ་ བཞིན་དུ་ མ་སྣང་བའི་ཕྱིར་ཏེ།

3) གནས་པའི་སྒོ་ནས = °*sthitadvāreṇa* = °*sthitena* = °*sthitasya*.

4) Mss. *na lokaḥ prāptaḥ prāptaye.*

5) *cintā* = དཔྱད་པ་, ci-dessous (154. 3) བསམ་པ་.

प्राप्तावपि विषयादिग्रहणमयुक्तमेव । प्राप्तिर्ह्येकत्वे सति भवति । यदा चैकत्वं तदा स्वरूपवद्[1]दर्शनाकर्षणादिकं नास्ति ॥

(2.... यद्यपि चेयं प्राप्त्यप्राप्त्यादिचिन्ता लौकिकव्यवहारे नावतरतीति निरुपपत्तिकत्वेन मृषार्थत्वादस्य । तथापि तत्त्वविचारेऽवतार्या मा भूत् परमार्थतोऽपि निरुपपत्तिकपक्षाभ्युपगम इत्यलं प्रसङ्गेन ....2) ॥

यदि च स्वपरात्मानौ प्रदीपः प्रकाशयतीति परिकल्प्यते त्वया । तमसोऽपि तर्हि [Tib. 60a] प्रतिपक्षभूतस्य स्वपरात्मन[ो]ः प्रच्छादनं प्रकल्प्यतामित्याह ।

प्रदीपः स्वपरात्मानौ संप्रकाशयते यदि ।
तमोऽपि स्वपरात्मानौ छादयिष्यत्यसंशयं[3] ॥ १२

प्रतिद्वन्द्वित्वात्प्रदीपवत्तमोऽपि स्वपरात्मगतं व्यापारं करिष्यति । ततश्च परवदात्मानमपि छादयिष्यति । यदि चात्मानं छादयेत्तमस्तस्यैवानुपलब्धिः स्यात् । घटादिवत्तमसा प्रच्छादितत्वात् ॥

अत एवोक्तमार्योपालिपृच्छायां[4] ।

---

1) *vad* manque dans Paris et Calc. — རང་གི་ངོ་བོ་བཞིན་དུ.

2) D'après le tibétain: ***yady api nirupapattikatvena tanmṛṣārthatvāl loka-vyavahāre prāptyaprāptyādicinteyam avatarati*** [ཀལ་ཏེ ...... འཇུག་མོད་ཀྱི] ***tathāpi*** [དེ་ལྟ་ན་ཡང་] ***paramārthato 'pi nirupapattikapakṣābhyupagamiṣyamānatvāt*** [བརྟགས་པར་འགྱུར་དུ་འོངས་པས་] ***tattvavicāre 'vatāryā. alaṃ prasaṅgena.***

3) མར་མེ་རང་དང་གཞན་གྱི་དངོས། ཀལ་ཏེ་སྣང་བར་བྱེད་འགྱུར་ན། མུན་པའང་རང་དང་གཞན་གྱི་དངོས། སྒྲིབ་པར་འགྱུར་བར་ཐེ་ཚོམ་མེད།།

4) Voir ci-dessous Chap. XX *ad finem*. — Mètre −⏑⏑ | −⏑⏑ | −⏑⏑ | −−

इह शासनि सूरमणीये
(1) प्रव्रजथा गृहिलिङ्ग जहित्वा ।
(2) फलवन्तु भविष्यथ (3) श्रेष्ठा
एषु निदेशितु कारुणिकेन ॥
(4) प्रव्रजित्वा गृहिलिङ्ग जहित्वा
(5) सर्वफलस्य भविष्यति प्राप्तिः ।
पुन (6) धर्मस्वभाव तुलित्वा
सर्वफला न फलान च (7) प्राप्तिः ॥
(8 अलभन्त फलं तथ प्राप्तिं 8)
आश्चरियं (17) पुन जायति तेषां ।
(9) अहो ऽतिकारुणिको नरसिंहो
सुष्ठुपदेशित युक्ति जिनेनेति [46a] ॥

---

1) Variante *pravrayatha*.

2) Mss. *balavantu*. — འབྲས་བུ་.

3) = *seṭṭhā*.

4) *tvā* ne fait pas position. — *pravrajiyā*, possible mais incertain.

5) Mss. *satya*. འབྲས་བུ་ ཐམས་ཅད་.

6) = *svabhāva*. — ཆོས་ཀྱི་ རང་བཞིན་དག་ལ་ གཞལ་བྱས་ནས་ = *dharma-svabhāvān*....

7) འབྲས་བུ་ ཀུན་ མེད་ འབྲས་བུ་ཐོབ་པའང་ མེད = *sarvaphalāni na santi phalaprāptir api nāsti* — *prāpti* = *pāpti*.

8—8) འོན་ཀྱང་ འབྲས་བུ་ ཐོབ་པ་ ཐོབ་འགྱུར་བ. .... Soit: *atha phalaprāptipraptāḥ*.

9) Mss. *aho 'ti°*; le tibétain ཀྱེ་མའོ *hā bata* — *ati°* n'est pas traduit.

तथार्यरत्नकूटसूत्रे[1]।

यथा हि दीपो लयने[2] चिरस्य
कृतो हि गेहे पुरुषेण केन चित्।
तत्रा[3]न्धकारस्य न भोति एवं
चिरस्थितो नाहमितो गमिष्ये॥
तमोऽ[4]न्धकारस्य न शक्तिरस्ति
कृते प्रदीपे न विगच्छनाय।
प्रतीत्य दीपं च विनश्यते तमो
भयं[5] पि शून्यं न च किं च मन्यति[6]॥
ज्ञानं तथा आर्य पतीत्य [Tib. 60b] नास्रवं[7]
अज्ञान क्लेशोपचितं विगच्छति।
संपर्क[8] तेषां न कदा चि विद्यते
ज्ञानस्य क्लेशस्य च नित्यकालं॥

---

1) Voir ci-dessus p. 45, n. 1.

2) *layana* = Stätte, Haus, Sitz, «nach den Erklärern und Lexicographen» (P. W.). — *layane* n'est pas traduit dans le tibétain — *cirasya*, après un long temps, ཡུན་རིང་ལོན་ནས་.

3) *tatra* = དེ་ལ་.

4) མུན་པ་ མུན་ནག་ལ་ — *mun-nag* = *mun-pa*.

5) Mss. *tama ubhayam*; ci-dessous, 157. 2, *tamobhayam*.

6) རྣམ་སེམས་ ཅི་ ཡང་ མེད.

7) = *āryam anāsravaṃ jñānaṃ pratītya.*

8) = འགྲོགས་པ.

(1 ज्ञानं न कल्पेति अज्ञानु नो भवेत् 1)
ज्ञानं प्रतीत्यैव विनश्यते तमो (2)।
भयं पि अग्राह्य खपुष्पसंनिभं
ज्ञानं तथाज्ञानु भयं पि शून्यं ॥ इति ॥

किं चान्यत्। इहायमुत्पादो यद्यात्मानमुत्पादयेत्, स उत्पन्नो वा स्वात्मानमुत्पादयेदनुत्पन्नो वा। उभयथा च नोपपद्यते इत्याह।

अनुत्पन्नोऽयमुत्पादः स्वात्मानं जनयेत्कथं।
अथोत्पन्नो जनयते जाते किं जन्यते पुनः (3) ॥ १३

यद्यनुत्पन्न उत्पादः स्वात्मानमुत्पादयेत्, (4) मुण्डकजटाशिरोमणिरप्यात्मानमुत्पादयेत्। अथोत्पन्न उत्पादयेत्, किमुत्पन्नस्यापरेणोत्पादेन प्रयोजनमिति। एवं तावदुत्पाद आत्मानं नोत्पादयति॥

इदानीं परमपि यथा नोत्पादयति तथा प्रतिपादयन्नाह।

नोत्पद्यमानं नोत्पन्नं नानुत्पन्नं कथं चन।
उत्पद्यते तथाख्यातं गम्यमानगतागतैः (5) ॥ १४

1—1) ཡེ་ཤེས་ མི་ཤེས་ མེད་བྱ་ མི་སེམས་ཀྱང་། = Le *jñāna* ne pense pas: «que l'*ajñāna* n'existe pas!».

2) ཡེ་ཤེས་ བརྟེན་ནས་ མི་ཤེས་ མེད་པར་འགྱུར། = *ajñānaṃ vinaçyati.*

3) སྐྱེ་བ་ འདི་ ནི་ མ་སྐྱེས་པས། རང་གི་བདག་ཉིད་ ཇི་ལྟར་ བསྐྱེད། ཅི་སྟེ་ སྐྱེས་པས་ སྐྱེད་བྱེད་ན། སྐྱེས་ན་ ཅི་ཞིག་ བསྐྱེད་དུ་ཡོད༎

4) Même comparaison ad VIII. 4, XX. 8. Les Mss. hésitent entre *muṇḍaka* et *maṇḍūka*. Le tibétain, ici et VIII. 4, porte: *khapuṣpavat*.

5) སྐྱེས་ དང་ མ་སྐྱེས་ སྐྱེ་བཞིན་པ། ཇི་ལྟ་བུར་ ཡང་ མི་བསྐྱེད་པ། དེ་ ནི་ སོང་ དང་ མ་སོང་ དང་། བགོམ་པས་ རྣམ་པར་བཤད་པ་ཡིན༎ — Mdo XVII *des ni soṅ....*

यदि हि किं चिदुत्पद्येत तदुत्पाद उत्पादयेत्। न तु किं चिदुत्पद्यतेऽध्वत्रयेऽप्युत्पादासंभवात्। एतच्च गम्यमानगतागतैः प्रागेवोक्तं(1)॥ तत्र यथा गतं न गम्यते ' अतीतवर्तमानयोर्विरोधात्। नाप्यगतं गम्य[46b]ते ' अनागतवर्तमानयोर्विरोधात्। नापि गम्यमानं गम्यते [Tib. 61a] गतागतव्यतिरिक्तगम्यमानानुपलम्भादित्युक्तं॥ एवमुत्पद्यमानो भावो नोत्पद्यते ' उत्पन्नानुत्पन्नव्यतिरेकेणोत्पद्यमानाभावात्। उत्पन्नोऽपि नोत्पद्यते ' अतीतवर्तमानयोर्विरोधात्। उत्पन्न इत्युपरतोत्पत्तिक्रिय उच्यते ' उत्पद्यत इति वर्तमानक्रियाविष्टः ' ततश्चोत्पन्न उत्पद्यत इत्युच्यमाने अतीतवर्तमानयोरेककालता स्यात्। अनुत्पन्नोऽपि नोत्पद्यते ऽनागतवर्तमानयोर्विरोधात्॥ तस्मादुत्पादः परमुत्पादयतीति न युक्तं॥

अत्राह। उत्पद्यमानमेवोत्पद्यते नोत्पन्नं नाप्यनुत्पन्नमिति॥ अथ मन्यसे ' उत्पन्नानुत्पन्नव्यतिरेकेणोत्पद्यमानासंभवान्नोत्पद्यमानमुत्पद्यत इति ' एतच्च नास्ति यस्मादिहोत्पत्तिक्रियायुक्तमुत्पद्यमानमिति व्यपदिश्यते। तस्मादुत्पत्तौ सत्यामुत्पत्तिं प्रतीत्योत्पद्यमानमिदमुत्पद्यमानमेवोत्पद्यते ' तच्चोत्पद्यमानमुत्पाद उत्पादयतीति॥

उच्यते।

उत्पद्यमानमुत्पत्ताविदं न क्रमते यदा।
कथमुत्पद्यमानं तु प्रतीत्योत्पत्तिमुच्यते(2)॥ १५

यदुक्तमुत्पत्तिं प्रतीत्योत्पद्यमानं भवति तच्चोत्पद्यत इति। ननु विशेषत एतद्वक्तव्यं स्यात्' अस्योत्पत्तिं प्रतीत्येदं नामोत्पद्यमानं भवतीति। न चैवमुच्यते। न हि तदुत्पद्यमानं विशेषतो निर्धारयितुं शक्यते इदं तदुत्पद्यमानमिति ' अनुत्पन्नत्वात्ति-

1) Voir ci-dessus, Chapitre II.

2) གང་ཚེ་ སྐྱེ་བ་ ཡོད་པ་ན། སྐྱེ་བཞིན་ འདི་ འབྱུང་མེད་པའི་ཚེ ། ཇི་ལྟར་ སྐྱེ་བ་ བརྟེན་ནས་ ནི། སྐྱེ་བཞིན་ ཞེས་ ནི་ བརྗོད་པར་བྱ༎

नित्ताग्रहणतः [Tib. 61b] । ततश्चोत्पद्यमानासंभवादुत्पत्तिक्रियापि नास्तीति । कथमसत्यामुत्पत्तौ तां प्रतीत्योत्पद्यमानं स्यात् । त[47a]स्मादुत्पद्यमानमुत्पद्यते तच्चोत्पाद उत्पादयतीत्ययुक्तं ॥

अत्राह । अहो बताहमतीव भवतो दृष्टादृष्टपदार्थनिरपेक्षत्वादत्यन्तनास्तिकाद्बिभेमि । यो हि नाम भवांस्तथागतप्रवचनव्याख्यानव्याजेन दूषणमात्रकौशलमेवात्मनः प्रकटयन् परमर्षिगदितमिदंप्रत्ययताप्रतीत्यसमुत्पादलक्षणं परमार्थसत्यं तथागतानां निहन्ति ॥ इह भगवता तथागतेन प्रकृतीश्वरस्वभावकालाणुनारायण[1]नैमित्तिककणादकपिलादितीर्थकरकर्तृवादनिरासेन सर्वभावानां तत्त्वमादर्शितं । यदुतास्मिन् सतीदं भवति । अस्योत्पादादिदमुत्पद्यते । यदुताविद्याप्रत्ययाः संस्कारा इत्याद्य[2]विपरीतं प्रतीत्यसमुत्पादं प्रकटयता ॥ तस्य च त्वया नोत्पद्यमानं नोत्पन्नं नानुत्पन्नमित्यादिना दूषणं विदधता तथागतजनन्याः प्रतीत्यसमुत्पत्तिमातुर्वध एवाचरित इत्यलं[3] भवता सर्वनास्तिकेन त्वयेति[3] ॥

उच्यते । नाहं सकलदशबलजननीं[4] प्रतीत्यसमुत्पत्तिमातरं निहन्मि । भवानेव तु परमगम्भीरप्रतीत्यसमुत्पादाधिमुक्ति[5]विरहाद्विपरीतं [Tib. 62a] तदर्थमवधार्यास्माकमेवाधिलयं[6] करोति । ननु चेदं प्रतीत्येदं भवतीत्येवमभिधानेन भगवता तथागतेन निःस्वभावत्वमेव सर्वधर्माणां स्पष्टमावेदितं । यस्मात् ।

प्रतीत्य यद्यद्भवति तत्तच्छान्तं स्वभावतः ।

---

1) D'après le tibétain: °*anu-nārāyaṇa-ādi-kartṛvāda.*

2) Voir ci-dessus 10. 10, 14. 25.

3) Sic Calc. et Camb. — Lacune dans Paris — ཁྱོད་ དང་ བརྩོད་པས་ ཆོག་གོ། = *iy alaṃ tvayā sārdhaṃ vivādena.*

4) La *prajñā* est fréquemment appelée *tathāgatamātṛ*. Or *pratītyasamutpāda* = *prajñā*.

5) *adhimukti* = མོས་པ'.

6) *adhilaya.* Variantes *adhiraya, adhirepa* — སྙོད་པ'.

यो हि पदार्थो विद्यमानः स सस्वभावः स्वेनात्मना स्वं स्वभावमनपायिनं बिभर्ति । स संविद्यमानत्वान्नैवान्यात्किंचिदपेक्षते ' नाप्युत्पद्यते ' इति कृत्वा सस्वभावभावाभ्युपगमे सति कुतः प्रतीत्यसमुत्पाद इति भवतैव सस्वभावतां भावानामभ्युपगच्छता सर्वथा प्रतीत्यसमुत्पाद एव बाधितो भवति । ततश्च (1) परमधर्मबुद्धदर्शनमपि बाधितं भवति ' यः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति ' यो धर्मं पश्यति स बुद्धं पश्यतीत्यागमात् (2) ॥ मया तु यत्प्रतीत्य बीजाख्यं कारणं यद्भवत्यङ्कुराख्यं कार्यं तच्चोभयमपि शान्तं स्वभावविरहितं प्रतीत्यसमुत्पन्नं प्रतिपादयता सर्वथा भगवतां त[47b]थागतानां प्रतीत्यसमुत्पत्तिमाता द्योतिता भवति । यत एवं '

तस्माद्भुत्पद्यमानं च शान्तमुत्पत्तिरेव च (3) ॥ १६

इति स्फुटमवसीयतां ॥

अत्राह । यदुक्तं '

उत्पद्यमानमुत्पत्ताविदं न क्रमते यदा ।
कथमुत्पद्यमानं तु [Tib. 62b] प्रतीत्योत्पत्तिमुच्यते ॥ इति

तदयुक्तं यस्मादिदमुत्पद्यमानमित्येव संभवति । तथा हि घटोत्पत्तिं प्रतीत्य घट उत्पद्यमानो भवति ' तं चोत्पद्यमानमुत्पाद उत्पादयतीत्युच्यते ॥ एतदप्ययुक्तं । यस्मात् '

यदि कश्चिदनुत्पन्नो भावः संविद्यते क्व चित् ।
उत्पद्येत स किं तस्मिन्भाव उत्पद्यतेऽसति (4) ॥ १७

---

1) *parama* manque dans la version tibétaine.

2) Voir ci-dessus p. 6, n. 2.

3) རྟེན་ཅིང་འབྱུང་བ་ གང་ ཡིན་པ། དེ་ ནི་ ངོ་བོ་ཉིད་ཀྱིས་ ཞི། དེའི་ཕྱིར་ སྐྱེ་བཞིན་ཉིད་ དང་ ནི། སྐྱེ་བ་ ཡང་ ནི་ ཞི་བ་ཉིད།།

4) གལ་ཏེ་ དངོས་པོ་ མ་སྐྱེས་པ། འགའ་ཞིག་ གང་ན་ ཡོད་གྱུར་ན། དེ་ ནི་ སྐྱེ་ འགྱུར་ དངོས་པོ་ དེ། མེད་ན་ ཅི་ཞིག་ སྐྱེ་བར་འགྱུར།།

यदि कश्चिदनुत्पन्न उत्पादात्पूर्वं घटो नाम क्व चित्संविद्येत स उत्पत्तिक्रियां प्रतीत्योत्पद्येत ' न चैवं कश्चिदुत्पादात्पूर्वं क्व चिदस्ति । तस्मिन्नसति घटे किमुत्पद्यते ॥

अथ स्यात् ' यद्यप्युत्पादात्पूर्वं घटो नास्ति तथाप्युत्पन्नः सन् घटसंज्ञां प्रतिलप्स्यते । तद्भाविन्या संज्ञया न दोष इति ॥ एतदप्ययुक्तं । यदि ह्युत्पत्तिक्रिया प्रवर्तेत तदा वर्तमानीभूतो भावो घटाख्यां प्रतिलभेत । यदा त्वनागतभावासंबन्धेन क्रियाया अप्रवृत्तिस्तदा कुतो वर्तमानता ॥ अथाघटाश्रयेण(1) क्रिया प्रारभ्येत ' तद्वक्तव्यं ' योऽसावघटः स किं भवितुमर्हति पट(2) उत नैव किं चित् । यदि पट(2) उत्पद्यमानः स कथं उत्पन्नः [सन्] घटो भविष्यतीति । अथ नैव किं चित् ' कथं तदाश्रया क्रिया प्रवर्तते ' कथं वा स(3) उत्पन्नः सन् घटो भवेदिति सर्वथा भावितत्वकल्पना(4)प्ययुक्ता । [Tib. 63a] तस्मादुत्पद्यमानमप्युत्पादो नोत्पादयतीति सिद्धं ॥

अपि चैवं न युज्यमानायामप्युत्पद्यमानस्योत्पत्तौ भवतो [मतम(5)]भ्युपेत्योच्यते ।

उत्पद्यमानमुत्पादो यदि चोत्पादयत्ययं ।
उत्पादयेत्तमुत्पाद[48a]मुत्पादः कतमः पुनः(6) ॥ १८

यद्यप्युत्पद्यमानं पदार्थमुत्पाद उत्पादयेद्भवन्मतेन ' इदं तु वक्तव्यं ' तमिदानी-

---

1) *atha ghaṭa*, Camb. et Calc.; *athāghaṭa*, Paris. — བུམ་པ་ མ་ཡིན་པ་.

2) Mss. *ghaṭa*. Mais སྣམ་བུ་.

3) Mss. *kathaṃ vā saha ut°* — དེ་ སྐྱེས་ནས་.

4) *bhāvitatva°*. — འབྱུང་བར་ འགྱུར་བའི་ རྟོག་པ. Soit *bhāvitva°*; voir l. 4.

5) ཁྱོད་ཀྱི་ ལུགས་ ཁས་བླངས་ནས་.

6) གལ་ཏེ་ སྐྱེ་བ་ དེ་ཡིས་ ནི། སྐྱེ་བཞིན་པ་ ནི་ སྐྱེད་བྱེད་ན། སྐྱེ་བ་ དེ་ནི་ སྐྱེ་བ་ལྟ། གང་ཞིག་གིས་ ནི་ སྐྱེད་པར་བྱེད॥ — Mdo XVII omet le dernier pāda.

मुत्पादो कतमोऽपर उत्पादमुत्पादयिष्यतीति ॥ अथ स्यात्' उत्पादस्यापर उत्पाद उत्पादकः परिकल्प्येत' तदानवस्थादोषप्रसङ्ग इत्याह ।

अन्य उत्पादयत्येनं यद्युत्पादोऽनवस्थितिः ।

एतच्चोक्तं ॥ अथ नास्यापर उत्पाद इष्यते' नन्वेवं सति विनोत्पादेनोत्पाद उत्पद्यत इत्येवं प्राप्नोति । ततश्चोत्पादोत्पाद्यानामपि पदार्थानां विनैवोत्पादेनोत्पत्तिरस्तु भावत्वा[1]दुत्पादवदिति प्रतिपादयन्नाह ।

अथानुत्पाद उत्पन्नः सर्वमुत्पद्यते तथा । इति[2] । १९

अपि चोत्पाद आत्मानं परांश्चोत्पादयतीत्यत्र पक्षे दूषणमेव न वक्तव्यमधुनास्माभिः' यस्मादत्र पक्षे दूषणं ।

सतश्च तावदुत्पत्तिरसतश्च न युज्यते ।
न सतश्चासतश्चेति पूर्वमेवो[प]पादितं[3] ॥ २०
नैवासतो नैव सतः प्रत्ययो ऽर्थस्य युज्यते । [इति]
न सन्नासन्न सदसन् धर्मो निर्वर्तते यदा[4] ॥

इत्यादिनोत्पादो [Tib. 63b] निषिद्ध एव पूर्वं[5] ॥ ततश्चैवमुत्पादे निषिद्धे उत्पद्यमानमुत्पाद उत्पादयति स्वपरात्मानौ चोत्पादयतीत्यस्या कल्पनायाः नास्त्ये-

---

1) *bhāvatvāt* = དངོས་པོ་ ཡིན་པའི་ཕྱིར.

2) གལ་ཏེ་ སྐྱེ་བ་ གཞན་ཞིག་གིས། དེ་བསྐྱེད་ ཐུག་པ་མེད་པར་འགྱུར། ཅི་སྟེ་ སྐྱེ་བ་མེད་ སྐྱེ་ན། ཐམས་ཅད་ དེ་བཞིན་ སྐྱེ་བར་འགྱུར॥ — Mdo XVII *des bskyed.*

3) རེ་ཞིག་ ཡོད་ དང་ མེད་པ་ དང་། སྐྱེ་བར་ རིགས་པ་ མ་ཡིན་ཞིང་། ཡོད་མེད་ཉིད་ ཀྱང་ མ་ཡིན་ ཞེས། གོང་དུ་ བསྟན་པ་ཉིད་ ཡིན་ནོ॥ — Mdo XVII *skye-bai rig-pa....*

4) Mss. *sadā.*

5) Voir ci-dessus I. 6. 7. (pages 82 et 83).

वावतार इति कुत एतत्प्रमेत्स्यति उत्पाद उत्पद्यते उत्पद्यमानमुत्पद्यते स्वपरात्मानौ चोत्पादयतीति ॥

किं चान्यत् । इहायमुत्पादः परिकल्प्यमानो निरुध्यमानस्यानित्यतानुगतस्य वर्तमानस्य वा भावस्य परिकल्प्यते । अनिरुध्यमानस्य वा अतीतानागतस्यानित्यताविरहितस्य । उभयथा च नोपपद्यते इत्याह ।

निरुध्यमानस्योत्पत्तिर्न भावस्योपपद्यते ।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते[1] ॥ २१

तत्र निरुध्यमानस्य वर्तमानस्य वि[48b]द्यमानत्वादुत्पादो नोपपद्यते । अनिरुध्यमानस्यापि विनाशरहितस्यातीतानागतस्य भावलक्षणविलक्षणस्य खपुष्पस्येव नास्त्युत्पाद इति ॥

एवं भावानामुत्पादाभावं प्रतिपाद्यातःपरं स्थितिर्विचार्यते ॥

अत्राह । विद्यत एव भावानामुत्पादस्तद्भावभाविधर्मसद्भावात् । नानुत्पन्नस्य स्थितिः संभवतीत्युत्पादभावेन स्थितेर्भावात् । स्थितिरुत्पादभावभाविनी भवति । तस्मादुत्पादोऽप्यस्ति[2] तद्भावभाविधर्मसद्भावात् । इह यन्नास्ति न तद्भावभाविधर्मसद्भावस्तद्यथा गगनकुसुमसौरभ्यस्येति ॥ उच्यते । स्यादुत्पादो यदि तद्भावभाविनी स्थितिरेव स्यात् [Tib 64a] । [3 न त्वस्ति । तदेवं ।

---

1) དངོས་པོ་ འགག་བཞིན་ཉིད་ལ་ ནི། སྐྱེ་བ་ འཐད་པར་ མི་འགྱུར་རོ། གང་ཞིག་ འགག་བཞིན་མ་ཡིན་པ། དེ་ནི་ དངོས་པོར་ མི་ འཐད་དོ།།

2) Mss. *utpādo 'py asthitabhāva°*. ' ' ཡང་ ཡོད་དོ། དེ་ ཡོད་ན་ ཡོད་པའི་ ཆོས་ ཡོད་པའི་ཕྱིར་རོ། = ... *py asti* | *tasmin sati sataḥ dharmasya sattvāt.*

3—3) Mss. ..... *sthitir eva syāt . yasmān na sthitāsthitav°*. — Nous restaurons le texte d'après la version tibétaine. མ་ཡིན་ཏེ། འདི་ལྟར། དངོས་པོ་ གནས་པ་

न स्थितभावस्तिष्ठत्यस्थितभावो न तिष्ठति।
न तिष्ठति तिष्ठमानः कोऽनुत्पन्नश्च तिष्ठति॥ २२

तत्र स्थितं न तिष्ठति तत्र स्थितिक्रियानिरोधात्। अस्थितभावोऽपि न तिष्ठति स्थितिरहितत्वात्। तिष्ठमानमपि न तिष्ठति स्थितिद्वयप्रसङ्गात्[3] स्थितास्थितव्यतिरिक्तस्य तिष्ठमानाभावाच्च॥ अपि च।

कोऽनुत्पन्नश्च तिष्ठति।

इह्योत्पादप्रतिषेधात्को ऽसावनुत्पन्नः पदार्थो यस्तिष्ठेदिति सर्वथा नास्ति स्थितिः॥

अपि चेयं स्थितिर्निरुध्यमानस्य भावस्य स्यात्' अनिरुध्यमानस्य वा। उभयथा च न युज्यत इति प्रतिपादयन्नाह।

स्थितिर्निरुध्यमानस्य न भावस्योपपद्यते।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते[1]॥ २३

निरुध्यमानस्य निरोधाभिमुखस्य तावद्भावस्य विरोधिनी स्थितिर्न संभवति। यश्चाप्यनिरुध्यमानः स भाव एव न भवति' कुतस्तस्य स्थितिर्भविष्यति॥

མི་ གནས་ཏེ། དངོས་པོ་ མི་གནས་ གནས་པ་ མེད། གནས་བཞིན་པ་ ཡང་ མི་ གནས་ཏེ། མ་སྐྱེས་ གང་ཞིག་ གནས་པར་འགྱུར། །དེ་ལ་ གནས་པ་ ནི་ མི་གནས་པ་ སྟེ། དེ་ལ་ གནས་པའི་བྱ་བ་ འགགས་ཟིན་པའི་ཕྱིར་རོ། དངོས་པོ་ མི་གནས་པ་ ཡང་ གནས་པ་ མ་ ཡིན་ཏེ་ གནས་པ་ དང་ བྲལ་བའི་ཕྱིར་རོ། གནས་བཞིན་པ་ ཡང་ མི་གནས་ཏེ། གནས་པ་ གཉིས་སུ་ ཐལ་བར་འགྱུར་བའི་ཕྱིར་ དང་།

1) དངོས་པོ་ འགག་བཞིན་ཉིད་ལ་ ནི། གནས་པ་ འཐད་པར་ མི་འགྱུར་རོ། གང་ ཞིག་ འགག་བཞིན་མ་ཡིན་པ། དེ་ནི་ དངོས་པོར་ མི་འཐད་དོ།།

अपि च जरसा मरणेन च सर्व एव भावाः क्षणमपि न त्यज्यन्ते। यदा चैतदेवं तदा जरामरणविरोधिन्याः स्थितेर्भावेषु प्रवृत्त्यवकाश एव नास्ति ' इति प्रतिपादयन्नाह।

जरामरणधर्मेषु सर्वभावेषु सर्वदा।
तिष्ठन्ति कतमे भावा ये जरामरणं विना[(1)]॥ [Tib. 64b] २४

के हि नाम जरा[49a]मरणरहिता भावा येषां स्थितिः स्यात्। तस्मान्नास्त्येव स्थितिरित्यभिप्रायः॥

अपि चास्याः स्थितेरन्या वा स्थितिः स्थित्यर्थं परिकल्प्येत ' स्वयं वा स्वात्मानं स्थापयेत्। उभयथा च न युज्यत इत्याह।

स्थित्यान्यया स्थितेः स्थानं तयैव च न युज्यते।
उत्पादस्य यथोत्पादो नात्मना न परात्मना[(2)]॥ २५

अनुत्पन्नोऽयमुत्पादः स्वात्मानं जनयेत्कथं '

इत्यादिना[(3)] यथोत्पाद आत्मानं न जनयति इत्युक्तमेवं स्थितिरपि नात्मानं स्थापयति इति वक्तव्यं।

[अ]स्थिता स्थितिरेषा [चेत्][(4)]स्वात्मानं स्थापयेत्कथं।
स्थिता चेत्स्थापयत्येषा स्थितायां स्थाप्यतेऽथ किं[(5)]॥

इति योज्यं। यथा च '

---

1) Cité ad XXI. 4.—དངོས་པོ་ཐམས་ཅད་དུས་ཀུན་དུ། ། རྒ་དང་འཆི་བའི་ཆོས་ཡིན་ན། ། གང་དག་རྒ་དང་འཆི་མེད་པར། ། གནས་པའི་དངོས་པོ་གང་ཞིག་ཡིན།།

2) གནས་པ་གནས་པ་གཞན་དང་ནི། ། དེ་ཉིད་ཀྱིས་ཀྱང་གནས་མི་རིགས། ། ཇི་ལྟར་སྐྱེ་བ་རང་དང་ནི། ། གཞན་གྱིས་བསྐྱེད་པ་མ་ཡིན་བཞིན།། — Variante *ji-ltar skye-bar* (?).

3) Voir VII. 13.

4) Mss. *eṣā tu.*

5) Symétrique à VII. 13.

अन्य उत्पादयत्येनं यद्युत्पादोऽनवस्थितिः(1)

इत्युत्पादे व्याख्यातमेवं स्थितावपि व्याख्येयं ।

अथान्या स्थापयत्येनां स्थितिर्यद्यनवस्थितिः ॥ इति ॥

एवं स्थितिरपि न युक्ता ॥

अत एवोक्तं भगवता ।

अस्थिता हि इमे धर्माः स्थितिश्चैषां न विद्यते ।

अस्थितिः स्थितिशब्देन(2) स्वभावेन [न] विद्यते(3) ॥

न स्थितिर्नापि चो(4) जातिर्लोकनाथेन देशिता ।

लोकनाथं विदित्वैवं समाधिं तेन जानथा ॥

उक्तं चार्यसचर्यगाथासु(5) ।

आकाशनिश्रित समारुत आपस्कन्धो(6)

तन्निश्रिता(7) इय मही पृथिवी [Tib. 65 a] जगच्च(8) ।

---

1) Voir VII. 19.

2) གནས་མེད་ གནས་པའི་སྒྲས་ བརྗོད་ ཀྱང་| *asthitiḥ sthitiçabdena ucyamānāpi....*

3) D'après le tibétain *na labhyate.*

4) *co* = *ca* + *u* = *cu* de la māgadhī d'Açoka.

5) Mss. *uktaṃ cāryasacaryagāthāsu.* — འཕགས་པ་སྡུད་པ་ ཚིགས་སུ་བཅད་པ་ ལས་ = *āryasaṃgītigāthāsu?* — [ཡང་དག་པར་ སྡུད་པ = *saṃgīti,* As. Res. XX. 462]. — *sdud-pa* = *saṃcaya, samucchraya, saṃhāra, saṃgraha.*

Sur la vieille conception cosmologique visée dans notre stance, voir Milinda, p. 60 *ad fin.* (Rhys Davids, I. 106 signale Mahāparinibbānas. III. 13) Burnouf, Intr. 448 (traduisant Abhidh. k. v., Soc. As., fol. 13a), et la citation de Çaṃkara ad II. 2. 24.

Mètre Vasantatilakā.

6) Mss. *āpaskandho.*

7) Mss. *bahiniçritā.*

8) Le tibétain ne traduit que ces deux premiers pādas: མཁའ་ལ་ རླུང

सह्यान कर्मउपभोगनिदानमेवं

आकाशथानु कृतचित्तम एतमर्थं ॥(1)

यावत्(2)

स्थानम्मथानु अयु थानु जिनेन उक्तो। इति विस्तरः॥

अत्राह विद्येते एव स्थित्युत्पादौ तत्सहचारिधर्मसद्भावात्। इहोत्पादस्थितिलक्षणसहचारिणो संस्कृतानामनित्यतास्ति। तस्मात्स्थित्युत्पादावपि स्त [49b] इति ॥ उच्यते। स्यातां स्थित्युत्पादौ यद्यनित्यतैव स्यात्। न त्वस्ति। कथमिति। यस्मात्

निरुध्यते नानिरुद्धं न निरुद्धं निरुध्यते।

(3.....[तथापि निरुध्यमानं किमजातं निरुध्यते ॥ २६

यद्यनित्यतेति का चित्स्यात् सा निरुद्धस्य भावस्यानिरुद्धस्य वा निरुध्यमानस्य वा स्यात्। तत्र निरुद्धं निरुध्यत इति न युक्तं अतीतवर्तमानयोर्विरोधात्। अनिरुद्धमपि न युक्तं निरोधविरहितत्वात् यदनिरुद्धमेव तत्कथं निरुध्यत इति परस्परविरोधाच्च]....3)। तथा[पि] निरुध्यमानं न निरुध्यत इत्यनेन संबन्धः। निरुध्यमानमपि न

བརྟེན་ དེ་ལ་ རྒྱུ་ཡི་ ཕྱུན་པོ་ བརྟེན། དེ་ལ་ ས་ཆེན་ འདི་ བརྟེན་ དེ་ལ་ འགྲོ་བ་ བརྟེན། ཞེས་བྱ་བ་ནས་ — et passe à la ligne qui suit *yāvat* (ci-dessous 167. 4).

1) Mss. *evamākāçasthānu kṛtacittama etam artha*, et *kṛtta*, *kṛtteṣa*.

2) Mss. *yāvad asthānu ayu sthāna* . — Tib. གནས་མེད་ གནས་ཡིན་ འདི་ནི་ རྒྱལ་བས་ གནས་པར་ གསུངས་ ཞེས་བྱ་བའི་ བར་དུ་ ''' *asthānaṃ sthānabhūtam* (?) *idam jinena sthānam uktam iti yāvat.*

3) La lacune n'est pas indiquée dans les Mss.; nous restaurons le texte d'après le tibétain. འགགས་པ་ འགག་(?)པར་ མི་ འགྱུར་ཏེ། མ་འགགས་པ་ ཡང་ འགག་ མི་ འགྱུར། འགག་བཞིན་པ་ ཡང་ དེ་བཞིན་ མིན། མ་སྐྱེས་ གང་ཞིག་ འགག་པར་

निरुध्यते निरुध्यमानाभावात्' निरोधद्वयप्रसङ्गाच्च। यतश्चैवं त्रिष्वपि कालेषु निरोधासंभवः तस्मान्नास्त्येव निरोध इति। कुतस्तत्सहचारिस्थित्युत्पादसंभवः स्यात्॥ अपि च प्रागुत्पादप्रतिषेधाद[Tib. 65b]संभव एव निरोधस्येत्याह।

किमजातं निरुध्यते॥ इति॥

अपि चायं निरोधः स्थितस्य वा भावस्य स्यादस्थितस्य वा' उभयथा च न युज्यते इत्याह।

स्थितस्य तावद्भावस्य निरोधो नोपपद्यते।

स्थितस्य निरोधविरुद्धस्य[1] नास्ति निरोधः।

नास्थितस्यापि भावस्य निरोध उपपद्यते।[2] २७

अस्थितस्याभावस्याविद्यमानस्य निरोधो नास्ति' इति सर्वथा नास्ति निरोधः॥

किं चान्यत्। इह यदि निरोधः स्यात्' स तयैवावस्थया तस्या एवावस्थायाः स्याद्न्यया वान्यस्या अवस्थायाः स्यात्। सर्वथा च नोपपद्यत इति प्रतिपादयन्नाह।

འགྱུར། །གལ་ཏེ་ མི་རྟག་པ་ ཞེས་བྱ་བ་ འགའ་ཞིག་ ཡོད་ན་ནི། དེ་ དངོས་པོ་ འགགས་པ་ འམ་ མ་འགགས་པ་ འམ། འགགས་བཞིན་པ་ ཞིག་ལ་ འགྱུར་བ་ ཞིག་ན། །དེ་ལ་ འགགས་པ་ འགག་གོ་ ཞེས་བྱ་བ་ ནི་ མི་རུང་སྟེ། འདས་པ་ དང་ ད་ལྟར་བ་ གཉིས་ འགལ་བའི་ཕྱིར་རོ། །མ་འགགས་པ་ལ་ ཡང་ མི་རིགས་ཏེ། འགག་པ་ དང་ བྲལ་བའི་ ཕྱིར་ དང་། གང་ཞིག་ མ་འགགས་པ་ ནི་ ཇི་ལྟར་ འགག་པར་འགྱུར་ ཞེས་ པན་ཚུན་ འགལ་བའི་ཕྱིར་རོ།།

(a) Mdo XVII: བགགས་པར.

1) Ms. *nirodhani*°.

2) རེ་ཞིག་ དངོས་པོ་ གནས་པ་ལ། འགག་པ་ འཐད་པར་ མི་འགྱུར་རོ། དངོས་པོ་ མི་གནས་པ་ལ་ ཡང་། འགག་པ་ འཐད་པར་ མི་འགྱུར་རོ།།

तयैवावस्थयावस्था न हि सैव निरुध्यते ।
अन्ययावस्थयावस्था न चान्यैव निरुध्यते[1] ॥ २८

तयैव तावत्क्षीरावस्थया सैव क्षीरावस्था न निरुध्यते । स्वात्मनि क्रियाविरोधात् । नाप्यन्यया दध्यवस्थया क्षीरावस्था निरुध्यते । यदि हि क्षीरदध्यवस्थयोर्यौगपद्यं स्यात् । स्यात्तयोर्विनाश्यविनाशकभावः । न तु दध्यवस्थायां क्षीरावस्थास्ति । यदा च नास्ति तदा कामसतीं विनाशयेत् । यदि विनाशयेत् । खरविषाणानीदृशानामपि विनाश[50a]येत् । तस्मादन्ययाप्यवस्थया नैवान्यावस्था [Tib. 66a] निरुध्यते ॥

अत्राह । यद्यपि तयैवावस्थया सैवावस्था अन्यया वावस्थयान्यावस्था न निरुध्यते । तथापि क्षीरावस्थायास्तावन्निरोधोऽस्ति । ततश्चोत्पादोऽपि स्यादिति ॥

उच्यते । अहो बतातिजडतामात्मनो भावान् प्रकटयति । ननु च पूर्वोक्तेन न्यायेन

यदैव सर्वधर्माणामुत्पादो नोपपद्यते ।

इत्युक्तं ।

तदैवं सर्वधर्माणां निरोधो नोपपद्यते[2] ॥ २९

इति स्फुटतरमेव प्रतिपादितं भवति ॥

अपि च । निरोधो नाम यदि कश्चित्स्यात्स सतो वा भावस्य स्यादसतो वा । तत्र ।

सतश्च तावद्भावस्य निरोधो नोपपद्यते ।

---

1) གནས་སྐབས་ དེ་ཡིས་ གནས་སྐབས་ ནི། དེ་ཉིད་ འགག་པ་ ཉིད་ མི་འགྱུར། གནས་སྐབས་ གཞན་གིས་ གནས་སྐབས་ནི། གཞན་ ཡང་ འགག་པ་ ཉིད་ མི་འགྱུར༎

2) གང་ཚེ་ ཆོས་ རྣམས་ ཐམས་ ཅད་ཀྱི། སྐྱེ་བ་ འཐད་པར་མི་འགྱུར་བ། དེ་ཚེ་ ཆོས་རྣམས་ཐམས་ཅད་ཀྱི། འགག་པ་ འཐད་པར་མི་འགྱུར་རོ༎

स्वभावादप्रच्युतस्य भावस्य निरोधो न युक्तो ' यस्मात् ।

एकत्वे न हि भावश्च नाभावश्चोपपद्यते[1] ॥ ३०

निरोधो हि नामाभावः । स यस्य भवति स नैव भवति ' ततश्च सतो भावस्य निरोध इति ब्रुवता भावाभावयोरेकाधिकरणताऽभ्युपगता भवति ॥ एकत्वे सत्युभयं न युज्यते । यदि तदानीं भावः स्यात् ' तदा निरोधेनाभावेनावेशाद्भा[व]व्यपदेशो[2] [ऽ]युक्तः । अथाभावः ' सोऽप्यस्य न युज्यते ऽभावविरोधिना[3] भावरूपेणावियोगात् ॥ [Tib. 66b] तस्मादेकत्वे सति भावाभावयोः स पदार्थो नैव भावो नाप्यभाव इति युज्यते ॥ अथ वा परस्परविरुद्धत्वादालोकान्धकारवदेकत्वे सति न हि भावश्च नाभावश्चोपपद्यते ॥ एवं तावत्सतो भावस्य निरोधो न युक्तः ॥

इदानीं '

असतोऽपि न भावस्य निरोध उपपद्यते ।

अविद्यमानस्याभावस्य न विनाशोऽस्ति वन्ध्यातनयस्येवाविद्यमानत्वात् । अत एवाह '

न द्वितीयस्य शिरसः छेदनं विद्यते यथा[4] ॥ ३१

---

1) རེ་ཞིག་ དངོས་པོ་ ཡོད་པ་ལ། འགག་པ་ འཐད་པར་ མི་འགྱུར་རོ། གཅིག་ཉིད་ན་ ནི་ དངོས་པོ་ དང་། དངོས་པོ་མེད་པ་ འཐད་པ་མེད།།

Ce sūtra nous donne l'axiome essentiel de la philosophie des Mādhyamikas. Si quelque chose existait, être ou illusion, ce quelque chose demeurerait. Du *kṣaṇikatva*, ou momentanéité, découle logiquement la *çūnyatā*, ou vacuité: on n'est pas plus Vedāntin.

2) Mss. *āveçodbhāvyapadeço yuktaḥ*. — དེའི་ཚེ་ འགག་པ་ དངོས་པོ་མེད་པས་ ཟིན་པའི་ཕྱིར། དངོས་པོར་ བསྙད་པ་ མི་ རིགས་སོ།།

3) Mss. °*virodhino* — «parce qu'il n'est pas disjoint de la qualité existence, laquelle est contradictoire à la non-existence».

4) དངོས་པོ་ མེད་པར་གྱུར་པ་ལའང་། འགག་པ་ འཐད་པར་མི་འགྱུར་རོ། མགོ་ གཉིས་པ་ལ་ ཇི་ལྟར་ནི། བཅད་དུ་ མེད་པ་ དེ་བཞིན་ནོ།།

प्रसि[50b]द्धासत्त्वस्यैव नराणां(1) द्वितीयस्य शिरसो दृष्टान्तत्वेनोपादानात्परिपूर्णतानिर्देशः सेति(2) नोपात्तं ॥ तदेवमसतो भावस्य निरोधो न संभवति सतोऽपि न । यश्चोभयथापि न संभवति स केनात्मना स्थितः । नास्त्येव निरोध इति प्रतीयतां ॥

किं चान्यत् । यदि निरोधो नाम भावानां निरोधक(3) इति कल्प्यते तस्येदानीं किमन्यो निरोध इष्यते उत न । यदीष्यते तन्न युज्यते ।

न स्वात्मना निरोधोऽस्ति निरोधो न परात्मना ।

कथं पुनर्नास्तीति प्रतिपादयन्नाह ।

उत्पादस्य यथोत्पादो नात्मना न परात्मना(4) ॥ ३२

तत्र यथा ।

अनुत्पन्नोऽयमुत्पादः स्वात्मानं जनयेत्कथं ।

इत्यादिनोत्पादः स्वात्मानं नोत्पादयति(5) [Tib. 67a] । एवं निरोधोऽपि स्वात्मानं न निरोधयति । कथमिति । उच्यते ।

अनिरुद्धो निरोधोऽयं स्वात्मानं नाशयेत्कथं ।

अथ नष्टो नाशयति नष्टे किं नाश्यते पुनः ॥

---

1) *narāṇām* manque dans la version tibétaine.

2) Sic Mss. *seti.* — བཤད་པ་ མ་ ཚང་བ་ཉིད་དུ་ འགྱུར་བས་ མེད་པ་ ཞེས་ ཉེ་བར་མ་བཀོད་དོ་ དེའི་ཕྱིར། = *dṛṣṭāntatvenopādānān nirdeçāparipūrṇatvān nāstīti nopāttaṃ tasmāt* | *evam*.....— Comme chacun sait que cette seconde tête n'existe pas, l'auteur ne dit pas que cette tête n'existe pas et la phrase peut rester incomplète.

3) *nirodhaka* n'est donné dans les Lexx. qu'en composition.

4) འགག་པ་ རང་གི་བདག་ཉིད་ཀྱིས། ཡོད་མིན་ འགག་པ་ གཞན་གྱིས་ མིན། ཇི་ལྟར་སྐྱེ་བ་ རང་ དང་ ནི། གཞན་གྱིས་ བསྐྱེད་པ་ མ་ཡིན་ བཞིན།། — Mdo XVII *hgag-par raṅ-gi*....

5) Voir ci-dessus VII. 13 (p. 157 l. 7).

इति स[म]मुत्पादेन वक्तव्यं। एवं च स्वात्मना न निरोधोऽस्ति॥ निरोध इदानीं परात्मनापि नास्ति। कथं। तत्र यथोत्पादे गदितमन्य उत्पाद(1)यत्येनमित्याद्येवं निरोधेऽपि वक्तव्यं।

अन्यो विनाशयत्येनं नाशो यद्यनवस्थितिः।
अथाविनाशो नष्टोऽयं सर्वं नश्यतु ते तथा(2)॥

इति। तदेवं परात्मनापि निरोधो न संभवतीति नास्ति निरोधस्य निरोधः॥

अथ मन्यसे नास्त्येव निरोधस्य निरोध इति तदयुक्तं। यदि हि निरोधस्य निरोधो न स्यात्तदा निरोधरहितत्वात्संस्कृतलक्षणमवहीयते। तदेवं यदि विनाशस्य विनाशः परिकल्प्यते तथापि न युक्तो विनाशः। अथ न परिकल्प्यते तथापि न युक्त इति। कथं त्विदानीं विनाशो यो[51 a]द्यते परस्य(3)॥ अथ स्यात्तथाप्येवमेव विचारे सति विनाशो [भवतो ऽपि] न युज्यते। ततो [य] उभयोर्दोषो न तेनैकश्चोद्यो भवतीति(4)॥

उच्यते। नैवेदं चोद्यं समापतति। किं कारणं(5)। ये स्वात्मना(6) निःस्वभावा भावास्ते च निःस्वभावा एव सन्तो [Tib. 67 b] बालानामिदं सत्याभिनिवेशिनां(7) व्यवहारपथमुपयान्ति अविचारप्रसिद्धेनैव न्यायेनेति तेषु नास्ति यथोदितविचारावतारोऽस्माकं। मायास्वप्नगन्धर्वनगरादिवत्तु लौकिकाः पदार्थाः निरुपपत्तिका एव सन्तः सर्वलोकस्याविद्यातिमिरो-

---

1) Voir ci-dessus VII. 19 (p. 162 l. 3).

2) Les deux stances, correspondant à VII. 13. 19, ne figurent pas dans le recueil des Kārikas (Mdo XVII).

3) Sic Cambr.; Paris et Calc. *parasparam* — Tib. གཞན་གྱི་.

4) Le même nyāya est cité plus haut p. 34, n. 1.

5) Manque dans le tibétain.

6) Mss. *yasmān mamā niḥsvabhāvā*.

7) འདི་ བདེན་པར་ མངོན་པར་ཞེན་པ་

पहतमति(1)नयनस्य प्रसिद्धिमुपगता इति परस्परापेक्षयैव केवलं प्रसिद्धिमुपगता बालैरभ्युपगम्यन्ते। यथोक्तं शतके(2)।

अलातचक्रनिर्माणस्वप्नमायाम्बुचन्द्रकैः।
धूमिका(3)न्तःप्रतिश्रुत्कामरीच्यभ्रैः(4) समो भवः॥ इति।

तस्मात्सत्युत्पाद उत्पाद्यं सत्युत्पाद्य उत्पादः, सति निरोधे निरोध्यं सति निरोध्ये निरोध(5) इत्येवं लौकिकस्य(6) व्यवहारस्याभ्युपगमात्, कुतोऽस्मत्पक्षे समप्रसङ्गिता(7) भवितुमर्हति।

यस्तु विना(8)शस्याहेतुकत्वमभ्युपेत्य क्षणिकतां संस्काराणामाह, तस्य निर्हेतुकत्वात्खपुष्पवद्विनाशाभावात्, कुतः क्षणिकत्वं भावानां सेत्स्यति। कुतो विनाशरहितानां संस्कृतत्वमपीति सर्वमेवासमञ्जसं तस्य जायते॥ जातिप्रत्ययं जरामरणं संस्कृतलक्षणानां च संस्कारस्क(9)न्धान्तर्भावं वर्णयता भगवता ननु सहेतुकत्वं स्पष्टमादर्शितं विनाशस्य। जाति[Tib. 68a]मात्रापेक्षत्वाच्चास्य क्षणभङ्गोऽपि सुखसाध्य इति सर्वं सुस्थं जायते॥

---

1) Mss. *malinacetasaḥ pra°*. Mais བློ་གྲོས་ཀྱི་ མིག་ ཉམས་པར་གྱུར་པ་.

2) = XIII. 25. (Voir Muséon, 1900) La même stance est citée ci-dessous ad XXVI. 3.

3) *dhūmikā* = ⁺Nebel (P. W.) = ཁུག་སྣ་ = ཁུག་རྣ = **mahikā* (Foucaux).

4) Mss. *atraiḥ* — *abhra*, voir Sam. Rāja, 28. 25:. «De même qu'il n'y a aucun nuage dans le ciel et que tout-à-coup apparait un cercle de nuages...».

5) Les Mss. portent: *nirodhye nirodhaḥ yathā nirodhe nirodha ity evam...*

6) Mss. *°kasyāvyavahāra°*.

7) Mot nouveau, mais très régulier.

8) Sur le *nirhetukatva* du *vināça*, voir ci-dessus 29, n. 5, Chap. XXI. 4 et Album Kern. p. 113. — Notre auteur ne s'écarte pas, quoi qu'il paraisse, de la thése bouddhique que la «destruction» est sans cause: si on se place au point de vue du *laukika vyavahāra*, c'est-à-dire, au point de vue de l'expérience vulgaire, il faut admettre le *jātipratyaya jarāmaraṇa*; et l'auteur blâme ceux qui introduisent dans la théorie du *saṃskṛta* (enseignement conforme à la *saṃvṛti*, à l'expérience) la thèse du *nirhetukavināça*, laquelle est contradictoire au *lokavyavahāra*. C'est confondre les deux enseignements, c'est mêler les deux vérités. — Voir J. As. 1903, II. p. 357 et suiv.

9) འདུ་བྱེད་ཀྱི་ ཕུང་པོ་

अथ स्यात्। विनाशो हि नामाभावो ' पश्चाभावः किं त[51 b]स्य हेतुना कर्तव्यं। अतो निर्हेतुको विनाश इति॥ ननु च भावेऽपि हेत्वभावप्रसङ्गो भवति[1]। भावो हि नाम विद्यमानो ' यश्च विद्यमानस्तस्यैव[2] [किं] हेतुना प्रयोजनं। न हि जातं पुनरपि जन्यते। तस्मात्सर्वत्रैव हेत्वभावप्रसङ्गादयुक्तमेतत्[3]॥

अपि च। यथोत्पादः सहेतुकः पूर्वमभावात्पश्चाच्च भावात् ' एवं विनाशोऽप्येष्यतां। विनाशो हि न सर्वदा भवति। उत्पादात्पूर्वमभावात्पश्चाच्च भावात्॥ यच्चोच्यते पश्चाभावस्तस्य किं हेतुना कर्तव्यमिति तदयुक्तं। यस्मान्न वयं विनाशस्य हेतुना किंचित्क्रियमानमिच्छामः। किं तर्हि विनाश एव क्रियत इति वर्णयामः॥ नन्वेवं सति क्रियमानत्वाद्विनाशोऽपि भावः प्राप्नोतीति चेदिष्यत एवैतत्। विनाशो हि स्वरूपापेक्षया भावो ' रूपादिधर्मनिवृत्तिस्वभावत्वात्तु न भावः॥ अपि च मरणमपि द्विविधकार्यप्रत्युपस्थानं संस्कारविध्वंसनं च करोति ' अपरिज्ञानानुपच्छेदं [· · · · · ·] [Tib. 68b] चेत्यागमात्[4] ' कथं न सहेतुको विनाशः॥ अपि च कल्पिताभाव[5]भावलक्षणायाश्च शून्य-

---

1) Mss. *bhavato bhāvo* — དངོས་པོ་ལ་ ཡང་ རྒྱུ་མེད་པར་ ཐལ་བར་འགྱུར་བ་ མ་ཡིན་ནམ།

2) Mss. *tasya ca hetunā*.. ཡོད་པ་ གང་ ཡིན་པ་ དེ་ལ་ ནི་ རྒྱུས་ དགོས་པ་ ཅི་ཞིག་ ཡོད་དེ།

3) Mss. °*prasaṅgādayayuktam.*

4) Mss. *vividhakāryapratyupasthānas*°..... *aparijñātānupacchedaṃ ca*; Calc. °*jñānupaccheda*, Paris °*jñānuparichadaṃ ca.* — གཞན་ཡང་ འཆི་བ་ ཡང་ བྱ་བ་ གཉིས་སུ་ ཉེ་བར་གནས་པ་ ཡིན་ཏེ། འདུ་བྱེད་ འཇིག་པར་ ཡང་ བྱེད་པ་ དང་། ཡོངས་སུ་མི་ཤེས་པ་ རྒྱུན་མི་འཆད་པའི་ རྒྱུ་ ཡང་ འབྱིན་ པའོ་ ཞེས་བྱ་བའི་ ལུང་''''. — འབྱིན་པ = to remove = to emit, to exhibit. — Je comprends: ... et détruit [ou manifeste] l'ignorance qui est la cause de la non-interruption de la série (*aparijñānaṃ saṃtānānucchedahetum api nirākaroti* ou *āviṣkaroti* ou *ākṣipati*).

तायाः परेण भावरूपतामभ्युपगच्छता कथमभावस्य भावत्वं नाभ्युपगतं भवति । भावत्वाच्च कथमसंस्कृतत्वं शून्यतायाः स्यात् । अतः सर्वमभ्युपेतं विक्रीयते भवता ॥

अत एव वक्ष्यति ।

भवेदभावो भावश्च निर्वाणमुभयं कथं ।
न संस्कृतं हि निर्वाणं भावाभावौ च संस्कृतौ[1] ॥

इत्यलं प्रसङ्गेन प्रकृतमेव व्याख्यास्यामः ॥

अत्राह । यद्युत्पादस्थितिभङ्गाः संस्कृतस्य निषिद्धाः । तथापि संस्कृतमस्ति विशेषलक्षणयुक्तं[2] । तथा हि काठिण्यादि[52a]कं [मास्नादिकं][3] च तस्य विशेषलक्षणमुप-

---

Il est certain que l'*aparijñāna* s'oppose à l'interruption du *saṃtāna* (རྒྱུན), ou du moi: si la mort détruit l'ignorance, ou la manifeste en transportant le *vijñāna* ignorant et souillé (*saṃkliṣṭa*) dans une vie nouvelle, c'est une autre affaire. — འཛིན་པ' dans le sens de *karoti* ferait double emploi avec བྱེད་པ'.

Voir diverses listes de *maraṇas*, Aṅg. N. I[a], p. 111, *saṃmutimaraṇa*, *khaṇika*°, *samuccheda*°; Vis.-m. (J. P. T. S. 1893), p. 100, *samuccheda*°, *khaṇika*°, *saṃmuti*°, *kāla*°, *akāla*°; p. 137, *saṃkhatalakkhaṇa*, *ekabhavapariyāpannajīvitindriyaprabandhaviccheda*.

Cette dernière mort correspond évidemment à «ce qu'on appelle la mort» (*saṃmutimaraṇa*), dans laquelle on distingue le *kāla*° et l'*akālamaraṇa*. En tant que *saṃkhatalakkhaṇa*, la mort est dite *khaṇikamaraṇa*: c'est le *kṣaṇabhaṅga*. Reste le *samucchedamaraṇa*; ne serait-ce pas l'interruption définitive de la série, le *nirvāṇa* entravé par l'*aparijñāna*?

5) Mss. *kalpitābhāvābhāva*. བརྟགས་པའི་ དངོས་པོ་མེད་པའི་ དངོས་པོའི་ མཚན་ཉིད་ཅན་ སྟོང་པ་ཉིད་.

1) = XXV. 13. — Variante *asaṃskṛtaṃ ca* = འདུས་མ་བྱས'. — *na saṃskṛtam* serait, ce semble, traduit འདུས་བྱས་མེད'.

2) Mss. °*lakṣaṇam ayuktam* མཚན་ཉིད་ དང་ ལྡན་པ'. — Ci-dessous *viçesaṇa*°.

3) Le tibétain ajoute ཀློག་ཁལ་ལ་སོགས་པ'.

दिश्यते । तस्मात्संस्कृतस्य सद्भावात्तल्लक्षणमप्यस्तीति ॥ उच्यते । स्यादेवं यदि संस्कृतमेव वस्तु स्यात्। कुतो। यस्मात्।

उत्पादस्थितिभङ्गानामसिद्धेर्नास्ति संस्कृतं।

यदा यथोक्तेन न्यायेनोत्पादस्थितिभङ्गा एव निषिद्धाः । तदा कुतः संस्कृतं वस्तु तद्विशेषणाल्लक्षणमप्यस्तीति ॥

अत्राह। विद्यत एव संस्कृतं तत्प्रतिपक्षासंस्कृतसद्भावात्॥ उच्यते। स्यादेतदेवं यद्यसंस्कृतमेव स्यात्। यस्मात्। [Tib. 69a]

संस्कृतस्याप्रसिद्धौ च कथं सेत्स्यत्यसंस्कृतं[1] ॥ ३३

अत्रैके आकाशाप्रतिसंख्या[2]निरोधनिर्वाणान्यसंस्कृतानीति कल्पयन्ति । अपरे शून्यतां तथता[3]लक्षणामसंस्कृतां परिकल्पयन्ति । तदेतत्सर्वं संस्कृतस्याप्रसिद्धौ सत्यां नास्त्येवेति स्पष्टमादर्शितं ॥

---

1) སྐྱེ་ དང་ གནས་ དང་ འཇིག་པ་དག། མ་གྲུབ་ཕྱིར་ ན་ འདུས་བྱས་ མེད། འདུས་བྱས་ རབ་ཏུ་མ་གྲུབ་ ན། འདུས་མ་བྱས་ ནི་ ཇི་ལྟར་གྲུབ།།

2) ***nirvāṇa*** = *pratisaṃkhyānirodha*. — Voir Album Kern, Les trois asaṃskṛtas, p. 111.

3) *tatha* = vrai, voir Saṃ. N., V. 430: *cattārimāni tathāni avitathaṃ anaññathāni*... (voir ci-dessus p. 41, n. 4); d'ou *tathatā* = vérité, réalité. — Pour la doctrine dont parle notre auteur, voir Kathāv. XIX. 5. *sabbadhammānaṃ tathatā asaṃkhatā ti*? (Dans l'article Schools of Buddhist Belief, Rhys Davids, J. R. A. S. 1892, p. 33 du tiré à part, on lit: *sarvadharmatiṭṭhatā*...). Les Uttarapathakas répondent. «Oui, tous les *dharmas* dans leur réalité sont *asaṃskṛtas*, — parce qu'ils n'ont pas de réalité». La doctrine officielle: *yesaṃ rūpādīnaṃ* ... *rūpādisabhāvatā, (tesaṃ) saṁkhatā tathatā nāma*. Un Mādhyamika répondrait: «Si la forme etc. avait pour *svabhāva* la forme etc., ce *svabhāva* serait *saṁskṛta*; mais...». — La *tathatā* du *loka*, des *skandhas*, des *dharmas* est le vide. C'est aussi ce qu'on veut dire quand on dit que les *mahābhūtas* reposent en dernière analyse sur l'*ākāça*, car *asaṃskṛtatvād bhagavann ākāçasya nākāçaṃ kena cit sthāpitam* (Prajñāp. 273. 18). — *bhūtatathatā* = *çūnyatā*.

अत्राह । यद्युत्पादस्थितिभङ्गा न सन्तीत्यवधारितं यत्तर्हीदमनावरणज्ञानिना[1] मुनिना संस्कृतस्य भिक्षव उत्पादोऽपि प्रज्ञायते व्ययोऽपि स्थित्यन्य[था]त्वमपि[2] इत्युदाहृतं तत्कथं वेदितव्यमिति ॥ उच्यते ।

यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतं[3] ॥ ३४

यथा मायादयः स्वभावेनानुत्पन्ना[4] अविद्य[माना] मायादिशब्दवाच्या मायादिविज्ञा[5]नगम्याश्च लोकस्य । एवमेतेऽपि लोकप्रसिद्धिमात्रेणोत्पाद[6][ाद]यः स्वभावेनाविद्य[7]माना अपि भगवता तथाविधविनेयजन[8]ानुग्रहचिकीर्षुणा निर्दिष्टा इति ।

अत एवोक्तं[9] ।

---

1) *anāvaraṇajñānin*. — La Bodhi consiste dans la délivrance (*prahāṇa*) du double *āvaraṇa*, *kleça*°, *jñeyāvaraṇa*. La connaissance qui en résulte est respectivement *nirmala* (= *akliṣṭa*) et *anāvaraṇa*. (Bodhisattvabhūmi, I. vii).

2) Voir ci-dessus p. 145, n. 1.

3) རྨི་ལམ་ ཇི་བཞིན་ སྒྱུ་མ་ བཞིན། དྲི་ཟའི་གྲོང་ཁྱེར་ ཇི་བཞིན་དུ། དེ་བཞིན་ བསྐྱེད་ དང་ དེ་བཞིན་ གནས། དེ་བཞིན་དུ་ ནི་ འཇིག་པ་ གསུངས༎ — Mdo XVII
skye (= *janma*) au lieu de *bskyed* (*utpāda*).

4) མ་སྐྱེས་པ་ ཡིན་པ = *anutpannāḥ santaḥ*; voir ci-dessous n. 7.

5) = doivent être appelées *māyā*, etc., sont connues par des connaissances qui sont *māyā*, etc.

6) = སྐྱེ་བ་; voir ci-dessus n. 3.

7) ཡོད་པ་ མ་ཡིན་པ་.

8) *jana* manque dans le tibétain.

9) Samādhirājasūtre. — La deuxième stance = p. 29, 20–21 (Édition de la B. T. S.); la troisième = 29, 8–9.

त्वक्स्नायुमांसास्थिसमुच्छ्रये च
उत्पाद्य संज्ञां मम पत्निरेषा[1] ।
मूढा हि बाला जनयन्ति रागं
स्त्रियो न जानन्ति यथैव मायां[2] ॥

यथा कुमारी सुपिनान्तरस्मिन्[3]
सा पुत्र जा[52b]तं च मृतं च पश्यति ।
जातेऽतितुष्टा मृति दौर्मनस्यिता[4] [Tib. 69b]
तथोपमान् जानथ सर्वधर्मान् ॥

यथैव गन्धर्वपुरं मरीचिका
यथैव माया सुपिनं यथैव ।
स्वभावशून्या[5] तु निमित्तभावना
तथोपमान् जानथ सर्वधर्मान् ॥

तथा ।

---

1) Mss. *mama pattir eṣāṃ*. . . རུས་འདུས་ལ་ འདི་དག་གི། ཆུང་མ་ ཡིན་སྙམ་འདུ་ཤེས་ བསྐྱེད་ནས་ ནི། *chuṅ-ma* = épouse. — Je ne comprends pas la lecture *hdi-dag-gi* = *eṣām*. — Ex conject. འདི་ བདག་གི = *sā mama patnīr iti saṃjñām utpādya*.

2) «. . . et ne comprennent pas que les femmes ne sont qu'illusion». — La *sattvasaṃjñā* est le principe du *rāga*. — Voir ci-dessus p. 52, 6, Aṅg. N. IV. 57, Çikṣās. 245. 6.

3) རྨི་ལམ་ན་

4) མི་དགའ་ — Mss. °*sthitā*, °*syitā*; B. T. S. °*syitā*.

5) Sic Mss. et B. T. S. — མཚན་མ་ སྒོམ་པ་ ངོ་བོ་ཉིད་ཀྱིས་ སྟོང་།

संस्कृतऽसंस्कृत[1]सर्वविविक्ता
नास्ति विकल्पन तेषमृषीणां ।
सर्वगतीषु असंस्कृतप्राप्ता
दृष्टिगतेहि सदैव विविक्ता ॥

नित्यमरक्त अदुष्ट अमूढाः
तस्य[2] सभावसमाहितचित्ता[3] ।
एष समाधिबली बलवन्तो
यो इमु जानति शून्यकधर्मान् ॥ इति ।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ संस्कृतपरीक्षा नाम सप्तम प्रंकरणं ॥

---

1) Mss. *saṃskṛtāsaṃskṛtadharmav°*. — འདུས་བྱས་ འདུས་མ་བྱས་ ཀུན་ དབེན་པ་.

2) Le tibétain a le pluriel གང་དག་; il construit: ***ye jānanti tatsamān** dharmān, ye nityam araktāḥ…, **teṣāṃ** cittaṃ svabhāvasamāhitam, **te samādhi**-balino balavantaḥ.*

3) Sic Mss.

VIII.

कर्मकारकपरीक्षा नामाष्टमं प्रकरणं

अत्राह । विद्यन्त एव संस्कृतस्वभावतो विज्ञानादयः संस्कृता धर्माः ' तद्धेतुककर्मकारकसद्भावात् ॥ उक्तं हि भगवता[1] । अविद्यानुगतोऽयं भिक्षवः पुरुषपुद्गलः पुण्यानपि संस्कारानभिसंस्करोति अपुण्यानपि आनिंज्यानपि संस्कारानभिसंस्करोति ' इत्यादिना कर्मणां कारको व्यपदिष्टः तत्कर्मफलं च विज्ञानादिकं संस्कृतमुपदिष्टं । यस्य च कारकोऽस्ति तदस्ति तद्यथा घटः[2] । यन्नास्ति न तस्य कारकः तद्यथा कूर्मरोमप्रावारस्येति[3] ॥

उच्यते । स्याद्विज्ञानादिकं संस्कृतं यदि तस्य निष्पादककर्मकारकौ स्यातां । न द

[Tib. 70a] स्तः । यस्मात् ।

सद्भूतः कारकः कर्म सद्भूतं न करोत्ययं ।
कारको नाप्यसद्भूतः कर्मासद्भूतमीहते[4] ॥ १

तत्र करोतीति कारकः कर्ता ' कुर्वाणस्यैव किं चित्कारकव्यपदेशो नाकुर्वाणस्य । तच्च करणं सद्भूतस्य वा कर्तुः परिकल्प्ये[53a]त ' असद्भूतस्य वा ' सदसद्भूतस्य वा ॥ क्रियत इति कर्म कर्तुरीप्सिततमं[5] । तदपि त्रिविधं सद्भूतमसद्भूतं सदसद्भूतं च ॥

---

1) Voir ci-dessous ad XXVI, 10. — Comp. Çikṣās. 223. 1; Warren, 180

2) Paris, Cambr. *ghaṭāḥ*.

3) Voir ci-dessus p. 100, n. 1.

4) བྱེད་པོ་ ཡིན་པར་གྱུར་པ་ དེ། ལས་སུ་གྱུར་པ་ མི་ བྱེད་དོ། བྱེད་པོ་ མ་ཡིན་ གྱུར་པ་ ཡང་། ལས་སུ་མི་གྱུར་ མི་ བྱེད་དོ།།

5) Cf. Pāṇ. I. 4. 49.

तत्र सद्भूतः कारकः क्रियायुक्तः सद्भूतं क्रियायुक्तं कर्म न करोतीत्येका प्रतिज्ञा। इदानीमसद्भूतोऽपि क्रियारहितोऽसद्भूतं क्रियारहितं कर्म न करोतीत्यपरा प्रतिज्ञा।

तत्राद्यां प्रसाधयितुकाम आह।

सद्भूतस्य क्रिया नास्ति कर्म च स्यादकर्तृकं।

क्रियानिबन्धनत्वात्कारकव्यपदेशस्य ' करोति क्रियायुक्त एव कश्चित्सद्भूतः कारकव्यपदेशं लभते ' ततश्च तस्यैवंविधस्य क्रियाहेतुकलब्धकारकव्यपदेशस्यापरा क्रिया नास्ति यया कर्म कुर्यात्। क्रियाभावाच्च यदा कारकः कर्म न करोति ' तदा कारकनिरपेक्षमकर्तृकं कर्म स्यात्। न चाकर्तृकं कर्म संभवति ' वन्ध्यासूनोरिव घटकारणमिति। एवं तावत्।

सद्भूतस्य क्रिया नास्ति कर्म च स्यादकर्तृकं

इति दोषप्रसङ्गात्सद्भूतः कारकः [Tib. 70b] कर्म न करोति॥ इदानीं सद्भूतमपि कर्म कारको न करोतीति प्रतिपादयन्नाह।

सद्भूतस्य क्रिया नास्ति कर्ता च स्यादकर्मकः[1]॥ २

सद्भूतं नाम कर्म क्रियायुक्तं। तस्येदानीं क्रियानिबन्धनलब्धकर्मव्यपदेशस्यापरा क्रिया नास्ति यया कर्म क्रियेतेति। एवं तावत्सद्भूतस्य कर्मणः क्रिया नास्ति। यदा नास्ति परा क्रिया ' तदा कारकस्तत्सद्भूतं कर्म नैव करोति। यदा च न करोति कर्मणो द्वितीयक्रियाभावात् ' तदा ऽकर्मक एवाविद्यमानकर्मक एव तस्य कर्मणः कारकः स्यात्। न चैतद्युक्तं। न ह्यकृतानन्तर्यकर्मणा[2] आनन्तर्यकर्मकारकत्वं दृष्टमि[53b]त्येवं सद्भूतः कारकः

---

1) ཡིན་པར་གྱུར་ལ་ བྱ་བ་ མེད། བྱེད་པོ་མེད་པའི་ ལས་སུའང་ འགྱུར། ཡིན་པར་གྱུར་ལ་ བྱ་བ་ མེད། ལས་མེད་ བྱེད་པ་པོར་ ཡང་ འགྱུར།། Mdo XVII porte au troisième pāda མེད་པར་གྱུར་ལ = *asadbhūtasya*.

2) མཚམས་མེད་པའི་ལས་

सद्भूतं कर्म न करोति, इति संसाध्येदानीं यथाऽसद्भूतमपि कर्मासद्भूतः कारको न करोति तथा प्रतिपादयन्नाह ।

करोति यद्यसद्भूतोऽसद्भूतं कर्म कारकः ।
अहेतुकं भवेत्कर्म कर्ता चाहेतुको भवेत्[(1)] ॥ ३

असद्भूतः कारको यः क्रियारहितः, क्रिया च कारकव्यपदेशे हेतुरिति क्रियारहितः कारकोऽपि निर्हेतुकः स्यात् । कर्माप्यसद्भूतं निर्हेतुकं स्यात् । सति चाहेतुकवादाभ्युपगमे कार्यं च कारणं च सर्वमपोदितं स्यादित्याह ।

हेतावसति कार्यं च कारणं च न विद्यते । [Tib. 71a]

सत्येव हि हेतोरभ्युपगमे हेतुना यन्निष्पाद्यते तत्कार्यं, तस्य च यो निष्पादकः तत्कारणमिति युज्यते । तद्यथा घटस्य मृदा[(2)] हेतुर्घटः कार्यं तस्य च चक्रादयः सहकारि कारणं ॥ अहेतुकवादाभ्युपगमे तु [हेत्वनपेक्षत्वात्] मण्डूक[(3)]जटाशिरोमणिमयघटत्वन्न स्यादयं घटः । [अ]सति घटे कुतस्तत्[(4)]कारणमिति । एवं ।

हेतावसति कार्यं च कारणं च न विद्यते ।

ततश्च ।

तदभावे क्रिया कर्ता करणं च न विद्यते[(5)] ॥ ४

---

1) གལ་ཏེ་ བྱེད་པོར་ མ་གྱུར་པས། ལས་སུ་མ་གྱུར་ བྱེད་ན་ ནི། ལས་ལ་ རྒྱུ་ནི་ མེད་པར་ འགྱུར། བྱེད་པ་པོ་ ཡང་ རྒྱུ་མེད་ འགྱུར།།

2) Ci-dessous *mṛd.*

3) D'après le tibétain *ākāçapuṣpavat.*

4) D'après le tibétain *kutas tatsahakārikāraṇam.*

5) རྒྱུ་ མེད་ན་ ནི་ འབྲས་བུ་ དང་། རྒྱུ་ ཡང་ འཐད་པར་མི་འགྱུར་རོ། དེ་ མེད་ ན་ ནི་ བྱ་བ་ དང་། བྱེད་པ་པོ་ དང་ བྱེད་ མི་རིགས།།

तदभावे कार्यकारणाभावे ' किं कुर्वाणस्य क्रिया संभवेत् ' कस्यां वा क्रियायां कुम्भकारस्य स्वातन्त्र्यात्कर्तृत्वं स्यात् । न चापि मृदां तादात्म्यप्रवृत्त्या[4] साधकतमत्वेन[5] कारणत्वं युज्यत इति । एवं तावत् ।

तदभावे क्रिया कर्ता करणं च न विद्यते ॥

ततश्च ।

धर्माधर्मौ न विद्येते क्रियादीनामसंभवे ।

इह यदा देवदत्तः प्राणातिपातविरतिक्रियास्वातन्त्र्यात्कर्ता सन् स्वतन्त्रकार्येण करणभूतेन प्राणातिपातविरतिक्रियां करोति ' तदास्य धर्म उपजायते । एवं दशस्वपि [54a] कुशलेषु कर्मपथेषु कुशलक्रियानिष्पाद्येषु रत्नत्रयमातापितृतदन्यपूज्यपूजादिलक्षणेषु च कुशलधर्मप्रारम्भेषु योज्यं ॥ एवमधर्मेऽपि प्राणातिपातादिलक्षणे कुशलविपर्ययेण क्रियाकर्तृकरणानामभावे सति कर्मणामभावप्रसङ्ग [Tib. 71b] उद्भावनीयः । यदा चैवं धर्माधर्मौ न संभवतः ' तदा तत्फलमपि नास्त्येवेति प्रतिपादयन्नाह ।

धर्मे चासत्यधर्मे च फलं तज्जं न विद्यते ।[6] ५

धर्माधर्मजनितमिष्टानिष्टफलं सुगतिदुर्गत्योर्[7] धर्माधर्मयोरभावे सति न स्यात् ॥

ततश्च ।

फले ऽसति न मोक्षाय न स्वर्गायोपपद्यते ।

मार्गः ।

---

4) Mss. *tādālpapra*° དེའི་བདག་ཉིད་ཀྱིས་ ཉེ་བར་གྱུར་པ་ལས.

5) «being the most effective (instrument)». Voir Sāṃkhyasūtravṛtti II. 39.

6) བྱ་བ་ལ་སོགས་ པ་ རིགས་ན། ཆོས་ དང་ ཆོས་མིན་ ཡོད་མ་ཡིན། ཆོས་ དང་ ཆོས་མིན་ མེད་ན་ ནི། དེ་ལས་བྱུང་བའི་ འབྲས་བུ་ མེད༎

7) *sugatidurgatyor* manque dans le tibétain.

यदि हि फलम[1]इष्टानिष्टं [स्यात्]' स्याल्लौकिकस्य मार्गस्य ध्यानारूप्यसमाधिसमापत्तिलक्षणं[2] स्वर्गः' तदानीं [तदर्थं] लौकिकमार्गभावना ज्यायसी स्यात्' [3]कुगतिगमनकर्मपथविरतिसाफल्यं च स्यात्[3]। यदि च मोक्ष[4]लक्षणं निर्वाणं फलं स्यात्' तदर्थं लोकोत्तरा[5]र्याष्टाङ्गमार्गभावनासा[6]फल्यं स्यात्॥ यदा तु फलं नास्ति तदा।

फले ऽसति न मोक्षाय न स्वर्गायोपपद्यते।

मार्गः।

किं चैवं फलाभावे सति।

सर्वक्रियाणां च नैरर्थक्यं प्रसज्यते[7]॥ ६

या अपि ह्येताः कृषिवाणि[8]ज्यवलगतादिकाः क्रियाः फलार्थं प्रारभ्यन्ते' ता अपि सर्वाः फलाभावे सति नोपपद्यन्त इति। एवं सर्वक्रियाणां नैरर्थक्यं प्रसज्यते भवतां' न चासां नैरर्थक्यं। तस्मान्निरवशेषदोषविष[9]वृक्षाकरभूतोऽयं स्वर्गाप[10]वर्गा[प]वादी नरकादि-

1) *iṣṭāniṣṭam* manque dans le tibétain.

2) °*lakṣaṇaṃ* [*phalam*], c'est-à-dire *svargaḥ*. — བསམ་གཏན་ དང་ གཟུགས་ མེད་པའི་ མཚན་ཉིད་ཅན་ བདེ་འགྲོ.

3—3) Manque dans le tibétain.

4) Mss. *yadi cetokṣalakṣaṇaṃ nirvāṇaphalaṃ*.

5) འཇིག་རྟེན་འདས་པ་

6) *sāphalyam* manque dans le tibétain.

7) འབྲས་བུ་ མེད་ན་ ཐར་པ་ དང་། མཐོ་རིས་གྱུར་པའི་ ལམ་ མི་འཐད། བྱ་བ་ དག་ ནི་ ཐམས་ཅད་ ཀྱང་། དོན་མེད་ཉིད་དུ་ ཐལ་བར་འགྱུར॥

8) Sic Mss. — ཞིང་ལས་ དང་ ཚོང་སྒྲུགས་ དང་ གླ་བཀོལ་གྱི་བྱ་བ་ལ་ སོགས་. — Peut-être faut-il lire *gla-bkol*, = gages — service = *bhṛti*.

9) *viṣavṛkṣa* manque dans le tibétain.

10) Mss. *sanmārgāpavargāvādī narakādi*°, °*vargādī*. — མཐོ་རིས་ དང་ ཐར་གྲོལ་ལ་ སྐུར་པ་འདེབས་པ་.

महापायप्रपातवर्तन[1]हेतुदृष्टादृष्ट[हेतु][2]पदार्थविरोधीति कृत्वा सद्भिरसद्भूतः कारकोऽसद्भूतं कर्म करोतीति पक्षो निकृष्ट एवेति त्याज्यः [54b]॥

तदेवं प्रतिज्ञाद्वयं संसाध्येदानीमुभयद्रूपः कारक [Tib. 72a] उभयद्रूपमपि कर्म न करोतीत्याह।

कारकः सदसद्भूतः सदसत्कुरुते न तत्[3]।

तत्र यदेतत्सदसद्भूतं कर्म क्रियायुक्तमक्रियायुक्तं च। तत्सदसद्भूतः कारको न करोतीति। यस्मात्।

परस्परविरुद्धं हि सच्चासच्चैकतः कुतः[4]। ७

एकः पदार्थ एकस्मिन् काले क्रियायुक्तश्चाक्रियायुक्तश्चेति न युज्यत एवैतत्। ततश्च सदसद्भूतोऽपि कारकः सदसद्भूतं कर्म न करोति। अविद्यमानत्वादित्यभिप्रायः॥

एवं समे पक्षे दूष[णा]मुद्भाव्य विषमपक्षस्यापि निराचिकीर्षया आह।

सता च क्रियते नासन्नासता क्रियते च सत्।

कर्त्रा।

सता सद्भूतेन तावत्कर्त्रा क्रियायुक्तेनासद्भूतमसद्क्रियायुक्तं कर्म न क्रियते। यस्मात्।

सर्वे प्रसज्यन्ते दोषास्तत्र त एव हि[5]॥ ८

---

1) *vartana* manque dans le tibétain.

2) མ་མཐོང་བའི་ རྒྱུའི་ དངོས་པོ.

3) Mss. *kurute na hi.*

4) བྱེད་པ་པོར་གྱུར་མ་གྱུར་པས། གྱུར་ མ་གྱུར་ དེ་ མི་བྱེད་དོ། ཡིན་ དང་ མ་ཡིན་གྱུར་ ཅིག་ལ། པན་ཚུན་འགལ་བས་ ག་ལ་ ཡོད།

5) བྱེད་པ་པོར་ ནི་ གྱུར་པ་ཡིས། མ་གྱུར་ ལས་ ནི་ མི་ བྱེད་དོ། མ་གྱུར་པས་ ཀྱང་ གྱུར་ མི་ བྱེད། འདིར་ ཡང་ སྐྱོན་ དང་ ཐལ་བར་འགྱུར།

सद्भूतस्य क्रिया नास्ति कर्म च स्यादकर्तृकं[1] ।

इत्येवं तावत्सद्भूतः कारकः कर्म न करोति ' नाप्यसद्भूतं कर्म क्रियते ' असद्भूतं हि कर्माहेतुकं भवेत् । ततश्च ।

हेतावसति कार्यं च कारणं च न विद्यते[2] ।

इत्यादिना सर्वं दूषणमापद्यते । तस्मात्पूर्वोक्तैरेव हेतुभिर्दूषितत्वादस्य विषमपक्षस्य न पुनर्हेतोरुपादानमनुष्ठीयते ॥ यथा चैतत्सता कर्त्रासत्कर्म न क्रियत इति प्रतिपादितं ' एवमसता कर्त्राऽक्रियायुक्तेन सत्कर्म न क्रियत इति व्याख्येयमुक्तयथानुसारेण [Tib. 72b] ॥

एवं तावद्विषमपक्ष एकैकपदपरामर्शेन दूषणमभिधायेदानीमेकैकस्य पदस्य पदद्वयपरामर्शेन दूषणाभिधानमाह ।

नासद्भूतं न सद्भूतः [55a] सदसद्भूतमेव वा ।
करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः[3] ॥ ९

स कारकः सद्भूतोऽसद्भूतं कर्म सदसद्भूतमेव वा न करोतीति । कथमित्याह पूर्वोक्तैरेव हेतुभिरिति ॥ तत्र सद्भूतस्य क्रिया नास्ति इत्यादिना[4] सद्भूतः कारको न करोति । असद्भूतमपि कर्म न क्रियते ' अहेतुकं भवेत्कर्म[5] ' हेतावसति[6] कार्यं चेत्यादिना विहितदोषात् । सदसद्भूतमपि कर्म न क्रियते '

परस्परविरुद्धं हि सच्चासच्चैकतः कुतः[7] '

इति वचनात् । एवं तावत्सद्भूतः कारकोऽसद्भूतं [सदसद्भूतं] च कर्म न करोति ॥

---

1) = VIII. 2 A.

2) = VIII. 4 A.

3) བྱེད་པ་པོར་ནི་གྱུར་པ་དང་། བཅས་པས་ལས་ནི་མ་གྱུར་དང་། གྱུར་མ་གྱུར་མི་བྱེད་དེ། གཏན་ཚིགས་གོང་དུ་བསྟན་ཕྱིར་རོ॥

4) = VIII. 2 B.

5) = VIII. 3 B.

6) = VIII. 4 A.

7) = VIII. 7 B.

इदानीमसद्भूतोऽपि कारकः सद्भूतं कर्म सदसद्भूतं च कर्म न करोतीत्याह ।

नासद्भूतोऽपि सद्भूतं सदसद्भूतमेव वा ।
करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः[1] ॥ १०

असद्भूतः कारको निर्हेतुको भवेत् ' हेतावसति कार्यं च[2] इत्यादिनोक्तदोषादसद्भूतः कारको न करोति ॥

सद्भूतस्य क्रिया नास्ति कर्ता च स्यादकर्मकः[3] '

इति प्रसङ्गात् [सद्भूतं कर्म[4] न क्रियते] ॥ सदसद्भूतमपि कर्म न क्रियते [73a]

परस्परविरुद्धं हि सच्चासच्चैकतः कुतः[5] '

इति वचनात् ॥

इदानीं सदसद्भूतोऽपि कारक एकैक एवोभयरूपः सन् यथा सद्भूतमसद्भूतं च भिन्न-[6]भिन्नीतं कर्म [न] करोति तथा प्रतिपादयन्नाह ।

करोति सदसद्भूतो न सन्नासंश्च[7] कारकः ।
कर्म तत्तु[8] विजानीयात्पूर्वोक्तैरेव हेतुभिः[9] ॥ ११

---

1) བྱེད་པ་པོར་ནི་མ་གྱུར་པས། ལས་ནི་གྱུར་དང་བཅས་པ་དང་། གྱུར་མ་གྱུར་པ་མི་བྱེད་དེ། གཏན་ཚིགས་གོང་དུ་བསྟན་ཕྱིར་རོ།།

2) = VIII. 4 A.

3) = VIII. 2 A.

4) ལས་སུ་གྱུར་པ་དང་བཅས་ཡང་མི་བྱེད་དེ་ — Voir ci-dessous l. 12.

5) = VIII. 7 B.

6) Mss. *bhinnasaṃkata.* གང་ཡང་རུང་བ་ = quel qu'il soit.

7) Mss. *na san nāsan na kārakaḥ.*

8) Mss. *karma kartuṃ v°, karmakan tu v°.* — འདིར = *tatra.*

9) བྱེད་པ་པོར་གྱུར་མ་གྱུར་ནི། ལས་སུ་གྱུར་དང་མ་གྱུར་པ། མི་བྱེད་འདིར་ཡང་གཏན་ཚིགས་ནི། གོང་དུ་བསྟན་པར་ཤེས་པར་བྱ།།

परस्परविरुद्धं हि सच्चासच्चैकतः कुतः ।

इति वचनात्सदसद्भूतः कारको न करोति ॥

सद्भूतस्य क्रिया नास्ति कर्ता च स्यादकर्मकः ।

इति प्रसङ्गात्सद्भूतं कर्म न क्रियते ॥ अ[55b]सद्भूतमपि कर्माहेतुकं हेतावसति कार्यं चेत्यादिनोक्तदोषान्न क्रियते ॥

यतश्चैवं समपक्षेषु विषमपक्षेषु च कर्तुः कर्मणश्च सर्वथा सिद्धिरयुक्ता । तस्माद्यदुक्तं विद्यन्त एव विज्ञानादयः संस्कृता धर्माः संस्कृतस्वभावास्तद्धेतुककर्मकारकसद्भावादिति तदयुक्तं ॥

अत्राह । किमवधारितमेतद्भवता न सन्ति भावा इति ॥ न हि । भवतस्तु सस्वभाववादिनः स्वभावस्य भावानां वैधुर्यात्सर्वभावापवादः संभाव्यते । वयं तु प्रतीत्योत्पन्नत्वात्सर्वभावानां स्वभावमेव नोपलभामहे । तत्कस्यापवादं करिष्यामः ॥

यथोक्तमार्यरत्नावल्यां[1] ।

मरीचिं[2] तोयमित्येतदिति मत्वागतोऽत्र सन् ।
यदि नास्तीति तत्तोयं गृह्णीयान् । मूढ एव सः ॥

मरीचिप्रतिमं [Tib. 73b] लोकमेवमस्तीति गृह्णतः ।
नास्तीति चापि मोहोऽयं । सति मोहे[3] न मुच्यते ॥

अज्ञानकल्पितं पूर्वं पश्चात्तत्त्वार्थनिर्णये ।
यदा न लभते भावमेवाभावस्तदा कुह ॥ इति ।

---

1) Voir ci-dessus p. 135. 7 (Kandjour, Mdo VIII, Feer 248).

2) Mss. *paricinto yam.* སྨིག་རྒྱུ་ལ་ནི་འདི་ཆུ་ཞེས། བསམས་ཏེ་

3) Mss. *sali moho* — Voir l'étymologie de *moha* dans la Vajramaṇḍadh. ci-dessus p. 50, n. 6.

तदेवं निःस्वभावानां सर्वभावानां कुतो यथोक्तप्रकारसिद्धिः । तस्माल्लौकिकं विपर्यासमभ्युपेत्य सांवृतानां पदार्थानां मरीचिकाजलकल्पानामिदंप्रत्ययतामात्राभ्युपगमेनैव प्रसिद्धिर्नान्येनेत्याह ।

प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकं ।
कर्म प्रवर्तते नान्यत्पश्यामः सिद्धिकारणं[1] ॥ १२

इहाकुर्वाणस्य कर्मनिरपेक्षस्य कारकत्वाभावात्' कर्मापेक्ष्य कारकस्य कारकत्वं भवति । कारकेण[2] चाक्रियमाणस्य [कस्य][3] चित्कर्मत्वाभावात्' क्रियमाणस्यैव कर्मव्यपदेशात्' तं कारकं[2] प्रतीत्य कर्म प्रवर्तत इत्येवं कर्मकारकयोः परस्परापेक्षिकीं सिद्धिं मुक्त्वा नान्यत्सिद्धि[56a]कारणं पश्यामः ॥ यथा च कर्मकारकयोः परस्परापेक्षिकी सिद्धिः' एवमन्येषामपि भावानामित्यतिदिशन्नाह ।

एवं विद्यादुपादानं[4] व्युत्सर्गादिति कर्मणः ।
कर्तुश्च ।

एवमित्यनेना[न]न्तरां कर्मकारकप्रज्ञप्तिं दर्शयति ॥ उपात्तिरुपादानं' अनेन चोपात्तिक्रियामाह । सा च स्वसाधनं कर्तारमुपादातारं कर्म चोपादानं संनिधापयति' तयोश्चोपादेयोपादात्रोः परस्परापेक्षयोः कर्मकारकवदेव सिद्धिर्न स्वाभाविकी ॥ [Tib. 74a] तस्मात्पुनः स्वाभाविकी न भवति इत्याह व्युत्सर्गादिति[5] कर्मणः कर्तुश्चेति[6] । इतिशब्दो

1) བྱེད་པོ་ལས་ལ་བརྟེན་བྱས་ཤིང༌། ལས་ཀྱང་བྱེད་པོ་དེ་ཉིད་ལ། བརྟེན་ནས་འབྱུང་བ་མ་གཏོགས་པར། གྲུབ་པའི་རྒྱུ་ནི་མ་མཐོང་ངོ༎ — Cité ci-dessus 14. 24.

2) Mss. *kāraṇena, kāraṇam.*

3) འགའ་ཡང་

4) Mss *evaṃ vidyain u°.*

5) བསལ་བ་

6) ཕྱིར་རོ་སྙ

हेतुपरामर्शी । व्युत्सर्गो व्युदासः[1] । ततश्चायमर्थ उपपद्यते ' यैरेव हेतुभिः कर्तुः कर्मणश्च व्युत्सर्गो[2] ऽस्माभिरुक्तः ' तैरेव हेतुभिरुपादाता[3] उपादेयं[4] च प्रतिषिद्धं वेदितव्यं ॥ न च केवलमनयोरन्योन्यापेक्षिकी सिद्धिः कर्तुश्च कर्मणश्च प्रतिषेधेनावसेया । अपि च ।

कर्मकर्तृभ्यां शेषान् भावान् विभावयेत्[5] ॥ १३

प्राज्ञ[6] इति वाक्यशेषः । कर्मकारकोपादेयोपादातृव्यतिरिक्ता येऽन्ये भावा जन्यजनकगन्तृगमनद्रष्टव्यदर्शनलक्ष्यलक्षणोत्पाद्योत्पादकाः ' तथावयवावयविगुणगुणिप्रमाणप्रमेयादयो[7] निरवशेषा भावास्तेषां कर्तृकर्मविचारेण स्वभावतोऽस्तित्वं प्रतिषिध्य परस्परापेक्षिकीमेव सिद्धिं प्राज्ञो निर्मुमुक्षुर्जराजातिमरणादिबन्धनेभ्यो मोक्षाय[8] विभावयेत् ॥

एषां च विस्तरेण विचारो मध्यमकावतारादिभ्योऽवसेयः[9] ॥

ननु च शेषान् भावान् विभावयेदित्यनेनैवोपादानोपादात्रोरधिगतत्वा[10]दुपादानोपादानं पुनरयुक्तं । सत्यमेतत् ' तथापि तत्त्वविचारे प्रा[56 b]धान्यज्ञापनार्थमुपादानोपादात्रोर्भेदेनोपादानं । तथा ह्युत्तरेषु प्रकरणेषु भूयसानयोरेव विचारो [भवि]ष्यतीति ॥

---

1) བརྣག་པ་.

2) Mss. *vyutsargaḥ so smabhir.*

3) ཉེ་བར་ལེན་པོ་.

4) ཉེ་བར་བླང་བ.

5) དེ་བཞིན་ཉེར་ལེན་ཤེས་པར་བྱ། ལས་དང་བྱེད་པོས་གསལ་ཕྱིར་རོ། བྱེད་པ་པོ་དང་ལས་དག་གིས། དངོས་པོ་ལྷག་མ་ཤེས་པར་བྱ॥

6) ཤེས་རབ་ཅན་.

7) Mss. *atha.* དེ་བཞིན་དུ་.

8) Mss. *durikṣayāya, duçcakṣayāya.* — *mokṣāya* est une conjecture de l'éditeur de la B. T. S. — Le tibétain porte simplement *prājño vibhāvayet.*

9) Voir ci-dessus p. 13, n. 3.

10) Mss. *api gatatvāt.*

अत एवोक्तं भगवतार्योपालिपृच्छायां[1] ।

भय दर्शित नैरयिकं [Tib. 74b] मे सत्वसहस्र संवेजित नैके ।
न च विद्यति कश्चिद् सत्व यो च्युतु गच्छति घोरमपायं ॥
न च कारकु कारण सन्ति येहि कृता असितोमरशस्त्राः ।
कल्पवशेन तु पश्यति तत्र कायि पतन्ति अपायित शस्त्राः ॥
चित्रमनोरमसञ्ज्ञितपुष्पाः स्वर्णविमान ज्वलन्ति मनोज्ञाः ।
तेष्वपि कारकु नास्तिह कश्चि तेऽपि च स्थापित कल्पवशेन ॥
कल्पवशेन विकल्पितु लोकः संज्ञगहेण विकल्पितु बालः ।
सो च ग्रहो अग्रहो असभूतो मायमरीचिसमा हि विकल्पाः ॥ इति ।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ कर्मकारकपरीक्षा नाम प्रकरणमष्टमं ॥

1) Même fragment cité ci-dessus p. 53, n. 4.

IX.

पूर्वपरीक्षा नाम नवमं प्रकरणं

अत्राह । यदुक्त[1-]मेवं विद्यादुपादानं व्युत्सर्गादिति कर्मणः कर्तुश्चेति[1)] तदयुक्तं । यस्मात् ।

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
भवन्ति यस्य प्रागेभ्यः सोऽस्तीत्येके वदन्त्युत[(2)] ॥ १

यस्योपादातुर्दर्शनश्रवणघ्राणरसनादीनि वेदनास्पर्शमनस्कारादीनि च भवन्ति स उपादाता पूर्वमेभ्य उपादानेभ्यो ऽस्तीति सांमितीया[(3)] वदन्ति ॥ किं कारणं । यस्मात् ।

कथं ह्यविद्यमानस्य दर्शनादि भविष्यति ।
भावस्य तस्मात्प्रागेभ्यः सोऽस्ति भावो व्यवस्थितः[(4)] ॥ २

इह विद्यमान एव देवदत्तो धनोपादानं कुरुते नाविद्यमानो वन्ध्यातनयः । एवं यदि [57a] तावत्पुद्गलो दर्शनादिभ्यः पूर्वं व्यवस्थितो न स्यात् । नासौ दर्शनादिकस्यो-

---

1—1) Ci-dessus p. 189 l. 11 (VIII. 13).

2) ལྟ་ དང་ ཉན་ལ་སོགས་པ་ དང་། ཚོར་སོགས་ དང་ ཡང་ དབང་གྱུར་པ། གང་གི་ ཡིན་པ་ དེ་དག་གི། སྔ་རོལ་ དེ་ ཡོད་ ཁ་ཅིག་ སྨྲ།།

3) མང་པོས་བཀུར་བ་པ'. — Voir ci-dessus p. 148, n. 1. — Rockhill, Life of Buddha, p. 182, 183, 186, 194.

4) དངོས་པོ་ ཡོད་པ་མ་ཡིན་ན། ལྟ་བ་ལ་སོགས་ ཇི་ལྟར་ འགྱུར། དེ་ཕྱིར་ དེ་དག་ སྔ་རོལ་ན། དངོས་པོ་ གནས་པ་ དེ་ ཡོད་དོ།།

पादानमकरिष्यत् । तस्माद्स्त्यसौ धनात्प्रागेव [Tib. 75 a] स्थितदेवदत्तवद्दर्शनादिभ्यः पूर्वं पुद्गलो योऽस्योपादानं करिष्यतीति ॥ उच्यते ।

दर्शनश्रवणादिभ्यो वेदनादिभ्य एव च ।
यः प्राग्व्यवस्थितो भावः केन प्रज्ञप्यतेऽथ सः ॥ ३ (1)

योऽसौ पुद्गलो दर्शनादिभ्यः पूर्वमस्तीति व्यवस्थाप्यते । स केन प्रज्ञप्यतां । पुद्गलप्रज्ञप्तेर्हि दर्शनादिकं कारणं । स यदि तेभ्यः प्राग्व्यवस्थितो ऽस्तीति कल्प्यते । तदा दर्शनादिनिरपेक्षः स्यात् । घटादि[व] (2) पटः । यश्च स्वकारणनिरपेक्षः स निर्हेतुको धनादिनिरपेक्षधनिकवन्नास्तीत्यभिप्रायः ॥ किं चान्यत् ।

विनापि दर्शनादीनि यदि चासौ व्यवस्थितः ।
अमून्यपि भविष्यन्ति विना तेन न संशयः ॥ ४ (3)

यदि मन्यसे दर्शनादिभ्यः पूर्वं पुद्गलो नामास्ति । स दर्शनादिकमुपादानमुपादत्त इति । नन्वेवं सति निरस्तसंशयममून्यपि दर्शनादीनि विना पुद्गलेन भविष्यन्ति ॥ तथा हि देवदत्तो धनसंबन्धात्पूर्वं धनव्यतिरिक्तो व्यवस्थितः सन्नर्थान्तरभूतमेव पृथक्सिद्धं धनमुपादत्ते । एवमुपादातुरपि स्वात्मव्यतिरेकेणार्थान्तरभूतं दर्शनादिकमुपादानं स्यात् । न तु संभवतीत्याह ।

---

1) ལྟ་ དང་ ཉན་ལ་སོགས་པ་ དང་། ཚོར་བ་ལ་སོགས་ ཉིད་ཀྱིས་ ནི། སྔ་རོལ་ དངོས་པོ་ གང་ གནས་པ། དེ་ ནི་ གང་གིས་ གདགས་པར་བྱ།།

2) Mss. *ghaṭādipaṭāḥ.* བུམ་པ་ དང་ སྣམ་བུ་ ལྟར། — Voir 203, n. 4 — De même que le *paṭa* est indépendant du *ghaṭa.*

3) ལྟ་བ་ལ་སོགས་ མེད་པར་ ཡང་། གལ་ཏེ་ དེ་ ནི་ གནས་ གྱུར་ན། དེ་མེད་ པར་ ཡང་ དེ་དག་ ནི། ཡོད་པར་འགྱུར་བར་ ཐེ་ཚོམ་མེད།།

अज्यते केन चित् [कश्चित्] किं चित्केन चिदज्यते ।
कुतः किं चिद्विना कश्चित्किं चित्कं चिद्विना कुतः(1) ॥ ५

इह बीजाख्येन कारणेन किं चित्कार्यमभिव्यज्यते[Tib. 75b]ऽङ्कुराख्यं ' तेन च कार्येण किं चित्कारणमभिव्यज्यते बीजाख्यमस्येदं कारणमिदमस्य कार्यमिति ॥ एवं यदि केन चिद्दर्शनादिकेनोपादानेन कश्चिदा[57b]त्मस्वभावोऽभिव्यज्यते ' अस्यायमुपादातेति । केन चिच्चात्मना किं चिदुपादानं दर्शनादिकमभिव्यज्यते ' इदमस्योपादानमिति । तदानीं स्यात्परस्परापेक्षयोरुपादानोपादात्रोः सिद्धिः ॥ यदा तूपादातारं विना पृथक्सिद्धं दर्शनादिकमभ्युपगम्यते ' तदा तन्निराश्रयमसदेव । तस्मान्नास्त्युभयोरपि सिद्धिः । इति न युक्तमेतत् ' दर्शनादिभ्यः पृथगवस्थित उपादातेति ॥

अत्राह । यदुक्तं दर्शनश्रवणादिभ्य इत्यादि(2) ' अत्रोच्यते । यदि सर्वेभ्यो दर्शनादिभ्यः प्रागवस्थित इत्यभ्युप[ग]तं स्यात् ' स्यादेष दोषः । यदा तु '

सर्वेभ्यो दर्शनादिभ्यः कश्चित्पूर्वो न विद्यते ।

किं तर्ह्येकैकस्मात्पूर्वो विद्यते । यदा चैवं तदा '

अज्यते दर्शनादीनामन्येन पुनरन्यदा(3) ॥ ६

[यदा] दर्शनेन द्रष्टेत्यभिव्यज्यते न तदा श्रवणादीन्युपादाय प्रज्ञप्यते ' ततश्च पूर्वा-

---

1) ཅི་ཡིས་ གང་ཞིག་ བསལ་བར་བྱེད། གང་གིས་ ཅི་ཞིག་ བསལ་བར་བྱེད། ཅི་མེད་ གང་ཞིག་ ག་ལ་ ཡོད། གང་མེད་ ཅི་ཞིག་ ག་ལ་ ཡོད།།

2) = IX. 3; p. 193 l. 3.

3) Mss. . . *daranādīnām apy eva punar anyadā.* — ལྟ་ལ་སོགས་པ་ ཐམས་ཅད་ཀྱི། སྔ་རོལ་ གང་ཞིག་ ཡོད་པ་མིན། ལྟ་སོགས་ནང་ནས་ གཞན་ཞིག་གིས། གཞན་གྱི་ཚེ་ན་ གསལ་བར་བྱེད།། — *gsal* alterne avec *bsal.* — Buddhapālita . . . . *naṅ-nas gzhan-dag-gis.* — *naṅ-nas* = from among, out of.

क्तदोषानवसर इति ॥ उच्यते । एतदपि न युक्तं दर्शनादिरहितस्य निरुपादानस्य निर्हेतुकस्य निरञ्जनस्यास्तित्वासंभवात् ।

सर्वेभ्यो दर्शनादिभ्यो यदि पूर्वो न विद्यते ।

इति परिकल्प्यते । एवमपि ।

एकैकस्मात्कथं पूर्वो दर्शनादेः स विद्यते[1] ॥ ७

यो हि सर्वेभ्यः पूर्वो [Tib. 76a] न भवति ' स एकैकस्मादपि न भवति । तद्यथा सर्वेभ्यो वृत्तेभ्यः प्राग्वनं नास्ति ' तदेकैकस्मादपि नास्ति । सर्वासां च सिकतानां तैलजननाभावे सति ' एकैकस्या अपि सिकतायास्तैलं नास्ति ।

अपि च । यो ह्येकैकस्मात्पूर्वो भवति ' ननु स सर्वेभ्योऽपि पूर्व एवेत्यभ्युपगतं भवति । एकैकाव्यतिरेकेण सर्वस्याभावात् । तस्मान्न युक्तमेकैकस्मात्पूर्वो विद्यत इति [58a] ॥

इतश्च न युक्तं ' यस्मात् '

द्रष्टा स एव स श्रोता स एव यदि वेदकः ।

तदा ।

एकैकस्माद्भवेत्पूर्वं ।

न च युक्तं वक्तुं ' स एव द्रष्टा स एव श्रोतेति । यदि स्यात्तदा दर्शनक्रियारहितस्यापि श्रोतुर्द्रष्टृत्वं स्यात् ' श्रवणक्रियारहितस्यापि द्रष्टुः श्रोतृत्वं स्यात् । न चैवं दृष्टं यद्दर्शनक्रियारहितोऽपि द्रष्टा स्यात् ' श्रवणक्रियारहितश्च श्रोतेति ॥ अत एवाह ।

एवं चैतन्न युज्यते[2] ॥ ८

---

1) ལྟ་བ་སོགས་པ་ ཐམས་ཅད་ཀྱི། སྔ་རོལ་ གལ་ཏེ་ ཡོད་མིན་ན། ལྟ་བ་སོགས་པ་ རེ་རེ་ཡི། སྔ་རོལ་ དེ་ ནི་ ཇི་ལྟར་ཡོད།།

2) ལྟ་པོ་ དེ་ཉིད་ ཉན་པོ་ དེ། གལ་ཏེ་ ཚོར་པོ་ དེ་ཉིད་ ནི། རེ་རེའི་ སྔ་རོལ་

इति ॥ प्रतिक्रियं च कारकभेदात्कुत एतदेवं भविष्यतीति प्रतिपादयन्नाह । एवं चैतन्न युज्यत इति ॥

आचार्यबुद्धपालितस्तु व्याचष्टे[1] । एकत्वे ह्यात्मन इन्द्रियान्तरगमनप्रसङ्गः पुरुषस्य स्यात् । वातायनान्तरोपगमनवदिति ॥ अस्याचार्यभावविवेको दूषणमाह । सर्वगतस्यात्मनो नेन्द्रियान्तरगमनमस्तीत्ययुक्तः प्रसङ्गदोष इति ॥ तदेतदयुक्तं स्वयूथ्य[2]परिकल्पितपुद्गलवादनिरासस्य प्रस्तुतत्वात्तस्य च सर्वगतत्वाप्रतिज्ञानात् । तस्माद्युक्त [Tib. 76b] एव प्रसङ्गदोषः ॥

अथापि यथोक्तदोषपरिजिहीर्षया ।

द्रष्टान्य एव श्रोतान्यो वेदकोऽन्यः पुनर्यदि ।

परिकल्प्यते । तदपि न युक्तं । एवं ह्रीष्यमाणे ।

ཡོད་གྱུར་ན། དེ་ནི་ དེ་ལྟར་ མི་ རིགས་སོ།། Buddhapālita: *gal-te re-rei sña-rol-na* | *lta-po de-ñid ñan-po de* | *tshor-ba-po yaṅ de-ñid hgyur*.....

1) Cette citation correspond à la *vṛtti* de Buddhapālita (Mdo, XVII) fol. 230 a 7: དེ་ དེ་ལྟར་ན་ མི་ རིགས་སོ། ཅིའི་ཕྱིར་ ཞེ་ན། སྐྱེས་བུ་ སྐར་ཁུང་ ཐ་དད་པར་ འགྲོ་བ་ བཞིན་དུ་ བདག་ དབང་པོ་ གཞན་དུ་ འགྲོ་བར་ ཐལ་བར་འགྱུར་ བའི་ཕྱིར་རོ། བདག་ ནི་ དབང་པོ་ གཞན་ གང་དུ་ འགྲོ་བར་ མི་ འདོད་དོ། — Notre texte: བདག་ ཅིག་ ཡིན་ན་ ནི། དབང་པོ་ གཞན་ལ་ འགྲོ་བར་ ཐལ་བར་འགྱུར་ཏེ། སྐྱེས་བུ་ལྟར་ ཁུང་ གཞན་དུ་ ཉེ་བར་འགྲོ་བ་ བཞིན་ནོ། — Si le *draṣṭar* est le même que le *çrotar*, il faut que l'âme, étant une, passe d'un organe à un autre, comme un homme irait d'une fenêtre à une autre fenêtre. — Bhāvaviveka niera la conséquence (*prasaṅga*), parce que l'âme est donnée comme omniprésente (*sarvagata*). — *ekatve* n'est pas représenté dans Buddhapālita. — Sur le *sarvagatatva*, voir ci-dessus 116, n. 3, Nyāyabindu 115, 10.

Peut-être faut-il lire *prasaṅgaḥ syāt puruṣasya v°*. — Les Mss. sont très fautifs *ekatve hy atmīna* ... *prasaṅgaḥ* | *puruṣasya syāt* || *vātāyanarajopagamanavaditi*.

2) Mss. *svayuthāp*. — རང་གི་ སྡེ་པས་ — Voir ci-dessus p. 76, n. 1.

सति स्याद्द्रष्टरि श्रोता बहुत्वं चात्मनां भवेत्[1] ॥ ९

तद्यथा गोरन्यो ऽश्वो ' न हि गवि सति न भवति यौगपद्येन । एवं यदि द्रष्टुरन्यः श्रोता स्यात् ' स द्रष्टर्यपि सति स्याद्यौगपद्येन । न चैवमिष्यत इति नास्त्यन्यत्वं[2] ॥ अपि चैवं सति बहव एवात्मानः प्राप्नुवन्ति द्रष्टृश्रोतृवेदकादीनां पृथक्पृथक्सिद्ध्युपगमात् । तस्मादेकैकस्मादपि दर्शनादेः पूर्वं नास्ति पुद्गलो नाम कश्चित् ॥

अत्राह । विद्य[58b]त एव पूर्वं स सर्वेभ्यो दर्शनादिभ्य आत्मा । [3]अथ मतं यद्यस्ति केन प्रज्ञप्यतेऽथ स इति यदुच्यते ' इह दर्शनादिभ्यः पूर्वं नामरूपा[व]स्थायां चत्वारि महाभूतानि सन्ति यतः क्रमान्नामरूपप्रत्ययं षडायतनमिति दर्शनश्रवणादीन्युत्पद्यन्ते । तस्माद्दर्शनादिभ्यः पूर्वं चतुर्महाभूतोपादानमेवास्तीति ॥ एवमपि ।

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
भवन्ति येभ्यस्तेष्वेष भूतेष्वपि न विद्यते[4] ॥ १०

येभ्यो महाभू[तेभ्यो] दर्शनादिकमुत्पद्यते ' तेष्वपि महाभूतोपादाननिमित्तकोऽप्येष [5]न युज्यते पूर्वेणैव हेतु[ने]त्यभिप्रायः । तत्र यथा पूर्वमुक्तं '

कुतः किं चिद्विना कश्चित्किं चित्कं चिद्विना कुतः । [6]इति [Tib. 77a]

---

1) གལ་ཏེ་ ལྟ་པོ་ གཞན་ཉིད་ལ། ཉན་པ་པོ་ གཞན་ ཚོར་ གཞན་ ན། ལྟ་པོ་ ཡོད་ཚེ་ ཉན་པོར་ འགྱུར། བདག་ ཀྱང་ མང་པོ་ཉིད་དུ་ འགྱུར།།

2) Voir ci-dessus II. 6.

3) ཅི་སྟེ་ གལ་ཏེ་ དེ་ ཡོད་ན་ དེ་ ནི་ གང་གིས་ གདགས་པར་བྱ་ སྙམ་དུ་ སེམས་ན། དེ་ལ་ བརྗོད་པར་བྱ་སྟེ། = *atha «sa yady asti sa kena prajñapyata» iti manyate yadi, tatra ucyate.*

4) Mss. *teṣv eva.* — ལྟ་ དང་ ཉན་ལ་སོགས་པ་ དང་། ཚོར་བ་དག་ལ་སོགས་པ་ ཡང་། གང་ལས་ འགྱུར་བའི་ འབྱུང་དེ་ལ་འང་། དེ་ ནི་ ཡོད་པ་མ་ཡིན་ནོ།།

5) Mss. *'py eva na yu°, 'py eṣa nai yū°. — eṣa = upādātar, draṣṭar,* etc.

6) IX. 5b.

इहापि तथैव वक्तव्यं । महाभूतोपादानाद्यश्चात्मा पूर्वं सिद्धः स्यात् ' स महाभूतान्युपादाय स्यात् । न चैवं निर्हेतुकत्वात् । यश्च नास्ति स कथं महाभूतान्युपादास्यति । इति दर्शनोपादानवद्भूतोपादानेऽपि दूषणमुक्तमेवेति न पुनरुच्यते ॥

अत्राह । यद्यप्येवमात्मा प्रतिषिद्धस्तथापि दर्शनादिकमस्त्यप्रतिषेधात् । न चानात्मस्वभावानां[1] घटादीनां दर्शनादिसंबन्धोऽस्ति । तस्मात्संबन्धी विद्यत एवात्मेति ॥ उच्यते । स्यादात्मा यदि दर्शनादीन्येव स्युः । [न तु] सन्ति । यस्य दर्शनादीन्युपादानं स यदा नास्तीति प्रतिपादितं ' तदा तस्मिन्नात्मन्युपादातर्यसति कुतो दर्शनादीनामुपादानभूतानामस्तित्वमित्याह ।

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
न विद्यते चेद्यस्य स न विद्यन्त इमान्यपि[2] ॥ ११

यस्य दर्शनादीनि परिकल्प्यन्ते स यदा नास्तीत्युक्तं ' ननु तदैव दर्शनादिकमपि नास्तीति स्पष्टमादर्शितं भवति । ततश्च दर्शनाद्यभावान्नास्त्येवात्मेति ॥

अत्राह । किं खलु भवतो निश्चितमेतन्नास्त्यात्मे[59a]ति ॥ केनैतदुक्तं[3] ॥ ननु चानन्तरमेवोक्तं दर्शनाद्यभावादात्मापि नास्तीति ॥ उक्तमेतदस्माभिः । न त्वस्यार्थो भवता [Tib. 77b] सम्यग्निश्चितो यतो भावरूप आत्मेति परिकल्पितः स स्वभावतो[4] न विद्यते ' तस्य च मया स्वभावाभिनिवेशनिवर्तकमेव वचनमुक्तमसद्विपर्यासप्रतिपत्त्या । न त्वस्या-

1) Mss. *anātmās°*.

2) ལྟ་དང་ཉན་ལ་སོགས་པ་དང་། ཚོར་བ་དག་ལ་སོགས་པ་ཡང་། གང་གི་ཡིན་པ་གལ་ཏེ་མེད། དེ་དག་ཀྱང་ནི་ཡོད་མ་ཡིན།།

3) Mss. *kenaitad yuktam.* — དེ་སྐད་སུས་སྨྲས། — Correction proposée dans l'édition de la B. T. S.

4) Mss. *parikalpitaḥ sarvasvabhāt°*.... དེ་ཡང་ངོ་བོ་ཉིད་ཀྱིས་ — Peut-être *sa eva sva°*.

भावः परिकल्पितः । द्वयं ह्येतत्परित्याज्यं यश्च भावेष्वभिनिवेशो यश्चाभावेष्वभिनिवेश इति । यथोक्तमार्यदेवेन[1] ।

[2]यस्तवात्मा ममानात्मा तेनात्मानियमान्न सः ।
नन्वनित्येषु भावेषु कल्पना नाम जायते ॥ इति ॥

एतदेव प्रतिपादयन्नाह ।

प्राक् च यो दर्शनादिभ्यः सांप्रतं चोर्ध्वमेव च ।
न विद्यतेऽस्ति नास्तीति निवृत्तास्तत्र कल्पनाः[4] ॥ १२

प्राक्तावद्दर्शनादिभ्य आत्मा नास्ति । तत्र हि तस्यास्तित्वाभावात् ॥ दर्शनादिसद्भूतोऽपि नास्ति । पृथक्पृथगसिद्धयोः[5] सद्भावादर्शनात् शशशृङ्गयोरिव । आत्मोपादानयोश्च परस्परनिरपेक्षयोः पृथक्पृथगसिद्धत्वात् । सांप्रतमपि नास्ति ॥ ऊर्ध्वमपि । यदि हि पूर्वं दर्शनादीनि स्युः । उत्तरकालमात्मा स्यात् । तदानीमूर्ध्वं संभवेत् । न चैवमकर्तृकस्य

1) Çataka, X, 3. — Voir Muséon, 1900, p. 239. Notre version porte ཁྱོད་ཀྱི་ བདག་ གང་ ངའི་ བདག་ མིན། དེས་ བདག་ ངེས་མེད་ དེ་ཕྱིར་ ཡོད། དངོས་པོ་ མི་རྟག་པ་རྣམས་ལ། རྟོག་པ་ ཞེས་ ཀྱང་ ཉེ་བར་སྐྱེ།། Il faut lire au second pāda *nes-med-phyir de med*. — La version du Mdo XVIII (fol. 11 b 5) pour le second pāda ངེས་ དེ་ [བ]དག་ མིན་ མ་ངེས་ཕྱིར; pour le quatrième རྟོག་པ་ སྐྱེ་བར་ འགྱུར་ མིན་ནམ = *nanv anityeṣu bhāveṣu kalpanā na jāyate [nopajāyate]*. Dans la première version où manquent la négation et l'interrogation, *nāma* est représenté par ཞེས་; mais ཉེ་བར་སྐྱེ = *upajāyate*.

2) Mss. *yaç ca vātmā*.

3) Mss. *na sv ani°*.

4) གང་ཞིག་ ལྟ་ལ་སོགས་པ་ཡི། སྔ་རོལ་ ད་ལྟ་ ཕྱི་ན་ མེད། དེ་ལ་ ཡོད་དོ་ མེད་དོ་ ཞེས། རྟོག་པ་དག་ནི་ ལྡོག་པར་འགྱུར།།

5) Mss. *pṛthak siddhayoḥ, siddhatvāt*.

कर्मणोऽसिद्धत्वात् ॥ यश्चैवमात्मा दर्शनादिभ्यः प्राक् पश्चाद्युगपच्च परीक्ष्यमाणो नास्ति । तस्येदानीमनुपलब्धस्वभावस्यास्तित्वं नास्तित्वं वा कः परिकल्पयेत्प्राज्ञः । तस्मात्कर्मकारकवदेवोपादानोपादात्रोः परस्परापेक्षा सिद्धिर्न स्वाभाविकीति [Tib. 78a] स्थितं ॥

अत एवोक्तं भगवता आर्यसमाधिराजभट्टारके[1] ।

तस्मि कालि सो दशबलो [अ]नघो
जिनु भाषते इमु समाधि[59b]वरं ।
सुपिनोपमा भवगती सकला
न हि कश्चि जायति न चो म्रियते ॥

न च सत्तु लभ्यति न जीवु नरो
इमि धर्म फेनकदलीसदृशाः [Tib. 43a] ।
मायोपमा गगनविद्युसमा
दकचन्द्रसंनिभ मरीचिसमाः ॥

न च अस्मि लोकि मृतु कश्चि नरो
परलोक संक्रमति गच्छति वा ।
न च कर्म नश्यति कदा चि कृतं
फलु देति कृष्णशुभ संसरतो ॥

न च शाश्वतं न च उच्छेद पुनो
न च कर्मसंचयु न चापि स्थितिः
न च सो पि कृत्व पुनरास्पृशति
न च अन्यु कृत्व पुन वेदयते ॥

1) D'après le tibétain °*rājasūtre*. — Voir ci-dessus p. 109 et suivantes.

न च संक्रमो न च पुनागमनं
न च सर्वमस्ति न च नास्ति पुनः।
न च दृष्टिस्थानगतिशुद्धिरिह
न च सत्व चारमुपशान्तगति ॥

अनुत्पाद शान्त अनिमित्तपदं
सुगतान गोचर जिनान गुणा।
बल धारणी दशबलान बलं
बुद्धानियं वृषभिता परमा ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ पूर्वपरीक्षा नाम नवमं प्रकरणं ॥

X.

अग्नीन्धनपरीक्षा नाम दशमं प्रकरणं

अत्राह । यदिदमुक्तं[1] ' तस्मात्कर्मकारकवदेवोपादानोपादात्रोरपि न स्वाभाविकी सिद्धिरिति ' तदयुक्तं सापेक्षाणामपि पदार्थानां सस्वाभाव्यदर्शनात्[2] । तथा ह्यग्निरिन्धनमपेक्ष्य भवति ' न च निःस्वभावोऽग्निः ' तस्योष्णदाहकत्वादिस्वभावकार्योपलम्भात्[3] । एवमग्निमपेक्ष्येन्धनं भवति ' न च [Tib. 78b] तन्निःस्वभावं बाह्यमहाभूतचतुष्टयस्वभावत्वात् । एवमुपादानसापेक्षोऽप्युपादाता स्वभावतो भविष्यति [60a] ' उपादातृसापेक्षं चोपादानमित्यग्नीन्धनवदेतौ भविष्यत उपादानोपादाता[रा]विति ॥ उच्यते । स्यादेतदेवं यद्यग्नीन्धने एव स्यातां न तु स्तः । कथं । इह यद्यग्नीन्धने स्यातां नियतं ते एकत्वेन वा स्यातामन्यत्वेन वा । उभयथा तु न युज्यत इत्याह ।

यदिन्धनं स चेदग्निरेकत्वं कर्तृकर्मणोः ।
अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत्[4] ॥ १

---

1) Voir p. 200, l. 2.

2) Sic Mss. — Peut-être *sāsvabhāvya*.

3) Mss. *tasyāstudāhakatva*°. — ཚ་བ་ དང་ སྲེག་པར་བྱེད་པ་ཉིད་ རང་བཞིན་ དང་ འབྲས་བུ་ = °*dāhakatvasvabhāva-kārya*-°.

4) བུད་ཤིང་ གང་ དེ་ མེ་ ཡིན་ན། བྱེད་པ་པོ་ དང་ ལས་ གཅིག་ འགྱུར། གལ་ཏེ་ ཤིང་ལས་ མེ་གཞན་ ན། ཤིང་ མེད་པར་ ཡང་ འབྱུང་བར་འགྱུར།། — Cité ci-dessous ad XXII. 1.

तत्रेध्यते यत्तदिन्धनं[1] दाह्यं काष्ठादिकसंभूतं । तस्य दग्धा कर्ताग्निः । तत्र यदि तावत्त्वादिन्धनं स एवाग्निरिति परिकल्प्यते । तदा कर्तृकर्मणोरेकत्वं स्यात् । न चैवं दृष्टं घटकुम्भकारयोश्छेत्तृच्छेत्तव्ययोश्चैकत्वप्रसङ्गात् । तस्य चानभ्युपगमात् ॥ अथान्यत्वमेवमपि । यदीन्धनादन्योऽग्निः स्यात् । तदेन्धननिरपेक्षस्याग्नेरुपलब्धिः स्यात् । न हि घटादन्यः पटस्तन्निरपेक्षो न दृष्टः । न चैवमिन्धननिरपेक्षोऽग्निरिति न युक्तमेतत् ॥ अपि च । यदीन्धनादन्योऽग्निः स्यात्तदानीं ।

नित्यप्रदीप्त एव स्यादप्रदीपनहेतुकः ।
पुनरारम्भवैयर्थ्यमेवं चाकर्मकः सति[2] ॥ २

इन्धनात्पृथग्भूतोऽग्निरिष्यमाणो नित्यप्रदीप्त एव स्यात् । अप्रदीपनहेतुकाश्च [Tib. 79a] स्यात् । पुनरारम्भवैयर्थ्यं च स्यात् । एवं च सत्यकर्मक एव स्यात् ॥

अमुमेवार्थं प्रतिपादयितुकाम आह ।

परत्र निरपेक्षत्वादप्रदीपनहेतुकः ।
पुनरारम्भवैयर्थ्यं नित्यदीप्तः प्रसज्यते ॥ इति[3] । ३

तत्र प्रदीप्यते तदिति प्रदीपनमिन्धनं । प्रदीपनं हेतुरस्येति प्रदीपनहेतुकः । न प्रदीपनहेतुकः अप्रदीपनहेतुकः । यदि प्रदीपनादन्योऽग्निः स्यात्तदेन्धननि[60 b]रपेक्षः स्यात् । यो हि यस्मादन्यः स तन्निरपेक्षो दृष्टः । घटादिव[4] पटः । ततश्च प[र]त्र निरपेक्षत्वा-

---

1) Mss. *tadīnam.* — Correction de l'éditeur de la B. T. S.

2) རྟག་ཏུ་ འབར་བ་ཉིད་དུ་ འགྱུར། འབར་བྱེད་རྒྱུ་ལས་ མི་ འབྱུང་ཞིང་། རྩོམ་པ་ དོན་མེད་ཉིད་དུ་ འགྱུར། དེ་ལྟར་ ཡིན་ན་ ལས་ ཀྱང་ མེད། — Mss. *tadālambavaiyarthyam ... evaṃ yā kasmaḥ sati.* — Voir ad XXII. 1.

3) གཞན་ལ་ བལྟོས་པ་ མེད་པའི་ཕྱིར། འབར་བར་བྱེད་ རྒྱུ་ལས་ མི་འབྱུང་། རྟག་ཏུ་ འབར་བ་ཉིད་ ཡིན་ན། རྩོམ་པ་ དོན་མེད་ཉིད་དུ་ འགྱུར།

4) Tib. = *ghaṭapaṭavat.*

दप्रदीपनहेतुकः स्यात् । प्रदीपनसापेक्षस्य ह्यग्नेस्तदभावे स्यान्निर्वाणं । यदा तु प्रदीपननिरपेक्षस्तदा निर्वाणप्रत्ययवैकल्यान्नित्यप्रदीप्त एव भवेत् । नित्यप्रदीप्ते चाग्नौ सत्यग्नेरपरिनिर्वाणार्थं चास्योपादानसंधुक्षणादिकं[1] व्यर्थमेव स्यात् । एवं च सत्यकर्मकोऽग्निः कर्ता स्यात् । न चाविद्यमानकर्मकस्य कर्तृत्वं वन्ध्यासुतस्येव[2] । तस्मादिन्धनादग्नेरन्यत्वमिति न युज्यते ॥

अत्राह । यदेतदुक्तं

अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत् । इति ।

तदयुक्तं । इहान्यत्वेऽपि सत्यग्नीन्धनयोर्न विनेन्धनेनाग्नेरस्तित्वं । यस्माज्ज्वालापरिगतोऽर्थो[3] दाह्यलक्षण इन्धनं । तदाश्रयेण [Tib. 79b] चाग्निरुपलभ्यते [न] पृथक् । यदा चैतदेवमग्निसंबन्धादेवेन्धनव्यपदेशो भवति इन्धनाश्रयेण चाग्निरुपलभ्यते न पृथक् । तदा अन्यश्चेदिन्धनादग्निरित्यादिदोषप्रसङ्गस्य नास्त्येवावसर इति ॥ अस्य पक्षस्याप्ययुक्ततामुद्भावयन्नाह ।

तत्रैतस्मादिध्यमानमिन्धनं भवतीति चेत् ।
केनेध्यतामिन्धनं तत्तावन्मात्रमिदं यदा[4] ॥ ४

यदि मन्यसे ज्वालापरिगतोऽर्थो दाह्यलक्षण इन्धनं तदाश्रयश्चाग्निरिति । एवमपि परिकल्प्यमान इन्धनमग्निर्दहतीति नोपपद्यते । यस्मात्

केनेध्यतामिन्धनं तत्तावन्मात्रमिदं यदा ॥

---

1) Mss. *sadhukṣana*, *sādh°*.

2) Mss. *°sutasya ca*.

3) Paris et Calc. *parigalita* — འབར་བ་ དང་ ལྡན་. — Ci-dessous l. 15 et 205. 1 uniformément *parigata*.

4) དེ་ལ་ གལ་ཏེ་ འདི་ སྙམ་དུ། སྲེག་བཞིན་ བུད་ཤིང་ ཡིན་ སེམས་ན། གང་ཚེ་ དེ་ཙམ་ དེ་ ཡིན་ན། གང་གིས་ བུད་ཤིང་ དེ་ སྲེག་བྱེད།། — Buddhapālita (232b 5) *sreg-çiṅ bud-çiṅ* .... — *etasmāt* n'est pas représenté dans le tibétain.

इहेन्धनमग्निर्दहतीति परिकल्प्यमाने ज्वालापरिगतं दार्विन्धनमिति। न चैतद्व्यतिरेकेणापरमग्निं पश्यामो येनेन्धनं दह्येत' यस्मादेतावन्मात्रमिद[61 a]मुपलभ्यते यदुत ज्वालापरिगतं दारुमात्रं। यदा चैतद्व्यतिरिक्तो नास्त्यग्निः तदा केन तदिन्धनं दाह्यतां' तावन्मात्रमिदं यदा' इध्यमानमात्रमिदं यदेत्यर्थः। तस्मान्नाग्निरिन्धनं दहति तद्व्यतिरिक्ताग्न्यभावात्। यदा चैवं तदा कुतः कस्य चिज्ज्वालापरिगतिरिति[1] स एव दोषो न वेपते[2]॥

अपि चान्यत्वाभ्युपगमे ऽग्नीन्धनयोरिध्यमानव्यपदेशाभावात्कुत इध्यमानमिन्धनं यतो वेन्धनमग्निर्धक्ष्यतीति प्रतिपादयन्नाह।

अन्यो न प्राप्स्यतेऽप्राप्तो न धक्ष्यत्यदहन् पुनः।
न [Tib. 80 a] निर्वास्यत्यनिर्वाणः स्थास्यते वा स्वलिङ्गवान्[3]॥ ५

यदीन्धनादन्योऽग्निः स्यात्' सोऽन्यत्वादन्धकारमिवेन्धनं न प्राप्नुयात्। न च धक्ष्यत्यप्राप्तत्वाद्विप्रकृष्टदेशावस्थितमिवेत्यभिप्रायः' एवं चेध्यमानमिन्धनं भवतीति नोपपन्नमेव। ततश्चाग्नेर्निर्वाणं न स्यात्। अनिर्वाणश्च स्वलिङ्गवानेव स्थास्यति प्रदीप्त इत्यर्थः॥ वाशब्दो ऽवधारणे द्रष्टव्यो विकल्पार्थो वा' स्वलिङ्गवानेवाग्निः स्थास्यति यदि वा नास्त्यन्यत्वमग्नेरिन्धनादिति। समुच्चये वा अन्यो न प्राप्स्यति न धक्ष्यति न च निर्वास्यति स्वलिङ्गवांश्च स्थास्यति। तस्मादयुक्तमिन्धनादन्यत्वमग्नेः॥

अत्राह। अयुक्तमग्नीन्धनयोरन्यत्वं यस्मान्न प्राप्स्यते ऽप्राप्तो न धक्ष्यत्यदहन् पुनरित्यादि तदयुक्तं। दृष्टा ह्यन्यत्वे स्त्रीपुरुषयोः प्राप्तिरेवमग्नीन्धनयोरपि भविष्यतीति॥ उच्यते।

---

1) Mss. *parigata iti, parigaturiti.*

2) Cet emploi de *vepate* (*nivartati*, བཟློག་པ) est digne de remarque.

3) གཞན་ཕྱིར་ མི་ ཕྲད་ ཕྲད་མེད་ན། སྲེག་པར་ མི་ འགྱུར་ མི་སྲེག་ན། འཆི་བར་ མི་ འགྱུར་ མི་འཆི་ན། རང་རྟགས་ དང་ ཡང་ ལྡན་པར་ གནས༎

अन्य ए[61 b]वेन्धनादग्निरिन्धनं प्राप्नुयाद्यदि ।
स्त्री संप्राप्नोति पुरुषं पुरुषश्च स्त्रियं यथा[1] ॥ ६

स्यादेतदेवं यदि स्त्रीपुरुषवत्परस्परानपेक्षाग्नीन्धनयोः सिद्धिः स्यात् । न त्वस्तीत्याह ।

अन्य ए[61 b]वेन्धनादग्निरिन्धनं काममाप्नुयात् ।
आग्नीन्धने यदि स्यातामन्योन्येन तिरस्कृते[2] ॥ ७ [Tib. 80 b]

न त्वेवं संभवति यदिन्धननिरपेक्षोऽग्निः स्यात् । अग्निनिरपेक्षं चेन्धनमिति । तस्माद्दृष्टान्तवैयर्थ्यं । अन्योन्यापेक्षाधीनजन्मनां[3] सत्यन्यत्वे येषां प्राप्तिः सिद्धा तेषामेव दृष्टान्तत्वेनोपादानं न्याय्यं स्यात् । ते च न संभवन्तीति न युक्तमेतत् । अन्यत्वे सति प्राप्तिरस्तीति ॥

अत्राह । यद्यप्यग्नीन्धनयोः स्त्रीपुरुषवत्परस्परनिरपेक्षा[4] सिद्धिर्नास्ति । तथापि परस्परापेक्षा तावदस्ति[5] । ततश्चास्त्येवाग्नीन्धनयोः स्वरूपसिद्धिः परस्परसापेक्षत्वात् । न ह्यविद्यमानयोर्वन्ध्यापुत्रदुहित्रोः परस्परापेक्षता दृष्टेति ॥ उच्यते । एवमपि ।

---

1) ཇི་ལྟར་ བུད་མེད་ སྐྱེས་པ་ དང་། སྐྱེས་པའང་ བུད་མེད་ ཕྲད་པ་བཞིན། གལ་ཏེ་ ཤིང་ལས་ མེ་ གཞན་ན། ཤིང་ དང་ ཕྲད་པར་ རུང་བར་འགྱུར༎

2) གལ་ཏེ་ མེ་ དང་ ཤིང་དག་ ནི། གཅིག་གིས་ གཅིག་ནི་ བསལ་འགྱུར་ན། ཤིང་ལས་ མེ་ གཞན་ཉིད་ ཡིན་ ཡང་། ཤིང་ དང་ ཕྲད་པར་ འདོད་ལ་ རག༎

3) Mss. *anyonyāpeksăyor na janmanā saty....* — གཞན་ཉིད་ ཡིན་ ཡང་ ཕན་ཚུན་ བལྟོས་པ་ལ་ རག་ལས་ ཏེ། སྐྱེས་པར་གྱུར་པ་ གང་དག་ ཕྲད་པར་ གྲུབ་པ་ དེ་ དག་ ཉིད་དཔེར་ ཉེ་བར་དགོད་པར་ རིགས་པར་འགྱུར་ན། = *anyatve saty api paraspa-rāpekṣādhīnā jātā ye prāpakāḥ siddhās teṣām eva* .. .. On ne peut apporter comme exemples que des êtres dont la naissance soit interdépendante.

4) Mss. *parasparāpekṣā.*

5) Mss. *yāvad.* — Tib. རེ་ཞིག་.

यदीन्धनमपेक्ष्याग्निरपेक्ष्याग्निं यदीन्धनं।
कतरत्पूर्वनिष्पन्नं यदपेक्ष्याग्निरिन्धनं[1]॥ ८

अस्येन्धनस्यायमग्निर्दाहकः कर्तेत्येवं यदीन्धनमपेक्ष्याग्निर्व्यवस्थाप्यते ' अस्याग्नेरिदमिन्धनं कर्मेत्येवमग्निमपेक्ष्य यदीन्धनं ' तत्कतरदनयोः पूर्वनिष्पन्नं । किमिन्धनं यदपेक्ष्याग्निः स्यात् ' उतोऽग्निर्यमपेक्ष्येन्धनं स्यात् ॥ तत्र यदीन्धनं पूर्वनिष्पन्नमिति कल्प्यते ' तदयुक्तमग्निनिरपेक्षस्यानिध्यमानस्येन्धनत्वाभावात् ' तृणादेः सर्वस्य चैवेन्धन[त्व]प्रसङ्गात् । अथ पूर्वमग्निः पश्चादिन्धनमिति ' तदप्ययुक्तमिन्धनात्पूर्वसिद्धस्याग्नेरसंभवात् ' निर्हेतुकत्वप्रसङ्गात् ' [Tib. 81a] पश्चाच्चापेक्षया निःप्रयोजनत्वात् । तस्मान्नास्त्यत्र किं चित्पूर्वसिद्धं यदपेक्ष्येतरस्य सिद्धिः स्यात् ॥ अथापि मन्यसे पूर्वमिन्धनं पश्चादग्निरिति । एवमपि ।

यदीन्धनमपेक्ष्याग्निरग्नेः सिद्धस्य साधनं।

भविष्य[62a]ति । यदीन्धनमपेक्ष्याग्निर्भविष्यतीति परिकल्प्यते ' एवं तर्हि सिद्धस्य सतोऽग्नेः पुनरपि साधनं स्यात् । विद्यमानस्यैव पदार्थस्य सिद्धरूपस्यापेक्षा युज्यते । [न] ह्यविद्यमानो देवदत्तो गृहे कं चिदपेक्षते ॥ एवं यद्यग्निर्विद्यमानो न स्यात् ' नासाविन्धनमपेक्षेत । तस्मादस्तित्वमग्नेरभ्युपेयं । तदा च किमस्येन्धनस्यापेक्षया पुनः कर्तव्यं ' [न] हि सिद्धोऽग्निः पुनरिन्धनेन कर्तव्यो यदर्थमिन्धनापेक्षासाफल्यं स्यात् । तस्मादिन्धनापेक्ष्याग्निर्भवतीति न युक्तं ॥

अपि च । यदीन्धनमपेक्ष्याग्निर्भवतीति परिकल्प्यते ।

एवं सतीन्धनं चापि भविष्यति निरग्निकं[2]॥ ९

---

1) གལ་ཏེ་ཤིང་བསྲེགས་མེ་ཡིན་ལ། གལ་ཏེ་མེ་བསྲེགས་ཤིང་ཡིན་ན། གང་བསྲེགས་མེ་དང་ཤིང་འགྱུར་བ། དང་པོ་གྲུབ་པ་གང་ཞིག་ཡིན།།

2) གལ་ཏེ་ཤིང་བསྲེགས་མེ་ཡིན་ན། མེ་གྲུབ་པ་ལ་སྒྲུབ་པར་འགྱུར། བུད་

यदीन्धनमसिद्धं स्यात्' नैव तदग्निनापेक्ष्येत ' असिद्धस्यापेक्षायोगात्। तस्मान्निरग्निकस्येन्धनस्य सिद्धिरभ्युपेया न चैवमेतदिति न युक्तमेतदिति ॥

अथ मतं यौगपद्येनैवेन्धनसिद्ध्याग्निसिद्धिरग्निसिद्ध्या चेन्धनसिद्धिः । ततश्च एकस्यापि पूर्वसिद्ध्यनभ्युपगमात्तत्र यदुक्तं ।

कतरत्पूर्वनिष्पन्नं यदपेक्ष्याग्निरिन्धनं । इति ।

तदयुक्तमिति ॥ उच्यते । एवमपीष्यमाणा उभयस्यापि नास्ति सिद्धिः । यस्मात् ।

योऽपेक्ष्य [Tib. 81b] सिध्यते भावस्तमेवापेक्ष्य सिध्यति ।
यदि योऽपेक्षितव्यः स सिध्यतां कमपेक्ष्य कः (1) ॥ १०

तत्र यदि यो ऽग्न्याख्यो भावो यमिन्धनाख्यं भावमपेक्ष्य सिध्यति ' इन्धनाख्यश्च भावो योऽग्निनात्मसिद्ध्यर्थमपेक्षितव्यः स यदि तमेवाग्न्याख्यं पदार्थमपेक्ष्य सिध्यति कथ्यतामिदानीं सिध्यतां कमपेक्ष्य क इति ॥ यदा चाग्न्यभावे सतीन्धनस्य सिद्धिरेव नास्ति ' तदा ऽकारणस्येन्धनस्याभावात्कुतस्त[62b]द्धेतुको ऽग्निः प्रसेत्स्यति ॥

एवं य इन्धनाख्यो भावो यमग्न्याख्यं भावमपेक्ष्य सिध्यति ' अग्न्याख्यश्च भावो य इन्धनाख्येनात्मसिद्ध्यर्थमपेक्षितव्यः ' स यदि तमेवेन्धनाख्यं भावमपेक्ष्य सिध्यति ' कथ्यतां किमिदानीं सिध्यतां कमपेक्ष्य क इति ॥ यदा ह्यीन्धनाभावे सत्यग्नेः सिद्धिर्नास्ति तदा निष्कारणस्याग्नेरभावात्कुतस्तद्धेतुकमिन्धनं ॥

इतश्चाग्नीन्धनयोः परस्परापेक्षयापि सिद्धिरसती सिद्धासिद्धयोरपेक्षाभावादिति प्रतिपादयन्नाह ।

པར་བྱ་བའི་ སྐྱེད་ལ་ ཡང་། མེ་ མེད་པར་ ནི་ འགྱུར་བ་ ཡིན༎ — Mdo XVII. *me sgrub-pa-la .... me med-par yaṅ.*

1) གལ་ཏེ་ དངོས་པོ་ གང་ བལྟོས་ འགྲུབ། དེ་ཉིད་ལ་ ཡང་ བལྟོས་ནས་ ནི། བལྟོས་བྱ་ གང་ ཡིན་ དེ་འགྲུབ་ན། གང་ལ་ བལྟོས་ནས་ གང་ཞིག་ འགྲུབ༎

योऽपेक्ष्य सिध्यते भावः सोऽसिद्धोऽपेक्षते कथं ।
अथाप्यपेक्षते सिद्धस्त्वपेक्षास्य न युज्यते (1) ॥ ११

यो ह्यग्न्याख्यो भाव इन्धनाख्यं भावमपेक्ष्य सिध्यति सोऽसिद्धो वेन्धनमपेक्षते सिद्धो वा । यद्यसिद्धस्तदासिद्धत्वात् खरविषाणवन्नेन्धनमपेक्षेत । अथ सिद्धः [Tib. 82a] सिद्धत्वात्किमस्येन्धनापेक्षया । न हि सिद्धं पुनरपि साध्यते वैयर्थ्यात् । एवमिन्धनेऽपि वाच्यं ॥ तस्मान्नाग्नीन्धनयोः परस्परापेक्षया यौगपद्येन वा सिद्धिरिति ॥ यतश्चैवं तस्मात् ।

अपेक्ष्येन्धनमग्निर्न ।

अथ स्यादनपेक्ष्याग्निस्तर्हि भविष्यतीति । एतदपि न युक्तमित्याह ।

नानपेक्ष्याग्निरिन्धनं ।

अन्यत्वप्रतिषेधादहेतुकत्वप्रसङ्गाच्च ॥

यथा चाग्निरपेक्ष्य वानपेक्ष्य वेन्धनान्न संभवति । एवमिन्धनमपीत्याह ।

अपेक्ष्येन्धनमग्निं न नानपेक्ष्याग्निमिन्धनं (2) ॥ १२

एतच्चानन्तरमेव गतार्थत्वान्न (3) पुनरुच्यते ॥

अत्राह । किमनयास्माकमतिसूक्ष्मेक्षिकया (4) प्रयोजनं । ये (5) वयं ब्रूमो यस्मादग्निरिन्ध-

---

1) དངོས་པོ་ བལྟོས་ འགྲུབ་ གང་ ཡིན་པ། དེ་ མ་གྲུབ་ན་ ཇི་ལྟར་ བལྟོས། ཅི་སྟེ་ གྲུབ་པ་ བལྟོས་ ཞེས་ ན། དེ་ ནི་ བལྟོས་པར་ མི་རིགས་སོ།།

2) ཤིང་ལ་ བལྟོས་པའི་ མེ་ མེད་དོ། ཤིང་ལ་ མ་བལྟོས་ མེ་ ཡང་ མེད། མེ་ལ་ བལྟོས་པའི་ ཤིང་ མེད་དོ། མེ་ལ་ མ་བལྟོས་པའི་ ཤིང་ ཡང་ མེད།། Variantes aux pādas impairs: *me med-de* ..... *çi*̀ *med-na*.

3) *gata* = གོ་བར་ཟད་པ་.

4) Voir ci-dessus p. 68, n. 5. — དཔྱད་པ་ ཤིན་ཏུ་ཕྲ་མོ་.

5) Mss. *ye bhāvantu vayam*. Le tibétain a seulement ཁོ་བོ་ཅག་ ནི་ = *vayam eva*....

मानमिन्धनं प्रत्यक्षत उपलभ्यते तस्मात्त एवाग्नीन्धने इति ॥ उच्यते । स्यादेतदेवं [63a] यद्यग्निरिन्धनं दहेत्[1]। यदीन्धनेऽग्निः संभवेत्स इन्धनं दहेत्' न तु संभवतीत्याह ।

आगच्छत्यन्यतो नाग्निरिन्धनेऽग्निर्न विद्यते ।

इन्धनव्यतिरिक्तात्तावत्कुतश्चिदन्यतोऽग्नेरागमनं नास्ति तस्यादृष्टत्वात्। निरिन्धनस्य चाहेतुकस्याग्नेरागमनाभावात्' सेन्धनस्य चागमने प्रयोजनाभावात्' तत्रापि चेन्धने [2]तुल्यपर्यनुयोगात्' अनवस्थाप्रसङ्गाच्च' आगच्छत्यन्यतो नाग्निः [Tib. 82b] ॥ तथेन्धनेऽप्यग्निर्न संभवति तत्रानुपलभ्यमानत्वात् ॥

अथ स्याद्विद्यमानस्यापि [3]मूलोदकादिवदभिव्यञ्जकप्रत्ययवैकल्यात्पूर्वमनुपलभ्यमानत्वं' अरणिनिघर्षणादभिव्यञ्जकप्रत्ययसंभवात्तु पश्चादुपलब्धिरिति। इदमेव तावत्संप्रधार्य[ते] ॥ किं पुनर्मूलोदकादीनामभिव्यञ्जकैः प्रत्ययैः क्रियत इति । तत्र स्वरूपं तावन्न क्रियते विद्यमानत्वात् । अभिव्यक्तिः क्रियत इति चेत् । केयमभिव्यक्तिर्नाम । प्रकाशतेति चेत्। एवं तर्हि सैव क्रियते पूर्वमविद्यमानत्वादस्याः। सत्कार्यवादत्यागश्चैवं जायतेऽभिव्यक्तेः पूर्वमविद्यमानत्वात्पश्चाच्च भावात्। स्वरूपस्य चोत्पत्तिप्रत्ययनिरपेक्षत्वात्खपुष्पवदभिव्यक्तिप्रत्ययसापेक्षतापि न स्यात्[4] ॥

अपि चेयमभिव्यक्तिरभिव्यक्तस्य वा भावस्य परिकल्प्येतानभिव्यक्तस्य वा । तत्र तावद्यदभिव्यक्तं तन्नाभिव्यज्यते तस्याभिव्यक्तिवैयर्थ्यात्' अनिष्टदोषप्रसङ्गाच्च । अनभिव्यक्तमपि नाभिव्यज्यते खपुष्पवद[5][न]भिव्यक्तत्वादित्येवमभिव्यक्तिर्न संभवति ॥

---

1) Ajouter d'après le tibétain: [*na tu dahati.tathā*] *yadīndhane* ...

2) བརྒལ་ཞིང་ བརྟག་པ་མཚུངས་པ་.

3) རྩ་དང་ཆུ་ལ་སོགས་.

4) Voir la discussion de l'*abhivyakti* (མངོན་པར་གསལ་བ་), Bodhicaryāv. IX. 133 et suiv.

5) མངོན་པར་གསལ་བར་མ་གྱུར་པའི་ཕྱིར།

अथापि स्याद्विद्यमानस्यैव प्रत्ययैः स्थौल्यं[1] क्रियत इति ॥ एवमपि यदेव [63b] स्थौल्यं पूर्वं नास्तीति तदेव क्रियत इति [Tib. 83a] कुतः स्थौल्यापा[द]नमभिव्यक्तिः । सौक्ष्म्यस्य[2] च निर्हेतुकस्यासंभवात्कस्य स्थूलतापादनाद[3]भिव्यक्तिः स्यादिति । तदेवं सर्वथा इन्धनेऽग्नेर्न संभव इतीन्धनेऽग्निर्न विद्यते । न चाविद्यमानाग्निनेन्धनस्य दहनमुपपद्यते । इत्यसत्यमेवैतदुपलभते भवान् ॥

अपि च यथा पूर्वं गतागतगम्यमानानां दूषणमुक्तं ।

अत्रेन्धने शेषमुक्तं गम्यमानगतागतैः[4] ॥ १३

अग्निनेन्धनं दह्यमानमुपलभ्यत इत्यत्रेन्धनप्रस्तावे शेषं दूषणं गम्यमानगतागतदूषणेन समं वेदितव्यं । उक्तपाठविपर्ययेण ।

दग्धं न दह्यते तावददग्धं नैव दह्यते ।
दग्धादग्धविनिर्मुक्तं दह्यमानं न दह्यते[5] ॥

इत्यादिना । यत एवमतो नास्त्यग्निनेन्धनस्य दहनमिति वेदितव्यं ॥

इदानीं यथोपपादितमर्थं निगमयन्नाह[6] ।

इन्धनं पुनरग्निर्न नाग्निरन्यत्र चेन्धनात् ।
नाग्निरिन्धनवान्नाग्नाविन्धनानि न तेषु सः[7] ॥ १४

---

1) རགས་པ་ཉིད་.

2) Les Mss. portent *sthaulyasya*; mais le tibétain ཕྲ་བ་ཉིད་.

3) *āpādana* = བྱས་པ་.

4) མེ་ནི་གཞན་ལས་མི་འོང་སྟེ། ཤིང་ལའང་མེ་ནི་ཡོད་མ་ཡིན། དེ་བཞིན་ཤིང་གི་ལྷག་མ་ནི། སོང་དང་མ་སོང་བགོམ་པས་བསྟན༎

5) Voir Chap. II. 1.

6) Voir Chap. VII. 15.

7) ཤིང་ཉིད་མེ་ནི་མ་ཡིན་ཏེ། ཤིང་ལས་གཞན་ལའང་མེ་ཡང་མེད། མེ་ནི་ཤིང་དང་ལྡན་མ་ཡིན། མེ་ལ་ཤིང་མེད་དེར་དེ་མེད༎ — Cité ad XVI. 2.

तत्र ।

यदिन्धनं स चेदग्निरेकत्वं कर्तृकर्मणोः ।

भवेदित्यनेनाग्नीन्धनयोरेकत्वप्रतिषेधादिन्धनं पुनरग्निर्न ॥

अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत् ।

इत्यादिनान्यत्वस्य प्रतिषेधान्नाग्निरन्यत्र चेन्धनात् ॥

तच्चान्यत्वोभयपक्षप्रतिषेधादेव तद्वत्पक्षाधाराधेय(1)पक्षाणामप्यर्थतः [Tib. 83 b] प्रतिषिद्धत्वात्तानपि [नि]गमय(2)न्नाह ।

नाग्नि[64 a]रिन्धनवान्नाग्नाविन्धनानि न तेषु सः ॥ इति ।

तत्राग्निरिन्धनवान्न भवति । इन्धनमस्यास्मिन् वा विद्यत इति व्यतिरेकेण वा व्युत्पादेनाव्यतिरेकेण वा । तत्र व्यतिरेकेण तद्यथा गोमान् देवदत्तः । अव्यतिरेकेण बुद्धिमान् देवदत्तो रूपवानित्यादि । अग्नीन्धनयोश्च पक्षद्वयस्यापि प्रतिषिद्धत्वादिन्धनवानग्निरिति प्रतिषेधो विहितः ॥ अन्यच्च कुण्डं दध्न आधारतां प्रतिपद्यते । न चेन्धनादन्यत्वमग्नेरस्तीति नाग्नाविन्धनानीति युज्यते ॥ नापीन्धनेऽस्त्यग्निरन्यत्वप्रतिषेधादिति । एवमाधाराधेयताप्रतिषेधोऽप्यर्थत उपपादित एव ॥

यथा चाग्निः पञ्चधा विचार्यमाणो न संभवति । एवमात्मापीत्यतिदिशन्नाह ।

अग्नीन्धनाभ्यां व्याख्यात आत्मोपादानयोः क्रमः ।

सर्वो निरवशेषेण ।

तत्रोपादीयत इत्युपादानं पञ्चोपादानस्कन्धाः(3) । यस्तानुपादाय प्रज्ञप्यते स उपादाता ग्रहीता निष्पादक आत्मेत्युच्यते । अहंकारविषयत्वादाहित(4) उत्पादितोऽहंमानो-

1) *tadvat* = དེ་ དང་ ལྡན་. *ādhāra* = རྟེན་ *ādheya* = བརྟེན་པ་.

2) Mss. *tām api gamayan.* དེ་དག་ ཀྱང་ མཚུག་བསྒྲུ་པའི་ཕྱིར་.

3) D'après le tibétain. Les Mss. portent ***ity upādānam . yaç copādānaskandhāns tān upādāya.***

4) Mss. *ādita.* བཞག = ***nikṣipta, āhita.***

ऽस्मिन्निति ॥ तदस्यात्मन उपादानस्य च यः क्रमः[1] सिद्धिः ' स सर्वोऽग्नीन्धनाभ्यां व्याख्यातोऽवगन्तव्यो निरवशेषेण ॥

कः पुनः सर्वस्य निरवशेषस्य[2] च भेदः । सर्वप्रकरणेनैव [Tib. 84a] पञ्च पक्षाः समनन्तरप्रक्रान्ता अभिसंबध्यन्ते ' सर्व एते पञ्चापि पक्षा अग्नीन्धनवदात्मोपादानयोरप्यविकला ढौकनीयाः[3] । यश्चैषां प्रतिपादन उपपत्तिक्रमः प्रागुपवर्णितस्तेन निरवशेषेणात्मोपादानयोः प्रतिषेधो वेदितव्यः । इत्यनेन सर्वात्मना प्रतिषेधसाम्यमग्नीन्धनाभ्यामात्मोपादानयोर्वेदितव्यमित्युपदर्शनार्थं सर्वो [64b] निरवशेषेणेत्याह ॥ तत्र यदेवोपादानं स एवात्मेत्येवं कर्तृकर्मणोरेकत्वप्रसङ्गान्न युज्यते । नाप्यन्यदुपादानमन्य उपादाता स्कन्धव्यतिरेकेणाप्यात्मोपलब्धिप्रसङ्गात् ' परत्र निरपेक्षत्वादित्यादिप्रसङ्गाच्च । एकत्वान्यत्वप्रतिषेधाच्च स्कन्धवानप्यात्मा न भवति । अन्यत्वाभावाच्च नात्मनि स्कन्धा न स्कन्धेष्वात्मा । यत एवं पञ्चसु प्रकारेष्वात्मनो न सत्त्वं ' तस्मात्कर्मकारकवदेवात्मोपादानयोः परस्परापेक्षिकी सिद्धिरिति स्थितं ॥

यश्चायमात्मोपादानयोः क्रमः स नानयोरेव किं तर्हि ।

साधं घटपटादिभिः ॥[4] १५

निरवशेषैः पदार्थैः सर्वथा व्याख्यातो वेदितव्यः । घटादयो हि कार्यकारणभूता अवयवावयविभूता लक्षणलक्ष्यभूता [Tib. 84b] गुणगुणिभूता वा स्युः । तत्र मृद्दण्डचक्रसूत्रसलिलकुलालकरव्यायामादयो[5] घटस्य कारणभूताः ' घटः कार्यभूतः । कपालादयो

1) Sic Mss. — གྲུབ་པའི་རིམ་པ་ = *siddhikramaḥ.*

2) Mss. ***niravaçeṣaç*** *ca.* — ཀུན་ དང་ མ་ལུས་པ་ལ་.

3) སྦྱར་བར་བྱ་ = *sambandhanīya.*

4) མེ་ དང་ ཤིང་གིས་ བདག་ དང་ ནི། ཉེ་བར་བླང་བའི་ རིམ་པ་ ཀུན། བུམ་སྣམ་སོགས་ དང་ ལྷན་ཅིག་ཏུ། མ་ལུས་པར་ ནི་ རྣམ་པར་བཤད॥ — Mdo XVII. *ñe-bar-len-pai.*

5) Mss. °*çalilakulālakala*° རྫ་མ་ཁན་གྱི་ ལག་པའི་ རྩོལ་བ་.

नीलादयो वा अवयवभूताः ' घटो ऽवयवी । पृथुबुध्नलम्बौष्ठदीर्घग्रीवत्वादीनि लक्षणानि ' घटो लक्ष्यः । श्यामत्वादयो गुणाः घटो गुणी । इत्येवं व्यवस्थाप्याग्नीन्धनवत्क्रमो योज्यः । एषां च घटादीनामात्मोपादानयोश्च मध्यमकावतारप्रकरणाद्व्याख्यानमवसेयं ।

तदेवं कर्मकारकवदात्मोपादानयोर्घटादीनां च परस्परापेक्षिक्यां सिद्धौ व्यवस्थितायां तथागतवचनाविपरीतार्थ[ाव]बोधा[1]भिमानितया तीर्थ्यमतोपकल्पितपदार्थव्यवस्थ सौगतप्रवचनार्थ[2]त्वेनोपनीयातिमूढतया '

आत्मनश्च सतत्त्वं ये भावानां च पृथक् पृथक् ।
निर्दिशन्ति न तान्मन्ये शासनस्यार्थकोविदान्[3] ॥ १६

तत्र [65a] सह तेन वर्तत इति सतत् ' स[त]तो भावः सतत्त्वमपृथक्त्वमनन्यत्वमेकत्वमित्यर्थः । तदे[4]तत्सतत्त्वं ये वर्णयन्ति न तानाचार्यः शासनार्थपण्डितान् [Tib 85a] मन्यते ॥ तद्यथा ' आत्मा उपादानेन प्रज्ञप्यते येन सहैव तेनोपादानेन संभवति । स न पृथग्व्यतिरेकेणैव भवतीत्यर्थः । एवं येन कारणेन मृदादिना घटः प्रज्ञप्यते तद्व्य[5]तिरेकेणैव स भवति न पृथक् । एवमात्मनो भावानां च सतत्त्वं ये वर्णयन्ति न ते परम

---

1) Mss. °*aviparītārbhabādhā*° དོན་ཕྱིན་ཅི་མ་ལོག་པ་ ཡིན་པར་ རློམ་པ་ཉི ཀྱིས་ = *aviparītārtha-abhimānitayā.*

2) གསུང་རབ་ལས་ ཁོང་དུ་ཆུད་པའི་ དོན་ཉིད་དུ་ གཙུས་ནས་ = °*pravacan adhigata-arthatvena upanīya.*

3) གང་དག་ བདག་ དང་ དངོས་པོ་རྣམས། དེ་བཅས་ཉིད་ དང་ ཐ་དད་པར སྟོན་པ་ དེ་དག་ བསྟན་དོན་ལ། མཁས་སོ་ སྙམ་དུ་ མི་ སེམས་སོ།།

4) Tib. = *tad atra satattvam.*

5) Mss. *tadvyatirekeṇa.* ཐ་མི་དད་པ་ཉིད་དུ་

गम्भीरस्य प्रतीत्यसमुत्पादस्य शाश्वतोच्छेदरहितस्योपादायप्रज्ञप्त्यभिधान[स्य][1] तत्त्वं पश्यन्ति ।

पृथक् पृथक् च ये निर्दिशन्ति ' पृथगित्यात्मानं पृथगुपादानं पृथक्कार्यं पृथक्कारणमित्यादिनान्यत्वं पश्यन्ति ' अमूनपि न शासनस्यार्थकोविदानाचार्यो मन्यते ॥ यथोक्तं ।

एकत्वान्यत्वरहितं प्रतिश्रुत्कोपमं जगत् ।
संक्रान्तिमासाद्य[2] गतं बुद्धवांस्त्वमनिन्दितः ॥ इति ॥

एवं चाग्नीन्धनपरीक्षयाधिगतधर्मतत्त्वपरमस्य योगिनः कल्पेनाकालालिप्सितैरपि[3] नैव वपुर्दह्यते रागद्वेषमोहकृताशनैरपि वेति ।

यथोक्तं भगवता[4] ।

यथ गगणु न जातु दग्धपूर्वं
सुबहुभि कल्पशतैर्हि दह्यमानं ।
गगनसम विजानमान धर्मान्
सो[ऽपि][5] न दह्यति जातु साग्निमध्ये ॥

---

1) བརྟེན་ནས་ གདགས་པའི་ མིང་ཅན་གྱི་. — Ci-dessus (137, n. 3) བརྟགས་པ་ = *prajñapti*; voir XVII. 2.

2) Sic Mss. — འཕོ་ དང་ འཇིག་པ་ དང་ བྲལ་བར་ = *saṃkrāntivyayarahitam*, °*vyayavigatam*; ou, plus exactement འཇིག་པ་ = *uccheda* opposé à *saṃkrānti* (passage de l'être d'une existence dans une autre, ou d'un *kṣaṇa* à un autre *kṣaṇa*)

3) Le tibétain donne une lecture plus intelligible: དུས་མཐའི་ མེ་དག་གམ་ = *yugāntajvālābhir vā*. — Mss. Calc. *kalpenākālālipsituiḥ*, Paris °*lapsitair*, Camb. °*lātmanair*. — *kalpāntakālāgnijvalanair*? ?

4) Mètre Puṣpitāgrā. — Voir Ed. Müller, Der Dialect der Gāthās des Lalitavistara, p. 31.

5) Mss. *dharmāns te*..... དེ་ནི་ གཞན་ཡང་ མེ་ནང་ ཡོད་ མི་འཚིག། = *kvacana na dahyati jātu so 'gnimadhye*.

(1) सर्विहि ज्वलमाणि बुद्धक्षेत्रे
प्रणिधि करोति समाधिये (2) स्थिहित्वा ।
(3) ज्वलत अपु पशाम्यतामशेष
पृथिवि विनश्यि (4) [पि] नैवऽस्यान्यथात्वं ॥

(5) तथा ।

अरणिं (6) यथ चोत्तरारणिं [Tib. 85b]
हस्तव्यायामु (7) त्रयेभि संगतिः ।
इति पत्ययतोऽग्नि जायते
जातु कृतुकार्य लघू (8) निरुध्यते ॥

अथ पण्डितु कश्चि मार्ग[65b]ते
कुतऽयम्मागतु (9) कुत्र याति वा ।

---

1) Mss. *sacihe.* — *sarvihi* = *sarviṃhi, sarvasmin.*

2) Mss. *samādhihe.*

3) Mss. *jvalanta.* — «Que toutes ces champs de Bouddha enflammés s'éteignent sans exception!»

4) Mss. *vinaçci.* — *pi* d'après le tibétain ཀྱང་ — *naivă 'sya.* — Mss. *naivāsya* — ས་རྡུམས་ ཞིག་ ཀྱང་ དེ་ལ་ འགྱུར་བ་ མེད།

5) Les stances qui suivent sont-elles extraites du Lalitavistara? Voir p. 211 de Rājendralāl, Bodhicaryāv. ad IX. 108 (p. 342), Çikṣās. 240. 1. — Mètre Vaitalīya ⏑⏑–⏑–⏑–⏑–⏑– | {⏑⏑⏑– / –⏑⏑⏑} –⏑⏑–⏑–⏑– ||

6) Il est difficile d'expliquer ces accusatifs.

7) འདི་གསུམ་ འདུས་པ་. — *hastavyāyāmu* doit être scandé –⏑––⏑.

8) Mss. *laghu.* — Voir la note de M. C. Bendall.

9) Mss. *kuta ayam ā°.*

विदिशो दिश[1] सर्वि मार्गतो
नागतिर्नास्य[2] गतिश्च लभ्यति ॥

स्कन्धायतनानि धातवः
शून्य आध्यात्मिक शून्य बाहिराः।
सर्वात्मविविक्त ऽनालया
धर्म आकाशसभावलक्षणाः ॥

इमु ईदृश धर्मलक्षणा
बुद्ध दीपंकरदर्शने त्वया[3]।
अनुबुद्ध यथ त्वयात्मना[4]
तथ बोधेहि सदेवमानुषान् ॥

विपरीत अभूतकल्पिते
रागदोषैः परिदह्यते जगत्।
कृपमेघशमाम्बुशीतलां
मुञ्च धाराममृतस्य नायक ॥ इति विस्तरः।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ अग्नीन्धनपरीक्षा नाम दशमं प्रकरणं ॥

---

1) ཕྱོགས་ དང་ ཕྱོགས་མཚམས་ཀུན་ཏུ་.

2) འདི་ཡི་ འགྲོ་ དང་ འོང་བ་ རྙེད་མེད་ བཞིན་. Nos Mss. *na gatir nāsyāgatiç ca*; mais voyez les leçons indiquées par M. **Bendall**.

3) མར་མེ་མཛད་པ་མཐོང་ནས་ ཁྱོད་ཀྱིས་ རྟོགས་ = *dīpaṃkaradarçanāt tvayā jñātāḥ*.

4) **Rājendralāl**, 212. 11 *anubuddha svayaṃ yathātmanā.*

XI.

पूर्वापरकोटिपरीक्षा नामैकादशमं प्रकरणं

अत्राह । विद्यत एवात्मा संसारसद्भावात् । यदि ह्यात्मा न स्यात्कस्य पाञ्चग(1)तिके संसार आजवंजवीभावेन(2) जन्ममरणपरंपरया संसरणं स्यात् । उक्तं हि भगवता अन(3)वराग्रो हि भिक्षवो जातिजरामरणसंसार इति । अविद्यानिवरणानां सत्त्वानां तृष्णासंयोजनानां तृष्णागण्डुरबद्धानां(4) संसरतां संधावतां पूर्वा कोटिर्न प्रज्ञायत इति ॥ यदा च भगवदुपदेशात्संसारोऽस्ति तदा संसर्तापि(5)अस्ति स चात्मोच्यत इति ॥ [Tib. 86a]

---

1) Mss. *pañca*°.

2) Mss. *ājavaṃjabījābhāvena*. — M. Vyut. § 224, 24 *ājavañjavasamāpanna* et variante *ājāvaṃ j*°. — འགྲོ་བ་ དང་ འོང་བའི་ ངོ་བོར་ སྐྱེ་བ་ དང་ འཆི་བ་ གཅིག་ ནས་ གཅིག་ཏུ་ བརྒྱུད་པས་ = *gamāgamibhāvena* .... — M. J. S. Speyer compare Jāt. m. 90. 10 (*āmajjato nimajjataç ca*) et il conjecture *ājavajjavanmīnabhāvena*. — M. F. W. Thomas compare Harşacar. (Bomb. 1892), p. 286. 8, transl. p. 255. 26.

3) Voir Saṃ. N. II. 178. 193, III. 144. 151; Divya 197. 5; Kathāv. I. 1. 159. — *anavarāgraçūnyatā*, M. Vyut. 37. 10; Dh.-s. 41. — *anavarāgra* = *anamatagga* = *aṇavayagga* (Māhārāşṭrī Erzählungen, 33. 17). — Comp. *aṇorapāra* (Guérinot, Jīvaviyāra, J. As. 1902, I, p. 277). — Voir cependant Pischel, Gr. der Pr. Spr., § 251 qui apporte un grand nombre d'exemples et croit à une dérivation de √*nam*, dessen Anfang sich nicht wegbeugt = sich nicht verändert = endlos.

4) Mss. °*gardūra*° — P. W. *gaṇḍu*, *gaṇḍula* = *Knoten — སྲིད་པའི་ ལུ་གུ་ བརྒྱུད་ཀྱིས་ བཅིངས་པ་ — *lu-gu-brgyud*, «rope to which the lambs are fastened, or strung». — «Attachés comme des moutons...». — Voir P. W. *gaḍḍārikā*.

5) *saṁsartar*, mot nouveau.

उच्यते। स्यादात्मा यदि संसार एव स्यात्। कथं। यस्मादस्य '

पूर्वा प्रज्ञायते कोटिर्नेत्युवाच महामुनिः।
संसारोऽनवराग्रो हि नास्यादिर्नापि पश्चिमं[1]॥ १

कोटिर्भागो देश[2] इति पर्यायाः। पूर्वा कोटिः पूर्वो देश इत्यर्थः। यदि हि संसारो नाम कश्चित्स्यात् ' नियतं तस्य पूर्वमपि [66 a] स्यात्पश्चिममपि घटादीनामिव। उक्तं च भगवता ' अनवराग्रो हि भिक्षवो जातिजरामरणसंसार इति। यदेव [अवराग्रे[3] न]स्तः संसारस्यानवराग्रवचनात्संसार एव नास्तीति ननु स्पष्टमादेशयामास भगवान्। तस्मान्नास्ति संसारः पूर्वापरकोट्यनुपलम्भात् [अलात[4]]चक्रवदिति स्थितं॥

अत्रेदं विचार्यते। यदि पूर्वं चापरं च संसारस्य निषिद्धं भगवता कथं पुनरिदमाह तस्मात्तर्हि संसारक्षयाय प्रतिपत्स्यामह इत्येवं वो भिक्षवः शिक्षितव्यमिति॥ उच्यते। अविद्यानिवरणानां सत्त्वानामित्यादिविशेषणोपादाना[5]त्तेषामेवायमनवराग्रः संसार इति प्रतीयते ' न पुनस्तत्त्वज्ञाना[6]निलबलात्समुन्मूलिताविद्यानिवरणतरूणां। तेषां तु लोकोत्तरमार्गज्ञानाग्निना दग्धाशेषक्लेशवासनामूलनिःशेषपादपानां भवत्येवान्त इति विज्ञेयं॥

---

1) སྔོན་མཐའ་ སྔོན་ནམ་ ཞེས་ ཞུས་ཚེ། ཐུབ་པ་ཆེན་པོས་ མིན་ ཞེས་ གསུངས། འཁོར་བ་ ཐོག་མ་ མཐའ་ མེད་དེ། དེ་ལ་ སྔོན་ མེད་ ཕྱི་མ་ མེད།། Mdo XVII, troisième pāda ཐོག་མ་ ཐ་མ་ མེད།

2) *bhāga* = ཆ; *deça* = ཆ་ཤས་.

3) Mss. *yad eva çataḥ, ...sataḥ.* — Voir ci-dessous p. 220. 12. — Le tibétain ne confirme pas la conjecture; il porte *yasmād evaṃ saṃsāro 'navarāgra uktas tasmāt saṃsāra eva......*

4) མགལ་མེའི་ འཁོར་ལོ་ བཞིན་ནོ།

5) Mss. *upādānās teṣām.* — ཉེ་བར་བཀོད་པས་.

6) Mss. *°jñānenaiva ca na balāt.* — ཡེ་ཤེས་ཀྱི་ རླུང་གི་ ཤུགས་ཀྱིས་.

कथं [Tib. 86b] पुनरादिरहितानामन्तोपदेश[1] इति यावत् ॥ दृष्टमेतद्बाह्येषु व्रीह्यादिष्वाद्यभावेऽपि दहनादिसंपर्कादन्तसद्भावः ।

यथोक्तमार्यदेवपादैः[2] ।

यथा बीजस्य दृष्टोऽन्तो न चादिस्तस्य विद्यते ।
तथा कारणवैकल्याज्जन्मनोऽपि न संभवः ॥ इति ॥

स चान्तोपदेशो लौकिक एव व्यवहारे स्थित्वा संसारचारका[3]वबद्धानामुत्साहनार्थं सत्त्वानां देशितो लौकिकज्ञानापेक्षया । वस्तुक[4]चिन्तायां तु संसार एव नास्ति ' तत्कुतोऽस्य परिक्षयः ' प्रदीपावस्थायां रज्जूरगपरिक्षयवत्[5] ॥

अत्राह । यद्येवं लौकिकज्ञानापेक्षयान्तवदादिरपि किं नोच्यते[6] ॥ उच्यते । अहेतुकदोष[66b]प्रसङ्गात् ' लौकिकज्ञानापेक्षयापि संसारस्यादेरभाव इत्युभयथाप्यादेरभाव एवेति विज्ञेयं ॥

अत्राह । यद्यप्यवराग्रे न स्तः संसारस्य तथापि मध्यमस्त्यप्रतिषेधात् । ततश्चास्ति संसारो मध्यसद्भावात् । इह यन्नास्ति न तस्य मध्यमस्ति तद्यथा कूर्मरोमप्रावरणस्येति ॥ हास्यः खल्वसि । ननु च भोः ।

नैवाग्रं नावरं यस्य तस्य मध्यं कुतो भवेत् ।

---

1) Mss. *rahitānām ekopadeça iti.* — ཐ་མ་ ཡོད་པར་ བསྟན་.

2) Çataka, VIII. 25. (Voir Muséon, N. S., I, p. 239.)

3) *saṃsāracāraka*, Bodhicaryāv. p., VII. 21; *bhavacāraka*, M. Vyut. 245. 224, Bodhicaryāv. I. 9, Rāṣṭrapālap. 21. 13.

4) Mss. *avastuka°*. དངོས་པོ་ སེམས་པ་ ཡིན་ན་.

5) N'est pas représenté dans le tibétain. — Le serpent-corde n'est pas détruit quand on voit à la lumière que c'est une corde.

6) C'est-à-dire: pourquoi ne pas admettre que le *saṃsāra* a eu un commencement comme on admet qu'il peut avoir une fin, pourquoi ne pas dire de l'*ādi* ce qu'on dit de l'*anta*?

अग्रमित्यादिः पूर्वं प्रथममुच्यते ' अवरमित्यवसानमन्तो व्यवच्छेद उच्यते । यस्य संसारस्यादिरन्तश्च प्रतिषिद्धस्तस्य कुतो मध्यं भविष्यति । ततश्च संज्ञामात्रकमेव विपर्यासपरवशमानसानां संसार आदिमध्यावसानविरहितत्वादाकाशवदलातचक्रादिवदिति भावः [Tib. 87a] । संसाराभावाच्च नास्त्यात्मेति ॥

यत एवं संसारस्यादिमध्यावसानानि न सन्ति ' अत एव संसाराभावाज्जातिजरामरणादीनां पूर्वापरसहक्रमा अपि नैव सन्तीत्याह ।

तस्मान्नात्रोपपद्यन्ते पूर्वापरसहक्रमाः(1) । २

यथा च नोपपद्यन्ते तथा प्रतिपादयन्नाह ।

पूर्वं जातिर्यदि भवेज्जरामरणमुत्तरं ।
निर्जरामरणा जातिर्भवेज्जायेत चामृतः(2) ॥ ३

यदि पूर्वं जातिर्भवेत् ' तदा मरणरहिता स्यान्न च जरादिरहित[ा] जातिर्युज्यते ऽसंस्कृतत्वप्रसङ्गात् । जरामरणरहितस्य भावस्य जातौ परिकल्प्यमानायामन्यत्रामृतस्यैव देवदत्तस्य प्रथममिह जातिः परिकल्प्यमाना स्यात् । ततश्चादिमान् संसारः स्यादहेतुकदोषश्च । अभूवमतीतमध्वानमित्येवं पूर्वान्तकल्पना च न [67a] स्यात् । अभूत्वा च पूर्वं पश्चादिहोत्पादः स्यात् ॥

---

1) གང་ལ་ ཐོག་མ་ མཐའ་ མེད་པ། དེ་ལ་ དབུས་ ནི་ ག་ལ་ ཡོད། དེ་ཕྱིར་ དེ་ལ་ སྔ་ ཕྱི་ དང་། ལྷན་ཅིག་ རིམ་པ་ མི་ འཐད་དོ॥ — Mdo XVII གང་ལ་ ཐོག་ ཐ་མ་ མེད་པ།

2) གལ་ཏེ་ སྐྱེ་བ་ སྔར་ འགྱུར་ལ། རྒ་ ཤི་ ཕྱི་མ་ ཡིན་ན་ ནི། སྐྱེ་བ་ རྒ་ཤི་མེད་པ་ དང་། མ་ཤི་བར་ ཡང་ སྐྱེ་བར་འགྱུར॥ — Cité ci-dessus p. 12. 6.

अथ स्यादाम्रादीनां[1] यथा पूर्वं विनापि जरामरणसंबन्धात्प्रथममेवोत्पादो दृष्ट एवमात्मनोऽपीति ॥ नैवं । साध्यसमत्वात् । आम्रादीनामपि हि स्वबीजनिरोधे समुत्पद्यमानत्वान्नान्यत्राविनष्टानामुत्पाद इति सममेतत्पूर्वेण ॥

अथ स्यादन्यदेव वृक्षाद्बीजमतोऽन्यत्र[ा][2]विनाशपूर्वक एव वृक्षस्योत्पाद इति ॥ नैवं । कार्यकारणयोरन्यत्वस्य[Tib. 87 b]ासिद्धत्वात् । तथा च वक्ष्यति[3] ।

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ इति ।

न च बीजाद्वृक्षस्यान्यत्वमतः साध्यसममेतत् । यतश्चान्यत्रामृतस्यैवोत्पादो नास्ति न पूर्वं जातिरतोऽभ्युपेया ॥

अथ पूर्वं जरामरणं पश्चाज्जातिः । एवमपि ।

पश्चाज्जातिर्यदि भवेज्जरामरणमादितः ।
अहेतुकमजातस्य स्याज्जरामरणं कथं[4] ॥ ४

जातिप्रत्ययं जरामरणमिति वचनाज्जातिहेतुकं जरामरणमुक्तं भगवता । यद्येतत्पूर्वं स्यात्तदा निर्हेतुकं स्यात् । तस्मान्न युक्तमेतत् ॥ यतोऽप्युक्तं ।

जह उक्खित्ते लोढम्मि उक्खिवे अत्थि कारणं ।
पडने कारणं णत्थि अण्णं उक्खिवकारणात् ॥ इति[5] ।

---

1) Mss. *amra, asra, agra.* — Transcrit dans le tibétain ཨ་མྲ་ = *āmra* (ÇKDr.).

2) གཞན་དུ་མ་ཞིག་པ་སྔོན་དུ་འགྲོ་བ་ཅན་.

3) Chapitre XVIII. 10.

4) གལ་ཏེ་ སྐྱེ་བ་ ཕྱི་ འགྱུར་ལ། རྒ་ཤི་ སྔ་བ་ ཡིན་ན་ནི། སྐྱེ་བ་མེད་པའི་ རྒ་ཤི་ ནི། རྒྱུ་མེད་པར་ ནི་ ཇི་ལྟར་ འགྱུར།།

5) Restitution conjecturale. — གང་ལས། བོད་པ་ བཏེགས་པར་གྱུར་པ་ནི།

यथाप्यत्र क्षेपः पतनकारणं नान्यत्' एवमिहापि जातिमेव कारणत्वेन विनाशस्य वर्णयामो नान्यत्' इति नास्त्यहेतुकता विनाशस्य' जातिहेतुकत्वाच्चास्योद्गमनमेव[1] [वि-नाशस्य] हेतुरिति कृत्वा एषापि गाथा सुनीता भवति।

एविमे संखता धम्माः संभवन्ति सकारणाः।
स भाव एव धम्माणां यं विभोन्ति समुद्गताः॥ इति[2]॥

इदानीं सहभावेनापि जाति[67 b]जरामरणानामसद्भावं प्रतिपादयन्नाह।

न जरामरणेनैव जातिश्च सह युज्यते।
म्रियेत जायमानश्च स्याच्चाहेतुकतोभयोः[3]॥ ५

བཏེག་པ་ལ་ནི་རྒྱུ་ཡོད་ཀྱི། བཏེག་པ་ལྟ་ཞིག་རྒྱུ་ལས་ནི། གཞན་པ་ལྷུང་ལ་མེད་པ་ཉིད॥ = *utkṣipyamāṇe hi loṣṭe syād utkṣepa eva kāraṇam | patane nāsty anyad utkṣepakāraṇād.* — Mss. *yatrāpy uktam | yathā utkhittire tra (tru) sti utkheç ca ni kāraṇaṃ ne tvi | aṃkastvike vathe (a ekattvikkhe the) ca kāraṇād iti || atrāpy atra.* — J'ai surtout tenu compte de la citation de Kumārila (Mīmāṃsātantravārt., Ben. S. S., p. 171. 9) dans le curieux passage où il tire argument, contre l'autorité des Écritures bouddhiques, de la langue incorrecte dans laquelle elles sont rédigées (*prasiddhāpabhraṣṭadeçabhāṣābhyo 'py apabhraṣṭatarāṇi...*). Voir J. R. A. S. 1902, p. 370. Le lecteur qui se reportera au J. R. A. S. voudra bien noter les corrections suivantes qui m'ont été indiquées par M. A. Barth; p. 370, note 2, ligne 2 *pratīyate*, ligne 10 °*tāniṣṭatā*°, ligne 11 *eva viplutam.* La récente édition du livre de Kumārila sera, le cas échéant, utilisée dans une note finale. — *yatha* appelle le *evam* de la stance ci-dessous 223. 4 — *padane* et *loḍhammi* sont justifiés par Pischel §§ 218, 304.

1) Mss. *āgamanam*, °*odgamanam* — བྱུང་བ་ཁོ་ན་འཇིག་པའི་རྒྱུ — Voir ci-dessous, l. 5 *samudgatāḥ*.

2) Mss. *eva me saṃkhyāta*° et *saṃkhatau.* — དེ་ལྟར་འདུས་བྱས་ཆོས་དེ་དག — *yaṃ* = *yad.* — Un des Mss. donne *dharmāṇa vibhavanti.* — La première ligne est citée par Kumārila, loc. cit. *ime sakkaḍā dhammā saṃbhavanti sakāraṇā, akāraṇā viṇasanti aṇupyattikāraṇāt* (?). — Voir Pischel § 76 (*sakkada*, etc.).

3) སྐྱེ་བ་དང་ནི་ཀ་ཤི་དག། ལྷན་ཅིག་རུང་བ་མ་ཡིན་ཏེ། སྐྱེ་བཞིན་པ་ན་འཆི་འགྱུར་ཞིང་། གཉིས་ཀ་རྒྱུ་མེད་ཅན་དུ་འགྱུར॥ — Mss. *na jarāmaraṇaṃ caiva...*

यदि सहभावो जातिजरामरणानां स्यात् तदा जायमानस्य [Tib. 88a] मरणं स्यात्। न चैतद्युक्तं। न च परस्परविरुद्धत्वादालोकान्धकारवदेककालता युक्ता। न चैवं लोके दृष्टं यज्जायमान एव म्रियत इति॥ अपि चाहेतुकत्वं जात्यादीनां सहभावकल्पनायां स्यात्। न हि सहभूतयोः सव्येतरगोविषाणयोरन्योन्यहेतुकता दृष्टेति न युक्तमेतत्॥ तदेवं।

यत्र न प्रभवन्त्येते पूर्वापरसहक्रमाः।
प्रपञ्चयन्ति तां जातिं तज्जरामरणं च किं[1]॥ ६

यस्यां जातौ यत्र जरामरणे एते पूर्वापरसहक्रमा न सन्ति तां जातिमनुपलभमाना आर्याः किं प्रपञ्चयन्ति। किंशब्दोऽसंभवे। नैव प्रपञ्चयन्तीत्यर्थः॥ अथ वैवमविद्यमानेषु जात्यादिषु तां जातिमविद्यमानां बालाः किं प्रपञ्चयन्ति तच्च जरामरणं यन्न संविद्यते। तस्मादवस्तुक एव बालानां प्रपञ्च इत्यभिप्रायः॥

यथा च संसारस्य पूर्वा कोटिर्नास्ति एवमन्येषामपि भावानामित्याह।

कार्यं च कारणं चैव लक्ष्यं लक्षणमेव च।
वेदना वेदकश्चैव सन्त्यर्था ये च के चन॥ ७
पूर्वा न विद्यते कोटिः संसारस्य न केवलं।
सर्वेषामपि भावानां पूर्वा कोटी न विद्यते[2]॥ ८

---

1) གང་ལ་ སྔ་ ཕྱི་ ལྷན་ཅིག་གི། རིམ་པ་དེ་དག་ མི་སྲིད་པའི། སྐྱེ་བ་ དེ་ དང་ རྒ་ཤི་ དེ། ཅི་ཡི་ཕྱིར་ ན་ སྤྲོ་བར་བྱེད॥

2) འཁོར་བ་ འབའ་ཞིག་ སྔོན་གྱི་ མཐའ། ཡོད་མ་ཡིན་པར་ མ་ ཟད་ཀྱི། རྒྱུ་ དང་ འབྲས་བུ་ཉིད་ དང་ ནི། མཚན་ཉིད་ དང་ ནི་ མཚན་གཞི་ཉིད། ཚོར་ དང་ ཚོར་ པོ་ཉིད་ དང་ ནི། དོན་ ཡོད་ གང་དག་ ཅི་ ཡང་ རུང་། དངོས་རྣམས་ཐམས་ཅད་ ཉིད་ལ་ ཡང་། སྔོན་གྱི་ མཐའ་ ནི་ ཡོད་ མ་ཡིན॥

तत्र यदि पूर्वं कारणं पश्चात्कार्यं स्यादकार्यकं कारणं निर्हेतुकं स्यात् । अथ [Tib. 88b] पूर्वं कार्यं पश्चात्कारणमेवमपि कारणात्पूर्वं कार्यं निर्हेतुकमेव स्यात् । अथ युगपत्कार्यकारणे स्यातामेवमुभयमप्य[हेतु]कं स्यात् । एवं लक्ष्यलक्षणे वेदनावेदकौ च योज्यौ ॥ न च केवलं संसा[68a]रस्य व्याख्यानेन कार्यकारणादिकं व्याख्यातं वेदितव्यं । अपि च येऽप्यन्ये पदार्था ज्ञानज्ञेयप्रमाणप्रमेयसाधनसाध्यावयवावयविगुणगुण्यादयस्तेषामपि पूर्वा कोटी न विद्यत इति योज्यं ॥

अत एवार्यरत्नमेघसूत्रे[1] आर्यसर्वनीवरणविष्कम्भिणा महाबोधिसत्त्वेन भगवान् स्तुतः ।

आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव च निर्वृताः ।
धर्मास्ते विवृता नाथ धर्मचक्रप्रवर्तने ॥ इति ॥

तथा ।

आदित शून्य अनागत धर्मा
नो गत[2] अस्थित थानविविक्ताः ।
नित्यमसारक मायसभावाः
शुद्ध विशुद्ध नभोपम सर्वि ॥

यान्[3] च पभाषति धर्म जिनस्य[4]
तत्र च पश्यति नोऽन्तयतायै[5] ।

1) Voir Çikṣās. p. 7, n. 2 et Index p. 370; Ed. Huber, Itinéraire de Ki Ye, Bulletin de l'École Française, II, p. 258. — Notre stance est citée, sans indication de source, Subhāṣitasaṃgraha, Muséon, N. S. IV. 394. 13.

2) Mss. *nāgata, anāgata.* — སོང་བ་ མེད་.

3) Mss. *yaṃ ca.* — གང་དག་.

4) Mss. *janasyo.* — རྒྱལ་བའི་ ཆོས་ ནི་ གང་དག་ རབ་སྟོན་པ།

5) Mss. *taṃ ca na manyati so 'kṣayatāyaḥ.* — དེར་ ཡང་ མི་ཟད་པས་ ད་ མི་མཐོང་སྟེ།

आदिनिरात्मनिसत्विमि(1) धर्मा-
स्तान् च पभाषति नो क्षयताये(2) ॥

कल्पित(3) वुच्चति कल्पितमात्रं
अत्तु न लभ्यति संसरमाणो ।
कोटि अलक्षण(4) या पुरि आसी-
देति अनागति प्रत्ययताये ॥

कर्म क्रिया च पवर्तति एवं
हीनउत्कृष्टतया(5) समुप्यन्ति ।
जडुक(6) धर्म सदा प्रकृताये
शून्य(7) निरात्म विजानथ सर्वान् ॥ इत्यादि ।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां [Tib. 89a] प्रसन्नपदायां मध्यमकवृत्तौ पूर्वापरकोटिपरीक्षा नामैकादशमं प्रकरणं ॥

---

1) **Mss.** *nisavini.* — ཆོས་ འདི་ སྔ་ནས་ བདག་མེད་ སེམས་ཅན་མེད་ — *ādi-nirātma-niḥsattvā ime.*

2) དེ་དག་ རབ་ཏུ་སྟོན་ ཀྱང་ མི་ཟད་འགྱུར། — **Mss.** *no ca kṣayeti.* — *kṣayatāye* = °*tāe* = °*tāyai.*

3) བཏགས་ནས་ = *kalpitvā; vuccati* = བསྟན་ = *deçyate.*

4) **Mss.** *vyāpuri āsī | deti.* — གང་དག་ སྔོན་བྱུང་ མཐའ་ ནི་ མཚན་ཉིད་མེད། མ་འོངས་དུས་ ཀྱང་ ཤེས་པར་བྱ་བའི་ཕྱིར།། *yāḥ* (?) *pūrvaṃ koṭir eva alakṣaṇā anāgatakāle 'pi pratyāyanārtham.*

5) བར་ དང་ ཐ་མ་དག་ཏུ = *madhyama-utkṛṣṭa.* — Pour le mètre *hīna-ukṛṣṭa*°.

6) **Mss.** *jaḍuka, jaḍḍuka.* — ཟླུན་ = *jaḍa.*

7) = *prakṛtiçūnya* = རང་བཞིན་ སྟོང་.

XII.

दुःखपरीक्षा नाम द्वादशमं प्रकरणं

अत्राह। विद्यत एवात्मा तत्संबन्धिदुःखसद्भावात्। इह हि पञ्चोपादानस्कन्धा दुःखमित्युच्यते[1] तच्चास्ति। तेन च दुःखेन कस्य चिद्भवितव्यं न निराश्रयेणेति। अतो विद्यत एव दुःखस्याश्रयः, स चात्मेति॥ उच्यते। स्यादात्मा यदि दुःखमेव स्यात्, तद्धि भवेत्स्वयं कृतं वा भवेत्परकृतं वा उभ[68b]यकृतं वा हेतुरहितं वा। सर्वथा चेष्यमाणं तत्कार्यमेव नास्तीति प्रतिपादयन्नाह।

स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकं।
दुःखमित्येक इच्छन्ति तच्च कार्यं न युज्यते[2]॥ १

तत्रैके वादिनः स्वयं कृतं दुःखमिति प्रतिपन्नाः। अपरे पुनः परकृतं। अन्ये चोभयकृतं। केचिदहेतुसमुत्पन्नमेव दुःखमिति प्रतिपन्नाः। सर्वथा च तद्दुःखमिष्यमाणं कार्यं कर्तव्यं न युज्यते, तदेतत्प्रतिज्ञामात्रकमिति। तत्प्रतिपादयन्नाह।

---

1) *pañcopādānaskandhāḥ* = *upādānam*, ci-dessus p. 212. 18. — Pour la définition du *duḥkha*, voir Bcp. IX. 350. 4, M. Vyut. 112 ..... *saṃkṣepeṇa pañcopādānaskandhaduḥkham*, et ci-dessous XXIV. 1 (fol. 149 b).

2) ཁ་ཅིག་ སྡུག་བསྔལ་ བདག་གིས་ བྱས། གཞན་གྱིས་ བྱས་ དང་ གཉིས་ཀས་ བྱས། རྒྱུ་མེད་པ་ལས་ འབྱུང་བར་ འདོད། དེ་ནི་ བྱ་བར་ མི་རུང་ངོ༎ — Voir ci-dessus p. 55. 3.

sayaṃkata, *paraṃkata dukkha*, *sukha*, Saṃ. N. II, p. 19, Udāna, VI. 5 (p. 70), Kathāv., VII. 6. 1 et XVI. 3. — Voir l'opinion des Mahāsāṃghikas, d'après Vasumitra (Wass. 242, n. 4; Mdo, XC, fol. 172 a).

स्वयं कृतं यदि भवेत्प्रतीत्य न ततो भवेत् ।
स्कन्धानिमानमी स्कन्धाः संभवन्ति प्रतीत्य हि[1] ॥ २

[2]यस्मादिमान्[3] मरणान्तिकान्[4] स्कन्धान् प्रतीत्येम औपपत्त्यांशिकाः[5] स्कन्धा उत्पद्यन्ते तस्मात्स्वयं कृतं दुःखमिति नोपपद्यते[6] ॥

---

1) གལ་ཏེ་ བདག་གིས་ བྱས་ གྱུར་ན། དེ་ཕྱིར་ བརྟེན་ནས་འབྱུང་ མི་ འགྱུར། གང་ཕྱིར་ ཕུང་པོ་ འདི་དག་ལ། བརྟེན་ནས་ ཕུང་པོ་ འདི་དག་ འབྱུང་॥ — Mdo XVII *phuṅ-po de-dag-la* | *brten-nas phuṅ-po de-dag*. — Il faut lire *phuṅ-po hdi-dag-la* | *phuṅ-po de-dag*.....comme dans la version du commentaire de **Buddhapālita** (Mdo XVII, fol. 242b 6); et d'après l'analogie de notre commentaire à la ligne suivante: *amī maraṇāntikāḥ* (འདི་དག), *ima aupapattyāṃçikāḥ* (དེ་དག་).

Mss. *skandhān imān amī skandhāḥ* et à la ligne suivante *skandhān imān*. — J'hésite à corriger *skandhān amūn ime skandhāḥ*, *skandhān amūn*; car, au troisième sūtra, *amī* désigne les nouveaux skandhas, *ebhir* les anciens.

2) Le tibétain présente ici un passage qui n'est pas représenté dans nos Mss. Par le fait, ceux-ci ne fournissent pas le commentaire de la première ligne de la **Kārikā**. Voici le texte tibétain et un essai de traduction.

དེ་ལ་ བདག་གིས་ ཞེས་བྱ་བ་ ནི་ བདག་རང་གིས་ ཞེས་བྱ་བའི་ དོན་ཏོ། གལ་ཏེ་ བདག་གིས་ སྡུག་བསྔལ་ བྱས་པར་གྱུར་ན་ ནི། སྡུག་བསྔལ་གྱི་ རང་གི་ ངོ་བོ་ དེ་ཉིད་ཀྱིས་ སྡུག་བསྔལ་གྱི་ རང་གི་ ངོ་བོ་ དེ་ཉིད་ བྱས་པར་ [89b] འགྱུར་རོ། དེའི་ཕྱིར་ རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་བར་ མི་ འགྱུར་རོ། རྒྱུ་ དང་ རྐྱེན་ལ་ མི་ལྟོས་པར་ འབྱུང་བར་ མི་ འགྱུར་རོ། ཞེས་བྱ་བའི་ དོན་ཏེ། རང་གི་ ངོ་བོར་ ཡོད་པའི་ཕྱིར་རོ། ཡོད་པ་ མ་ ཡིན་པས་ ནི་ རང་གི་ ངོ་བོ་ བྱེད་པ་ མ་ ཡིན་ནོ། འདི་ ནི་ རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་བ་ ཡང་ ཡིན་ཏེ། འདི་ལྟར།

གང་ཕྱིར་ ཕུང་པོ་ འདི་དག་ལ།
བརྟེན་ནས་ ཕུང་པོ་ དེ་དག་ འབྱུང་བའི་ ཕྱིར་ ཏེ།

གང་གི་ཕྱིར། འཆི་བའི་ དུས་ཀྱི་ ཕུང་པོ་ འདི་དག་ལ་···

tatra svayam iti svātmanā ity arthaḥ . yadi svayaṃ duḥkhaṃ kṛtaṃ bhavet

इदानीं परकृतमपि दुःखं यथा न संभवति तथा प्रतिपादयन्नाह ।

यद्यमीभ्य इमेऽन्ये स्युरेभ्यो वामी परे यदि ।
भवेत्परकृतं दुःखं परैरेभिरमी कृताः(7) ॥ ३

यद्यमीभ्यो मरणान्तिकेभ्यः स्कन्धेभ्य [इम] औपपत्त्यांशिकाः(8) स्कन्धा अन्ये स्युरेभ्यो वा औपपत्त्यांशिकेभ्य अमी(9) मारणान्तिकाः स्कन्धाः परे स्युः स्यात्तदानीं परकृतं दुःखं । न चैषामन्यत्वं दृष्टं हेतुफलसंबन्धावस्थानात्(10) । वक्ष्यति(11) हि ।

---

tenaiva duḥkhasvarūpeṇa tad eva duḥkhasvarūpaṃ kṛtaṃ syāt.tasmāt pratītya-samutpannaṃ na syāt, hetupratyayanirapekṣaṃ na syāt(?). ity arthaḥ. svarūpa-sadbhāvāt. abhāvād eva svarūpaṃ na kārakam asti. tat pratītyasamutpannam eva tadyathā: skandhān amūn ime skandhāḥ saṃbhavanti pratītya hi. yasmāt. maraṇakālikān amūn.....

[a] མི་ doit être supprimé.

3) *imān* = འདི་དག་ལ = *amūn*; voir la note 1.

4) འཆི་བའི་ དུས་ཀྱི་ ཕུང་པོ་ (= *maraṇakālika*). — Comparer *māraṇāntika* (Çikṣ.). — *maraṇāntika duḥkha*, Bodhicaryāv. p. ad II. 41.

5) སྐྱེ་བའི་ ཆར་གཏོགས་པའི་ ཕུང་པོ et aussi, plus simplement, ཆའི་ཕུང་པོ. — Nos Mss. donnent ci-dessous °*āṃçika*, lecture du Çikṣās. — Voir ce livre, p. 226 et les mêmes fragments du Çālistamba dans Bodhiçaryāv. ṭ. p. 311, IX. 73 (mauvaises lectures). — M. Vyut. 223. 269, 270 *maraṇāṃçika*, *upapattyaṃçika*.

6) Mss. *nopapadyante*.

7) གལ་ཏེ་ འདི་ལས་ དེ་ གཞན་ ཞིང་། གལ་ཏེ་ དེ་ལས་ འདི་ གཞན་ན། སྡུག་བསྔལ་ གཞན་གྱིས་ བྱས་ འགྱུར་ཞིང་། གཞན་ དེ་དག་གིས་ དེ་ བྱས་ འགྱུར།། — Plus correctement Buddhapālita (243 a 2) *gzhan-de-dag-gis hdi byas-pas | sdug-bsṅal gzhan-gyis byas-par hgyur.*

8) Mss. *aupapattyaṃçika.*

9) Mss. *ime.*

10) གནས་པ་ མེད་པའི་ཕྱིར་ = *saṃbandha-sthāna-abhāvāt.*

11) Chap. XVIII. 10.

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ इति ।

अतः परकृतमपि दुःखं न संभवति । यदि ह्यन्यत्वं स्यात् । तदा सत्यन्य एतैः परभूतैः स्कन्धैरमी (1) परभूताः कृता इति युक्तं वक्तुं स्यात् । न चैतदेवमिति परकृतमपि दुःखं न संभवति ॥

अथ स्यान्न ब्रूमो यस्माद्दुःखेनैव दुःखं कृतमतः स्वयं कृतमिति । किं तर्हि [69a] (2) स्वपुद्गलेन यस्मात्स्वयमेव [Tib. 90a] कृतं (3) नापरेण कृत्वा दत्तमित्यतः स्वयं कृतं दुःखमिति ब्रूमः ॥ उच्यते ।

स्वपुद्गलकृतं दुःखं यदि दुःखं पुनर्विना ।
स्वपुद्गलः स कतमो येन दुःखं स्वयं कृतं (4) ॥ ४

(5) यदेतन्मनुष्यदुःखं पञ्चोपादानस्कन्धलक्षणं स्वयं पुद्गलेन कृतमिति परिकल्प्यते कल्प्यतामसौ पुद्गलो येन तद्दुःखं स्वयं कृतं । यदि तावद्येन दुःखेन स्वपुद्गलः प्रज्ञप्यते तदेव दुःखं तेन कृतमिति स (6) भेदेन कथ्यतामिदं तद्दुःखमयमस्य कर्तेति ॥ अथापि मनुष्यदुःखोपादानेन पुद्गलेन तदेव दुःखं कृतं स्यात् । न तर्हि स्वपुद्गलकृतं तत्परपुद्गलकृतमे

1) Tib. དེ = *ime.*

2) གང་ཟག་ བདག་གིས་.

3) Mss. *nāsparena.* — Le texte est altéré. — གཞན་གྱིས་ བྱས་ནས་ འདི་ལ བྱིན་ = *nāsmai pareṇa kṛtvā dattam.*

4) གལ་ཏེ་ གང་ཟག་བདག་གིས་ ནི། སྡུག་བསྔལ་ བྱས་ན་ གང་ བདག་གིས སྡུག་བསྔལ་ བྱས་པའི་ གང་ཟག་ དེ། སྡུག་བསྔལ་ མ་གཏོགས་ གང་ཞིག་ ཡིན།

5) *yad = yadi.*

6) Mss. *sa hedena, sa dehena.* — ཕྱེ་ དེ་ བརྗོད་ དགོས་སོ་ = *vibhajya ta kathyatām.*

स्यात् ॥ अथोपादानभेदेऽपि पुद्गलाभेद इष्यते ' एतच्च नास्ति ' उपादानव्यतिरिक्तस्य भिन्नस्य पुद्गलस्य दर्शयितुमशक्यत्वात् ॥ एवं तावत्स्वपुद्गलकृतं दुःखं न भवति ॥

अत्राह । क एवमाह स्वपुद्गलकृतं दुःखमिति । किं तर्हि परपुद्गलजं दुःखं । अन्य एव देवदुःखान्(1)मनुष्यपुद्गलः(2) ' मनुष्यपुद्गलश्च देवदुःखं कृत्वा यस्माद्देवपुद्गलाय ददाति तेन च देवदुःखेन देवपुद्गलः प्रज्ञप्यते तस्मात्तस्य पुद्गलस्य तद्दुःखं परपुद्गलजमेव भवति ॥ उच्यते ।

परपुद्गलजं दुःखं यदि यस्मै प्रदीयते ।
परेण [Tib. 90 b] कृत्वा तद्दुःखं स दुःखेन विना कुतः(3) ॥ ५

यदि देवदुःखं मनुष्यपुद्गलकृतं ' तेन च मनुष्यपुद्गलेन तद्दुःखं कृत्वा परस्मै देवपुद्गलाय प्रदीयत इति स देवपुद्गलो देवदुःखविनिर्मुक्तः कुतो यस्मै प्रदीयेतेति । एवं तावत्परपुद्गलजस्य(4) दुःखस्य प्रतिग्राहक एव नास्ति [69 b] ॥

इदानीं यश्च ददात्यसावपि नास्तीत्याह ।

परपुद्गलजं दुःखं यदि क[ः] परपुद्गलः ।
विना दुःखेन यः कृत्वा परस्मै प्रहिणोति तत्(5) ॥ ६

---

1) ལྷའི་སྡུག་བསྔལ་.

2) མིའི་གང་ཟག་.

3) གལ་ཏེ་ གང་ཟག་གཞན་ལས་ ནི། སྡུག་བསྔལ་ འབྱུང་ ན་ གཞན་ཞིག་གིས། སྡུག་བསྔལ་ དེ་ བྱས་ གང་ སྦྱིན་ དེ། སྡུག་བསྔལ་ མ་གཏོགས་ ཅི་ལྟར་ རུང་། — Mss. *kṛtvā yad duḥkham*; mais voir le commentaire. — *ci-ltar* (*ji-ltar*) = *katham*.

4) Mss. *pudgalayasya*, °*kṣasya*. — གང་ཟག་འབྱུང་བ་.

5) གལ་ཏེ་ གང་ཟག་གཞན་ སྡུག་བསྔལ། འབྱུང་ ན་ གང་གིས་ དེ་ བྱས་ནས། གཞན་ལ་ སྟེར་བའི་ གང་ཟག་གཞན། སྡུག་བསྔལ་ མ་གཏོགས་ གང་ཞིག་ ཡིན།།

येनोपादानेन स [मुनष्य][1]पुद्गलः प्रज्ञप्यते स मनुष्योपादानव्यतिरिक्तः कतमो यो देवपुद्गलाय देव[2]दुःखं कृत्वा प्रक्षेप्स्यति ' तस्मात्परपुद्गलजमपि दुःखं न संभवति । ततश्च ।

स्वयं कृतस्याप्रसिद्धेर्दुःखं परकृतं कुतः ।
परो हि दुःखं यत्कुर्यात्तत्तस्य स्यात्स्वयं कृतं[3] ॥ ७

यदि देवपुद्गलदुःखं मनुष्यपुद्गलेन कृतत्वात्परकृतं भवति ' ननु मनुष्यपुद्गलस्य स्वयं कृतमेव तद्भवति ' एतच्च नास्तीत्युक्तं । ततः स्वयं कृतस्याप्रसिद्धेर्यदा मनुष्यपुद्गलेन स्वयं तद्दुःखं न कृतं तदा कुतः परपुद्गलस्य देवाख्यस्य तद्दुःखं परकृतं भविष्यतीति । अतोऽपि परकृतं दुःखं न संभवति ॥

इदानीं प्रकरणान्तरेणापि पक्षद्वयासंभवं प्रतिपादयन्नाह ।

न तावत्स्वकृतं दुःखं न हि तेनैव तत्कृतं [Tib. 91a] ।
परो नात्मकृतश्चेत्स्याद्दुःखं परकृतं कथं[4] ॥ ८

इतश्च स्वपराभ्यां दुःखस्य करणं न युज्यते यस्मान्न तावत्स्वकृतं दुःखं । किं कारणं ' यस्मान्न तेनैव हि तत्कृतं स्वात्मनि वृत्तिविरोधादतः स्वकृतं नास्ति । [न] परकृतमपि ' यस्माद्योऽसौ परः करोतीति परिकल्प्यते स एव तावन्नात्मना कृतो

1) Mss. *sa pudgalaḥ* — མིའི་གང་ཟག་ དེར་ གདགས་པ་.

2) Mss. *sa devaduḥkham.*

3) བདག་གིས་ བྱས་པར་ མ་གྲུབ་པས། སྡུག་བསྔལ་ གཞན་གྱིས་ ག་ལ་ བྱས། གཞན་གྱིས་ སྡུག་བསྔལ་ གང་ བྱེད་པ། དེ་ནི་ དེ་ཡི་ བདག་བྱས་ འགྱུར༎

4) རེ་ཞིག་ སྡུག་བསྔལ་ བདག་བྱས་ མིན། དེ་ཉིད་ཀྱིས་ནི་ དེ་ མ་ བྱས། གལ་ཏེ་ གཞན་ བདག་ མ་ བྱས་ན། སྡུག་བསྔལ་ གཞན་བྱས་ ག་ལ་ འགྱུར༎ Mss. au troisième pāda *paro nātmakṛtāç ce syāt.* — D'après le Commentaire *paro nātmakṛto yasmāt.*

नात्मना निष्पन्नः ' तस्यापि केवलतरापेक्षणात् । यश्च स्वात्मना न निष्पन्नः स कथमविद्यमानस्वभावः सन् परं करिष्यतीति न युक्तमेतत् ॥

इदानीमुभयकृतमपि दुःखमसदित्याह ।

स्याद्रुभाभ्यां कृतं दुःखं स्यादेकैककृतं यदि ।

यदि ह्येकैकेन दुःखस्य का[70 a]रणं स्यात् ' स्यात्तदानीमुभाभ्यां कृतं दुःखं । न चैकैककृतं तदुक्तदोषात् । न चैकैकेन प्राणातिपाते ऽकृते[1] द्वाभ्यां कृत इति व्यपदेशो दृष्टः ॥

इदानीं निर्हेतुकमपि दुःखं यथा नास्ति तथा प्रतिपादयन्नाह ।

पराकारास्वयंकारं दुःखमहेतुकं कुतः ॥ इति[2] । ९

परेणा[3]कारोऽकरणमस्येति पराकारं । [न] स्वयंकारोऽस्येत्यस्वयंकारं । यदि दुःखं स्वयंकृतं नास्ति परकृतमपि नास्ति यथोक्तेन न्यायेन ' तदिदानीं कुत एव निर्हेतुकं भविष्यति ख[Tib. 91 b]पुष्पसौगन्ध्यवत् । दुःखाभावात्कुतस्तस्याश्रयभूत आत्मा ॥

यथा च चतुर्धा विचार्यमाणं दुःखमसदेवं बाह्या अपि बीजाङ्कुरघटपटादयो भावा वेदितव्या इति प्रतिपादयन्नाह ।

न केवलं हि दुःखस्य चातुर्विध्यं न विद्यते ।

सर्वेषां

बाह्यानामपि भावानां चातुर्विध्यं न विद्यते[4] ॥ १०

---

1) Mss. °*pātena kṛtena .....kṛtam iti.*

2) གལ་ཏེ་ རེ་རེས་ བྱས་ གྱུར་ན། སྡུག་བསྔལ་ གཉིས་ཀས་ བྱས་པར་ འགྱུར། བདག་གིས་ མ་ བྱས་ གཞན་ མ་ བྱས། སྡུག་བསྔལ་ རྒྱུ་མེད་ ག་ལ་ འགྱུར།།

3) Tib. = *pareṇa akaraṇam.*

4) Mūlamadhyamaka. སྡུག་བསྔལ་ འབའ་ཞིག་ རྣམ་པ་བཞི། ཡོད་ མ་

पूर्ववत्सर्वं समं योज्यं ॥ यदि खल्वेषां दुःखादीनां चातुर्विध्यासंभवस्तत्कतमेन तर्हीदानीं प्रकारेणैषां सिद्धिरिति ॥ उच्यते । स्वभावतो यद्येतानि दुःखादीनि स्युर्नियतमेषां चतुर्णां प्रकाराणामन्यतमेन प्रकारेण सिद्धिः स्यात् । न त्वस्ति । तस्मात्स्वभावतो न सन्ति दुःखादीनीत्यवसीयते । अथ विपर्यासमात्रलब्धात्मसत्ताकायां[1] दुःखादिसंवृतेः प्रतीत्यसमुत्पादव्यवस्था मृग्यते तदा कर्मकारकपरीक्षाप्रकरणविहितविधिना यथोदितपक्षचतुष्टयतिरस्कारेणेदंप्रत्ययतामात्रार्थप्रतीत्यसमुत्पादसिद्ध्या सिद्धिरभ्युपेया[2] ॥ यथोक्तं ।

स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकं ।
तार्किकैरिष्यते दुःखं त्वया तूक्तं प्रतीत्यजं ॥ इति ।

[उक्तं[3] च भगवतार्योपालिपृच्छायां ।

. . . . [70b] . . . . . .
. . . .
. . . .]

तथा[4] ।

ཡིན་པ་ མ་ཟད་ ཀྱི། ཕྱི་རོལ་ དངོས་པོ་རྣམས་ལ་ ཡང་། རྣམ་པ་ བཞི་པོ་ ཡོད་མ་ཡིན།། Dans notre Commentaire, au deuxième pāda མ་ཡིན་ཀྱི། དངོས་པོ་ཐམས་ཅད་དག་ལ་ ཡང་། ... = *sarveṣām api bhāvānām*...

1) Voir ci-dessus 68. 8, 73. 7.

2) Tib. = °*samutpādasiddhir abhyupeyā*.

3) Les Mss. reproduisent ici quatre stances, citées ci-dessus pp. 53. 7—54. 4 et 191. 2—9. — La version tibétaine les omet, ainsi que la mention: *uktaṃ ca*....

4) Au lieu de la mention *tathā*, nous avons བཅོམ་ལྡན་འདས་ཀྱིས་ ཀྱང་།... ...།ཞེས་བྱ་བ་ལ་སོགས་པ་ གསུངས་སོ། = *bhagavatā ca .....ityādy uktam.*

संवृति[1] भाषितु धर्म जिनेन
संस्कृत [ऽसंस्कृत][2] पश्यथ एव ।
नास्तिह भूततु[3] आत्म नरो वा
एत्तकु[4] लक्षण सर्वजगस्य ॥

कृष्णशुभं च न नश्यति[5] कर्म
आत्मन कृत्व च वेदयितव्यं [Tib. 92a] ।
नोऽपि तु संक्रम कर्मफलस्य
नो च अहेतुक प्रत्यनुभोति ॥

सर्वि भवा अलिका वसिकाश्च
रिक्तक तुच्छक फेनसमाश्च ।
मायमरीचिसमा सद शून्या
देशितु संवृतु ते च विविक्ताः[6] ॥

---

1) ཀུན་རྫོབ་ཏུ་ ནི་ = *saṃvṛtitaḥ.*

2) འདུས་བྱས་ འདུས་མ་བྱས་ ཡིན་ དེ་ལྟར་ ལྟོས།

3) ཡང་དག་ཉིད་དུ་ བདག་ དང་ ཡོད་མེད་དེ། *nara* est omis.

4) Mss. *etuku*; voir Mhv. I. 384 (ad 18. 1). Le tibétain porte འདི་འདྲའི་ = *īdṛça.*

5) Mss. *paçyati.* Tib. མི་འཇིག་སྟེ།

6) སྒྲ་ཡིས་ བཤད་ ཀྱང་ དེ་དག་ དབེན་པ་ ཡིན། = *çabdena deçitā api te viviktāḥ.*

शैलगुहागिरिदुर्गनदीषु
यद्व पतिश्रुत्क जायि प्रतीत्य[1]।
एविमु संस्कृत सर्वि विज्ञान[2]
मायमरीचिसमं जगु सर्वं ॥ इत्यादि ।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ दुःखपरीक्षा नाम द्वादशमं प्रकरणं ॥

---

1) *yadvat pratiçrutkā jāyate.*

2) རིག་པར་གྱིས།

XIII.

संस्कारपरीक्षा नाम त्रयोदशमं प्रकरणं

यतश्चैवं समनन्तरातिक्रान्तप्रकरणविधिना स्वपरोभयकृत[त्व]महेतुसमुत्पन्नत्वं च निरूप्यमाणं भावानामसदन्यश्चोत्पादको विधिरसन्। [71a] उत्पन्नरूपत्वेन चैते भावा अविद्यातिमिरोपहतमतिनयनानां बालपृथग्जनानां ख्यान्ति। तस्मान्निःस्वभावा एव सन्तो बालानां विसंवादका मायाकारितुरगादिवत्तदनभिज्ञानां न तु विज्ञानां। अत एव सर्वधर्मस्वाभाव्या[1]परोक्षाधीनयनः समुन्मूलिताशेषाविद्यावासनश्चतुर्विपर्यासविपर्यस्तात्राणसत्त्वपरित्राणायाविपरीतनैःस्वाभाव्योपदेशतत्परो बुद्धो जगद्विबोधको महाकारुणिकः।

तन्मृषा मोषधर्म यद्भगवानित्यभाषत।
सर्वे च मोषधर्माणः संस्कारास्तेन ते मृषा[2] ॥ १

सूत्र[3] उक्तं तन्मृषा मोषधर्म यदिदं संस्कृतं [Tib. 92b]। एतद्धि खलु भिक्षवः परमं सत्यं यदिद[4]ममोषधर्म निर्वाणं सर्वसंस्काराश्च मृषा मोषधर्माण इति। तथा ' [नास्त्यत्र

---

1) Mss. °*svabhāvyaparokṣādhīnayanaḥ.* བློའི་སྤྱན་ཆོས་ཐམས་ཅད་ཀྱི་རང་བཞིན་ལྐོག་ཏུ་མ་གྱུར་པ་མངའ་བ།

2) བཅོམ་ལྡན་འདས་ཀྱིས་ཆོས་གང་ཞིག། བསླུ་བ་དེ་ནི་བརྫུན་ཞེས་གསུངས། འདུ་བྱེད་ཐམས་ཅད་བསླུ་བའི་ཆོས། དེས་ན་དེ་དག་རྫུན་པ་ཡིན།། — Cité ci-dessus p. 42. 10.

3) Voir ci-dessus p. 41. 4 et suiv.

4) *yad uta a°*, p. 41. 4.

तथता वा[1] अवितथता वा] मोषधर्मकमप्येतत्। प्रलापधर्मकमप्येतदिति[2]॥ तदनेन न्यायेन यन्मोषधर्म[3] तन्मृषेत्येवं यस्मादुक्तवान् तथागतो भगवान्। सर्वे च मोषधर्माणः संस्कारास्तस्मान्मोषधर्मकत्वेन ते संस्कारा मृषा भवन्ति। [4]चित्रकरयन्त्रदारिकावत्। लक्षणोपेतयन्त्रमयवारणावस्थितोदयनवत्सराजवत्[4]। तत्र विसंवादकं मोषधर्मकं वितथख्यात्यालातचक्रवत्॥

अतो [निः]स्वभावत्वेन मृषा सर्वसंस्कारा मोषधर्मकत्वात्। मरीचिकादिजलवत्॥ यत्तु सत्यं न तन्मोषधर्मकं। तद्यथा निर्वाणमेकं[5]। ततश्च विहितयोपपत्त्याऽस्माच्चागमात्सिद्धं सर्वभावानां नैःस्वाभाव्यं। शून्याः सर्वधर्मा निःस्वभावयोगेनेति च प्रज्ञापारमिता अर्धशतिकापाठात्[6]॥

अत्राह। यद्येवं मोषधर्मकत्वेन सर्वसंस्काराणां मृषा[71b]त्वं प्रतिपादितं भवता। नन्वेवं सति न सन्ति सर्वे भावा इति सर्वपदार्थापवादिनो मिथ्यादृष्टिरेव स्यात्॥ उच्यते। सत्यं मोषधर्मकाः सर्वसंस्कारा येऽप्यापि भवन्तं मुष्णन्ति। ननु च भोः।

तन्मृषा मोषधर्म यद्यदि किं तत्र मुष्यते।

---

1) Manque dans les Mss. et dans le tibétain.

2) Le tibétain porte འདི་ནི་འཇིག་པའི་ཆོས་ཅན་ནོ། = *vināçadharmakam etat.*

3) གང་བསླུ་ཞིང་འཇིག་པའི་ཆོས་ཅན་དེ་ནི...

4—4) Manque dans la version tibétaine. Mss. °*mantrasabhavāraṇa*°, °*mabha*°. — Mahāsena s'empara d'Udayana au moyen d'un éléphant artificiel, voir Kathās., XII, init.; Harṣacarita, VI sub fin. Schiefner, Mahākātyāyana und König Tschaṇḍa Pradyota, pp. 36—7 (*māyāmātaṅga*, H.-c. = *kapaṭakuñjāra*, Comm. = *yantrahasti*, K.-s.). — Communiqué par M. F. W. Thomas.

5) *ekam* manque dans la version tibétaine.

6) Sic Mss. — Çer-phyin, VI, 8 (A. M. G. II, p. 201). — Même citation, *uktaṃ bhagavatā*, ci-dessous XXII, 11, *prajñāpāramitābhidhānāt*, XXIV. 14, *dvyardhaçatikāyām*, XXIV, 18. — Voir l'édition de Rājendralāl, p. 405.

यदास्माभिस्तन्मृषा मोषधर्मकमित्युक्तं तदा किं तत्र मुष्यते । किं तत्राभावो भवति । कश्चिद्यदि [Tib. 93 a] पदार्थो ऽभविष्यत्स्यात्तस्यापवादादभावदर्शनान्मिथ्यादृष्टिः । यदा तु पदार्थमेव कं चिन्न पश्यामस्तदा किं तत्र मुष्यते । नैव किं चिदभावो भवतीत्ययुक्तोऽयमुपालम्भो भवतः ॥

अत्राह । यद्यभावदर्शनमपि न प्रतिपाद्यते । किं पुनरनेनागमेन प्रतिपाद्य[त] इति ॥ उच्यते ।

एतत्तूक्तं भगवता शून्यतापरिदीपकं (1) ॥ २

यदेतदुक्तं भगवता तन्न भावानामभावपरिदीपकं । किं तर्हि शून्यतापरिदीपकं स्वभावानुत्पादपरिदीपकमित्यर्थः ॥ यथोक्तमनवतप्तह्रदापसंक्रमणसूत्रे (2) ।

यः प्रत्ययैर्जायति स ह्यजातो
नो तस्य उत्पादु सभावतो ऽस्ति ।
यः प्रत्ययाधीनु (3) स शून्य उक्तो
यः शून्यतां जानति सोऽप्रमत्तः ॥ इति ॥

---

1) གལ་ཏེ་ བསླུ་ཆོས་ གང་ ཡིན་པ། དེ་ རྫུན་ དེ་ལ་ ཅི་ཞིག་ བསླུ། བཅོམ་ལྡན་འདས་ཀྱིས་ དེ་ གསུངས་པ། སྟོང་ཉིད་ ཡོངས་སུ་བསྟན་པར་ ཡིན།།

2) Le tibétain a simplement མདོ་ལས་ = *sūtrāt*. — Voir Kandjour, Mdo XII, foll. 317—390 (Ann. M. G. p. 253), Nanjio, № 437, traduit A. D. 308, Anavataptanāgarājaparipṛcchāsūtra, qui est nommé par Wassilieff, Bouddhisme p. 327, comme un des sūtras «des ausschliesslich echten Sinnes» au point de vue des Mādhyamikas. — Sur Anavatapta, lac ou *nāga*, voir notamment Burn., Intr. 171, 330, 396 et Lotus 3; Fujishima, Bouddh. japonais, 55. — Notre stance est citée (sans indication de source et avec variantes) Bodhicaryāv. p. IX. 2 (Bibl. Ind. p. 355. 10 et Bouddhisme p. 241, n 1), Subhās. sgr. (Muséon, N.S. IV, 395. 22), et ci-dessous, trois fois, au chap. XXIV.

3) Mss. °*dīnu*.

[1]अत्राह । नायमागमो भावस्वभावानुत्पादं परिदीपयति किं तर्हि निःस्वभावत्वं स्वभावस्यानवस्थायित्वं विनाशित्वमिति[2] ॥ कुत एतदिति चेत् ।

भावानां निःस्वभावत्वमन्यथाभावदर्शनात्[3] ।

विचार्य[4]माणानामन्यथात्वं विपरि[5]णामदर्शनादित्यर्थः ॥ एतदुक्तं भवति । यदि भावानां [6]स्वभावो न स्यात्तदानीं नैवैषामन्यथात्वमुपलभ्ये[72a]त । उपलभ्यते च परिणामः । तस्मात्स्वभावानवस्थायित्वमेव [7]सूत्रार्थ इति विज्ञेयं ॥

इतश्चैतदेवं । यस्मात् ।

[8]अस्वभावो भावो नास्ति भावानां शून्यता यतः[9] ॥ ३

यो ह्यस्वभावो भावः स [Tib 93b] नास्ति । भावानां च शून्यता नाम धर्म इष्यते । न चासति धर्मिणि तदाश्रितो धर्म उपपद्यते । न ह्यसति बन्ध्यातनये तच्छ्यामतोपपद्यत इति । तस्मादस्त्येव भावानां स्वभाव इति ॥

---

1) L'adversaire prend la parole.

2) Ce sūtra définit le *niḥsvabhāvatva* (ou *çūnyatā*) comme étant le *svabhāvasya vināçitva*.

3) = On dit que les êtres n'ont pas de *svabhāva* parce qu'on voit que leur *svabhāva* est sujet au changement. — Par le fait, le changement prouve l'existence du *svabhāva*.

4) *vicāryamāṇānām* n'est pas représenté dans le tibétain.

5) ཡོངས་སུ་འགྱུར་བ་.

6) D'aprés le tibétain; Mss. *niḥsvabhāvo*.

7) Le *sūtra* cité p. 237. 11.

8) Mss. *nāsvabhāvaç ca bhavo nāsti*. — Voir ci-dessous 245. 9.

9) དངོས་རྣམས་ ངོ་བོ་ཉིད་ མེད་དེ། གཞན་དུ་འགྱུར་བ་ སྣང་ཕྱིར་རོ། དངོས་པོ་ ངོ་བོ་ཉིད་མེད་ མེད། གང་ཕྱིར་ དངོས་རྣམས་ སྟོང་པ་ཉིད॥ — Notre commentaire au troisième pāda ངོ་བོ་ཉིད་མེད་དེ = *bhāvasvabhāvo nāsti*.

अपि च।

कस्य स्यादन्यथाभावः स्वभावश्चेन्न विद्यते।

यदि भावानां स्वभावो न स्याद्योऽयं विपरिणामलक्षणोऽन्यथाभावः स कस्य स्यादिति॥

अत्रोच्यते। एवमपि परिकल्प्यमाने।

कस्य स्यादन्यथाभावः स्वभावो यदि विद्यते[(1)]। ४

इह यो धर्मो यं पदार्थं न व्यभिचरति स तस्य स्वभाव इति व्यपदिश्यते' अपरप्रतिबद्धत्वात्। अग्नेरौष्ण्यं हि लोके तदव्यभिचारित्वात्स्वभाव इत्युच्यते। तदेवौष्ण्यमप्सूपलभ्यमानं परप्रत्ययसंभूतत्वात्कृत्रिमत्वान्न स्वभाव इति। यदा चैवमव्यभिचारिणा स्वभावेन भवितव्यं तदास्याव्यभिचारित्वादन्यथाभावः स्यादभावः' न ह्यग्नेः शैत्यं प्रतिपद्यते' एवं भावानां सति स्वभावाभ्युपगमेऽन्यथात्वमेव न संभवेत्। उपलभ्यते चैषामन्यथात्वमतो नास्ति स्वभावः॥

अपि चायमन्यथाभावो भावानां नैव संभवति यद्दर्शनात्सस्वभावता स्यात्। यथा च न संभवति तथा प्रतिपादयन्नाह।

तस्यैव नान्यथाभावो नाप्यन्यस्यैव युज्यते।
युवा न जीर्यते यस्माद्यस्माज्जीर्णो न जीर्यते[(2)]॥ ५

---

1) གལ་ཏེ་ ངོ་བོ་ཉིད་ མེད་ན། གཞན་དུ་འགྱུར་བ་ གང་གི་ ཡིན། གལ་ཏེ་ ངོ་བོ་ཉིད་ ཡོད་ན། ཇི་ལྟ་བུར་ ན་ གཞན་དུ་འགྱུར།།

2) དེ་ཉིད་ལ་ ནི་ གཞན་གྱུར་ མེད། གཞན་ཉིད་ལ་ ཡང་ ཡོད་མ་ཡིན། གང་ཕྱིར་ གཞོན་ནུ་ མི་ རྒ་སྟེ། གང་ཕྱིར་ རྒས་པ་ ཡང་ མི་ རྒའོ།།

तस्यैव तावत्प्रागवत्प्रागवस्थायां वर्तमानस्य भावस्यान्यथात्वं नोपपद्यते । [Tib. 94a] तथा हि यूनो युवा[72b]वस्थायामेव वर्तमानस्य नास्त्यन्यथात्वं ॥ अथाप्यवस्थान्तरप्राप्तस्यैवान्यथात्वं परिकल्प्यते ' तदपि नोपपद्यते । अन्यथात्वं नाम जरायाः पर्यायः । तद्यदि यूनो नेष्यतेऽन्यस्यैव जीर्णस्य भवतीति ' तदपि न युज्यते ' यस्मान्न हि जीर्णस्य पुनर्जरया संबन्धो निःप्रयोजनत्वात् । किं हि जीर्णस्य पुनर्जरया संबन्धः कुर्यात् ' त[द्]ागमनान्तरेण(1) जीर्णताभावाज्जीर्णो जीर्यत इति न युज्यते । अथ यून एवान्यथाभावस्तदयुक्तं ' अप्राप्तजरावस्थस्य युवेति व्यपदेशादवस्थाद्वयस्य च परस्परविरुद्धत्वात् ॥

अपि च ।

तस्य चेदन्यथाभावः क्षीरमेव भवेद्दधि ।

अथ स्यात्(2) ' क्षीरावस्थापरित्यागेन दध्यवस्था भवति ' अतो न क्षीरमेव दधि भवतीति ॥ उच्यते । यदि क्षीरं दधि भवतीति नेष्यते परस्परविरोधात् ।

क्षीरादन्यस्य कस्य चिद्दधिभावो भविष्यति(3) ॥ ६

किमुदकस्य दधिभावो भवतु । तस्मादसंबद्धमेव तदन्यस्य दधिभावो भविष्यतीति ॥ तदेवमन्यथात्वासंभवात्कुतस्तद्दर्शनात्सस्वभावता भावानां प्रसेत्स्यतीति न युक्तमेतत् ॥

---

1) Le tibétain porte དེ་མེད་པར་ རྒས་པ་ཉིད་ ཡོད་པས་ = *tadantareṇa jirṇatāyā bhāvat.*

2) Mss. *athāsyākṣīra.*

3) གལ་ཏེ་ དེ་ཉིད་ གཞན་ གྱུར་ན། འོ་མ་ཉིད་ ནི་ ཞོར་ འགྱུར་རོ། འོ་མ་ལས་ གཞན་ གང་ཞིག་ ནི། ཞོ་ཡི་ དངོས་པོ་ ཡིན་པར་ འགྱུར།། — Mss. au troisième pāda: *kṣīrād anyasya kasyārtha d°.*

यथोक्तमार्यरत्नाकरमहायानसूत्रे[1] ।

यो न पि जायति नो चुपपद्यी
नो च्यवते न पि जीर्यति धर्मः ।
तं जिनु दर्शयती[2] नरसिंह-
स्तत्र निदेशयि सत्त्व महर्षी[3] ॥

यस्य स्वभाव[4] न विद्यति कश्चि
नो [ʃ]परभावतु केन चि लब्धः[5] । [Tib. 94b]
नान्तरतो नपि बाहिरतो वा
लभ्यति तत्र निवेशयि नाथः ॥

शान्त गती कथिता सुगतेन
नो च गती उपपद्यति[6] का चि ।
तत्र च व्योहरसी[7] गतिमुक्तो
मुक्तकु मोच[73a]यती बहुसत्त्वान् ॥

---

1) Voir ci-dessus p. 90, n. 2. — Les trois premières stances, p. 91, 2—7.

2) Mss. *deçayati.*

3) Sic Mss. — Tib. སེམས་ཅན་ བརྒྱ་ཕྲག་དག་ དེ་ལ་ བཀོད་ = *tatra niveçayi sattvaçatāni.*

4) Pour le mètre *yasya sabhāvu.*

5) གཞན་ ཡང་ མ་ཡིན་ སུས་ ཀྱང་ མི་ རྙེད་པ། Même version, p. 91. 4.

6) Lire *upalabhyati* རྙེད་པ་.

7) Pour le mètre *voharasī.* — དེ་དག་ འགྲོ་ལས་ གྲོལ་བར་ རྣམ་པར་གསུངས། = *tāç ca gatimuktā vyākhyātāḥ.*

सर्वि(1) वदेमि निरात्मक धर्मान्
सत्वतु(2) ग्राहतु मोचमि लोकं ।
मुक्त स्वयं गतितो गतिमुक्तो
तेन मि पारगतो(3) न च तीर्णो(4) ॥

पारगतो मि भवार्णवतीर्णः(5)
पारगतो न च लभ्यति कश्चि ।
पारु न विद्यति नापि अपारु
पारगतोऽस्मि वदेमि च वाक्यं ॥

वाच(6) न विद्यति यां च वदेमि
यं पि वदेमि न विद्यति तं पि ।
यस्य वदेमि न विद्यति(7) सोऽपि
यो पि विजानति सोऽपि असत्तो ॥

तत्र प्रणष्टु(8) जगं इमु सर्वं
वितथविकल्पनिवेश(9)वशेन ।

---

1) Mss. *vadāmi.*

2) Mss. *sarvatu.* སེམས་ཅན་ འཛིན་ལས་ = *sattvagrāhāt.*

3) ཕ་རོལ་གཤེགས་.

4) བརྒལ་བ་.

5) དྲང་སྲོང་ཆེན་པོ་ སྲིད་པའི་ ཕ་རོལ་ཕྱིན་ = *pāragato 'si maharṣi bhavasya.*

6) Mss. *vāra na.*

7) རྙེད་པ་ = *labhyati.*

8) འཁྲུམས་པ་ = *bhrānta.* — Voir p. 248, n. 5.

9) *niveça* = ཚགས་. — Le mètre est irrégulier.

शान्त विजानति यो नरु[1] धर्मा-
स्तेहि तथागतु दृष्ट स्वयंभूः ॥

शान्त प्रजानति धर्मप्रणीतान्[2]
प्रीति स विन्दति तोषति[3] सत्वान् ।
सो भवती जिनु जित्वन[4] क्लेशान्
आत्म ······[5] ॥

तेन विजानित बोधि जिनानां
बुद्धिय[6] बोधयते स जगं पि । इत्यादि ॥

यच्चोक्त[7]मस्वभावो भावो नैवास्ति शून्यता च भावानामिष्यते । तस्मादस्ति शून्यताश्रयो भावस्वभाव इति । एतदपि न युज्यत इत्याह ।

यद्यशून्यं भवेत्किं चित्स्याच्छून्यमिति किं चन ।
न किं चिदस्त्यशून्यं च कुतः शून्यं भविष्यति[8] ॥ ७

---

1) Mss. *ye na ca.* སྐྱེས་བུ་ གང་ཞིག་.

2) ཆོས་མཆོག་.

3) Mss. *toṣasi, toṣati.*

4) Mss. *jitva ca.* ཉོན་མོངས་ རྒྱལ་ནས་ དེ་ཉིད་ རྒྱལ་བར་ འགྱུར།

5) Mss. *v(t)āma jino ca arā(o)ma(e) sthitaç ca.* — བདག་ཉིད་ རྒྱལ་བར་ འགྱུར་ཞིང་ གནས་པ་མེད།

6) Mss. *puṣpiya bādh°.* སངས་རྒྱས་ནས་ ནི་ འགྲོ་བ་ ཤེས་པར་བྱེད།

7) Voir ci-dessus p. 240. 8.

8) གལ་ཏེ་ སྟོང་མིན་ ཅུང་ཟད་ ཡོད། སྟོང་པའང་ ཅུང་ཟད་ ཡོད་པར་འགྱུར། མི་སྟོང་ ཅུང་ཟད་ ཡོད་མིན་ན། སྟོང་པ་འང་ ཡོད་པར་ ག་ལ་ འགྱུར།།

यदि शून्यता नाम काचित् [Tib. 95a] स्यात्तदाश्रयो भावस्वभावः स्यात्। न त्वेवं। इह हि शून्यता नामेति सर्वधर्माणां सामान्यलक्षणमित्यभ्युपगमादशून्यधर्माभावादशून्यैव नास्ति। यदा चाशून्याः पदार्था न सन्ति ' अशून्यता च नास्ति ' तदा प्रतिपक्षनिरपेक्षत्वाच्छून्यतापि खपुष्पमालावन्नास्तीत्यवसीयताम्। यदा च शून्यता नास्ति तदा तदाश्रया अपि पदार्था न सन्तीति स्थितमविकलम्॥

अत्राह। त्रीणि विमोक्षमुखानि(1) शून्यतानिमित्ताप्रणिहिता[73b]ख्यानि विमुक्तये विनेयेभ्यो भगवता निर्दिष्टानि सर्वतीर्थिकमारमता(2)साधारणानि सौगत एव प्रवचने समुपलभ्यन्ते। येषामुपदेशार्थमेव बुद्धा भगवन्तोऽशेषतीर्थ्यवादमहामोहान्धकारानुगतजगति जगदेकप्रदीपा नैरात्म्योपदेशाविच्छिन्नशिखा उत्पद्यन्ते। स भवांस्तथागतप्रवचनव्याख्यानव्याजेनेदानीं तामेव शून्यतां प्रतिक्षेप्तुमारब्धवानित्यलं भवता स्वर्गापवर्गमार्गसमुच्छेदकेनेति॥

उच्यते। अहो बत भवानत्युन्मुख इवात्यन्तविपर्यासान्निर्वाणपुरगामिनं शिवमृजुं परमं पन्थानमवधूय भावाभिनिवेशव्याकुलितं संसारकान्तारानुगमेव मार्गं मोक्षपुरगामित्वेन [Tib. 95b] समाश्रितो (3 निर्मुमुक्षुः सन् संसाराटवीकान्तारैः 3) सद्भि(4)रुपालभ्य एव सन्नभि(5)मानाभिनिवेशग्रहपरवशतया तानेवोपालभते। ननु भो निरवशेषक्लेशव्याधिचिकित्सकैर्महावैद्यराजैः।

---

1) Voir ci-dessus p. 43, n. 4. — Dh.-s. LXXIII; Dh. sûi, § 248; Atthas. § 474; Nettip. 90. 119. 126; Vis. magga (J. P. T. S. 1891) p. 155. — *vimokṣā nāma dhāraṇī pratilabdhā*, Rāṣṭrap. 50. 4.

2) མུ་སྟེགས་པའི་ གཞུང་ལུགས་ = *sarvatīrthikasamaya*°. — Mss. *tīrthikamāra-mata*, lecture peu admissible.

3—3) Ces mots ne sont pas représentés dans la version tibétaine.

4) Mss. °*kāntārāsadbhir*. — དམ་པ་དག་གིས་ སྨད་པར་བྱ་བ་ཡིན་བཞིན་དུ་ = Alors que vous devez être réprimandé par les bons.....

5) *abhimāna* = མངོན་པར་ང་རྒྱལ་.

शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे[1] ॥ ८

इह सर्वेषामेव दृष्टिकृतानां[2] सर्वग्राहाभिनिवेशानां यन्निःसरणमप्रवृत्तिः[3] सा शून्यता । न च दृष्टिकृतानां निवृत्तिमात्रं भावो[4] । ये तु तस्यामपि शून्यतायां भावाभिनिवेशिनस्तान् प्रत्यवाचका[5] वयमिति[6] कुतोऽस्मदुपदेशात्सकलकल्पनाव्यावृत्त्या मोक्षो भविष्यति । यो न किं चिदपि ते पण्यं दास्यामीत्युक्तः सचेद्देहि[7] भोस्तदेव मह्यं न किं चिन्नाम पण्य-

---

1) རྒྱལ་བ་རྣམས་ཀྱིས་ སྟོང་པ་ཉིད། ལྟ་ ཀུན་ ངེས་པར་འབྱུང་བར་ གསུངས། གང་དག་ སྟོང་པ་ཉིད་ ལྟ་བ། དེ་དག་ བསྒྲུབ་ཏུ་མེད་པར་ གསུངས།། — Notre commentaire, *sgrub-tu-med-par.* — Cité Subhāṣitas., Muséon, IV, 397. 23 et Bcp. IX. 33 qui traduit *niḥsaraṇa* par *ṅes-par-hbyin-pa* et *asādhya* par *gso-bya-min-pa.* — ངེས་པར་ = *ni*, *nis*, *prati* (Foucaux, Grammaire p. 191). འབྱིན་པ་ = to emit, to remove (*niḥ-sārayati*), est le «transitif» de འབྱུང་བ་. — Pour la doctrine du vide, ci-dessous XXV. 10 et Bodhic. p., IX, 33 a. *çūnyatāvāsanādhānād hīyate bhāvavāsanā | kiṁ cin nāstīti cābhyāsāt sāpi paçcāt prahīyate ||*

2) ལྟ་བར་གྱུར་པ་.

3) Sur la lecture *niḥçaraṇa*, Mhv. I. 433. *pratisaraṇa*, Bendall, Muséon, IV, p. 399, n. 6. — *apravṛtti* = ལོག་པ་. — Il y a (M. Vyut. 82) six *niḥsaraṇīyadhātu* à savoir *maitrī*, *karuṇā*, ... *asmimānasamudghāta*, *animitta*; et trois (Itivuttaka § 72, § 43) *nekkhammam* (*kāmānaṃ nissaraṇam*), *āruppam* (*rūpānaṃ* ...), *ajātam*....*asaṅkhatam* (*jātassa*....*saṅkhatassa*). — Le suffixe *anīya* doit s'entendre comme dans *tapanīya* = *tāpajanaka* (Aṅg. N. I[a] p. 115), *vodanīya*, *vedanīya* (Abhidh. k. v. Soc. As. 303 b): *kartary anīyaḥ karaṇe vā.* (Voir Bodhic. p. 16. 1, et sources grammaticales citées *in loco.*)
niḥsaraṇaprajña (*çrāvaka*), M. Vyut. 48. 31.

4) Sic Mss. — ལྟ་བར་གྱུར་པ་རྣམས་ ལོག་པ་ཙམ་ ནི་ དངོས་པོ་ ཡང་ མ་ཡིན་ནོ།། གང་དག་... = ...*bhāvaḥ . ye tu.*

5) Mss. *avācakā rayam.* དེ་དག་ལ་ ནི་ ཁོ་བོ་ཅག་ མི་ སྨྲ་སྟེ།

6) *iti* = དེའི་ཕྱིར་.

7) Mss. *sarva dehi*, *sa ca dehi.*

मिति ब्रूयात्स केनोपायेन शक्यः पद्याभावं ग्राहयितुं । एवं येषां शून्यतायामपि भावाभिनिवेशः केने[74a]दानीं स तेषां तस्यां भावाभिनिवेशो निषिध्यतामिति । अतो महाभैषज्येऽपि दोषसंज्ञित्वात्परमचिकित्सकैः महावैद्यैस्तथागतैः प्रत्याख्याता एव ते ॥

यथोक्तं भगवतार्यरत्नकूटसूत्रे[1] । यन्न शून्यतया धर्मान् शून्यान् करोति ' अपि तु धर्मा एव शून्याः । यन्नानिमित्तेन धर्माननिमित्तान् करोति ' अपि तु धर्मा एवानिमित्ताः । यन्नाप्रणिहितेन धर्मानप्रणिहितान् करोति ' अपि तु धर्मा एवाप्रणिहिताः । [Tib. 96a] येवं प्रत्यवेक्षा इयमुच्यते काश्यप मध्यमा प्रतिपद्धर्माणां भूत[2]प्रत्यवेक्षा । ये हि काश्यप शून्यतोपलम्भेन[3] शून्यतां प्रतिसरन्ति[4] तानहं नष्टप्रणष्टानिति वदामि । इति प्रवचनात्[5] ॥ वरं खलु काश्यप सुमेरुमात्रा पुद्गलदृष्टिराश्रिता न त्वेवाभावाभिनिवेशिकस्य शून्यतादृष्टिः । तत्कस्य हेतोः । सर्वदृष्टिकृतानां हि काश्यप शून्यता निःसरणं ' यस्य खलु पुनः शून्यतैव दृष्टिस्तमहमचिकित्स्यमिति वदामि । तद्यथा काश्यप ग्लानः पुरुषः स्यात्तस्मै वैद्यो भैषज्यं दद्यात्तस्य तद्भैषज्यं सर्वदोषानुच्चार्य स्वयं कोष्ठगतं न निःसरेत् । तत्किं मन्यसे काश्यप अपि तु स पुरुषस्ततो ग्लान्यान्मुक्तो भवेत् ॥ नो हीदं भगवन् गाढतरं तस्य पुरुषस्य ग्लान्यं भवेद्यस्य तद्भैषज्यं सर्वदोषानुच्चार्य कोष्ठगतं न निःसरेत् ॥ भगवा-

1) Voir p. 45, n. 1. — དཀོན་མཆོག་ བརྩེགས་པའི་མདོ་.

2) ཆོས་རྣམས་ལ་ ཡང་དག་པར་ སོ་སོར་རྟོག་པ་ ཞེས་བྱའོ།

3) སྟོང་པ་ཉིད་དུ་ དམིགས་པས་ = *çūnyatālambanena.*

4) རྟོག་པ་.

5) དེ་དག་ ནི་ ངས་ གསུངས་རབ་ འདི་ལས་ ཉམས་ རབ་ཏུ་ཉམས་ ཤེས་ བཤད་དོ། = *tān aham asmāt pravacanān naṣṭān praṇaṣṭān iti vadāmi.*

नाक्। एवमेव काश्यप सर्वदृष्टिकृतानां शून्यता निःसरणं। यस्य खलु पुनः शून्यतैव दृष्टि-स्तमहमचिकित्स्यमिति वदामि[1] ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ संस्कारपरीक्षा नाम त्रयोदशमं प्रकरणं ॥

---

1) Le rapport étroit du Ratnakūṭa et du sūtra de Nāgarjuna est digne de remarque. — La théorie de la *durgrahītatā*, des dangers que présente une fausse conception des doctrines bouddhiques, et en particulier de la *çūnyatā*, est développée dans un grand nombre de textes. (Voir Dogmatique Bouddhique, I, p. 26 = J. As. 1902, II, p. 258.) — La *çūnyatā* est couramment comparée à un serpent, qu'il faut saisir au bon endroit. Cette métaphore (*alagarda* = *alagadda*) est développée dans un sūtra que cite Buddhaghoṣa, Sum. Vil. p. 21; mais il s'agit de la doctrine bouddhique en général, *duggahītattā bhikkhave dhammāṇam*. — Pour l'école du Kathāvatthu (XIX. 2) les *skandhas* sont vides par l'absence *'ātman* (*anattalakkhaṇa*), le *nirvāṇa* seul est *animitta*, *apraṇihita*. Les Andhakas nt tort de ne pas distinguer le sens des expressions scripturales (*avibhajjavādi-ada*).

XIV.

संसर्गपरीक्षा नाम चतुर्दशमं प्रकरणं

अत्राह । अस्त्येव भावस्वभावस्तत्संसर्गोपदेशात् । इह यन्नास्ति न तस्य संसर्गस्तद्यथा बन्ध्यासुत[74 b]दुहित्रोः । अस्ति च संस्काराणां संसर्गोपदेशः[1] ।[2] चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं । त्रयाणां संनिपातः [Tib. 96 b] स्पर्शः । स्पर्शसहजा वेदनेति विस्तरः । तथा संज्ञा च वेदना च संसृष्टावेतौ धर्मौ न[ा]संसृष्टाविति [संस्काराणां[3] संसर्गोपदेशः] । तदेवं संसर्गोपदेशाद्विद्यत एव भावस्वभाव इति ॥

उच्यते । स्यादेतदेवं यदि संसर्ग एव[4] भवेत् । [न त्वस्ति] यस्मात् ।

द्रष्टव्यं दर्शनं द्रष्टा त्रीण्येतानि द्विशो द्विशः ।
सर्वशश्च न संसर्गमन्योन्येन व्रजन्त्युत[5] ॥ १

तत्र द्रष्टव्यं रूपं दर्शनं चक्षुर्द्रष्टा विज्ञानं । एषां त्रयाणां द्विशो द्विशः संसर्गो नास्ति । चक्षुषो रूपस्य च चक्षुषो विज्ञानस्य च विज्ञानस्य रूपस्य च संसर्गो नास्तीत्येवं द्विशो द्विशः संसर्गो न भवति । सर्वशोऽपि त्रयाणामप्येषां युगपच्च संसर्गो नास्ति ॥

---

1) Sur le *saṃsarga* de l'œil et de la couleur, etc., Çikṣās. 263. 9.

2) Voir ci-dessus p. 6, n. 5.

3) འདུ་བྱེད་རྣམས་ལ་ ནི་ ཕྲད་པར་ བསྟན་པ་ ཡང་ ཡིན་ནོ།

4) Mss. *bhavato bhāvet.*

5) བལྟ་བྱ་ ལྟ་བ་ ལྟ་བ་པོ། གསུམ་པོ་ དེ་དག་ གཉིས་གཉིས་ དང་། ཐམས་ཅད་ ཀྱང་ ནི་ ཕན་ཚུན་དུ། ཕྲད་པར་འགྱུར་བ་ ཡོད་མ་ཡིན།།

यथा च द्रष्टव्यदर्शनद्रष्टॄणां द्विशो द्विशः सर्वशश्च संसर्गाभावः।

एवं रागस्य रक्तस्य रञ्जनीयं(1) च दृश्यतां।

रागस्य रक्तस्य च संसर्गो नास्ति' रागस्य(2) रञ्जनीयस्य च। त्रयाणामपि युगपत्संसर्गो नास्ति। यथा चैषामेवं।

त्रैधेन शेषाः क्लेशाश्च शेषाण्यायतनानि च(3)॥ २

अन्योन्येन संसर्गं न व्रजन्ति। त्रयः प्रकारास्त्रिधा त्रिधाभावस्त्रैधं' तेन त्रैधेन शेषाः क्लेशा द्वेषमोहादयस्त एते द्वेषद्विष्टद्वेषणीयादिना त्रैधेन श्रोत्रश्रोतृश्रोतव्यादिना च [Tib. 97 a]॥ कस्मात्पुनरेषां संसर्गो नास्तीत्याह।

अन्येनान्यस्य संसर्गस्तच्चान्यत्वं न विद्यते।
द्रष्टव्यप्रभृतीनां यन्न संसर्गं व्रजन्त्यतः(4)॥ ३

यदित्ययं यस्मादर्थे। यदि द्रष्टव्यादीनां परस्परमन्यत्वं स्यात्' तदा क्षीरोदकयोरिवान्येनान्यस्य संसर्गः स्यात्। तच्चान्यत्वं यस्मादेषां द्रष्टव्यप्रभृतीनां न संभवत्यतो नैते संसर्गं व्रजन्ति॥ अपि च।

---

1) Mss. *rañjanīyaç ca.*

2) Mss. *rāgasya raktasya rañjanīyasya ca.* Il faut ajouter *raktasya rañjanīyasya ca.*

3) དེ་བཞིན་ འདོད་ཆགས་ ཆགས་པ་ དང་། ཆགས་པར་བྱ་བ་ ཉོན་མོངས་པ། ལྷག་མ་རྣམས་ དང་ སྐྱེ་མཆེད་ཀྱི། ལྷག་མ་འདང་ རྣམ་པ་ གསུམ་གྱིས་སོ༎. Dans cette version (Mūlam.), *dṛçyatām* (2ème pāda) n'est pas traduit. Notre commentaire, au lieu de *ñon-moṅs-pa* porte *lta bya ste, kleçāḥ* n'est pas traduit. — Au 4ème pāda, commentaire: *rnam gsum-ñid-kyis-so.*

4) གཞན་ དང་ གཞན་དུ་ ཕྲད་ འགྱུར་ན། གང་ཕྱིར་ བལྟ་བྱ་ལ་ སོགས་ལ། གཞན་ དེ་ ཡོད་པ་མ་ཡིན་པ། དེ་ཕྱིར་ ཕྲད་པར་ མི་ འགྱུར་རོ༎

न च केवलमन्यत्वं द्रष्टव्यादेर्न विद्यते ।
कस्य चित्केन चित्सार्धं नान्यत्वमुपपद्यते [1] ॥ ४

न च केवलं कार्यकार[75a]णभावस्थितानां द्रष्टव्यादीनामन्यत्वं न संभवति । घटपटादीनामपि पदार्थानां सर्वेषां नैव संभवतीत्यवसीयतां ॥ यथा चैषां द्रष्टव्यप्रभृतीनां परस्परतोऽन्यत्वमसत्तथा प्रतिपादयन्नाह ।

अन्यदन्यत्प्रतीत्यान्यन्नान्यदन्यदृते ऽन्यतः ।
यत्प्रतीत्य च यत्तस्मात्तदन्यन्नोपपद्यते [2] ॥ ५

इह यदेतद्घटाख्यं वस्तु पटादन्यदिति व्यपदिश्यते ' तदेतदन्यदन्यत्प्रतीत्यान्यद्भवति ' [3] अन्यवस्तु[न ऋते] ऋते ऽन्यतो विना[न्य]दन्यदन्यन्न भवति । यच्च पटाख्यं वस्तु अन्यद्घटाख्यं वस्तु प्रतीत्यान्यद्भवति ' तस्मात्पटाख्याद्वस्तुनस्तद्घटाख्यं वस्तु नान्यद्भवतीत्यवसीयतां । यस्माद्यत्प्रतीत्य यद्भवति [Tib. 97b] तस्मात्तदन्यन्न भवति ' सापेक्षत्वाद्बीजाङ्कुरवत् ह्रस्वदीर्घवच्चेति । तथा च वक्ष्यति ।

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ इति [4] ॥

अत्राह । यदि घटादन्यः पटः स्यात्तं च पृथग्भूतं पटमपेक्ष्यान्यो घटः स्यात्तदा को दोष इति ॥ उच्यते ।

---

1) བལྟ་བྱ་ལ་སོགས་ འབའ་ཞིག་ལ། གཞན་ཉིད་ མེད་པར་ མ་ ཟད་ཀྱི། གང་ ཡང་ གང་ དང་ ལྷན་ཅིག་ཏུ། གཞན་པ་ཉིད་དུ་ མི་ འཐད་དོ༎

2) གཞན་ ནི་ གཞན་ལ་ བརྟེན་ཏེ་ གཞན། གཞན་མེད་པར་ གཞན་ གཞན་ མི་ འགྱུར། གང་ལ་ བརྟེན་ཏེ་ གང་ ཡིན་པ། དེ་ ནི་ དེ་ལས་ གཞན་ མི་ འཐད༎

3) Mss. *anyatas tu ṛte 'nyato* à quoi correspond དངོས་པོ་ གཞན་ མེད་པར་ = *anyavastuna ṛte.*

4) = XVIII. 10.

यद्यन्यदन्यदन्यस्मादन्यस्मादप्यृते भवेत् ।
तदन्यदन्यदन्यस्मादृते नास्ति च नास्त्यतः[1] ॥ ६

एकोऽत्रान्यशब्द उपदर्शने ' अपरश्चार्थान्तरपरामर्शी[2] ' अन्यश्च प्रसिद्धोच्चारणमित्यन्यशब्दत्रयोपादानं । यदि ह्येतद्घटाख्यं वस्तु पटादन्यस्मादन्यत्स्यात्[3] ' तद्घटाख्यं वस्त्वन्यस्मादपि पटाख्यादृतेऽन्यद्भवेत् ' तदा च पटनिरपेक्षस्यैव[4] एकैकस्य घटस्यान्यत्वं भवेत् । यद्धि यस्मादन्यत्तत्तेन विनापि सिध्यति ' तद्यथा स एव घटो न स्वरूपनिष्पत्तावन्यं पटमपेक्षते । एवमन्यत्वमपि यदि घटस्यान्यस्मात्पटादृते भवेत् [75b] ' तदानीं पटनिरपेक्षस्य घटस्य परत्वं स्यात् । न त्वेकैकस्य पटनिरपेक्षस्य घटस्यान्यत्वं दृष्टं ' तस्मादन्यद्भवतीति ब्रुवता यदपेक्ष्य यदन्यत्ततस्तदन्यन्न भवतीति स्फुटमभ्युपेतं भवति ॥

अत्राह । यदि खल्वन्यत्वमेवं [Tib. 98a] कुतश्चित्कस्य चिन्नास्ति ' नन्विदमपि तदा न संभवति वक्तुं ' यस्मादन्यत्प्रतीत्या[5]न्यदन्यद्भवतीति तस्मादेव तदन्यदन्यन्न भवतीति ॥ उच्यते । यत एव हि परस्परापेक्षिकी भावानामन्यत्वसिद्धिरत एवान्यदित्युच्यते लौकिके व्यवहारे स्थित्वा । वस्तुतस्तु परीक्ष्यमाणमन्यत्वं न संभवतीति ब्रूमः ॥

यदि तर्ह्येवमप्यविद्यमानेऽप्यन्यत्वे लोकसंवृत्या पटादन्यो घट इति व्यपदिश्यते ' अथ कस्माद्बीजाङ्कुरयोरप्येवमन्यत्वं न व्यपदिश्यते ॥

उच्यते । नैव हि लोको घटपटयोरिव बीजाङ्कुरयोरन्यत्वं प्रतिपद्यते ' घटपटयोरिव जन्यजनकत्वाभावप्रसङ्गात् ' यौगपद्यभावप्रसङ्गात् । अपि च यस्माद्बीजमात्रमुप्त्वा बीजकार्यं

---

1) གལ་ཏེ་ གཞན་ ནི་ གཞན་ལས་ གཞན། དེ་ཚེ་ གཞན་མེད་པར་ གཞན་ འགྱུར། གཞན་མེད་པར་ ནི་ གཞན་ འགྱུར་བ། ཡོད་མིན་ དེ་ཡི་ཕྱིར་ ན་ མེད།།

2) Mss. *arthākṣara.*

3) Mss. *anyasmāt.*

4) Les Mss. ponctuent.

5) Ci-dessus 252. 6.

वृत्तमुपदर्शयति पुमान् लोकेऽयं वृत्तो मयोक्त इति ' तस्माल्लोकेऽपि कार्यकारणभूतानां नास्त्येव परत्वमिति व्यवस्थाप्यते ॥

अत्राह । यदि पदार्थान्तरे पदार्थान्तरसापेक्षा परबुद्धिः स्यात्स्यादेष दोषः ' [1]तस्मात्तदन्यन्न भवतीति । न त्वेवं ब्रूमः । किं तर्हि इहान्यत्वं नाम सामान्य[2]विशेषोऽस्ति ' तद्यत्र [3]समवेतं स पदार्थः पदार्थान्तरनिरपेक्षयापि पर इत्युच्यते ' तस्मादुक्तदोषानवसरोऽस्मत्पक्ष इति ॥ उच्यते । स्यादेतदेवं यद्यन्यत्वमेव स्यात् ' न त्वस्ति । [Tib. 98b] इहेदमन्यत्वं कल्प्यमानमन्यस्मिन् वा क[76a]ल्प्येतानन्यस्मिन् वा । उभयथा च नोपपद्यत इति प्रतिपादयन्नाह ।

नान्यस्मिन् विद्यतेऽन्यत्वमनन्यस्मिन् न विद्यते ।

तत्रान्यस्मिन्नन्यत्वमस्तीति कल्प्यते ' किं तदानीमन्यत्व[4]परिकल्पनया । अन्यव्यपदेशसिद्ध्यर्थं हि भवताऽन्यत्वं परिकल्प्यते । स चान्यव्यपदेशो[5] विनाप्यन्यत्वेन सिद्ध एव यस्माल्लब्धान्यव्यपदेश एव पदार्थेऽन्यस्मिन्नन्यत्वं कल्प्यत इत्येवं तावदन्यस्मिन्नन्यत्वं न संभवति ॥ इदानीमनन्यस्मिन्नप्यन्यत्वं नास्ति ' यस्मादनन्य उच्यत एक[6]स्तत्र चान्यत्वविरुद्धमेकत्वमस्तीति । अतो विरोधादनन्यस्मिन्नप्यन्यत्वं न संभवति ॥ यच्चेदानीं नान्यस्मिन्नानन्यस्मिन् विद्यते त[7]द्व्यतिरिक्तस्य पदार्थान्तरस्यासंभवादेतद्व्यतिरिक्तेऽपि

---

1) *tasmāt* = དེའི་ཕྱིར.

2) Tib. ཅི་ ཡང་ ཡིན་ལ་ ཁྱད་པར.

3) Mss. *samacetam*, *samacedam* — འདུ་བ་.

4) Mss. *anyatvam api pari°*.

5) Mss. *°vyapadeçe*.

6) གཞན་མ་ཡིན་པ་ ནི་ གཅིག་ཉིད་ལ་ བྱ་ལ་.

7) *tad* = དེ་དག་ལས = *anya-ananya°*.

पदार्थे न संभवति ' तन्नैवास्ति । यदा[1] चैवमन्यत्वमेव नास्ति तदान्यत्वसमवायनिबन्धनो[2]ऽन्यबुद्धिध्वनिप्रवृत्तिहेतुरन्योऽपि पदार्थो नास्तीति सिद्धं ॥

अत्राह । यद्यप्यन्यत्वं नास्ति तथाप्यन्यस्तावदस्ति ' न चासत्यन्यत्वेऽन्यो भवितुमर्हति । अतोऽन्यत्वं भविष्यतीति ॥ उच्यते ।

अविद्यमाने चान्यत्वे नास्त्यन्यद्वा तदेव वा[3] ॥ ७

यदान्यत्वमेव नास्तीति प्राक् प्रतिपादितं तदा कुतोऽसत्यन्यत्वेऽन्यद्वा तदेव वा भविष्यति । तदेवेति अनन्यत्वमित्यर्थः । तस्मान्नास्त्यन्यद्वा तदेव वा ॥

अत्राह । [Tib. 99a] विद्यन्त एव दर्शनादयः संसर्गसद्भावात् । इह दर्शनादीनां यद्यप्यन्यत्वं नास्तीति प्रतिपादितं तथापि त्रयाणां संनिपातः संगतिः स्पर्श इति संसर्गोऽस्ति ' ततश्च संसर्गसद्भावाद्विद्यन्त एव दर्शनादय इति ॥ उच्यते । स्युरेवं यदि तेषां संसर्ग एव स्यान्न त्वस्ति ' यथा च नास्ति तथा प्रतिपादयन्नाह ।

न तेन तस्य संसर्गो नान्येनान्यस्य युज्यते ।

इह यदि दर्शनादीनां संसर्गः स्यात् ' स एकत्वेन वा परिकल्प्येता[76 b]न्यत्वेन वा । तत्रैकत्वे नास्ति संसर्गो ' न ह्येककं क्षीरमुदकनिरपेक्षमुदकेन संसृज्यत इत्युच्यते । पृथक्त्वेऽपि संसर्गो नास्ति ' न ह्युदकात्पृथगवस्थितं क्षीरमुदकेन संसृज्यत इति कथ्यते ।

---

1) Mss. *tan naivāsti . dvidyamāne cānyatve yadā.*

2) དེའི་ཚེ་ གཞན་ཉིད་ དང་ འདུ་བའི་ རྒྱུ་ཅན་ བློ་དང་སྒྲ་ འཇུག་པའི་ རྒྱུ་ དངོས་པོ་ གཞན་ ཡང་ ཡོད་པ་མ་ཡིན་ནོ་ ཞེས་···· = *tadā anyatva-samavāyanibandhano buddhi°*. — Le sens paraît certain: si l'*anyatva* n'existe pas, il n'existe pas de chose (*padārtha*) «autre» qui soit c .use de la création de l'idée et du mot *anyatva*, car cette chose «autre» ne peut être «autre» qu'en raison de l'inhérence de l'*anyatva*.

3) གཞན་ཉིད་ གཞན་ལ་ ཡོད་མ་ཡིན། གཞན་མ་ཡིན་ལའང་ ཡོད་མ་ཡིན། གཞན་ཉིད་ ཡོད་པ་མ་ཡིན་ ན། གཞན་ནམ་ དེ་ཉིད་ ཡོད་མ་ཡིན།།

एवं दर्शनादीनां पृथक्त्वे सति संसर्गः परिकल्प्यते सोऽनुपपन्न एककस्यापि चक्षुषः संसृष्टिप्रसङ्गात् । अथ पृथक्त्वमेवमप्यनुपपन्न एककस्यापि चक्षुषो रूपादिभ्यः पृथग्भूतस्य संसृष्टिप्रसङ्गत् । असति संसर्गे नास्ति दर्शनादिकमिति सिद्धं ॥

अत्राह । यद्यपि संसर्गो नास्ति तथापि संसृज्यमानं संसृष्टं संस्रष्टा चास्ति तदप्रतिषेधात् । न च संसर्गमन्तरेण संसृज्यमानं संसृष्टं संस्रष्टा च संभवति । तस्मात्संसर्गोऽपि भविष्यतीति ॥ उच्यते । एतदपि न युक्तं । यस्माद्यदा संसर्ग एव नास्तीति प्रतिपादितमसति च संसर्गे तदा कुतः [Tib. 99 b] संसृज्यमानादिकं । तत्र वर्तमानसंसर्गक्रियासाधनकर्मभूतं संसृज्यमानं ' संसृष्टं निष्पन्नसंसर्गक्रियं ' संस्रष्टा कर्ता क्रियानिष्पत्तौ स्वातन्त्र्येणावस्थितः । तदत्र संसर्गाभावादेव संसृज्यमानादिकमपश्यंस्तत्प्रतिषेधं निगमयन्नाह ।

संसृज्यमानं संसृष्टं संस्रष्टा च न विद्यते ॥ इति[1] । ८

यथोक्तं भगवता[2] ।

सर्वसयोगि तु पश्यति चक्षु-
स्तत्र न पश्यति प्रत्ययहीनं ।
[नैव च] चक्षु पपश्यति [रूपं]
तेन सयोगवियोगविकल्पः ॥

आलोकसमाश्रित पश्यति चक्षु
रूप मनोरम चित्रविशिष्टं ।
येन च योगसमाश्रित चक्षु-
स्तेन न पश्यति चक्षु कदाचि ॥

1) དེ་ནི་དེ་དང་སྤྲད་པ་མེད། གཞན་ནི་གཞན་དང་སྤྲད་མི་འགྱུར། སྤྲད་བཞིན་པ་དང་སྤྲད་པ་དང་། སྤྲད་པ་པོ་ཡང་ཡོད་མ་ཡིན༎

2) Dans l'*Upālipariprcchā*; voir ci-dessus p. 53, n. 4 et pour les deux premières stances, p. 121. 4.

ते[1] परिनिर्वृत लौकिक[2] शूरा
येहि [ऽ]स्वभावत ज्ञातिमि धर्माः । [77a]
कामगुणैर्हि[3] चरन्ति असङ्गाः
संग विवर्जिय सत्व विनेन्ति[4] ॥

नो पि च सत्व न जीविह कश्चि
सत्वहितं च करोन्ति जिनेन्द्राः[5] ।
* * * * * * * *
सत्व न अस्ति करोन्ति च अर्थं[6] ॥

सङ्ग न विद्यति अत्र कदा चि
(7 * * * * * * * *
* * * * * * * * 7)
तस्य न विद्यति वेदन लोके ॥

---

1) Mss. *ye.* གང་དག་ རང་བཞིན་མེད་ཆོས་ འདི་ ཤེས་པ། དཔའ་བོ་ དེ་དག་ ཇིག་རྟེན་ མྱ་ངན་འདའ།

2) *laukika?* Tib. = *loke?*

3) Mss. °*guṇair bhi*°.

4) འདུལ་བར་བྱེད།

5) མི་དབང་རྣམས་ = *narendrāḥ* — Mss. *karoti, karonti.*

6) སེམས་ཅན་ ཡོད་པ་མིན་ ཡང་ དོན་མཛད་པ། དེ་དག་རྣམས་ཀྱི་ དེ་ དེ་ གའ་བ་ཆེ།། ཞེས་བྱ་བ་ནས་། = *a ttsv api sattveṣu karonty artham, teṣāṃ d eva mahātuṣṭiḥ.* — Mss. *imu duṣṭa rute ca mahāntaṃ satva na asti karoti a artham.*

8) Mss. *devam asagatayo dhimukta, tasya na vidyati...;* — *taṃ devam...* ང་དག་ ཆོས་ཉིད་འདི་ལ་ མོས་ གྱུར་པ། དེ་དག་ ཡིད་ ནི་ སྲིད་ལ་ ཆགས་ མི་ འགྱུར། *eṣām dharmatāyāṃ tasyām adhimuktis teṣām mano bhave 'saktam.*

तथा[1] ।

भावितु मार्ग पवर्तितु ज्ञान
शून्यक धर्म निरात्मक सर्वि ।
येन विभावित गोत्तिमि धर्मा-
स्तस्य भवेत्प्रतिभानमनन्तं ॥ इत्यादि ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ संसर्गपरीक्षा नाम चतुर्दशमं प्रकरणं ॥

---

1) ཞེས་བྱ་བའི་ པར་པ་ དང་། དེ་བཞིན་དུ།

स्वभावपरीक्षा नाम पञ्चदशमं प्रकरणं

अत्राह । [Tib. 100a] विद्यत एव भावानां स्वभावस्तन्निष्पादकहेतुप्रत्ययोपादानात् । इह यन्नास्ति न तस्य निष्पादकहेतुप्रत्ययोपादानमस्ति यथा खपुष्पस्य । उपादीयन्ते च बीजाविद्यादयो हेतुप्रत्यया अङ्कुरसंस्कारादीनां निष्पादका इत्यतो विद्यत एव भावस्वभाव इति ॥ उच्यते । यदि भावानां संस्काराङ्कुरादीनां स्वभावोऽस्ति किमिदानीं विद्यमानानां हेतुप्रत्ययैः प्रयोजनं । यथा वर्तमानीभूतानां संस्काराङ्कुरादीनां भूयो निष्पत्तये नाविद्याबीजादीनामुपादानं क्रियते । एवमन्यदपि तदुत्पत्तये न कर्तव्यं(1) स्यात्तत्स्वभावस्य विद्यमानत्वादिति प्रतिपादयन्नाह ।

न संभवः स्वभावस्य युक्तः प्रत्ययहेतुभिः ।

अथ स्यान्नैवोत्पादात्पूर्वं कस्य चिद्भावस्य [स्व]भावोऽस्ति यतोऽस्य विद्यमानत्वादुत्पत्तिवैयर्थ्यं स्यात् । किं तर्ह्युत्पादात्पूर्वमविद्यमानस्यैव स्व[77b]भावस्य हेतुप्रत्ययान प्रतीत्य पश्चादुत्पादो भवतीति ॥ एवमपीष्यमाणे ।

हेतुप्रत्ययसंभूतः स्वभावः कृतको भवेत्(2) ॥ १

1) གཞན་ལ་ ཡང་ དེ་ སྐྱེད་པར་བྱ་བའི་ཕྱིར་ ལྷད་བར་ མི་ བྱ་བར་ འགྱུར
= *evam anyad api . . nopādānī-kartavyam.*

2) རང་བཞིན་ རྒྱུ་ དང་ རྐྱེན་ལས་ ནི། འབྱུང་བར་ རིགས་པ་ མ་ཡིན་ནོ། རྒྱུ་ དང་ རྐྱེན་ལས་ བྱུང་བ་ཡི། རང་བཞིན་ བྱས་པ་ཅན་དུ་ འགྱུར॥ **Akutobhaya** traduit ***svabhāva*** **par** ངོ་བོ་ཉིད་.

अथ स्यादिष्यत एव हेतुप्रत्ययसंभूतत्वात्स्वभावस्य कृतकत्वं ' तस्मात्कृतकस्यैव स्वभावस्याभ्युपगमात्कृतकत्वप्रसङ्गो नास्माकं बाधक इति ॥ एतदपि न युक्तमित्याह ।

स्वभावः कृतको नाम भविष्यति पुनः कथं(1) [Tib. 100b] ।

कृतकश्च स्वभावश्चेति परस्परविरुद्धत्वादसंगतार्थमेव तत् ॥ इह हि स्वो भावः स्वभाव(2) इति व्युत्पत्तेर्यः कृतकः पदार्थः स लोके नैव स्वभाव इति व्यपदिश्यते तद्यथा अपामौष्ण्यं(3) धातुपिशाचप्रयत्ननिष्पादितः(4) कर्केतनादीनां(5) पद्मरागादिभावश्च । यस्त्वकृतकः स स्वभावस्तद्यथा अग्नेरौष्ण्यं जातानां पद्मरागादीनां पद्मरागादिस्वभावश्च ' स हि तेषां पदार्थान्तरसंपर्काजनितत्वात्स्वभाव इत्युच्यते ॥

तदेवमकृतकः स्वभाव इति लोकव्यवहारे व्यवस्थिते वयमिदानीं ब्रूमो यदेतदौष्ण्यं तदप्यग्नेः स्वभावो न भवतीति गृह्यतां कृतकत्वात् । इह मणीन्धनादित्यसमागमादरणिनिर्घर्षणादेश्चाग्नेर्हेतुप्रत्ययसापेक्षतैवोपलभ्यते ' न चाग्निव्यतिरिक्तमौष्ण्यं संभवति । तस्मादौष्ण्यमपि हेतुप्रत्ययजनितं ' ततश्च कृतकं ' कृतकत्वाच्चापामौष्ण्यवत्स्वभावो न भवतीति स्फुटमवसीयते ॥

ननु च गोपालाङ्गनाजनप्रसिद्धमेतदग्नेरौष्ण्यं स्वभाव इति ॥ किं खल्वस्माभिरुक्तं न प्रसिद्धमिति । एतत्तु वयं ब्रूमो नायं स्वभावो भवितुमर्हति स्वभावलक्षणवियुक्तत्वात् '

---

1) རང་བཞིན་ བྱས་པ་ཅན་ ཞེས་བྱར། ཇི་ལྟ་བུར་ན་ རུང་བར་འགྱུར། — La seconde partie du sūtra, ci-dessous p. 262. 11.

2) Calc. insére ici les lignes 9 et 10, depuis *loka*° jusque *svabhāvo*.

3) *apānoṣṇyam*, *āyāmauṣṇyam*. — Tib. *udakasya*...

4) Sic Mss. — ནོར་སྒྱུར་ མཁན་གྱི་ འབད་པས་ — «habile dans la transformation des pierres (*nor-bu*)». — La contrefaçon du rubis avec le chrysobéryl n'est pas mentionnée dans les sources de L. Finot, Lapidaires indiens, p. XLI. — L'expression *dhātupiçāca*, non confirmée par le tibétain, reste douteuse.

5) ཀེ་ཀེ་རུ་ལ་སོགས་པ་.

अविद्याविपर्यासानुगमात्तु लो[78a]को निःस्वभावमेव भावजातं सस्वभावत्वेन प्रतिपन्नः [Tib. 101a]। यथा हि तैमिरिकास्तिमिरप्रत्ययादसन्तमेव केशादिस्वभावं[1] सस्वभावत्वेनाभिनिविष्टाः। एवमविद्यातिमिरोपहतमतिनयनतया बाला निःस्वभावं भावजातं सस्वभावत्वेनाभिनिविष्टा यथाभिनिवेशं[2] लक्षणमाचक्षते ' अग्नेरौष्ण्यं स्वलक्षणं ' ततोऽन्यत्रानुपलम्भादसाधारणत्वेन स्वमेव लक्षणमिति कृत्वा। बालजनप्रसिद्ध्यैव[3] च भगवता तदेवैषां सांवृतं[4] स्वरूपमभिधर्मे[5] व्यवस्थापितं। साधारणं त्वनित्यत्वादिकं सामान्यलक्षणमिति चोक्तं। यदा तु विगताविद्यातिमिरावदात[6]प्रज्ञाचक्षुषां दर्शनमपेक्ष्यते[7] ' तदा वितिमिरैस्तैमिरिकोपलब्धकेशादर्शनवद्बालजनमतिपरिकल्पितानुपलब्धस्वभावैरार्यैः[8] पुर उच्यते परहित[9]व्यापारैर्नायं[10] स्वभावो भावानामिति॥

---

1) D'après le tibétain: *niḥsvabhāvam eva keçādi sasvabhāvatvena*

2) Mss. *abhiniviṣṭāḥ . yathābhiniveçal°*. — Sur les *taimirikas*, voir ci-dessus p 30, n. 2; 75. n. 3. — Sur le *svalakṣaṇa*, ci-dessus 60, n 4. — *lakṣaṇavikalpa* = *yad uta tasminn evābhidheye mṛgatṛṣṇākhye lakṣaṇavaicitryabhiniveçenabhiniveçate yad utoṣṇadravacalakaṭhinalakṣaṇān sarvabhāvān vikalpayati* (Laṅkav. p. 127, Ms. Dev. 92 Bibl. Nat, fol 39a). Pour les Vijñanavadins, il existe quelque chose, mais ce quelque chose est vide de tout *abhidheyatva*, Bodhisattvabh. I, iv.

3) D'après le tibétain: *tatprasiddhyā*.

4) Le *sāmvṛta svabhāva*, Bodhic. p., 360. 10.

5) Définitions ci-dessus p. 60, n. 5. — De même celle de *dura* (Abhidh. k. v. 380b), de *vītarāga* (Nāmasaṃg. ṭ. VI. 11), etc.

6) Mss. *avadata*.

7) Mss. *apekṣate*.

8) Mss. *āryaḥ sya pūrum, āryasya puram*. — འཕགས་པ་ ··· རྣམས་ཀྱིས་ ··· ཉེས་ གསལ་བར་གསུང་བར་ མཛད་པ་ཡིན་ཏེ.

9) *parahitavyāpāraiḥ* (Camb. Calc.), — Paris *parahitāya tai nāyam*, — n'est pas représenté dans le tibétain.

10) La *çūnyatā* est le *svalakṣaṇa* de tous les *skandhas*, Madh. avat. fol. 239a 7, et non pas l'*anityatva*.

यथोक्तमार्यलङ्कावतारसूत्रे ।

केशोण्डुकं यथा मिथ्या गृह्यते तैमिरिकैर्जनैः[1] ।
तथा भावविकल्पोऽयं मिथ्या बालैर्विकल्प्यते ॥
न स्वभावो न विज्ञप्तिर्न च वस्तु[2] न चालयः ।
बालैर्विकल्पिता ह्येते शवभूतैः[3] कुतार्किकैः ॥ इति ।

तथा । स्वभावानुत्पत्तिं संधाय महामते मया सर्वधर्मा अनुत्पन्ना इत्युक्ता इति विस्तरः[4] ॥ [Tib. 101b]

अत्राह । यदि खल्विदमग्न्यादेरौष्ण्यादिकं हेतुप्रत्ययसंभूतत्वेन कृतकत्वान्निःस्वभावमित्युच्यते । किमिदानीं तत्स्वभावस्य लक्षणं कश्चासौ स्वभाव इति वक्तव्यं ॥ उच्यते ।

अकृत्रिमः स्वभावो[5] हि निरपेक्षः परत्र च ॥ २

इह स्वो भावः स्वभाव इति यस्य पदार्थस्य यदात्मीयं रूपं [78b] तत्तस्य स्वभाव

---

1) Pāda incorrect. — *janaiḥ* n'est pas représenté dans le tibétain. — Cp. Laṅkāv. 97 *skandhāḥ keçoṇḍukakārāḥ*.

2) Mss *vastur*. — *ālaya*, ཀུན་གཞི་ — Laṅkāv. 97. *vijñaptir nāmamatredaṃ lakṣaṇena na vidyate*.

3) *çava* = pāli *chava* = bas, vil; voir Mhv. I. 583. — Tib. རོ = *cadavre*.

4) Voir la citation, ci-dessous ad XXIV. 18, où *çūnya* remplace *anutpanna*. Nos Mss. portent *sattvāya*; mais དགོངས་ནས = *saṃdhāya*.

5) Mdo XVII ངང་བཞིན་ དག་ ནི་ བཅོས་མེད་ དང་། གཞན་ལ་ བལྟོས་པ་ མེད་པ་ ཡིན།། Commentaire: ངང་བཞིན་ དེ་དག་ ནི་ ce qui donne un pāda faux. དག་ = *hi* (Jäschke 248a, Candra Dās, 612b). — Akutobhaya et Buddhapālita ངོ་བོ་ཉིད་ ནི་ བཅོས་མེད་ དང་། གཞན་ལ་····

इति व्यपदिश्यते। किं च कस्यात्मीयं यद्यस्याकृत्रिमं। यत्तु कृत्रिमं न तत्तस्यात्मीयं तद्यथापामौष्ण्यं। यच्च यस्यायत्तं तदपि तदात्मीयं। तद्यथा स्वे भृत्याः स्वानि धनानि। यत्तु यस्य परायत्तं न तत्तस्यात्मीयं। तद्यथा तावत्कालिका(1)याचितकमस्वतन्त्रं। यतश्चैवं कृत्रिमस्य परसापेक्षस्य च स्वभावत्वं नेष्टं। अत एवौष्ण्यमग्नेर्हेतुप्रत्ययप्रतिबद्धत्वात्पूर्वम-(2)भूत्वा पश्चादुत्पादेन कृतकत्वाच्च न स्वभाव इति युज्यते। यतश्चैतदेवमतो यदेवाग्नेः (3)कालत्रये

---

1) *āyācitaka* = *yācitaka*, eine geborgte Summe, ein zum Gebrauch entlehnter Gegenstand (P. W., d'après Jolly). — *tāvatkālika*, mot nouveau. — རེ་ཞིག་པའི་ བརྙན་པོ.

2) སྔར་ མ་བྱུང་བ་ལས་ ཕྱིས་ འབྱུང་བས. — La formule *abhūtvā bhāva* (M. Vyut. § 109. 99) est caractéristique du Bouddhisme; elle joue un grand rôle dans la controverse du *sarvāstivāda*. Voir notamment Majj N. III, 25, 20; Mil. p. 52 sqq. (Oldenberg, Bouddha (Foucher)[2], p 388; Walleser, Phil. Grundlage, p. 128); Kathāv. I. 6; Çikṣās. 248. 10: *abhūtvā bhavati, bhūtvā ca prativigacchati, svabhāvarahitatvāt*; Abhidh. k. v (Soc. As.) 232a 1 *utpādaç ca nāmābhūtvābhāvalakṣaṇaḥ sautrāntikanayena.* — Les Sarvastivādins croient qu'il y a quelque chose de permanent (*avyabhicārin*). Le passé, le présent, l'avenir constituent un *anyathātva*, constitué par des différences d'*avasthā*, de *bhāva*, de *lakṣaṇa*, non de *dravya* (*dravyāntarataḥ*) Le commentateur de l'Abhidh. k. rencontre les diverses nuances de cette opinion résumées par Bhavya (Rockhill, Life of Buddha, p. 195) et aboutit, ce semble, à la thèse orthodoxe: *atītam yad bhutapūrvam iti na svalakṣaṇenāstīti darçayati . anāgatam yat sati hetau bhaviṣyatīty avidyamānam api hetusadbhāvād vyavasthāpyata iti darçayati.* On ne peut pas parler d'une situation (*avasthā*) dans laquelle le *dharma* est inactif (*kāritram na karoti*) sans tomber dans l'hérésie des Sāṃkhyas. (A. k. v. fol. 233, 358, 360). — Voir ci-dessous ad XXV. 3.

3) གང་གི་ཕྱིར་ འདི་ དེ་ལྟར་ ཡིན་པ་ དེའི་ཕྱིར། དུས་གསུམ་དུ་ ཡང་ མེ་ལ་ མི་འཁྲུལ་པ་ གཉུག་མའི་ ངོ་བོ་ མ་བཅོས་པ། གང་ཞིག་ སྔར་ མ་བྱུང་བས་ ཕྱིས་ འབྱུང་བ་ མ་ ཡིན་པ། གང་ཞིག་····· རྒྱུ་དང་རྐྱེན་ལ་ བལྟོས་པ་དང་བཅས་པར་ མ་གྱུར་པ་ གང་ ཡིན་པ་ དེ་ རང་བཞིན་ ཡིན་པར་ བརྗོད་དོ། = *On entend par svabhāva*, cette essence innée (*nija*), naturelle (*akṛtrima*), qui appartient en propre au feu dans le passé, dans l'avenir, qui n'existe pas après ne pas avoir existé, et qui n'est pas dépendante de causes et de relations, comme le sont la chaleur de l'eau, la rive en deçà et au delà, le long et le court

ऽप्यव्यभिचारि निजं रूपमकृत्रिमं ' पूर्व[म]भूत्वा पश्चाद्यन्न भवति ' यच्च हेतुप्रत्ययसापेक्षं न भवत्यपामौष्ण्यवत्पारावारवद्दीर्घह्रस्ववद्वा ' तत्स्वभाव इति व्यपदिश्यते ॥ किं खलु [अग्नेः](1) तदित्थं स्वरूपमस्ति ॥ न तदस्ति न चापि नास्ति स्वरूपतः । यद्यप्येवं तथापि [Tib. 102a] श्रोतॄणामुत्त्रासपरिवर्जनार्थं(2) संवृत्या समारोप्य तदस्तीति ब्रूमः ।

यथोक्तं भगवता(3) ।

अनक्षरस्य धर्मस्य श्रुतिः का देशना च का ।
श्रूयते देश्यते चापि समारोपादनक्षरः ॥ इति ॥

इहापि च वक्ष्यति(4) ।

शून्यमिति न वक्तव्यमशून्यमिति वा भवेत् ।
उभयं नोभयं चेति प्रज्ञप्त्यर्थं तु कथ्यते ॥ इति ॥

यदि खलु तदध्यारोपाद्भवद्भिरस्तीत्युच्यते(5) कीदृशं तत् । या सा धर्माणां धर्मता नाम सैव तत्स्वरूपं । अथ केयं धर्माणां धर्मता ' धर्माणां स्वभावः । कोऽयं स्वभावः ' प्रकृतिः । का चेयं प्रकृतिः ' येयं शून्यता । केयं शून्यता ' नैःस्वाभाव्यं । किमिदं नैःस्वा-

---

1) ཅི་ མེའི་ རང་གི་ ངོ་བོ་ དེ་ལྟ་བུར་གྱུར་པ་ དེ་ ཡོད་དམ་ ཞེ་ན། Les mots *na tad asti* ne sont donnés que dans le Ms de Paris.

2) Sur le *trāsa* qu'inspire la *çūnyatā*, voir Bodhic. IX. 53. — Ce thème est fréquemment développé dans les sūtras de la Prajñāpāramitā.

3) Cette stance est citée Bodhic. p., 365. 9, avec la mention *yad uktam* et la variante *çrūyate deçyate cārthaḥ*. Les versions tibétaines divergent pareillement སྒྲོ་བཏགས་པ་ལས་ ཡི་གེ་མེད། དེ་ནི་ ཉན་ཅིང་ སྟོན་པའང་ ཡིན et Bcp. དོན་གང་ ཉན་ཅིང་ སྟོན་བྱེད་པ།

4) = XXII. 11.

5) Mss. *tadadhyāvopekṣo bha°*, *°ropekṣo*. — *adhyāropa* = སྒྲོ་བཏགས = *samāropa*.

भाव्यं ' तथता। केयं तथता ' तथाभावो ऽविकारित्वं[1] सदैव स्थायिता[2]। सर्वदा[3][79 a]नुत्पाद एव ह्यग्न्यादीनां परनिरपेक्षत्वादकृत्रिमत्वात्स्वभाव इत्युच्यते ॥

एतदुक्तं भवति। अविद्यातिमिरप्रभावोपलब्धं भावजातं येनात्मना विगताविद्यातिमिराणामार्याणाम्[4]दर्शनयोगेन विषयत्वमुपयाति तदेव स्वरूपमेषां स्वभाव इति व्यवस्थाप्यते। तस्य चेदं लक्षणं '

अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च '

इति व्यवस्थापयाम्बभूवुराचार्या इति विज्ञेयं॥ स चैष भावानामनुत्पादात्मकः [Tib. 102 b] स्वभावो ऽकिंचित्त्वेनाभावमात्रत्वादस्वभाव एवेति कृत्वा नास्ति भावस्वभाव इति विज्ञेयं॥

यथोक्तं भगवता[5]।

भावानभावानिति यः प्रजानति
स सर्वभावेषु न जातु सज्जते।
[यः सर्वभावेषु न जातु सज्जते]
स आनिमित्तं स्पृशते समाधिं ॥ इति ॥

अत्राह। यद्यपि स्वभावो नास्ति भावानां तथापि परभावस्तावदस्ति तदप्रतिषेधात्। सति च परभावे स्वभावोऽपि भविष्यति। स्वभावमन्तरेण परभावाप्रसिद्धेरिति ॥

उच्यते।

कुतः स्वभावस्याभावे परभावो भविष्यति।

---

1) D'après le tibétain: *tathābhāvāvikāritvam.*

2) Ponctué d'après le tibétain.

3) D'après le tibétain *sarvathānutpāda*: རྣམ་པ་ཐམས་ཅད་དུ་.

4) Mss. *ācāryāṇām.* — Voir la stance Madh. avatāra (fol. 249 a 4) … *°upadvayaṃ bibhrati sarvabhāvāḥ,* citée et commentée Bodhic. p. 361.4.

5) Cité ci-dessus p. 133.9.

स्वभावः परभावस्य [पर]भावो हि कथ्यते[1]॥ ३

इह स्वभाव एव हि लोके कश्चित्स्वभावान्तरापेक्षतया पर इति व्यपदिश्यते। यदि (2)अग्नेरौष्ण्यं स्वभावः स्यात्' द्रवस्वभावसलिलसापेक्षतया परभाव इति व्यपदिश्येत। यदा तु मुमुक्षुभिर्विचार्यमाणस्य[3] कस्य चित्स्वभाव एव नास्ति तदा कुतः परत्वं स्यात्। परभावाच्च स्वभावोऽपि नास्तीति सिद्धं॥

अत्राह। यद्यपि स्वभावपरभावौ न स्तः' तथापि भावस्तावदस्त्यप्रतिषेधात्। स च भावो भवन् स्वभावो वा भवेत्परभावो वा। तस्मात्स्वभावपरभावावपि भविष्यत इति॥ उच्यते।

स्वभावपरभावाभ्यामृते [79b] भावः कुतः पुनः।

स्वभावे [Tib. 103a] परभावे वा सति भावो हि सिध्यति[4]॥ ४

भावो हि परिकल्प्यमानः स्वभावो वा भवेत्परभावो वा' तौ च पूर्वोक्तविधिना न स्त इति तयोरभावाद्भावोऽपि नास्तीत्यवसीयतां॥

अत्राह। यद्यपि भवतो भावः प्रतिषिद्धस्तथाप्यभावोऽस्ति प्रतिषेधाभावात्। ततश्च भावोऽपि भविष्यति प्रतिद्वन्द्विसद्भावादभाववदिति॥ उच्यते। स्याद्भावो यद्यभाव एव स्यान्न त्वस्तीत्याह।

---

1) རང་བཞིན་ ཡོད་པ་མ་ཡིན་ན། གཞན་གྱི་དངོས་པོ་ ག་ལ་ ཡོད། གཞན་གྱི་དངོས་པོའི་ རང་བཞིན་ ནི། གཞན་གྱི་དངོས་པོ་ ཡིན་ ཞེས་ བརྗོད॥

2) Mss. *yadi nāgner.*

3) C'est-à-dire examiné avec le *prajñāçastra*; voir Bodhic. p. IX, 93. 151

4) རང་བཞིན་ དང་ ནི་ གཞན་དངོས་དག། མ་གཏོགས་ དངོས་པོ་ ག་ལ་ ཡོད། རང་བཞིན་ དང་ ནི་ གཞན་དངོས་དག། ཡོད་ན་ དངོས་པོ་ འགྲུབ་པར་འགྱུར॥
= ... *parabhāve ca*.....

भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति ।
भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः[(1)] ॥ ५

इह हि यदि भावो नाम कश्चिदभविष्यत्स्यात्तस्यान्यथाभावादभावः ' घटादयो हि वर्तमानावस्थायाः प्रच्युताः सन्तोऽन्यथाभावमापन्ना अभावध्वनिवाच्या भवन्ति लोके । यदा तमो घटादयो भावरूपत्वेनैवासिद्धास्तदा कुतोऽविद्यमानस्वभावानामन्यथात्वमिति । अतो ऽभावोऽपि नास्ति । तदेवं सर्वथा स्वभावपरभावभावाभावेष्वनुपपद्यमानेष्वविद्यातिमिरोपहतमतिनयनतया विपरीतं

स्वभावं परभावं च भावं चाभावमेव च ।
ये पश्यन्ति न पश्यन्ति ते तत्त्वं बुद्धशासने[(2)] ॥ ६

ये हि तथागत[Tib. 103 b]प्रवचनाविपरीतव्याख्यानाभिमानितया ' पृथिव्याः काठिण्यं स्वभावः ' वेदनाया विषयानुभवः ' विज्ञानस्य विषयप्रतिविज्ञप्तिः स्वभाव इत्येवं स्वभावं भावानां वर्णयन्ति ' अन्यद्विज्ञानमन्यद्रूपमन्यैव च वेदनेत्येवं परभावं वर्णयन्ति[(3)] ' वर्तमानावस्थं च विज्ञानादिकं भावत्वेन ये वर्णयन्ति विज्ञानादिकमेव चातीततानागतमभाव इति ' न ते परमगम्भीरस्य [80 a] प्रतीत्यसमुत्पादस्य तत्त्वं वर्णयन्ति । यस्माद्यथोदितोपपत्तिविरुद्धं स्वभावपरभावादीनामस्तित्वं ' न चोपपत्तिविरुद्धं पदार्थस्वभावमनुवर्णयन्ति तथागताः स्वयमविपरीताशेषपदार्थतत्त्वसंबोधात् ॥

---

1) གལ་ཏེ་ དངོས་པོ་ མ་ གྲུབ་ན། དངོས་མེད་ འགྲུབ་པར་ མི་ འགྱུར་རོ།
དངོས་པོ་ གཞན་དུ་གྱུར་པ་ ནི། དངོས་མེད་ཡིན་པར་ སྐྱེ་བོ་ སྨྲ།།

2) གང་དག་ རང་བཞིན་ གཞན་དངོས་ དང་། དངོས་ དང་ དངོས་མེད་ཉིད་ ལྟ་བ།
དེ་དག་ སངས་རྒྱས་ བསྟན་པ་ལ། དེ་ཉིད་ མཐོང་བ་ མ་ཡིན་ནོ།།

3) Ci-dessus p 60. 5.

अत एव बुद्धानामेव भगवतां वचनं (1) प्रमाणामित्युपवर्णयन्ति विचक्षणाः सोपपत्ति-
कत्वेनाविसंवादकत्वात्। अत एव च (2) आप्तेभ्यः प्रक्षीणाशेषदोषेभ्य आगतत्वात्' आगमय-

---

1) La parole des Bouddhas seule fait autorité parce que, étant appuyée sur des preuves (*sopapattikatvena* འཐད་པ་དང་བཅས་པས་), elle est *avisaṃvādaka* (Nyāyabinduṭ. 3. 15). — De nombreux textes établissent les droits de la spéculation libre [... *yuktipratisarano bhavati; na «sthavirenābhijñānena* (?) *vā pudgalena tathāgatena vā saṅghena vā ime dharmā bhāṣitā» iti pudgalapratisarano bhavati* ... non pas que les Tathāgatas se trompent peut-être, mais parce qu'il faut connaître *kālāpadeças* et *mahāpadeças* (cp. Dīgha N. II 124) — Bodhisattvabhūmi, I. xvii]. Non moins nombreux et très significatifs ceux qui ordonnent d'accepter la parole du Maître, même quand on ne la comprend point. Le premier des caractères de la *samyakcintanā* est l'*acintyavarjana*, «ne pas s'arrêter à ce qui est incompréhensible» (cp. Sum. Vil. p. 22); le troisième, d'examiner ce qui doit être examiné (*kiṃ cid yuktyā paricārayati*); le quatrième, de croire ce qui ne doit pas être examiné (*kim cid adhimucyate*) en disant: «ceci n'est intelligible qu'aux Tathāgatas» (*tathāgatagocarā ete dhārmāḥ*. — Cp. Ratnakūṭa dans Çikṣās. 55. 4 et sources J. As., 1903, II, p. 264). — Par l'*adhimukti*, confiance, adhésion (*adhimucyase saṃpratyeṣi çraddadhāsi*, Bodhic. p. VIII. 63), le fidèle possède la Prajñā à l'état de cause (*adhimukticaritasya hetubhūtā prajñā*, Bodhic. p. 349), en attendant qu'il acquière l'*abhisamaya*, le *jñāna* (*jñānapratisarana* opposé à *vijñāna*°). — *adhimokṣa* ailleurs est défini *niçcite vastuni tathaivāvadhāraṇam* (Abhidh. k. v., Soc. As. 243 b. 6); *tadadhimuktas, tadārāmas, teṣv eva sāradarçī* (Bodhisattvabh. I. xvii).

2) Mss. *aptebhyaḥ prahīṇāçeṣadoṣebhyaḥ agatatvāt . āgamayatīti.* . . . *abhimukhyāgamanād vā* ..... — དེ་ཉིད་ཀྱི་ཕྱིར་ ཉེས་པ་མ་ལུས་པ་སྤངས་པ་ ཡིད་ཆེས་པ་དག་ལས་ འོངས་པའི་ཕྱིར་རམ། ཀུན་དུ་གོ་བར་བྱེད་པ་སྟེ། དེ་ཁོ་ན་ཉིད་ ཀུན་ནས་ གོ་བར་བྱེད་པའི་ཕྱིར་རམ། མངོན་དུ་ཕྱོགས་ནས་ འགྲོ་བ་སྟེ། དེ་ལ་ བརྟེན་ནས་ འཇིག་རྟེན་མྱ་ངན་ལས་འདས་པར་ འགྲོ་བའི་ཕྱིར་ རྫོགས་པའི་སངས་རྒྱས་ཀྱི་ གསུང་ ཉིད་ ལུང་དུ་རྣམ་པར་བཞག་ལ།

འོང་བ་ = arriver (*āgam*). — གོ་བ་ = comprendre. — འགྲོ་བ་ = partir, se mouvoir, entrer (*gam*). — Voir ci-dessus 31, n. 1. 94, n. 1.

La définition de l'*āpta* est classique, *prahīṇadoṣatvam avehi cāptatāṃ prahīṇadoṣo hy anṛtaṃ na vakṣyati* (Buddhacar. IX. 66). — Voir Nyāyabindu, p. 117. — Pour les logiciens bouddhiques, l'*āgama* fait partie de l'*anumāna*, voir Abhidh. k. v. citée J. As. 1902, II, 264, n. 1.

तीति समन्तात्तत्त्वं गमयतीति वाभिमुख्यागमनाद्वा तदाश्रयेण लोकस्य निर्वाणगम[ना]त्सं-बुद्धवचनस्यैवागमत्वं व्यवस्थाप्यते । तदन्यमतानां तूपपत्तिवियुक्तत्वान्न प्रामाण्यमागमाभासत्वं च व्यवस्थाप्यते । यस्माच्चैतानि स्वभावपरभावभावाभावदर्शनानि [Tib. 104a] युक्तिविधुरत्वान्न तत्त्वानि ' अत एव मुमुक्षूणां विनेयजनानां

कात्यायनाववादे चास्ती[ति] नास्तीति चोभयं ।
प्रतिषिद्धं भगवता भावाभावविभाविना[1] ॥ ७

उक्तं हि भगवता आर्यकात्यायनाववादसूत्रे[2] । यद्भूयसा कात्यायनायं लोकोऽस्तितां वाभिनिविष्टो नास्तितां च[3] ' तेन न परिमुच्यते । जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो न परिमुच्यते । [4]पाञ्चगतिकात्संसारचारकागारबन्धनान्न परिमुच्यते । मातृमरणसंतापदुःखान्न परिमुच्यते । पितृमरणसंतापदुःखादिति विस्तरः ॥

इदं च सूत्रं सर्वनिकायेषु[5] पठ्यते । तदस्मा[6]दागमाद्यथोपवर्णितायाश्चोपपत्तेर्नार्हति

---

1) བཅོམ་ལྡན་ དངོས་ དང་ དངོས་མེད་པ། མཁྱེན་པས་ ཀཱ་ཏྱཱ་ཡ་ན་ཡི། གདམས་ངག་ལས་ ནི་ ཡོད་པ་ དང་། མེད་པ་ གཉིས་ཀ་ དགག་པར་ གསུངས།། — La version de notre commentaire གཉིས་ཀའང་ དགག་པར་ མཛད།།. — Ce sūtra est cité ci-dessus p. 43. 1.

2) Comparer Saṁ. N. II, p. 17 (XII. 15) *Kaccāyanagotto: sammādiṭṭhi sammādiṭṭhīti bhante vuccati. kittāvatā nu kho bhante sammādiṭṭhi hotīti. — dvayanissito khv ayaṃ Kaccāyana loko yebhuyyena atthitañ ceva natthitañ ca.*

3) Sic Mss.

4) Ms. *pañca°*. — Voir ci-dessous, XVII. 1. Six ou cinq *gatis*, voir Chavannes, Inscr. de Bodh-Gayā, p. 13, qui cite Lotus (pp. 81, 377) etc. — Kathāv. VIII. 1, six, d'après les Andhakas et Uttarāpathakas.

5) སྡེ་པ་ ཐམས་ཅད་ = dans toutes les écoles. — Minayeff nous a fait connaître une formule plus intéressante: *sarvanikāyāntareṣv iti Tāmraparṇīyanikāyādiṣu* (d'après l'Abhidh. k., Recherches, p. 227).

Dans le bhāṣya du Madhyamakāvatāra (I. 6) le Kātyāyanas. est allégué en vue de prouver que la connaissance de la *çūnyatā* est commune aux Çrāvakas et aux Bodhisattvas.

6) Mss. *asmad°*.

प्राज्ञः स्वभावपरभावभावाभावदर्शनं तथागतवचनादत्यन्तविरुद्धमास्थातुं भग[80b]वता प्रतिषिद्धत्वात् ॥

किंविशिष्टेन भगवता । भावाभावविभाविना । भावाभावौ विभावयितुं शीलमस्येति भावाभावविभावी । यथावस्थितभावाभावाविपरीतस्वभावपरिज्ञानाद्भावाभावविभावीति भगवानेवोच्यते । तेन भगवता भावाभावविभाविना यस्मादस्तित्वं च नास्तित्वं चोभयमेतत्प्रतिषिद्धं [Tib. 104b] तस्मान्न युक्तं भावाभावदर्शनं तत्त्वमित्यास्थातुं ॥

तथा[1] । अस्तीति काश्यप अयमेकोऽन्तो नास्तीति काश्यप अयमेकोऽन्तः । यदेनयोर्द्वयोरन्तयोर्मध्यं तदरूप्यमनिदर्शनमप्रतिष्ठमनाभासमनिकेतमविज्ञप्तिकमियमुच्यते काश्यप मध्यमा प्रतिपद्धर्माणां भूतप्रत्यवेक्षेति ॥

तथा[2] ।

अस्तीति नास्तीति उभेऽपि अन्ता
शुद्धी अशुद्धीति इमेऽपि अन्ता ।
तस्मादुभे अन्त विवर्जयित्वा
मध्येऽपि स्थानं न करोति पण्डितः ॥

अस्तीति नास्तीति विवाद एषः
शुद्धी अशुद्धीति अयं विवादः ।
विवादप्राप्त्या न दुखं प्रशाम्यति
अविवादप्राप्त्या च दुखं निरुध्यते ॥ इति ॥

अत्राह । यदि पुनरेवमग्न्यादीनां स्वभावत एवास्तित्वं स्यात्को दोषः स्यात् ॥

उक्तदोषः ।

---

1) Citation du Ratnakūṭa, voir ci-dessous fol. 106b. — Comparer Saṃ. N. II, p. 17 = *sabbam atthīti kho Kaccāyana ayam eko anto . sabbaṃ natthīti ayaṃ dutiyo anto . etc te Kaccāyana ubho ante anupagamma majjhena Tathāgato dhammam deseti.*

2) Samādhirāja; voir ci-dessus 135. 10 — 136. 2.

हेतुप्रत्ययसंभूतः स्वभावः कृतको भवेत् ।[1]

इत्यादिना ॥ अपि च यद्ययमेषामग्न्यादीनां स्वभावः स्यात्तस्य विद्यमानस्य सतो न स्यात्पुनरन्यथात्वमिति प्रतिपादयन्नाह ।

यद्यस्तित्वं प्रकृत्या स्यान्न भवेदस्य नास्तिता ।

यद्यग्न्यादेर्भावस्य प्रकृत्या स्वभावतोऽस्तित्वं । तदास्य स्वभावस्य प्रकृत्या विद्यमानस्य पुनरन्यथात्वं न स्यात् । यस्मात् ।

प्रकृतेरन्यथाभावो न हि जातूपपद्यते ।[2] ८

यद्येषामग्न्या[81 a]दीनामियमेव प्रकृतिः स्यात् । [Tib. 105a] स्वभावः स्यात् । तदा प्रकृतेरविकारिणीत्वान्न[3] कदा चित्पुनरन्यथाभाव उपपद्येत । न ह्याकाशस्यानावरणत्वं[4] कदा चिदप्यन्यथात्वं प्रतिपद्यते । एवमग्न्यादीनामपि प्रकृत्या विद्यमानानां पुनरन्यथात्वं न स्यात् । उपलभन्ते च भवानेषामन्यथात्वप्रबन्धोपरमलक्षणं[5][6] विनाशं । तस्माद्विपरिणामधर्मित्वादपामौष्ण्यवन्नायमेषां स्वभाव इति प्रतीयतां ॥

अत्राह । यदि प्रकृत्या विद्यमानस्यान्यथात्वासंभवादन्यथात्वस्य चोपलभ्यमानत्वात्प्रकृतिरेषां भावानां नास्तीत्युच्यते । ननु चैवमपि ।

प्रकृतौ कस्य चासत्यामन्यथात्वं भविष्यति ।[7]

---

1) = XV. 1 (p. 259. 13).

2) གལ་ཏེ་ རང་བཞིན་གྱིས་ ཡོད་ ན། དེ་ ནི་ མེད་ཉིད་ མི་ འགྱུར་རོ། རང་བཞིན་ གཞན་དུ་ འགྱུར་བ་ ནི། ནམ་ཡང་ འཐད་པར་ མི་ འགྱུར་རོ॥

3) La forme est intéressante. L'auteur prend *avikāriṇī* comme substantif. *Prakṛti* est une femme exempte de *vikāra*; une telle personne peut se nommer correctement une *avikāriṇī*. (J. S. Speyer).

4) Voir ci-dessus 129, n. 3.

5) Mss. °*bhyate bhāvo na ṣām.*

6) M. Vyut. § 104, 90 *anyathātva*, 91 *prabandhoparama.*

7) Mss. *kasya vāsatyām.*

कस्येदानीं प्रकृत्या स्वरूपेणाविद्यमानस्य खपुष्पस्येवान्यथात्वं भविष्यति। तस्मा[1]-दविद्यमानप्रकृतिकस्यान्यथात्वानुपलम्भादन्यथात्वस्य च दर्शनादस्त्येव स्वभाव इति ॥ उच्यते। यदि तावकेन मतेन प्रकृत्या [स्व]भावेन[ा]संविद्यमानस्यान्यथा[त्वा]भावादन्यथात्वस्य च दर्शनात्प्रकृतिरित्युच्यते ' एवमपि '

प्रकृतौ कस्य च सत्यामन्यथात्वं भविष्यति[2]। ९

कस्येदानीं प्रकृत्या स्वभावेन विद्यमानस्य वर्तमानस्यैवान्यथात्वं भविष्यति। तस्मात्प्रकृत्या विद्यमानस्यान्यथात्वं नास्तीति सर्वथान्यथात्वासंभव एव। ततश्च नास्ति [Tib. 105 b] प्रकृतिर्भावानामिति विज्ञेयं ॥

यच्चाप्युक्तमन्यथात्वस्य दर्शनान्नास्ति प्रकृतिरिति[3] ' तदपि परप्रसिद्धा[4]न्य[था]त्वदर्शनमधिकृत्योक्तं ' न त्वस्माभिः कदा चिदपि कस्य चिदन्यथात्वमभ्युपेतं ॥ तदेवमत्यन्ततः प्रकृतावसंविद्यमानायां सर्वधर्मेष्वसंविद्यमा[81 b]नेष्वस्वभावेषु तदन्यथात्वे चासंविद्यमाने यो ह्रीदानीमस्तित्वं नास्तित्वं च भावानां परिकल्पयति ' तस्यैवं परिकल्पयतो नियतमेव '

अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनं[5]।

---

1) Mss. *tasmāt vi°*.

2) རང་བཞིན་ ཡོད་པ་ མ་ཡིན་ན། གཞན་དུ་འགྱུར་བ་ གང་གི་ ཡིན། རང་བཞིན་ ཡོད་པ་ ཡིན་ན་ ཡང་། གཞན་དུ་འགྱུར་བ་ ཇི་ལྟར་ རུང་༎ = *prakṛtau kathaṃ ca satyām.....*

3) Voir ci-dessus 270. 10.

4) Mss. *paraprasiddhyā*.

5) *çāçvatadṛṣṭi* = *bhāva°*; *uccheda°* = *vibhava°*, Mhv. III. 448. 8. — Les textes abondent sur ce thème; citons seulement, pour le *sassata*, Majjh. I 326, pour l'*uccheda*, Dīgha, I. 55. — Le Mhv. croit, comme les Nikāyas, que la théorie du *pratītyasamutpāda* (*sahetudṛṣṭi*) suffit à éviter les deux *antas* (ci-dessus 1, n. 4). Notre auteur va affirmer, et démontrer, qu'elle est insuffisante.

प्रसज्यत इति वाक्यशेषः । तच्चैतच्छाश्वतोच्छेददर्शनं स्वर्गापवर्गमार्गान्तरायकरत्वा-
द्यस्मान्महानर्थकरं ।

तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः[1] ॥ १०

कस्मात्पुनर्भावाभावदर्शने सति शाश्वतोच्छेददर्शनप्रसङ्गो भवतीति । यस्मात् ।

अस्ति यद्धि स्वभावेन न तन्नास्तीति शाश्वतं ।
नास्तीदानीमभूत्पूर्वमित्युच्छेदः प्रसज्यते[2] ॥ ११

यत्स्वभावेनास्तीत्युच्यते[3] स्वभावस्यानपायित्वान्न तत्कदाचिदपि नास्तीति । एवं भावस्यास्तित्वाभ्युपगमे सति शाश्वतदर्शनमापद्यते । पूर्वं च वर्तमानावस्थायां भावस्वरूपमभ्युपेत्येदानीं तद्विनष्टत्वान्नास्तीति पश्चादभ्युपगच्छत उच्छेददर्शनं प्रसज्यते ॥ यस्य तु भावस्वभाव एव नोपपद्यते न तस्य शाश्वतोच्छेददर्शनप्रसङ्गो भाव[Tib. 106a]स्वभावानुपलम्भात् ॥

ननु[4] च भावानां स्वभावो नास्तीत्यभ्युपगच्छतो मा भूद्भावदर्शनाभावाच्छाश्वतदर्शनमुच्छेददर्शनं तु नियतं प्रसज्यत इति ॥ नैवमभावदर्शनं भवति । यो हि पूर्वं भावस्वभावमभ्युपेत्य पश्चात्तन्निवृत्तिमालम्बते तस्य पूर्वोपलब्धस्वभावापवादात्स्यादभावदर्शनं । यस्तु

---

1) ཡོད་ ཅེས་བྱ་བ་ རྟག་པར་ འཛིན། མེད་ ཅེས་བྱ་བ་ ཆད་པར་ ལྟ། དེ་ཕྱིར་ ཡོད་ དང་ མེད་པ་ལ། མཁས་པས་ གནས་པར་ མི་ བྱའོ།། Mss. *asti yad va yad hi.* Cité Pañcakramaṭ, p. 40, l. 45, avec de mauvaises lectures: *asti yac ca.*

2) གང་ཞིག་ རང་བཞིན་གྱིས་ ཡོད་པ། དེ་ ནི་ མེད་པ་ མིན་པས་ རྟག། སྔོན་ བྱུང་ ད་ལྟར་ མེད་ ཅེས་པ། དེས་ན་ ཆད་པར་ ཐལ་བར་འགྱུར།། — Notre commentaire porte བརྟག་ au lieu de རྟག་.

3) Mss. *yat svabhāvena nāsti.* — L'auteur démontre que toutes les *dṛṣṭis* ont pour racine la *satkāyadṛṣṭi.*

4) Objection que nous rencontrons souvent: les Mādhyamikas ne sont-ils pas des nāstikas?

तैमिरिकोपलब्धकेशेष्विव वितैमिरिको न किं चिदुपलभते[1] स नास्तीति ब्रूवन् किं चिन्नास्तीति ब्रूयात्प्रतिषेध्याभावात्[1)]। विपर्यस्तानां तु मिथ्याभिनिवेशनिवृत्त्यर्थमतैमिरिका इव वयं ब्रूमो न सन्ति सर्वभावा इति । न चैवं ब्रुवताम[82a]स्माकं परक्लितव्यापारपरायणानामुच्छेददर्शनप्रसङ्गः ॥

यथोक्तं सूत्रे[(2)] ' यो हि भगवन् पूर्वं रागद्वेषमोहभावाभ्युपगमं कृत्वा पश्चान्न सन्ति रागद्वेषमोहभावा इति ब्रवीति ' स भगवन् वै नास्तिको भवतीति विस्तरः ॥

यस्तु[(3)] परतन्त्रचित्तचैत्तवस्तुमात्रमभ्युपेत्य तस्य[(4)] परिकल्पितस्वभावाभावादस्तित्व-

---

1) Sic Mss. — Tib. དེས་ མེད་དོ་ ཤེས་ ཅི་ཞིག་ སྨྲས་པས། མེད་པར་ སྨྲས་པར་འགྱུར་ཏེ། དགག་བྱ་ མེད་པའི་ཕྱིར་རོ། — ce qui n'est guère plus satisfaisant. On obtient, en déplaçant l'interrogatif ཅི་ཞིག་, un sens très net: *sa nāstīti bruvan kiṃ nāstīti brūyāt.* — On peut corriger *sa nāstīti bruvan* na *kiṃ cin nāstīti brūyāt.*

2) Je ne réussis pas à identifier ce sūtra.

3) Doctrine du Yogācāra (= Vijñānavādin). — «Celui qui, admettant la réalité nue [le fait d'être quelque chose, *vastumātra*] de la pensée et de ses dérivés (*cittacaitta*) qui sont le *paratantra*, prétend éviter l'hérésie de l'existence (*astitvàdarçana*) en niant leur *svabhāva* qui est *parikalpita*, et l'hérésie de la non-existence (*nāstitvadarçana*) en admettant l'existence de la réalité nue de ce *paratantra*, propre à être souillé et purifié (*saṃkleça, vyavadāna*), celui-là n'évite pas en effet ces deux hérésies puisqu'il nie le *parikalpita* et affirme le *paratantra*; sa théorie ne vaut rien, en outre, puisque nous avons établi que [le *paratantra*, c'est à-dire] ce qui est produit par des causes (*hetupratyayajanita*), n'existe pas en soi C'est donc le seul Madhyamaka qui échappe aux deux vues hérétiques de l'existence et de la non-existence».

Sur le *paratantra*° (གཞན་གྱི་དབང་), le *parikalpita*° (ཀུན་ཏུ་བརྟགས་པ་) et le *pariniṣpanna lakṣaṇa* (ཡོངས་གྲུབ་ — M. Vyut. § 87), voir notamment Wassilieff, Bouddhisme, pp. 292 et suiv. et Dogmatique bouddhique II (J. As. 1903, II, 380 et suiv.).

4) Mss. *tasya*. — དེ་ལ་. — C'est-à-dire le *paratantra*.

दर्शनं परिहरति । संक्लेशव्यवदाननिबन्धनस्य च[1] परतन्त्रवस्तुमात्रसद्भावान्नास्तित्वदर्शनं परिहरति । तस्य परिकल्पितस्याविद्यमानत्वात्परतन्त्रस्य च विद्यमानत्वाद[Tib. 106b]स्तित्वनास्तित्वदर्शनद्वयस्याप्युपनिपातात्कुतोऽन्तद्वयपरिहारः । हेतुप्रत्ययजनितस्य च[2]स्वभावेनायुक्तत्वप्रतिपादनादयुक्तमेवास्य व्याख्यानं । तदेवं मध्यमकदर्शन एवास्तित्वनास्तित्वद्वयदर्शनस्याप्रसङ्गो न विज्ञानवादिदर्शनादिष्विति विज्ञेयं ॥

अत एवोक्तमार्यरत्नावल्यां ।[3]

[4]ससांख्यौलूक्य[5]निर्ग्रन्थ[6]पुद्गलस्कन्धवादिनं ।
पृच्छ लोकं यदि वदत्यस्तिनास्तिव्यतिक्रमं ॥

धर्मयौतक[7]मित्यस्मादस्तिनास्तिव्यतिक्रमं ।
विद्धि गम्भीरमित्युक्तं बुद्धानां शासनामृतं ॥ इति ॥

---

1) *saṁkleçavyavadānanibandhanasya ca paratantravastumātrasadbhāvāt* = གཞན་གྱི་དབང་གིས་ (sic) དངོས་པོ་ ཀུན་ནས་ཉོན་མོངས་པ་ དང་ རྣམ་པར་བྱང་བའི་ རྒྱུར་ གྱུར་པ་ ཙམ་ཞིག་ ཡོད་པས་ = *paratantrasya vastunaḥ saṁkleçavyavadānahetubhūtamātrasya sadbhāvāt* (?).

2) Mss. *svasva*°, *sva*°. རང་བཞིན་དང་བཅས་པ་ཉིད་དུ.

3) Voir p. 135. 6, une citation du même texte.

4) D'après le tibétain: *sasāṁkhyaulukyanirgrantham p*°.

གང་ཟག་ ཕུང་པོར་ སྨྲ་བ་ཡི། འཇིག་རྟེན་ གྲངས་ཅན་ འུག་ཕྲུག་ དང་། གོས་མེད་བཅས་ལ་ གལ་ཏེ་ ཞིག། ཡོད་མེད་འདས་པ་ སྨྲན་ དྲིས།། དེ་ཕྱིར་ སངས་རྒྱས་རྣམས་ཀྱི་ ནི། བསྟན་པ་ འཆི་མེད་ ཡོད་མེད་ལས། འདས་པ་ ཟབ་མོ་ ཞེས་བཤད་པ། ཆོས་ཀྱི་ ཁྱུད་པ་ ཡིན་ ཞེས་ བགྱིས།།

5) འུག་ཕྲུག་ manque dans les lexiques; འུག་ = owl, ཕྲུག = a young one of animals.

6) Paris *nirgranṭha*.

7) Qui appartient en propre au Dharma. — ཁྱུད་པ་ = qui embrasse, qui comprend le Dharma.

तथाविधविनेयजनबोधानुरोधात्तु परमार्थदर्शनस्योपायभूतत्वान्नेयार्थत्वेन भगवता महाकरुणापरतन्त्रतया विज्ञानादिवादो[1] देशितः सांमितीयपुद्गलवादवत्[2]। न नीतार्थ इति विज्ञेयं ॥

यथोक्तमार्यसमाधिराजभट्टारके[3]।

नीतार्थसूत्रान्तविशेष जानति
यथोपदिष्टा सुगतेन शून्यता ।
यस्मिन् पुनः पुद्गल सत्व पूरुषो
नेयार्थतो जानति सर्वधर्मान् ॥

एतच्चार्याक्षयमतिनिर्देशादिषु विस्तरेण बोद्धव्यमिति[4] ॥ भावाभावदर्शनद्वयप्रसङ्गो यावतात्र संसार इत्यवेत्य [Tib. 107a] मुमुक्षुभिरेतद्दर्शनद्वयनिरासेन सद्भिर्मध्यमा प्रतिपद्भावनीया यथावदिति [82b] ॥

एतच्चोक्तं भगवता ।

(5 भाव अभाव विभावयि ज्ञानं
सर्वि अचिन्तयि सर्वि अभूतं ।
ये पुन चित्तवशानुग बालाः
ते दुःखिता भवकोटिशतेषु 5) ॥

---

1) D'après le tibétain *vijñānavādo.* — Le parallélisme recommande cette lecture.

2) Voir ci-dessus 148, n. 1, 192, n. 3 Vasumitra, Bhavya (Wassilieff et Rockhill) s'accordent avec le Kathāv. pour attribuer aux Sāṃmitīyas la croyance au *pudgala.*

3) Voir ci-dessus p. 44, 2—5.

4) Voir en effet ci-dessus p. 43. 4.

5—5) Samādhirāja, probablement. — Cité ci-dessous, Chap. XXI ad finem, avec variantes; mais la version tibétaine est la même: ཐམས་ཅད་ བསམ་

(1) भावानभावानिति यः प्रजानती
स सर्वभावेषु न जातु सज्जते ।
यः सर्वभावेषु न जातु सज्जते ।
स आनिमित्तं स्पृशते समाधिं ॥ इति ॥

(2) तथा ।

स्मराम्यहं पूर्वमतीत अध्वनि(3)
अचिन्तिये कल्पि नराणामुत्तमः ।
उत्पन्नु लोकार्थकरो(4) महर्षी
नामेन(5) सोऽभावसमुद्गतोऽभूत् ॥

स जातमात्रो गगने स्थिहित्वा
सर्वाण धर्माणमभाव देशयि(6) ।
तदानुरूपं कृत नामधेयं
शब्देन सर्वत्रिसहस्र विज्ञपी(7) ॥

ཡས་ ཐམས་ཅད་འབྱུང་མེད་པས། དངོས་ དང་ དངོས་མེད་ ཤེས་པ་ རྣམ་པར་ཤིག།
= *sarvācintyatvāt sarvābhūtatvād bhāvābhāvajñānaṃ vināçaya.* — Voir ci-dessus p. 269 n. 1 la traduction de *vibhāvin.*

1—1) = 133. 9—12 et 265. 11. — Manque dans le tibétain.

2) = Samādhirāja, p. 26.

3) Mss. *atītam adhvanī.*

4) གཟིངས་ཀྱི་ དོན་ = *kolārt'a*, mauvaise lecture du traducteur tibétain? — Amar. Koça, *uḍupas tu plavaḥ kolaḥ...*

5) L'éditeur de la B. T. S. corrige *nāmnā hy asau.*

6) B. T. S. *abhāvagāyī.* — སྟོན་པ་.

7) གྲགས་པར་བྱས་ = *kīrtita.*

देवा पि सर्वे प्रमुमोचु शब्दं
अभावनामेति जिनो भविष्यति ।
यो जातमात्रः पदसप्त प्रक्रम-
स्वभाव धर्माण समं प्रकाशयी [1] ॥

[2] बुद्धो [य]दा भेष्यति धर्मराजः
सर्वाण धर्माण पकाशको मुनिः ।
तृणगुल्मवृक्षौषधिशैलपर्वते
अभाव धर्माण रवो भविष्यति ॥

यावन्ति शब्दास्तहि लोकधातौ
सर्वे स्वभावा न हि कश्चि भावः ।
तावन्ति घो तस्य तथागतस्य [3]
रवु निश्चरी लोकविनायकस्य ॥ इति ॥

[4] भवतीति भावः सत्ता । न विद्यते सत्ता स्वभावः सर्वभावानामित्यभावाः सर्वधर्माः शून्याः सर्वधर्मा निःस्वभावयोगेनेति प्रज्ञापारमितापाठात् [4] । भावस्वभावस्यानुपपत्तेः ॥

[5] अभाव धर्माण रवो भविष्यति ॥

इत्यादिना सूत्रार्थो ऽवगन्तव्यः ।

---

1) B. T. S. *dharmāṇa bravīti nāyakaḥ.* — རྒྱལ་བས་ ཆོས་རྣམས་ དངོས་པོ་ མེད་པར་ བཤད། = ... *dharmāṇa pakāçayī jino.*

2) Voir ci-dessous fol. 110a.

3) Manque dans le tibétain.

4—4) Manque dans le tibétain.

5) Je restitue les quatre derniéres lignes d'après le tibétain.
ཆོས་རྣམས་ དངོས་པོ་ མེད་ ཅེས་ སྒྲ་ ཡང་འབྱུང་། ཞེས་བྱ་བ་ལ་སོགས་པས་

यावन्ति शब्दास्तहि लोकधातौ
सर्वे ह्यभावा न हि कश्चि भावः।

इत्यादि 'भूत्वा अभावप्रतिषेधविवक्षितत्वात्' भावाभावार्थ एव स्वभावाभावार्थः।]

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां [Tib. 107b] प्रसन्नपदायां मध्यमकवृत्तौ स्वभावपरीक्षा नाम पञ्चदशमं प्रकरणं॥

མདོའི་ དོན་ ཁོང་དུ་ཆུད་པར་བྱ་སྟེ། འཇིག་རྟེན་དེ་ན་ ཇི་སྙེད་ སྒྲ་ ཡོད་པ། །ཐམས་ཅད་ དངོས་མེད་ ཅི་ཡང་ མེད་པ་སྟེ། ཞེས་བྱ་བ་ལ་སོགས་པ་ འབྱུང་བས་ ན། མེད་པར་ དགག་པ་ བརྗོད་པར་འདོད་པའི་ཕྱིར་ དངོས་པོ་མེད་པའི་ དོན་ ནི། རང་བཞིན་མེད་པའི་ དོན་ ཡིན་ནོ། །སློབ་དཔོན་····

XVI.

बन्धनमोक्षपरीक्षा नाम षोडशमं प्रकरणं

अत्राह । विद्यत एव भावानां स्वभावः संसारसद्भावात् । इह संसरणं संसृ[83a]तिगतेर्गत्यन्तरगमनं संसार इत्युच्यते । यदि भावानां स्वभावो न स्यात्कस्य गतेर्गत्यन्तरगमनं संसारः स्यात् । न ह्यविद्यमानानां वन्ध्यासूनुसंस्काराणां संसरणं दृष्टं । तस्मात्संसारसद्भावाद्विद्यत एव भावानां स्वभाव इति ॥ उच्यते । स्याद्भावानां स्वभावो यदि संसार एव भवेत् । न त्वस्ति । इह यदि संसारः स्यात्स नियतं संस्काराणां[1] वा भवेत्सत्त्वस्य वा । किं चात उभयथा च दोष इत्याह ।

संस्काराः संसरन्ति चेन्न नित्याः संसरन्ति ते ।
संसरन्ति च नानित्याः सत्त्वेऽप्येष समः क्रमः[3] ॥ १

तत्र यदि संस्काराः संसरन्तीति परिकल्प्यते । किं ते नित्याः संसरन्त्युतानित्याः । तत्र न नित्याः संसरन्ति निष्क्रियत्वा[4]दनित्यानां च घटादीनां सक्रियत्वोपलम्भात् ।

---

1) *saṃskāras* = les cinq *skandhas*, comme l'explique Buddhaghoṣa; cp. Childers, 454a 3. — Childers, 453 b 5, corrige l'interprétation que Burnouf a donnée (Intr. p. 505) du problème *Buddho ti ko satto vā saṅkhāro vā* .. «The word *satta* applies to the living and moving being as a person or individual only [*pudgala*], the separate elements of which the being is composed belonging to the *saṅkhāraloka*».

2) Mss. *kiṃ vāta*; non représenté dans le tibétain.

3) གལ་ཏེ་ འདུ་བྱེད་ འཁོར་ ཞེ་ན། དེ་དག་ རྟག་ ན་ མི་ འཁོར་ཏེ། མི་རྟག་ ན་ ཡང་ འཁོར་མི་འགྱུར། སེམས་ཅན་ལ་ ཡང་ རིམ་འདི་ མཚུངས།།

4) «Parce que le *nitya* est inactif». Allusion à l'argumentation reproduite dans le Sarvadarçanas. (Muséon, N. S. II), trad. fr. notes 19 et suiv. — Rien n'existe que ce qui est capable d'action (*arthakriyāsamartha*, Nyāyab. et Wass. 272) et le *nitya* est *niṣkriya*, donc inexistant.

अथानित्याः। ये ह्यनित्यास्त उत्पादसमनन्तरमेव विनष्टाः[1]। ये च विनष्टाः कुतस्तेषामविद्यमानत्वाद्वन्ध्यासूनुसंस्काराणामिव क्वचिद्गमनमित्येवमनित्यानामपि नास्ति संसारः।

अथापि स्यादनित्या एव सन्तो हेतुफलसंबन्धपरम्पराविच्छिन्नक्रमाः संतानेन[2] च

---

1) «L'*anitya* disparaît immédiatement après sa naissance», en d'autres termes, *anitya* = *kṣaṇika*. Il y a de bonnes raisons pour croire que certains sūtras (et le Bouddha lui-même?) entendaient tout autrement l'*anityatva*: Est *anitya* ce qui n'est pas éternel (*çāçvata*, *dhruva*, *aviparināmadharman*), ce qui est destiné à périr; est *kṣaṇika* ce qui dure le temps d'une pensée (*ekacittakkhaṇika*), ce qui est momentané (Abhidh. k. v. Soc. As. 225b 1: *kṣaṇikaḥ kṣaṇe bhavaḥ kṣaṇo 'syāstīti vā*) et n'a pas de durée. — Bhagavat enseigne que le *saṃskṛta* a trois caractères, naissance, durée (*sthiti*), destruction (voir ci-dessus p. 145, n. 1); et ceci rappelle fort la doctrine Jaina. — L'orthodoxie du Kathāvatthu, contre les Pubbaseliyāparaseliyas, distingue des degrés dans l'*aniccatā*, XXII. 8. *eko lahu bhijjati eko cirenā ti.* Il est faux que tous les *saṃkhatadhammā* soient *ekacittakkhaṇikā*, car, s'il en était ainsi, l'objet de la connaissance visuelle et la connaissance visuelle naîtraient et mourraient ensemble (voir aussi XI. 6). [a] — Wassilieff (p. 277—8) nous apprend que la même question divisait les Vaibhāṣikas et les Sautrāntikas: «Les Vaibhāṣikas divisent les choses (Substanzen) en éternelles et non-éternelles, et bien qu'ils rangent sous cette seconde catégorie tous les composés, ils ne les appellent pas instantanés, «augenblickliche» (mais seulement non-éternels, «nicht-ewige»). Les Sautrāntikas disent aussi: Toute chose, en tant que composée par la réunion de causes, est instantanéité: car elle existe seulement au moment de la naissance (c'est-à-dire que l'existence d'une chose est seulement une série de moments de naissance). On ne peut pas distinguer en elle le caractère (ངོ་བོ) de la naissance de celui de la destruction ..». — Le Kathāvatthu appartient à l'école des Vibhajyavādins, et il semble que ce nom caractérise une secte qui «distingue». Un exemple est fourni par Kathāv. XIX. 2. Bhagavat a dit que tous les *saṃskṛtas* sont vides: il veut dire «vides de personnalité», et non pas «vides de caractères» (voir ci-dessus). — Cp. le *vibhajyavyākaraṇa* (M. Vyut. § 86. 2).

(a) Je dois avouer que je m'écarte de l'interprétation de M. Rhys Davids, Schools of Buddhist Belief p. 37. — Le texte du commentaire n'est pas sans difficultés: *tattha yasmā sabbe saṃkhatadhammā aniccā tasmā ekacittakkhaṇikā yeva . samānāya hi aniccatāya eka lahu bhijjati eko cirenā 'ti ko ettha niyamo 'ti yesaṃ ladaṃi* ....». — [L'édition: ... *cirenā 'ti . ko*...]. M. R. D. comprend: «Are all qualities only momentary in thought? No ,..». — Je comprends: «La non-éternité étant également [affirmée par Bhagavat], d'où viendrait cette distinction que certaines choses disparaissent vite, d'autres après un temps?». — Le sens de *ekacittakkhaṇika* me paraît établi par XI. 6 où est rappelée la définition du *samādhi*: *ekacittakkhaṇe uppannā ekaggatā.*

2) *saṃtāna*, voir ci-dessus p. 85, n. 8 et ci-dessous 283. 1.

प्रवर्तमानाः संस्काराः [Tib. 108a] संसरन्तीति ॥ एतदपि नोपपद्यते । कुतः । यत्तावदुत्पद्यते कार्यं तस्य संसारो नास्ति कुतश्चिदनागमनात्क्वचिच्चागमनात् । यच्च कारणं नष्टं तस्यापि संसारो नास्ति कुतश्चिदनागमनात्क्वचिच्चागमनात्(1) । संस्कारमात्रव्यतिरेकेणातीतानागतयोरसिद्धत्वात् ' नष्टाज्ञातत्वेनाविद्यमानत्वात्(2) ॥

उत्तरस्मिन् क्षण उत्पन्ने पूर्वः संसरतीति चेत् । यदि पूर्वोत्तरयोः क्षणयोरेकत्वं स्यात्स्यादेतदेवं । न त्वेकत्वमस्ति कार्यकारणभावात् ' चक्षूरूपचक्षुर्विज्ञानानां नास्ति च । किं च ' [83b] एकत्वे सति पूर्वोत्तरक्षणवाच्यतैव न स्यात्(3) ' न ह्येको देवदत्त एकदा पूर्वश्चोत्तरश्चेति व्यपदिश्यते । एवमिहाप्येकत्वात्पूर्वोत्तरक्षणव्यपदेश एव न स्यात् ॥ अपि च पूर्वक्षणो नष्ट इति न स्यादुत्तरक्षणवदव्यतिरिक्तत्वात् । उत्तरक्षण उत्पन्न इति न स्यात्पूर्वक्षणवदव्यतिरिक्तत्वात् ॥ अथान्यत्वे सति संसरणं स्यात् ' एवं सत्यर्हतामपि संसरणं स्यात् । अन्यस्य पृथग्जनस्य संसारोत्पत्तिसद्भावात् । निर्वृतश्च प्रदीपः प्रदीपान्तरे ज्वलति ज्वलतीति स्यात् ।

किं चान्यत् । नष्टाद्वा पूर्वक्षणादुत्तरस्य क्षणस्योदयः स्यादनष्टान्नश्यमानाद्वा । [Tib. 108b] तत्र यदि नष्टादिष्यते वह्निदग्धादपि बीजा[द]ङ्कुरोदयः स्यात्ततश्च निर्हेतुकः स्यात् ॥

अथानष्टादेवमपि ' अविकृतेऽपि बीजेऽङ्कुरोदयः स्यात् । कार्यकारणयोश्च यौगपद्यं स्यान्निर्हेतुकश्चोत्पादः स्यात् ॥ नश्यमानादिति चेत् । नष्टानष्टव्यतिरेकेण नश्यमानाभावान्नष्टानष्टयोश्च विहितदोषत्वान्नश्यमानादपि नास्त्युत्पत्तिरिति ॥ कुतः कार्यकारणव्यवस्था [पूर्वोत्तरक्षणव्यवस्था](4) वा भविष्यति । यदा च पूर्वोत्तरक्षणव्यवस्था कार्यकारणव्य-

---

1) གང་ ཡང་ མི་འགྲོ་བའི་ཕྱིར་རོ།

2) D'après le tibétain: *avidyamānatvāc ca.*

3) Mss. *vācyataikena na.*

4) ···དང་ སྐད་ཅིག་མ་ སྔ་མ་ དང་ ཕྱི་མའི་ རྣམ་པར་བཞག་པ་འདང་ ཡོད་པར་ ག་ལ་ འགྱུར་ = ...*pūrvottarakṣaṇavyavasthā cāpi bhaviṣyati.*

न्यथा[1] नास्ति । तदा संतानोऽपि नास्ति तदभावान्नास्ति भवतां[2] संसार इत्यनित्यानामपि संस्काराणां नास्ति संसार इति ॥

अत्रैके वर्णयन्ति । सत्यं संस्कारा न संसरन्ति । उत्पत्तिविधुरत्वात् । किं तर्हि सत्त्वः संसरतीति ॥ उच्यते । सत्त्वेऽप्येष समः क्रमः । सत्त्वः संसरतीत्युच्यमाने किमसौ नित्यः संसरत्युतानित्य इति विचार्यमाणे य एव संस्काराणां संसरणानुपपत्तिक्रमः स [स]मत्वात्[3] सत्त्वेऽपि समो [84 a] निपतति । तस्मात्सत्त्वोऽपि न संसरति ॥

अत्राह । नैव हि सत्त्वसंस्काराणां संसारानुपपत्तिक्रमः समो भवितुमर्हतीति । यस्मा-दिह संस्काराणां नित्यानित्यभूतानां संसरणं नास्तीत्युक्तं [Tib. 109 a] । न चैवमात्मा नित्यानित्यभूतः । तस्य हि स्कन्धेभ्यस्तत्त्वान्यत्वावक्तव्यतावन्नित्य[त्वेनानित्य]त्वेनाप्य-[4]

---

1) D'après le tibétain [*ca*].

2) Manque dans le tibétain.

3) Mss. °*kramaḥ sa matyātsatye 'pi sato ni*°. — *samatvāt* manque dans le tibétain.

4) D'après le tibétain. — Mss. *tatvānyatvāvāpyetāvan* — La thèse du *sattva* «indescriptible» est la thèse des Pudgalavādins, voir Bodhic. p. IX. 60 ad finem (cité partiellement, ci-dessus p. 64, n. 3) *pudgalavādinas tu punar antaçcaratīrthikāḥ skandhebhyas tattvānyatvābhyām avācyaṃ pudgalanāmānam ātmānam icchanti, anyathā tīrthikasiddhāntābhiniveçadarçanaṃ syāt.* — Comme le remarque le docteur tibétain cité par Wassilieff (p. 270), on ne peut admettre l'existence d'un moi personnel, «das Ich als Persönlichkeit», sans cesser d'être bouddhiste; aussi les hérétiques déguisés que sont les Pudgalavādins, *antaçcaratīrthikas*, *titthiyappakkantakas*, *saugatamanyas*, soutiennent-ils que le *pudgala* n'est ni différent des *skandhas*, ni identique aux *skandhas*. «Da Buddha, indem er sagte, dass der *pudgala* das ist, was die Last trägt [Bhārahārasūtra, Saṃ. N, voir J. As. 1902, II, p. 266-8], nicht bestimmt hat, ob es ewig oder nicht ewig ist, so nennen wir diesen *pudgala* oder das Ich als unausdrückbar, unerklärbar» (གང་ཟག་གམ་ བདག་ཉེ་ བརྗོད་དུ་མེད་པ་). En ce qui regarde les Vātsīputrīyas (Wass. p. 252): «Der *pudgala* ist weder identisch mit den *skandhas*, noch (etwas) von den *skandhas* Getrenntes». — Pour les Saṃkrāntivādins (Wass. p. 258), «Der *pudgala* existirt in der absoluten Idee»; c'est-à-dire, si je ne me trompe, *paramārthataḥ*, réellement.

Voir ci-dessus p. 64. 10 la discussion de l'*avācyatā*.

वक्तव्यता व्यवस्थाप्यते। तस्मादात्मैव संसरतीति न चोक्तदोषप्रसङ्ग इति॥ उच्यते।

पुद्गलः संसरति चेत्स्कन्धायतनधातुषु।
पञ्चधा मृग्यमाणोऽसौ नास्ति कः संसरिष्यति(1)॥ २

यदि पुद्गलो नाम कश्चित्स्यात्स(2) संसरेत्। न त्वस्ति। यस्मात्स्कन्धायतनधातुषु पञ्चधा मृग्यमाणो नास्ति। कथं कृत्वा।

इन्धनं पुनरग्निर्न नाग्निरन्यत्र चेन्धनात्।
नाग्निरिन्धनवान्नाग्नाविन्धनानि न तेषु सः(3)।
अग्नीन्धनाभ्यां व्याख्यात आत्मोपादानयोः क्रमः(4)॥

इत्येवं स्कन्धायतनधातुस्वभाव आत्मा न भवति। नापि तेभ्यो व्यतिरिक्तः। न स्कन्धायतनधातुमान्। न स्कन्धायतनधातुष्वात्मा। नात्मनि स्कन्धायतनधातवः। इत्येवं पञ्चधा मृग्यमाण आत्मा न संभवति पूर्वोदितेन न्यायेन॥ यश्चेदानीं स्कन्धायतनधातुष्वेवं विचार्यमाणः पञ्चधा न संभवति स कथमविद्यमानः सन् संसरिष्यतीति। एवमात्मनोऽपि नास्ति संसारो वन्ध्यासुतस्येवाविद्यमानत्वात्॥ अपि चायमात्मा।

उपादानादुपादानं संसरन् विभवो भवेत्।
विभवश्चानुपादानः कः स किं संसरिष्यति(5)॥ ३ [Tib. 109b]

---

1) གལ་ཏེ་ གང་ཟག་ འཁོར་ ཞེ་ན། ཕུང་པོ་ སྐྱེ་མཆེད་ ཁམས་རྣམས་ལ། དེ་ནི་ རྣམ་པ་ལྔས་ བཙལ་ན། མེད་ན་ གང་ཞིག་ འཁོར་བར་འགྱུར॥

2) དེ་ འཁོར་བར་འགྱུར་ — Mss. *syāt saṃsaret.*

3) = X. 14.

4) = X. 15 (212. 16).

5) ཉེ་བར་ལེན་ པས་ ཉེར་ལེན་པར། འཁོར་ན་ སྲིད་པ་མེད་པར་འགྱུར། སྲིད་མེད་ ཉེ་བར་ལེན་མེད་ ན། དེ་ གང་ ཅི་ཞིག་ འཁོར་བར་འགྱུར॥

भवतु काममात्मनः [84b] संसारो यद्यनुपादानस्य सतोऽस्य संसारो युक्तः स्यात्। कथं पुनरस्यानुपादानता[1] प्रसज्यत इति प्रतिपादयन्नाह।

उपादानादुपादानं संसरन् विभ[वो भ]वेत्।

इति॥ इह हि मनुष्योपादानाद्देवोपादानं गच्छन् परित्य[ज्य] वा मनुष्योपादानं देवोपादानं गच्छेदपरित्यज्य वा। यदि तावत्परित्यज्य गच्छतीत्युच्यते ' तदा पूर्वोपादानस्य परित्यागादुत्तरस्य चानुपादानात्तदन्तराले विभवः स्यात्। विगतो भवो यस्येति विभवः[2]। [भवः] पञ्चोपादानस्कन्धाः[3] ' तद्रहितः स्यात्। यश्च विभवोऽनुपादानः [स][4] स्कन्धरहितत्वा-

---

1) ཇི་ལྟར་ དེ་ལ་ ཉེ་བར་ལེན་པ་ཉིད་དུ་ ཐལ་བར་ = *kathaṃ punar asyopādānatā* ... = «et comment il lui est indispensable de posséder un ou des *upādānas*, l'auteur l'explique....».

2) *vibhava*, comme adjectif, est nouveau. — Pour le sens *Vernichtung*, *Untergang* ou mieux *néant*, que le Dict. de St.-Pétersbourg marque de l'astérisque, les sources sont nombreuses. — Voir ci-dessous XXV. 10.

3) On a beaucoup écrit sur l'expression *upādānaskandha*. — Voir Childers p. 525: «*skandhas* springing from *u*°». — D'après le Visuddhim. (Warren p. 155) un *skandha*, extérieur ou intérieur, est *upādānask*° quand il est «coupled with depravity [*klesa*] and attachment [*upādāna*]». — D'après Pitāputras. (Çiks. 248. 3. 6) *ādhyātmikas tejodhātuḥ = yad ... asmin kāye tejas ... upagatam upāttam*; *bāhyaḥ = yad....anupagatam anupāttam*. La version chinoise (Muséon, 1904, p. 213) traduit par *sensible, insensible*. — *upātta = upādinna*, p. ex. *upādinnarūpa kammaja* (Abhidh. s. VI. 4, J. P. T. S. 1884 et Morris, 1887, p 135); M. Vyut. 101.10 *upādāyarūpa* (cp. *upādā*°, Walleser, Phil. Grundlage, p. 107), 101.11 *bhautikarūpa*. — *upāttapañcaskandhamātra* (Bodhic. p. VIII. 97. 101); *upāttamahābhūtahetuka*, M. Vyut. 101.56.

4) དེ་ནི་ ཕུང་པོ་དང་བྲལ་བས་ བཏགས་པའི་[a] ཉེ་བར་ལེན་པའི་ རྒྱུ་དང་བྲལ་བའི་ཕྱིར་ རྒྱུ་མེད་པར་ འགྱུར་ལ། — Nous avons rencontré ci-dessus (X. 16, p. 215.1) l'expression *upādāyaprajñaptyabhidhāna pratītyasamutpāda*. — Comparer l'*upādāyapaññatti-anuyogo* (Kathāv. a., p. 25): De même que de l'ombre en raison de l'arbre, de même que du feu en raison du combustible, de même *rūpādīni upādāya puggalassu paññattiṃ paññāpanaṃ avabodhanaṃ icchati* [*puggalavādī*]. — A la lumière de ce texte, je comprends notre auteur: «La chose qui n'a pas d'upādāna est privée des causes (à savoir les *skandhas* = upādānas) de *prajñapti* [laquelle ne peut exister qu'en raison des upādānas]. — Le tibétain ne recommande pas cette traduction, je l'avoue.

a) ou གདགས་

त्प्रसजत्युपादानकारणरहितत्वान्निर्हेतुकः स्यात् ॥ यश्चानुपादानो निरञ्जनोऽव्यक्तो निर्हेतुकः कः स न कश्चित्सः । नास्त्येव स इत्यर्थः । तस्मिंश्चासति [तद]भावादेवोपादानमपि निरुपादानकं नास्तीति किं संसरिष्यति ' नास्त्येव तद्यत्संसरिष्यतीत्यर्थः ॥ अथ वा किमित्येतत्संसरणक्रियाविशेषणं ततश्चाविद्यमानत्वान्नैव संसरणक्रियां करिष्यति । एवं तावत्पूर्वोपादानपरित्यागेन संसरणमयुक्तं ॥

अथापरित्यागेन । तथापि नोपपद्यते । किं कारणं । पूर्वस्या[परि]त्यागादुत्तरस्य च ग्रहणाद्यस्मादेकस्यात्मनो द्व्यात्मकता स्यात् ' न चैतदिष्यत इति [Tib. 110a] । तस्मादपरित्यागेनापि संसरणं नास्ति ॥

अथ पूर्वोत्तरयोर्भवयोर्मध्य आन्तराभविक(1)स्कन्धसंभवात्तैश्च(2) सोपादानत्वात्सोपादानं(3)

---

1) Mss. *antarābhavika* — སྲིད་པ་བར་དོའི་ ཕུང་པོ་ ཡོད་པས་ དེ་དག་གིས་ དེ་ཉེ་བར་ལེན་པ་དང་བཅས་པའི་ཕྱིར་ ཉེ་བར་ལེན་པར་ འཁོར་ ཡང་ སྲིད་པ་ མེད་པར་ ཐལ་བར་ མི་འགྱུར་རོ་ ཞེ་ན།. — Abhidh. k., 307b 7 *yatra kilāntarābhaviko vipākaḥ. antarābhave bhavaḥ. evam aupapattibhaviko 'pi...*

Sur l'état intermédiaire བར་དོ ou བར་མ་དོ, voir Jäschke p. 367 et Chandra Dâs, p. 867: ce terme désigne essentiellement «the intermediate state between death and rebirth», état plus ou moins long, mais qui ne dépasse pas 40 jours (Jäschke), ordinairement de 48 jours (Ch. D.).

Le Bar-do-thos-grol-chen-po, «Direction for the departed soul to find the way to eternal happiness» (J.) enseigne comment on passe directement de cet état dans le *nirvāṇa*, et aussi comment on l'évite absolument (*bar-do gcod-pa*); il énumère (Ch. D.) diverses catégories de *bar-do* dont l'*antarābhava* est la sixième. — Ch. D. donne d'autres listes, intéressantes (où il faut lire *skye-gnas* et non *skyed-gnas*).

Voir J. R. A. S. 1897, p. 466, note et J. As., 1902, II, p. 299, où est donnée la bibliographie pâlie et sanscrite. Les documents principaux sont fournis par le Kathāv., par Wassilieff, par Rockhill (Vasumitra, Bhavya, que j'espère publier prochainement) et par l'Abhidh. k. v.

2) Mss. *°saṃbhavāt taiva ca sopādānatvād upādānaṃ s°.* — Peut-être: *°saṃbhavāt taiç ca tatso°.*

3) *upādānaṃ* est inadmissible; d'après le tibétain *upādāya saṃsarato...*

संसरतोऽपि न विभवता[1]प्रसङ्ग इति ॥ तदपि न युक्तं पूर्वभवपरित्यागापरित्यागाभ्यामान्तराभविकस्कन्धसंसारेऽपि तुल्यप्रसङ्गत्वात् ॥

युगपत्त्यागोपादानाददोष इति चेत्, उच्यते । किमेकदेशेन पूर्वोपादानं त्यजत एकदेशेनान्तरा[85a]भवोपादानं संचरति[2], अथ सर्वात्मना । तत्र यद्यवयवेनेति परिकल्प्यते, तदा द्व्यात्मकताप्रसङ्गादित्युक्तदोषः । अथ सर्वात्मना, एवमपि स एव विभवताप्रसङ्ग आपद्यते । एतावांस्तु विशेषो यदन्तराभव[3]संचारेऽतिसामीप्यात्सूक्ष्मं कालमनुपादानः स्यात् । न च सर्वात्मनैकस्य पदार्थस्य[।]भिन्नपदार्थस्य विषये युगपत्त्यागोपादाने दृष्टे, न ह्येकस्य देवदत्तस्य सर्वात्मना गृहाद्गृहं संचरत एकदा त्यागोपादानक्रिये द्वे संभवतः ॥ अथैकेन पादेनैकस्य परित्यागादपरस्य चोपादानाद्युगपत्त्यागोपादाने परिकल्प्येते । नन्वेवं सति पादद्वयवद्व्यात्मकतात्मनः स्यात्, अंशेन पूर्वत्रावस्थानादंशेन चोत्तरत्रावस्थानादनेकावयवता प्रसज्येत । तस्माद्यौगपद्येनापि [Tib. 110b] त्यागोपादाने न संभवत इत्यपरिहार एवायं ॥ तस्मादन्तराभवोपादाने[4]ऽपि स एव दोषप्रसङ्ग इति सर्वथात्मनोऽपि नास्ति संसारः ॥

यदा च संस्काराणामात्मनश्च संसारो नास्ति, तदा नास्त्येव संसार इति स्थितं ॥

अत्राह । विद्यत एव संसारः प्रतिद्वन्द्विसद्भावात् । इह यो नास्ति न तस्य प्रतिद्वन्द्वो विद्यते तद्यथा वन्ध्यासूनोरिति । अस्ति च संसारस्य प्रतिद्वन्द्वि निर्वाणं, तस्मादस्ति संसार इति ॥ उच्यते । स्यात्संसारो यदि तत्प्रतिद्वन्द्वि निर्वाणं स्यात् । न त्वस्तीत्याह ।

1) Mss. *vibhavati*, °*tī* — *vibhavatā*° est recommandé par ci-dessous l. 5.

2) རྒྱུ་བ་ — Comparer la discussion Bodhic. IX 81 et suiv.

3) སྲིད་པ་བར་མ་དོར་ རྒྱུ་བ་ན.

4) Mss. *antarābhavaparyupādadānasya sa eva* … སྲིད་པ་བར་མ་དོ་ ལེན་པ་ལ་ ཡང.

संस्काराणां न निर्वाणं कथं चिदुपपद्यते ।
सत्त्वस्यापि न निर्वाणं कथं चिदुपपद्यते[1] ॥ ४

यदि निर्वाणं नाम किं चित्स्यात्तत्परिकल्प्यमानं संस्काराणां नित्यानां वा परिकल्प्येतानित्यानां वा । तत्र नित्यानामविकारिणां किं नि[85b]र्वाणं कुर्यात् । अनित्यानामपि [अ]संविद्यमानानां[2] किं निर्वाणं कुर्यादिति । सर्वं पूर्वेण तुल्यं । न कथं चिदिति न केनापि प्रकारेणेत्यर्थः ॥

अथ सत्त्वस्य निर्वाणं परिकल्प्यते । तदपि नित्यस्य वा[नित्यस्य वा] पूर्ववन्नोपपद्यते ॥

अथ नित्यानित्यत्वेनावाच्यस्य परिकल्प्यते । नन्वेवं सति निर्वाणेऽप्यात्मास्तीत्यभ्युपेतं भवति संसार इव । अपि च सोपादानस्यैवात्मनोऽवाच्यता युज्यते न च निर्वाण [Tib. 111a] उपादानमस्तीति कुतोऽस्यावाच्यता ॥ भवतु वा तत्त्वान्यत्वावाच्यतात्मनोऽपि तु किमसौ निर्वाणेऽस्ति ' उत नास्ति । यद्यस्ति ' तदा मोक्षे[3][ऽपि] तस्य सद्भावान्नित्यता स्यात् । अथ नास्ति ' तदानित्य आत्मा स्यात् । ततश्च तत्त्वान्यत्वावाच्यतावन्नित्यानित्यत्वेनाप्यात्मनोऽवक्तव्यतेति[4] न स्यात् ॥ अथ निर्वाणेऽप्यात्मनोऽस्तित्वनास्तित्वेनावाच्यतैवेष्यते । एवमपि किमसौ तत्र विज्ञेयोऽथ[5] न । यदि विज्ञेयो ' न तर्हि निरुपादानोऽस्यात्मा निर्वाणे विज्ञेयत्वात्संसार इव । अथ न विज्ञायते ' तत्रासावविज्ञेयस्वरूपत्वात्खपुष्पवन्नास्त्येवेति कुतोऽस्यावाच्यता ॥

---

1) འདུ་བྱེད་ མྱ་ངན་འདའ་བར་ནི། ཇི་ལྟ་བུར་ ཡང་ མི་འཐད་དོ། སེམས་ཅན་ མྱ་ངན་འདའ་བར་ ཡང་། ཇི་ལྟ་བུར་ ཡང་ འཐད་མི་འགྱུར།།

2) ཡོད་པ་མ་ཡིན་པ་.

3) Mss. *tadā mokṣa tasya.* — དེའི་ཚེ་ ཐར་པར་གྱུར་པ་ན་ ཡང་ དེ་ ཡོད་པས.

4) Mss. *tataç ca tanmatvāvācyatā tāvan ni°.*

5) Mss. *vijñeyārthena.* — འོན་ཏེ་ མ་ ཡིན།

तदेवं निर्वाणमपि नास्ति तदभावान्नास्ति संसार इति ॥

अत एवोक्तं भगवत्यामष्टसाहस्रिकायां[1] । निर्वाणमप्यायुष्मन् सुभूते मायोपमं स्वप्नोपमं । बुद्धधर्मा आयुष्मन् सुभूते मायोपमाः स्वप्नोपमा इत्यादि । स चेत्कुलपुत्र निर्वाणादप्यधिकतरोऽन्यो धर्मोऽभविष्यत्तमप्यहं मायोपमं स्वप्नोपममिति वदामि ॥

तथार्यसमाधिराजभट्टारके ।

परमार्थसत्य सुपि[86 a]नेन समं
निर्वाणं[2] स्वप्नस[म]मोतरती ।
मन एवमोतरति[3] येन विदु
मनसंवरः [Tib. 111 b] कथितु श्रेष्ठु[4] अयं ॥

तथा ।

निरोधसत्यं सुपिनं यथैव
स्वप्नस्वभावामथ निर्वृतिं च ।
येनेह वाचोतरि[5] बोधिसत्त्वो
अयं खु सो वुच्चति वाचसंवरः ॥

---

1) Lieu commun de la Prajñāp. — Comparer le texte de Rājendralāl p. 39—40 et la citation ci-dessous. — La seule différence notable est que l'épithète *adhikatara* est remplacée par *viçiṣṭatara*.

2) མྱ་ངན་འདས་པ་ རྨི་ལམ་ མཚུངས་པར་ འདུག། Lire peut-être *nirvāṇa supinasamam*.

3) Mss. *otarati, ottarati*. — གང་གིས་ མཁས་པ་ དེ་ལྟར་ འདུག་པ་ ཡང་། དེ་ ནི་.... = *yena vidvān evam avatarati sa manaḥsaṃvaraḥ*... — *vidvān*, dans cette traduction, = *vidu*. — «La contrainte par laquelle le sage donne cette direction à son esprit, ...

4) = *seṭṭhu*.

5) Mss. *ottari*. — གང་ལ་ བྱང་ཆུབ་སེམས་དཔའ་ གང་ འདུག་པ།

अत्राह । यद्यपि त्वया संसारनिर्वाणे प्रतिषिद्धे तथापि बन्धमोक्षौ विद्येते । न चाविद्यमानस्य भावस्वभावस्य बन्धमोक्षौ संभवतः । तस्माद्बन्धमोक्षसद्भावाद्विद्यत एव भावानां स्वभाव इति ॥ उच्यते । स्याद्भावानां स्वभावो यदि बन्धमोक्षावेव स्यातां ' न तु स्त इत्याह ।

न बध्यन्ते न मुच्यन्त उदयव्ययधर्मिणः ।
संस्काराः पूर्ववत्सत्त्वो बध्यते न न मुच्यते[1] ॥ ५

इह य इमे रागादयः क्लेशा बद्धानामस्वतन्त्रीकरणे बन्धनमिति व्यपदिश्यन्ते ' यैश्च बद्धाः पृथग्जनास्त्रैधातुकं नातिक्रामन्तीति[2] व्यवस्थाप्यते । तदेतद्रागादिकं बन्धनत्वेन परिकल्प्यमानमुदयव्ययधर्मिणां तावत्क्षणिकानां संस्काराणामुत्पादानन्तरध्वंसिनां नष्टानामसत्त्वान्न संभवति । रागादिबन्धनविच्छेदलक्षणोऽपि मोक्षो ऽनित्यानां संस्काराणामविद्यमानत्वान्नैव संभवति । पूर्ववत्पूर्वोक्तविधिनेत्यर्थः । यथा च पूर्वोक्तविधिना संस्काराणां बन्धमोक्षौ न संभवतः ' एवं पूर्ववदेव सत्त्वोऽपि न बध्यते [Tib. 112a] नापि मुच्यते ' इत्येवं बन्धमोक्षावपि न स्तः ॥

अत्राह । यद्यपि संस्काराणां सत्त्वस्य वा बन्धो नास्ति ' तथापि रागादिकमुपादानाख्यं बन्ध[न]भूतमस्ति तत्सद्भावाद्बन्धोऽपि[3] भविष्यतीति ॥ उच्यते । स्यादु[86b]पादानं बन्धनं यदि किं चित्पदार्थं बध्नीयान्न तु बध्नाति । यथा च न बध्नाति तथा प्रतिपादयन्नाह ।

बन्धनं चेदुपादानं सोपादानो न बध्यते ।
बध्यते नानुपादानः किमवस्थोऽथ बध्यते[4] ॥ ६

---

1) སྐྱེ་འཇིག་ཆོས་ཅན་འདུ་བྱེད་རྣམས། མི་འཆིང་གྲོལ་བར་མི་འགྱུར་ཏེ། སྔ་མ་བཞིན་དུ་སེམས་ཅན་ཡང་། མི་འཆིང་གྲོལ་བར་མི་འགྱུར་རོ॥

2) Voir p. 108, n. 2 et 296. 2. 4.

3) Mss. *baddho 'pi.*

4) གལ་ཏེ་ཉེ་བར་ལེན་པ་འཆིང་ན། ཉེ་བར་ལེན་བཅས་འཆིང་མི་འགྱུར། ཉེ་བར་ལེན་མེད་མི་འཆིང་སྟེ། གནས་སྐབས་གང་ཞིག་འཆིང་བར་འགྱུར॥

तत्र विद्यमानोपादानः सोपादानः स तावद्भावो न बध्यते। यो हि सोपादानः स बद्ध एव। तस्य पुनरपि बन्धनयोगः किं कुर्यात्। यश्चाप्यनुपादानो बन्धनरहितोऽसावपि बन्धनरहितत्वात्तथागतवन्न बध्यते। अनुपादानो बन्धनरहितो बध्यत इति परस्परविरुद्धत्वाच्चायुक्तमेतत्। यश्चैवं निरूप्यमाणः[1] सोपादानो निरुपादानो वा न बध्यते। स इदानीं किमवस्थो बध्यतां। नास्त्येवासौ का चिदपरा ऽस्यावस्था यस्यां बध्येतेत्यभिप्रायः। यदा चैवं निरूप्यमाणो बन्धनं न कं चिदपि बध्नाति। तदा कं चिदप्यबध्नत उपादानस्य रागादेः कुतो बन्धन[त्व]मिति। तस्माद्बन्धनमपि नास्ति॥

अपि च [Tib. 112b]।

बध्नीयाद्बन्धनं कामं बन्ध्यात्पूर्वं भवेद्यदि॥
न चास्ति तत्।

इह बन्ध्यव्यतिरेकेण बन्धनं निगडादिकं[2] पूर्वसिद्धं सद्बन्ध्यं[3] देवदत्तं बध्नातीति दृष्टं। एवं यदि बन्ध्येभ्यः संस्कारेभ्यः पुद्गलाद्वा बन्ध्यात्पूर्वं रागादिकं बन्धनं सिद्धं स्यात्तेन पूर्वसिद्धेन बन्धनं[4] स्यात्संस्काराणां पुद्गलस्य वा। तच्चैतन्न संभवति निराश्रयस्य रागादिकस्यासिद्धत्वात्। पूर्वसिद्धस्य च बन्धनस्य पश्चाद्बन्ध्येन सह संबन्धस्य निष्प्रयोजनत्वात्। बन्ध्यस्य च बन्धनात्पृथक् सिद्धस्य पूर्वबन्धनापेक्षानिःप्रयोजनत्वाच्च नास्ति बन्ध्याद्बन्धनस्य पूर्वसिद्धिः॥ तस्मान्नैव बन्धनं कं चिदपि बध्नाति। न च कं चिदप्यबध्नतो बन्धनत्वं युक्तमिति नास्ति बन्धनं। बन्धनाभावाच्च बन्ध्योऽपि नास्तीति सिद्धं॥ यत्पुनरत्र शेषं दूषणं तत् [87a]।

---

1) Mss. *nirudhyamānaḥ*.

2) *nigaḍa* = ལྕགས.

3) Mss. *pūrvasiddhaṃ sa dharmaṃ deva°*. — བཅིང་བར་བྱ་བ་ ལྷས་བྱིན་འཆིང་ངོ།

4) Sic Mss. — *bandhaḥ*?

शेषमुक्तं गम्यमानगतागतैः[1] ॥ ७

वेदितव्यं । श्लोकपाठपरिवर्तनेन

बद्धो न बध्यते तावदबद्धो नैव बध्यते ।
बद्धाबद्धविनिर्मुक्तो बध्यमानो न बध्यते ॥

इत्यादिना योज्यं ॥

अत्राह । यद्यपि भवता[2] बन्धनं प्रतिषिद्धं तथापि संसारचारकागारावबद्धानामत्राणानां[3] सत्त्वानां महाकारुणिकैस्तथागतैः शीलसमाधिप्रज्ञात्मकस्कन्धत्रयोपदेशो[4] यद्-

---

1) གལ་ཏེ་ བཅིང་བྱའི་ སྔ་རོལ་ན། འཆིང་བ་ ཡོད་ན་ འཆིང་ལ་རག། དེ་ ཡང་ མེད་དེ་ ལྷག་མ་ ནི། སོང་ དང་ མ་སོང་ བགོམ་པས་ བསྟན།། — Voir ci-dessus Chap. II.

2) Mss. *bhagavatā.*

3) འཁོར་བའི་ བཙོན་རར་ བསྡམས་པ་.

4) Mss. °*skandho trayo daço 'yam muktaḥ sa*... — ཕུང་པོ་ གསུམ་ ཉེ་བར་ བསྟན་པ་ གང་གི་ དོན་དུ་ གསུངས་པ་ ཐར་པ་ དེ་ནི་ རེ་ཞིག་ ཡོད་པ་ཡིན་ལ། — Sur ces trois *skandhas*, voir notamment Abhidh. k. v. (Soc. As.) fol. 378a où sont discuté les *nīvaraṇas* qui leur sont opposés; le Triskandhaka (Kandjour, Mdo XXII, fol. 82—111) «explication des trois aggrégats, moralité, méditation et habileté ou sagesse» (? — Feer, p. 274); Itivuttaka § 59. — En y ajoutant le *vimuktiskandha*, et le *vimuktijñānadarçana*°, on obtient le groupe de Dh.-s. XXIII, dit *lokottara* (voir ci-dessus p. 48. 1, Prajñāp. 143, Itivuttaka § 101, Nettip. p. 80). — Il y a un autre groupe de trois *skandhas* qui paraissent appartenir essentiellement au Vinaya des Bodhisattvas, voir Çikṣās. 290. 1: *Āryogradattaparipṛcchāyāṃ hi tri rātres trir divasasya ca çuceḥ çucivastraprāvṛtasya ca Triskandhakaparivartanam uktam . tatra trayaḥ skandhāḥ pāpadeçanāpuṇyānumodanābuddhādhyeṣanākhyāḥ*...; comparer Bodhic. p. II. 66, V. 98. 99, et les sūtras cités dans Çikṣās. et J. As. 1904. II. p. 437. Ce Triskandhaka est probablement celui de M. Vyut. 65. 59 et de Nanjio 1090, 1106. — L'épithète du Bouddha M. Vyut. 1. 75 (*triskandhapathadaiçika*) se rapporte aux trois *skandhas* classiques, je veux dire, anciens.

On connait un Pañcaskandhaka. — Abhidh. k. v. (Soc. As.) 243b: *yathā Pañcaskandhake likhitaṃ tathedaṃ grahītavyam.* Les cinq *skandhas* sont *chanda, adhimokṣa, smṛti, samādhi, prajñā.*

र्विमुक्तः स तावन्मोक्षोऽस्ति, न चाबद्धस्य पुंसो मोक्षः। तस्माद्बन्धोऽप्यस्तीति॥ [उच्यते] स्याद्बन्धो [Tib. 113a] यदि मोक्ष एव स्यात्। इहायं मोक्षः परिकल्प्यमानो बद्धस्य वा परिकल्प्येताबद्धस्य वा। किं चातः, उभयथा च न युज्यत इत्याह।

बद्धो न मुच्यते तावदबद्धो नैव मुच्यते।
स्यातां बद्धे मुच्यमाने युगपद्बन्धमोक्षणे[1]॥ ८

तत्र बद्धस्य मोक्षो न संभवति बद्धत्वात्। अथ बद्धस्योपायेन पश्चान्मोक्ष इति कृत्वा बद्ध एव मुच्यत इति स्यात्, न तर्हि बद्धो मुच्यत[2] इति वक्तव्यं तर्हि मोक्ष्यत[3] इति। वर्तमानसामीप्यादेव मुच्यत इति चेत्। यदि कदा चिदपि मोक्षः संभवेत्तदा समीपे स्यात्, यदा तु कस्यां[4] चिदप्यवस्थायां मोक्ष इष्यमाणे बद्धस्य मोक्षासंभवेन मोक्षाभावः प्रति[पि]-[5]पादयिषितस्तदा कुतो वर्तमानसमीपता। एवं तावद्बद्धो न मुच्यत इति स्थितं॥

इदानीमबद्धोऽपि न मुच्यते। स हि मुक्त एव, तस्य पुनरपि मोक्षः किं कुर्यात्। मुक्तानां चार्हतां पुनरपि मोक्षापेक्षत्वाद्बद्धतैव स्यात्ततश्चार्हतोऽपि[6] बन्धः स्यात्॥

Cet emploi du mot *skandha* est ancien, Chānd. Up., *trayo dharmaskandhā yajño 'dhyayanaṃ dānam.* — Par opposition à ces divers *skandhas*, dont le domaine est déterminé (*pratiniyataviṣayāḥ*), les cinq *skandhas*, *vedanā*, *saṃjñā*, *sparça*, *manaskāra*, *cetanā* sont dénommés *sarvatraga* (Abhidh. k. v.).

1) རེ་ཞིག་ བཅིངས་པ་ མི་ གྲོལ་ཏེ། མ་བཅིངས་པ་ ཡང་ གྲོལ་མི་འགྱུར། བཅིངས་པ་ གྲོལ་བཞིན་ ཡིན་འགྱུར་ན། བཅིངས་ དང་ གྲོལ་བ་ དུས་གཅིག་ འགྱུར༎

2) གྲོལ་ལོ།

3) Mss. *mokṣata.* གྲོལ་བར་འགྱུར་རོ།

4) Mss. *tasyām.*

5) སྟོན་པར་འདོད་པ་.

6) Mss *tataç cārhataiva to 'pi bandhaḥ.* — དེའི་ཕྱིར་ དགྲ་བཅོམ་པ་ ཡང་ བཅིངས་པར་འགྱུར་རོ།

अथ स्यादबद्धस्य मोक्षासंभवाद्बद्ध एव मुच्यत इति । एवं सति बद्धे मुच्यमाने परिकल्प्यमाने बद्धत्वान्मुच्यमानत्वाच्च यौगपद्येन ब[87b]न्धमोक्षौ स्यातां । न च परस्परविरुद्धत्वादालोक[Tib. 113b]ान्धकारवदेकस्मिन् काले बन्धमोक्षौ उपपद्येते ॥ यतश्चैवं बद्धाबद्धयोर्मोक्षासंभवस्तस्मान्मोक्षोऽपि नास्ति तदभावाच्च बन्धनमपि नास्तीति सिद्धं ॥

अत्राह । यदि भवतैव संसारनिर्वाणे निषिद्धे बन्धमोक्षौ च प्रतिषिद्धौ । य एष संसारविनिर्मुमुक्षूणामविद्यासान्द्रान्धकारविविधकुदर्शनकठिनातिदीर्घलतासंछादितसत्पथं जात्यादिविविधापर्यन्तव्यसनानिष्टतरविपुलविपाकफलदानु[1]शयविषवृक्षसंकुलं विंशतिशिखरसमुन्नततरातिपृथुसत्का[2]यदृष्टिमहाशैलपरिवेष्टितसर्वदिङ्मुखं विषयसुखाशा[3]तिपिच्छिलविपुलमहातटवि[4]वरवाहितृष्णानदीमहापरिखं संसारमहाटवीकान्तारं निस्तितीर्षूणां परमाश्वासकरः कुशलो महाधर्म[5]च्छन्दः । कदा नु खल्वहमनुपादानो निर्वास्यामि कदा नु मे निर्वाणं भविष्यतीति । ननु स व्यर्थक एव संजायते ॥ यश्चाप्येवमुत्पादितकुश[6]लामलविपुलधर्मच्छन्दानां कल्याणमित्रसंसेवादानशीलश्रुतचिन्ताभावनादिक्रमो निर्वाणप्राप्तये ननु तस्यापि वैयर्थ्यं स्यादिति ॥

---

1) Ce sont les *anuçayas* qui font murir le fruit, voir Nettip. p. 14 et 8(où ils sont comparés à un arbre; ci-dessous p. 304 n. 4 et Chap. XXIV, fol. 150b

2) Voir M. Vyut. § 208 *viṃçaticikharasamudgataḥ satkāyadṛṣṭiçaila, rū pam ātmā ...., rūpavān ātmā*, etc.; Subhāṣitasaṃgr., Muséon, N. S. IV p. 395. 4 citant Madh. avat. VI. 145. — *satkāyadṛṣṭi* = འཇིག་ཚོགས་ལ་ལྟ་བ traduction qui a donné le change à Chandra Dās (p. 457), voir Muséon, N. S I. 234, V. 198.

3) Mss. °*çānti*°. — *viṣaya-sukha-āçā-atipicchila*°.

4) རྒྱུན་མི་འཆད་པར་ འབབས་པས་, qui coule sans interruption (འབབ་ཆུ = rivière). — *vivara* = Zwischenraum; il faut donc *avivara*.

5) Sur *chanda*, ci-dessus 52. 3. — *chandabala*, un des éléments de la *vīrya pāramitā*, Bodhic. p. VII. 46. — Je rencontre ici pour la première fois le *mahā dharmacchanda* = *dge-bai chos-la hdun-pa chen-po*.

6) D'après le tibétain °*kuçaladharmacchandānām*.

उच्यते। यो ह्येवं निःस्वभावेषु सर्वभावेषु प्रतिबिम्बमरीचिकाजलालातचक्रस्वप्नमायेन्द्रजालसदृशेष्वात्मात्मीयस्वभावरहितेषु [Tib. 114a] विपर्यासमात्रानुगमात्तामेव सत्कायदृष्टिमहं ममेत्यहंकारममकारसमुदाचारपरिग्रहेणोत्पाद्य मन्यते।

निर्वास्याम्यनुपादानो निर्वाणं मे भविष्यति।
इति येषां ग्रहस्तेषामुपादानमहाग्रहः(1)॥ ९

अहमनुपादानः सर्वोपादानरहितो निर्वास्यामि मम चैवं प्रतिपन्नस्य [88a] निर्वाणं भविष्यतीत्येवं येषां मुमुक्षूणां ग्र[ा]हो भवति। ननु तदेवाहंकारममकाराख्यं सत्कायदृष्ट्युपादानमेषां महाग्रहो भवति। न चैवंविधमहाग्रहा(2)भिनिविष्टानां शान्तिः संभाव्यते। निरवशेषग्रहप्रहाणेनैव मोक्षावाप्तये यावदहं ममेति ग्राहा(3)भिनिवेशो यावच्च निर्वाणं नामास्तीति ग्राहा(3)भिनिवेशो यावच्चोपादानत्यागाभिनिवेशस्तावन्नियतमेवा(4)नुपायेन निर्वाणं प्रार्थयतां(5) सर्व एवारम्भा व्यर्था भवन्ति। तस्मान्मुमुक्षुणा सर्वमेतत्परित्याज्यं [Tib. 114b]॥

यथोक्तं भगवतार्यध्यायित(6)मुष्टिसूत्रे। अथ खलु भगवान् मञ्जुश्रियं कुमारभूतमेतद्-

---

1) བདག་ནི་ལེན་མེད་མྱ་ངན་འདའ། མྱང་འདས་བདག་གིར་འགྱུར་རོ་ཞེས། དེ་ལྟར་གང་དག་འཛིན་དེ་ཡི། ཉེར་ལེན་འཛིན་པ་ཆེན་པོ་ཡིན།། — *grahaḥ* et non *grāhaḥ*, au troisième pāda, pour le mètre.

2) Mss. °*mahāgraho grahābhi*°, °*grahāvabhi*°.

3) Mss. *grāho 'bhiniveço* — འཛིན་པར་ མངོན་པར་ཞེན་པ་.

4) ཐབས་མ་ཡིན་པས་.

5) དོན་དུ་ གཉེར་བ་རྣམས་ཀྱི་.

6) Cette citation, que nous retrouverons ci-dessous Chap. XXIV ad finem, manque ici dans le tibétain (voir ci-dessous p. 299 n. 1.

འཕགས་པ་ བསམ་གཏན་པའི་ དཔེ་མཁྱུད་ཀྱི་ མདོ་ — *muṣṭi*, retenir, conserver pour soi; voir **M. Vyut.** § 245. 1214, **Chandra Dās**, p. 184, **Bodhisattva-**

वोचत्। चतूर्णामार्यसत्यानां यथाभूतार्था[1]दर्शनाच्चतुर्भिर्विपर्या[2]सैर्विपर्यस्तचित्ताः सत्त्वा एवमिममभूतं संसारं नातिक्रा[3]मन्ति ॥ एवमुक्ते मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत्। देशयतु भगवान् कस्योपलम्भतः सत्त्वाः संसारं नातिक्रामन्ति ॥ भगवानाह। आत्मात्मीयोपलम्भान्मञ्जुश्रीः सत्त्वाः संसारं नातिक्रामन्ति। तत्कस्य हेतोः। यो हि मञ्जुश्रीरात्मानं परं च समनुपश्यति तस्य [4]कर्माभिसंस्कारा भवन्ति। बालो मञ्जुश्रीरश्रुतवान् पृथग्जनो ऽत्यन्तपरिनिर्वृतान् सर्वधर्मानप्रजानान आत्मानं परं चोपलभते ' उपलभ्य[ाभि]निविशते ' अभिनिविष्टः सन् [रज्यते दुष्यते मुह्यते। स रक्तो दु[5]ष्टो मूढः सन्] त्रिविधं कर्माभिसंस्करोति कायेन वाचा मनसा। सो ऽसत्समारोपेण विकल्पयति ' अहं रक्तोऽहं द्वि[5]ष्टो ऽहं मूढ इति। तस्य तथागतशासने प्रव्रजितस्यैवं भवति ' अहं शीलवानहं ब्रह्मचारीति ' अहं संसारं समतिक्रमिष्यामि ' अहं निर्वाणमनुप्राप्स्यामि ' अहं दुःखेभ्यो मो[6]क्ष्यामि। स [88b] विकल्पयति ' इमे कुशला धर्मा इमेऽकुशला धर्माः [। इमे धर्माः] प्रहातव्या इमे धर्माः साक्षात्कर्तव्याः ' दुःखं परिज्ञातव्यं ' समुदयः प्रहातव्यो ' निरोधः साक्षात्कर्तव्यो ' मार्गो भावयितव्यः। स विकल्पयति ' अनित्याः सर्वसंस्काराः ' आ[7]दीप्ताः सर्वसंस्काराः ' यन्न्वहं सर्वसंस्कारेभ्यः पलायेयं। तस्यैवमवेक्षमाणस्योत्पद्यते निर्वित्सहगतो[8] मनसिकारोऽनि-

---

bhūmi I. viii (fol. 44 b) *sarvaṃ ca deçayati dharmamātsaryam akurvan* n'a ā*ryamuṣṭiṃ dharmeṣu karoti*. — Cp. Jāt. II. 221. 20, 250. 17. — Mais, comme le remarque M. C. Bendall en me communiquant ces références, *muṣṭi* n'a pas nécessairement le sens que lui attribue le traducteur tibétain.

1) Mss. °*arthadarçanac* — °*artha*° manque Chap. XXIV.

2) Voir ci-dessus 30, n. 2, 52, n. 7.

3) Voir ci-dessus p. 108, n. 2 et 290. 8.

4) Mss. *tasya kasyābhi*°. — Sur le *karma abhisaṃskṛta*, ci-dessus p. 137, n. 4, ci-dessous p. 303, n. 4 et 311. 1 la définition de *cetanā*.

5) La confusion *dveṣa* = *doṣa* entraîne la confusion *dviṣṭa* = *duṣṭa*.

6) Mss. *mokṣāmi*.

7) «Everything, O Bhikkhus, is burning». — Mahāvagga I. 21. 1

8) *nirvid* སྐྱོ་བ.

मित्तपुरोगतः ॥ तस्यैवं भवति । एषा सा दुःखपरिज्ञा येयमेषां धर्माणां परिज्ञा ॥ तस्यैवं भवति ' यन्न्वहं समुदयं प्रजह्येयं । स एभ्यो धर्मेभ्य आर्तीयते[(1)] जेह्रीयते वितरति विजुगुप्सत उत्त्रस्यति संत्रस्यति संत्रासमापद्यते ॥ तस्यैवं भवति '] इयमेषां धर्माणां साक्षात्क्रिया । इदं समुदयप्रहाणं यदिदमेभ्यो धर्मेभ्योऽर्तीयना[(2)] विजुगुप्सना[(3)] ॥ तस्यैवं भवति ' निरोधः साक्षात्कर्तव्यः । समुदयं कल्पयित्वा निरोधं संजानाति ॥ [तस्यैवं भवति] एषा सा निरोधसाक्षात्क्रिया ॥ तस्यैवं भवति ' यन्नूनमहं मार्गं भावयेयं । स एको रहोगतस्तान् धर्मान् मनसि कुर्वन् शमथं[(4)] प्रतिलभते । तस्य [तेन] निर्वित्सहगतेन मनसिकारेण शमथ उत्पद्यते । तस्य सर्वधर्मेषु चित्तं प्र[ति]लीयते[(5)] प्रतिवहति प्रत्युदावर्तते [तेभ्यश्चा]र्तीयते जेह्रीयते ' अनभिनन्दनाचित्तमुत्पद्यते । तस्यैवं भवति ' मुक्तोऽस्मि[(6)] सर्वदुःखेभ्यो ' न मम

---

1) Mss. *attīyate*, *ārttīyate* et ci-dessous *attīyanā* (voir n. 2). — ཆོས་འདི་དག་གིས་ ཉེན་པར་འགྱུར། ཆེས་ ངོ་ཚ་བར་ འགྱུར། མི་དགའ་བར་ འགྱུར། སྐྱོད་པར་ འགྱུར། — ཉེན་པ་ = *ārti*, *ārta*; *ārtīyate* = devenir *ārta*. — Voir Morris J. P. T. S. 1886. p. 104, s. voc. *aṭṭiyanti*: *te sakena kāyena aṭṭiyanti harāyanti jigucchanti* (Suttav. I. 68). See Jāt. I, 292, II 143, Therīg. v. 140, p. 137. We also find the form *addiyati* (Th. g., Comm. p. 204) et *addito* (Ibid. v. 328, p. 155). Cp. *santi bhagavataḥ çrāvakā ye 'nena pūtikāyenārdīyamānā jehrīyante vijugupsamānāḥ çastram apy ādhārayanti* (Div. Av. 39. 7) — [*ardīyamāna* = distressed about]. — M. Vyut. § 99. 12.

2) ཆོས་འདི་དག་གིས་ ཉེས་པ་.

3) *vijugupsanā* manque dans la citation Chap. XXIV et dans la version tibétaine qui y correspond.

4) *çamatha* ཞི་གནས་.

5) Mss. *cittaṃ na pralīyate prativahati* — དེ་ ཆོས་ཐམས་ཅད་ལ་ སེམས་ ཞེར་ འབྱུང་བར་ འགྱུར་ཏེ། ཕྱིར་འདྲེན་ཞེང་ ཕྱིར་ལྡོག་པར་ འགྱུར་རོ། — Comp. *cittaṃ paṭilīyati patikuṭati paṭivaṭṭati* (Aṅg. N. IV. 47 et passim).

6) Comparer Dīgha N. I 84 et Sum. Vil. 225 *vimutt'amhīti ñāṇam hoti, khīṇā jāti, vusitaṃ brahmacariyaṃ, kataṃ karaṇīyaṃ, nāparaṃ itthattayāti*

भूय उत्तरि किं चित्करणीयं ' अर्हन्नस्मीत्यात्मानं संजानाति । स मरण(1)कालसमय उत्पत्तिमात्मनो समनुपश्यति । तस्य काङ्क्षा(2) च विचिकित्सा च भवति बुद्धबोधौ । स विचिकित्सा(3)पातितः कालगतो महानिरयेषु प्रपतति ॥ तत्कस्य हेतोः ' यथापीदमनुत्पन्नान् सर्वधर्मान् विकल्पयित्वा(4) [तथागते विचिकित्सां विमतिं(5) चोत्पादयति ॥]

अथ खलु मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत् । कथं पुनर्भगवंश्चत्वार्यार्यसत्यानि द्रष्टव्यानि ॥ भगवानाह । येन मञ्जुश्रीरनुत्पन्नाः सर्वसंस्कारा दृष्टास्तेन दुः[89a]खं परिज्ञातं ' येनासमुत्थिताः सर्वधर्मा दृष्टास्तस्य समुदयः प्रहीणः ' येनात्यन्तपरिनिर्वृताः सर्वधर्मा दृष्टास्तेन निरोधः साक्षात्कृतः ' येनात्यन्तशून्याः सर्वधर्मा दृष्टास्तेन मार्गो भावितः । येन मञ्जुश्रीरेवं चत्वार्यार्यसत्यानि दृष्टानि स न कल्पयति न विकल्पयति ' इमे कुशला धर्मा इमे ऽकुशला धर्माः ' इमे धर्माः प्रहातव्या इमे धर्माः साक्षात्कर्तव्याः ' दुःखं परिज्ञातव्यं ' समुदयः प्रहातव्यो ' निरोधः साक्षात्कर्तव्यो ' मार्गो भावयितव्य इति । तत्कस्य हेतोः । तथा हि स तं धर्मं [न] समनुपश्यति यं परिकल्पयेत् ' बालपृथग्जनास्त्वेतान्धर्मान् कल्पयन्तो रज्यन्ति च द्विषन्ति च मुह्यन्ति च । स न कं चिद्धर्ममाव्यूहति निर्व्यूहति ' तस्यैवमनाव्यूहतो ऽनिर्व्यूहतस्त्रैधातुके चित्तं न सज्जति । अज्ञातं सर्वत्रैधातुके समनुपश्यतीति विस्तरः ॥

---

pajānāti. Toute la description de la conquête des «hauteurs de l'Arahatship» par la connaissance des vérités, correspond étroitement à notre texte. La conclusion mahāyāniste du sūtra septentrional n'en est que plus intéressante. — Voir Vajracchedikā p. 26, *tat kiṃ manyase Subhūte api nv arhata evam bhavati mayārhattvaṃ prāptam?*

1) འཆི་བའི་དུས་བྱེད་པའི་ཚེ་ བདག་ཉིད་ སྐྱེ་བར་ མཐོང་བས།

2) *kāṅkṣā* = ཐེ་ཚོམ་.

3) སོམ་ཉིར་ ལྷུང་སྟེ་.

4) ཆོས་རྣམས་ལ་ བརྟགས་ནས་.

5) དང་ ཡིད་གཉིས་ སྐྱེད་པར་བྱེད་པའི་ཕྱིར། = ...*dvimatiṃ ca*...

[1]अत एवास्मादागमात्परमार्थसत्य उच्यते । सर्वथा

न निर्वाणसमारोपो न संसारापकर्षणं ।

यत्र कस्तत्र संसारो निर्वाणं किं विकल्प्यते[1] । १०

यत्र हि नाम परमार्थसत्ये नैव[2] न निर्वाणसमारोपो न निर्वाणाध्यारोपः संभवति । अनुपलभ्यमानत्वात् । नापि संसारापकर्षणं संसारपरित्यागो न संभवति । कस्तत्र संसारो [यो] विकल्प्यते त्यागार्थं [Tib. 114 b] किं वा तत्र निर्वाणं यत्प्राप्त्यर्थं विकल्प्यते ॥ अथ वा । यत्र निर्वाणे[3] कस्य चित्सत्त्वस्य संसारादपकर्षणमुपनयनं[4] निर्वाणे च समारोपणं प्रयत्नवतापि न शक्यते कर्तुं संसारनिर्वाणयोरप्यनुपलभ्यमानत्वात्तत्र किं निर्वाणं विकल्प्यते । नैव किं चिद्विकल्पयितुं युक्त[89 b]मविकल्पयतश्च नियतं यथोदितसंसाराटवीकान्तारातिक्रमो निर्वाणनगरपुरप्राप्तिश्च भविष्यतीति ॥

अत एवोक्तमार्यमारदमनसूत्रे[5] । अथ मञ्जुश्रीः कुमारभूतस्तस्यां वेलायां तथारूपं समन्वाहारं समन्वाहरति स्म । यन्मारः पापीयानिन्द्रकीलबन्धनबद्धो धरणीतलप्रपतित उत्क्रोशति स्म । गाढबन्धनबद्धोऽस्मि ॥ मञ्जुश्रीराह । अस्ति पापीयन्नेतस्माद्बन्धनाद्गा-

---

1) Nous retrouvons ici le tibétain, fol. 114 a 6. གང་གི་ཕྱིར་ རྣམ་པ་ཐམས་ཅད་དུ་ དོན་དམ་པ། གང་ལ་ མྱ་ངན་འདས་ བསྐྱེད་ མེད། འཁོར་བ་ བསལ་བའང་ ཡོད་མིན་ན། ཞེས་བྱ་བ། དེ་ལ་ འཁོར་བ་ ཅི་ཞིག་ ཡིན། མྱ་ངན་འདས་པའང་ ཅི་ཞིག་ བརྟག། དོན་དམ་པའི་བདེན་པ་ གང་ལ་ ... — Peut-être faut-il lire, contre les Mss., *nirvāṇasamāropo na na* .....

2) *naiva*, suspect, manque dans le tibétain.

3) Mss. *nirvāṇe na kasya.*

4) Mss. °*karṣaṇa apa*°, °*karṣanaṃ upa*° — བསལ་བ་ སྐྱེ་ བཀྲི་བ་ དང་།

5) འཕགས་པ་ བདུད་བཏུལ་བའི་མདོ.

ढतरं बन्धनं येन त्वं नित्यबद्धो न पुनर्बध्यसे। तत्पुनः कतमद्यदिदमस्मिमानविपर्यास-[1]बन्धनं तृष्णादृष्टिबन्धनमिदं पापीयन् बन्धनं। अतो बन्धनाद्गाढतरं बन्धनं न संविद्यते। तेन त्वं नित्यबद्धो न पुनर्बध्यसे। पेयालं[2]॥ आह। किं त्वं पापीयन्नात्तमना भूया यदि मुच्येथाः। आह। आत्तमना भवेयं परमात्तमना भवेयं॥

अथ खलु सुयामो[3] देवपुत्रो मञ्जुश्रियं कुमारभूतमेतदवोचत्। उत्सृज मञ्जुश्रीर्मारं पापीयांसं। गच्छतु स्वभवनं॥ अथ खलु मञ्जुश्रीः कुमारभूतो मारं पापीयांसमेतदवोचत्। [Tib. 115a] केनासि पापीयन् बद्धो यदात्मानमुत्सृजयसि॥ आह। न जाने मञ्जुश्रीः केनास्मि बद्ध इति॥ आह। यथा त्वं पापीयन्नबद्धो बद्धसंज्ञी ' एवमेव सर्वबालपृथग्जना अनित्ये नित्यसंज्ञिनः ' दुःखे ऽदुःखसंज्ञिनः ' अशुभे शुभसंज्ञिनः। अनात्मन्यात्मसंज्ञिनः ' अरूपे रूपसंज्ञिनः ' अवेदनायां वेदनासंज्ञिनः ' असंज्ञायां संज्ञासंज्ञिनः। असंस्कारे संस्कारसंज्ञिनः ' अविज्ञाने विज्ञानसंज्ञिनः॥ अपि तु खलु पुनः पापीयन् यस्त्वं मोक्षयसे[4] कुतो मोक्षयसे॥ आह। नाहं जाने[5] कुतश्चिन्मोक्ष्ये[6]॥ आह। एवमेव पापीयन् येऽपि[7] मोक्ष्यन्ते ' न

---

1) ང་རྒྱལ་ཕྱིན་ཅི་ལོག་གི་ འཆིང་བ.

2) Représenté par གཞན་ཡང་།

3) Mss. *suyāma d°*. — ལྷའི་བུ་ རབ་འཐབ་བྲལ་བ་ ཞིག་གིས་ — *hthab-bral* = *mthse-ma* = jumeau (Chandra Dās, d'après un lexique). — Les *Suyāmas* sont une classe de dieux (P. W., Mahābh. et Vyut.) qui, d'après Chandra Dās, sont délivrés (*bral*) d'adversaires (*hthab-ya*). — Le devaputra Suyāma apparaît fréquemment dans le Lalita; cp. Jāt. I. 63.

4) Mss. *yas tvaṃ mokṣase kuto mokṣase.* གྲོལ་བར་འགྱུར་ན་ གང་ལས་ གྲོལ་བར་འགྱུར། = *yadi mokṣyase kuto mokṣyase.*

5) *jāne* manque dans le tibétain.

6) Mss. *mokṣe, mokṣye.*

7) Mss. *ye 'pi te mokṣante.*

ते कुतश्चिद्विमोक्ष्यन्ते । अन्यत्र यासावसद्भूतसंज्ञा तां परिज्ञानन्ति तां परिज्ञाय विमुक्ता इ[90a]त्युच्यन्ते ॥

अत एवागमादसद्विपर्यासकल्पनामात्रलताबन्धनविच्छेदो विमोक्षो निर्वाणमित्युच्यते स्वप्नोपलब्धदहनज्वालानिर्वापणवत्तद[1]निलसलिलैरिति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ बन्धमोक्षपरीक्षा नाम षोडशमं प्रकरणं ॥

---

1) Le tibétain a simplement ''' མེ་ འབར་བ་ ཆུ་དག་གིས་ བསད་པ་ བཞིན་ནོ༎

XVII.

कर्मफलपरीक्षा नाम सप्तदशमं प्रकरणं

अत्राह। विद्यत एव संसारः कर्मफलसंबन्धाश्रयत्वात्॥

यदीह संतानाविच्छेदक्रमेण जन्ममरणपरंपरया(1) हेतुफलभावप्रवृत्त्या [Tib. 115b] संस्काराणामात्मनो वा संसरणं स्यात् स्यात्तदानीं कर्मफलसंबन्धः। यथावर्णिते(2) संसाराभावे तूत्पत्त्यनन्तरविनाशित्वाच्चित्तस्य कर्माक्षेपकाले च(3) विपाकस्यासद्भावात् कर्मफलसंबन्धाभाव एव स्यात्। संसारसद्भावे तु सतीह कृतस्य कर्मणो जन्मान्तरेऽपि(4) विपाकफ-

---

1) Mss. *maraṇaparasparayor hetu°*. འཆི་བ་ གཅིག་ནས་གཅིག་ཏུ་ བརྒྱུད་པ་ ཉིད་ཀྱིས་ རྒྱུ་.....

2) Mss. *°sambandho yathā paṇḍitaḥ, °te.* ཇི་སྐད་ སྨྲས་པའི་ འཁོར་བ་ མེད་ ན་ནི་ = *yathāvarṇita°*.

3) Mss. *karmākṣayakāle vipākaḥ syāt sadbhāvāt.* ལས་ འཕེན་པའི་ དུས་ ན་ རྣམ་པར་སྨིན་པ་ མེད་པའི་ཕྱིར. — L'*ākṣepa* du vœu du Bodhisattva (voir ci-dessous fol. 106a init.) produit ses fruits *kulālacakrabhramaṇākṣepanyāyena* (Bodhic. p. IX. 36). — On peut entendre le composé *karmākṣepa* comme *karmaṇā ākṣepa*; c'est le fruit qui est projeté: *ākṣipyate*; cependant *narakeṣu kuçalasya karmaṇas trividhasyaivākṣepo na caturvidhasya dṛṣṭadharmavedanīyaṃ sthāpayitvā.atra narakeṣv iṣṭavipākābhāvāt* = Il y a, dans les enfers, projection de trois espèces de bon *karman*, mais non de la quatrième (acte dont le fruit murit dans la même existence) (Abhidh. k. v. Soc. As, 304b). — *ākṣepa* est glosé par *āvedha* (Ms. *āvadha*): *karmākṣepavaçād, yathoktaṃ karmāvedhavaçāt tāṃ tāṃ gatiṃ narakādikāṃ gacchanti jvālāgamanayogena* (Ibid. 236b 9). — Sur les divers *phalas* voir ci-dessous ad XVII. 33.

4) ཚེ་རབས་གཞན་དུ་.

लसंबन्धात्कर्मणां फलसंबन्धो न विरोधितो भवति। तस्माद्विद्यत एव संसारः कर्मफ-लसंबन्धाश्रयत्वादिति ॥

कानि पुनस्तानि कर्माणि किं वा तत्फलमिति। तत्प्रभेदविवक्षयेदमुच्यते।

आत्मसंयमकं चेतः परानुग्राहकं च यत्।
मैत्रं स धर्मस्तद्बीजं फलस्य प्रेत्य चेह च[1] ॥ १

तत्राहमिति[2] उत्पादितो ऽहंमानोऽस्मिन्नित्यात्मा स्कन्धानुपादाय[3] प्रज्ञप्यमानः पुद्गल आत्मेत्युच्यते। चिनो[त्युप[4]चिनो]ति शुभमशुभं कर्म विपाकदानसामर्थ्ये[5] नियमयतीति चेतः चित्तं मनो[6] विज्ञानमिति तस्यैव पर्यायाः। आत्मानं संयमति विषयेष्वस्वतन्त्रयति[7]

---

1) བདག་ཉིད་ལེགས་པར་སྡོམ་པ་དང་། གཞན་ལ་ཕན་འདོགས་བྱམས་སེམས་གང་། དེ་ཆོས་དེ་ནི་འདི་གཞན་དུ། འབྲས་བུ་དག་གི་ས་བོན་ཡིན།།

2) འདི་ལ་བདག་ཅེང་.

3) Voir ci-dessus 285, n. 4.

4) གསོག་ཅེང་ཉེ་བར་གསོག་ལ་དགེ་བ་དང་··· Cette étymologie de *citta* est indiquée Laṅkāv. 52 *cittena cīyate karma*, auquel on peut comparer le *cittena loko niyyati, ... parikissati* (Aṅg. N. II. p. 177, Atthas. § 211). — Il y a une différence essentielle entre le *karma kṛta* et le *karma upacita*. Ce dernier seul porte des fruits. Exemple: si on donne de l'or en croyant donner une pierre, on n'a pas donné de l'or: *tadyathā avyākṛtena cittena pāṣāṇaṃ dadāmīti suvarnapiṇḍaṃ dadyāt . kṛtaṃ tan na punar upacitam.* — C'est en raison des *anuçayas* que les actes sont moralement qualifiés: *karmāṇi .... anuçayavaçād upacayaṃ gacchanti, vipākanaiyamyenātra uttiṣṭhante, vipākadānāya niyatībhavantīty arthaḥ* (Abhidh. k. v., Soc. As., 334b 2, 337b 9); ou, en d'autres termes, c'est la pensée seule qui opére l'*abhisaṃskāra*. (Voir XVII. 5.)

Je crois que cette doctrine s'écarte de l'orthodoxie du Kathāv. XV. 11, *aññaṃ kammaṃ añño kammupacayo ti?*

5) ནུས་པ་ལས་ངེས་པར་བྱེད་པས་ན་ — Lire *nus-pa-la.*

6) ཡིད་དང་རྣམ་པར་ཤེས་པ་ = *manaç ca vijñānaṃ ca.* — Comp. Abhidh k. v citée Dh.-s. p. 69, Muséon, VI. p. 181.

7) རང་དབང་མེད་པར་བྱེད་. — Voir ci-dessus p. 24, n. 4 et 290. 7.

रागादिक्लेश[90b]वशेन प्रवृत्तिं निवारयतीत्यात्मसंयमकं । तदेतदात्मसंयमकं कुशलं चेतः प्राणातिपातादिषु प्रवृत्तिविधारकं(1) दुर्गतिगमनाद्धारयतीति(2) धर्म इत्युच्यते ॥

धर्मशब्दोऽयं(3) प्रवचने त्रिधा व्यवस्थापितः स्वलक्षणधारणार्थेन(4) कुगतिगमनविधा-(4)रणार्थेन पाञ्चगतिक[Tib. 116a]संसारगमनविधारणार्थेन(4) ॥ तत्र स्वलक्षणधारणार्थेन(5) सर्वे सास्रवा [अ]नास्रवाश्च धर्मा इत्युच्यते(6) ॥ कुगतिगमनविधारणार्थेन दशकुशलादयो धर्मा इत्युच्यते(6) ।

धर्मचारी सुखं शेतेऽस्मिँल्लोके परत्र च(7) ॥

पाञ्चगतिकसंसारगमनविधारणार्थेन निर्वाणं(8) [धर्म इ]त्युच्यते ' धर्मशरणं गच्छतीत्यत्र ॥ इह तु कुगतिगमनविधारणार्थेनैव धर्मशब्दोऽभिप्रेतः ॥

किं पुनरात्मसंयमकमेवैकं(9) चेतः धर्म(10) इत्याह । किं तर्हि परानुग्राहकं च मैत्रं च

---

1) = hemmend, zurückhaltend (P. W.) = བཟློག་པ་.

2) འཛིན་པར་བྱེད་པས་.

3) Sur le sens du mot *dharma*, voir Atthas. § 92 et suiv., Mme Rhys Davids, Psychology, p. XXXIII.

4) འཛིན་པ་.

5) Atthas. § 94 *attano pana sabhāvan dhārentīti dhammā.dhāriyanti vā paccayehi.....* — Dans le même sens, *dhriyate tiṣṭhati vartate yaḥ sa dharmaḥ*, dans la définition *naiyāyika* discutée par M. Walleser, Phil. Grundlage p. 98.

6) Mss. *ucyante*.

7) Voir Dhammapada 168—9 et Ms. Dutreuil de Rhins, J. As. 1898 II. 214, 275. — *dharma* a ici le sens de *guṇa*, comme Atthas. § 92, *adhammo nirayaṃ neti dhammo pāpeti suggatin ti.*

8) Mss. *nirvāṇam uc°*. — མྱ་ངན་ལས་འདས་པ་ལ་ ཆོས་ ཞེས···

9) Mss. °*kam eva ca kam | cetaḥ*. — གཅིག་ཏུ་ = *ekāntam?*

10) ཆོས་ ཡིན་ནམ་ ཞེ་ན། སྨྲས་པ་ མ་ ཡིན་ཏེ། འོ་ན་ ཅི་ ཞེ་ན་. — La négation exige une lecture: *dharma iti . nety āha, kiṃ tarhi.*

यच्चेतो ऽसावपि धर्मः। मैत्रमित्यत्र(1) चशब्दो लुप्तनिर्दिष्टो वेदितव्यः। तत्र परमनुगृह्णातीति परानुग्राहकं चेतः। चतुः संग्रहवस्तुप्रवृत्तं(2) भयपरित्राणप्रवृत्तं च यच्चेतोऽसावपि धर्मः॥ मित्रे(3)भवमविरुद्धं सत्त्वेषु यच्चेतस्तन्मैत्रं चेतः। मैत्रं यच्चेतस्तन्मैत्रचेतो मैत्रमेव वा(4)। यच्चैतत्त्रिविधं चेतो निर्दिष्टं स धर्म इत्युच्यते विपर्ययादधर्मो योज्यः॥

यच्चैतन्निर्दिष्टप्रभेदं चेतस्तद्बीजं फलस्य। असाधारणं फलाभिनिर्वृत्तौ यत्कारणं तदेव [Tib. 117 b] बीजमित्युच्यते। तद्यथा शाल्यङ्कुरस्य शालिबीजं। यत्तु साधारणं क्षित्यादि न तद्बीजं कारणमेतत्। यथैतदेवमिष्टापीष्टस्य विपाकस्याभिनिर्वृत्तौ त्रिविधं चेतो भवति बीजं। पुरु[91 a]षकारा(5)दयस्तु कारणमेव॥

कस्मिन्पुनः काले बीजस्य फलनिष्पत्तिरित्याह। प्रेत्य चेह च। प्रेत्येत्यदृष्टे जन्मनि। इहेति दृष्टे जन्मनीत्यर्थः॥ एतच्चागमादिस्तरेण बोद्धव्यं॥

एवं तावच्चित्तात्मकमेवैकं धर्मं व्यवस्थाप्य पुनरपि द्विविधं भगवता।

चेतना चेतयित्वा च कर्मोक्तं परमर्षिणा(6)।

---

1) Le tibétain répète le deuxième pāda du sūtra, — et porte རང་གི་སྒྲ་ (*svaçabda*) au lieu de དང་གི་ སྒྲ་ (*ca°*).

2) Mss. *bhava°*. — འཛིགས་པ་.

3) Tib. = *mitrād bhavam*.

4) ཡང་ན་ བྱམས་པ་ ནི་ གཉེན་བཤེས་ཉིད་ ཡིན་ཏེ། བདག་ལ་ ཕན་འདོགས་པའི་ སེམས་ གང་ ཡིན་པ་ དེ་ནི་ཉིད་ བྱམས་པའི་ སེམས་ ཡིན་ནོ། = *api ca mitrataiva maitram. ātmānugrāhakaṃ yac cittaṃ tad eva maitracittam.* བདག་ལ་ par erreur pour གཞན་ལ་?

5) སྐྱེས་བུའི་བྱེད་པ་. — M. Vyut. § 114. 1 *kāraṇahetu*. — Voir ci-dessous, ad XVII. 33, la note sur les *phalas*.

6) དྲང་སྲོང་ མཆོག་གིས་ ལས་རྣམས་ ནི། སེམས་པ་ དང་ ནི་ བསམས་པར་ ཏེ། — *karman* au pluriel.

परमार्थ(1)दर्शनादृषिः। परमश्चासावृषिश्चेति परमर्षिः। सर्वाकारतया परमार्थगमनात्(2)। श्रावकप्रत्येकबुद्धेभ्यो ऽप्युत्कृष्टत्वात्परमर्षिः संबुद्धो भगवान्। तेन परमर्षिणा चेतना कर्म चेतयित्वा च कर्मेत्युक्तं सूत्रे(3)॥ यच्चैतद्द्विविधं कर्मोक्तं

तस्यानेकविधो भेदः कर्मणः परिकीर्तितः(4)॥ २

कथं कृत्वा।

तत्र यच्चेतनेत्युक्तं कर्म तन्मानसं स्मृतं।

चेतयित्वा च यत्तूक्तं तत्तु कायिकवाचिकं(5)॥ ३

मनसिभवं मानसं। मनोद्वारेणैव निष्ठा(6)गमनात्कायवाक्प्रवृत्तिनिरपेक्षत्वाच्च [Tib 118a] मनोविज्ञानसंप्रयुक्तैव चेतना मानसं कर्मेत्युच्यते। तत्रशब्दो निर्धारणे॥ यत्तु द्वि

---

1) *darçana* = ཐུགས་སུ་ཆུད་པ་.

2) དོན་དམ་པ་ རྣམ་པ་ཐམས་ཅད་དུ་ ཐུགས་སུ་ཆུད་པའི་ཕྱིར་ ལ།

3) Bodhic. p. IX. 73, init. (cf. V. 6) et Abhidh. k. v. 309b 8 ... *cetanā karma cetayitvā cetivacanāt.* — Abhidh. k. v., ibid., *anyathā cetanam aham bhikṣavaḥ karma vadāmi cetayitvā cety etad virudhyate.* — Comparer la citation Kathāv. p. 393.5, reprise dans Atthas. § 250 *kiṃ pan' etam kammaṃ nāma? cetanā c'eva ekacce ca*[b] *cetanāsampayuttakā dhammā. tattha cetanāya kammabhāve imāni suttāni: cetanā 'haṃ, bhikkhave, kammaṃ vadāmi cetayitvā kammaṃ karoti kāyena vācāya manasā.* — Nettip. 160. 16.

a) Ms. *cetanām antam.*
b) Édition *va.* Je corrige d'après une note que Mlle Rhys Davids veut bien me communiquer.

4) ལས་དེ་དག་གི་ བྱེ་བྲག་ ནི། རྣམ་པ་ དུ་མར་ ཡོངས་སུ་བསྒྲགས།།

5) དེ་ལ་ ལས་ གང་ སེམས་པ་ ཞེས། གསུངས་པ་ དེ་ནི་ ཡིད་ཀྱིར་ འདོད། བསམས་པ་[ར]་ ཞེས་ ནི་ གང་ གསུངས་པ། དེ་ ནི་ ལུས་ དང་ ངག་གིར་ འདོད།།

6) མཐར་ཐུག་པར་ འགྲོ་བའི་ཕྱིར་ — *niṣṭhāgata bodhisattva* (Bodhis. bh. I, xvii) = *bodhisattva* parfaitement accompli, parvenu à un terme où l'*upāya* finit = *phalastha*. — *atyantaniṣṭha nirvāṇa* (ibid. I. ii). — Çikṣās. 251. 1 *niṣṭhā hy ete dharmā niṣṭhāpārā nirvāṇasamāḥ.* — Dh.-s. CVIII. *paraniṣṭhāvīrya.*

[णं] चेतयित्वा च कर्मेत्युक्तं तत्पुनः कायिकं वाचिकं च वेदितव्यं। एवं चैवं च कायवाग्भ्यां प्रवर्तिष्य इत्येवं चेतसा संचिन्त्य यत्क्रियते तच्चेतयित्वा कर्मेत्युच्यते ॥ तत्पुनर्द्विविधं कायिकं वाचिकं च। कायवाचोर्भवत्वात्तद्वारेण च निष्ठागमनात्।[1] एवं च त्रिविधं कायिकं वाचिकं मानसं च[2]। एतदपि त्रिविधं कर्म पुनः पुनर्भिद्यमानं सप्तविधं संजायत इत्येवं तस्य कर्मणो भगवता बहुप्रकारो भेदोऽनुवर्णितः। कथं कृत्वा।

वाग्विष्पन्दोऽविरतयो याश्चाविज्ञप्तिसंज्ञिताः।
अविज्ञप्तय एवान्याः स्मृता विरतयस्तथा ॥ ४ [3]
परिभोगान्वयं पुण्यमपुण्यं च तथाविधं।
चेतना चे[91 b]ति सप्तैते धर्माः कर्माञ्जनाः स्मृताः ॥ ५ [4]

तत्र व्यक्तवर्णोच्चारणं[5] वाक्। विष्पन्दः[6] शरीरचेष्टा[7] ॥ तत्र कुशलाऽकुशला वा

---

1) Mss. *etac ca.* དེ་ལྟར་ན

2) Mss. *mānasaṃ ca'tra tad api, cātra etad api.*

3) ངག་ དང་ བསྐྱོད་ དང་ མི་སྤོང་བའི། རྣམ་རིག་བྱེད་མིན་ ཞེས་བྱ་ གང་། [...]་པའི་ རྣམ་རིག་བྱེད་མིན་པ། གཞན་དག་ ཀྱང་ ནི་ དེ་བཞིན་ འདོད།།

4) ལོངས་སྤྱོད་ལས་བྱུང་ བསོད་ནམས་ དང་། བསོད་ནམས་ མ་ཡིན་ ཚུལ་དེ་[bzhin]། སེམས་པ་ དང་ ནི་ ཆོས་ དེ་ བདུན། ལས་སུ་ མངོན་པར་ འདོད་པ་ཡིན།།

5) ཡི་གེར་ གསལ་བོར་ བརྗོད་པ་ — Cp. Mde Rhys Davids, Psychology, 193, n. 1. — *vāc* = *vāgvijñapti.*

7) གཡོ་བ་.

6) Mss. ***viṣpanda, niṣpanda,*** *niṣyanda.* — བསྐྱོད་ = *prakamp, kṣubh, cal, [kamp], saṃbhram, tras.* — Il faut lire ***viṣpanda***, qui est garanti par *kāyavipphandana* (Atthas. § 645, et trad. p. 192, n. 3); peut-être ***niṣpanda.*** — La [confu]sion est fréquente entre *syanda*, p. ex. *niṣyandaphala* (= རྒྱུ་མཐུན་པ་,

वाक् सर्वैव विरत्यविरतिलक्षणा[1] विज्ञप्तिसमुत्थापिका सामान्येन वागिति गृह्यते । एवं कुशलो ऽकुशलो वा विरत्यविरतिलक्षणो[2] विज्ञप्तिसमुत्थापको विष्पन्दः सामान्येन गृह्यते ।

यथा चैतद्विज्ञप्तेर्द्विधाभेद[3] एवमविज्ञप्तेरपि ' अविरतिलक्षणा अविज्ञप्तयो विरति-[Tib. 117b]लक्षणाश्चेति कृत्वा । तत्राविरतिलक्षणा अविज्ञप्तयः । तद्यथा ' अद्यप्रभृति मया प्राणिनं हत्वा चौर्यं कृत्वा जीविका परिकल्पयितव्येति पापकर्माभ्युपगमलक्षणात्प्रभृति तदकारिणोऽप्यकुशलकर्माभ्युपगमहेतुकाः सततसमितम[4]विज्ञप्तयः समुपजायन्ते । कैवर्तादीनां च जालादिपरिकर्मकालात्प्रभृति तदकारिणामपि या अविज्ञप्तय उपजायन्ते ' ता एता अविरतिलक्षणा अविज्ञप्तय इत्युच्यन्ते ॥ यथा चैतास्तथान्या विरतिलक्षणाः कुशलस्वभावा अविज्ञप्तयः । तद्यथा ' अद्यप्रभृति प्राणातिपातादिभ्यः प्रतिविरमामीति[5] कायवाग्विज्ञप्तिपरिसमाप्तिकाललक्षणात्प्रभृति तदुत्तरकालं प्रमत्ताद्यवस्थस्यापि याः कुशलोपचय[6]स्वभावा अविज्ञप्तय उपजायन्ते ' ता एता विरतिलक्षणा अविज्ञप्तय इत्युच्यन्ते ॥

---

ci-dessous XVII. 33 = pāli *nissanda*), *puññābhisanda* et Çikṣās. 130.2 (ཉག་མ de འཇུག), et *spanda*, p. ex. *niṣphalaspandavarjana*, Çikṣās. 116.2—117.15, Bodhic. p. V. 54. — Les lectures de ces deux textes sont mauvaises.

1) Mss. °*lakṣaṇaḥ vi*°, *avi*°. རྣམ་པར་རིག་བྱེད་མ་ཡིན་པའི་ སྤོང་བ་ དང་ མི་སྤོང་བའི་ མཚན་ཉིད་ཅན་ ཀུན་ནས་སློང་བར་བྱེད་པ་, ce qui donne *avijñapti*.

2) Mss. °*lakṣaṇo vijñapti*°. La phrase tibétaine est parallèle à celle qui précède, soit °*lakṣaṇo 'vijñapti*°. Mais on a ci-dessous l. 4 *yathā vijñapter*. . .

3) Mss. *yathā caikav*°, *caitav*° ཇི་ལྟར་ རྣམ་པར་རིག་བྱེད་ འདིའི་ དབྱེ་བ་.

4) རྟག་པར་ རྒྱུན་མི་ཆད་པར་ — M. Vyut. § 245. 856. — *satatam* = *abhīkṣṇam*, *samitam* = *nirantaram* (A. k. v. 274b 5).

5) Cette *vijñapti* (*karmavācana*) constitue le *maula karmapatha* (Abhidh. k. v., fol. 312a 3).

6) དགེ་བསགས་; ci-dessous p. 310.2 འཕེལ་བ་.

एता रूप(1)क्रियास्वभावा अपि सत्यो विज्ञप्ति(2)वत्परान्न विज्ञापयन्तीत्यविज्ञप्तयः(3) ॥

तथा परिभोगान्वयं(4) पुण्यं कुशलमित्यर्थः । परिभोगेनान्वयो ऽस्येति परिभोगा-

---

1) གཟུགས་ དང་ བྱ་བའི་ རང་བཞིན་ ཡིན་དུ་ཟིན་ ཀྱང་.

2) Bien qu'étant *rūpa* et *kriyā*, elles n'instruisent pas les autres comme font les *vijñaptis*. — Voir **Abhidh. k. v.**, fol. 333 a 6 *kuçalāḥ skandhā iti pañcaskandhāḥ . kāyavāgvijñaptis tadavijñaptir api vā rūpaskandho draṣṭavyaḥ.* — La *kāya-vacī-viññatti* est *rūpam bāhiram cittasamuṭṭhānam*, *cittasahabhu* (Dh.-saṅ 764, 767, 770). — Voir XXVI. 8 et Muséon, VI. p. 188.

3) M. Vyut. 101, 51 *vijñapti*, 76 *avijñapti*. Définition et opinions orthodoxes, Atthas. § 645–6, Dh.-saṅ § 636–7: «bodily and verbal intimation, wrong and right», Mil. p. 229 et suiv. — Définition hérétique, Kathāv. X. 10. *kāyaviññatti kāyakammam vacīviññatti vacīkammam.* — La *viññatti* n'est pas *sīla*, ni l'*aviññatti dussīlya*; car la moralité consiste dans la *virati* et n'est pas un *rūpadhamma*. - Abhidh. k. v. fol. 310 a 9. Le *samādānaçīla* (*prātimokṣasaṃvara*) est *vijñaptyadhīna* (*tad hi parasmad ādīyate*); le *dharmatāçīla* (*dhyānānāsravasaṃvarau*), au contraire, *na vijñaptyadhīna* (*cittamātrādhīnatvat*). Ibid. 309 a 3 (sur la définition du *mauna*) *açaikṣaṃ kāyakarmāvijñaptisvabhāvaṃ kāyamaunam evam vāṅmaunam . atha kasmād avijñaptir api . vijñapteḥ sāsravatvenāçaikṣatve 'sambhavāt.*

4) Sur le *paribhoga*, voir surtout Çikṣās., Kārikās 5, 6. — La notion du *paribhogānvaya* (ou °*maya*) *puṇya* est orthodoxe, étant explicitement définie Aṅg. N. II p. 54 (IV. 51): «Si on donne à un moine un vêtement, un vase à aumônes etc., et que le moine, employant (*paribhuñjamāna*) ces objets, se fixe dans la concentration de la pensée, on obtient mérite, etc.» (a) (cp. III. p. 51). — Mais il semble que ce sūtra soit inconciliable avec quelques-unes des tendances de la dogmatique, et cela résulte de la discussion Kathāv. VII. 5. Le mérite qui provient de la jouissance d'autrui ne saurait être indépendant de la pensée (*cittavippayutta*) de celui qui est censé mériter; il suppose l'intention, le *paṇidhāna*; et si l'objet donné reste inemployé, étant brulé, dérobé, etc., le donneur (*dāyaka*) en est-il moins méritant? — Le mérite ne peut venir d'autrui, comme il est dit Bodhic. p. IX. 39: *na hi puṇyaṃ parānugrahāt*; il vient de la pensée (*svacittād bhavet puṇyam*), notamment de la satisfaction qu'on éprouve en pensant: Un moine si distingué se sert de mon *cīvara* (*anumodana*, Kathāv. VII. 5).

L'Abhidh. k. v. et la Bodhic. p. traitent cette question à peu près dans les mêmes termes, au sujet d'un point particulièrement intéressant. Quel est le mérite du culte rendu au Bouddha? *dvividhaṃ hi puṇyaṃ, tyāgānvayaṃ ca, tyāgād eva yad utpadyate, paribhogānvayaṃ ca, deyadharmaparibhogād yad utpadyate* (B. c. p.). — *sati pratigrahītari yuktaṃ tyāgānvayaṃ puṇyam . tatra hi pratyanugraheṇa grahītā yujyata iti . maitryādivad agṛhṇatīti maitryādiṣv iva maitryādivat* (b) *. agṛhṇati, asati pratigrāhake, puṇyaṃ bhavati . asaty api parānugrahe kuçalamūlādibalādhānāt . tathā vyatīte 'pi guṇavati tathāgatādau tad-*

न्वयं । परिभोगः परित्यक्तस्य वस्तुनः संघादिभिरुपभोगः(1) । अन्वयो ऽनुगमो दायकसंताने कुशलोपचय [Tib. 118a] इत्यर्थः ॥ अपुण्यं च तथाविधं परि[92a]भोगान्वयमित्यर्थः । तद्यथा देवकुलादिप्रतिष्ठापनं यत्र सत्त्वा हन्यन्ते । यथा यथा हि तत्कीर्तौ(2) प्राणिनो हन्यन्ते तथा तथा तद्देवकुलाद्युपभोगात्तत्कर्तॄणां संताने(3) परिभोगान्वयमपुण्यमपि जायत इत्येवमपुण्यं च तथाविधं भवति ॥

---

bhaktikṛtaṃ caitye dānaṃ puṇyaṃ bhavati. — Objection: *dānamānakriyā tu[sic] vyarthā prāpnoti . yadi svacittād eva puṇyaṃ bhavec cittenaiva dānamānau anuṣṭheyau, tata eva puṇyaprāpteḥ, na tatkarmasamutthāpikāyā bhakteḥ.* — Réponse: *prakṛṣṭataratvāt . naitad evam . kasmāt . yasmād dānamānau cittamātreṇa cintayato yā bhaktis tata iyaṃ dānamānau kurvato bhaktiḥ prakṛṣṭatarā* La raison en est évidente: on tue bien plus son ennemi en le tuant en effet qu'en disant: «Je tue mon ennemi». (A. k. v. 334b).

(a) *yassa bhikkhave bhikkhu cīvaraṃ paribhuñjamāno appamāṇaṃ cetosamādhiṃ upasampajja viharati appamāṇo tassa puññābhisando kusalābhisando.....* Il n'est pas sans intérêt de constater comment ce texte a été mis à contribution par les rédacteurs du Ratnarāçis. (ap. Çikṣās. 138, 8) *tatra Kāçyapa yo bhikṣur dāyakasya dānapater antikāc cīvarapiṇḍapātam paribhujyāpramāṇaṃ cetaḥsamādhiṃ samāpadyate 'pramāṇas tasya dāyakasya dānapateḥ puṇyakriyāvipākaḥ pratikāṅkṣitavyaḥ .... na tv eva tasya puṇyaniṣyandasya kaçcit kṣaya iti.* — Voir Abhidh. k. v. 277b 5 *yat tarhi sūtram iti vistaraḥ. apramāṇaṃ cetaḥsamādhim iti.*

(b) Le mérite de la *maitrī* ne dépend pas de l'accueil fait au bienveillant

1) Sur les dons faits au Saṃgha, leurs mérites, voir la théorie des *aupadhikapuṇyakriyāvastus*, dans Minayeff, Recherches, 168 et suiv.; Çikṣās. 138; Morris, J. P. T S. 1885, p. 38; Abhidh. k. v. 277b. — Les anciennes écoles ne sont pas d'accord sur le mérite des dons faits au Bouddha et au Saṃgha, voir Vasumitra et Bhavya.

2) Ms.... *yathā hi tatkirtau prāṇino...*, *tatkīrtito....* — Le tibétain n'a rien qui corresponde à *kīrti*, gloire, renom, mais il répète le mot *devakula*. ཇི་ལྟ་ཇི་ལྟར་ ལྷ་ཁང་དེར་ སྲོག་ཆགས་དག་ གསོད་པ་ དེ་ལྟ་དེ་ལྟར་ — On pense à la glose très douteuse de Hem., *kīrti* = *prāsāda* (Med. = *prasāda*); mais *prāsāda* correspond à peine à *devakula.* — Fait-on dans les temples des sacrifices à la gloire du donateur?

3) = *cittasaṃtāne*, dans le *moi.* — Comp. Abhidh. k. v., fol. 277b 8. — Voir ci-dessus 281, n. 1 (2).

चित्ताभिसंस्कारमनस्कर्मलक्षणा चेतना[1] चेति ॥

संक्षेपेणैतत्सप्तविधं कर्म भवति। कुशलाकुशला वाक्' कुशलाकुशलो विष्पन्दः' कुशलमविज्ञप्तिलक्षणं' अकुशलमविज्ञप्तिलक्षणं' परिभोगान्वयं पुण्यं' परिभोगान्वयमपुण्यं' चेतना चेति ॥

एते च सप्त धर्माः कर्माञ्जनाः कर्मत्वेनाभिव्यक्ताः कर्मलक्षणाः स्मृताः ॥

अत्रैके परिचोदयन्ति ॥ यदेतत्कर्म बहुविधमुक्तं तत्किमाविपाककालादवतिष्ठते अथ न तिष्ठत्युत्पत्त्यनन्तरविनाशित्वात्। यदि तावत्'

तिष्ठत्यापाककालाच्चेत्कर्म तन्नित्यतामियात्।
निरुद्धं चेन्निरुद्धं सत्किं फलं जनयिष्यति[2] ॥ ६

यद्युत्पन्नं सत्कर्माविपाककालं स्वरूपेणावतिष्ठत इति परिकल्प्यते तदियत्तं कालमस्य नित्यतापद्यते विनाशरहितत्वात्। पश्चाद्विनाशसद्भावान्न नित्यत्वमिति चेन्नैतदेवं [Tib. 118b]' पूर्वं विनाशरहितस्याकाशादिवत्पश्चादपि विनाशेन संबन्धाभावात्। विनाशरहितस्य चासंस्कृतत्वप्रसङ्गादसंस्कृतानां च विपाकादर्शनादविपाकत्वेन सदैवाफलस्यान्नित्यताभ्युपगम एव कर्मणामुपपद्यते। इत्येवं तावन्नित्यत्वे दोषः ॥ अथोत्पादानन्तरविनाशित्व[92b]मेव कर्मणामित्यभ्युपेतं। नन्वेवं सति।

निरुद्धं चेन्निरुद्धं सत्किं फलं जनयिष्यति।

अभावीभूतं सत्कर्माविद्यमानस्वभावत्वान्नैव फलं जनयिष्यतीत्यभिप्रायः ॥

---

1) ཡིད་ཀྱི་ ལས་ཀྱི་ མཚན་ཉིད་ཅན་ སེམས་ མངོན་པར་འདུ་བྱེད་པ་ སེམས་པ་.
— Voir ci-dessus p. 137, n. 4, 296 n. 4 et 303, n. 4.

2) གལ་ཏེ་ སྨིན་པའི་ དུས་ བར་དུ། གནས་ན་ ལས་ དེ་ རྟག་པར་ འགྱུར། གལ་ཏེ་ འགགས་ན་ འགགས་གྱུར་པ། ཇི་ལྟར་ འབྲས་བུ་ བསྐྱེད་པར་འགྱུར།།

तत्रैके निकायान्तरीयाः[1] परिहारं वर्णयन्ति । उत्पत्त्यनन्तरविनाशित्वात्संस्काराणामनित्यत्वदोषस्तावदस्माकं नोपपद्यते । यच्चाप्युक्तं '

निरुद्धं चेन्निरुद्धं सत्किं फलं जनयिष्यतीति ।

अत्रापि परिहारं[2] ब्रूमः ।

योऽङ्कुरप्रभृतिर्बीजात्संतानो ऽभिप्रवर्तते ।
ततः फलमृते बीजात्स च नाभिप्रवर्तते ॥[3] ८

इह बीजं क्षणिकमपि सत्स्वजातीयभाविफलविशेषनिष्पत्तिसामर्थ्यविशेषयुक्तस्यैव संतानस्याङ्कुरकाण्डनालपत्राद्यभिधानस्य हेतुभावमभ्युपगम्य निरुध्यते । यश्चायमङ्कुरप्रभृतिर्बीजात्संतानः प्रवर्तते ' तस्मात्क्रमेण सहकारिकारणवैकल्ये सति स्वल्पादपि हेतोर्विपुल[4]फलप्रचय उपजायते ॥ ऋते [Tib. 119a] बीजाद्विना बीजात्स चाङ्कुरादिसंतानो नाभिप्रवर्तते । तदेवं तद्भावे भावित्वेन तदभावे चाभावित्वेन बीजहेतुकत्वमङ्कुरादिसंतानस्य फलस्योप[प]दर्शितं[5] भवति । तदेवं ।

---

1) སྡེ་པ་ གཞན་དག་ ཁ་ཅིག་. — Voir ci-dessus 76, n. 1 et 274, n. 3.

2) ལན. — Mss. *kramam*, voir ci-dessous 313 l. 6.

3) མྱུ་གུ་ལ་སོགས་ རྒྱུན་ གང་ ནི། ས་བོན་ལས་ ནི་ མངོན་པར་འབྱུང་། དེ་ལས་ འབྲས་བུ་ ས་བོན་ ནི། མེད་ན་ དེ་ ཡང་ འབྱུང་ མི་འགྱུར༎ — Cette comparaison du *saṃtāna* végétal et du *cittasaṃtāna* (*vrīhisaṃtānasādharmya*) nous est connue par plusieurs textes, voyez Sarvadarçanas., note 186 (Muséon, N. S. III p. 46) et Abhidh. k. v., cité dans J. As. 1893, II. p. 299. Guṇamati et Vasumitra (Vaibhāṣikas) rejettent ces explications. — La succession *aṅkura*, *kāṇḍa* etc., est classique dans l'exposé du *bāhya pratītyasamutpāda* (Çālistambas.).

4) Le grand fruit d'une petite cause; c'est un des caractères (*ākāra*) du *pratītyasamutpāda* (Çālistambas.). Comp. Sum. Vil. 230. 29 *appakānaṃ pi kāraṇānaṃ vipulaphalapaṭilābhakāraṇena.....*; même doctrine dans Bodhisattvabhūmi I. xvii.

5) ou *ādarçitam*. — *saṃtāna* = *phala*. རྒྱུན་གྱིས་ འབྲས་བུ་.

बीजाच्च यस्मात्संतानः संतानाच्च फलोद्भवः।
बीजपूर्वं फलं तस्मान्नोच्छिन्नं नापि शाश्वतं[1]॥ ८

यदीह बीजमप्रसूयाङ्कुरादिसंतानं ज्वालाङ्गारादिविरोधि[2]प्रत्ययसांनिध्यान्निरुध्येत' तदा तत्र कार्यसंतानप्रवृत्त्यदर्शनात्स्यादुच्छेददर्शनं। यदि च बीजं न निरुध्येताङ्कुरादिसंतानश्च प्रवर्तेत तदा बीजस्यानिरोधाभ्युपगमाच्छाश्वतदर्शनं स्यात्। न चैतदेवमित्यतो नास्ति बीजस्य शाश्वतोच्छेद[3]प्रसङ्गः॥ यथा च बीजे ऽयं क्रमो ऽनुवर्णित एवं

यस्तस्माच्चित्तसंतानश्चेतसो ऽभिप्रवर्तते।
ततः [93a] फलमृते चित्तात्स च नाभिप्रवर्तते[4]॥ ९

तस्मात्कुशलाकुशलचेतनाविशेषसंप्रयुक्ताच्चित्ताद्यश्चित्त[5]संतानस्तद्धेतुकः प्रवर्तते' तस्मात्कुशला[6]कुशलचेतनापरि[7]भाविताच्चित्तसंतानात्सहकारिकारणसंनिधानाद्वैकल्ये सतोष्टानिष्टं फलमुपजायते सुगतिदुर्गतिषु। ऋते तु तच्चित्ताच्चित्तमन्तरेण स च नाभिप्रवर्तते। तदेवं।

---

1) གང་ཕྱིར་ ས་བོན་ལས་ རྒྱུན་ དང་། རྒྱུན་ལས་ འབྲས་བུ་ འབྱུང་འགྱུར་ཞིང་། ས་བོན་ འབྲས་བུའི་ སྔོན་ འགྲོ་བ། དེ་ཕྱིར་ ཆད་ མིན་ རྟག་ མ་ ཡིན།། — XVII *hbras-bu snon.*

2) Mss. *jvālamgūrādivirodhaḥ pratyayasānnidhyani*°.

3) Mss. °*ucchedarçanapra*°.

4) སེམས་ཀྱི་ རྒྱུན་ ནི་ གང་ ཡིན་པ། སེམས་ལས་ མངོན་པར་འབྱུང་བར་འགྱུར། དེ་ལས་ འབྲས་བུ་ སེམས་ལྟ་ཞིག། མེད་ན་ དེ་ཡང་ འབྱུང་ མི་འགྱུར།།

5) Mss. *mat tasyā cittasaṃtānaç*...

6) *akuçala* manque dans le tibétain.

7) Mss. °*cetanāya vibhāvit*.. *cittasaṃtānāt* — ཡོངས་སུ་བསྒོས་པ་ — Foucaux (d'après M. Vyut) *bsgos-pa* = *paribhāvita*. — *bsgom-pa* a le même sens. — *bsgos-pa* (to stain, to anoint, to infect with disease) ne se prend, d'après Jaschke, que dans un mauvais sens; mais *to anoint* donne *vāsita* (Foucaux), un des termes consacrés pour indiquer que la série intellectuelle est «parfumée», imprégnée par les *saṃskāras*. (Voir Sarvadarç. traduction dans Muséon, N. S. II. p. 192, note 118.)

चित्ताच्च यस्मात्संतानः संतानाच्च फलोद्भवः ।
कर्मपूर्वं फलं तस्मान्नोच्छिन्नं नापि शाश्वतं[1] ॥ १०

यद्य[Tib. 119b]र्हि[2] चरमचित्तमिव तद्धेतुफलपारंपर्याविच्छिन्नक्रमवर्तिनो भाविन[3]श्चित्तसंतानस्य हेतुभावमनुपगम्य कुशलं चित्तं निरुध्येत ' तदोच्छिन्नं[4] तत्कर्म स्यात् । अथाप्यनागतसंतानस्य हेतुभावमुपगम्य स्वरूपादप्रच्युतं स्यात् ' स्यात्तदानीं कर्म शाश्वतं । न चैतदेवमिति । तस्मात्क्षणिककर्माभ्युपगमेऽपि नास्त्युच्छेदशाश्वतदर्शनद्वयप्रसङ्ग इति ॥

तदत्र यथोदितकर्मप्रभेदव्याख्याने दश कुशलाः कर्मपथा व्याख्याताः । ते च

धर्मस्य साधनोपायाः शुक्लाः कर्मपथा दश ।
फलं कामगुणाः पंच धर्मस्य प्रेत्य चेह च[5] ॥ ११

त एते दश कुशलाः कर्मपथा धर्मस्य साधनोपाया निष्पत्तिहेतुभूता इत्यर्थः ॥ कः पुनरसौ कुशलकर्मपथव्यतिरिक्तो धर्मो नाम यस्यैते[6] साधनोपायत्वेन व्यवस्थाप्यन्ते । उच्यते । चित्तविशेष एव कश्चिद्धर्मशब्देनोक्तः ।

आत्मसंयमकं चेतः परानुग्राहकं च यत् ।
मैत्रं स धर्म

---

1) གང་ཕྱིར་ སེམས་ལས་ རྒྱུན་ དང་ ནི། རྒྱུན་ལས་ འབྲས་བུ་ འབྱུང་འགྱུར་ཞིང་། ལས་ ནི་ འབྲས་བུའི་ སྔོན་ འགྲོ་བ། དེ་ཕྱིར་ ཆད་ མེད་ རྟག་ མ་ཡིན॥

2) Comparer Sum. Vil. p. 226.11 *idāni vattamānakkhandhasantānā aparaṃ khandhasantānaṃ mayhaṃ n'atthi.*

3) Mss. *bhāvina citta*°. — d'un futur *cittasaṃtāna.*

4) *ucchinna* རྒྱུན་ཆད་པ་.

5) དཀར་པོའི་ ལས་ཀྱི་ ལམ་ བཅུ་པོ། ཆོས་ སྒྲུབ་པ་ཡི་ ཐབས་ ཡིན་ཏེ། ཆོས་ཀྱི་ འབྲས་བུ་ འདི་ གཞན་དུ། འདོད་པའི་ ཡོན་ཏན་རྣམས་ ལྔའོ॥

6) Mss. *yasyaiha.*

इत्यनेन। [1]अथ वा परिनिष्ठित[2]रूपा एते दश कुशलाः कर्मपथा धर्मशब्दवा[93b]च्या भवन्ति। क्रियमाण[3]रूपास्तु कुशलकर्मपथशब्दवाच्या भवन्ति। तदस्योक्तलक्षणस्य एते दश कुशलाः कर्मपथा निष्पत्तौ हेतुत्वेन व्यवस्थाप्यन्ते॥ कथं पुनरत्र प्रक्रान्ते[4] कर्मविभागे दश कुशलाः कर्मपथा इति। [Tib. 120a] उच्यते।

वाग्विष्पन्दो ऽविरतयो याश्चाविज्ञप्तिसंज्ञिता

इत्यादिना कायिकास्त्रयः कर्मपथा वाचिकाश्चत्वारो व्याख्याताः। चेतना चेत्यनेनाभिध्याव्यापादा[5]सम्यग्दृष्ट्याख्यास्त्रयो मानसा व्याख्याताः। इत्येवं दशापि कुशलाः कर्मपथा अत्र व्याख्याताः।

ते च यथोदितस्य धर्मस्य निष्पत्तिहेतवो भवन्ति॥ अस्य च धर्मस्य रूपशब्दगन्धरसस्प्रष्टव्यलक्षणाः पञ्च कामगुणाः प्रेत्य चादृष्ट परलोक इत्यर्थः। इह चेतीहलोक इत्यर्थः। फलमुपभुज्यत इति॥

एवं तावदे[6]कनिकायिकैराक्षेपपरिहारे वर्णिते सति तान्प्रत्यपरे दोषमुद्भाव्यान्याक्षेपपरिहारं वर्णयन्त आहुः।

---

1) *atha vā* est représenté par རྣམ་པ་ གཅིག་ཏུ་ ན.

2) ཡོངས་སུ་མཐར་གཏུགས་པའི་ ངོ་བོ་ ནི.

3) དེ་བཞིན་པའི་ ངོ་བོ་ ནི.

4) སྐབས་ཐལ་ཟིན་པ.

5) བརྣབ་སེམས་མེད་པ་ དང་། གནོད་སེམས་མེད་པ་ དང་། ཡང་དག་པར་ལྟ་བ་ ཞེས་བྱ་བ་ = *anabhidhyā-avyāpāda-samyagdṛṣṭy-ākhyās*, lecture correcte.

6) Mss. *evaṃ tāvad ekīnikāyor ākṣepepayavihāre.....tanprety apara doṣam udbhāvya yākṣepa°; ...tānprety..., ubhānyayā°.* — Le tibétain traduit *kaṃç cid ākṣepa°*.... ཁ་ཅིག་གིས་ བརྩད་པའི་ ལན་ བཏབ་པ་ ཡིན་ དང་། གཞན་དག་གིས་ དེ་ལ་ སྐྱོན་ བརྗོད་ནས། བརྩད་པའི་ ལན་ གཞན་ གདབ་པའི་ཕྱིར་ སྨྲས་པ།

बहवश्च महान्तश्च दोषाः स्युरपि कल्पना ।
यद्येषा तेन नैवैषा कल्पनात्रोपपद्यते[(1)] ॥ १२

यदि बीजाङ्कुरसाधर्म्येण चित्तसंताने शाश्वतोच्छेददर्शनद्वयदोषप्रसङ्गपरिहारः स्यात्' तदा बहवश्च दोषाः संख्याबहुत्वेन महान्तश्च दृष्टादृष्टविरोधेन परपक्षे प्राप्नुवन्ति। कथं कृत्वा। यदि हि बीजसंतानदृष्टान्तेन शालिबीजाच्छाल्यङ्कुरादिसंतान एव प्रवर्तते न विजातीयः' शाल्यङ्कुरादिसंतानाच्च शालिफलमेवोपजायते' न बिल्वफलं भिन्नजातीयत्वात्[(2)]। एवमिहापि कुशलचित्तात्कुशल[चित्त][(3)]संतान एव स्यात्स[94a]मानजातीयत्वान्नाकुशलाव्याकृत[(4)][चित्त]संतानो [Tib. 120b] विजातीयत्वात् । एवमकुशलाव्याकृतचित्तादकुशलाव्याकृतचित्तसंतान एव स्यान्नान्यो भिन्नजातीयत्वात्। कामरूपारूप्यावचराणामास्रवचित्तेभ्यः सदृशानामेव चित्तानां कामरूपारूप्य[ाव]चराणामास्रवाणामुत्पादः स्यान्न भिन्नजातीयानां। मनुष्यचित्तान्मनुष्यचित्तमेव स्यान्न देवनारकतिर्यगाद्यन्यचित्तं। ततश्च यो देवः स देव एव स्याद्यो मनुष्यः स मनुष्य एव स्यादित्यादि। ततश्चाकुशलमपि कुर्वतां देवमनुष्याणां [(5)]गतियोनिवर्णबुद्धीन्द्रियबलरूपभोगादिवैचित्र्यं न स्यादपायपतनं च । इष्यते चैतत्सर्वमिति ॥ एवं बहवश्च महान्तश्च दोषा यस्माद्बीजसंतानसाधर्म्यकल्पनायां प्रसज्यन्ते तस्मान्नैषा कल्पनात्रोपपद्यते ॥

---

1) གལ་ཏེ་ བརྟག་པ་ དེར་ འགྱུར་ན། ཉེས་པ་ ཆེན་པོ་ མང་པོར་ འགྱུར། དེ་ལྟ་ བས་ ན་ བརྟག་པ་ སྟེ། འདིར་ ནི་ འཐད་པ་ མ་ཡིན་ནོ॥

2) Un des caractères (*ākāra*) du *pratītyasamutpāda* est de procéder *tatsadṛçānuprabandhataḥ* (Çālistamba).

3) D'après le tibétain.

4) བྱུང་དུ་མ་བསྟན་པ་. — *citta* manque ici dans le tibétain comme dans les Mss.

5) Paris et Camb. °*manuṣyāṇām rāgavi*. . . .*nivarṇa*°; Calc. *rāgavirāga*. . . . འགྲོ་བ་ དང་ སྐྱེ་གནས་ དང་ རིགས་ དང་ བློ་ དང་. — Voir ci-dessous ad XVI. 20.

इमां पुनः प्रवक्ष्यामि कल्पनां यात्र योच्यते ।
बुद्धैः प्रत्येकबुद्धैश्च श्रावकैश्चानुवर्णितां[1] ॥ १३

का चासौ कल्पनेत्याह ।

पत्त्रं यथाऽविप्रणाशस्तथर्णमिव कर्म च ।
चतुर्विधो धातुतः स प्रकृत्या ऽव्याकृतश्च सः[2] ॥ १४

इह कुशलं कर्म कृतं सदुत्पादानन्तरमेव निरुध्यते न च तस्मिन्निरुद्धे फलाभावप्रसङ्गः । यस्माद्यदैव [Tib. 121 a] तत्कर्मोत्पद्यते तदैतस्य कर्मणो ऽविप्रणाशो[3] नाम वि[4]प्रयुक्तो धर्मः कर्तुः संताने समुपजायते [5]ऋणपत्त्रस्थानीयः । तदेवं पत्त्रं यथा ऽविप्रणाशस्तथा वेदितव्यः । यस्य चासावविप्रणाशाख्यो धर्म उत्पद्यते ' ऋणमिव तत्कर्म वेदितव्यं । यथा च ऋणपत्त्रावस्थानात्[6]प्रयुक्ते ऽपि धने धनिनो न धननाशो भवति संबध्यत एव स काला-

1) སངས་རྒྱས་རྣམས་ དང་ རང་རྒྱལ་ དང་། ཉན་ཐོས་རྣམས་ཀྱིས་ གང་ གསུངས་པའི། བརྟག་པ་ གང་ཞིག་ འདིར་ འཆད་པ། དེ་ ནི་ རབ་ཏུ་ བརྗོད་པར་བྱ།།

2) དཔང་རྒྱ་ ཇི་ལྟར་ དེ་བཞིན་ ཆུད། མི་ཟ་ ལས་ ནི་ བུ་ལོན་ བཞིན། དེ་ ནི་ ཁམས་ལས་ རྣམ་པ་བཞི། དེ་ ཡང་ རང་བཞིན་ ལུང་མ་བསྟན།། — Comm., par erreur, *chu-mi-za* — དཔང་ = témoin; རྒྱ་ = *mudrā*, etc. — ཆུད་ཟ་བ = to be fruitless in any work or action. — Mss. *dhātutaç ca*; voir p. 318. 6.

3) Mss. *avipranāçākṣo* (= °*ākhyo*) *nāma*. — L'*avipraṇāça* (P. W. das nicht spurlose Vorübergehen) ressemble fort à l'*adṛṣṭa* (*apūrva*).

4) ལྡན་པ་ མ་ཡིན་པ་.

5) *ṛṇapattra*, manque dans P. W.

6) Mss. °*sthānād aprayukte*. — «Bien que l'argent soit prêté..... (P. W., Harsac. 147. 4). — སྤྱད་ཀྱང་ = *bhukte 'pi*.

त्तरेण पंच[94b]मेन[1] धनस्कन्धेन, तथा विनष्टे ऽपि कर्मण्यविप्रणाशाख्यधर्मान्तरा[2]वस्था- नात्तन्निमित्तकेन फलेनाभिसंबध्यत एव कर्ता । यथा च ऋणपत्त्रं दातुर्धनाभ्यागमं कृत्वा निर्भुक्तं[3] सत्पुनरपि विद्यमानं वाऽविद्यमानं वा न धनाभ्यागमे समर्थमेवमविप्रणाशोऽपि दत्तविपाकः सन् विद्यमानो वा[ऽविद्यमानो वा] न शक्नोति निर्भुक्तपत्त्रवत्कर्तुः पुनरपि विपाकसंबन्धं कर्तुं ॥

यश्चायमविप्रणाशोऽस्माभिरुक्तः सूत्रान्तरोक्त[4]श्चतुर्विधो धातुतः स कामरूपारूप्या- वचरानास्रवभेदात्[5] ॥ प्रकृत्या ऽव्याकृत[6]श्च सः । कुशलाकुशलत्वेनाव्याकरणादव्याकृत एवाविप्रणाशः । यद्यसावकुशलानां कर्मणामकुशलः स्यात्, तदा कामं वीतरागाणां[7] न स्यात् । यदि च कुशलानां कुशलः स्यात्, समुच्छिन्न[8]कुशलमूलानां स न स्यात् । तस्मा- त्प्रकृत्यव्याकृत एवासौ ॥ किं च ।

---

1) Le tibétain ne traduit pas *pañcamena*; il porte དུས་གཞན་གྱི་ཚེ་བསྐྱེད་ དང་བཅས་པའི་ནོར་གྱི་ཕུང་པོ་.

2) °*antara*° manque dans le tibétain.

3) ***nirbhukta***, manque dans P. W. — རོར་གྱུར་པ་ = ayant été goûté.

4) ***asmābhir uktaḥ*** (སྨྲས་པ) ***sūtrāntaroktaḥ*** (གསུངས་མེད་).

5) L'*avipraṇāça* appartient soit au *kāmadhātu*....., soit à l'***anāsrava***.

6) L'*avipraṇāça* est *avyākṛta*, car, résultant d'une action ancienne *akuçala*, il existe dans la «série» du *vītarāga*, et réciproquement.

7) Les *vītarāgas* sont de plusieurs classes ***kāmadhātor bhavāgrād vā vītarāga iti***. *kāmavītarāgo 'nāgāmī*, ***bhavāgravītarāgo 'rhan*** (Abhidh. k. v., ap. Minayeff, p. 217, note, qui cite Itiv. § 96).

8) Le *kuçalamūlasamuccheda* est discuté dans Abhidh. k. v. Soc. As. fol. 317 et suiv.; il est parallèle au ***kleçaprahāṇa***; il résulte des vues erronées (*mithyā-dṛṣṭi*), notamment de la négation du fruit de l'œuvre; il se produit dans le Jambudvīpa, dans le Pūrvavideha, mais non point dans le monde des dieux (car, à peine nés, ils pensent: D'où viens-je? Où arrivé-je? Par quel acte? — il y a donc ***karmaphalapratyakṣatva***), ni chez les damnés (*āpāyikas*), càr leur esprit est trop faible (***kliṣṭākliṣṭayor prajñayor adṛḍhatvāt***).

प्रहाणतो[(1)] न प्रहेयो भावनाहेय एव वा ।

स चायमविप्रणाशः प्रहाणतो न प्रहेयः[(2)] । [Tib. 121b] पार्थग्जनिकानि कर्माणि दर्शनमार्गेनैव प्रहीयन्ते[(3] । मा भूदार्यः पृथग्जनकर्मसमन्वागत इति[3)] । अविप्रणाशस्तु तत्क-

---

1) = *darçanamārgapraheyaprahāṇataḥ* = en rejetant ce qui peut être rejeté par la vue des vérités. (Voir la note 3).

2) Akutobhaya (fol. 77a 6) = *so 'yam avipraṇāço duḥkhādidarçanapraheyaprahāṇān na prahīyate. phalavyatikrame* (འབྲས་བུ་འཕོ་བ་ན) *bhāvanāmārgeṇa prahīyate phalotpādanāc cāpi prahīyata eva. tasmād avipraṇāçena jāyate karmaṇām phalam.* — Buddhapālita (f. 265a 7) *so yaṃ duḥkhasamudayanirodhamārgadarçanapraheyaprahāṇān na prahīyate. so 'yaṃ phala-anyatra-vyatikrame* (འབྲས་བུ་གཞན་དུ་འཕོ་བ་ན) *bhāvanayā praheyaḥ. tasmād avipraṇāçena....* — འཕོ་བ་ traduit ci-dessous (320, n. 8) *saṃkrama, vyatikrama*; on a ailleurs *saṃkrānti.* — Comp. *samatikram*, M. Vyut. § 68. 2.

phalavyatikrama = dépasser la conséquence, y échapper; comme quand, par exemple, avant d'avoir goûté le fruit d'un acte, on s'élève par la *bhāvanā* à l'état d'Arhat. Dans ce cas, l'*avipraṇāça* n'agit pas. De même, il n'agit plus quand il a produit le fruit: on dit donc qu'il est abandonné soit par le *phalotpādana*, soit par le *phalavyatikrama.*

3—3) Cette phrase, dans le tibétain, précède *pārthagjanikāni*... འཕགས་པ་ ཡང་ སོ་སོར་སྐྱེ་བོའི་ ལས་ དང་ ལྡན་པར་ འགྱུར་དུ་ འོང་བས་ མཐོང་བའི་ ལམ་ ཀྱིས་'''' — འོང་བས་ paraît avoir un sens exactement opposé à *mā bhūt.* — Le sens est certain: Comme 'l'*ārya* est dépouillé des actions d'un *pṛthagjana*', il est évident que ces actions sont abandonnées par le seul *darçanamārga.* Sur le *prahāṇa* par *darçana* et *bhāvanā*, voir ci-dessous Chap. XXIV. — Il y a, pour l'*ārya*, ce que l'auteur appelle *pṛthagjanakarmasaṃkrama*: passage au dessus des actes (et des *kleças*) d'un homme ordinaire, c.-à-d. d'un être non arrivé au au fruit de la *srotaāpatti.* Celle-ci est conquise par l'emploi du seul [*āryasatya*]-*darçanamārga*, par opposition à la qualité de *sakṛdāgāmin*, etc., qui suppose la *bhāvanā* et se trouve au dessus du *kāmadhātu.* — Le *sakṛdāgamin* passe au dessus des actes du *pṛthagjana* (c.-a-d. qu'il ne peut plus les accomplir) et au dessus des conséquences de ces actes.

र्मप्रहाणेऽपि दर्शनमार्गेण न प्रहीयते । किं तु भावनामार्गेण वा[1] तस्य प्रहाणं भवति । धातुसमतिक्रमण[2]प्रहेय[3]एवेति वाशब्दो विकल्पार्थः ॥ यतश्चैवमविप्रणाशः कर्मविनाशे ऽपि न नश्यति । कर्मप्रहाणे ऽपि न प्रहीयते ।

तस्माद्विप्रणाशेन जायते कर्मणां फलं[4] ॥ १५

यदि पुनरप्यस्याविप्रणाशस्य कर्मणः प्रहाणेन[5] प्रहाणात्[6]प्रहाणतः[7] प्रहाणं स्यात् । कर्मणश्च संक्रमेण कर्मणो विनाशेन कर्मान्तर[95a]संमुखीभावेन विनाशः स्यात्को दोषः स्यादिति । उच्यते ।

प्रहाणतः प्रहेयः स्यात्कर्मणः संक्रमेण वा ।
यदि दोषाः प्रसज्येरंस्तत्र कर्मवधादयः[8] ॥ १६

यदि दर्शनमार्गेण पार्थग्जनिककर्मवदविप्रणाशः प्रहीयेत । तदा कर्मणो [वि]नाश एव स्यात् । कर्मविनाशाच्चार्याणामिष्टानिष्टकर्मफलविपाकः पूर्वकर्मफलहेतुको न स्यात् ।

---

1) = ཀྱང་ comme ci-dessous note 4.

2) ཁམས་ལས་ ཡང་དག་པར་འདས་པས་ ཀྱང་ སྤང་བར་བྱ་བ་ ཡིན་ནོ།

3) *eva* est traduit par ཀྱང་ — Quand l'agent passe d'un *dhātu* dans un *dhātu* supérieur, la conséquence des actes anciens ne l'accompagne plus: mais ce passage suppose la *bhāvanā*.

4) སྤོང་བས་ སྤང་བ་ མ་ཡིན་ཏེ། སྒོམ་པས་ སྤང་བ་ཉིད་ ཀྱང་ ཡིན། དེའི་ ཕྱིར་ ཆུད་མི་ཟ་བ་ཡིས། ལས་ཀྱི་ འབྲས་བུ་ བསྐྱེད་པར་འགྱུར༎

5) = སྤོང་བ་.

6) Manque dans le tibétain — *karmaṇaḥ prahāṇataḥ?*

7) = འདོར་བ་.

8) གལ་ཏེ་ སྤོང་བས་ སྤང་བ་ དང་། ལས་ འཕོས་པ་ཡིས་ འཇིག་ འགྱུར་ན། དེ་ལ་ ལས་ འཇིག་ལ་ སོགས་པའི་། སྐྱོན་རྣམས་སུ་ནི་ ཐལ་བར་འགྱུར༎ = *karmaṇaḥ saṃkramena ca naçyeta.* — Comm. *hpho-ba-yis.. hjigs-la sogs....*

ग्रकृतस्यैव कर्मणः फलोदयः स्यात् । कर्मफलाभावदर्शनाच्च मिथ्यादर्शनं स्यादिति । एवं कर्मवधादयो दोषाः प्रसज्यन्ते प्रहाणतः प्रहेयत्वाभ्युपगमे सत्यविप्रणाशस्य । एवं कर्मणः संक्रमेऽपि योज्यं ॥

सर्वेषां विषभागानां सभागानां च कर्मणां ।
प्रतिसंधौ सधातूनामेक उत्पद्यते तु सः[1] ॥ १७

भिन्नजातीयानि कर्माणि विषभागानि । सदृशानि सभागानि । तेषां सर्वेषामेव सभागानां च विषभागानां च कर्मणां [Tib. 122a] कामरूपारूप्यधातुप्रतिसंधिषु सर्वेषा-मपमर्दन एक एवाविप्रणाश उत्पद्यते । स चापि [स][2]धातूनां समानधातुकानामेवोत्पद्यते न विषभागधातुकानां ॥

कर्मणः कर्मणो दृष्टे धर्म उत्पद्यते तु सः ।
द्विप्रकारस्य सर्वस्य विपक्वेऽपि च तिष्ठति[3] ॥ १८

स चायमविप्रणाशाख्यो धर्मः सर्वस्यैव कर्मणः चेतनाचेतयित्वास्वभावस्य सास्रवा-

---

1) ཁམས་མཚུངས་ལས་ནི་ཆ་མཚུངས་དང་། ཆ་མི་མཚུངས་པ་ཐམས་ཅད་ཀྱི། དེ་ནི་ཉིང་མཚམས་སྦྱོར་བའི་ཚེ། གཅིག་པུ་ཁོ་ན་སྐྱེ་བར་འགྱུར།།

2) ཁམས་མཚུངས་ཏེ་ཁམས་མཉམ་རྣམས་ཀྱི་ — L'*avipraṇāça* disparaît, comme on a vu, quand il y a transition d'un *dhātu* (*kāma*°, etc.) dans un autre.

3) Notre Commentaire et les Kārikās: མཐོང་བའི་ཆོས་ལ་རྣམ་གཉིས་པོ། ཐམས་ཅད་ལས་དང་ལས་ཀྱི་དེ། ཐ་དད་པར་ནི་སྐྱེ་འགྱུར་ཞིང་། རྣམ་པར་སྨིན་ཀྱང་གནས་པ་ཡིན།།

Akutobhaya (fol. 77b 6) et Buddhapālita (fol. 266a 2) ཚེ་འདི་ལ་ནི་ལས་དང་ལས། རྣམ་པ་གཉིས་པོ་ཐམས་ཅད་ཀྱི། དེ་ནི་ཐ་དད་སྐྱེ་འགྱུར་ཞིང་། རྣམ་པར་སྨིན་...||. *ekaika* (322. 1) est traduit dans Akutobhaya ཐ་དད་པར་སྐྱེ་བ་; dans notre commentaire རེ་རེ.

नास्रवभेदेन वा द्विप्रकारभिन्नस्य दृष्ट धर्म इहैव जन्मनि कर्मणः कर्मण एकैको ऽविप्रणाश उत्पद्यते । स चायमविप्रणाशो विपक्केऽपि विपाके नावश्यं निरुध्यते निर्भुक्तपत्त्रवच्च विद्यमानोऽपि सन्न शक्नोति पुनरपि विपक्तुं(1) ।

फलव्यतिक्रमाद्वा स मरणाद्वा निरुध्यते ।
अनास्रवं सास्रवं च [95b] विभागं तत्र लक्षयेत्(2) ॥ १९

तत्र फलव्यतिक्रमान्निरुध्यते यथोक्तं भावनाहेय एवेति(3) । मरणान्निरुध्यते यथोक्तं '

प्रतिसंधौ सधातूनामेक उत्पद्यते तु सः ' इति(4) ।

स चायं सास्रवानां सास्रवोऽनास्रवाणामनास्रव इत्येवं विभागं लक्षयेत् ॥ तदेवं ।

शून्यता च न चोच्छेदः संसारश्च न शाश्वतं ।
कर्मणोऽविप्रणाशश्च धर्मो बुद्धेन देशितः(5) ॥ २०

---

1) འབྲས་བུ་ འབྱིན་པ་ (*phalaṃ dātum*) — Ci-dessus སྨིན་པ་.

2) དེ་ ནི་ འབྲས་བུ་ འཕོས་པ་ དང་། ཤི་བར་ གྱུར་ན་ འགག་པར་ འགྱུར། དེ་ ཡི་ རྣམ་དབྱེ་ ཟག་མེད་ དང་། ཟག་དང་བཅས་པར་ ཤེས་པར་བྱ།། — *hpho-ba* dans Comm.

3) Ci-dessus p. 319 l. 1.

4) Candrakīrti ne fait ici que transcrire Akutobhaya (fol. 78a 2): *tatra phalavyatikrama eva bhāvanayā prahāṇaṃ phalotpādanena prahāṇaṃ ceti. maraṇaṃ: pratisaṃdhikāla eka utpadyata eva.* Buddhapālita: *tasya karmaṇo 'vipraṇāçasya tasya nirodho dviprakāreṇa niçcitaḥ. phalavyatikramo maraṇaṃ ca. tatra phalavyatikrama eva «bhāvanāheya» iti nirdiṣṭaḥ. maraṇaṃ nirodhe* (? སྐྱེ་བར་གྱུར་པ་ ནི་ འགག་པ་དག་ ན) *pratisaṃdhikāla eka eva utpadyate.* — Je ne comprends le *nirodha* de l'*avipraṇāça* à la mort, que s'il s'agit de l'*avipraṇāça* correspondant à un acte qui doit être rétribué dans cette vie (*dṛṣṭadharmavedanīya*).

5) སྟོང་པ་ཉིད་ དང་ ཆད་ མེད་ དང་། འཁོར་བ་ དང་ ནི་ རྟག་པ་ མིན། ལས་རྣམས་ཆུད་མི་ཟ་བའི་ ཆོས། སངས་རྒྱས་ཀྱིས་ ནི་ བསྟན་པ་ ཡིན།། — XVII· *las rnam chud*

यस्मात्कर्म कृतं सन्निरुध्यते न स्वभावेनावतिष्ठते' तस्मात्कर्मणः स्वभावेनानवस्थानाच्छून्यता चोपपद्यते [Tib. 122 b] । न चैवं कर्मणोऽनवस्थानादुच्छेददर्शनप्रसंगः' अविप्रणाशपरिग्रहेण कर्मविपाकसद्भावात्' विपाकाभावे हि कर्मण उच्छेददर्शनं स्यात् । अविप्रणाशधर्मसद्भावाद्बीजसंतानसाधर्म्यपरिकल्पनाभावाच्च नानागतिजातियोनिधातुभेदभिन्नश्च पांचगतिकः संसारो विचित्रः सिद्धो भवति' न च शाश्वतवादप्रसंगः कर्मणः स्वरूपेणावस्थानानभ्युपगमात् । कर्मणां चाविप्रणाशो ऽविप्रणाशसद्भावादिति ॥ एवं निरवशेषाविद्यानिद्रापगमाद्विबुद्धेन भगवता यस्मादयं धर्मो देशितस्तस्माद्यत्पूर्वमुक्तं परेण ।

तिष्ठत्यापाककालाच्चेत्कर्म तन्नित्यतामियात् ।
निरुद्धं चेन्निरुद्धं सत्किं फलं जनयिष्यति । इति[1] ।

तदस्मत्पक्षे नोपपद्यत इति । तस्मादस्माभिरुपवर्णितकल्पनैव न्याय्येति ॥

अत्रोच्यते । किमिह भवन्तो गन्धर्वनगरप्राकारपतनाशंकितपातोद्विग्ना[स्त]त्परित्राणपरिश्रमायाससमापन्नाः[2]' ये नाम यूयं कर्मण्यनुपपद्यमाने तत्फलनिमित्तं विप्रवदध्वे ॥ यदि हि कर्मणः स्वरूपेणैवोत्पादः स्यात्तस्याविपाकमवस्था[96a]नान्नित्यत्वं स्यात्' विनाशादुच्छेदः स्यात् । यदा तु कर्म नैवोत्पद्यते स्वभावशून्यत्वात्तदा तस्य कुतोऽवस्थानं विनाशो वा यत एषा चिन्ता स्यात् ॥ अत्राह ।

कर्म नोत्पद्यते कस्मात् ।

आचार्य आह ।

निःस्वभावं यतस्ततः ।

यस्मान्निःस्वभावं [Tib. 123a] कर्म तस्मान्नोत्पद्यते[3] ॥ यदि खल्वेवं निःस्वभावत्वात्कर्म नोत्पद्यते[3]' तत्कथमेवमुक्तं भगवता ॥

1) = XVII. 6. Ci-dessus 311. 8.

2) = °*āyāsam āpannāḥ*.

3) Ms. *nopapadyate* — སྐྱེ་པ་.

न प्रणश्यन्ति कर्माणि कल्पकोटिशतैरपि ।
सामग्रीं प्राप्य कालं च फलन्ति खलु देहिनां ॥ इति[1]॥

उच्यते ।

यस्माच्च तदनुत्पन्नं न तस्माद्विप्रणश्यति[2]॥ २१

इत्येवं भगवतोऽभिप्राय इति । अतो नायमस्माकं बाधको विधिरिति ॥ अवश्यं चैतदेवं विज्ञेयं निःस्वभावं कर्मेति । अन्यथा हि ।

कर्म स्वभावतश्चेत्स्याच्छाश्वतं स्यादसंशयं ।
अकृतं च भवेत्कर्म क्रियते न हि शाश्वतं[3]॥ २२

यदि हि कर्म स्वभावतः स्यात् ' मुक्तसंशयं तच्छाश्वतं स्यात् ' स्वभावस्यान्यथाभावाभावात् । ततश्चाकृतमेव कर्म भवेत्[4]' कर्तुः स्वतन्त्रस्य क्रियया यदीप्सिततमं तत्कर्म ' एतच्च न युज्यते[4]। किं कारणं। यस्मात्क्रियते न हि शाश्वतं । शाश्वतं हि नाम यद्विद्यमानसत्ताकं[5]' यच्च विद्यमानं तस्य करणानुपपत्तेस्तन्नैव[6] कारणमपेक्षत[7] इति ॥ शुभाशुभे[8] कर्मण्य]कृत एव सकलस्य लोकस्य विपाको यस्मात्ततश्च '

---

1) Fréquemment cité, par exemple neuf fois dans Div. Av. (voir J. P. T. S. 1886, p. 86), Bodhic. p. IX. 71, Abhidh. k. v., 221 a 9.

2) གང་ཕྱིར་ ལས་ ནི་ སྐྱེ་བར་མེད། འདི་ལྟར་ རང་བཞིན་ མེད་ དེའི་ཕྱིར། གང་ཕྱིར་ དེ་ ནི་ མ་སྐྱེས་པ། དེ་ཕྱིར་ ཆུད་ཟར་ མི་འགྱུར་རོ།།

3) གལ་ཏེ་ ལས་ལ་ རང་བཞིན་ ཡོད། རྟག་པར་ འགྱུར་བར་ ཐེ་ཚོམ་མེད། ལས་ ནི་ བྱས་པ་མ་ཡིན་ འགྱུར། རྟག་ལ་ བྱ་བ་ མེད་ ཕྱིར་རོ།།

4—4) Manque dans le tibétain.

5) རྟག་པ་ ཞེས་བྱ་བ་ གང་ཞིག་ ཡོད་པ་མ་ཡིན་ལ། ??

6) བྱ་བ་.

7) རྒྱུ་.

8) Mss. °*açubhaṃ karma kṛtam eva* — དེའི་ཕྱིར་ དགེ་བ་ དང་ མི་ དགེ་བའི་

अकृताभ्यागमभयं स्यात्कर्माकृतकं यदि।
अब्रह्मचर्यवासश्च दोषस्तत्र प्रसज्यते[1]॥ २३

यदि ह्यकृतं कर्म भवेत्तदाऽकृताभ्यागमभयं[2] स्यात्। येनापि हि प्राणाति[96b]पातादिकं न कृतं तस्याप्यकृतमपि सत्तत्कर्मास्त्येवेति तेनाप्यस्य संबन्धादकृताभ्यागमभयं स्यात्॥ अब्रह्मचर्यवासश्च[3] तत्र पक्षे प्राप्नोति। किं कारणं। परिशुद्धब्रह्मचर्यवासानामपि [Tib. 123b] सतामकृतमेव ब्रह्मचर्यमस्तीति सर्वेषामेवाब्रह्मचर्यवासान्न कस्य चिन्निर्वाणेन भवितव्यं स्यात्॥ किं चातः।

व्यवहारा विरुध्यन्ते सर्व एव न संशयः।
पुण्यपापकृतोर्नैव प्रविभागश्च युज्यते[4]॥ २४

ये ह्येते कृषिवाणिज्यगोरक्षादयः क्रियारम्भाः फलार्थमारभ्यन्ते। तेषां सर्वेषामकृ-

---

ལས་ མ་བྱས་པར་ འཇིག་རྟེན་ལ་ རྣམ་པར་སྨིན་པར་ འགྱུར་རོ། དེའི་ཕྱིར་ = *tasmāc chubhāçubhaṃ karmākṛtavato lokasya vipāko bhaviṣyati tasmād akṛtābhyāgamabhayam....*

1) ཇི་སྟེ་ ལས་ ནི་ མ་བྱས་ ན། མ་བྱས་པ་ དང་ ཕྲད་ འཇིགས་ འགྱུར། ཚངས་ སྤྱོད་གནས་པ་ མ་ ཡིན་པའང་། དེ་ལ་ སྐྱོན་དུ་ ཐལ་བར་ འགྱུར།། — XVII *ji lta las ni....*

2) Mss. °*kṛtaka*°. Sur *akṛtābhyāgama* et *kṛtavipraṇāça*, objections des Jainas contre les Bouddhistes, voir Sarvadarç. s. trad. note 188, et Syādvādamañjarī § 18 (p. 151, où la stance est correctement expliquée) — Bodhic. p. IX. 73. — Advaitabrahmas. p. 125.

3) *brahmacaryāvāsa*, voir ci-dessus 49, n. 2. — Les *brahmavihāras* (Yogaç. I 33, V. 77) sont bien connus: ils constituent la *vihāraparamatā*. Les quatre *brāhmapuṇya*: construire un *stūpa*· donner un *ārāma*, *vihāra*; rétablir l'unité du *saṃgha* divisé; embrasser toutes les directions cardinales dans une pensée de *maitrī* (Abhidh. k. v. Soc. As. 336a) — Les trois ou quatre *brāhmaṇasatyas*, Aṅg. N. II, 176. et Pischel, Bruchstücke aus Idykutsari, p. 825.

4) ཐ་སྙད་ ཐམས་ཅད་ ཉིད་ དང་ ཡང་། འགལ་བར་ འགྱུར་བར་ ཐེ་ཚོམ་ མེད། བསོད་ནམས་ དང་ ནི་ སྡིག་ བྱེད་པའི། རྣམ་པར་དབྱེ་བའང་ འཐད་མི་འགྱུར།།

तानामेव विद्यमानत्वात्प्रारम्भवैयर्थ्यं स्यात्। घटं कुरु पटं कुर्वित्येवमादयश्च सर्व एव लौकिकव्यवहारा विरुध्यन्ते। घटादीनां सर्वेषामेव विद्यमानत्वात्॥ पुण्यकृदयं पापकृदयमिति च प्रविभागो न प्राप्नोति। उभयोरपि पुण्यपापकृतोरकृतयोरपि पुण्यपापयोः प्रत्येकं विद्यमानत्वात्॥ किं च।

तद्विपक्वविपाकं च पुनरेव विपक्ष्यति।
कर्म व्यवस्थितं यस्मात्तस्मात्स्वाभाविकं यदि[1]॥ २५

विपक्वविपाकस्यापि कर्मणः पुनर्विपाकदानमापद्यते स्वरूपादप्रच्युतत्वाद्विपक्वाविपाकावस्थायामिव। तदेवं यदि कर्म स्वाभाविकमिति मन्यसे यस्मात्तत्कर्म व्यवस्थितमस्ति तस्मान्निःसंशयं यथोपवर्णिता दोषाः प्राप्नुवन्ति सस्वभावत्वे। तस्मान्निःस्वभावं कर्म। यतश्च निःस्वभावं कर्म तस्माच्छाश्वतोच्छेददर्शनप्रसङ्गदोषो नैवास्माकमेवं व्याचक्षाणानामापद्यत इति॥

अत्राह। विद्यत एव [Tib. 124a] स्वभावतः कर्म तत्कारणसद्भावात्। इह यन्नास्ति न तस्य कारण[97a]मस्ति कूर्मरोमप्रावारस्येव। अस्ति च कर्मणः कारणं क्लेशाः। अविद्याप्रत्ययाः संस्काराः। उपादानप्रत्ययो भव इति वचनात्[2]। तस्माद्विद्यत एव कर्म स्वभावत इति॥ उच्यते। अयुक्तमेव। किं कारणं। यस्मात्।

कर्म क्लेशात्मकं चेदं ते च क्लेशा न तत्त्वतः।
न चेत्ते तत्त्वतः क्लेशाः कर्म स्यात्तत्त्वतः कथं[3]॥ २६

---

1) དེ་ནི་རྣམ་སྨིན་སྨིན་གྱུར་པ། ཡང་དང་ཡང་དུ་རྣམ་སྨིན་འགྱུར། གལ་ཏེ་རང་བཞིན་ཡོད་ན་ནི། གང་ཕྱིར་ལས་གནས་དེ་ཡི་ཕྱིར༎

2) *karman = bhava; kleça = upādāna.*

3) ལས་འདི་ཉོན་མོངས་བདག་ཉིད་ལ། ཉོན་མོངས་དེ་དག་ཡང་དག་མིན། གལ་ཏེ་ཉོན་མོངས་ཡང་དག་མིན། ལས་ནི་ཡང་དག་ཇི་ལྟར་ཡིན།

इहेदं कर्म क्लेशात्मकं क्लेशहेतुकं ते च क्लेशास्तत्त्वतो न सन्ति ॥ वक्ष्य[ति] हि[1]।

शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य ये ।
ते स्वभावान्न विद्यन्ते तस्मात्क्लेशा न तत्त्वतः ॥ इति ।

तदेवं तावन्न तत्त्वतः क्लेशास्तद्धेतुकं[2] कर्म तदानीं कुतस्तत्त्वतो भविष्यति । तस्मान्नास्ति कर्म स्वभावतः ॥

अत्राह । विद्यन्त एव क्लेशाः कर्माणि च तत्कार्यसद्भावात् । इह हि क्लेशकर्मणां देहाख्यं कार्यमुपलभ्यते । यस्य च कार्यमुपलभ्यते तदस्ति ' अविद्यमानस्य खपुष्पादेः कार्यादर्शनादिति ॥ उच्यते । स्युः क्लेशाः कर्माणि च यदि तत्कार्यं देहा[3] विद्येरन् । न तु विद्यन्त इति प्रतिपादयन्नाह ।

कर्म क्लेशाश्च देहानां प्रत्ययाः समुदाहृताः ।
कर्म क्लेशाश्च ते शून्या यदि देहेषु का कथा ॥[4] २७

यथा कर्म क्लेशाश्च शून्यास्तथा प्रतिपादितं [Tib. 124 b] । ततश्च कर्म क्लेशा यदा न सन्ति । तदा तत्कार्याणां देहानामसत्त्वे का कथा भविष्यति । नास्तित्वं तेषां पूर्वमेव सिद्धं यस्मात्तस्मान्नात्र कश्चिद्वक्तव्यविशेषोऽस्तीत्यभिप्रायः ॥

अत्राह । विद्यत एव स्वभावतः कर्म तत्फलभोक्तृसद्भावात् । यन्नास्ति न तस्य फलोपभोक्तास्ति ' तद्यथा गगनचूत[5]फलस्येति । अस्ति च कर्मणः फलोपभोक्ता ।

---

1) = XXIII. 2.

2) Mss. *kleçā yad atattvahetukam.* དེའི་ ཚེ་ དེ་དག་གི་ རྒྱུ་ཅན་.

3) Singulier dans le tibétain.

4) ལས་ དང་ ཉོན་མོངས་པ་དག་ ནི། ལུས་རྣམས་ཀྱི་ ནི་ རྐྱེན་དུ་ བསྟན། གལ་ཏེ་ ལས་ དང་ ཉོན་མོངས་པ། དེ་ སྟོང་ ལུས་ལ་ ཇི་ལྟར་ བརྗོད།།

5) ཨ་མྲའི་ཤིང་.

अविद्यानि[97 b]वृतो जन्तुस्तृष्णासंयोजनश्च सः।
स भोक्ता स च न कर्तुरन्यो न च स एव सः[1]॥ २८

तत्राविद्याऽज्ञानं तमः संमोह इति पर्यायाः। अविद्यया निवृतः छादितः। पाश्चगतिकसंसारे पुनः पुनर्जायत इति जन्तुः सत्त्वः पुद्गलः प्राणीति तस्यैव पर्यायाः। तृष्णा रागः सक्तिर्विसक्तिश्चेति[2] पर्यायाः। संयोजनं बन्धनं। तृष्णा संयोजनमस्येति तृष्णासंयोजनः। तृष्णाबन्धन इत्यर्थः। यथोक्तं सूत्रे। अविद्यानिवृताः सत्त्वास्तृष्णासंयोजना इति[3]॥

अथ च पुनरिदं पापं कर्म स्वयमेव कृतमस्य स्वयमेव विपाकः प्रत्यनुभवितव्य इति वचनात्[4]। स च भोक्ता कर्मफलस्य। स च [न] कर्तुरन्यो न च स एव सः। तत्त्वान्यत्वावाच्यत्वात्। तस्मात्फलोपभोक्तृसद्भावादस्त्येव कर्मेति॥

अत्रोच्यते। स्यात्कर्मणः [Tib. 125 a] कर्ता कर्मफलस्य चोपभोक्ता यदि कर्मैव स्यात्। न त्वस्ति। कथं कृत्वा।

न प्रत्ययसमुत्पन्नं नाप्रत्ययसमुत्थितं।
अस्ति यस्मादिदं कर्म तस्मात्कर्तापि नास्त्यतः[5]॥ २९

---

1) མ་རིག་ བསྒྲིབས་པའི་ སྐྱེ་བོ་ གང་། སྲེད་ ལྡན་ དེ་ ནི་ ཟ་བ་པོ། དེ་ ཡང་ བྱེད་ལས་ གཞན་ མིན་ཞིང་། དེ་ཉིད་ དེ་ ཡང་ མ་ཡིན་ནོ॥

2) སྲེད་པ་ དང་ འདོད་ཆགས་ དང་ ཆགས་པ་ དང་ རྣམ་པར་ཆགས་ པ.

3) *iti* ne fait pas partie de la citation.

4) Comparer pour la doctrine Div. Av. 54. 4, etc.

5) གང་གི་ ཕྱིར་ ན་ ལས་ འདི་ ནི། རྐྱེན་ ལས་ བྱུང་བ་ མ་ཡིན་ཞིང་། རྐྱེན་ མིན་ ལས་ བྱུང་ ཡོད་མིན་པ། དེ་ཕྱིར་ བྱེད་པ་པོ་ ཡང་ མེད॥

कर्म चेन्नास्ति कर्ता च कुतः स्यात्कर्मजं फलं ।
असत्यथ फले भोक्ता कुत एव भविष्यति ॥[1] ३०

यदि कर्म नाम किं चित्स्यात् ' तत्प्रत्ययसमुत्पन्नं वा भवेत् ' अप्रत्ययसमुत्पन्नं वा । यदि तावत्प्रत्ययसमुत्पन्नमिष्यते तन्न युक्तं प्रत्ययपरीक्षायामुक्तदोषत्वात्[2] । अथाप्रत्ययजनितं निर्हेतुकं तदपि हेतावसति कार्यं च कारणं चेत्यादिना[3] कर्मकारकपरीक्षायां विस्तरेण प्रतिपादितं । यतश्चैवं प्रत्ययसमुत्पन्नं वाऽप्रत्ययसमुत्पन्नं वा कर्मेदं न संभवति ' तस्मादस्य कर्मणः कर्तापि न संभवति ॥ यदा चैवं कर्म च कर्ता च नास्ति ' तदा निर्हेतुकं कर्मजं फलं कुतो भ[98 a]विष्यतीति । असति च फले कुत एव फलभोक्ता भविष्यतीति । सर्वमेतत्स्वभावतो ऽसंविद्यमानमेवेति विज्ञेयं ॥

अत्राह । यद्येवं नैःस्वाभाव्यं भावानां व्यवस्थापितं भवति ' यत्तर्ह्येतदुक्तं भगवता स्वयं कृतस्य कर्मणः स्वयमेव विपाकः प्रत्यनुभवितव्य[4] इति तदेतत्सर्वममुना न्यायेनापाकृतं भवति । कर्मफलापवादाच्च प्रधाननास्तिको[5] भवानिति ॥

उच्यते । न वयं नास्तिकाः । [अस्तित्व]नास्तित्वद्वयवादनिरासेन तु वयं निर्वाणा-[Tib. 125 b]पुरगामिनमद्वयपथं विद्योतयामः । न च कर्मकर्तृफलादिकं नास्तीति ब्रूमः किं तर्हि निःस्वभावमेतदिति व्यवस्थापयामः ॥ अथ मन्यसे । निःस्वभावानां भावानां व्यापारकारणानुपपत्तेस्तदवस्थ एव दोष इति ॥ एतदपि नास्ति ' सस्वभावानामेव व्यापारादर्शनान्निःस्वभावानामेव व्यापारदर्शनात् । तथा हि निःस्वभावा एव सन्तो घटादयो लोके स्वकार्यकृत उपलभ्यन्ते ॥

---

1) གལ་ཏེ་ལས་དང་བྱེད་མེད་ན། ལས་སྐྱེས་འབྲས་བུ་ག་ལ་ཡོད། ཅི་སྟེ་འབྲས་བུ་ཡོད་མིན་ན། ཟ་བ་པོ་ལྟ་ག་ལ་ཡོད།།

2) Chap. I.

3) = VIII. 4.

4) Voir ci-dessus 117, n. 7.

5) Mss. *pradhānān°*. — མེད་པ་པ་གཙོ་བོ་.

अपि चामुष्माद्दृष्टान्तात्स्पष्टतरादयमर्थोऽवसीयतां ।

यथा निर्मितकं शास्ता निर्मिमीत र्द्धिसंपदा ।
निर्मितो निर्मिमीतान्यं स च निर्मितकः पनुः[1] ॥ ३१

तद्यथैकं निर्मितकं शास्ता बुद्धो भगवानृद्धिसंपदा ऋद्धिप्रभावेन निर्मिमीत । स चापि निर्मितकः पुनर्योऽयं बुद्धेन भगवता निर्मितः स पुनर्भूयोऽन्य[म]परं निर्मितकं निर्मिमीत । तत्र य एष निर्मितकोऽपरस्य निर्मितकस्य निर्माता स शून्यो निःस्वभावस्तथा[2]गतस्वभावरहित इत्यर्थः । यश्चायमपरो निर्मितको यो निर्मितकेन[3] निर्मितोऽसावपि शून्यो निःस्वभावः [98b] तथागतस्वभावरहित इत्यर्थः । यथात्र[4] निःस्वभावानां निःस्वभावकार्यकृत्वं कर्मकर्तृव्यपदेशश्च भवति ।

तथा निर्मितकाकारः कर्ता यत्कर्म तत्कृतं ।
तद्यथा निर्मितेनान्यो निर्मितो निर्मितस्तथा[5] ॥ ३२

---

1) ཇི་ལྟར་སྟོན་པས་སྤྲུལ་པ་ནི། རྫུ་འཕྲུལ་ཕུན་ཚོགས་ཀྱིས་སྤྲུལ་ཞིང་། སྤྲུལ་པ་དེ་ཡང་སྤྲུལ་པ་ནི། སླར་ཡང་གཞན་ནི་སྤྲུལ་པ་ལྟར།། — Comparer Çūnyatāsaptati (Mdo XVII, fol. 29a 1) *ṛddhyā yathā nirmitakaṃ nirmimīta tathāgataḥ | nirmito nirmimītānyaṃ sa ca nirmitakaḥ punaḥ || tatra tathāgatanirmitaḥ çūnyaḥ, kiṃ nirmitakanirmitaḥ? ubhau nāmamātrakau vikalpamātrakau . tathā nirmitakākāraḥ kartā, karma nirmitakanirmitākāram, na kiṃ cid atra svabhāvena: ubhe vikalpamātrake.*

2) On suppose que le *nirmitaka* créé par Bouddha a l'apparence d'un Bouddha, comme Div. Av. 166. 8. Voir Bodhisattvabhūmi, I. v, sur le *prabhāva* et notamment la *nairmāṇikī ṛddhi* distinguée de la *pāriṇāmikī*. — Spence Hardy, *Manual*, p. 500.

3) Mss. *yo nirmāṇena nirmitako 'sāv api.*

4) Mss. *yato tra.*

5) དེ་བཞིན་བྱེད་པོ་དེས་ལས་གང་། བྱས་པའང་སྤྲུལ་པའི་རྣམ་པ་བཞིན། དཔེར་ན་སྤྲུལ་པས་སྤྲུལ་གཞན་ཞིག། སྤྲུལ་པ་མཛད་པ་དེ་བཞིན་ནོ།།

यो ह्यत्र कर्मणः कर्ता स निर्मितकाकारः [Tib. 126a] स्वभावशून्यः। तेन च स्वभावशून्येन स्वतन्त्र[1]कर्त्रा यत्किं चित्कर्म क्रियते तदपि स्वभावशून्यं। तद्यथा निर्मितकेनान्यो निर्मितको निर्मितस्तथा वेदितव्यं॥

यथोक्तमागमे[2]॥

एकस्य भाषमाणस्य सर्वे भाषन्ति निर्मिताः।
एकस्य तूष्णीभूतस्य सर्वे तूष्णीभवन्ति हि॥

तस्माद्द्वयवादिनां माध्यमिकानां कुतो मिथ्यादर्शनं॥ उक्तं चार्यसमाधिराजे[3]।

यद् सगतु कथां[4] कथेति नाथो
वीथिगतान्[5] मनुजान् कृपायमानः।
[6]निर्मित जिनु [तत्र][7] निर्मिनित्व
विचरति[8] तेषु प्रणीतबुद्धधर्मान्॥

---

1) *svatantra* manque dans le tibétain.

2) Dīgha N. II. p. 212. *ekasmiṃ bhāsamānasmiṃ sabbe bhāsanti nimmitā | ekasmiṃ tuṇhīm āsīne sabbe tuṇhī bhavanti te* || — Div. Av. 166. 8. *ekasya bhāṣyamāṇasya* (?) .... *ekasya tūṣṇībhūtasya sarve tūṣṇībhavanti te.*

3) Édition de la B. T. S. p. 41, 4–5, 8–9. Les pādas d'ordre impair présentent le schème ⏕⏑⏑⏑⏑⏑–⏑–⏑––. Les pādas pairs ⏕⏑⏑ ⏑⏑–⏑–⏑––

4) = གཏམ་རྣམས་.

5) Mss. et B. T. S. *vīthigato.* — D'après le tibétain, il s'agit des hommes.

6) Mss. et B. T. S. *nirmitu.* རྒྱལ་བས་ དེར་ནི་ སྤྲུལ་པ་རྣམས་ སྤྲུལ་ཏེ། = *nirmitān jinu tatra....* Le pluriel est confirmé par *teṣu.*

7) Donné par B. T. S.

8) སྟོན་ — fait apparaître.

प्राणिशतसहस्र[1] तं श्रुणित्वा
प्रणिदधयिंसु[2] वराग्रबुद्धज्ञाने ।
कद वय लभि [3] ज्ञानमेवद्रूपं
आशय ज्ञात्व[3] जिनोऽस्य[4] व्याकरोति ॥
[5] रश्मिशतसहस्र अप्रमेयान्
अवसिरि पादतलेहि धर्मराज्ञा[6] ।
सर्वि निरय शीतला भवन्ति
दुखमपनीय सुखं च वेदयन्ती[7] ॥
धर्म दशबलप्रभाषितेऽत्र[8]
मरुमनुज्ञान विशुद्ध भोति चक्षुः ।

इत्यादि ।

---

1) *taṃ* Mss. et B. T. S. — Il faut le pluriel.

2) Mss. *praṇidadhi citu*, B. T. S. *jinu*; Cambr. Add. 916 *citta*. Tib. = *praṇidhiṃ kar*. (སྨོན་ལམ་འདེབས་). — *praṇidadhayiṃsu*, d'après les formes *stavayiṃsu*, *bhramayīṣu* (Ed. Müller, Gāthās des Lalitavistara, Weimar, 1874, p. 27).

3) Mss. *jñāna*, *jñātva*.

4) = *vākaroti*. ལུང་སྟོན་.

5) = B. T. S. p. 44. 21. — Cette stance, comme la suivante, manque dans le tibétain. L'édition (B. T. S.) présente d'ailleurs une lacune que j'ai pu combler grâce à l'obligeance de M. C. Bendall.

6) Mss. *anaçivipādatarehi* Camb. Add. 916 (47a 7) *avaçiri pādatalehi*; B. T. S. et Camb. Add. 1481 *avasariyā janalehi.*

7) D'après Cambr.-Mss. — Nos Mss. *duḥkha aparīta sukhaṃ bhaved ayanti.*

8) Mss. *prabhāṣita . trā (tro) mar(n)u manu°*. — L'œil des dieux et des hommes....

(1)केचि स्पृह् जनेन्ति तत्र काले
परम अचिन्त्य ते हि लब्धलाभा ।
ये हि जिनु निमन्त्रितो नरेन्द्रो
न च पर्यन्त तेषु दक्षिणाया ॥

इत्यादिविस्तरः ॥

(2)तथा आर्यविमलकीर्तिनिर्देशे । तन्निर्मितबोधिसत्[त्वे]न गन्धसुगन्धायां लोकधा[तौ समन्त]भद्रतथागतोपभुक्तशेषं भोजनमानीतं नानाव्यञ्जनखाद्यादिसंप्रयुक्तं पृथक्पृथग्विविधरसमेकभोजनेन सर्वं [99a] तच्छ्रावकबोधिसत्त्वसंघराजराजामात्यपुरोहितान्तःपुरदौवारिकसार्थवाहादिजनपदं संतर्प्य प्रीत्याकारं नाम महासमाधिं लम्भयामासेति ॥

---

1) = B. T. S. p. 41. 9–10 — Mss. *kecit tasyahaṃ janayanti*, *keci tasya saṃ°*, *na ca dharmata (dharmanta) tasya lakṣuṇāyā.* — B. T. S. *na ca paryanta sa.* — *kāle* n'est pas traduit dans le tibétain གང་ གིས་ རྒྱལ་བ་ མི་དབང་ སྤྱན་ དྲངས་པ། དེ་ཡི་ སྦྱིན་པ་ མུ་མཐའ་མེད་ འགྱུར་ཏེ། རྙེད་མཆོག་ བསམ་གྱིས་མི་ཁྱབ་ དེས་ རྙེད་ ཅེས། ལ་ལ་དག་ ནི་ དེ་ལ་ མོས་ལ་ བསྙེན॥ — «Celui qui invite le Jina roi des hommes, il n'y a point de limites à sa *dakṣiṇā* et il obtient des dons suprêmes et incompréhensibles» pensant ainsi, quelques-uns s'attachent dévotement à lui. — Foucaux signale les équivalences སྦྱིན་པ = *dakṣiṇā*, མུ་མཐའ་ = *paryanta*.

2) Cette citation manque dans le tibétain — La première partie est dans un état désespéré, *taṃ nirmita bodhisane gandha sugandhāyālokadhās tatra tathagata°*, *tatratya tathāgata°*, *pratya tathāgata°*. Je complète d'après Laṅkāv. p. 106: *yathā mahāmate animiṣāyāṃ gandhasugandhāyāṃ ca lokadhātau samantabhadrasya tathāgatasya... buddhakṣetre* .. — M. Vyut. LXV. 15, Feer p 265, Nanjio, №№ 146, 147, 147, 149 et aussi 144, 145, 181; Wass. pp. 152, 222; Chavannes (I-tsing) p. 170; Bendall (auquel j'emprunte ces références), Çikṣās. p. 6, n. 5, 246, n. 1, 324, n. 1 et la traduction publiée d'après le chinois dans le journal Hansei Zasshei, vol. XIII.

Notre citation appartient visiblement au chapitre dont est extrait le passage Çikṣās. p. 270. 4.

विनये[1] च[2] पठ्यते । पापभिक्षुरप्रतिरूपको भगवता भिक्षुरभिनिर्मितस्तद्वचनेन[3] शीलवतोऽपि विशुद्धप्रतिज्ञासंवासः[4] प्रज्ञप्त इति ॥

न च[2] केवलं निर्माणदृष्टान्तेन नैःस्वभाव्यदर्शनमुपपद्यमानरूपमपि[5] चामीभ्यो दृष्टान्तेभ्यः स्फुटं नैःस्वभाव्यं भावानां प्रतीयतामिति प्रतिपादयन्नाह ।

<u>क्लेशाः कर्माणि देहाश्च [कर्तारश्च] फलानि च ।</u>
<u>गन्धर्वनगराकारा मरीचिस्वप्नसंनिभाः[6]</u> ॥ ३३

तत्र क्लेशा रागादयः क्लिश्नन्ति सत्त्वचित्तसंतानानीति[7] कृत्वा । कर्माणि कुशलाकुशलानेञ्ज्यानि[8] । देहाः शरीराणि । [Tib. 127b] कर्तार आत्मानः । फलानि विपाकाधिपत्य-

---

1) Mss. *vināya ca paçyate.* འདུལ་བ་ལས་ཀྱང་། ་་་་་ ཞེས་ འདོན་ཏེ། Un autre extrait du Vinaya, p. 46, n. 5.

2) Omis dans Paris et Calcutta.

3) དེའི་ཚིག་གང་གིས་ — Le sens exige *tadvacanāt* et je crois qu'il faut corriger དེའི་ ཚིགས་

4) Sic Cambridge. — Le tibétain traduit comme s'il lisait *viçuddhapratijña* = demeurer avec des *bhikṣus* dont la *pratijñā* est pure.

5) འཐད་པའི་ངོ་བོ.

6) ཉོན་མོངས་ ལས་ དང་ ལུས་རྣམས་ དང་། བྱེད་པ་པོ་ དང་ འབྲས་བུ་དག། དྲི་ཟའི་གྲོང་ཁྱེར་ ལྟ་བུ་ དང་། སྨིག་རྒྱུ་ རྨི་ལམ་ འདྲ་བ་ ཡིན།།

7) Remarquer la forme neutre qui n'est pas sans exemple. — On a parlé du *saṃkleça* et du *vyavadāna* de la «série». — Certaine école affirme que *kleça* = *karma*; mais cette identification est en contradiction avec l'Abhidharma (*karmakleçayor aikyaṃ syāt .... abhidharmavirodhaḥ*).

8) Sic Mss. — Abhidh. k. v., S. As. fol. 268b 5 *ānejyam iti ejṛ kampanam ity asya dhātor etad rūpam ānejyam iti . yadā tv āniṃjyam iti pāṭhas tadā irjyaiḥ* (?) *prakṛtyantarasyaitad rūpaṃ draṣṭavyam.* — Ibid. fol. 236b 6 *āniṃjam iti . prakṛtyantaram tasyaiva tad rūpaṃ vrajater etad rūpam āneṃjyam iti vā pāṭhaḥ.* — *āniñjya* = མི་གཡོ་བ = *akāmpya* (A. k. v. 302b 5). — D'après

निष्यन्दादीनि[1]। त एते क्लेशादयोऽर्था गन्धर्वनगरादिवन्निःस्वभावा वेदितव्याः। तस्मान्माध्यमिकानामेव भावानां स्वभावानभ्युपगमाच्छाश्वतोच्छेददर्शनद्वयप्रसङ्गो नास्तीति विज्ञेयं ॥

---

une note de M. Kern (Bodhicaryāv. p., *Bibl. Ind.*, p. 80, n. 4), ce mot n'a rien de commun, sauf le son, avec *iñj*, *iṅg*; il se rattache au vieux mot védique *anedya* = sanscrit *anindya*. — M. E. Leumann (Album Kern, p. 393) en même temps qu'il discute les formes *samiñjati*, *sammiñjayati*, *nimiñjayati*, croit pouvoir établir qu'il existait un vieil adjectif bouddhique *aneja* dans la langue correcte, *āniñja* dans la langue populaire et conformément aux règles du prâcrit. D'ou le pāli *ānejja* et le sanscrit bouddhique *āniñjya*. — E. Muller, Simplified Gr 8. — Comp. Candravyāk., Dhātup. I. 73 *ejr kampane*.

Voir Childers, s. voc. *ānejja*, *ānañja* (Add. *saṅkhāro*); M. Vyut. § 244. 124. § 21. 49 *āniñjyo nāma samādhiḥ*; Udāna, III, 3 (pp. 26—7) *ānañja* [*samādhi*]. — Pour la doctrine, Warren, Buddhism 179—180 (*karma* leading to immovability), Kathāv. XXII. 3., Puggalap p. 60, Aṅg. N. II, p. 184, Abhidh. k. v. fol. 302b *yad atra (dhyāneṣu) vitarkitaṃ vicaritam idam atrāryā iñjitam ity āhuḥ .... yad atra sukhaṃ sukham iti cetasa ābhoga idam atrāryā iñjitam ity āhuḥ ... trīṇi dhyānāni señjitāny uktāni bhagavatā .. .. kiṃ punaḥ kāraṇaṃ samādhisāpekṣatayā señjitam eva, anyatrāniñjyam uktam .... tadbhūmiṣu yataḥ karmavipākaṃ prati neñjatīti, bhogādisaṃvartanīyam iti.*

1) རྣམ་པར་སྨིན་པ་ དང་ བདག་པོ་ དང་ རྒྱུ་མཐུན་པ་རྣམས་ཏེ། — Le tibétain supprime le mot *ādi*. — Cinq *phalas* sont énumérés M. Vyut. 116. *niṣyanda*°, *adhipati*°, *puruṣakāra*°, *vipāka*°, *visaṃyoga*°; les mêmes Abhidh. k. v., fol. 324b 3 *(adhipati°, puruṣakāra°, niṣyanda°, vipāka°, visaṃyoga°)* et Bodhisattvabhūmi, I, viii, *(vipāka°, niṣyanda°, visaṃyoga°, puruṣakāra°, adhipati°)*.

Les explications fournies par ce dernier texte (Yogācāravāda), sont relativement claires: niṣyandaphala[a]: *yat punar akuçalābhyāsād akuçalārāmatā saṃtiṣṭhate, akuçalabahulatā, ... pūrvakarmasādṛçyena vā paçcāt phalānuvartanatā, tan niṣyandaphalam.* C'est le fruit, la disposition intellectuelle et morale qui résulte de l'*abhyāsa* d'après Çikṣās. 181. 10 et ceci confirme la définition de Bodhis. bh. — *nissando*, d'après Childers, «is pretty nearly a synonym of *phalam* or *vipāko*», ce qui est vrai pour les textes qu'il cite; mais on a Abhidh. s. VIII. 3 (J. P. T. S. 1884 p. 36) *sokādivacanaṃ pan' ettha nissandaphalanidassanam*, et ceci paraît encore confirmer l'impression que ce fruit désigne les dispositions morales *(kaukṛtya* &c.) qui résultent de l'acte.

(a) རྒྱུ་མཐུན་པ་ (Bodhic. p. ad VI. 14 = Çikṣās. 181. 10) = cause sufficient to produce observed effect. (Chandra Dās, sans reférence).

adhipatiphala: *sarveṣām indriyāṇāṃ dvāviṃçatīnāṃ svena sven 'ādhipatyena yat phalaṃ nivartate tad adhipatiphalam . tathā prāṇair aviyogo jīvitendriyasya.* (Voir ci-dessus *adhipatipratyaya*, 76, n. 7, 87, n. 2, et ci-dessous).

puruṣakāraphala: tout produit de l'industrie humaine.

अत्र च कर्मफलसंबन्धविचारे कुचोद्य(1)शेषाक्षेपपरिहारो मध्यमकावताराद्विस्तरेणा-वसेयः ॥

यथोक्तमार्यरत्नकूटसूत्रे (2)। पञ्च च भिक्षुशतानि ध्यानलाभीन्युत्थायासनेभ्यः प्रक्रा-

---

vipākaphala: la bonne destinée *(sugati)* fruit des bonnes œuvres «naturelles» (*kuçala sāsrava*), les mauvaises destinées, *(apāyāḥ)* fruit des actes mauvais *(akuçala)*. Le *vipākaphala* est produit dans la série même de l'agent; il semble que l'*adhipatiphala* soit extérieur: *svasaṃtāne vipākaphalam anyatrādhipataṃ phalam iti kṛtvā* (A. k. v., 323b 3). Kuroda, Outlines of the Mahāyāna, p. 9, explique: «The aggregate actions of all sentient beings give birth to the variety of mountains, rivers, etc. They are caused by aggregate actions and so they are called *adhipatiphala* (aggregate fruits)...... These good and bad actions yield fruits, not when they are done, but at some future time, so they are called *vipākaphala* (fruits that ripe at some future time»). [Cité par Walleser, Phil. Grundlage p. 88. 9.] Comparer la note A. k. v., 331b: *yena sarvasattvakarmādhipatyena trisāhasramahāsāhasraprādurbhāvas.* Cependant le même livre rattache au *niṣyandaphala* le *viṣamartupariṇāma (yasminn ṛtau varṣitavyaṃ tatra na varṣati,* etc.): C'est là, à considérer les êtres qui en souffrent, un *vipākaphala*, mais, en soi, c'est un *niṣyandaphala (tad vipākaphalam iti sattvasaṃtāne . idaṃ niṣyandaphalam iti vākyam (?) . tad vastv iti na tad vipākaphalam).*

visaṃyogaphala: le *kleçanirodha* en tant qu'il est obtenu par le Chemin; car, obtenu par un chemin mondain *(laukika mārga)*, il n'est pas définitif *(nātyantam anuvartate).*

Les discussions de l'A. k. v. sont trop abstruses pour que j'ose les aborder de front dans une note déjà trop étendue. [On y rencontre les formes *ādhipata*, et *ādhipatya.*]

1) Dans ce sens, marqué de l'astérisque dans P. W.

2) Les Mss. reproduisent ici l'histoire extraite du Ratnakūṭa dont la majeure partie a été citée ci-dessus p. 47 et suivantes. Nous nous bornerons à donner les extraits qui sont nouveaux. — Le tibétain se contente d'une brève référence, mais il semble bien que les traducteurs avaient devant eux un texte semblable au nôtre. འདིར་ སྤྲུལ་པའི་ དགེ་སློང་ གཉིས་ཀྱིས་ དགེ་སློང་ དམིགས་པ་(a) ལྔ་བརྒྱ་ བཏུལ་བ་ འཕགས་པ་ དཀོན་མཆོག་བརྩེགས་པའི་ མདོ་ལས་ གསུངས་པ་ མ་ཚང་བ་མེད་པར་ དཔེར་ བརྗོད་པར་བྱའོ། = Il faut apporter ici comme exemple l'histoire complète, d'après le Ratnakūṭa, de la conversion des cinq cents bhikṣus par deux bhikṣus artificiels.

Sur le Ratnakūṭa voir les observations de M. C. Bendall, Çikṣās. p. 52, n. 1.

(a) Je ne comprends pas le mot *dmigs-pa: [dhyāna]lābhin?*

नानि । इमां गम्भीरां धर्मदेशनामन[व]बुध्यमानान्यनवतरन्त्यनवगाहमानान्यनधिमुच्यमानानि ॥

भगवानाह । तथा ह्येते काश्यप भिक्षव आभिमानिका[1] इमामनास्रवां शीलविशुद्धिं[2] नावतरन्ति नावगाहन्ते नाधिमुच्यन्त उत्त्रस्यन्ति संत्रस्यन्ति संत्रासमापद्यन्ते । गम्भीरः काश्यप गाथाभिनिर्हारो[3] गम्भीरा च बुद्धानां भगवतां बोधिः । सा न शक्याऽनवरोपितकुशलमूलैः सत्त्वैः पापमित्रपरिगृहीतैरनधिमुक्तिबहुलैरधिमोक्तुं ॥

अपि चैतानि का[99 b]श्यप पञ्च भिक्षुशतानि काश्यपस्य तथागतस्य प्रवचनेऽन्यतीर्थिकश्रावका अभूवन् । तैरेव तस्य काश्यपस्य तथागतस्यान्तिकादुपालम्भाभिप्रायैरेषा धर्मदेशना श्रुता श्रुत्वा चैकचित्तप्रसादो लब्धः । एवं तैर्वाग्भाषिता आश्चर्यं यावन्मधुरप्रियभाणी[4] काश्यपस्तथागतोऽर्हन् सम्यक्संबुद्ध इति । त एतेनैकचित्तप्रसादेन प्रतिलब्धेन कालगतास्त्रायस्त्रिंशेषु देवेषूपपन्नास्ते ततश्च्युताः समाना इहोपपन्नास्तेनैव च हेतुनेह मम शासने प्रव्रजितास्तान्येतानि काश्यप पञ्च भिक्षुशतानि दृष्टिप्रस्कन्धानीमां[5] गम्भीरां धर्म-

---

1) *abhimāna*, comme dans la langue classique, désigne toute idée fausse (voir Bodhic. p. VIII. 33) et est synonyme de *abhimanana* (Ibid. IX. 5). — S'imaginer posséder ce que l'on ne posséde pas: *apariçuddhasamādhayo 'pare ābhimānika bhavanti. asantam apy avabhāsaṃ divyacakṣuravabhāsaṃ prayogāvasthāyāṃ santam ity eva paçyanti.* (Abhidh. k. v. fol. 363 a 5).

2) *çīlaviçuddhi.* Sur le sens de cette expression en général, voir Visuddhimagga. La *viçuddhi* d'une *pāramitā* consiste, croyons-nous, dans la suppression des trois idées fausses, par exemple, pour le *dāna*, l'idée de donneur, l'idée de l'objet donné, l'idée de celui qui reçoit. Voir Çikṣās. 270. 18 *yathā nirmito nirmitāya dadāti.* De même pour le *çīla*.

3) La lecture *gāthā* est douteuse. — Sur *cittam abhinīharati*, voir Sum. Vil. p. 220 (ci-dessus 137, n. 4).

4) Mss. °*māṇī.*

5) Comparer *nānādṛṣṭipraskandhaḥ*, Lalitavist. 312. 3 ལྟ་བ་ སྣ་ཚོགས་ལ་ ཞུགས་པ.

देशनां नावतरन्ति नावगाहन्ते नाधिमुच्यन्त उत्त्रस्यन्ति संत्रस्यन्ति संत्रासमापद्यन्ते । कृतं पुनरेषामनया धर्मदेशनया परिकर्म न भूयो दुर्गतिविनिपातं गमिष्यन्ति ' एभिरेव [1] च स्कन्धैः परि[नि][र्]वास्यन्ति ॥

अथ खलु भगवानायुष्मन्तं सुभूतिमामन्त्रयते स्म । गच्छ सुभूते एतान् भिक्षुन् संज्ञपय ॥ सुभूतिराह । भगवत एव तावदेते भाषितं विलोमयन्ति ' कः पुनर्वादो मम ॥ अथ भगवांस्तस्यां वेलायां येन मार्गेणैते भिक्षवो गच्छन्ति स्म तस्मिन् मार्गे द्वौ भिक्षू निर्मिमीते स्म ॥ [2] अथ तानि पञ्च भिक्षुशतानि येन मार्गेण तौ द्वौ भिक्षू निर्मितकौ [3] तेनोपसंक्रामन्ति स्म । उपसंक्रम्यैतदवोचन् ' कुत्रायुष्मन्तौ गमिष्यथः ॥ ताववोचतां । गमिष्याव आवामरण्यायतनेषु ' तत्र ध्यानसुखस्पर्शविहारैर्विहरिष्यावः ॥

[4] * * * * * * * तान्यपि पञ्च भिक्षुशतान्येतदवोचन् । वयमप्यायुष्मन्तौ भगवतो धर्मदेशनां नावतरामो नावगाहामहे नाधिमुच्यामहे उत्त्रस्य[100a]ामः संत्रस्यामः संत्रासमापद्यामहे । तेन वयमरण्यायतनेषु ध्यानसुखस्पर्शविहारैर्विहरिष्याम इति ॥ निर्मितकाववोचताम् । तेन ह्यायुष्मन्तः संगास्यामो न विवदिष्यामः अविवादपरमो हि श्रमणधर्मः । [5] * * * * * * यदिदमायुष्मन्त उच्यते [परि]निर्वाणमिति । कतमः स धर्मो यः परिनिर्वास्यति । कश्चित्पुनरत्र काय आत्मा वा सत्त्वो वा जीवो वा जन्तुर्वा पोषो वा पुरुषो वा पुद्गलो वा मनुजो वा मानवो वा यः परिनिर्वास्यति । कस्य वा क्षयात्परिनिर्वाणं ॥ तेऽवोचन् । रागद्वेषमोहक्षयात्परिनिर्वाणं ॥ [6] * * * * * निर्मितकाववोचतां । किं पुन-

---

1) C'est-à-dire sans reprendre le faix d'une nouvelle série de *skandhas*.

2) Nous retrouvons ici la citation p. 47. 1.

3) Peut-être *nirmitau*; *nirmitaka* est le substantif, *nirmita* l'adjectif.

4) Compléter d'après p. 47, 7–9.

5) Il manque quelque chose dans les deux extraits. L'omission est plus longue p. 47.

6) Compléter d'après p. 47. 12—48. 1.

रायुष्मतां संविद्यन्ते रागद्वेषमोहा यान् त्यपिष्यथ ॥ तेऽवोचन्। न तेऽध्यात्मं न बाह्यर्धा नोभयमन्तरेणोपलभ्यन्ते। नापि ते ऽपरिकल्पिता उत्पद्यन्ते।[1] * * * * * * *

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ कर्म[फल]परीक्षा नाम सप्तदशमं प्रकरणं ॥

---

1) Les deux textes concordent exactement, 48.3—50.3. — Les seules variantes dignes d'intérêt, 49,10 *skandhamārānupalabdhitaḥ* au lieu de °*anupalambhāt*, 49.13 *tīrṇo* au lieu de *uttīrṇo*, 49.14 *vimuktitaḥ* au lieu de *vinirmuktitaḥ*.

XVIII.

आत्मपरीक्षा नामाष्टदशमं प्रकरणं

अत्राह । यदि क्लेशाः कर्माणि च देहाश्च कर्तारश्च फलानि च सर्वमेतन्न तत्त्वं । केवलं तु गन्धर्वनगरादिवद[त]त्त्वमेव सतत्त्वाकारेण प्रतिभासते बालानां । किं पुनरत्र तत्त्वं कथं वा तत्त्वस्यावतार इति ॥

उच्यते । आध्यात्मिकबाह्याशेषवस्त्वनुपलम्भेनाध्यात्मं बहिश्च यः सर्वथाहंकारममकारपरिक्षय इदमत्र तत्त्वं । तत्त्वावतारः पुनः ।

सत्कायदृष्टिप्रभ[व]ानशेषान्
क्लेशांश्च दोषांश्च धिया विपश्यन् ।
आत्मानमस्या विषयं च बुद्ध्वा
योगी करोत्यात्मनिषेधमेव ॥

इत्यादिना म[ध्यमकावताराद्विस्त][1]रेणावसेयः [Tib. 127 a] ॥]

कायदृष्टिमूलकमेव संसारमनुपश्यंस्तस्याश्च सत्कायदृष्टेरालम्बनमात्मानमेव समनुपश्यन्नात्मानुपलम्भाच्च सत्कायदृष्टिप्रहाणं तत्प्रहाणाच्च सर्वक्लेशव्यावृत्तिं समनुपश्यन प्रथमतरमात्मानमेवोपपरीक्षते ' को ऽयमात्मा नामेति यो ऽहंकारविषयः[2] । स चायमहंकारस्य विषयः परिकल्प्यमानः स्कन्धस्वभावो वा भवेत्स्कन्धव्यति[101 b]रिक्तो वा ॥

---

1) Chap. VI, stance 120. — Muséon, N. S. I p. 234. — Au troisième pāda, *asyā* = *satkāyadṛṣter*. བདག་ནི་ འདི་ཡི་ ཡུལ་དུ་རྟོག་བྱས་ནས་. Notre version, à tort, འདི་ཡིས་ — Il y a *satkāyadṛṣṭi* quand il y a *ahaṃkāra*. Voir Muséon, N. S. V p. 201—202, des extraits de l'Abhidh. k. v. et la discussion du terme *satkāya*. — Cp. ci-dessus 294, n. 2 et ci-dessous fol. 108a.

2) = *ahaṃpratyayaviṣaya* = *ahaṃkārāspada*, Sarvadarç. s., note 115.

आधाराधेयपक्षद्वयपक्षाणामप्येकत्वान्यत्वपक्ष एवान्तर्भावात्संक्षेपेणैव[1] च विवक्षितत्वादेकत्वान्यत्वपक्षद्वयप्रतिषेधेनैवात्मनिषेधमारब्धुकाम[2] आचार्य आह ।

आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्भवेत् ।
स्कन्धेभ्योऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः[4] । १

किमर्थं पुनरन्यत्र तथागतपरीक्षायामग्नी[न्ध]नपरीक्षायां[5] च पञ्च पञ्च पक्षा उपन्यस्ताः । इह तु पुनः पक्षद्वयमेवेति ॥ उच्यते । येनैव तत्र प्रकरणद्वये पञ्च पञ्च पक्षा निर्दिष्टा अत एवान्यत्र निर्दिष्टत्वान्न पुनरिह निर्दिश्यन्ते । संक्षेपेण तु पक्षद्वयमुपन्यस्यत इति ॥

तत्र यदि स्कन्धा आत्मेति परिकल्प्यते । तदोदयव्ययभागुत्पादी च विनाशी चात्मा प्राप्नोति स्कन्धानामुदयव्ययभाक्त्वात्[7] [Tib. 127 b] । न चैवमिष्यत आत्मानेकदोषप्रसङ्गात् । वक्ष्यति[8] हि ।

नाप्यभूत्वा समुत्पन्नो दोषो ह्यत्र प्रसज्यते ।
कृतको वा भवेदात्मा संभूतो वाप्यहेतुकः ॥ इति ।

---

1) = *ātmani skandhāḥ, skandheṣv ātmā, skandhavān ātmā.* — *ādharapakṣa:* voir M. Vyut. § 208. 5 *rūpe ātmā bhājanavat.*

2) Mss. *saṃkṣepasyaiva ca.*

3) Mss. *ālabdhu°.* La leçon *ālabdha[vīrya]* «se défend et s'explique bien» (Mhv I. 628). — བརྩམ་པ་ = commencer.

4) གལ་ཏེ་ ཕུང་པོ་ བདག་ ཡིན་ན། སྐྱེ་ དང་ འཇིག་པ་ཅན་དུ་འགྱུར། གལ་ཏེ་ ཕུང་པོ་རྣམས་ལས་ གཞན། ཕུང་པོའི་ མཚན་ཉིད་མེད་པར་ འགྱུར།།

5) Chap. XXII. 1.

6) Chap. X. 14, p. 211. 15. — Voir ci-dessous les quatre *pakṣas.*

7) = བརྟེན་པའི་ཕྱིར་.

8) = XXVII. 12. Plus correctement *nāpy abhūtvā samudbhūto.*

तथा[1]।

न चोपादानमेवात्मा व्येति तत्समुदेति च।
कथं हि नामोपदानमुपादाता भविष्यति॥ इति।

किं च[2]।

स्कन्धा आत्मा चेदतस्तद्बहुत्वाद्
आत्मानः स्युस्ते ऽपि भूयांस एव॥
द्रव्यं चात्मा प्राप्नुयात्तादृशश्च
द्रव्ये वृत्तौ वैपरीत्यं च न स्यात्[3]॥
आत्मोच्छेदो निर्वृतौ स्यादवश्यं।
नाशोत्पादौ निर्वृतेः प्राक्[4] क्षणेषु।
कर्तुर्नाशात्[5]तत्फलाभाव एव
भुञ्जीतान्ये[6]नार्जितं कर्म चान्यः॥

इत्यादिना मध्यमका[7]वतारे विस्तरेण विहितविचारादपि गन्तो बोद्धव्य इति नेह पुनर्विस्तरप्रपञ्च आरभ्यते॥

---

1) = XXVII. 6.

2) Madhyamakāvatāra VI. 127. 128, fol. 235a 7 (255a 1). — Ces deux stances n'ont pas été relevées dans l'article cité ci-dessus du Muséon. — Lacune dans Paris et Calcutta, première stance b, c, d.

3) Ms. *tādṛçaç ca.* བདག་ནི་རྫས་སུ་འགྱུར་ཞིང་དེར་ལྟ་བ། རྫས་ལ་འཇུག་པས་ཕྱིན་ཅི་ལོག་མི་འགྱུར། — D'après le tibétain *tādṛçaç ca* est impossible. — *vaiparītya* = la variété des connaissances, bleu, etc. (Comm. fol. 351b 8 suiv.) Voir les Addenda.

4) C'est le *kṣaṇabhaṅga.* — Le *nirvāṇa* serait un *uccheda*, et, en outre, il y aurait à chaque moment production et destruction.

5) *nāçāt* est représenté par མེད་པས་.

6) Mss. *bhuñjītātmanāvarjitam.*

7) Mss. *ityādinā sāpekṣaparihāreṇa vihitavicārād api.* — ཞེས་བྱ་བ་ལ་

एवं तावत्स्कन्धा ग्रात्मा न भवति। स्कन्धव्यतिरिक्तोऽपि न युज्यते।

यदि हि स्कन्धेभ्यो [ऽन्य] ग्रात्मा भवेदस्कन्धलक्षणो भवेत्। यथा हि गोरन्योऽश्वो न गोलक्षणो भवति। एवमात्मापि स्कन्धव्यतिरिक्तः परिकल्प्यमानोऽस्कन्धलक्षणो भवेत्। तत्र स्कन्धाः सं[102 a]स्कृतत्वाद्धेतुप्रत्ययसंभूता(1) उत्पादस्थितिभङ्गलक्षणाः। तत्रास्कन्धलक्षण ग्रात्मा भवन् भवन्मतेनो(2)त्पादस्थितिभङ्गलक्षणा(3)युक्तः स्यात्। यश्चैवं भवति(4) सोऽविद्यमानत्वादसंस्कृतत्वाद्वा(5) खपुष्पवन्निर्वाणवद्वा नैवात्मव्यपदेशं प्रतिलभते। नाप्यहंकारविषयत्वेन युज्यत इति स्कन्ध[Tib. 128 a]व्यतिरिक्तोऽप्यात्मा न युज्यते॥

ग्रथ(6) वायमन्योऽर्थः। यद्यात्मा स्कन्धव्यतिरिक्तः स्यात्सोऽ[स्क]न्धलक्षणः स्यात्। रूपणा(7)नुभवनिमित्तोद्ग्रहणाभिसंस्करणविषयप्रतिविज्ञप्तिलक्षणाः पञ्च स्कन्धाः। ग्रात्मा च रूपादिव विज्ञानं स्कन्धेभ्यो व्यतिरिक्त इष्यमाणः पृथग्लक्षणसिद्धः स्यात्। पृथग्ल-

---

སོགས་པ་ དབུ་མ་ལ་ འཇུག་པ་ལས་ རྒྱས་པར་ རྣམ་པར་ དཔྱད་པ་བྱས་པ་ལས་

1) *hetu...sambhūtā* manque dans le tibétain.

2) *bhavanmatena* manque dans le tibétain.

3) *lakṣaṇa* manque dans le tibétain.

4) Mss. *yaç caivaṃ so na bhavati.* — གང་ཞིག་ དེ་ལྟ་བུ་ ཡིན་པ་ དེས་ ནི་ ཡོད་པ་མ་ཡིན་པའི་ཕྱིར་རམ་ ... ། — On a posé en principe que cela seul existe qui est momentané: *yat sat tat kṣaṇikam* (Sarvadarç. s.).

5) Mss. °*trāc ca.* — *khapuṣpa* correspond à *avidyamānatva*, *nirvāṇa* à *asaṃskṛtatva*.

6) *atha vā* = རྣམ་པ་ གཅིག་ཏུ་ན་.

7) *rūpaṇa* = གཟུགས་སུ་རུང་བ་ — M. Vyut. 245. 1153. 1154 *rūpaṇād*, ipyate. — *namanalakkhaṇam nāmaṃ*, *ruppanalakkhaṇaṃ rūpam*. — *rūpa*, objet instrument du ***nirūpaṇa***, Sarvadarç. s. note 129. — *saṃjñā*, voir cidessus 65, 3 — ***vijñāna*** et ***vedanā***, p. 60. 5. — ***abhisaṃskaraṇa*** est glosé par ***abhisaṃcetana***. ar exemple, un acte sera moralement qualifié ***maitrīsaṃprayuktāyāç cetanāyā*** *aitrīvaçena* (Abhidh. k. v., Soc. As. 332 b). — Voir ci-dessus 137, n. 4.

क्षणासिद्धश्च गृह्येत रूपादिव चित्तं । न च गृह्यते । तस्मात्स्कन्धव्यतिरिक्तोऽपि नास्ति[2] ॥

ननु च तीर्थिकाः स्कन्धेभ्यो व्यतिरिक्तमात्मानं प्रतिपन्ना भिन्नलक्षणमाचक्षते । तस्मात्तेषामबाधक एवायं विधिरिति । यथा च तीर्थिका आत्मनो भिन्नलक्षणमाचक्षते तथोक्तं मध्यमकावतारे[3] ।

आत्मा तीर्थ्यैः कल्प्यते नित्यरूपो
ऽकर्ता भोक्ता निर्गुणो निष्क्रियश्च ।
कं चित्कं चिद्भेदमाश्रित्य तस्य
भेदं याता प्रक्रिया तीर्थिकानां ॥ इत्यनेन ॥

[उच्यते] । सत्यं ब्रुवन्ति[4] तीर्थिकाः स्कन्धव्यतिरिक्तस्य लक्षणं । न पुनस्ते स्वरूपत आत्मानमुपलभ्य तस्य लक्षणमाचक्षते । किं तर्हि यथावदुपादायप्रज्ञप्त्यनवगमेन[5] नाममात्रकमेवात्मानं त्रासादप्रतिपद्यमानाः संवृतिसत्यादपि परिभ्रष्टा मिथ्याकल्पनयैव केव-

---

1) Mss. *rūpādivijñānaskandhebhyo*... — གཟུགས་ལས་ རྣམ་པར་ཤེས་པ་ བཞིན་དུ་.

2) Il y a un tiers-parti: «One must not say that the *pudgala* is either an *upādānaskandha*, or that is not» (Vātsīputrīyas, Bhavya apud Rockhill, p. 194). — Voir Chap. XXII, 2 et la thèse rencontrée ci-dessus (64, n. 3, et 283, n 4) de l'*avācyatva*.

3) Chap. VI. 142. Voir Muséon, N. S. I. p. 234. — ཟ་པོ་ རྟག་དངོས་ བྱེད་པོ་མིན་པའི་ དངོས། ཡོན་ཏན་ བྱ་ མེད་ མུ་སྟེགས་རྣམས་ཀྱིས་ བརྟགས། De même que la négation མེད་ tombe sur ཡོན་ཏན་ *(guṇa)* comme sur བྱ་ *(kriyā)*, de même la négation མིན་པ་ ne tombe-t-elle pas sur ཟ་པོ་ *(bhoktar)* et sur རྟག་དངོས་ *(nityarūpa)? [akartā abhoktā]* — Je crois néanmoins que les lectures des Mss., que j'adopte, sont correctes. — Voir Bodhic. p. IX. 58—60.

4) Mss. *satyam uṣanti tīrthikāḥ*. — སྨྲ་བ་ *(= ācakṣate)* est répété deux fois.

5) Voir ci-dessus 215. 1, 285, n. 4.

लमनुमानाभासमात्रविप्रलब्धाः सन्तो मोहात्परिकल्पयन्त्यात्मानं तस्य [च] लक्षणमाचक्षते । तेषां च कर्मकार[102b]कपरीक्षादिष्वात्मो[Tib. 128b]पादानयोः परस्परापेक्षिकीं सिद्धिं ब्रुवता संवृत्यापि प्रतिषेधो विहित एव ॥

उक्तं[1] च ।

यथादर्शमुपादाय स्वमुखप्रतिबिम्बकं ।
दृश्यते नाम तच्चैव न किं चिदपि तत्त्वतः ॥
अहंकारस्तथा स्कन्धानुपादायोपलभ्यते ।
न च कश्चित्स तत्त्वेन स्वमुखप्रतिबिम्बवत् ॥
यथादर्शमनादाय स्वमुखप्रतिबिम्बकं ।
न दृश्यते तथा स्कन्धाननादायाहमित्यपि ॥
[2]एवंविधार्थश्रवणाद्धर्मचक्षुरवाप्तवान् ।
आर्यानन्दः स्वयं चैवं भिक्षुभ्योऽभीक्ष्णमुक्तवान् ॥ इति ।

अतो न पुनस्तत्प्रतिपादनार्थं यत्न आलभ्यते ॥ उपादाय प्रज्ञप्यमान एव[।]विद्याविपर्यासानुगतानामात्माभिनिवेशास्पदभूतो मुमुक्षुभिर्विचार्यते ' यस्येदं स्कन्धपञ्चकमुपादानत्वेन प्रतिभासते किमसौ स्कन्धलक्षण उतास्कन्धलक्षण इति । सर्वथा च विचारयन्तो मुमुक्षवो नैवमुपलभन्ते भावस्वभावतः । तदेषां '

आत्मन्यसति चात्मीयं कुत एव भविष्यति[3] ।

---

1) J'ignore la source de cette citation. — Le début: ཇི་ལྟར་ མེ་ལོང་ བརྟེན་ ནས་སུ། rappelle Samādhirāja p. 29. 4. Voir le récit de la conquête de l'arhattva par Ānanda, apud Rockhill, Life of Buddha, p. 155.

2) Cette dernière stance manque dans le tibétain. — Mss. *evaṃvidhānārtha°* ... *bhikṣubhyo bhīknum uktavān.* — *abhīkṣṇam* est une conjecture de l'éditeur de la B. T. S.

3) = XVIII. 2 A, voir p. 347 n. 6.

आत्मानुपलम्भादात्मप्रज्ञप्त्युपादानं स्कन्धपञ्चकमात्मीयमिति सुतरां नोपलभन्ते । यथैव हि दग्धे रथे तदङ्गान्यपि दग्धत्वान्नोपलभ्यन्ते । एवं योगिनो यदैवात्मनैरात्म्यं प्रतिपद्यन्ते तदैवात्मीयस्कन्धवस्तुनैरात्म्यमपि नियतं प्रतिपद्यन्ते ॥

यथोक्तं रत्नावल्यां[1] ।

अहंकारोद्भवाः स्कन्धाः सोऽहंकारोऽनृतोऽर्थतः[2] ।
बीजं यस्यानृतं तस्य प्ररोहः सत्यतः कुतः ॥
स्कन्धानसत्यान्दृष्ट्वैवमहंकारः प्रहीयते ।
अहंकारप्रहाणाच्च न पुनः [Tib. 129a] स्कन्धसंभवः ॥ इति ॥

यथैव हि ग्रीष्मे मध्याह्नकालावसानमासादितस्य विघननभोमध्यदेशमाचिक्रंसो[3]रीषत्परि[103a]भ्रम्यमानपटुतरहुतभुग्विततस्फुलिङ्गानिव[4][5] विद्रुततरमहीमण्डलोत्तापनपरान् प्रदीप्तकिरणस्य किरणान् प्रतीत्य विद्रुततरमवनिदेशं चासाद्य विपरीतं च दर्शनमपेद्य सलिलाकारा मरीचय उपलभ्यमाना विदूरदेशावस्थितानां जन्मवतामतिप्र[6][7]सन्नाभिनीलजलाकारं प्रत्ययमादधति न तु तत्समीपगतानां । एवमिहापि यथाव[8]-

---

1) Même citation ci-dessous ad XXIII. 9.

2) བརྫུན་ comme ci-dessus (XVII. 1) = *mṛṣā*.

3) Mss. *viṣpane n°*. — ནམ་མཁའ་ སྤྲིན་དང་བྲལ་བའི་ དཀྱིལ་འཁོར་གྱི་ ཕྱོགས་ = *nirghananabho-maṇḍala-deça*.

4) Mss. *bhrasyaç ca*. — ཚུད་ཟད་ ཙར་ ཀྱུར་པའི་.

5) Mss. *spuliṅgāni ca*.

6) = སྐྱེ་བོ་.

7) Mss. *ativiprasama*. ཤིན་ཏུ་དངད་པ. — *abhinīla* (Lal. 120. 15. 18 ap. P. W. n'est pas traduit.

8) ཇི་ལྟར་ གནས་པའི་. — Mss. *yathāvadasthita°*. — Peut-être *yathāvadava°* (= དོན་ཇི་ལྟ་བ་བཞིན).

स्थितमात्मात्मीयपदार्थतत्त्वदर्शनविदूरदेशान्तरस्थितानां संसाराध्वनि वर्तमानानामविद्याविपर्यासानुगमान्मृषार्थ एव स्कन्धसमारोपः सत्यतः प्रतिभासमानः पदार्थतत्त्वदर्शनसमीपस्थानां न प्रतिभासते ॥

यथोक्तमाचार्यपादैः[1] ।

दूरादालोकितं रूपमासन्नैर्दृश्यते स्फुटं ।
मरीचिर्यदि वारि स्यादासन्नैः किं न गृह्यते ॥
दूरीभूतैर्यथाभूतो[2] लोकोऽयं दृश्यते यथा ।
न दृश्यते तदासन्नै[3]रानिमित्तो[4] मरीचिवत् ॥
मरीचिस्तोयसदृशो यथा नाम्भो[5] न चार्थतः ।
स्कन्धास्तथात्मसदृशा नात्मानो नापि तेऽर्थतः ॥ इति ॥

अत एव चात्मात्मीयानुपलम्भात्परमार्थदर्शनसमीपस्थो योगी नियतं भवति

निर्ममो निरहंकारः शमादात्मात्मनीनयोः[6] ॥ २

आत्मनि हितमात्मनीनं[7] स्कन्धपञ्चकमात्मीयमित्यर्थः । आत्मनो ऽहंकारविषय-

---

1) La mention *ācāryapādaiḥ* (= Nāgārjunena) manque dans le tibétain.

2) *yabhābhūto dṛçyate* = ཡང་དག་ མཐོང་. A la façon dont ceux qui sont éloignés voient le monde comme existant réellement, ceux qui sont près ne le voient pas de cette façon.

3) Tib. = *na tathā tadāsannaiḥ*.

4) Voir ci-dessus 24, n. 8, 123, n. 3, 133, n. 1.

5) Mss. *yathā combho... sadṛçā ātmāno....* ཆུ་མིན་ དོན་དུ་ མ་ཡིན་པ། = n'est ni eau, ni quelque chose de réel. De même, à la ligne suivante, deux négations: *nātmāno...*

6) བདག་ཉིད་ ཡོད་པ་མ་ཡིན་ན། བདག་གི་ ཡོད་པར་ ག་ལ་ འགྱུར། བདག་ དང་ བདག་གི་ ཞི་བའི་ ཕྱིར། རང་འཛིན་ ང་ཡིར་ འཛིན་ མེད་འགྱུར༎

7) *hita* = ཕན་པ་.

स्यात्मनोऽनस्य च [Tib. 129b] स्कन्धादेर्वस्तुनो ममकारविषयस्य शमादनुत्पादादनुपलम्भान्निर्ममो निरहंकारश्च जायते योगी ॥

ननु च योऽसावेवं निर्ममो निरहंकारश्च योगी भवति स तावदस्ति । सति च तस्मिन् सिद्ध आत्मा स्कन्धाश्चेति ॥ नैतदेवं । यस्मात् ।

निर्ममो निरहंकारो यश्च सोऽपि न विद्यते । [103b]
निर्ममं निरहंकारं यः पश्यति न पश्यति [(1)] ॥ ३

आत्मनि स्कन्धेषु च सर्वथानुपलभ्यमानस्वरूपेषु कुतस्तद्व्यतिरिक्तोऽपरपदार्थो भविष्यति योऽसौ निर्ममो निरहंकारश्चेति । यस्त्वेवमसंविद्यमानस्वरूपं निर्ममं निरहंकारं च पश्यति स तत्त्वं न पश्यतीति विज्ञेयं ॥

यथोक्तं भगवता ॥

शून्यमाध्यात्मिकं पश्य पश्य शून्यं बहिर्गतं ।
न विद्यते सोऽपि कश्चिद्यो भावयति शून्यतां ॥

तथा [(2)] ।

यो पि च चिन्तयि शून्यक धर्मान्
सोऽपि कुमार्गपपन्नकु बालः ।
अक्षरकीर्तित शून्यकधर्माः
ते च अनक्षर अक्षर उक्ताः ॥
शान्त पशान्त य चिन्तयि धर्मान्
सोऽपि च चित्तु न जातु न भूतः ।

---

1) རང་འཛིན་ ང་ཡིར་ འཛིན་ མེད་ ཀྱང་། དེ་ ཡང་ ཡོད་པ་ མ་ཡིན་ཏེ། རང་འཛིན་ ང་ཡིར་ འཛིན་ མེད་པར། གང་གིས་ མཐོང་བ་ མི་ མཐོང་ངོ༎

2) = ci-dessus 133. 14—134. 4 et ci-dessous XXI ad fin.

चित्तवितर्कणा सर्वि पपञ्चाः
तस्य[1] अचिन्तिय बुध्यथ धर्मान ॥ इति ।

तथा ।

स्कन्ध सभावतु शून्य विविक्त
बोधि[2] सभावतु शून्य विविक्त ।
यो पि चरेत्स पि शून्यसभावो
ज्ञानवतो न तु बालजनस्य ॥ इति ॥

तदेवं ।

ममेत्यहमिति क्षीणे बहिर्धाध्यात्ममेव च ।
निरुध्यत उपादानं तत्क्षयाज्जन्मनः क्षयः[3] ॥ ४

सत्कायदृष्टिमूलकाः सत्कायदृष्टिसमुदयाः सत्कायदृष्टिहेतुकाः सर्वक्लेशाः सूत्र[4] उक्ताः । सा च सत्कायदृष्टिरा[त्मा]त्मीयानुपलम्भात्प्रक्षीयते । तत्प्रहाणाच्च कामदृष्टिशीलव्रतात्मवादोपादानचतुष्टयं[5] प्रक्षीयते । उपादानक्षयाच्च जन्मनः पुनर्भवलक्षणस्य क्षयो भवति ॥ यतश्चायं जन्मनिवृत्तिक्रम एवं व्यवस्थापितः तस्मात् ।

कर्मक्लेशक्षयान्मोक्ष

---

1) *tasya* = དེའི་ཕྱིར་ = *tasmāt.* Dans les passages paralléles *sūkṣma.*

2) བྱང་ཆུབ་. — Mss. *dhātu.*

3) ནང་ དང་ ཕྱི་རོལ་ཉིད་དག་ལ། བདག་ དང་ བདག་གི་ སྙམ་ ཟད་ན། ཉེ་བར་ ལེན་[130 a]པ་ འགག་འགྱུར་ཞིང་། དེ་ཟད་པས་ན་ སྐྱེ་བ་ ཟད།། — Rapprocher le vers Yuktiṣaṣṭika: *mamety aham ity proktaṃ yathā kāryavaçāj jinaiḥ, tathā kāryavaçāt proktāḥ skandhāyatanadhātavaḥ* (Bodhic. p. 376. 15).

4) Voir par exemple le Ratnakūṭa cité ci-dessous fol. 107 a.

5) Voir Kern, Manual, p. 47; Warren, Buddhism, p. 190; Dīgha N. II, p. 58; Majjh. N. I. p. 66; Saṁ. N. II. p. 3.

इति स्थितं। उपादाने हि क्षीणे तत्प्रत्ययो भवो न भवति। भवे निरुद्धे कुतो जातिजरामरणादिकस्य संभव इति। एवं कर्म[104a]क्लेशक्षयान्मोक्षो भवतीति स्थितं॥ कर्मक्लेशानां तर्हि कस्य क्षयात्परिक्षय इति वक्तव्यं॥ उच्यते।

कर्मक्लेशा विकल्पतः।
ते प्रपञ्चात्प्रपञ्चस्तु शून्यतायां निरुध्यते॥ ५

अयोनिशो हि रूपादिकं विकल्पयतो बालपृथग्जनस्य क्लेश उपजायते रागादिकः। वक्ष्यति[1] हि।

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते।
शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य हि॥

उक्तं च सूत्रे[2]।

काम जानामि ते मूलं संकल्पात्किल जायसे।
न त्वां संकल्पयिष्यामि ततो मे न भविष्यसि॥ इति।

एवं तावत्कर्मक्लेशा विकल्पतः प्रवर्तन्ते। ते च वि[Tib. 130b]कल्पा अनादिमत्संसाराभ्यस्ताज्ज्ञानज्ञेयवाच्यवाचककर्तृकर्मकरणक्रियाघटपटमुकुटरथरूपवेदनास्त्रीपुरुषलाभालाभसुखदुःखयशोऽयशोनिन्दाप्रशंसादिलक्षणाद्विचित्रात्प्रपञ्चादुपजायन्ते।

स चायं लौकिकः प्रपञ्चो निरवशेषः शून्यतायां सर्वभावस्वभावशून्यतादर्शने सति निरुध्यते॥

कथं कृत्वा। यस्मात्सति हि वस्तुन उपलम्भे स्याद्यथोदितप्रपञ्चजालं। न ह्यनुपलभ्य वन्ध्यादुहितरं रूपलावण्ययौवनवतीं तद्विषयं प्रपञ्चमवतारयन्ति रागिणः। न चानवतार्य प्रपञ्चं तद्विषयमयोनिशो विकल्पमवतारयन्ति। न चानवतार्य कल्पनाजालमहं

1) = XXIII. 1.

2) Cité ad XXIII. 1 *gāthābhidhānāt*.

ममेत्यभिनिवेशात्सत्कायदृष्टिमूलकान् क्लेशगणानुत्पादयन्ति । न चानुत्पाद्य सत्कायदृष्ट्यात्मकान् क्लेशगणान् कर्माणि शुभाशुभानिञ्ज्यानि कुर्वन्ति । [1] न चाकुर्वाणाः कर्माणि जातिजरामरणशोकपरिदेवदुःखदौर्मनस्य ....[2]... एकजालीभूतं संसारका[104 b]न्तारमनुभवन्ति ॥ एवं योगिनो ऽपि शून्यतादर्शनावस्था निरवशेषस्कन्धधात्वायतनानि स्वरूप[तो] नोपलभन्ते । न चानुपलभमाना वस्तुस्वरूपं तद्विषयं प्रपञ्चमवतारयन्ति । न चानवतार्य तद्विषयं प्रपञ्चं विकल्पमवतारयन्ति । न चानवतार्य विकल्पमहं ममेत्यभिनिवेशात्सत्कायदृष्टिमूलकं क्लेशगणमुत्पादयन्ति । न चानुत्पाद्य सत्कायदृष्ट्यादिकं क्लेशगणं कर्माणि कुर्वन्ति [1)]। न चाकुर्वाणाः जातिजरामरणाख्यं संसारमनुभवन्ति ॥ तदेवमशेषप्रपञ्चोपशमशिवलक्षणां शून्यतामागम्य यस्मादशेषकल्पनाजालप्रपञ्चविगमो भवति ' प्रपञ्चविगमाच्च विकल्पनिवृत्तिः ' विकल्पनिवृत्त्या चाशेषकर्मक्लेशनिवृत्तिः ' कर्मक्लेशनिवृत्त्या च जन्मनिवृत्तिः ' तस्माच्छून्यतैव सर्वप्रपञ्चनिवृत्तिलक्षणत्वान्निर्वाणमित्युच्यते ॥

यथोक्तं शतके [(3)]।

धर्मं समासतोऽहिंसां [Tib. 131 a] वर्णयन्ति तथागताः ।
शून्यतामेव निर्वाणं केवलं तदिहोभयं ॥ इति ॥

[(4)] आचार्यभावविवेकस्तु श्रावकप्रत्येकबुद्धानां यथोदितशून्यताधिगममप्रतिपद्यमान एवं वर्णयति । अपरोत्पन्नप्रतिक्षणविनश्वर[(5)]संस्कारकलाप[(6)]मात्रम[नात्मा]नात्मीयमवलो-

1—1) Omis dans le tibétain.

2) Mss. *daurmanasyomasamekajvālī°*, *jaṁ samameka°*. — Le mot *upāyāsa* semble nécessaire. *osamañjasa?*, *aneka?* *saṁkleça?*

3) = XII. 23, voir Muséon, N. S. I. p. 239.

4) Dans le commentaire Prajñāpradīpa dont il a été question ci-dessus p. 7, n. 6.

5) Mss. *pratikṣaṇavisaroru.*

6) M. Max Walleser me communique, d'après l'édition noire, Mdo XXIII, fol. 205 b, le texte de Bhavya, reproduit ici par Candrakīrti: འདིར

कथत आर्यश्रावकस्याप्यात्मा[1]त्मीयवस्त्वभावाद्धर्ममात्रमिदं[2] जायते म्रियते चेति दर्शनमुत्पद्यते। अहंकारविषयो ह्यात्मा [तदभावात्तस्याप्यभावः][3]। तदभावादेव न कश्चिदाध्यात्मिकं बाह्यं वा वस्त्वस्तीति ममकारानुपपत्तेर्निर्ममो निरहंकारोऽहमिति न स्वरू[4]पविनिश्चितिरुपजायतेऽन्यत्र व्यव[हार][5]संकेतात्। प्रागेवाज्ञातसर्वसंस्कारदर्शिनां नि[105a]र्विकल्पप्रज्ञाचारविहारिणां महाबोधिसत्त्वानामिति। अत आह।

निर्ममो निरहंकारो यश्च सोऽपि न विद्यते॥ इति॥

तद्यमाचार्यो यथेवंविधे विषये नाचार्यपाद[6]मतानुवर्ती तथा प्रतिपादितं मध्यमकावतारे।

བཤད་པ་། འཕགས་པ་ ཉན་ཐོས་ འདུ་བྱེད་ ཚོགས་ གཞན་ དང་ གཞན་དུ་ སྐྱེས་པ་ སྐད་ཅིག་མ་རེ་རེ་ལ་ འཇིག་པའི་ ངང་ཅན་ བདག་དང་། བདག་གི་མེད་པ་ལ་ ངེས་པར་ལྟ་བ་ལ་ ཡང་ བདག་ ཅེས་བྱ་བའི་ དངོས་པོ་ མེད་པའི་ ཕྱིར་ སྐྱེ་བ་དང་། འཆི་བ་འདི་དག་ནི་ ཆོས་ ཙམ་དུ་ ཟད་དོ༎. — Notre traduction porte: འདུ་བྱེད་ཀྱི་ ཆོས་ གཞན་དང་གཞན་སྐྱེ་བའི་ སྐད་ཅིག་མ་ རེ་རེ་ལ་ འཇུག་པའི་ ངང་ ཅན་ བདག་ དང་ བདག་གི་ མེད་པ་ལ་ ངེས་པར་ལྟ་བ་ = *saṃskāradharmāṇām aparāparotpannānām pratikṣaṇanāçaçīlānām* (lire འཇིག་པ) *ātmātmīyābhāvam avalokayataḥ*.... — *kalāpa* (ཚོགས་) est remplaçé par ཆོས་. — Voir Bodhic. p. IX. 73. 102 (306. 6, 336. 11); Abhidh. k. v. Soc. As. 336b 9: *yena.... cittacaitasikakalāpena tat kāyakarmotthāpyate.* — L'*arūpa* doit être considéré *kalāpato*, ... *khaṇikato*, etc. (Vis. Magga, XX). — Abhidh. s. VI. 8. 10 (J. P. T. S. 1884, p. 29).

1) བདག་ ཅེས་བྱ་བའི་ དངོས་པོ་ མེད་པའི་ ཕྱིར = *ātmākhyavastv°*

2) སྐྱེ་བ་ དང་ འཇིག་པ་ འདི་དག་ ནི་ ཆོས་ཙམ་དུ་ ཟད་དོ།

3) དེ་ མེད་ན་ དེ་ ཡང་ མི་ འབྱུང་ལ། དེ་ མེད་པ་ ཁོ་ནའི་ ཕྱིར.

4) Mss. *na tv arūpa.*

5) ཐ་སྙད་ཀྱི་ བརྡར་བྱ་བ་ མ་གཏོགས་པར.

6) L'auteur des sūtras, Nāgārjuna.

दूरंगमायां तु धियाधिक[1]

इत्यत्रेति[2] न पुनस्तद्दूषणो यत्न आस्थीयते ॥

अत एवोक्तं भगवतार्याष्टसाहस्रिकायां[3] भगवत्यां । श्रावकबोधिमभिसंबोद्धुकामेन सुभूतेऽस्यामेव प्रज्ञापारमितायां शिक्षितव्यं । प्रत्येकबोधिमभिसंबोद्धुकामेन सुभूतेऽस्यामेव प्रज्ञापारमितायां शिक्षितव्यं । अनुत्तरां सम्यकसंबोधिमभिसंबोद्धुकामेन [Tib. 131b] सुभूते बोधिसत्त्वेन महासत्त्वेनास्यामेव प्रज्ञापारमितायां शिक्षितव्यमित्यादि ॥

आह[4] च ॥

यो इच्छतो सुगतश्रावकु ऽहं भवेयं
प्रत्येकबुद्ध भविज्ञा[5] तथ धर्मराज्ञो ।

---

1) Mss. *dhiyāpika iti* — རིང་དུ་སོང་བར་དེ་བློའང་ལྷག་པར་འགྱུར། et dans Madh. Av. རིང་དུ་སོང་བའི་བློ་ཡང་. — Le vers est incomplet. — C'est le dernier pāda de la stance 8 du Ier chapitre (fol. 226a 7 = p. 19 l. 1). La *dūraṃgamā* est la septième bhūmi, et le chapitre VII du livre lui est consacré. — Tandis que la méditation est la chose importante dans les stades avancés, le don et la pitié sont la caractéristique de la première *bhūmi:* དང་པོ་སྦྱིན་པ་ཉིད་ནི་ལྷག་པར་འགྱུར (Ibid I 9).

dūraṃgama citta, «effuse vagans», dans Dhammapada, 37; mais Therīgathā, 281 *dūraṃgamā satimanto* ...*dukkhass 'antaṃ pajānanti tena me samaṇā piyā.*

2) Mss. *iti .atreti na punas te dūṣ°*, *ity ucyate punanas.* — D'après le tibétain *ity atroktatvān na*....

3) Comparer, pour la doctrine, p. 379 de l'édition de Calcutta.

4) D'après le tibétain *api ca* ... *ity āha.* — Mètre Vasantatilaka (–⏑–– ⏑⏑–⏑⏑–⏑–––).

5) Voir Ed. Müller, Di.l. der Gāthās, p. 25 (Lalita p. 419 *gamyā*, °*yā*.

इमु क्षान्ति (1) नागत्य न शक्यति पापुणोतुं

यथ (2) आरपार गमनीयं अतीरदर्शी ॥ इति ॥

अत्राह । यद्येवमाध्यात्मिकबाह्यवस्त्वनुपलम्भाद्ध्यात्मं बहिश्चाहं ममेति कल्पनाजालानाम (3) नुत्पादस्तत्त्वमिति व्यवस्थापितं । यत्तर्ह्येतदुक्तं (4) भगवता ।

आत्मा हि आत्मनो नाथः [को नु नाथः] परो भवेत् ।
आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः ॥
आत्मा हि आत्मनो नाथः [को नु नाथः] परो भवेत् ।
आत्मा हि आत्मनः साक्षी कृतस्यापकृतस्य च ॥

तथार्यसमाधिराजे ।

कृष्णा शुभं (5) च न नश्यति कर्म
आत्मन कृत्व च वेदयितव्यं ।

---

1) *kṣ* ne fait pas position. — Mss. *kṣānti nāgati.* — བཟོད་པ་ འདི་ལ་ མ་བརྟེན = Ils ne peuvent obtenir (ce qu'ils recherchent), s'ils ne s'appuyent sur cette *kṣānti* (c'est-à-dire sur la Prajñāpāramitā et la doctrine du double vide) — Comparer *anutpattikadharmakṣānti*, *anutpādajñāna.* — On peut lire *āgatya*, *āgăcca.*

2) Mss. *yathă āre pāragamanīyaṃ atīra ca darçī.* དཔེར་ན་ ཚུ་རོལ་ པ་ རོལ་ འགྲོ་ དགོས་ མི་མཐོང་ བཞིན། — Le sens paraît clair: de même, sans la Prajñāp., on ne peut devenir ni *çrāvaka*, ni *pratyeka*, ni *buddha*; de même qu'un homme [au milieu de la rivière] ne peut aborder ni à droite ni à gauche, s'il ne voit pas la rive. D'après Pischel (Gr. der Pr.-Spr. § 165) *āra* = *'aara* = *avara.* D'après Foucaux (M. Vyut.) ཚུ་རོལ་ = *āram*, *arvāk.* — *gamanīyam* = *gantum.*

3) Mss. *kalpanājasanāmam anut°.*

4) Comparer Dhammapada 160. — La première stance est reproduite dans Abhidh. k. v. (apud Minayeff p. 226), et, avec variante (*yāti supaṇḍitaḥ*), Bodhic. p. IX. 73. — Elle est, dans ces deux textes, alléguée, comme elle l'est ici, en faveur de l'existence d'un moi.

5) Mss. *çubha* et *çukra* (དཀར་པ = *çukla*).

नो(1) च पि संक्रम कर्मफलस्य
नो च ग्रहेतुक(2) प्रत्यनुभोती ॥

इति विस्तरः। तत्कथं न विरुध्यत(3) इति ॥ उच्यते। इदमपि किं नोक्तं भगवता।

नास्तीह सत्त्व ग्रात्मा वा [105b] धर्मास्त्वेते सहेतुकाः। इति ॥

तथा हि(4) 'रूपं नात्मा रूपवान्नापि चात्मा रूपे नात्मा नात्मनि रूपं। एवं यावत् विज्ञानं नात्मा विज्ञानवान्नात्मा विज्ञाने नात्मा नात्मनि विज्ञानमिति ॥

तथा 'ग्र[न]ात्मानः सर्वधर्मा इति ॥ तत्कथमिदानीमनेनागमेन पूर्वकस्यागमस्य विरोधो(5) न स्यात्। तस्माद्देशनाभिप्रायोऽत्र भगवतोऽन्वेष्यः। सामान्येन तु भगवद्भिर्बुद्धैः प्रवचने(6) नेयनीतार्थविस्तरप्रभेदेऽशेषजगद्विनेयबुद्धिपद्माकरविबोधनपरैरादित्यकल्पैरनस्तंगतैर्महाकरुणोपायविज्ञानगभस्तिविस्तरैः(6)।

[ग्रात्मेत्यपि [Tib. 132a] प्रज्ञपितमन]ात्मेत्यपि देशितं।
बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितं(7) ॥ ६

---

1) Mss. *no citta sa(ṃ)kramati.* ལས་ དང་ འབྲས་བུ་ འཕོ་བའང་ མེད། Le *karman* et son fruit ne passent pas d'une existence dans une autre.

2) Mss. *nāra ahetukapratyanubhāvī* རྒྱུ་ དང་ རྐྱེན་མེད་པར་ ཡང་ འབྱུང་བ་ མེད། = *na cāpy ahetupratyayo bhavati.*

3) Mss. *nirudhyate.*

4) C'est le *caturdhā vicāra* que les sources pâlies développent volontiers, par exemple Saṃ. N. III, p. 44, IV, p. 287. — Nāgārjuna's Friendly Epistle, 49 (J. P. T. S. 1886, p. 15). — Il y a aussi quatre *pakṣas* M. Vyut. § 208, mais *ātmīyam rūpaṃ* remplace le *ātmani rūpam.*

5) Mss. *nirodho.*

6—6) Manque dans le tibétain.

7) བདག་གོ་ ཞེས་ ཀྱང་ བཏགས་གྱུར་ཅིང་། བདག་མེད་ ཅེས་ ཀྱང་ བསྟན་ པར་ གྱུར། སངས་རྒྱས་རྣམས་ཀྱིས་ བདག་ དང་ ནི། བདག་མེད་ འགའ་ མེད་ ཅེས་ ཀྱང་ བསྟན།

अत्र चायमभिप्रायः । इह ये (1आत्माभावविपर्यास1)(2)कुदर्शनघनतिमिरपटलावच्छादिताशेषबुद्धिनयनतया लौकिकावदाततदर्शनविषयानतिक्रान्तमपि भावजातमपश्यन्त[ो] व्यवहारसत्यावस्थिता एव सन्तः क्षितिसलिलज्वलनपवनाभिधानतत्त्वमात्रानुवर्णनपरा(3) मूलौदनो(4)दक[किण्व]ादिद्रव्यविशेषपरिपाकमात्रप्रत्ययोत्पन्नमदमूर्च्छादिसामर्थ्यविशेषानुगतमद्य(5)पानोपलम्भवत् कललादिमहाभूतपरिपाकमात्रसंभूता एव बुद्धीरनुवर्णयन्तः पूर्वान्तापरान्तापवादप्रवृत्ताः सन्तः परलोकमात्मानं चापवदन्ते ' नास्त्ययं लोको नास्ति परलोको नास्ति सुकृतदुष्कृतानां कर्मणां फलविपाको नास्ति सत्त्व उपपा(6)दुक इत्यादिना । तदपवादाच्च स्वर्गापवर्गविशिष्टेष्टफलविशेषान्तेपपराङ्मुखाः सततसमितमकुशलकर्माभिसंस्कारण[106a]प्रवृत्ता नरकादिमहाप्रपातपतनाभिमुखाः ॥ तेषां तदसद्दृष्टिनिवृत्त्यर्थं चतुरशीतिचित्त(7)चरितसहस्रभेदभिन्नस्य [Tib. 132b] सत्त्वधातोर्यथाशयानुवर्तकैरशेषसत्त्वधातूत्तार-

---

1—1) Non représenté dane le tibétain. — Mss. *ye cātmā yā sa(r)viparyāsa?*

2) ལ་དན་པའི་ lire བླ་དན་པ་.

3) རྗེས་སུ་འཇུག་ལ་ = *anuvartana.*

4) Mss. *mūlodanodakasyādidravya°*. — རྩ་བ་ དང་ ཆན་ དང་ ཕབས་ དང་ ཆུ་ དང་ དྲོད་ལ་ སོགས་པ་ *rtsa* = *mūla*, *phabs* = *kiṇva* (ce qui est excellent, voir Sarvadarç. s. *Bibl. Ind.* p. 3, 2 en remontant. — Çarad Candra *kiñcana*??), *chu* = *udaka*; mais *chan* = *surā*, et *drod* = *uṣṇa*.

5) = ཆན་.

6) བརྫུས་ཏེ་ སྐྱེ་བ་. — Comparer les doctrines d'Ajita, Dīgha N. I. p 55 *n'atthi ayam loko, n'atthi paro loko . . . n'atthi sattā-opapātikā. . .*

7) Le tibétain porte simplement སྤྱོད་པ་ = *carita.* — Le *sattvaloka* (= *jīva°*, Bodhic. p. II. 62, voir Bodhisattvabhūmi, I, xvii, § 5) s'oppose au *bhājanaloka* (Dh.-s. LXXXIX, cp. Childers, p. 453). — Je ne sais rien de cette division en 84000 catégories.

णाक्षिप्तप्रतिज्ञासंपादनतत्परैः[1] प्रज्ञोपायमहाकरुणासंभारपुरःसरैर्[2]निरुपमैरेकजगद्बन्धुभि[3]र्निरवशेषक्लेशमहाव्याधिचिकित्सकैर्[4]महावैद्यराजभूतैर्[5](6हीनमध्योत्कृष्टविनेयजनानुजिघृत[7]णा हीनानां विनेयानामकुशलकर्मकारिणामकुशलादि निवर्तयितुं[6]) बुद्धैर्भगवद्भिः क्वचिदात्मेत्यपि प्रज्ञपितं । लोके[8] व्यवस्थापितं । अहेतुवादप्रतिषेधोपपत्तिश्च कर्मकारकपरी[9]क्षातो[10] नाप्यहेतुतः इत्यतो मध्यमकावताराच्च[11] विस्तरेण वेदितव्येति तत्प्रतिषेधार्थं नेह पुनर्यत्न आस्थीयते[12] ॥

ये तु (13सद्भूतात्मदृष्टिकठिनातिदीर्घतरात्मात्मीयभावस्नेहसूत्रकारबद्धा विहंगमा इव[13]) सुदूरमपि गताः[14] कुशलकर्मकारिणोऽकुशलकर्मपथव्यावृत्त्या अपि न शक्नुवन्ति त्रैधा-

---

1) Voir ci-dessus 302, n. 3.

2) Tib. = doués d'*upāya*, de science et de pitié.

3) *ekajagad*°, non traduit. 4) *niravaçeṣa*°, non traduit.

5) Sur Bouddha médeçin, voir J. R A S. 1903, 578.

6—6) Manque dans le tibétain.

7) Cp. M. Vyut. 245, 1263. 8. 4. *praṇīta*°, *madhya*°, *hīnadhātuka*. Cette division des disciples en trois catégories peut servir à plusieurs usages; elle correspond à la distinction des trois Véhicules; elle justifie l'hypothèse d'un triple enseignement. — Cp. le *mṛdu*, *madhya*, *adhimātra*.

8) *loke* manque dans le tibétain.

9) Chap. VIII.

10) Derniers mots de la 1ère kārika du premier chapitre. Voir ci-dessus 12 13 — *ato:* L'auteur renvoie au çāstra (Madhyamakaçāstra).

11) Chap. VI. 43. — Voir Bendall, Subhāṣitas. Muséon, N. S. IV. p. 391, n. 4, le texte sanscrit et la traduction tibétaine.

12) Il y a deux *saṃmohas: phalavipāka*°, *tattvārtha*° (M. Vyut. § 245. 1130, 1131). Le premier détruit la vérité relative (*saṃvṛtisatya*); le second se confond avec cette vérité. — La négation du moi est bien plus nocive que l'hérésie du moi, voir Bodhisattvabhūmi I. iv: *pudgaladṛṣṭiko jantur jñeye kevalam muhyen na tu sarvaṃ jñeyam apavadeta, na tato nidānam apāyeṣūpapadyeta, na visaṃvādayet, na çaithiliko bhavec chikṣāpadeṣu. ...*

13—13) Mss. *sūtrakāl(r)abaddhā* **vi**(*tyetomadhyamakāro*)*haṃgamā* བདག་ཏུ་ཡང་དག་པར་ལྟ་བ་མཁྲེགས་པ་ཐུ་སྲད་བུ་ཆེས་ཤིན་ཏུ་རིང་བས་ལྷོད་པ་ལྟར = *sadbhūtātmadṛṣṭikaṭhinātidīrghaçithilamahāsūtra*[*baddhā*] *vihaṃgamā iva*; lectures très suspectes, car la place de *çithila* est ci-dessous, p. 358 l. 2.

14) རིང་པོར་ཕྱིན་ཡང་ Mss. *sudūramavigatāḥ*.

तुकभवोपपत्तिमतिवाह्य[1] शिवमजरममरणं निर्वाणपुरमभिगन्तुं । तेषां मध्यानां विनेयानां सत्कायदर्शनाभिनिवेशशिथिलीकरणाय निर्वाणाभिलाषसंजननार्थं बुद्धैर्भगवद्भि[2]र्विनेयजनानुग्रहचिकीर्षुभि[2]रनात्मेत्यपि देशितं ॥

ये तु पूर्वाभ्यासविशेषानुगतगम्भीरधर्माधिमोक्ष[3]लब्धबीजपरिपाकाः प्रत्यासन्नवर्तिनि[4] निर्वाणे तेषामुत्कृष्टानां विनेयानां विगतात्मस्नेहानां परमगम्भीरमौनीन्द्र[5]प्रवचनार्थतत्त्वावगाहनसम[106 b]र्थानामधिमुक्तिविशेषमवधार्य ।

बुद्धैरात्मा न चानात्मा कश्चिदित्यपि देशितं ॥

यथैव ह्यात्मदर्शनमतत्त्वमेवं [Tib. 133 a] तत्प्रतिपक्षभूतमप्यनात्मदर्शनं नैव तत्त्वमिति । एवं नास्त्यात्मा कश्चिन्न चाप्यनात्मा कश्चिदस्तीति देशितं ॥

यथोक्तमार्यरत्नकूटे[6] । आत्मेति काश्यप अयमेकोऽन्तः । नैरात्म्यमित्ययं द्वितीयोऽन्तः । यदेतदनयोरन्तयोर्मध्यं तदरूप्यमनिदर्शनमप्रतिष्ठमनाभासमविज्ञप्तिकमनिकेतमियमुच्यते काश्यप मध्यमा प्रतिपद्धर्माणां भूतप्रत्यवेक्षेति ॥

उक्तं चार्यरत्नावल्यां[7] ।

---

1) ཁམས་གསུམ་ལས་ སྲིད་དུ་འདས་ནས་ = *traidhātukam ativāhya.*

2—2) Manque dans le tibétain.

3) ལྷག་པར་མོས་པ་. Le *bīja* est l'*adhimokṣa*; il est *paripakva* en raison de l'*abhyāsa.*

4) Mss. °*vartiny anirvāṇe.* — Le locatif dépend de *adhimukti*, l. 6.

5) Le tibétain a simplement ཐུབ་པའི་དབང་པོ་ = *munīndra.* — Le chef de ceux qui pratiquent le *mauna.*

6) = ci-dessus 270. 7. (*avijñaptika* précède *aniketa*). Comparer 269. 7. le Kātyāyanāvavada.

7) Ce livre est cité ci-dessus 135. 7, 188. 13 et 346. 4.

नैवमात्मा न चानात्मा यथाभूतेन लभ्यते ।
आत्मानात्मकृते दृष्टी [1]ववारास्मान्महामुनिः ॥
[2]दृष्टश्रुताद्यं मुनिना न सत्यं न मृषोदितं ।
पक्षाद्धि प्रतिपक्षः स्यादुभयं तच्च नार्थतः ॥ इति ।

यतश्चैवं हीनमध्योत्कृष्टविनेयजनाशयनानात्वेन आत्मानात्मतदुभयप्रतिषेधेन बुद्धानां भगवतां धर्मदेशना प्रवृत्ता तस्मान्नास्त्या[3]गमबाधो माध्यमिकानां ॥

अत एवोक्तमार्यदे[4]वपादैः ।

वारणं प्रागपुण्यस्य मध्ये वारणमात्मनः ।
सर्वस्य वारणं पश्चाद्यो जानीते स बुद्धिमान् ॥ इति ।

[5]तथाचार्यपादैरुक्तं ।

यथैव वै[6]याकरणो [7]मातृकामपि पाठयेत् ।
बुद्धोऽवदत्तथा धर्मं विनेयानां यथाक्षमं ॥
केषां चिदवदद्धर्मं पापेभ्यो विनिवृत्तये ।
केषां चित्पुण्यसिद्ध्यर्थं केषां [Tib. 133b] चिद्द्वयनिश्रितं ॥

---

1) དེ་ཕྱིར་ བཀྲོག་ = *tasmād vavāra.* — °*kṛte* n'est pas traduit

2) C'est-à-dire tout le *vyavahāra*, tout le *prapañca.*

3) = *āgamena bādho.*

4) Dans le Catuḥçataka, VIII. 15. — Voir Muséon, N. S. I. p. 239.

5) *ācārya* = Nāgārjuna. Ces stances ne se trouvent dans aucun des traites fondamentaux qui forment le རིགས་པའི་ཚོགས་སྡེ (Tār. p. 302).

6) བརྡའ་སྤྲོད་པ་.

7) ཡི་གེའི་ཕྲེ་མོ་.

द्वयानिर्मितमेकेषां गम्भीरं भीरुभीषणं ।
शून्यताकरुणागर्भं(1) केषां चिद्बोधिसाधनं ॥ इति ॥

अथ वा[107a]यमन्योऽर्थः । आत्मेत्यपि प्रज्ञपितं सांख्यादिभिः प्रतिक्षणविनश्वराणां संस्काराणां कर्मफलसंबन्धाभावमुत्प्रेक्ष्य । अनात्मेत्यपि प्रज्ञपितं लोकायतिकै(2)रु(3)पपत्त्यात्मानं संसर्तार(4)मपश्यद्भिः ।

एतावानेव पुरुषो यावानिन्द्रियगोचरः ।
भद्रे वृकपदं ह्येतद्यद्वदन्ति बहुश्रुताः(5) ॥

इत्यादिना ॥ तैमिरिकोपलब्धकेशमशकादिष्विव वितैमिरिकैरिव बालजनपरिकल्पितात्मानात्मादिवस्तुस्वरूपं सर्वथैवाप[श्य]द्भिः

बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितं ॥

---

1) སྙིན་པོ.

2) འཇིག་རྟེན་རྒྱང་ཕན་པ་ (འཕན་པ་ ou པན་པ་ ou འཕེན་པ་ ou ཕན་པ་?). D'après Çarat Chandra: the cast out by the world, *i e.* the despised of the people. — Cette explication, qui justifie la lecture *hphen*, est insuffisante. *rgyan-riṅ-ba* = *āyata, ātata*. — *phan-pa* joue le role d'un suffixe.

3) *upapattyā* = འཕྲད་པས་ = par l'expérience. — Les Cārvākas sont *upapattiprātilambhikas*; les Aryas *dharmatāpratilabdhas* (? — M. Vyut. 245. 573 et suiv.).

4) *saṃsattāram apaçyatiḥ* — འཁོར་བ་པོ་ བདག་ མ་ མཐོང་.

5) *vṛkapadam* = སྤྱང་ཀིའི་རྗེས་. — Dans le Lokatattvanirṇaya de Haribhadra (Giornale della Societa Asiatica Italiana, 1905, p. 290), le 'Bhūtavādin' (= Cārvāka) s'exprime ainsi: etāvan eva *loko* 'yaṃ yāvān indriyagocaraḥ, bhadre vṛkapadaṃ hy etad yad vadanty *abahuçrutāḥ*. Mais l'éditeur, M. L. Suali, signale la variante Ṣaḍdarçanasaṃgraha, vers 81: bhadre vṛkapadaṃ *paçya* yad vadanti *bahuçrutāḥ;* et il renvoie au commentaire en cours d'édition dans la Bibliotheca Indica.

यथोक्तमार्यतथागतगुह्यसूत्रे[1]। अथ खलु शान्तमतिर्बोधिसत्त्वो भगवन्तमेतदवोचत्। [2]उपशम उपशम इति भगवन्नुच्यते। क एष उपशमो नाम। कस्य चोपशमादुपशम इत्युच्यते॥ भगवानाह। उपशम इति कुलपुत्रोच्यते। क्लेशोपशमस्यैतदधिवचनं। क्लेशोपशम इति संकल्पविकल्पपरिकल्पोपशमस्यैतदधिवचनं। संकल्पविकल्पपरिकल्पोपशम इति [संज्ञामनसिकारोपशमस्यैतदधिवचनं]। संज्ञामनसिकारोपशम इति विपर्यासोपश[107b]मस्यैतदधिवचनं। विपर्यासोपशम इति हेत्वारम्बणोपशमस्यैतदधिवचनं[3]। हेत्वारम्बणोपशम इत्यविद्याभवतृष्णोपशमस्यैतदधिवचनं[4]। अविद्याभवतृष्णोपशम इत्यहंकारममकारोपशमस्यैतदधिवचनं। अहंकारममकारोपशम इत्युच्छेदशाश्वतदृष्ट्युपशमस्यैतदधिवचनं। उच्छेदशाश्वतदृष्ट्युपशम इति सत्कायदृष्ट्युपशमस्यैतदधिवचनं॥ इति शान्तमते ये केचिदारम्बणहेतुदृष्टिसंपुक्ताः संक्लेशाः प्रवर्तन्ते सर्वे ते सत्कायदृष्टेरुत्पद्यन्ते सत्कायदृष्ट्युपशमात्सर्वदृष्ट्युपशम इति। सर्वदृष्ट्युपशमात्सर्वप्रणिधानोपशम[5] इति। सर्वप्रणिधानोपशमात्सर्वक्लेशोपशमः॥ [6]तद्यथापि नाम शान्तमते वृक्षस्य मूले छिन्ने सर्वशाखापत्त्रफलानि शुष्यन्ति। एवमेव शान्तमते सत्कायदृष्ट्युपशमात्सर्वक्लेशा उपशाम्यन्ते[6]। सत्कायदृष्टौ शा-

1) Sur ce texte, la version chinoise, et le livre du même titre, mais très différent, qui est classé parmi les Dharmas du Népal, voir Çikṣās. p. 7, n. 5 et 274, n. 1. — La citation (jusque p. 364 l. 1) manque dans le tibétain.

2) *upaçama* = *punaranutpattidharmakatayātyantikasamucchedu* (Bodhic. p. 350. 7).

3) Sic Mss.

4) L'ordre peut paraître étrange: *avidyā* et *tṛṣṇā* sont *kleça*, *saṁskārās* et *bhava* sont *karman*. (Voir nos Deux notes sur le Pratītyasamutpāda, Congrès d'Alger, vol. I.)

5) C'est-à-dire que le fidèle obtient l'*apraṇihitasamādhi*, définie comme il suit: *tad*...*vastu mithyāvikalpasamutthāpitena kleçena parigṛhītatvād anekadosaduṣṭaṃ paçyataḥ*...*tatrāpraṇidhānapūrvakā cittasthitiḥ* (Bodhisattvabhūmi I. xvii, § 14). — Voir ci-dessous p. 363 n. 1.

6—6) = Çikṣās. 242, 7—9; Bodhic. p. IX. 78 ad finem (avec la lecture *upaçāmyantīti*). — Même comparaison Sam. N. II. 92 (*rukkhavaggo*), Nettip. p. 14, et ailleurs.

न्तमते ऽपरिज्ञातायां सर्वोपादानोपक्लेशा उत्पद्यन्ते । सत्कायदृष्टिपरिज्ञातो[1]ऽपि सर्वोपादानोपक्लेशा [108a] नोत्पद्यन्ते न बाधन्ते ॥

शान्तमतिराह । का पुनर्भगवन् सत्कायदृष्टिपरिज्ञा ॥ भगवानाह । आत्मासमु[2]त्थानं शान्तमते सत्कायदृष्टिपरिज्ञा सत्त्वासमुत्थानं जी[वा]समुत्थानं पुद्गलासमुत्थानं दृष्ट्यसमुत्थानं सत्कायदृष्टिपरिज्ञा । न खलु पुनः शान्तमते सा दृष्टिरध्यात्मं प्रतिष्ठिता न बहिर्धा प्रतिष्ठिता सा दृष्टिः सर्वतोऽप्रतिष्ठिता । यत्तस्या [अ]प्रतिष्ठिताया दृष्टेरप्रतिष्ठितेति ज्ञानमियं शान्तमते सत्कायदृष्टिपरिज्ञा । सत्कायदृष्टिपरिज्ञेति शान्तमते शून्यताया एतदधिवचनं । यच्छून्यतानुलोमिक्या क्षान्त्या[3] तां दृष्टिं नोद्गृह्णाति । इयमपि

---

1) La *parijñā* est une connaissance d'une nature particulière, qui comporte la disparition de l'objet connu. Voir Saṃ. N. III, p. 159—160 (*katamā ca bhikkhave pariññā . rāgakkhayo, dosa°, moha°; ayaṃ vuccati bhikkhave pariññā*), cité (*uktaṃ sūtre*) Abhidh k. v. Soc. As. fol. 382b 9 (*parijñā katamā . yad atra cchandarāgaprahāṇaṃ, chandarāgasamatikramaḥ . iyam ucyate parijñeti vistaraḥ*).

2) Comparer et opposer le *paryutthāna* et le *paryavasthāna*. — L'adjectif *cittasamuṭṭhāna*, Dh.-saṇi § 667, 1195, etc.

3) *ānulomikī kṣānti*, M. Vyut. § 245. 168 Bodhic. p. 428. 13; *anulomikī*, Sukhāv. vyūha, p. 55. 12 (§ 32, *ad fin*) (apud Dh.-s. CVII, q. v. [a]); *satyānulomāḥ kṣāntayaḥ*, Div. Av. 80. 1. — Des trois patiences de Dh.-s., la première seule (*dharmanidhyānakṣ°*) nous intéresse ici [b]. On nous apprend, Majjh. II. 175, qu'elle est l'élément essentiel du *chanda*, et qu'elle procède de l'*atthupaparikkhā* (*no ce taṃ atthaṃ upaparikkheyya, na-y-idaṃ dhammā nijjhānam khameyyuṃ . yasmā ca kho atthaṃ upaparikkhati, tasmā dhammā nijjhānaṃ khamanti* ..).

D'après les théories relatives à l'accession aux nobles *phalas*, tout *jñāna* est précédé d'une *jñānakṣānti*, qui n'est pas *jñāna* de sa nature, étant faite de *parimārgaṇa* ou de *nitīraṇa*. (Voir Dh.-s XCVI et ci-dessous, Chap. XXIV, 4)

kṣānti, «state of saintly abstraction» (Div. 80. 2, 166. 16, 240. 20), appartient à la classe des *nirvedhabhāgīyas* (M. Vyut. § 55. *uṣmagata, mūrdhānaḥ, kṣānti, laukikāgradharma*, Bodhic. p. IX. 41; Wassilieff, 140). — Le disciple qui l'obtient est *nairvedhikaprajña* (M. Vyut. § 48, 32).

La *bodhisattvakṣānti* est obtenue par l'intelligence de l'ineffabilité essentielle de tous les *dharmas* (*dharmāṇāṃ svabhāvārtha = nirabhilāpyasvabhāvatā*), Bodhisattvabhūmi I. xvii, § 12. — *dharmeṣu samyaksaṃtīraṇakṣānti* (ibid. I. vi).

(a) Les traductions de Max Muller (S. B. of the East, XLIX, 2, p. 51) sont très contestables: *ghoṣānugā* = resignation following the sound; *ānulo-*

शान्तमते सत्कायदृष्टिपरिज्ञा । सत्काय इति शान्तमते शून्यतानिमित्ता[1]प्रणिहितानभिसंस्काराजातानुत्पाददृष्ट्या तां दृष्टिं नोद्गृह्णाति ' इयमपि शान्तमते सत्कायदृष्टिपरिज्ञा । सत्काय इति शान्तमते अकाय एष न कसति[2] न विकसति न चिनोति नोपचिनोति ' आदित एव तदभूतं परिकल्पितं यच्चाभूतं परिकल्पितं तन्न परिकल्पि[108b]तं न परिकल्प्यते न विकल्प्यते तन्न क्षिपते न विठप्यते नोत्थाप्यते नाध्यवस्यते ' तदुच्यते उपशम इति ॥

शान्तमतिराह । उपशान्त उपशान्त इति भगवन्नुच्यते कस्योपशमादुपशान्त इत्युच्यते ॥ भगवानाह । आरम्बनतः[3] शान्तमते चित्तं ज्वलति । यन्न भूय आलम्बनीकरोति तन्न ज्वलत्यज्वलन्नुपशान्त इत्युच्यते । तद्यथापि नाम शान्तमते ऽग्निरुपादानतो[4] ज्वलत्यनुपादानतः शाम्यति ' एवमेवालम्बनतश्चित्तं ज्वलति ' अनालम्बनतः शाम्यति ॥ तत्र शान्तमते उपायकुशलोऽयं बोधिसत्त्वः प्रज्ञापारमितापरिशुद्ध आलम्बनसमतां च प्रजानाति ' कुशलमूलारम्बनं च शमयतीत्यादि ॥

---

mki = resignation to natural consequences, *anutpattikadharma°* = resignation to consequences which have not yet arisen. — Sur *ghoṣa*, voir ci-dessous p. 378, n. 1. — Sur l'*anutpattika°*, Laṅkāv. p. 83 … *adhyātmabāhyasarvadharmānupalabdhibhiḥ* (?) *niḥsvabhāvadarçanād utpādadṛṣṭivinivṛttau . anutpattikadharmakṣāntiṃ pratilabhate.* — Cp. l'*anutpādajñāna.*

(b) Les deux autres (*duḥkhādhivāsanākṣānti*, supporter la souffrance, *parāpakāramarṣaṇakṣānti*, pardonner les injures) sont expliquées dans Bodhic. Chap. VI. 9—21, 22—51. Ce texte attribue à la troisième patience (VI. 52 et suiv.) un sens qu'elle ne paraît pas avoir habituellement: résignation résultant de l'examen des lois de l'acte et de la nature de la souffrance.

1) *çūnyatāsamādhi* = *sarvābhilāpātmakena svabhāvena virahitaṃ nirabhilapyasvabhāvaṃ vastu paçyataḥ yā cittasya sthitiḥ.* — *ānimittasamādhi* = *tad.. vastu sarvavikalpaprapañcanimittāny apanīya yathābhūtaṃ çāntato manasikurvato .. yā cittasya sthitiḥ* (Bodhisattvabhūmi, I, XVII, § 14).

2) Mss. *kesati, keçati.*

3) Il faut donc réaliser l'*āraṃvaṇacchedano nāma samādhi* (M. Vyut. § 21. 68). — La destruction (*kṣaya*) des *kleças* est réalisée (1) *ālambanaparijñānāt,* (2) *tadālambanasaṁkṣayāt,* (3, 4) *ālambanaprahāṇāc ca pratipakṣodayāt* (Abhidh. k. v., Soc. As., 380a).

4) Dans le sens de combustible, cp. Mhv. III. 546. — Bhavya, Sectes, 185a.

अत्राह । यदि बुद्धैर्भगवद्भिर्नात्मेति देशितं नानात्मेति किं तर्हि देशितमिति ॥ उच्यते ।

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ।
अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता[1] ॥ ७

इह यदि किं चिदभिधातव्यं वस्तु स्यात्तद्देश्येत । यदा त्वभिधातव्यं निवृत्तं वाचां विषयो नास्ति तदा किं चिदपि नैव देश्यते बुद्धैः । कस्मात्पुनरभिधातव्यं नास्तीत्याह । निवृत्ते[2] चित्तगोचर इति । चित्तस्य गोचरः चित्तगोचरः । गोचरो वि[109 a]षय आलम्बना-मि[Tib. 134 a]त्यर्थः । यदि चित्तस्य कश्चिद्गोचरः स्यात्तत्र किं चिन्निमित्तमध्यारोप्य स्याद्वाचां प्रवृत्तिः । यदा तु चित्तस्य विषय एवानुपपन्नस्तदा क्व निमित्ताध्यारोपो येन वाचां प्रवृत्तिः स्यात् ॥ कस्मात्पुनः[3] चित्तविषयो नास्तीति प्रतिपादयन्नाह ।

अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता ॥

यस्मादनुत्पन्नानिरुद्धा निर्वाणमिव धर्मता धर्मस्वभावो धर्मप्रकृतिर्व्यवस्थापिता तस्मान्न तत्र चित्तं प्रवर्तते । चित्तस्याप्रवृत्तौ च कुतो निमित्ताध्यारोपः । तदभावात्कुतो वाचां प्रवृत्तिः । अतश्च न किं चिद्बुद्धैर्भगवद्भिर्देशितमिति स्थितमविकलं ॥ अत एव च वक्ष्यति[4]

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः ।
न क्वचित्कस्यचित्कश्चिद्धर्मो बुद्धेन देशितः ॥ इति ।

---

1) Mss. *nivṛtticittagocaraḥ* ; ci-dessous *nivṛtta' c°* et *nivṛttiḥ c°*. — བརྗོད་པར་བྱ་བ་བཟློག་པ་སྟེ། སེམས་ཀྱི་སྤྱོད་ཡུལ་བཟློག་པས་སོ། མ་སྐྱེས་པ་དང་མ་འགགས་པ། ཆོས་ཉིད་མྱ་ངན་འདས་དང་མཚུངས།། = *cittagocaranivṛtteḥ.* Cité ci-dessous ad XXIV. 8.

2) Mss. *nirṛttiḥ c°*.

3) Mss. *kasmāt parac°*.

4) = XXV. 24.

(1) एवं चैतत्' अथ वायमन्यः पर्यायः ' यदुक्तं प्रपञ्चस्तु शून्यतायां निरुध्यत इति (2) कथं पुनः प्रपञ्चस्य शून्यतायां निरोध इति ॥ उच्यते । यस्मान्निवृत्तमभिधातव्यमित्यादि (3) पूर्ववद्व्याख्येयं ॥

(4) अथ वा यदेतदुक्तं प्रागाध्यात्मिकबाह्यवस्त्वनुपलम्भेनाध्यात्मं बहिश्च यः (5) सर्वदाहंकारममकारपरिक्षय इदमत्र तत्त्वमिति । कीदृशं तत्किंचिद्वक्तुं (6) वा शक्यते ' तस्मात् (7)

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे । (8)

तत्र (9) तत्त्वत इति वाक्यशेषः [Tib. 134 b] । किं पुनः कारणं तत्र तत्त्वे निवृत्तमभिधातव्यं (10) निवृत्तश्चित्तगोचर इत्याह '

अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्म[109 b]ता ।

इति पूर्वकमेवमेव व्याख्यानं योज्यं ॥

---

1) འདི་ནི་ ན་ དེ་ལྟ་ ཡིན་པ་འམ་།

2) XVIII. 5; ci-dessus p. 350 l. 5. — Le tibétain répète les deux derniers pādas de la Kārikā: … *te prapañcāt prapañcas tu*…

3) Le tibétain répète les deux premiers pādas.

4) *atha vā* = རྣམ་པ་གཅིག་ཏུ་…

5) *sarvadā* manque dans le tibétain.

6) ཅི་སྟེ་ བརྗོད་པ་འམ། — Mss. *ki vad vaktutuṃ vā, kiṃ tad*…..

7) འདི་ལྟར་ = *evam*.

8) ལྡོག་པས་ = *nivṛttam* = *nivṛtte*. Mss. *nivṛttacittagocaras tatra*…..

9) Mss. *tattvata iti* — དེ་ཁོ་ན་ཉིད་ དེ་ལ་…

10) Mss. *nivṛttac°* བརྗོད་པར་བྱ་བ་ ལྡོག་ཅིང་ སེམས་ཀྱི་ སྤྱོད་ཡུལ་ ལྡོག་པར་འགྱུར་ ཞེ་ན།

अत एवोक्तमार्यतथागतगुह्यसूत्रे[1]। यां च शान्तमते रात्रिं तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धो यां च रात्रिमुपादाय परिनिर्वास्यति । अस्मिन्नन्तरे तथागतेनैकाक्षरमपि नोदाहृतं न प्रव्याहृतं नापि प्रव्याहरिष्यति[2]। कथ तर्हि भगवता सकलसुरासुरनरकिन्नरसिद्धविद्याधरोरगप्रभृतिविनेयजनेभ्यो विविधप्रकारे[भ्यो] धर्मदेशना देशिता। एकक्षणवागुदाहारेणैव[3] तत्तज्जनमनस्तमोहरणी[4] बहुविधबुद्धिनलिनीवनविबोधिनी जरामरणसरित्सागरोच्छोषिणी कल्पकालानलसप्तार्करश्मिविसरह्रेपिणी[5][6] शरदरुणमहाप्रभेति[7] ॥

तदेवं सूत्रे।

यथा यन्त्रकृतं तूर्यं वाद्यते पवनेरितं ।
न चात्र वादकः कश्चिन्निश्चरन्त्यथ च स्वराः ॥

---

1) Le tibétain porte seulement མདོ་ལས་. — Une partie de ce fragment est cité ci-dessous fol. 171a et Bodhic. p. 419. 7 (IX. 35 — *ṭīkā* p. 276. 2). — On trouvera dans ce dernier ouvrage divers textes relatifs au silence de Bhagavat et visés par Kumārila dans le Çlokavārt. (Voir J. R. A. S. 1902, p. 374, n. 1)

Notre texte est en opposition très nette avec la vieille formule qu'il démarque: *yañ ca bhikkhave rattiṃ tathāgato anuttaraṃ sammāsaṃbodhiṃ abhisambujjhati, yañ ca rattiṃ anupādisesāya nibbānadhātuyā parinibbāyati, yaṃ etasmiṃ antare bhāsati lapati niddisati, sabban taṃ tatheva hoti no aññathā tasmā tathāgato ti vuccati* (Itiv. § 112; Sum. Vil., *Intr.* § 44, et ailleurs). Ce conflit n'est pas pour nous surprendre, car Wassilieff nous a appris, d'après l'autorité de Vasumitra, que les sectes se divisent sur ce point: le *samāhita* parle-t-il? (Bouddhisme, p. 235).

2) Ex conj. °*riṣyatīti.* — La citation s'arrête ici dans le tibétain (qui supprime *na pravyāhṛtam* et passe à la stance l. 9); de même Bodhic. p. s'arrête à *nodāhṛtam.* Ci-dessous (fol. 171a), le texte diverge après avoir fourni la formule complète *nodāhṛtaṃ na vyāhṛtaṃ na pravyāharati na pravyāhariṣyati.*

3) Comp. Bodhic. IX. 51. *ekena sūtratulyena kiṃ na sarvaṃ jinoditam.*

4) Mss. *tattarjananamanastemoharaṇī, tatajjana-mastemo.*

5) Sur les sept soleils de la destruction du monde par le feu, voir Hopkins, Great Epic p. 475 (Vanap. 191. 10), Dahlmann, Mahābhārata, I, p. 220; Hardy, Manual, p. 31; Aṅg. N. IV. 100; Çikṣās. 247, n. 2.

6) Mss. *visaradroṣiṇī,* °*hreṣiṇī.*

7) Paris, Calc. *prabhetyāha, pravety.*

एवं पूर्वमशुद्धत्वात्सर्वसत्त्वाशयेरिता ।
वाग्निश्चरति बुद्धस्य न चास्यास्तीह कल्पना ॥
प्रतिश्रुत्कादयः शब्दा नाध्यात्मं न बहिः स्थिताः ।
वागप्येवं नरेन्द्रस्य नाध्यात्मं न बहिः स्थिता[1] ॥

तथा ।

देवत चोदनि[2] दुन्दुभि दिव्य कर्मविपाक निवृत्त मरूणां ।
देव प्रमत्तविहारिण ज्ञात्वा दुन्दुभिघोष प्रमुञ्चि नभातो ॥
सर्वि अनित्य अशाश्वत कामा इत्वर अध्रुव फेनसभावाः ।
मायमरीचिसमा[3] दकचन्द्राः सर्वि भवाः सुपिनान्त[4]सभावाः ॥
दुन्दुभि वादित[5] शक्रमरुद्भिः[6] सार्द्धय संक्रमि धर्मसभायां [110a] ।
धर्मकथां प्रकरोति मरूणां या कथ[7] शान्तविरागऽनुकूला ॥

तथार्यसमाधिराजे[8] ।

बुद्धो यदा भेष्यति धर्मराजः सर्वाण धर्माण प्रकाशको मुनिः ।
तृणगुल्मवनौषधि शैल पर्वत अभाव धर्माण रवो भविष्यति ॥
यावन्ति शब्दास्तहि लोकधातौ सर्वे अभावा न हि कश्चि भावः ।
तावन्तु घोषो तस्य तथागतस्य स्वरु निश्चलो लोकविनायकस्य ॥

---

1) Le tibétain donne *ity ādi*, et, supprimant les autres citations, passe au texte que nous avons p. 368 l. 4.

2) Mss. *codani, bodani.*

3) Mss. °*samodaka*°.

4) Mss. *supinovasva*°.

5) Mss. *vādita, bodhita.*

6) Lecture évidemment fautive.

7) Mss. *pākatha.*

8) Voir ci-dessus 44. 2–5, 276. 4.

इति विस्तरः[1] ॥ तथा ।

एकस्वरात्तु तव लोकहितो नानाधिमुक्ति स्वरु[2] निश्चरती ।
एकैकमन्विममभाषि जिनो ब्रूहि स्मितं प्रकृतकस्य कृते ॥

[3]अत्रैके परिचोदयन्ति । नास्तिकाविशिष्टा माध्यमिका यस्मात्कुशलाकुशलं कर्म कर्तारं च फलं च सर्वं च लोकं भावस्वभावशून्यमिति ब्रुवते । नास्तिका अपि ह्येतन्नास्तीति ब्रुवते । तस्मान्नास्तिकाविशिष्टा माध्यमिका इति ॥

नैवं । कुतः । प्रतीत्यसमुत्पाद[वा]दिनो हि माध्यमिका हेतुप्रत्ययान् प्राप्य प्रतीत्य समुत्पन्नत्वात्सर्वमेवेहलोकपरलोकं निःस्वभावं वर्णयन्ति । यथा स्वरूपवादिनो[4] नैव नास्तिकाः प्रतीत्यसमुत्पन्नत्वा[Tib. 135a]द्भावस्वभावशून्यत्वेन न परलोकाद्यभावं प्रतिपन्नाः । किं तर्हि ऐहलौकिकं वस्तुजातमुपलभ्य स्वभावतस्तस्य परलोकादिहागमनमिहलोकाच्च परलोकगमनमपश्यन्त इहलोकोपलब्धपदार्थसदृशपदार्थान्तरापवादं कुर्वन्ति ॥

तथापि वस्तुस्वरूपेणाविद्यमानस्यैव ते नास्तित्वं प्रतिपन्ना इत्यमुना ताव[110b]द्दर्शनेन साम्यमस्तीति चेत् ॥ न हि । कुतः । संवृत्या माध्यमिकैरस्तित्वेनाभ्युपगमान्न तुल्यता ॥

वस्तुतस्तुल्यतेति चेत् ॥ यद्यपि वस्तुतोऽसिद्धिस्तुल्या तथापि प्रतिपत्तृभेदादतुल्यता । यथा हि कृतचौर्यं पुरुषमेकः सम्यगपरिज्ञायैव तदमित्रप्रेरितस्तं मिथ्या व्याचष्टे चौर्यमनेन कृतमिति । अपरस्तु साक्षाद्दृष्ट्वा दूषयति । तत्र यद्यपि वस्तुतो नास्ति

1) Mss. *iti viṣṭer eṣā eka°*.

2) Ex conj. *ravu*.

3) Nous retrouvons ici le tibétain.

4) Manque dans le tibétain qui donne: *naivaṃ nāstikāḥ pratītya° . . . °śū-nyatvena para°*. — «Les Nāstikas, affirmant le *svarūpa*, ne sont pas dans le même cas; ils n'admettent pas (comme font les Mādhyamikas) la non existence de l'autre monde, etc., en raison de la vacuité de toute nature propre, laquelle vacuité résulte du Pratītyasamutpāda, mais bien au contraire.......»

भेदस्तथापि परिज्ञातभेदादेकस्तत्र मृषावादीत्युच्यते । अपरस्तु सत्यवादीति । एकश्चायशसा चापुण्येन च सम्यक् परीक्ष्यमाणो युज्यते नापरः । एवमिहापि यथावद्विदितवस्तुस्वरूपाणां माध्यमिकानां ब्रुवतामवगच्छतां च वस्तुस्वरूपाभेदेऽपि यथावदविदितवस्तुस्वरूपैर्नास्तिकैः सह ज्ञानाभिधानयोर्नास्ति साम्यं ॥ [Tib. 135b] यथैव ह्युपेक्षासामान्ये [ऽ]प्रतिसंख्या[य][1]प्रतिसंख्यायोपेक्षकयोरिव पृथग्जनार्हतोर्जात्यन्धचक्षुष्मतोश्च[2] विषमप्रपात[2)]प्रदेशविनिश्चितसामान्येऽपि यथास्ति [3]स महान्विशेषस्तथा नास्तिकानां माध्यमिकानां च विशेषो भविष्यतीति पूर्वाचार्या इत्यलं प्रसङ्गेन प्रकृतमेव व्याख्यास्यामः ॥

अत्राह । यद्यप्येवं ।

अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता ।

तस्यां च नास्ति वाक्चित्तयोः प्रवृत्तिः । तथापि नैवासावदेश्यमाना शक्या जनैर्विज्ञातुमित्यवश्यं तस्यामवतारणार्थं विनेयजनानां संवृतिसत्यापेक्षया कदा चिद्देशनानुपू[4][111a]र्व्या भवितव्यमित्यतः सा कथ्यतामिति ॥ उच्यते । इयमत्र बुद्धानां भगवतां तत्त्वामृतावतारदेशनानुपूर्वी विज्ञेया यदुत ।

सर्वं तथ्यं [न वा तथ्यं] तथ्यं चातथ्यमेव च ।
नैवातथ्यं नैव तथ्यमेतद्बुद्धानुशासनं[5] ॥ ८

1) Voir M. Vyut. § 9.6. *nāsty apratisaṁkhyāyopekṣā* [*tathāgatasya*]. — Cp. *pratisaṁkhyāpratisaṁkhyānirodha*, Brahmas. II. 2.22; Album Kern, p. 111. — Il y a deux *upekṣās*, *ekatvasaṃniçritā*, *nānātva*° (sūtra cité Abhidh. k. v. S. As., 248b 3). — Les dix *upekṣās* de Hardy, Manual, p. 505, dans Atthasāl. § 172; voir Dh. saṇi, p. 39, 48 et 333. — Quatrième *brahmavihāra*, Dh.-s. XVI (indifference, Kern; disinterestedness, equanimity, unbiassedness, Mrs Rhys Davids).

2—2) Mss. *viṣeya*°. — Manque dans le tibétain.

3) Manque dans le tibétain.

4) *ānupūrvī* = རིམ་པ་ = *krama*.

5) ཐམས་ཅད་ ཡང་དག་ ཡང་དག་མིན། ཡང་དག་ ཡང་དག་མ་ཡིན་ ཉིད། ཡང་དག་མིན་ མིན་ ཡང་དག་ མིན། དེ་ ནི་ སངས་རྒྱས་ རྗེས་བསྟན་པའོ་॥

तत्र ।

यद्यद्यस्य प्रियं पूर्वं तत्तत्तस्य समाचरेत् ।
न हि प्रतिहतः पात्रं सद्धर्मस्य कथं च न[1] ॥
नान्यया भाषया म्लेच्छः शक्यो ग्राहयितुं यथा ।
न लौकिकमृते लोकः शक्यो ग्राहयितुं तथा[2] ॥

तथा च भगवतोक्तं । लोको मया सार्धं विवदति नाहं लोकेन सार्धं विवदामि ॥ यल्लोकेऽस्ति संमतं तन्ममाप्यस्ति संमतं । यल्लोके नास्ति संमतं ममापि तन्नास्ति संमतमित्यागमाच्च[3] ॥

[4 इत्यादित एव तावद्भगवता [Tib. 136a] [5]स्वप्रसिद्धपदार्थभेदस्वरूपविभागश्रवणासंजाताभिलाषस्य विनेयजनस्य[4] यदेतत्स्कन्धधात्वायतनादिकमविद्यातिमिरिकैः सत्यतः परिकल्पितमुपलब्धं तदेव तावत्तथ्य[6]मित्युपवर्णितं भगवता तद्दर्शनापेक्षया । आत्मनि लोकस्य गौरवोत्पादनार्थं । विदितनिरवशेषलोकवृत्तान्तोऽयं भगवान् सर्वज्ञः सर्वदर्शी[7] य

1) Se lit, cité d'après une source non déterminée *(anyatra)*, dans Subhāṣitasaṃgraha (Ed. C. Bendall, Muséon N. S. IV. p. 385. 8): *yad yad yasya hitam*....— Ici se placent, dans les Mss., les mots ci-dessous (9—10). — Le tibétain indique (ཞེས་བྱ་བ་དང་) que la stance suivante ne fait pas corps avec celle ci.

2) Voir Dogmatique Bouddhique I p. 25 (J. As. 1902, II. p. 257).

3) Saṁ. N. III p. 138. *nāhaṃ bhikkhave lokena vivadāmi, loko ca mayā vivadati. na bhikkhave dhammavādī kenaci lokasmiṃ vivadati. yaṃ bhikkhave natthi sammataṃ loke paṇḍitānaṃ ahaṃ pi taṃ natthīti vadāmi.* — *sammata* = ཡོད་པར་ འདོད་པ = *sad iṣṭa* = *san mata.*

4—4) Précède dans les Mss. la citation *nānyayā bhāṣayā*...

5) རང་ལ་ གྲགས་པ་ = «qu'ils admettent sans discussion». Comparer Bodhic. p. IX. 6 *pratyakṣam api rūpādi prasiddhyā na pramāṇataḥ.* — Et ci-dessus 34. 18.

6) Mss. *satyam.*

7) ཐམས་ཅད་གཟིགས་པ་ — Mss. °*darça yenaivam, ya naivam.* — La fin de la phrase *(upadiṣṭavān)* rend la correction presque nécessaire.

एवं भवाग्रपर्यन्तस्य[1] वायुमण्डलादेराकाशधातुपर्यवसानस्य भाजन[2]लोकस्य सत्त्वलोकस्य चाविपरीतं स्थित्युत्पादप्रलयादिकं सातिविचित्रप्रभेदं सहेतुकं सफलं सास्वादं सादीनवं चो[3]पदिष्टवानिति ॥

तदेवं भग[4]वत्युत्पन्नसर्वज्ञबुद्धिविनेयजनस्य उत्तरकालं तदेव सर्वं न वा तथ्यमित्युपदेशितं । तत्र [111b] तथ्यं नाम यस्यान्यथात्वं नास्ति ' विद्यते च प्रतिक्षणविनाशित्वात् संस्काराणामन्यथाभावस्तस्मादन्यथाभावसद्भावान्न वा तथ्यं । वाशब्दश्चकारार्थो देशनासमुच्चये द्रष्टव्यः ' सर्वं तथ्यं न च तथ्यमिति ॥

केषां चित्सर्वमेतत्तथ्यं चातथ्यमेव चेति देशितं । तत्र बालजनापेक्षया सर्वमेतत्तथ्यं । आर्यज्ञानापेक्षया तु सर्वमेतन्मृषा ' तैरेवमनुपलम्भादिति ॥

केषां चिद्‌ अतिचिरा[Tib. 136b]भ्यस्ततत्त्वदर्शनानां किंचिन्मात्रानुत्खातावरणातरुमूलानां नैवातथ्यं नैव तथ्यं तदिति देशितं । तस्यापि किंचिन्मात्रस्यावरणस्य प्रहाणार्थं वन्ध्यासुतस्यावदा[त](5)श्यामताप्रतिषेधवदुभयमेतत्प्रतिषिद्धं ॥

एतच्च बुद्धानां भगवतामनुशासनं ' उन्मार्गादपनीय सम्यङ्मार्गप्रतिष्ठापनं शासनं[6] । एवमानुपूर्व्या शासनमनुशासनं । विनेयजनानुरूप्येण वा शासनं अनुशासनं[7] ।

---

1) སྲིད་པའི་ རྩེ་མོ་ལ་ ཐུག་པ་ suit *vāyumaṇḍalādes* ཐོག་མ་ རླུང་འཁོར་བ་ ནས''' — Je crois que le *sattvaloka* a pour extrémité le stade d'abstraction, voisin du *nirvāṇa*, qui s'appelle *bhavāgra* («the limit of existence»?). — Dans le Lotus, le *bhavāgra* s'oppose à l'*avīci*, car il est, dit Burnouf (p. 309) «le dernier étage du monde sans forme»; de même Nāmasaṃgītiṭ. VI. 11 (52).

2) Voir p. 356, n. 7.

3) Mss. °*diṣṭatān iti.*

4) Mss. *bhagavann abhyut*°. — «Quand les fidèles ont reconnu que Bhagavat est omniscient».....

5) Voir P. W. s. voc. *çyāmāvadāta* = schwärzlich weiss, glänzend schwarz.

6) Voir ci-dessus p. 3, n. 3 — M. Vyut. § 66. 5.

7) M. Vyut. § 66. 10 *anuçāsanā* (-ī?). — Longuement expliqué dans Bodhisattvabhūmi, I... *sāvadyasamudācārapratiṣedhana, anavadyasamudācārābhya-*

सर्वाश्चैता देशना बुद्धानां भगवतां महाकरुणोपायज्ञानवतां तत्त्वामृतावतारोपायत्वेन व्यवस्थिताः । न हि तथागतास्तत्त्वामृतावतारानुपायभूतवाक्यमुदाहरन्ति । व्याध्यनुरूपभैषज्योपसंहारवत्ते[1] विनेयजनानुजिघृक्षया यथानुरूपं धर्मं देशयन्ति ॥

यथोक्तं शतके[2] ।

सदसत्सदसच्चेति नोभयं चेति कथ्यते ।
ननु व्याधिवशात्सर्वमौषधं नाम ज्ञायते ॥ इति ॥

किंलक्षणं पुनस्तत्त्वं यस्यैता देशना[3] अवतारार्थमुपदिशन्ते भगवन्तः[4] ॥ उक्तमेतदस्माभिः

निवृत्तमभिधातव्यं निवृत्ते[5] चित्तगोचर इति ॥

य[112a]दा चैतदेवं तदा किमपरं पृच्छ्यते ॥ यद्यप्येवं तथापि[6] व्यवहारसत्यानुरोधेन लौकिकतथ्याद्यभ्युपगमवत्तस्यापि समारोपतो लक्षणमुच्यतामिति ॥ तदुच्यते ।

अपर[Tib. 137a]प्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितं ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणं[7] ॥ ९

---

nujñā, ..skhalitasamācārasaṃcodana, saṃharṣaṇa, smṛtikaraṇānupradāna. — *anuçāsanī*; Bodhic. p. 10, 7, 112. 8, 133. 6, (*°çāsinī?*); Çikṣās. 2. 6 (*bhūtanaya°*), 36. 2, 122. 15; Samādhir. 6. 4, Prajñāpār. p. 484; — *°prātihārya*, M. Vyut. § 16. 3 (*ṛddhi°, ādeçanā°*) = «the mystic wonder, the wonder of manifestation, the myster of education» (Rhys Davids, Dialogues p. 277—279 = *ṛddhiviṣayābhijñā....; cetaḥparyāyābhijñā....īdṛçaṃ te cittam iti; āsravakṣayābhijñānuçāsanaprātihāryaṃ yathābhūtopadeçaḥ* (Abhidh. k. v. Burn. 448b).

1) Mss. *°vartte, °vartta.*

2) VIII. 20. (Muséon, N. S. I. p. 239). — Mss. *°vaçāt pathyam;* mais les deux versions tibétaines, ཐམས་ཅད་.

3) Mss. *deçanā deçanā.*

4) *bhagavantaḥ* n'est pas traduit dans le tibétain.

5) Mss. *nivṛttac°.*

6) Tib. = *tathāpi laukikavyavahārābhyupagamavad vyavahārasatyasamāropatas tasya lakṣaṇam api...*

7) གཞན་ལས་ཤེས་ མིན་ ཞི་བ་ དང་། སྤྲོས་པ་རྣམས་ཀྱིས་ མ་ སྤྲོས་པ། རྣམ་རྟོག་ མེད་ དོན་ཐ་དད་ མིན། དེ་ ནི་ དེ་ཉིད་མཚན་ཉིད་དོ༎ — Cité ci-dessous XXIV. 7.

तत्र नास्मिन् परप्रत्ययोऽस्तीत्यपरप्रत्ययं परोपदेशागम्यं स्वयमेवाधिगन्तव्यमित्यर्थः। यथा हि तैमिरिका वितथं केशमशकमक्षिकादिरूपं पश्यन्तो वितिमिरोपदेशेनापि न शक्नुवन्ति केशानां यथावदवस्थितं स्वरूपमदर्शनन्यायेनाधिगन्तव्यमतैमिरिका इवाधिगन्तुं। किं तर्ह्यतैमिरिकोपदेशान्मिथ्यैतदित्येतावन्मात्रकमेव प्रतिपद्यन्ते।[1] यदा तु तिमिरोपघात्यविपरीतशून्यतादर्शनाञ्जनाञ्जितबुद्धिनयनाः सन्तः समुत्पन्नतत्त्वज्ञाना भवन्ति। तदा तत्त्वमनधिगमनयोगेन स्वयमधिगच्छन्तीति। एवमपरप्रत्ययं भावानां यत्स्वरूपं तत्तत्त्वं[2]॥

एतच्च [3]शान्तस्वभावमतैमिरिककेशादर्शनवत्स्वभावविरहितमित्यर्थः॥

अत एव तत्प्रपञ्चैरप्रपञ्चितं। प्र[4]पञ्चो हि वाक् प्रपञ्चयत्यर्थानिति कृत्वा। प्रपञ्चैरप्रपञ्चितं वाग्भिर[Tib. 137b]व्याहृतमित्यर्थः॥

---

1) Tib. = *yadā tu timiropaghātyañjanāñjitanayanā ataimirikā eva [bhavanti], tadā tatkeçādisvarūpam anadhigamananyāyenāvagacchanti; evam āryaiḥ samāropeṇa tattvam api deçyatām, tathāpi tanmātreṇānāryāṇām tatsvarūpāvagamo na bhavati; yadā tv avidyātimiropaghātyaviparīta......*

2) Voir Bodhic. p. IX, 2, où la même comparaison des *taimirikas* développée au point de vue de l'absence de négation et d'affirmation.

La *Bodhisattvabhūmi* (I. xviii) distingue trois étapes et les caractérise par un exemple: des enfants jouent avec des animaux *(mṛga)* de bois, etc , et croient que ce sont de vrais animaux; on leur dit que les animaux sont tout autre chose, et on les leur décrit; ils voient enfin de vrais animaux et acquiérent enfin une idée juste et immédiate *(pratyātmaṃ pratyavagama)*. — Cp. le *nirvāṇe pratyakṣa jñāna*.

Voir les deux sources de *samyagdṛṣṭi*, ci-dessous p. 378, n. 1.

svayaṃ [tattva]adhigamana = abhisamaya. — *°krama*, Bodhic. p. IX. 41. Voir Childers et Milinda, II. 245 *dhammābhisamaya*.

pratyātmavedya, སོ་སོར་རང་གིས་རིག་པ་ [Bodhic. p. 376. 12; Laṅkāv. passim; Chavannes, Inscrip'ions chinoises de Bodh-Gayā (R. H. d. R. XXXIV, № 1), p. 19, *pratyātmavedya dharmakāya*] = *svasaṃvedya, āryāṇāṃ svasaṃviditasvabhāvatayā paramārthasatyam*. Comp. *samyak pratyātmaṃ jñānadarçanaṃ pravartate*, M. Vyut. § 245. 51. — Dans le Tantrisme, p. ex. Subhāsitas., Muséon, N. S., V. p. 34. 15 (le terme de comparaison est la *rati* on *[maithuna]mahāsukha*).

3) Voir ci-dessus ad VII. 3.

4) Voir ci-dessus p. 4, n. 1, p. 11, n. 3.

निर्विकल्पं च तत्। विकल्पश्चित्तप्रचारः ' तद्रहितत्वात्तत्त्वं निर्विकल्पं[1]॥ यथोक्तं सूत्रे। परमार्थसत्यं कतमत्। यत्र ज्ञानस्याप्यप्रचारः कः पुनर्वादोऽक्षराणामिति। एवं निर्विकल्पं।

नानार्थोऽस्येति नानार्थं[2] भिन्नार्थं ' न नानार्थोऽनानार्थ[112b]मभिन्नार्थमित्यर्थः॥

यथोक्तमार्यसत्यद्वया[3]वतारसूत्रे। देवपुत्र आह ' कतमः पुनर्मञ्जुश्रीः सम्यक्प्रयोगः[4]॥ मञ्जुश्रीराह। यत्समा देवपुत्र परमार्थतस्तथता धर्मधातुरत्यन्ताजातिश्च तत्समानि परमार्थतः पञ्चानन्तर्याणि ' यत्समानि पञ्चानन्तर्याणि तत्समानि दृष्टिकृतानि[5] ' यत्समानि दृष्टिकृतानि तत्समाः पृथग्जनधर्माः। यत्समाः पृथग्जनधर्मास्तत्समाः शैक्षधर्माः ' यत्समाः शैक्षधर्मास्तत्समा अशैक्षधर्माः। यत्समा अशैक्षधर्मास्तत्समाः सम्यक्संबुद्धधर्माः यत्समाः सम्यक्संबुद्धधर्मास्तत्समं निर्वाणं ' यत्समं निर्वाणं तत्समः संसारः। यत्समः संसारस्तत्समः परमार्थतः संक्लेशः। यत्समः परमार्थतः संक्लेशस्तत्समं [Tib. 138a] परमार्थतो व्यवदानं। यत्समं परमार्थतो व्यवदानं तत्समाः परमार्थतः सर्वधर्माः। एवं परमार्थतः सर्वधर्मसमताप्रयुक्तो देवपुत्र भिक्षुः सम्यक्प्रयुक्त इत्युच्यते॥ देवपुत्र आह। कतमया पुनर्मञ्जुश्रीः समतया यावत्परमार्थतो यत्समं व्यवदानं तत्समाः सर्वधर्माः परमार्थत इति॥ मञ्जुश्रीराह। परमार्थतः सर्वधर्मानुत्पादसमतया परमार्थतः सर्वधर्मात्यन्ताजातिसमतया परमार्थतः समाः सर्वधर्माः। तत्कस्माद्धेतोः। परमार्थतो निर्वाणा[नाना]करणा हि देवपुत्र

---

1) Le Laṅkāv. énumère douze *vikalpas* qui constituent le *parikalpita* (p. 127 de l'édition de la B. T. S.).

2) Voir ci-dessus p. 4, n. 6. — Saṃ. N. II. 140, *dhātunānatta;* M. Vyut. § 9. 5 *nāsti nānātvasaṃjñā [tathāgatasya]*. Abhidh. k. v. (Burn fol. 438) *sukhaduḥkhāsukhāduḥkhaviṣayeṣu rāgadveṣamohato nānātvasaṃjñā.* — Voir p. 369, n. 1.

3) འཕགས་པ་བདེན་པ་གཉིས་ལ་འཇུག་པའི་མདོ་. — Voir Wass. p. 299 et des extraits du même sūtra, Bodhic. p. 366. 10 (démontrant que le *paramārthasatya* est ineffable), Madhyamakāvatāra, VI. 29.

4) Cp. Dh.-s. CVIII. *prayogavīrya.* — On sait que les *prahāṇas* du sanscrit bouddhique ne sont pas des «abandons» mais des *prayogas.*

5) Expression assez rare; cf. *dṛṣṭigata.*

सर्वधर्मा अत्यन्तनिरुत्पादतामुपादाय । तद्यथापि नाम देवपुत्र यच्च मृद्भाजनस्याभ्यन्तरमा-[1] काशं यच्च रत्नभाज[113a]नस्याभ्यन्तरमाकाशं ' आकाशधातुरेवैषः ' तत्परमार्थतो न किंचिन्नानाकरणं । एवमेव देवपुत्र यः[2] [सं]क्लेश[: स] परमार्थतो[3] ऽत्यन्तानुत्पादता । यदपि व्यवदानं तदपि परमार्थतोऽत्यन्तानुत्पादता । संसारोऽपि परमार्थतोऽत्यन्तानुत्पादता । यावन्निर्वाणमपि परमार्थतोऽत्यन्तानुत्पादता । नात्र किं चित्परमार्थतो नानाकरणं । तत्कस्माद्धेतोः । परमार्थतोऽत्यन्तानुत्पादत्वात्सर्वधर्माणामिति ॥

तदेवमनानार्थता तत्त्वस्य लक्षणं वेदितव्यं शून्यतये[Tib. 138b]करसत्वात्[4] । उत्तरोत्तरव्याख्यानं चात्र वेदितव्यं ॥

एवं तावदार्याणां [5 जातिजरामरणसंसारपरिक्षयाय कृतकार्याणां 5] तत्त्वलक्षणं । लौकिकं तु तत्त्वलक्षणमधिकृत्योच्यते ।

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं[6] ॥ १०

1) On pense aux discussions sur le *ghaṭākāça*, p. ex. Syādvādamañjarı p. 17 (Ch. S. S.).

2) ཀུན་ནས་ཉོན་མོངས་པ་.

3) Mss. °*taḥ çāntatānut*°. གདོན་མི་སྐྱེ་བ་ཉིད་.

4) Mss. °*rūpatvāt*, རོ་གཅིག་པའི་ཕྱིར་ — *svarasa* = *svarūpa*, Abhidh. k. v., Soc. As. 312b 6 *svarasenaiva vinaçvarāṇāṃ skandhānām*.. «les *skandhas* périssables de leur nature». Ibid. 313a 1 *utpannasya svarasanirodhād anāgatasyotpattiṃ pratibadhnan nirodhayatīty ucyate.* — L'Ancien Véhicule est saturé de douleur et de délivrance, le Nouveau de vacuité.

5—5) Non traduit dans le tibétain.

6) གང་ལ་ བརྟེན་ཏེ་ གང་ འབྱུང་བ། དེ་ནི་ རེ་ཞིག་ དེ་ཉིད་ མིན། དེ་ལས་ གཞན་པའང་ མ་ཡིན་ཕྱིར། དེ་ཕྱིར་ ཆད་ མིན་ རྟག་ མ་ཡིན།། Cité ad XXI. 6 où on lit *nocchedo* comme ci-dessous p. 376, l. 14.

यत्कारणं प्रतीत्य [यत्]कार्यमुत्पद्यते ' तद्यथा शालिबीजं प्रतीत्य पृथिव्यादि-सामग्र्यां च शाल्यङ्कुर उपजायते । न हि तावत्तदेव तदिति शक्यते वक्तुं । नैव यदेव बीजं स एवाङ्कुरो जन्यजनकयोरेकत्वप्रसङ्गात् ' ततश्च पितापुत्रयोरप्येकत्वं स्यात् ' अनन्यत्वाच्चाङ्कुरावस्थायामङ्कुरवद्बीजग्रहणमपि स्यात् ' बीजवच्चाङ्कुरस्यापि ग्रहणं[1] स्यात् । नित्यत्वं चैवं बीजस्य स्यादविनाशाभ्युपगमात् ' ततश्च शाश्वतवादप्रसङ्गान्महादोषराशिः स्यात्कर्मफलाद्यभावप्रसङ्गात् [113b] । एवं तावद्यदेव बीजं स एवाङ्कुर इति न युज्यते ॥ न चान्यदपि तत्तस्मात् । नापि बीजादङ्कुरस्यान्यत्वं बीजमन्तरेणाप्यङ्कुरोदयप्रसङ्गात् ।

यद्यन्यदन्यदन्यस्मादन्यस्मादप्यृते भवेत ।

इति[2]वचनादङ्कुरावस्थानेऽपि बीजानुच्छेदप्रसङ्गात् । ततश्च सत्कार्यवाददोषः स्यात् ॥ यतश्चैवं यत्कारणं प्रतीत्य यत्कार्यमुत्पद्यते नैव तत्कारणं कार्यं भवति ' न च तस्मात्कारणात्तत्कार्यम[Tib. 139a]न्यत् ' तस्मान्न कारणमुच्छिन्नं नापि शाश्वतमिति शक्यते व्यवस्थापयितुं ॥

यथोक्तमार्यदेवपादैः[3] ।

यस्मात्प्रवर्तते भावस्तेनोच्छेदो[4] न जायते ।
यस्मान्निवर्तते भावस्तेन नित्यो न जायते ॥ इति ॥

उक्तं चार्यललितविस्तरसूत्रे[5] ।

---

1) ཡང་ན་ ས་བོན་ལྟར་ མྱུ་གུ་ ཡང་ འཛིན་པར་ མི་ འགྱུར་རོ། = *grahaṇaṃ na syāt.*

2) Ci-dessus XIV. 6.

3) **Çataka**, X. 25 (**Muséon**, N. S. I. p. 239).

4) Sic Mss. — ཆད་པར་ མི་འགྱུར.

5) Page 210, l. 4 de l'édition de la **Bibl. Indica** (= 176.11). — Cité **Çikṣās.** 238.9. — Le tibétain porte seulement མདོ་ལས.

बीजस्य सतो यथाङ्कुरो न च यो वीज स चैव अङ्कुरो ।
न च अन्यु ततो न चैव तदेवमनुच्छेद अशाश्वतधर्मता ॥ इति ॥

तदेवं यथोपवर्णितेन न्यायेन ।

<u>अनेकार्थमनानार्थमनुच्छेदमशाश्वतं ।</u>
<u>एतत्तल्लोकनाथानां बुद्धानां शासनामृतं</u>[1] ॥ ११

महाकरुणोपायमहामेघपटलनिरन्तरावच्छादिताकाश[2]धातुपर्यन्तदिग्मण्डलानां रागादिक्लेशगणसमुदाचारातितीक्ष्णातरादित्यमण्डलोपतापितजगज्जातिजरामरणदुःखदहनसंतापोपशमतत्पराणां सततावितरतयथानुरूपचरितप्रतिपन्नसद्धर्मदेशनामृतधारापातैर्यथानुरूपविनेयजनकुशलमूलशस्यौषधिफलपुष्पलतोत्पन्नातिवृद्ध्यनुजिघृक्षूणां सद्धर्मामृतमहावर्षवर्षिणां सम्यक्संबुद्धमहानागानामत्राणालौकिकत्राणानामनाथनाथानां सक[114a]ललोकनाथानामेतत्तत्सद्धर्मामृतं सकलत्रैधातुकभवदुःखातपस्वभावं यथोपवर्णितेन न्यायेनैकत्वान्यत्वरहितं शाश्वतोच्छेदवादविगतं च विज्ञेयं ॥ एतद्धर्मतत्त्वामृतप्रतिपन्नानां श्रावकाणां [Tib. 139b] श्रुतचिन्ताभावना[3]क्रमात्प्रवर्तमानानां शीलसमाधिप्रज्ञा[4]त्मकस्कन्धत्रयामृतरसस्योपयोगान्नियतमेव जरामरणातपस्वभावनिर्वाणाधिगमो भवति ॥ अथा-

---

1) སངས་རྒྱས་ འཇིག་རྟེན་མགོན་རྣམས་ཀྱི། བསྟན་པ་ བདུད་རྩིར་ གྱུར་པ་ དེ། དོན་ གཅིག་ མ་ ཡིན་ ཐ་དད་ མིན། ཆད་པ་ མ་ ཡིན་ རྟག་ མ་ ཡིན།།

2) Voir ci-dessus 371. 1; cp. M. Vyut. § 245. 27; °*vyāpin*, °*vyāpaka*; ibid. § 19. 21; Bodhic. p. VII 31; °*prasarāvadhi*, Ibid. II. 2. 5 — *digantavyāpin*, Ibid. II. 16.

3) Les trois *prajñās*, *çruta*°, etc., M. Vyut. § 75, Vis. Mag. XIV, Bodhic. p. 5. 1, 110. 2, 349. 12. — Deux *prajñās* (*çruta*° = *parato ghoṣato yā uppajjati*... *cintā*° = *yā ajjhattaṃ yoniçomanasikāreṇa uppajjati*), Petakopadesa, ap. Minayeff, Recherches, p. 210; voir ci-dessus p. 362, n. 3a. D'après Nettip. p. 8, la *bhāvanāmayī* est produite *parato ca ghosena paccattasamuṭṭhitena ca yonisomanasikāreṇa*. — Voir aussi p. 50. — La *cintā* et la *bhāvanā* sont longuement étudiées dans Bodhisattvabhūmi, I. viii. § 4. — Avant d'être *anāsravā* la *prajñā* est *kuçalasāsravā* (Abhidh. k. v. 241b).

4) Voir ci-dessus 292, n. 4.

पि कथंचिदिहापरिपक्वकुशलमूलतया श्रुत्वाप्येतत्सद्धर्मामृतं दृष्ट एव धर्मे[1] न मोक्षमासादयन्ति । तथापि जन्मान्तरेऽप्यवश्यमेषां पूर्वहेतुबलादेव नियता सिद्धिः संपद्यते ॥
यथोक्तं शतके[2] ।

इह यद्यपि तत्त्वज्ञो निर्वाणं नाधिगच्छति ।
प्राप्नोत्ययत्नतोऽवश्यं पुनर्जन्मनि कर्मवदिति ॥

अथापि कथंचित् ।

संबुद्धानामनुत्पादे श्रावकाणां पुनः क्षये ।

सत्यार्यमार्गोपदेशककल्याणमित्रप्रत्ययवैकल्यान्न स्याद्धर्मतत्त्वामृताधिगमः । तथापि पूर्वजन्मान्तरधर्मतत्त्वश्रवणाद्धेतुबलादेव ऐहलौकिकोपदेशनिरपेक्षाणामपि प्रविवेकसेवामात्रोपनत[3]प्रत्ययानां स्वायंभुवं

ज्ञानं प्रत्येकबुद्धानामसंसर्गात्प्रवर्तते[4] ॥ १२

कायचेतसोः प्रविवेकोऽसंसर्गः कल्याणमित्रापर्येषणं वा[5] ॥ तस्मादसंसर्गाद्धेतोः प्रत्येकबुद्धानामसंबुद्धकेऽपि काले यस्माद्भवत्येव[6] धर्मतत्त्वाधिगमः । तस्मादवन्ध्या सि-

---

1) Mss. *dharmeṇa.*

2) VIII. 22. — Cité par Candrakīrti dans le Madhyamakāvatārabhāṣya, ad I, 1, p. 2, l. 18. *karmavat* = ལས་བཞིན་ = *karmaphalavat:* de même qu'on obtient dans une naissance ultérieure le fruit de l'acte.

3) *upanata* = ཐོབ་པ་.

4) རྫོགས་སངས་རྒྱས་རྣམས་ མ་ བྱུང་ཞིང༌། ཉན་ཐོས་རྣམས་ ཀྱང་ ཟད་པ་ན། རང་སངས་རྒྱས་ཀྱི་ ཡེ་ཤེས་ ནི། བརྟེན་པ་མེད་པས་ རབ་ཏུ་སྐྱེ།། — Cité dans Madh. av. bh. 3. 1.

5) Comparer les conditions normales du salut: *kalyāṇamitrānutsargāt sūtrāṇāṃ ca sadekṣaṇāt* (Çikṣās. kārikā 6).

6) Mss. *yasmād bhagavatteva, bhavatteva.*

द्धिरस्य संबुद्धमहाविद्यराजप्रणीतस्य सद्धर्मतत्त्वामृतभैषज्यस्येति विज्ञेयं[1] ॥

यतश्चैतदेव[114b]मतोऽर्हति प्राज्ञः प्राणानपि [Tib. 140a] परित्यज्य सद्धर्मतत्त्वं पर्येषितुमिति ॥

यथोक्तं भगवता आर्याष्टसाहस्रिकायां भगवत्यां[2] । कथं च भगवन् सदाप्ररुदितेन बोधिसत्त्वेन महासत्त्वेनेयं प्रज्ञापारमिता पर्येषिता[3] ॥ एवमुक्तो भगवानायुष्मन्तं सुभूतिं स्थविरमेतदवोचत् । सदाप्ररुदितेन बोधिसत्त्वेन महासत्त्वेन पूर्वं प्रज्ञापारमितां पर्येषमाणेन कायेऽनर्थिकेन जीवितनिरपेक्षेण लाभसत्कारश्लोकेष्वनिश्रितेन[4] पर्येषमाणेन पर्येषिता । तेन प्रज्ञापारमितां पर्येषमाणेनारण्यगतेनान्तरीक्षान्निर्घोषः श्रुतोऽभूत् । गच्छ कुलपुत्र[5] पूर्वस्यां दिशि तत्र[6] प्रज्ञापारमितां श्रोष्यसि । तथा च गच्छ यथा न कायक्लमथमनसिकारमुत्पादयसि, न स्त्यानमिद्धमनसिकारमुत्पादयसि, न भोजनमनसिकारमुत्पादयसि, यावन्मा[7] क्वचिच्चित्तं प्रणिधा अध्यात्मं वा बहिर्धा वा । मा च कुलपुत्र वामेनावलोकयन् गाः, मा दक्षिणेन [मा पूर्वेण] मा पश्चिमेन मा उत्तरेण मा ऊर्ध्वं मा अधः मा चानुविदिशमवलोकयन् गाः । तथा च कुलपुत्र गच्छ यथा [नात्मतो] न सत्कायतश्चलसि[8] न रूपतो न वेदनातो न संज्ञातो न संस्कारेभ्यो न [विज्ञानत]श्चलसि [Tib. 140b] । यो ह्यतश्चलति

---

1) Comparer Bodhisattvabhumi, I. vi. § 6 *tulyajātīyo 'sya (pratyekabuddhasya) mārgaḥ çrāvakair, ayaṃ tu … viçeṣaḥ paçcime bhave … anācāryakam pūrvābhyāsavaçāt saptatriṃçad bodhipakṣyān dharmān bhāvayitvā sarvakleçaprahāṇam arhattvaṃ sākṣātkaroti.*

2) Chap. XXX. — Page 481.4 de l'édition de la Bibl. Indica.

3) Sic Bibl. Ind. — Mss. *paryaṣṭā*, de même ci-dessous.

4) Mss. *anihçritena* — མི་གནས་པར.

5) Bibl. Ind. *gaccha tvam.*

6) Ibid. *tataḥ.*

7) Ibid. *na pānīya°, na rātri°, na divasa°, na çita°, noṣṇa°.*

8) Mss. *satkāryataç carasi* — མ་གཡོས་པ.

स वितिष्ठते । [कुतो[1] वितिष्ठते] । बुद्धधर्मेभ्यो वितिष्ठते । यो बुद्धधर्मेभ्यो वितिष्ठते संसारे[2] चरति । यः संसारे[2] चरति स प्रज्ञापारमितायां न चरति । न च तामनुप्राप्नोतीति[3] ॥

[4]यावन्मारेण पापीयसा उदकेऽन्तर्धापिते । [5]अथास्यैतदभू[115a]त् । यन्न्वहमात्मनः कायं विद्ध्वा[6] [इमं] पृथिवीप्रदेशं रुधिरेण सिञ्चेयं । तत्कस्य हेतोः । अयं पृथिवीप्रदेश उद्धतरजस्को । मा रजोधातुरितो[7] धर्मोद्गतस्य बोधिसत्त्वस्य महासत्त्वस्य शरीरे[8] निपतेत् । किमहमात्मभावेन[9] करिष्याम्यवश्यंभेदनधर्मिणा । वरं खलु पुनर्ममैवंरूपया[10] क्रिययात्मभावस्य विनाशः कृतो भवेत् । न त्वेवं निःसामर्थ्यक्रियया । बहूनि च ममात्मभावसहस्राणि कामहेतोः कामनिदानं भिन्नानि पुनः पुनः संसारे संसरतो न पुनरेवंरूपेषु स्थानेषु[11] । * * * * । अथ खलु सदाप्ररुदितो बोधिसत्त्वो महासत्त्वस्तीक्ष्णं[12] शस्त्रं गृहीत्वा समन्तादात्मानं विद्ध्वा समन्ततस्तं पृथिवीप्रदेशं स्वकेन रुधिरेणासिञ्चदित्यादि ॥

[13]अथ खलु सदाप्ररुदितो बोधिसत्त्वो महासत्त्वः सहदर्शनादेव[14] धर्मोद्गतस्य बोधिस-

---

1) ཅི་ལས་ཉམས་པར་འགྱུར་ཞེ་ན།

2) Mss. *saṃskāre* — འཁོར་བ་ལ་སྤྱོད་དོ།

3) Tib. et Bibl. Ind. *prajñāpāramitām.*

4) Chap. XXXI, p. 522. 5 ...*tat sarvam udakam antardhāpitam abhūt.*

5) p. 522. 9.

6) སྦུག་ལ་ voir Jäschke, s. voc. འབིགས་པ་.

7) *ito bhūpradeçād.* — Dharmodgata = ཆོས་འཕགས་.

8) *kāye.*

9) *kiṁ vānenātmabhāvenāvaçyaṃbhedanadharmiṇā kuryām.*

10) ..*maṇāyaṃ kāya evaṃrūpayā kriyayā vinaçyatu, na tu niḥsāmarthya-kriyayā.api ca kāmahetoḥ.*

11) *sthāneṣu saddharmaparigrahasya kṛtaçaḥ.yadi punar bhidyante kāmam evamrūpeṣu bhidyantām iti.atha khalu....*

12) *mahāsattva iti pratisaṃkhyāya tīkṣṇaṃ çastraṃ gṛhītvā svakāyaṃ samantato viddhvā taṃ pṛthivīpradeçaṃ sarvam asiñcat.*

13) Ibid. p. 524. 22.

14) *saha darçanenaiva.*

त्त्वस्य महासत्त्वस्यैवंरूपं[1] सुखं प्रत्यलभत । तद्यथापि नाम [प्रथम]ध्यानसमापन्नस्य[2] भिक्षोरेकाग्रमनसिकारस्य [भिक्षोः][3] । तत्रैवं [Tib. 141a] धर्मोद्गतस्य बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितादेशना यदुत सर्वधर्मसमतया प्रज्ञापारमितासमता । सर्वधर्मविविक्ततया प्रज्ञापारमिताविविक्तता । सर्वधर्माचलतया[4] प्रज्ञापारमिताचलता । सर्वधर्मामननतया[5] प्रज्ञापारमितामननता । सर्वधर्मास्तम्भिततया प्रज्ञापारमितास्तम्भितता । सर्वधर्मैकरसतया प्रज्ञापारमितैकरसता । सर्वधर्मापर्यन्ततया प्रज्ञापारमितापर्यन्तता । सर्वधर्मानुत्पादतया प्रज्ञापारमि[115 b]तानुत्पादता । सर्वधर्मानिरोधतया प्रज्ञापारमितानिरोधता । गगनापर्यन्ततया प्रज्ञापारमितापर्यन्तता । यावत्सर्वधर्मासंभेदनतया प्रज्ञापारमितासंभेदनता सर्वधर्मानुपलब्धितया प्रज्ञापारमितानुपलब्धिता सर्वधर्मा[भिभावना][6]समतया प्रज्ञापारमिताभिभावनासमता । सर्वधर्मनिश्चेष्टतया प्रज्ञापारमितानिश्चेष्टता[7] सर्वधर्माचिन्त्यतया[8] प्रज्ञापारमिताचिन्त्यता वेदितव्येति ॥

॥ इत्याचार्य[Tib. 141b]चन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तावात्मपरीक्षा नामाष्टदशमं प्रकरणं ॥

---

1) *tādṛçam sukham.* — Mss. *imam rūpam.*

2) °*samāpanna ekāgramanasikāro bhikṣuḥ.*

3) D'après le tibétain.

4) *acalanatayā.*

5) *mananārthena nāmarūpa* — རློམ་པའི་ཕྱིར. (Çālistamba). — Comparer *manyanā*, Dh.-saṇi. § 1116, 1233, Nettip. p. 24, Bodhic. p. IX. 88, ad finem, Çikṣās. 251, n. 1.

6) རྣམ་པར་འཇིག་པ་ མཉམ་པ་ཉིད་ = °*dharmavi*°.

7) ཁྱད་པ་མེད་པ་ཉིད་.

8) མི་ཁྱབ་པ་ཉིད་.

XIX.

कालपरीक्षा नामैकोनविंशतितमं प्रकरणं

अत्राह । विद्यत एव भावानां स्वभावः कालत्रयविज्ञप्तिहेतुत्वात् ॥ इहातीतानागतप्रत्युत्पन्नास्त्रयः काला भगवतोपदिष्टास्ते च भावाश्रयाः । यस्मादुत्पन्नो निरुद्धो हि भावस्वभावो ऽतीत इति व्यपदिश्यते ' उत्पन्नो ऽनिरुद्धो हि वर्तमानः ' अलब्धात्मभावो ऽनागत इति । एवं भावस्वभावनिबन्धनास्त्रयः काला उपदिष्टास्ते च सन्ति । तस्मात्तन्निबन्धनो ऽपि भावस्वभावो ऽस्तीति ॥ उच्यते । स्यात्कालत्रयप्रज्ञप्तिहेतुर्भावस्वभावो यदि कालत्रयमेव [भव]दभिमतं भवेत् । न [116a] त्वस्ति । यथा च नास्ति तथा प्रतिपादयन्नाह ।

प्रत्युत्पन्नो ऽनागतश्च यद्यतीतमपेक्ष्य हि ।
प्रत्युत्पन्नो ऽनागतश्च काले ऽतीते भविष्यतः[1] ॥ १

इह तावद्यदि वर्तमानानागतौ स्यातां तावपेक्ष्यातीतं कालं भवेतामनपेक्ष्य वा । तत्र यद्यतीतमपेक्ष्य सिध्येते तथा नियतमतीते काले भविष्यतः । यस्माद्यस्य हि यत्रासत्व तत्तेन[2] नापेक्ष्यते ' तद्यथा वन्ध्या स्त्री स्वतनयेन गगनमालतीलता स्वकुसुमेन सिकता स्वतैलेन ॥ अविद्यमानमप्यन्धकारं प्रदीपेन प्रदीपोऽप्यन्धकारेण प्रतिद्वन्द्वित्वेनापेक्ष्यत इति चेत् । नैतदेवं [Tib. 142a] ' अस्यापि साध्यसमत्वात् ॥ तदत्र यद्यतीते काले वर्तमानानागतौ कालाविष्येतेऽपेक्षासिद्ध्यर्थमेवं सत्यतीते काले विद्यमानत्वादतीतकालात्मवत्त-

1) ད་ལྟར་བྱུང་ དང་ མ་འོངས་པ། གལ་ཏེ་ འདས་ལ་ བལྟོས་ གྱུར་ན། ད་ལྟར་ བྱུང་ དང་ མ་འོངས་པ། འདས་པའི་ དུས་ན་ ཡོད་པར་ འགྱུར།།

2) *yatattvenopekṣetaḥ* — དེ་ནི་ དེ་ལ་ བལྟོས་པ་ མ་ ཡིན་ཏེ། = *tat tatra.*

योरप्यतीतत्वं स्यात्। ततश्चातीतोऽपि न स्यात्। यस्माद्वर्तमानावस्थातिक्रान्तो ह्यतीतोऽसंप्राप्तोऽनागत इति स्यात्। यदा तु वर्तमानानागतयोरसंभव एव ' तदा कुतः कस्यचिदतीतत्वं स्यादित्यतोऽतीतोऽपि न स्यात्॥ अथ यथोक्तदोषपरिजिहीर्षया '

प्रत्युत्पन्नो ऽनागतश्च न स्तस्तत्र पुनर्यदि[1]।
प्रत्युत्पन्नो ऽनागतश्च स्यातां कथमपेक्ष्य तं[2]॥ २

[3]तत्रातीते काले यदि वर्तमानानागतौ कालौ न स्त इति परिकल्प्यते ' एवमपि तत्राविद्यमानत्वाद्गगनेन्दीवरवन्नास्त्यपेक्षा॥

अथापि स्यात्कालवादिनां[4] विद्यत एव कालस्तत्र किमपेक्षया प्रयोजनमिति॥ उच्यते। एवमपि [116b]

अनपेक्ष्य पुनः सिद्धिर्नातीतं विद्यते तयोः।
प्रत्युत्पन्नोऽनागतश्च तस्मात्कालो न विद्यते[5]॥ ३

प्रत्युत्पन्नानागतयोरसत्त्वम[6]तीतानपेक्षत्वात् ' खरविषाणवत्। यतश्चैवं प्रत्युत्पन्नो ऽनागतश्च तस्मात्कालो न विद्यत इति विज्ञेयं॥

यदा चैवमतीतमपेक्ष्य वाऽनपेक्ष्य वा प्रत्युत्पन्नानागतयोर्नास्ति सिद्धिरेवं प्रत्युत्पन्नापेक्षया वा ऽनपेक्षया वातीतानागतयोर[Tib. 142b]नागतापेक्षया वाऽनपेक्षया वा प्रत्यु-

---

1) Mss. *tatra pūrva yadi.*

2) ད་ལྟར་བྱུང་ དང་ མ་འོངས་པ། གལ་ཏེ་ དེ་ན་ མེད་འགྱུར་ན། ད་ལྟར་བྱུང་ དང་ མ་འོངས་པ། ཇི་ལྟར་ དེ་ལ་ བལྟོས་པར་ འགྱུར།།

3) Mss. *tatra ced atīte...*

4) Tib. ajoute *darçane.*

5) འདས་པ་ལ་ནི་ མ་ བལྟོས་པར། དེ་གཉིས་ གྲུབ་པ་ ཡོད་ མ་ ཡིན། དེ་ཕྱིར་ ད་ལྟར་བྱུང་བ་ དང་། མ་འོངས་ དུས་ ཀྱང་ ཡོད་ མ་ ཡིན།།

6) Mss. *asattvam asyātīta°.*

त्पन्नातीतयोरसिद्धाविष्यमाणायां[1] तेनैव प्रत्युत्पन्नानागतयोरतीतापेक्ष[याऽनपेक्षया वा]-सिद्धिक्रमेण दूषणसाम्यम[ति]दिशन्नाह ॥

एतेनैवावशिष्टौ द्वौ क्रमेण परिवर्तकौ ।
उत्तमाधममध्यादीनेकत्वादींश्च लक्षयेत्[2] ॥ ४

कथं कृत्वा ।

यद्यतीतो ऽनागतश्च प्रत्युत्पन्नमपेक्ष्य हि ।
कालोऽतीतोऽनागतश्च प्रत्युत्पन्ने भविष्यतः ॥
कालोऽतीतोऽनागतश्च न स्तस्तत्र पुनर्यदि ।
कालोऽतीतोऽनागतश्च स्यातां कथमपेक्ष्य तं ॥
अनपेक्ष्य पुनः सिद्धिर्न ज्ञातं[3] विद्यते तयोः ।
तेनातीतोऽनागतश्च कालो नाम न विद्यते ॥

एष तावदेकः कालपरिवर्तः ।

अतीतो वर्तमानश्च यद्यज्ञातमपेक्ष्य हि ।
अतीतो वर्तमानश्च कालेऽज्ञाते भविष्यतः ॥
अतीतो वर्तमानश्च न स्तस्तत्र पुनर्यदि ।
अतीतो वर्तमानश्च स्यातां कथमपेक्ष्य तं ॥
अनपेक्ष्य पुनः सिद्धिर्नाज्ञातं विद्यते तयोः ।
अतीतो वर्तमानश्च तस्मात्कालो न विद्यते ।

---

1) Mss. *ahiçyamāṇāyā tanaiva* — ཤེས་པ་ཉ་.

2) རིམ་པའི་ཚུལ་ནི་འདི་ཉིད་ཀྱིས། ལྷག་མ་གཉིས་པོ་བསྒྲང་བ་དང་། མཆོག་དང་ཐ་མ་འབྲིང་ལ་སོགས། གཅིག་ལ་སོགས་ལའང་ཤེས་པར་བྱ།།

3) Mss. *anapekṣya punaḥ siddhir nātītam*... ད་ལྟར་ལ་ནི་མ་བལྟོས་པར། *jāta* = *pratyutpanna*; *ajāta* = *anāgata* (l. 13 et suiv.).

एष द्वितीयः कालपरिवर्त [117a] इति[1] व्याख्यानकारिका इति[1]। एवं द्वौ कालपरिवर्तौ बोद्धव्यौ ॥ यतश्चैवं विचारणे कालत्रयं नास्ति तस्मात्कालो न विद्यते कालाभावाच्च भावसद्भावोऽपि नास्तीति सिद्धं ॥

यथा चैतत्कालत्रयं विचारितमेवं ।

उत्तमाधममध्यादीनेकत्वादींश्च[2] लक्षयेत् ।

उत्तमाधममध्यमादीनि[Tib. 143a]त्यादिशब्देन कुशलाकुशलाव्याकृतानि ' उत्पादस्थितिभङ्गाः ' पूर्वान्तापरान्तमध्यान्ताः ' कामरूपारूप्यधातवः ' शैक्षाशैक्षनैवशैक्षनैवाशैक्षादयो यावन्तः पदार्थास्त्रि[3]पदार्थसंबन्धव्यवस्थितास्ते सर्वे गृह्यन्ते । एकत्वादींश्चेत्यनेनादिशब्देन द्वित्वबहुत्वयोर्ग्रहणात्त एवोत्तमादय एकत्वादयश्च कालत्रयव्याख्यानेन व्याख्याता वेदितव्याः ॥

अत्राह । विद्यत एव कालः परिमाणवत्त्वात् । इह यन्नास्ति न तस्य परिमाणवत्त्वं विद्यते तद्यथा खरविषाणस्य ' अस्ति च कालस्य परिमाणवत्त्वं क्षणलवमुहूर्तदिवसरात्र्यहोरात्रपक्षमाससंवत्सरादिभेदेन । तस्मात्परिमाणवत्त्वाद्विद्यत एव काल इति ॥ उच्यते । यदि कालो नाम कश्चित्स्यात्स्यात्तस्य परिमाणवत्त्वं । न त्वस्ति । यस्मात् ।

नास्थितो गृह्यते कालः स्थितः कालो न विद्यते ।
यो गृह्येतागृहीतश्च कालः प्रज्ञप्यते कथं[4] ॥ ५

1—1) Non traduit dans le tibétain. — Kārikās complémentaires des trois premières kārikās de ce chapitre, explicatives de la kārikā 4a.

2) Mss. *ekatvādīṃç cetyādi.* — Voir 384. 4.

3) Mss. *triḥpādārthāḥ saṃ°.* — དངོས་པོ་ གསུམ་དང་ འབྲེལ་པར་ གནས་ པ = *yāvantaḥ padārthās trisaṃbandhena vyavasthitāḥ* = toutes les triades.

4) མི་གནས་ དུས་ནི་ འཛིན་ མི་ བྱེད། གང་ཞིག་ གཟུང་བར་བྱ་བའི་ དུས། གནས་པ་ ཡོད་པ་ མ་ཡིན་པས། མ་བཟུང་དུས་ནི་ ཇི་ལྟར་ གདགས॥ Mss. *sthitaḥ kālo na gṛhyate.*

इह यदि कालो नाम कश्चिदवस्थितः क्षणादिव्यतिरिक्तः स्यात्स क्षणादिभिः परिमाणवत्त्वाद्गृह्येत । न त्ववस्थितः कूटस्थः[1] कश्चित्कालो नामास्ति यः क्षणादिभिर्गृह्येत । तदेवं नास्थितो[2] गृह्य[Tib. 143b]ते [117b] कालोऽस्थितत्वान्न गृह्यत इत्यर्थः ॥

अथापि स्यान्नित्य एवावस्थितस्वभावः कालो नामास्ति क्षणादिभिरभिव्यज्यते[3] । तथा हि ।

कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ इति[4] ।

यद्येवंलक्षणः सोऽवस्थितस्वभावोऽस्तीति ॥ उच्यते । एवमपि स्थितः कालो न विद्यते यः क्षणादिभिरभिव्यज्यमानो गृह्येत ॥ कस्मात्पुनः स्थितः कालो नास्तीति चेत् । क्षणादिव्यतिरेकेणागृह्यमाणत्वात् ॥

अपि चायं कालः संस्कृतस्वभावः सन्नस्तीति ' असंस्कृतस्वभावो वा । उभयं च संस्कृतपरीक्षायां प्रतिषिद्धं[5] ।

उत्पादस्थितिभङ्गानामसिद्धेर्नास्ति संस्कृतं ।
संस्कृतस्याप्यसिद्धौ च कथं सेत्स्यत्यसंस्कृतं ॥

इत्यनेन । तदेवं नास्ति व्यवस्थितः[6] कालो यो गृह्येत । यश्चेदानीं कालो न गृह्यते[7] ऽस्थि-

1) ཐེར་ཟུག་པར་གནས་པ་ — Voir ci-dessus p. 63, n. 3; Çikṣās. 261. 17.

2) Mss. *nāstitā*.

3) Mss. *lakṣaṇa*°.

4) Stance bien connue, Ind. Spr. 1688; Hopkins, Proverbs and tales in the Epics, p. 25 (Am. J. of Phil. XX. № 1); citée dans le commentaire de Nāgārjuna's Friendly Epistle, § 50 (J. P. T. S 1886, p. 16). H. Wenzel compare les «followers of (the doctrine of) Time», དུས་སུ་སྨྲ་བ་རྣམས་ (= *kālavādinas*) aux *kālakāraṇikas* du Kāmasūtra (Aufrecht, Cat. Ox. 216b 7).

5) = VII. 33.

6) Sic Mss. — གནས་པ་ comme ci-dessus *avasthita* et *sthita* — *vy-ava-* = རྣམ་པར་.

7) Mss. *gṛhyetāsthitatyād*..

तस्मादविद्यमानस्वरूपत्वात्सो ऽगृह्यमाणः सन् कथं क्षणादिभिः प्रज्ञपयितुं भावतः[1] पार्यत इत्याह । अगृहीतस्य कालः प्रज्ञप्यते कथमिति । तस्मान्नास्त्येव कालः ॥

अत्राह । सत्यं नास्ति नित्यः कालो नाम कश्चिद्रूपादिव्यतिरिक्तः स्वभावसिद्धः । किं तर्हि रूपादीनेव स संस्कारानुपादाय प्रज्ञप्तः कालः क्षणादिशब्दवाच्यो भवति । तस्माददोष इति [Tib. 144a] ॥ उच्यते । एवमपि

भावं प्रतीत्य कालश्चेत्कालो भावादृते कुतः ।

यद्येवं भावं प्रतीत्य कालो [118a] भवतीति भवता[2] व्यवस्थाप्यते । यदा खलु भाव[ो] नास्ति । तदा नियतं तद्धेतुकोऽपि कालो नास्तीति प्रतिपादयन्नाह ।

न च कश्चन भावोऽस्ति ।

इति पूर्वं विस्तरेण प्रतिपादितत्वाद्वक्ष्यमाणप्रतिषेधाच्च । यदा चैवं न कश्चिद्भावोऽस्ति भावतस्तदा

कुतः कालो भविष्यति[3] ॥ ६

कालाभावाच्च न सन्ति क्षणलवमुहूर्तादयः[4] कालभेदास्तत्परिमाणभूता इत्यतः कुतः परिमाणवत्त्वेन कालसिद्धिर्भविष्यति । तस्मान्नास्त्येव भावानां स्वभाव इति ॥

उक्तं हि भगवता आर्यहस्तिकक्ष्यसूत्रे[5] ॥

---

1) Non représenté dans le tibétain.

2) Non traduit dans le tibétain.

3) གལ་ཏེ་ དུས་ ནི་ དངོས་པོ་ བརྟེན་ཏེ། དངོས་མེད་ དུས་ ནི་ ག་ལ་ ཡོད། དངོས་པོ་ འགའ་ཡང་ ཡོད་ མིན་ན། དུས་ལྟ་ ཡོད་པར་ ག་ལ་ འགྱུར༎

4) Tib. = *kṣaṇādayaḥ*.

5) གླང་པོ་རྩལ་གྱི་མདོ་ — Mss. *hăstikokta°*, *kakṣa*. — Voir Çikṣās. 133.4 et 404; Subhāṣitas., Muséon, N. S., V, p. 43.20; M. Vyut. § 65. 75, Nanjio 193–4, Feer p. 261. — Cette stance est citée ci-dessous ad XXIV, 34.

यदि को चि धर्माण भवेत्स्वभावः
तत्रैव गच्छेय जिनः[1] सश्रावको ।
कूटस्थधर्माण सिया[2] न निर्वृती
न निष्प्रपञ्चो[3] भवि जातु पण्डित इति ॥

तथा ।

बुद्धसहस्रशता य अतीता
धर्मसहस्रशतानि भणित्वा ।
नैव च धर्म न चाक्षर क्षीणा
नास्ति समुद्भवु तेन अक्षीणा ॥ इति ।

तद्यथा[4] ।

उत्पादकाले हि तथागतस्य
मैत्रेयनामा भिक्षु यो भविष्यति ।
भविष्यतीयं कनकास्तृता मही
तस्याः तदानीं कुत आगमोऽसौ[5] ॥
उल्लापनाः कामगुणा हि पञ्च
विश्रामणा मोहन मोषधर्मिणः ।
मध्याह्नकाले हि यथैव ग्रीष्मे
जलं मरीच्यां हि तथैव कामाः ॥

---

1) ཉན་ཐོས་བཅས་. — *gam.* = མཆེད་.

2) Mss. *dharmāṇamiyāṇanirvṛtī*, *dharmāsamayānanir°*, *dharmaṇam — iyānaṇanir°* — ཐེར་ཟུག་ཆོས་རྣམས་ མྱ་ངན་འདའ་ མི་འགྱུར་ = ... *na bhaven nirvāṇam.*

3) *na...bhavi* = *na bhavet* མི་འགྱུར་.

4) Tib. = *tathā.*

5) Le chapitre se termine ici dans le tibétain.

एकेन कल्पेन[1] भवेद्धि लोको
आकाशभूतो गगनस्वभावो ।
दाहं विनाशं च [प]याति मेरवः
कुत आगमः कुत्र गतिश्च तेषां ॥ इति ॥

तद्यथा । पञ्चेमानि भिक्षवः संज्ञामात्रं प्रतिज्ञामात्रं व्यवहारमात्रं संवृतिमात्रं यदु-तातीतोऽध्वाऽनागतोऽध्वाऽकाशं नि[118b]र्वाणं पुद्गलश्चेति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां मध्यमकवृत्तौ कालपरीक्षा[2] नामैकोनविंश-तितमं प्रकरणं ॥

---

1) Mss. *kāsyena*, *kālpena*.

2) Voir Wassilieff, p. 331, la doctrine des Prasaṅgas sur le temps. Candrakīrti, comme or sait, est, après Buddhapālita, le chef de cette école.

XX.

सामग्रीपरीक्षा नाम विंशतितमं प्रकरणं

अत्राह । विद्यते कालः फलप्रवृत्तौ सह[Tib. 145b]कारिकारणभावात् । यो नास्ति नासौ सहकारिकारणभावेन प्रतिपद्यते ' वन्ध्यातनयवत् ' तस्मादस्ति कालः सहकारिकारणभावात् ॥ इह बीजावनिसलिलज्वलनपवनगगनाभिधानहेतुप्रत्ययसामग्रीं[1] प्रतीत्यायमङ्कुर उपजायमानः[2] सत्यामपि बीजादिप्रत्ययसामग्र्यामृतुविशेषासंनिधानान्नोपजायते । यथा च बाह्येष्वेवमाध्यात्मिकेष्वपि[3] ।

यथोक्तं[4] भगवता ।

न प्रणश्यन्ति कर्माणि कल्पकोटिशतैरपि ।
सामग्रीं प्राप्य कालं च फलन्ति खलु देहिनां ॥ इति ।

यस्माच्चैवमस्ति कालापेक्षा तस्मादस्त्यसौ कालो नाम[5] यो ऽङ्कुरादिप्रवृत्तौ सहकारिकारणं भवतीति ॥ उच्यते । स्यात्सहकारिकारणता कालस्य यद्यङ्कुरादिफलस्य प्रवृत्तिरेव स्यात् । न त्वस्ति । कथं कृत्वा । इह बीजादिहेतुप्रत्ययसामग्रीतो ऽङ्कुरादिफ-

---

1) Le *bīja* est le *hetu* de l'*aṅkura;* les cinq *dhātus* en sont les *pratyayas;* le rôle de chacun d'eux est expliqué dans le Çālistambasūtra, voir Bodhic. t. 370 (IX. 142), Bhāmatī 354. 9. — Le tibétain porte °*gagana-kāla-abhidhāna*°.

2) Mss. °*jāyamāno.*

3) Le temps est nécessaire au développement du *bāhya* et de l'*ādhyātmika samutpāda.*

4) Voir Divyāvadāna passim.

5) Mss. *nāma 'pyaṅkura*°.

6) Le tib. ne traduit pas *satyām*; il donne °*phalodaye parikalpyamāne phalasya sāmagryāṃ vyavasthitasya vāvyavasthitasya vā tata utpādo parikalpyeta.*

लोदये परिकल्प्यमाने व्यवस्थितस्य वा फलस्य सामग्र्यां सत्यां तत उत्पाद[ः] परिकल्प्येताव्यवस्थितस्य वा ॥ किं चातः । यदि तावद्व्यवस्थितस्य परिकल्प्यते तन्न युज्यत इति प्रतिपादयन्नाह ।

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि ।
फलमस्ति च [सामग्र्यां] सामग्र्या जायते कथं[(1)] ॥ १

यदि हेतुप्रत्ययसामग्र्यां [119a] त्वन्मतेन फलमस्ति । नन्वेवं सति यस्मात्सामग्र्यामस्ति कथं तया तज्जन्यते । न हि कुण्डे दधि विद्यमानं कुण्डेन जन्यते ॥ अपि च [Tib. 146a] यद्विद्यते तन्निष्पन्नत्वान्निष्पन्नपुरोऽवस्थितघटवन्न पुनर्जन्मापेक्षते । अभिव्यक्तिः स्थौल्यं वा सूक्ष्मात्मना विद्यमानस्य क्रियत इति चेत्तस्यापि यत्नस्य पूर्वमेवोत्तरत्वात् ।

आगच्छत्यन्यतो नाग्निर्न विद्यते तथेन्धने
इत्यत्रोक्तमुत्तरं[(2)] ॥

अथ नास्त्येव सामग्र्यां फलमिति परिकल्प्यते । एतदपि नोपपद्यत इति प्रतिपादयन्नाह ।

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि ।
फलं नास्ति च सामग्र्यां सामग्र्या जायते कथं[(3)] ॥ २

---

1) གལ་ཏེ་ རྒྱུ་ དང་ རྐྱེན་རྣམས་ཀྱི། ཚོགས་པ་ ཉིད་ལས་ སྐྱེ་འགྱུར་ཞིང་། ཚོགས་ལ་ འབྲས་བུ་ ཡོད་ན་ནི། ཇི་ལྟར་ ཚོགས་པ་ཉིད་ལས་ སྐྱེ།།

2) = X. 13.

3) གལ་ཏེ་ རྒྱུ་ དང་ རྐྱེན་རྣམས་ཀྱི། ཚོགས་པ་ཉིད་ལས་ སྐྱེ་ འགྱུར་ཞིང་། ཚོགས་ལ་ འབྲས་བུ་ མེད་ན་ནི། ཇི་ལྟར་ ཚོགས་པ་ཉིད་ལས་ སྐྱེ།།

यदि हेतोश्च प्रत्ययानां च सामग्र्यां नास्ति तत्फलं ' कथं तर्हि हेतुप्रत्ययसामग्र्या फलं जन्यते। तत्राविद्यमानत्वात्सिकताभिरिव तैलं। अत एवासं[1]भावयन्नाह '

फलं नास्ति च सामग्र्यां सामग्र्या जायते कथं।

न तत्फलं सामग्रीतो जायत इत्यभिप्रायः॥

किं चान्यत्।

हेतोश्च प्रत्ययानां च सामग्र्यामस्ति चेत्फलं।
गृह्येत ननु सामग्र्यां सामग्र्यां च न गृह्यते[2]॥ ३

यद्यत्रास्ति तत्तत्र गृह्यते तद्यथा कुण्डे दधि ' यच्च यत्र नास्ति न तत्तत्र गृह्यते तद्यथा सिकतासु तैलं मण्डूकजटायां शिरोमणिः।

अथ स्याद्विद्यमाना अपि पदार्था अतिसौक्ष्म्यादतिसंनिकर्षादतिविप्रकर्षादिन्द्रियोपघातान्मूर्तिवद्द्र[3]व्यव्यवधानान्मूर्त्यन्त[4]र्धानादात्मनोऽनवस्थानात्परमाणुवदञ्जनशलाकावदादित्यगतिवत्तैमिरिके[कै][5]र्केशव[119 b]दन्धबधिरादि[Tib. 146b]रूपशब्दादिवत्कुड्यादिव्यवहितघटादिवत्सिद्धदेवपिशाचादिशरीरवद्विषयान्तरव्यापृतस्य विषयान्तरवन्न गृह्यन्त इति चेत्॥ किं खल्वेषामगृह्यमाणानामस्तित्वे लिङ्गं येनैषामस्तित्वे सत्यनुपलब्धिरिति स्यात्॥

---

1) «Montrant l'impossibilité». Voir ci-dessus 143. n. 2. — Tib. = *ata eva asaṃbhavāt phalaṃ nāsti..... jāyate katham ity āha.*

2) གལ་ཏེ་ རྒྱུ་ དང་ རྐྱེན་རྣམས་ཀྱི། ཚོགས་པ་ འབྲས་བུ་ ཡོད་ན་ ནི། ཚོགས་པ་ གཟུང་དུ་ཡོད་རིགས་ ན། ཚོགས་པ་ཉིད་ལ་ གཟུང་དུ་མེད༎

3) Mss. *mūrtivaddraṣṭavya.* ལུས་ཅན་གྱི་ རྫས་ཀྱི་ ཆོད་པ་.

4) *antardhāna* = མི་སྣང་བ་.

5) སྐྱ་རེ་རེ.

अनुमानोपमानागमैर्ग्रहणादेषामस्तित्वमिति चेत् ॥ न तर्हि तेषामनुपलब्धिरिति वक्तव्यमनुमानादिभिरुपलभ्यमानत्वात् ॥ यद्रूपीन्द्रियग्राह्यं[1] तदेभिः कारणैर्विद्यमानमपि सन्न गृह्यत इति चेत् ॥ उच्यते । किमस्माभिरेवमुक्तं रूपीन्द्रियैर्विद्यमानं सद्गृह्येतेति ' किं तर्हि सामान्येनैव यद्ब्रूमः ' गृह्येत ननु सामग्र्यामिति ॥

अथापि मन्यसे ' यद्यत्र नास्ति न तत्तस्मादुत्पद्यते सिकताभ्यस्तैलवत् ' उत्पद्यते च सामग्रीतः फलं ' तस्मादनुमानतः सामग्र्यां फलस्यास्तित्वमिति । उच्यते । यद्यत्रास्ति न तत्तस्मादुत्पद्यते तद्यथा कुण्डाद्दधीति । अस्मादप्यनुमानादस्तित्वमस्यायुक्तमिति कृत्वा नास्त्येव सामग्र्यां फलमिति किं न गृह्यते[2] ॥

अथापि स्यादुभयोरपि पक्षयोरनुमानविरोधाद्यथास्तित्वं न युक्तमेवं नास्तित्वमपीति ॥ उच्यते । न वयमस्यासत्त्वं प्रतिपादयामः ' किं तर्हि परपरिकल्पितं सत्त्वमस्य निराकुर्मः । एवं न वयमस्य सत्त्वं प्रतिपादयामः ' किं तर्हि [Tib. 147a] परपरिकल्पितमसत्त्वमस्यापाकुर्मः । अन्तद्वयपरिहारेण मध्यमायाः प्रतिपदः प्रतिपादयितुमिष्टत्वादिति ॥

उक्तं चार्यदेवपादीये शतके[3] ॥

स्तम्भादीनामलंका[120a]रो गृहस्यार्थे निरर्थकः ।
सत्कार्यमेव यस्येष्टं यस्यासत्कार्यमेव च ॥ इति ।

तदेवं न सामग्रीतः फलमुत्पद्यते विद्यमानस्य ग्रहणप्रसङ्गादिति व्यवस्थितं ॥
अथ मन्यसे नास्त्येव सामग्र्यां फलमिति । एवमपि

हेतोश्च प्रत्ययानां च सामग्र्यां नास्ति चेत्फलं ।
हेतवः प्रत्ययाश्च स्युरहेतुप्रत्ययैः समाः[4] ॥ ४

1) Voir ci-dessus 73. n. 3

2) ཅི་སྟེ་ མི་ གཟུང་ — Pourquoi ne pas l'admettre?

3) V. le çataka d'Āryadeva, XI. 15 — Muséon, N.S., I, p. 239. — *āryadevapādīya* n'est pas traduit dans le tibétain.

4) གལ་ཏེ་ རྒྱུ་དང་རྐྱེན་རྣམས་ཀྱི། ཚོགས་ལ་ འབྲས་བུ་ མེད་ན་ནི། རྒྱུ་རྣམ་ས་ དང་ ནི་ རྐྱེན་དག་ ཀྱང་། རྒྱུ་རྐྱེན་མ་ཡིན་ མཚུངས་པར་ འགྱུར།།

यथा हि ज्वालाङ्गारादिष्वङ्कुरो नास्तीति कृत्वा तस्य ते हेतुप्रत्यया न भवन्ति। एवं विवक्षितानामपि बीजादीनां हेतुप्रत्ययता न स्यात्तेष्वङ्कुरो नास्तीति कृत्वा। न चाहेतुप्रत्ययेभ्यः फलप्रवृत्तिर्युक्तेति नास्ति स्वभावतः फलप्रवृत्तिः॥

अत्राह। नैव हि सामग्र्याः फलोत्पादनसामर्थ्यमस्ति यत इयं चिन्ता स्यात्। किं सामग्र्यां फलमस्ति उताहो नास्तीति। किं तर्हि हेतोः फलोत्पादनसामर्थ्यं। सामग्री तु हेतोरनुग्रहमात्रं[1] करोति। स हेतुः फलस्योत्पत्त्यर्थं हेतुं दत्त्वा निरुध्यते तेन च हेतुनानुगृह्यमाणं[2] फलमुत्पद्यत इति॥

उच्यते। नैव ह्यजातस्य फलस्य हेतोरनुग्रहणमस्ति। न चाप्यजातस्य वन्ध्यातनयस्येव केन चित्किं चिन्मात्रं कर्तुं शक्यमित्ययुक्तैषा कल्पना॥ अपि च।

हेतुकं फलस्य दत्त्वा यदि हेतुर्निरुध्यते।
यद्दत्तं [Tib. 146b] यन्निरुद्धं च हेतोरात्मद्वयं भवेत्[3]॥ ५

यदि हेतुः[4] फलस्योत्पत्त्यर्थं हेतु[कं][5] कारणं दत्त्वा निरुध्यत इति परिकल्प्यते। एवं सति यद्दत्तं यन्निरुद्धं च तदात्मभावद्वयं हेतोः स्यान्न चैतद्युक्तमर्धशाश्वतप्रसङ्गा[6]न्नित्यानित्ययोश्च परस्परविरुद्धयोरेकत्वाभावात्॥ अथ हे[120b]तोरात्मभावद्वयप्रसङ्गपरिहारार्थं सर्वात्मना निरोध इष्यते फलस्योत्पत्त्यर्थं किं चिदप्यदत्त्वा। एवमपि

1) རྒྱུ་ལ་ ཕན་འདོགས་པ་ཙམ་.

2) ཕན་བཏགས་པ་.

3) གལ་ཏེ་ རྒྱུས་ ནི་ འབྲས་བུ་ལ། རྒྱུ་ བྱིན་ནས་ ནི་ འགག་འགྱུར་ན། གང་ བྱིན་པ་ དང་ གང་ འགག་པའི། རྒྱུ་ཡི་ བདག་ཉིད་ གཉིས་སུ་ འགྱུར།།

4) Tib. = *sa hetuḥ.*

5) Mss. *dekukāraṇam.* Tib. = *hetuṃ tatkāraṇahetum.* རྒྱུ་ དེ་ བྱེད་རྒྱུ་ — *hetuka* = *haituka* = *hetu* (P. W.).

6) Comparer le *ardhajaratīyanyāya.* Col. G. A. Jacob, First Handful, p. 6.

हेतुं फलस्याद्दत्त्वा च यदि हेतुर्निरुध्यते।
हेतौ निरुद्धे जातं तत्फलमाहेतुकं भवेत्[1]॥ ६

यदि फलस्य किं चिदप्यदत्त्वा सर्वात्मना हेतुर्निरुध्यते । ननु तस्मिन् हेतौ निरुद्धे यत्फलमुत्पद्यते तदाहेतुकमेव स्यान्न चाहेतुकमस्तीत्ययुक्तैषा कल्पना ॥

अत्राह । यद्येवं फलस्य हेतोरुत्पत्तौ दोष एवं सति सहोत्पन्नैव सामग्री फलस्य जनिकास्तु तद्यथा प्रदीपप्रभाया इति ॥ एषापि कल्पना नोपपद्यत इति प्रतिपादयन्नाह ।

फलं सहैव सामग्र्या यदि प्रादुर्भवेत्पुनः ।
एककालौ प्रसज्येते जनको यश्च जन्यते[2]॥ ७

न चैककालयोः सव्येतरगोविषाणयोर्जन्यजनकत्वं दृष्टं वामदक्षिणकरयोश्चरणयोर्वेत्ययुक्तैषा कल्पनेत्ययुक्तमेतत् ॥

अत्राहुरेके । नैव ह्यभूत्वा भावानामुत्पत्तिर्युक्ता आकस्मिकत्वप्रसङ्गात् । तस्माद्धेतुप्रत्ययसामग्रीतः [Tib. 147a] पूर्वमेव तत्फलमनागतावस्थायां व्यवस्थितमनागतात्मना । तस्य हेतुप्रत्ययसामग्र्या वर्तमानावस्था जन्यते । द्रव्यं तु व्यवस्थितमेवेति[3]।
[4]तान् प्रत्युच्यते ।

---

1) གལ་ཏེ་ རྒྱུ་ ནི་ འབྲས་བུ་ལ། རྒྱུ་ མ་བྱིན་པར་ འགག་འགྱུར་ན། རྒྱུ་ འགགས་ནས་ ནི་ སྐྱེས་པ་ཡི། འབྲས་བུ་ དེ་ ནི་ རྒྱུ་མེད་ འགྱུར॥

2) གལ་ཏེ་ ཚོགས་ དང་ ལྷན་ཅིག་ཏུ། འབྲས་བུ་ ཡང་ ནི་ སྐྱེ་ འགྱུར་ན། སྐྱེད་པར་ བྱེད་ དང་ བསྐྱེད་བྱ་ གང་། དུས་གཅིག་པར་ ནི་ ཐལ་བར་ འགྱུར॥

3) Voir Bhavya apud Rockhill, Life, p. 195 et Abhidh. k. v. fol. 359.

4) Mss. *tāvat praty.* དེ་དག་ལ་ བརྗོད་པ་ ནི།

पूर्वमेव च सामग्र्याः फलं प्रादुर्भवेद्यदि ।
हेतुप्रत्ययनिर्मुक्तं फलमाहेतुकं भवेत्[1] ॥ ८

यदि [2]भवतामभीप्सि[121a]तं[2)] सामग्रीतः पूर्वमेव फलं स्वरूपतः स्यादिति तद्धेतुप्रत्ययनिरपेक्षं स्यात् । ततश्चाहेतुकं स्यात् । न चाहेतुकानां पदार्थानामस्तित्वं युक्तं । खरतुरगोरगविषाणादीनामप्यस्तित्वप्रसङ्गात् । पूर्वसिद्धस्य च पुनर्हेतुप्रत्ययापेक्षया निष्प्रयोजनत्वादित्ययुक्तमेतत् ।

अन्ये पुनर्वर्णयन्ति । हेतुरेव फलं जनयति न सामग्री । न चोक्तदोषप्रसङ्गो यस्मान्नान्यो हेतुरन्यत्फलं यतः किं हेतुं दत्त्वा फलस्य हेतुर्निरुध्यते उताहत्त्वेवेति विचारः स्यात् । अपि तु हेतुरेव[3] निरुद्धः फलात्मना व्यवस्थित इति ॥ उच्यते । एवमपि ।

निरुद्धे चेत्फलं हेतौ हेतोः संक्रमणं भवेत् ।
पूर्वजातस्य हेतोश्च पुनर्जन्म प्रसज्यते[4] ॥ ६

यदि निरुद्धे हेतौ भवन्मतेन फलमुत्पद्यते । तच्च फलं हेत्वात्मकमेव भवतीति परिकल्प्यते । एवं सति हेतोः संक्रमणं भवेत् । नटस्य वेषान्तरपरित्यागेन वेषान्तरसंचारवत् । हेतोः संक्रमणमात्रमेव स्यात् । न त्वपूर्वस्य फलस्योत्पादः । ततश्च हेतोर्नित्यतैव स्यात् । न च नित्यानामस्तित्वं क्व चिदस्ति । यथोक्तं शतके[5] [Tib. 147b] ॥

---

1) གལ་ཏེ་ ཚོགས་པའི་ སྔ་རོལ་ཏུ། འབྲས་བུ་ སྐྱེས་པར་ གྱུར་ ན་ ནི། རྒྱུ་ དང་ རྐྱེན་རྣམས་ མེད་པ་ནི། འབྲས་བུ་ རྒྱུ་མེད་ འབྱུང་བར་ འགྱུར།།

2—2) Manque dans le tibétain.

3) Mss. *evāniruddhaḥ*.

4) གལ་ཏེ་ རྒྱུ་ འགགས་ འབྲས་བུ་ ན། རྒྱུ་ ནི་ ཀུན་ཏུ་འཕོ་བར་ འགྱུར། སྔོན་ སྐྱེས་པ་ཡི་ རྒྱུ་ ཡང་ ནི། ཡང་ སྐྱེ་བར་ ནི་ ཐལ་བར་འགྱུར།།

5) IX, 6.

अप्रतीत्यास्तिता नास्ति कदा चित्कस्य चित्क्व चित् ।
न कदा चित्क्व चित्कश्चिद्विद्यते तेन शाश्वतः ॥ इति ।

किं च एतस्यां कल्पनायां पूर्वज्ञातस्य च हेतोः पुनर्जन्म प्राप्नोति । न च ज्ञातस्य पुनरपि युज्यते निष्प्रयोजनत्वात्, अनवस्थाप्रसङ्गाच्च ॥

अथ मन्यसे येनात्मना विद्यमानो न तेनैवात्मना जायते, येन चात्मनाऽविद्यमानस्तेनैव जा[121 b]यत इति ॥ एतदपि न युक्तं, अपरित्यक्त[हेतु]स्वभावस्य हेतुस्वरूपस्य फलमिति संज्ञा[मा]त्रभेदादवस्थाभेदाच्च द्रव्याभेदस्य(1) साधयितुमशक्यत्वात्, फलावस्थायां च परित्यक्तहेतुस्वभावस्य फलशब्दवाच्यत्वाद्धेतुः फलात्मना तिष्ठतीति यत्किं चिदेतत्(2) ॥

किं चान्यत् । यदि हेतुः फलं जनयेत्, निरुद्धो वा जनयेदनिरुद्धो वा, फलमप्युत्पन्नं वा जनयेदनुत्पन्नं वा । उभयथा च नोपपद्यत इति प्रतिपादयन्नाह ।

जनयेत्फलमुत्पन्नं निरुद्धोऽस्तंगतः कथं ।
तिष्ठन्नपि कथं [हेतुः] फलेन जनयेद्वृतः(3) ॥ १०

1) Il semble que le traducteur tibétain ait lu °*bhedasya*.

2) «Cela n'a aucune valeur»; la version tibétaine rend le sens et non pas les mots ཞེས་ བྱ་བ་ འདི་ནི་ གྱི་ནའོ. [Corriger la note 6 p. 37; remarque de M. E. Leumann].

3) Les Mss. présentent une lacune.

འགགས་པ་ ནུབ་པར་ གྱུར་པ་ཡིས། །འབྲས་བུ་ སྐྱེས་པ་ ཇི་ལྟར་ བསྐྱེད།
།འབྲས་བུ་ དང་ ནི་ འབྲེལ་པའི་ རྒྱུ། །གནས་པས་ ཀྱང་ ནི་ ཇི་ལྟར་ བསྐྱེད།
།ཅེས་གསུངས་ཏེ། གལ་ཏེ་ རེ་ཞིག། འགགས་པ་ ནུབ་ ཅིང་ ཞིག་པར་གྱུར་པའི་ རྒྱུས་

तिष्ठन्नपि हेतुरविकृतरूपो विद्यमानेन फलेन वृतः संबद्धः कथं जनयेत् । इ[ह] हि[1]।

कारणं विकृतिं गच्छञ्जायते ऽन्यस्य कारणं ।

इति कारणाभावं प्रतिपद्यमानस्य हेतोरवश्यं विकारेण भवितव्यं । यस्तु न विक्रियते स हेतुलक्षणयुक्त एव न भवतीति । फलेन च संबद्धः कथं जनयेत् । फलस्य विद्यमानत्वात् ॥

अथ मन्यसे विद्यमानस्य फलस्य पुनर्जनयितुमशक्यत्वादवृत एवासंबद्ध एव हेतु फलेन फलं जनयिष्यतीति । एतदप्ययुक्तमित्याह ।

<u>अथावृतः फलेनासौ कतमज्जनयेत्फलं ।</u>

འབྲས་བུ་ སྐྱེས་པ་ སྟེ་ ཡོད་ཅིང་ བདོག་པ་[a] བསྐྱེད་དོ་ ཞེས་བྱ་བར་ རྟོག་ན་ནི་ དེ་ ནི་ མི་འཐད་དོ། །ཅིའི་ཕྱིར་ ཞེ་ན། ཇི་ལྟར་ འགགས་པ་ ཡོད་པ་ མ་ཡིན་པའི་ རྒྱུས་ འབྲས་བུ་ སྐྱེད་པར་ བྱེད་པར་ འགྱུར། གལ་ཏེ་ སྐྱེད་ན་ ནི་ མོ་གཤམ་གྱི་བུས་ ཀྱང་ བུ་ བསྐྱེད་པར་ འགྱུར་རོ། །འབྲས་བུ་ ཡོད་ཅིང་ བདོག་པ་ ཡང་ སྐྱེ་བ་ལ་ བལྟོས་པ་མེད་པ་ ཡང་ རྒྱུས་ ཇི་ལྟར་ བསྐྱེད་པར་ འགྱུར། ཅི་ སྟེ་ ཡང་ ནུས་པ་ མེད་པའི་ཕྱིར་ འགགས་པས་ ནི་ མི་ བསྐྱེད་དོ། འོན་[148 a]ཅི་ཞེ་ན། རྒྱུ་ གནས་པ་ཁོ་ནས་ འབྲས་བུ་ བསྐྱེད་པར་ འགྱུར་རོ་ སྙམ་ན། བརྗོད་པ།

འབྲས་བུ་ དང་ ནི་ འབྲེལ་པའི་ རྒྱུ། གནས་པས་ ཀྱང་ ནི་ ཇི་ལྟར་ བསྐྱེད། = *yadi tāvan niruddho 'staṃgato hetur utpannaṃ sad vidyamānam*[a] *phalaṃ janayatīti parikalpyate tan nopapadyate. kasmād iti cet. katham niruddho 'saṃvidyamāno hetuḥ phalaṃ janayet. yadi janayati vandhyāputro 'pi putraṃ janayiṣyati. phalaṃ ca sad vidyamānam api janmanirapekṣam api katham hetur janayiṣyati atha manyase çaktyabhāvān niruddho na janayati, kiṃ tu tiṣṭhann eva hetuḥ phalaṃ janayiṣyatīti. ucyate: tiṣṭhann api kathaṃ.......*

(a) བདོག་པ = *sva*, dans l'expression *sarvasva*; mais aussi *asti*, *vidyate*, comme par exemple ci-dessous ad XX. 21 *svabhāvena vidyamāna* traduit par རང་བཞིན་གྱིས་ བདོག་པ་.

1) རྒྱུ་ ནི་ རྣམ་པར་འགྱུར་བ་ན། གཞན་གྱི་ རྒྱུ་རུ་ འགྱུར་བ་ ཡིན།

यदि हेतुः फलेनासंबद्ध एवेष्यते ' तदा कतमदिदानीं फलं जनयेत् । सर्वमेव वा फलं जनयेदसंबद्धत्वात् ' न वा किं चिज्जनयेदसंबद्धत्वादेवेत्यभिप्रायः ॥

किं चान्यत् । यदि हेतुः फलं जनयेत् ' स दृष्ट्वा वा फलं जनयेददृष्ट्वा वा ' उभयथा च न युज्यत इत्याह ।

न ह्यदृष्ट्वा वा दृष्ट्वा वा हेतुर्जनयते फलं[(1)] ॥ ११

तत्र यदि हेतुर्दृष्ट्वा जनयतीति परिकल्प्यते तन्न युज्यते [122 a] ' यस्माद्विद्यमानमेव द्रष्टुं पार्यते नाविद्यमानं ' विद्यमानं चेत्तन्न जन्यते विद्यमानत्वादिति । एवं ताव-[Tib. 148 b]द्धेतुः फलं दृष्ट्वा [न] जनयति । अदृष्ट्वापि न जनयति ' सर्वस्य फलस्य हेतोर्जनकत्वप्रसङ्गात् ॥

अथ किमिदं दर्शनं किं वादर्शनमिति ॥ उच्यते । प्रसिद्धमेतल्लोक उपलब्धिर्दर्शनमिति ॥

नन्वेतद्बीजादिषु निरिन्द्रियेषु [न] संभवति ॥ संभवतु मा वा । नास्माकमयं पर्यनुयोगः । किं तर्हि तस्योत्पादवादिनः । तत्र य उत्पादवादी ब्रूयात् दृष्ट्वा जनयतीति ' स वक्तव्यो न दृष्टमेतल्लोके यद्बीजादिकं पश्यतीति ' तस्मादयुक्तैषा कल्पना । अथ[।]-दृष्ट्वेति कल्पयेदेवमपि ' यत्किं चिददृष्टं संभवति तत्सर्वमुत्पादयेन्न चोत्पादयति ' तस्मान्नादृष्ट्वापि जनयति ॥ अनिष्टापत्त्या हि वयं[(2)] परकल्पनां विचारयामः[(3)] संसाराटवीकान्तार-

1) ཅི་སྟེ་ རྒྱུ་ འབྲས་ མ་འབྲེལ་ན། འབྲས་བུ་ གང་ཞིག་ སྐྱེད་པར་ བྱེད། རྒྱུས་ ནི་ མཐོང་ དང་ མ་མཐོང་བར། འབྲས་ བུ་ བསྐྱེད་པར་ མི་ བྱེད་དོ॥

2) *vayaṃ parikalpanāṃ vicārayāmāsa.* གཞན་གྱིས་ བརྟགས་པ་ འགོག་པར་ བྱེད་པར་ བྱེད་པ་ ཡིན་ཏེ།. — Pour le raisonnement *aniṣṭāpattyā* voir ci-dessus p. 56, n. 1.

3—3) Non traduit dans le tibétain. — Mss. °*samākulām ālutāratām iva.*

गिरिदरीप्रपातदुःखमालासमाकुलामा····तामिव।[3] बुद्धिपूर्वकर्तृकं च पुरुषादिकारणिनो[1] जगदभ्युपगच्छन्तो निर्ग्रन्थाश्चैकेन्द्रियं[2] बीजादिकं प्रतिपन्नाः प्रसङ्गान्न व्यतिवर्तन्त इति। तस्मान्नास्ति दोषः॥

किं चान्यत्। यदि युष्मदभिमतं हेतोः फलस्य चान्योन्यढौकन[3]लक्षणं संगमनं स्यात्स्यात्तदानीं तयोर्जन्यजनकभावः। यस्मान्न हि परस्परासंगतयोरालोकान्धकारयोः संसारनिर्वाणयोर्जन्यजनकभावो दृष्ट इति। अतोऽवश्यं हेतुफलभावयोर्जन्यजनकभावमिच्छता परेण संगतिरभ्युपेया [Tib. 149a]। सा च कालत्रये[122b]ऽपि विचार्यमाणा न संभवति। अतो हेतुः फलं [न] जनयति॥ यथा च संगतिर्नास्ति तथा प्रतिपादयन्नाह।

नातीतस्य ह्यतीतेन फलस्य सह हेतुना।
नाजातेन न जातेन संगतिर्जातु विद्यते[4]॥ १२

अतीतस्य तावत्फलस्यातीतेन हेतुना सह जातु कदा चिदपि संगतिर्नास्ति। अतीतत्वेनोभयोरप्यविद्यमानत्वात्। नाप्यजातेन हेतुनाऽतीतस्य फलस्य संगतिर्जातु विद्यते। नष्टाजातत्वेनोभयोरप्यविद्यमानत्वात्। भिन्नकालत्वाच्च। नापि जातेन वर्तमानेन हेतुना सहातीतस्य फलस्य संगतिः संभवति। भिन्नकालत्वान्नष्टस्य च फलस्याविद्यमानत्वाद्वन्ध्यापुत्रेणेव देवदत्तस्येत्यभिप्रायः॥

---

1) Laṅkāv. p. 104. *pradhāneçvarapuruṣakālāṇupratyayebhya utpattiṃ varṇayanti.* — Le *puruṣakāra* est d'ailleurs un sujet de discussion, voir Vasumitra. — **kāraṇin* = *kāraṇika* = Lehrer, Kenner einer Sache (P. W.); mais nous avons སྐྱེས་བུ་ལ་སོགས་པ་ རྒྱུར་ སྨྲ་བ་. — Voir ci-dessus p. 386 n. 4 *kālakāraṇika.*

2) Voir Guérinot, Jīvaviyāra, st. 42 et Comm. (J. As. 1902, I, p. 272): «Les êtres pourvus d'un seul sens [*sparçana*], c'est-à-dire les êtres inanimés, possédent quatre principes vitaux: le toucher, l'air respiratoire (*ucchvāsa*), la durée vitale (*āyus*) et le corps....»

3) ཕན་ཚུན་ འཚོགས་པ་, to meet, to combine.

4) འབྲས་བུ་ འདས་པ་ རྒྱུ་ འདས་ དང་། མ་སྐྱེས་པ་ དང་ སྐྱེས་པ་ དང་། ལྷན་ཅིག་ ཕྲད་པར་ འགྱུར་པ་ ནི། ནམ་ཡང་ ཡོད་པ་ མ་ཡིན་ནོ།།

यथा चातीतस्य फलस्यातीतेनानागतवर्तमानेन हेतुना सह न कदा चित्संगतिरस्ति । एवं वर्तमानस्यापि फलस्य त्रैकालिकेन हेतुना सह नास्ति संगतिरिति तत्प्रतिपादयन्नाह ।

न जातस्य ह्यजातेन फलस्य सह हेतुना ।
नातीतेन न जातेन संगतिर्जातु विद्यते[1] ॥ १३

जातस्य फलस्य भिन्नकालत्वादजातेन चातीतेन च हेतुना सह संगमनं नास्ति । नापि वर्तमानस्य वर्तमानेन हेतुना सह संगतिरस्ति हेतुफलयोर्यौगपद्याभावात् । तयोश्च संगतिवैयर्थ्यात् । किं हि विद्यमानयोः परस्परनिरपेक्षयोः पुनः संगत्या प्रयोजनमिति नास्ति संगतिः ॥

इदानीमनागतस्यापि [Tib. 149b] फलस्य यथातीतानागतप्रत्युत्पन्नेन हेतुना सह संगमनं नास्ति तथा प्रतिपादयन्नाह ।

नाजातस्य [123a] हि जातेन फलस्य सह हेतुना ।
नाजातेन न नष्टेन संगतिर्जातु विद्यते[2] ॥ १४

अजातं हि फलमसंविद्यमानं । तस्य भिन्नकालेन वर्तमानेनातीतेन च हेतुना सह नास्ति संगमनं भिन्नकालत्वात् । अनागतेनापि हेतुना सह नास्ति संगमनमुभयोरविद्यमानत्वात् ॥ यदा चैवं सर्वथा हेतुफलयोः संगतिर्नास्ति तदा

असत्यां संगतौ हेतुः कथं जनयते फलं ।

---

1) འབྲས་བུ་ སྐྱེས་པ་ རྒྱུ་ མ་སྐྱེས། འདས་པ་ དང་ ནི་ སྐྱེས་པ་ དང་། ལྷན་ཅིག་ ཕྲད་པར་ འགྱུར་བ་ ནི། ནམ་ཡང་ ཡོད་པ་ མ་ཡིན་ནོ॥

2) འབྲས་བུ་ མ་སྐྱེས་ རྒྱུ་ སྐྱེས་ དང་། མ་སྐྱེས་པ་ དང་ འདས་པ་ དང་། ལྷན་ཅིག་ ཕྲད་པར་ འགྱུར་བ་ ནི། ནམ་ཡང་ ཡོད་པ་ མ་ཡིན་ནོ॥

नैव हेतुः फलं जनयति संगतेरविद्यमानत्वाद्वन्ध्यापुत्रमिवेत्यभिप्रायः ॥ अथापि स्यात्सत्यामेव संगतौ हेतुः फलं जनयतीति । तदपि न युक्तं कालत्रयेऽपि संगत्यनुपलब्धेः ॥ अथापि कथं चिद्धेतुफलयोः संगतिः परिकल्प्यते । एवमपि ।

सत्यां वा संगतौ हेतुः कथं जनयते फलं[1] ॥ १५

सं[नि]हितस्य फलस्य पुनर्जन्मवैयर्थ्यात् । असंनिहितानां च संगतेरयुक्तत्वादित्यभिप्रायः ॥ किं चान्यत् ।

हेतुः फलेन शून्यश्चेत्कथं जनयते फलं ।
[हेतुः फलेनाशून्यश्चेत्कथं जनयते फलं[3] ॥ १६]

यो ऽयं फलस्य हेतुः फलस्य जनक इष्यते स तेन शून्यो वा भवन् फलमुत्पादयेदशून्यो वा । तत्र हेतुः शून्यः फलेन रहितः फलं न जनयति ' अहेतुवत्फलशून्यत्वात् । फलेनाशून्योऽपि हेतुः फलं न जनयति ' विद्यमानत्वा[Tib. 150a]त्फलस्य ' विद्यमानपुत्रं देवदत्त इव ॥ एवं तावत्फलशून्यो वा फलाशून्यो वा हेतुः फलं न जनयति ॥

यच्चापि फलमुत्पद्यते तच्चाप्यशून्यं वा समुत्पद्यते शून्यं वा । तत्र तावत् ।

फलं नोत्पत्स्यते [ऽ]शून्यमशून्यं न निरोत्स्यते ।
अनिरुद्धमनुत्पन्नमशून्यं तद्भ[123b]विष्यति[4] ॥ १७

---

1) ཕྲད་པ་ ཡོད་པ་ མ་ཡིན་ན། རྒྱུས་ ནི་ འབྲས་བུ་ ཇི་ལྟར་ བསྐྱེད། ཕྲད་ན་ ཡོད་པ་ ཡིན་ན་ ཡང་། རྒྱུས་ ནི་ འབྲས་བུ་ ཇི་ལྟར་ བསྐྱེད།།

2) ལྷན་ཅིག་ལ་.

3) གལ་ཏེ་ འབྲས་བུས་ སྟོང་པའི་ རྒྱུས། ཇི་ལྟར་ འབྲས་བུ་ སྐྱེད་པར་བྱེད། གལ་ཏེ་ འབྲས་བུས་ མི་སྟོང་ རྒྱུས། ཇི་ལྟར་ འབྲས་བུ་ སྐྱེད་པར་བྱེད།།

4) འབྲས་བུ་ མི་སྟོང་ སྐྱེ་ མི་འགྱུར། མི་སྟོང་ འགག་པར་ མི་འགྱུར་རོ། མི་སྟོང་ དེ་ནི་ མ་འགགས་ དང་། མ་སྐྱེས་པར་ ཡང་ འགྱུར་བ་ ཡིན།

अशून्यं हि फलमप्रतीत्यसमुत्पन्नं स्वभावव्यवस्थितं । तदेवंविधं फलं नैवोत्पत्स्यते । स्वभावस्यानपायित्वाच्च न निरोत्स्यते । ततश्चाशून्यं तदिष्यमाणमनिरुद्धमनुत्पन्नं च स्यात् ॥ न चैतदिष्टमित्यतोऽशून्यं तत्फलं न भवति । उत्पादनिरोधाभ्युपगमात् ॥

इदानीं शून्यमपि तत्फलं न संभवति । अनुदयाव्ययत्वप्रसङ्गादिति प्रतिपादयन्नाह ॥

कथमुत्पत्स्यते शून्यं कथं शून्यं निरोत्स्यते ।
शून्यमप्यनिरुद्धं तदनुत्पन्नं प्रसज्यते[1] ॥ १८

तत्र शून्यमुच्यते यत्स्वभावेन नास्ति । यच्च वस्तु स्वभावेन नास्ति तत्कथमुत्पत्स्यते । कथं वा निरोत्स्यते । न हि स्वभावेनाविद्यमानस्याकाशादेरुदयव्ययौ दृष्टौ । तस्माच्छून्यमपि तत्फलमिष्यमाणमनिरुद्धमनुत्पन्नं च प्रसज्यते ॥

किं चान्यत् । यदि हेतुः फलं जनयेत्स फलादव्यतिरिक्तो वा जनयेद्व्यतिरिक्तो वा । उभयथा नोपपद्यत इत्याह ।

हेतोः फलस्य चैकत्वं न हि जातूपपद्यते ।
हेतोः फलस्य चान्यत्वं न हि जातूपपद्यते[2] ॥ १९

तदेतत्प्रतिज्ञा[Tib. 150b]मात्रकमिति[3] प्रतिपादयन्नाह ।

---

1) སྟོང་པ་ ཇི་ལྟར་ སྐྱེ་ འགྱུར་ ཞིང་། སྟོང་པ་ ཇི་ལྟར་ འགག་པར་ འགྱུར། སྟོང་པ་ དེ་ ཡང་ མ་ འགགས་ དང་། མ་སྐྱེས་པར་ ཡང་ ཐལ་བར་ འགྱུར།

2) རྒྱུ་ དང་ འབྲས་བུ་ གཅིག་ཉིད་དུ། ནམ་ཡང་ འཐད་པར་ མི་ འགྱུར་རོ། རྒྱུ་ དང་ འབྲས་བུ་ གཞན་ཉིད་དུ། ནམ་ཡང་ འཐད་པར་ མི་ འགྱུར་རོ།

3) འདི་ནི་ དམ་བཅའ་བ་ ཙམ་ ཞིག་ ཡིན་ཏེ། ཇི་ལྟར་ གྲུབ་ ཅེ་ན། བསྟན་པའི་ ཕྱིར། *tad etat pratijñāmātram asti, kathaṃ sidhyatīti cet. pratipādanārtham ....*

एकत्वे फलहेत्वोः स्यादैक्यं जनकजन्ययोः ।
पृथक्त्वे फलहेत्वोः स्यात्तुल्यो हेतुरहेतुना ॥ इति[1] । २०

यदि हेतोः फलस्य चैकत्वं स्यात्तदा जन्यजनकयोरेकत्वमभ्युपेतं स्यात् । न चानयोरेकत्वं पितापुत्रयोश्चक्षुश्चक्षुर्विज्ञानयोर्बीजाङ्कुरयोश्चैक्यप्रसङ्गात् । एवं तावद्धेतोः फलस्य चैकत्वं नास्ति ॥ इदा[124 a]नीमन्यत्वमपि नास्ति । किं कारणं । यदि हेतोः फलस्य च भवन्मतेनाभिमतमन्यत्वं स्यात् ' तदा परत्र निरपेक्षत्वाद्धेतुनिरपेक्षमेव फलं स्यात् । न चैतदेवमित्यतोऽन्यत्वमपि हेतोः फलस्य न संभवति ॥ ययोश्चैवं विचार्यमाणयोस्तत्त्वान्यत्वे न स्तस्तयोर्न कदा चिज्जन्यजनकभाव इष्यतेऽतो नैव हेतुः फलं जनयति ॥

किं चान्यत् । यदि हेतुः फलं जनयेत्स तत्फलं स्वभावेन सद्भूतं वा जनयेदसद्भूतं वा । किं चातः । उभयथा न च युज्यत इत्याह ।

फलं स्वभावसद्भूतं किं हेतुर्जनयिष्यति ।
फलं स्वभावासद्भूतं किं हेतुर्जनयिष्यति[2] ॥ २१

तत्र यत्फलं स्वभावेन सद्भूतं स्वभावेन विद्यमानं तन्न पुनर्जन्यते विद्यमानत्वात् ' विद्यमानघटवत् । यदपि स्वभावेनासद्भूतं फलं ' तदपि हेतुर्न जनयति स्वभावेनासद्भूतत्वात् ' खरविषाणवत् ॥

• प्रतिबिम्बेनानैकान्तिकतेति चेत्[3] ' भवत्वनैकान्तिकता ' [Tib. 151 a] निःस्वभावत्वं तु सिद्धं भावानां ' ततश्च सस्वभाववादत्यागः स्यादस्मद्वादानुवर्णनमेव स्यात् । सस्वभावश्च

---

1) རྒྱུ་ དང་ འབྲས་བུ་ གཅིག་ཉིད་ན། བསྐྱེད་བྱ་ སྐྱེད་བྱེད་ གཅིག་ཏུ་ འགྱུར། རྒྱུ་ དང་ འབྲས་བུ་ གཞན་ཉིད་ན། རྒྱུ་ དང་ རྒྱུ་མིན་ མཚུངས་པར་ འགྱུར།

2) འབྲས་བུ་ ངོ་བོ་ཉིད་ ཡོད་ན། རྒྱུས་ ནི་ ཅི་ཞིག་ བསྐྱེད་པར་འགྱུར། འབྲས་བུ་ ངོ་བོ་ཉིད་ མེད་ ན། རྒྱུས་ ནི་ ཅི་ཞིག་ བསྐྱེད་པར་འགྱུར།

3) གལ་ཏེ་ གཟུགས་བརྙན་གྱིས་ མ་ངེས་པ་ཉིད་དོ་ ཞེ་ན།

न कश्चित्पदार्थो नामास्तीति प्रतिद्वन्द्व्यभावान्निःस्वभावो ऽपि पदार्थो नास्तीति कुतो ऽनैकान्तिकता । न ह्यस्माकं प्रतिबिम्बकं सस्वभावं नापि निःस्वभावं ' धर्मिणमन्तरेण तद्धर्मयोरप्यभावात् । न ह्यार्याः प्रतिबिम्बकं नाम किंचिन्निःस्वभावं सस्वभावं वोपलभन्त इति ॥

तत्र पूर्वं फलं नोत्पत्स्यत इत्यादिना श्लोकद्वयेन साक्षादुत्पत्तिक्रियाकर्तृत्वं फलस्य निषिद्धं ' इदानीं हेतोः फलोत्पत्तिक्रियाप्रयोजकत्वं प्रतिषिद्धमिति । अयमस्य पूर्वकाद्विशेष इति विज्ञेयं ॥

अत्रा[124b]ह । यद्यपि हेतोः फलोत्पत्तिक्रियाप्रयोजकत्वं निषिद्धं ' तथापि हेतुस्तावत्स्वभावतोऽस्ति न चासति फले हेतोर्हेतुत्वं सिध्यति । तस्मात्फलमपि भविष्यतीति ॥ उच्यते । स्याद्धेतुर्यद्यजनयतोऽस्य हेतुत्वं स्यात् ।

न चाजनयमानस्य हेतुत्वमुपपद्यते ।

अथ स्यात् ' यद्यप्येवं हेतोर्हेतुत्वं नास्ति तथापि फलं तावदस्ति ' न च हेतुमन्तरेण फलं युक्तमिति फलसद्भावाद्धेतुरपि भविष्यतीति ॥ उच्यते । यदाऽजनयमानस्य हेतोर्हेतुत्वं नास्तीत्युक्तं ' तदा ।

हेतुत्वानुपपत्तौ च [Tib. 151 b] फलं कस्य भविष्यति ॥ २२

इति । तस्मात्फलमपि नास्तीति ।

---

1) Mss *pratidvandvyabhāvābhāvān niḥsvabhāvo 'pi svabhāvo nāsti.* — ཟླ་བ་ཟླ་ མེད་པའི་ཕྱིར་...

2) XX. 17 et 18. — Ci-dessus 402. 14.

3) Mss. *pūrvakāriçeṣa* — གོང་མ་ལས་ འདིའི་ ཁྱད་པར་ ཡིན་ནོ།

4) Mss. *hetutvaṃ na syāt.*

5) སྐྱེ་བར་ བྱེད་པ་ མ་ཡིན་ན། །རྒྱུ་ཉིད་ ཐད་པར་ མི་ འགྱུར་རོ། །རྒྱུ་ཉིད་ འཐད་པ་ཡོད་ མིན་ན། །འབྲས་བུ་ གང་གི་ ཡིན་པར་ འགྱུར།།

6) Mss. *phalam iti* — འབྲས་བུ་ ཡང་.

अत्राह । नैव हि केवलस्य हेतोः फलोत्पत्तिक्रियायाः प्रयोजकत्वं ' किं तर्हि हेतुप्रत्ययसामग्र्या फलं जन्यत इति ॥ उच्यते । उक्तदोषत्वान्न युक्तमेतत् ॥

अपि चेयं हेतुप्रत्ययसामग्री यदि फलस्य जनिकेति कल्प्यते । किं सा स्वयमेव तावदात्मानं जनयति उताहो न ॥ यदि जनयतीति कल्प्यते तन्न युज्यते । न ह्यलब्धात्मभावस्य प्रयोजकत्वं दृष्टमित्यतः सामग्र्यावश्यं लब्धात्मभावया भवितव्यं ' न च लब्धात्मभावायाः पुनः स्वात्मोत्पादे प्रयोजकत्वं युक्तमित्यतो न सामग्री स्वात्मानमुत्पादयति । या चात्मानं नोत्पादयति सा कथं फलमुत्पादयितुं शक्नोतीति प्रतिपादयन्नाह ।

न च प्रत्ययहेतूनामियमात्मानमात्मना ।
या सामग्री जनयते [सा] कथं जनयेत्फलं(1) ॥ २३

प्रत्ययानां हेतूनां च येयं सामग्री सा तावदात्मनैवात्मानं नोत्पादयति स्वा-[125a]त्मनि वृत्तिनिरोधात्सत्याः पुनरुत्पादवैयर्थ्याच्च । या चैवमात्मानमेव तावन्न जनयति सा कथं फलं जनयिष्यति ' न हि वन्ध्याडुहितात्मानं जनयितुमशक्ता सती पुत्रं जनयिष्यतीति युज्यते । एवं सामग्र्यपि स्वात्माजनिका फलं जनयतीति न युज्यते । तस्मात् '

न सामग्रीकृतं फलं(2) ।

अथापि स्याद्यदि सामग्रीकृतं फलं न संभवति ' एवं तर्ह्य(3)सामग्री[Tib. 152a]कृतं

---

1) རྒྱུ་རྣམས་དང་ནི་རྐྱེན་དག་གིས། ཚོགས་པ་གང་ཡིན་དེ་ཡིས་ནི། བདག་གིས་བདག་ཉིད་མི་བསྐྱེད་ན། འབྲས་བུ་ཇི་ལྟར་སྐྱེད་པར་བྱེད། — La lecture དག་གིས et non དག་གི (*°hetūnām*) est confirmée par le commentaire: «une *sāmagrī* constituée par....»; voir cependant la traduction de la kārikā 24.

2) Le traducteur tibétain n'a pas observé, semble-t-il, que nous avons ici le premier pāda de la kārikā 24.

3) C'est-à-dire *asāmagrī-kṛta*, «fait par ce qui n'est pas la *sāmagrī*». Voir Chap. I. 12 et 14.

गां स्यतीति चेत् । उच्यते ।

नासामग्रीकृतं फलं ।

यदा सामग्रीकृतं फलं न संभवति तदा कथमत्यन्तविरुद्धमसामग्रीकृतं भविष्यति । असामग्रीकृतमिति फलं न संभवति ॥

अथ स्याद्यद्यपि नास्ति फलं स्वभावतस्तथापि हेतुप्रत्ययसामग्री तावदस्ति न च फलमन्तरेण हेतुप्रत्ययसामग्री संभवतीति फलमपि संभविष्यतीति ॥ उच्यते । स्याद्धेतुप्रत्ययसामग्री यदि फलमेव भवेत् । यदा तु यथोदितेन न्यायेन फलमेव नास्ति । तदा

अस्ति प्रत्ययसामग्री कुत एव फलं विना[1] ॥ २४

फलाभावे सति निर्हेतुका[2] हेतुप्रत्ययसामग्र्यपि नास्तीत्यभिप्रायः ॥

उक्तं ह्यार्यललितविस्तरसूत्रे[3] ।

कण्ठोष्ठ प्रतीत्य तालुकं
जिह्वपरिवर्त्ति रवन्ति अक्षराः[4] ।
न च कण्ठगता[5] न तालुके
अक्षरैकैक[6] च नोपलभ्यते ॥

---

1) ཚོགས་པས་ བྱེད་པའི་ འབྲས་བུ་ མེད། ཚོགས་མིན་ བྱས་པའི་ འབྲས་བུ་ མེད། །འབྲས་བུ་ ཡོད་པ་ མ་ཡིན་ན། རྐྱེན་གྱི་ ཚོགས་པ་ ག་ལ་ ཡོད།

2) རྒྱུ་མཚན་མེད་པ་.

3) Bibl. Indica, p. 211; Lefmann, p. 177; Çikṣās. 240. 7. — Vaitalīya. — Les pādas impairs sont du type { ⏓⏑⏑⏓ –⏑⏑ –⏑ –⏑ –

4) Mss. *jihvaparivartti ravanti rakṣarāḥ*. — Çikṣās. *jihva parivartir avarti akṣara* [«*avartti* apparently stands for *āvartate*»] — ལྕེ་བསྒྱུར་བ་ལས་ ཡི་གེའི་ སྒྲ་ འབྱུང་ ཡང་| = *jihvāparivartanād akṣarasvaro bhavati.*

5) ལྐོག་མར་ བརྟེན་ནས་.

6) རེ་རེ་ལ་ནི་ — Mss. °*kaikaçca* — Çikṣās. °*kas tu* (corrigé °*ka tu*).

सामग्रि पतीत्य तं च[1] सा
वाच मनबुद्धिव[125 b]सेन निश्चरी ।
मनवाच ग्रदृश्यरूपिणी
बाह्यतोऽभ्यन्तरि नोपलभ्यते ॥
उत्पादव्ययं[2] विपश्यतो
वाचरुतघोषस्वरस्य[3] पण्डितः ।
क्षणिकां वशिकां[4] तदा दृशी[5]
सर्व वाचं[6] प्रतिश्रुतकोपमां ॥

तथार्योपालिपरिपृच्छायामुक्तं[7] भगवता ।

इह शासनि सूरमणीये
प्रव्रजथा गृहिलिङ्ग जहित्वा ।
फलवन्तु भविष्यथ श्रेष्ठा
एषु निदेशितु कारुणिकेन [Tib. 152b] ॥
प्रव्रजित्वा गृहिलिङ्ग जहित्वा
सर्वफलस्य भविष्यति प्राप्तिः ।

---

1) Mss. *sāmagrī pratītye tam . ..* — Çikṣās., Lefmann °*pratītyataç ca.* — ཚོགས་པ་ དེ་ལ་ བརྟེན་ནས་ ངག་ དེ་ ནི། ཡིད་ཀྱི་ བློ་ཡི་ དབང་གིས་ འབྱུང་ མོད་ཀྱི། *tāṃ sāmagrīṃ pratītya vāg eṣā manobuddhivaçena niçcaret. . . .*

2) Lire °*vayam.*

3) Lire °*ghoṣasarasya.* — «Lorsque le sage examine la production et la disparition… ».

4) སྙིང་པོ་མེད་པ = *asāra.*

5) Sic Mss. དེ་ཚེ་ ངག་ཀུན་· · · · «Alors il voit que toute parole…» — Rājendralāl et Çikṣās. *tadidṛçīṃ.*

6) Mss. *vāca*; Rāj. et Çi. *vācaḥ.*

7) Même fragment que ci-dessus p. 155.

पुन धर्मस्वभाव तुलित्वा
सर्वफला न फलान च प्राप्तिः ॥
अलभन्त फलं तथ प्राप्तिं
आश्चरियं पुन ज्ञायति तेषां ।
अहो ऽतिकारुणिको नरसिंहो
सुष्ठुपदेशित युक्ति जिनेनेति ॥

तथार्यप्रज्ञापारमितायामष्टसाहस्रिकायां[1]। तेन हि कौशिक बोधिसत्त्वेन महासत्त्वेन महासंनाहसंनद्धेन न रूपे स्थातव्यं न वेदनायां न संज्ञायां न संस्कारेषु न विज्ञाने स्थातव्यं। न स्रोतआपत्तिफले न सकृदागामिफले नानागामिफले नार्हत्त्वे न प्रत्येकबुद्धत्वे न सम्यक्संबुद्धत्वे स्थातव्यमिति।

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ सामग्रीपरीक्षा नाम विंशतितमं प्रकरणं ॥

1) Voir l'édition de la Bibl. Ind. p. 34. 22.

XXI.

संभवविभवपरीक्षा नामैकविंशतितमं प्रकरणं

अत्राह। विद्यत एव स्वभावतः कालः संभवविभवनिमित्तत्वात्[1]। इह कं चित्कालविशेषमपेक्ष्याङ्कुरोत्पत्तिर्[2]भावानामुत्पादो भवति। कं चित्कालविशेषमपेक्ष्य विभवो विनाशो[3] भवति। न सर्वदा विद्यमा[नाया]मपि हेतुप्रत्ययसामग्र्यामित्यतो विद्यत एव कालः संभवविभवनिमित्त[126a]त्वात्॥ उच्यते। स्यात्संभवविभवनिमित्तता कालस्य यदि संभवविभवावेव स्यातां। न तु स्तः। यथा च न स्तस्तथा प्रतिपादयन्नाह [Tib. 153a]।

विना वा सह वा नास्ति विभवः संभवेन वै।
विना वा सह वा नास्ति संभवो विभवेन वै[4]॥ १

इह यदि संभवविभवौ स्यातां तावन्योन्यं सहभावेन वा स्यातां विनाभावेन वा। उभयथा च विचार्यमाणौ न संभवतः। कथं कृत्वा। तत्र तावद्यथा विना संभवेनोत्पादेन विभवो विनाशो नास्ति तथा प्रतिपादयन्नाह।

---

1) རྒྱུ་ཡིན་པའི་ཕྱིར་རོ། = *hetutvāt.*

2) D'après le tibétain: *aṅkurādīnām utpattir utpādo*... — མྱུང་ཞིང་ སྐྱེ་བར་ འགྱུར་ལ།

3) འཇིག་ཅིང་ རྣམ་པར་འཇིག་པར་ འགྱུར་ཀྱི།

4) འཇིག་པ་ འབྱུང་བ་ མེད་པར་རམ། ལྷན་ཅིག་ ཡོད་པ་ཉིད་ མ་ཡིན། འབྱུང་བ་ འཇིག་པ་ མེད་པར་རམ། ལྷན་ཅིག་ ཡོད་པ་ཉིད་ མ་ ཡིན།།

भविष्यति कथं नाम विभवः संभवं विना ।
विनैव जन्म मरणं विभवो नोद्भवं विना (1) ॥ २

संभवं विना कथं नाम विभवो विनाशो भविष्यति । कथं नामेत्यनेन प्रसिद्धमत्यन्तासंभवं दर्शयति । कथं नाम भविष्यतीति नैवैतत्संभवतीत्यभिप्रायः ॥ यदि पुनर्विनैव संभवं विभवः स्यात् को [दो]षः स्यात् । उच्यते । विनैव जन्म मरणं स्यात् । अजातस्य मरणं स्यान्न चाजातस्य मरणं दृष्टमिति ॥ तस्माद्विभवो नोद्भवं विना भवितुमर्हति ॥ आद्येनात्र श्लोकस्यार्धेन प्रतिज्ञा । मध्येन पादेन प्रसङ्गापादनं (2) । अन्त्येन निगमनमिति (3) विज्ञेयं ॥

एवं तावद्विना संभवेन विभवो न युक्त इति प्रतिपाद्येदानीं सह संभवेनापि विभवो यथा न संभवति तथा प्रतिपादयन्नाह ।

संभवेनैव विभवः कथं सह भविष्यति ।
न जन्ममरणं चैवं तुल्यकालं हि विद्यते (4) ॥ ३

यदि हि संभवेन सह [Tib. 153 b] युगपत्तुल्यकालं विभवः स्यादेवं सति जन्ममरणे युगपत्स्या[126 b]तां । न (5) चैवं परस्परविरुद्धे आलोकान्धकारवदेकस्मिन् काले विद्येते इति । तस्मात्सहापि संभवेन विभवस्य नास्ति सिद्धिरिति स्थितं ।

---

1) འཇིག་པ་ བྱུང་བ་ མེད་པར་ནི། ཇི་ལྟ་བུར་ན་ ཡོད་པར་ འགྱུར། སྐྱེ་བ་ མེད་ པར་འཆི་བར་ འགྱུར། འཇིག་པ་ བྱུང་བ་ མེད་པར་ མེད།།

2) ཐལ་བ་ བསྒྲུབས་པ་.

3) མཇུག་བསྡུས་པ་.

4) འཇིག་པ་ བྱུང་བ་ ལྷན་ཅིག་ཏུ། ཇི་ལྟར་ ཡོད་པ་ཉིད་དུ་ འགྱུར། འཆི་བ་ སྐྱེ་ དང་ དུས་གཅིག་ཏུ། ཡོད་པ་ཉིད་ ནི་ མ་ཡིན་ནོ།།

5) Non représenté dans le tibétain.

यदा चैवं संभवेन विना वा सह वा विभवस्य नास्ति सिद्धिरेवं संभवस्यापि विना वा सह वा विभवेन नास्ति सिद्धिरिति प्रतिपादयन्नाह ।

भविष्यति कथं नाम संभवो विभवं विना ।
अनित्यता हि भावेषु न कदाचिन्न विद्यते ॥[1] ४

नैव हि संभवो विभवेन विना युज्यते । यस्मादनित्यता हि भावेषु भवनधर्मकेषूत्पादधर्मकेषु न कदाचिन्न विद्यते । किं तर्हि सर्वदैव विद्यते । उक्तं हि ।

जरामरणधर्मेषु सर्वभावेषु सर्वदा ।
तिष्ठन्ति कतमे भावा ये जरामरणं विना ॥ इति ॥[3]

यदा चैवं नित्यमनित्यतानुगताः सर्वे भावास्तदा कुतः सा काचिदवस्था या विनाशरहिता स्यादिति । अतो नास्ति विभवेन विनोत्पाद इति । एवं तावद्विना विभवेन नास्ति संभवः ॥ शेषमत्र संस्कृतपरीक्षायां[4] विचारितत्वान्न विचार्यते ॥

यस्तु सहेतुको विनाशः[5] संस्कृतलक्षणत्वादुत्पादवदिति साधनमुक्तं[6] क्षिप्याल्यचित्त-

---

1) བྱུང་བ་ འཇིག་པ་མེད་པར་ནི། ཇི་ལྟར་ ཡོད་པ་ཉིད་དུ་ འགྱུར། དངོས་པོ་ རྣམས་ལ་ མི་རྟག་ཉིད། ནམ་ཡང་ མེད་པ་ མ་ཡིན་ནོ།

2) བྱུང་བའི་ ཆོས་ ཅན་.

3) = VII. 24.

4) Chapitre XIII.

5) Voir ci-dessus p. 29, n. 5 et p. 173, n. 8.

6) Mss. °*kṣipyāntyacittalakṣaṇair*, °*kṣipyāllya*°, *kṣipyābhya*. — ཐ་མའི་ སེམས་ དང་ སེམས་ལས་བྱུང་བའི་ མཚན་ཉིད་དག་གིས་. — Le tibétain confirme donc la lecture *lakṣaṇa*; je n'hésite pas cependant à corriger *kṣaṇa* parce que la lecture traditionelle ne donne aucun sens et parce qu'on constate la même confusion dans la version tibétaine du Laṅkāvatāra (voir l'édition de la B. T. S. p. 43), et aussi Çaṁkara ad 2, 2, 26 (Ān. S. S. I p. 544, l. 8.).

[चैत]तयोर[Tib. 154a]नैकान्तिकतामाह । स न युक्तमाह तद्विनाशस्यापि ज्ञातिप्रत्ययत्वेन सहेतुकत्वात्साध्यसमत्वाच्चानैकान्तिकताभावात् । यदपि निर्दिष्टं । भावात्मभावत्र एवाभूत्वा भावादुत्पाद उच्यते(1) । तस्माद्द्रव्यसदुत्पाद(2)सिद्धेर्व्यवहारतोऽपि दृष्टान्तभाव इति । तदपि न युक्तं । अद्रव्यसतां प्रतिबिम्बादीनां सहेतुकत्वाभ्युपगमात् ॥

यथोक्तमाचार्यपादैः [127a]

हेतुतः संभवो येषां तदभावान्न सन्ति ये ।
कथं नाम न ते स्पष्टं प्रतिबिम्बसमा मताः ॥ इति(3) ।

अस्मादा(4)····कुतो व्यवहारतो दृष्टान्तासिद्धिः ॥ यदि च भावाव्यक्तत्वान्यत्वेन न शक्यते वक्तुं तत्संवृत्यापि नास्तीत्युच्यते । नीलादिकमपि नास्तीत्यु(5)च्यते ।

यथोक्तं रत्नावल्यां(6) ।

रूपस्याभावमात्रत्वादाकाशं नाममात्रकं(7) ।
भूतैर्विना कुतो रूपं नाममात्रकमप्यतः ॥ इति ।

---

1) དངོས་པོའི་ བདག་ཉིད་ཀྱི་ ངོ་བོ་ཉིད་ ནི་ མ་ བྱུང་བ་ལས་ བྱུང་བས་ སྐྱེ་བ་ ཞེས་བྱ་སྟེ། — C'est l'opinion des Sautrāntikas; voir ci-dessus p. 263. n 2 et XXVII. 12.

2) D'après le tibétain *dravyasatām*.

3) Cette stance est citée Bodhic. p. IX. 145. Comparer la stance, ibid. IX. 85 (ṭīka, 322. 14) qui est aussi de Nāgārjuna: *hetutaḥ saṃbhavo yasya sthitir na pratyayair vinā, vigamaḥ pratyayābhāvāt, so 'stīty avagataḥ katham* (Yuktiṣaṣṭhikā).

4) Mss. *asmādāgakumāto (asmād āgamā kuto) .... dṛṣṭāntasiddhiḥ*. Tib. དེའི་ཕྱིར་ ཐ་སྙད་དུ་ དཔེ་ མ་གྲུབ་པ་ ག་ལ་ ཡོད། = *tasmāt kuto vyavahārato dṛṣṭāntāsiddhiḥ*.

5) བརྗོད་པར་བྱ་སྟེ། = *ucyatām*.

6) Voir 135. 7, 188. 13, 275. 7, 346. 5, 359. 1, infra ad XXV. 3, et Madh. avat. passim.

7) «L'ākāça, n'étant autre chose que l'absence du *rūpa*, n'est qu'un nom». གཟུགས་ ཀྱི་ དངོས་པོ་ མེད་ ཙམ་ཕྱིར། Lire མེད་ཕྱིར། — Comp. ci-dessus 71, 1.

तत्र क्षयस्य क्षयलक्ष[1]णस्य भावस्य विरोधिधर्मसद्भावात्संभवो न युक्तः। अक्षयस्यापि भावलक्षणवियुक्तत्वात्खरविषाणस्येव संभवो न युक्तः। एवं क्षयस्य विभवो नास्ति। [2]क्षयधर्मा ह्यविद्यमानस्तस्य निराश्रयो विभवो न युक्तः। तथा विभवो नाक्षयस्य च। अक्षयधर्मा हि भावाभावलक्षणविलक्षणस्तस्याविद्यमानस्य कुतो विभवो भविष्यति॥ यौ च संभवविभवौ न क्षयधर्मिणो नाक्षयधर्मिणो भाव[128a]स्य संभव[त]स्तौ नैव संभवत इति न स्तः संभवविभवौ॥

अत्राह। विद्येते एव भावानां संभवविभवौ तदाश्रयिधर्मिसद्भावात्। इह भावाश्रयौ संभवविभवौ [Tib. 155b]। स च तावद्भावोऽस्ति। तत्सद्भावात्तदाश्रितावपि धर्मौ भविष्यत इति॥ उच्यते। स्यातां भावाश्रितावेतौ धर्मौ यदि भावः स्यात्। यदा तु भावो नास्ति। तदा।

संभवो विभवश्चैव विना भावं न विद्यते।

कस्मात्पुनर्भावो नास्तीति चेत्। यस्मात्।

संभवं विभवं चैव विना भावो न विद्यते[3]॥ ८

भावस्य हि लक्षणभूतौ संभवविभवौ। तौ च [4]स्वरूपतो न स्त इति[4] प्रतिषिद्धौ। यदा च तौ [5]भावतः प्रतिषिद्धौ। तदा भावलक्षणं संभवं विभवं च विना कुतो भावलक्षणविलक्ष[6]णो भावो भविष्यति। भावं च विना न स्तः संभवविभवौ॥

---

1) དངོས་པོ་ ཟད་པའི་ ཆོས་ཅན་ལ་.

2) Mss. *nākṣaya*°. — Peut-être faut-il corriger *kṣayadharmā* et ci-dessous *akṣayadharmā*.

3) དངོས་པོ་ ཡོད་པ་མ་ཡིན་པར། འབྱུང་བ་ འཇིག་པ་ ཡོད་མ་ཡིན། འབྱུང་ དང་ འཇིག་པ་ མེད་པར་ནི། དངོས་པོ་ ཡོད་པ་ མ་ཡིན་ནོ།

4—4) Non représenté dans le tibétain.

5) Non représenté dans le tibétain.

6) མཚན་ཉིད་ དང་ མི་མཐུན་པ་.

अपरे तु पूर्वार्धं पश्चिमं कृत्वा व्याचक्षते। स्त एव संभवविभवौ भावधर्मत्वात्[1]। इह यन्नास्ति न तस्यास्ति भावधर्मत्वं तद्यथा मण्डूकजटा[2]शिरोमणेः' भावधर्मौ च संभवविभवौ' तस्मात्स्त एव ताविति ॥[3] यदि कस्यचित्परमार्थतः संभवविभवौ स्यातां' स भाव इति युक्तं स्यादभिधातुं' तौ च न स्त इति[4]

संभवं विभवं चैव विना भावो न विद्यते।

भावस्य संभवविभव[सत्त्वे विद्य[5]मान]त्वादिति भावः। तदसत्त्वे च हेतोरसिद्धार्थता ॥

तथा।

संभवो विभवश्चैव विना भावं न विद्यते।

आश्रय[6]स्याभावादाश्रित[7]स्यासिद्धिरित्यभिसंधिरिति ॥ [Tib. 156a]

किं चान्यत्। इहेमौ संभवविभवौ परिकल्प्यमानौ शून्यस्य वा भावस्य परिकल्प्येयातामशून्य[128 b]स्य वा। उभयथा च नोपपद्यत इति प्रतिपादयन्नाह।

संभवो विभवश्चैव न शून्यस्योपपद्यते।

---

1) Mss °*dharmitvāt*. — དངོས་པོའི་ ཆོས་ ཡོད་པའི་ཕྱིར་རོ།

2) དཔེར་ན་ སྦལ་པའི་ རལ་པ་ བཞིན་ ནོ།

3) D'après le tibétain: *tatrocyate, yadi.....*

4) དེ་དག་ ནི་ མེད་དེ། དེའི་ཕྱིར་...

5) དངོས་པོ་ ནི་ འབྱུང་བ་ དང་ འཇིག་པ་ ཡོད་པ་ན་ ཡོད་པ་ ཉིད་ ཡིན་པའི་ཕྱིར་རོ་ ཞེ[illegible]་ཏུ་ དགོངས་པའོ།

6) རྟེན་མེད་པས་.

7) བརྟེན་པ་.

अविद्यमानाश्रयत्वादाकाशचित्रवदित्यभिप्रायः[1] ॥ तथा ।

संभवो विभवश्चैव नाशून्यस्योपपद्यते[2] ॥ ९

अशून्यस्यासत्त्वान्निराश्रयौ संभवविभवौ नोपपद्यतः ॥

किं चान्यत् । इह यदि संभवविभवौ स्यातां तावेकत्वेन वा स्यातामन्यत्वेन वा । उभयथा च नोपपद्यत इत्याह ।

संभवो विभवश्चैव नैक इत्युपपद्यते ॥

परस्परविरुद्धयोरालोकान्धकारयोरिवैकत्वानुपपत्तेः ।

संभवो विभवश्चैव न नानेत्युपपद्यते[3] ॥ १०

उभयोः परस्परमव्यभिचारित्वात् । न हि संभवरहितस्य विनाशो न विभवरहितस्य संभवो दृष्ट इति । एवमुभयोः परस्परमव्यभिचारित्वात्

संभवो विभवश्चैव न नानेत्युपपद्यते ॥

अथ स्यात् ' किमनया सूक्ष्मेक्षिकया[4] ' आगोपालाङ्गनादिको[5] हि जनो यस्मात्संभवं विभवं च पश्यति तस्मात्स्तः संभवविभवौ । न ह्यविद्यमानो वन्ध्यातनयः शक्यो द्रष्टुमिति । एवमपि

---

1) ནམ་མཁའི་ རི་མོ་.

2) སྟོང་ལ་ འབྱུང་ དང་ འཇིག་པ་དག། འཐད་པ་ ཉིད་ ནི་ མ་ཡིན་ནོ། མི་སྟོང་པ་ལ་ ཡང་ འབྱུང་འཇིག་དག། འཐད་པ་ ཉིད་ནི་ མ་ཡིན་ནོ།།

3) འབྱུང་བ་ དང་ ནི་ འཇིག་པ་དག། གཅིག་པ་ ཉིད་ ནི་ མི་འཐད་དོ། འབྱུང་བ་ དང་ ནི་ འཇིག་པ་དག། གཞན་ཉིད་དུ་ ཡང་ མི་འཐད་དོ།།

4) Voir ci-dessus 68. 5.

5) སྐྱེ་བོ་ བ་གླང་རྫི་ དང་ བུད་མེད་ ཡང་ ཆད་ཀྱིས་.

द[श्यते] संभवश्चैव विभवश्चैव ते भवेत्[1]।

उच्यते । अनैकान्तिकमेतत् । न हि यद्यल्लोकेनोपलभ्यते तस्य तस्यास्तित्वं । तथा ह्यागोपालाङ्गनादिको जनो गन्धर्वनगरमायास्वप्नालात[Tib. 156b]चक्रमरीचिकासलिलादिकमसंविद्यमानमपि पश्यतीन्द्रियोपघातात्[2] । एवमिमावपि संभवविभवावसन्तौ मोहादेव पश्यतीत्याह ।

दृश्यते संभवश्चैव मोहाद्विभव एव च[3] ॥ [129a] ११

अथ कस्मात्पुनरेतदेवं निश्चीयते ऽविद्यमानस्वरूपाविमौ संभवविभवौ मोहादेव [4]वारलोकेन दृश्येते इति । युक्त्या ह्येतदेवं निश्चीयते । का पुनरत्र युक्तिः । इह यदि कश्चिद्भावो नाम भवेन्नियतं स भावाद्वा जायेताभावाद्वा । तथा यद्यभावो नाम कश्चित्सोऽपि भावाद्वा जायेताभावाद्वा । उभयथा चोभयोरप्यसंभव इत्याह ।

न भावाज्जायते भावो भावोऽभावान्न जायते ।
[नाभावाज्जायते ऽभावो ऽभावो भावान्न जायते[5] ॥] १२

1) གལ་ཏེ་ དེ་ལྟར། འབྱུང་བ་ དང་ ནི་ འཇིག་པ་དག། མཐོང་ངོ་ སྙམ་དུ་ ཚོར་ སེམས་ ན།

2) Le tibétain est plus développé. དབང་པོ་ལ་ གནོད་པར་གྱུར་པ་ལས་ རབ་རིབ་ཅན་གྱི་ སྐྲ་ཤད་ དང་། སྒྲོན་མ་ དང་ སྒྲོན་བུ་མཆུ་ རིངས་དག་ མཐོང་བ་ ཡིན་ཏེ། དེ་བཞིན་ དུ། འབྱུང་བ་ དང་ འཇིག་པ་ དེ་དག་ ཀུན་ མེད་བཞིན་དུ་ མི་ཤེས་པའི་ གཏི་མུག་གི་ རབ་རིབ་ཀྱིས་ བློའི་ མིག་ ལྡོངས་པར་ བྱས་པས་ མཐོང་ བ་ ཡིན་ནོ་ ཞེས་ བཤད་པ།

3) འབྱུང་བ་ དང་ ནི་ འཇིག་པ་ དག། གཏི་མུག་ཉིད་ཀྱིས་ མཐོང་བ་ཡིན།།

4) Non représenté dans le tibétain. — *vāra* = «Menge» (P. W.),

5) དངོས་པོ་ དངོས་ལས་ མི་སྐྱེ་སྟེ། དངོས་པོ་ དངོས་མེད་ལས་ མི་ སྐྱེ། དངོས་མེད་ དངོས་མེད་ མི་ སྐྱེ་སྟེ། དངོས་མེད་ དངོས་ལས་ མི་སྐྱེའོ།།

भावात्तावत्संभवा[1]ख्याद्भावस्य संभवाख्यस्योत्पादो न विद्यते । कार्यकारणयोर्योगपद्याभावादुत्पा[2]दस्य च लब्धजन्मनः पुनरुत्पादवैयर्थ्यात् ॥

अभावादपि भावो न जायते । किं कारणं । अभावो हि नाम विभवो विनाशः । स च भावविरुद्धः । तस्माद्भावविरुद्धात्कथं भावः स्यात् । यदि स्यात्तदा वन्ध्यादुहितुरपि पुत्रः स्यान्न चैतदेवमिति । तस्मादभावादपि भावो न भवति [Tib. 157a] ॥

इदानीमभावोऽप्यभावान्न भवति । भावनिवृत्तिरूपो ह्यभावस्तत्कुतोऽस्य कार्यकारणसामर्थ्यं । यदि स्यान्निर्वाणस्यापि कार्यकारणसामर्थ्यं स्यात् । यदि चाभावादभावः स्यात्तदा वन्ध्यादुहितुरपि पुत्रः स्यान्न चैतदेवमिति । तस्मादभावादप्यभावो न भवति ॥

इदानीं भावादप्यभावो न भवति । भावविरुद्धो ह्यभावः स कथं भावाद्भवेत् । यदि भवेत्प्रदीपा[द]न्धकारः स्यात् ॥ यतश्चैवं विचार्यमाणौ संभवविभवौ न स्तस्तस्मान्मोहादेव लोकेन दृश्येते इति विज्ञेयं ॥

[3]अथ वायमन्यः पूर्वपक्षः । इह हि यदि संभवविभवौ स्यातां तौ भावाश्रयौ वा स्यातामभावाश्रयौ वा [129b] । तौ च भावाभावौ सर्वथा विचार्यमाणौ न संभवतः । ततश्च कुतो निराश्रयौ संभवविभवाविति । अतो

दृश्यते संभवश्चैव मोहाद्विभव एव च ।

इति विज्ञेयं । यथा च भावाभावौ न संभवतस्तथा प्रतिपादयन्नाह ।

न भावाज्जायते भावो भावोऽभावान्न जायते ॥
नाभावाज्जायतेऽभावो ऽभावो भावान्न जायते ॥

अस्यार्थः पूर्ववत् ॥ अपि च यदि कश्चिद्भावो नाम स्यात् [Tib. 157b] । तस्योदय-

---

1) *saṃbhavākhya* = ཡང་དག་པར་འབྱུང་བ་ ཞེས་ བྱ་བ་.

2) སྐྱེ་བ་.

3) རྣམ་པ་ གཅིག་ཏུ་ན་ ཕྱོགས་ སྔ་མ་ འདི་ གཞན་ ཡིན་ནོ།

व्ययत्वात्संभवविभवौ स्यातां । न च कश्चिद्भावः स्वरूपतोऽस्ति खरविषाणवत्स्वभावानुत्पन्नत्वात्[1] ॥ अनुत्पन्नत्वमसिद्धमिति चेत् । तत्सिद्धं[2] यस्मात् ।

न स्वतो जायते भावः परतो नैव जायते ।
न स्वतः परतश्चैव जायते जायते कुतः[3] ॥ १३

एतच्चाद्य एव प्रकरणे व्याख्यातत्वान्न पुनर्व्याख्यायते । यश्चैवं यथोक्तप्रकारेण जायते स इदानीं कुतो जायते नैव कुतश्चिज्जायत इत्यभिप्रायः । अवश्यं चैतदेवमभ्युपेयं सर्वथा नास्ति भावस्योत्पाद इति ॥

(4 भावसद्भाववताभ्युपगमे च भवतः शाश्वतोच्छेददर्शनमापद्यते (5) बौद्धमतानुगत्येत्याह 4) ।

भावमभ्युपपन्नस्य शाश्वतोच्छेददर्शनं ।
प्रसज्यते ।

यस्मात्

स भावो हि नित्योऽनित्यो [ऽथ] वा भवेत्[6] ॥ १४

---

1) Mss *°anupapannatvāt.* — རང་བཞིན་གྱིས་ མ་སྐྱེས་པའི་ཕྱིར་རོ།

2) མ་ གྲུབ་པ་ མ་ ཡིན་ཏེ། = *nāsiddham.*

3) དངོས་པོ་ བདག་ལས་ མི་ སྐྱེ་སྟེ། གཞན་ལས་ སྐྱེ་བ་ཉིད་ མ་ཡིན། བདག་ དང་ གཞན་ལས་ སྐྱེ་བ་ ནི། ཡོད་མེད་ ཇི་ལྟར་ སྐྱེ་བར་ འགྱུར།

1—4) Le tibétain porte simplement = དེ་ལྟ་ མ་ཡིན་ན་ ནི། «S'il en est autrement».

5) *°matānugatyety*, *°gasyeti* (Cambr.).

6) དངོས་པོ་ ཡོད་པར་ ཁས་བླངས་ན།། རྟག་ དང་ ཆད་པར་ ལྟ་བར་ ནི།། ཐལ་བར་ འགྱུར་ཏེ་ གང་གི་ཕྱིར།། དངོས་དེ་ནི། རྟག་དང་ མི་རྟག་ འགྱུར་ཕྱིར་རོ། — La ponctuation est inexacte; གང་གི་ཕྱིར ne fait pas partie de la kārikā

यो हि यथोदितपदार्थव्यवस्थामतिक्रम्य भावसद्भावदर्शनमभ्युपैति तस्यावश्यं प्रवचनात्यन्तविरुद्धं शाश्वतोच्छेददर्शनद्वयमापद्यते । किं कारणं । यस्मात्स भावः परिकल्प्यमानो नित्यो वा भवेदनित्यो वा । यदि नित्यस्तदा नियतं शाश्वतवादः । अथानित्यस्तदा नियतमुच्छेद इति ॥

अत्राह । [130a]

भावमभ्युपपन्नस्य नैवोच्छेदो न शाश्वतं ।

किं कारणं । यस्मात् ।

उदयव्ययसंतानः फलहेत्वोर्भवः स हि[1] ॥ १५

यो हि हेतुफलयोरुदयव्ययानुप्रबन्धः स ह्यस्माकं भवः संसारः । तत्र यदि हेतुर्निरुध्येत तद्धेतुकं फलं नोत्पद्येत तदा[2] स्यादुच्छेद[Tib. 158a]वाददोषः[3] । यदि च हेतुर्न निरुध्येत स्वरूपेणावतिष्ठेत्तदा स्याच्छाश्वतवाद[4]दर्शनदोषः । न चैतदेवमिति । तस्माद्भावाभ्युपगमेऽपि नास्ति शाश्वतोच्छेददर्शनदोषद्वय[5]प्रसङ्गः । स एव संसारो योऽयं हेतुफलाविच्छिन्नक्रमवर्ती[6] उत्पादव्ययानुप्रबन्धः संस्काराणामिति । अतो नास्त्यस्माकमयं दोष इति ॥ उच्यते ।

उदयव्ययसंतानः फलहेत्वोर्भवः स चेत् ।

---

1) དངོས་པོ་ཡོད་པར་ཁས་བླངས་ཀྱང་། ཆད་པར་མི་འགྱུར་རྟག་མི་འགྱུར། འབྲས་བུ་རྒྱུ་ཡི་འབྱུང་འཇིག་གི། རྒྱུན་དེ་སྲིད་པ་ཡིན་ཕྱིར་རོ༎ Mdo XVII a རྒྱུ་ཡིས et འཇིག་གིས.

2) Placé dans le Mss. avant *taddhetukam.*

3) D'après le tibétain: *syād ucchedaḥ . yadi . . .*

4) D'après le tibétain: *syāc chāçvatadarçanam*

5) °*doṣadvaya*° non représenté dans le tibétain.

6) རིམ་པར་འབྱུང་བ.

नन्वेवमपि सति

व्ययस्यापुनरुत्पत्तेर्हेतूच्छेदः प्रसज्यते[1] ॥ १६

यो हि हेतुक्षणः फलस्योत्पत्तौ[2] हेतुभावमुपेत्य निरुध्यते । ननु तस्य व्ययवतो हेतुक्षणस्य पुनरनुत्पादादुच्छेददर्शनमापद्यते ॥ तत्रायं कथं न दोष इति चेत् ॥ भावमभ्युपपन्नस्यायं दोषो । न च मया भावोऽभ्युपगतः स्वभावानुत्पन्नत्वात्सर्वधर्माणां । यत्रापि मया ।

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छेदो नापि शाश्वतं[3] ॥

इत्युक्तं । तत्राप्यमुना न्यायेन नैःस्वाभाव्यमेव भावानां प्रतिपादितं । अन्यथा हि सति भावस्वरूपे बीजाङ्कुरयोः कथमन्यत्वं न स्यात् । तस्मान्नायं प्रसङ्गोऽस्माकं बाधक इति ॥

एवं तावद्भावमभ्युपपन्नस्य हेतोः पुनरनुत्पादादुच्छेददर्शनप्रसङ्गमुद्भाव्येदानीं शाश्वतवाद[4]दोषप्रसङ्गमुद्भावयन्नाह ।

सद्भावस्य स्वभावेन नासद्भावश्च युज्यते[5] ।

---

1) Mss. *yo hy udaya*°. — གལ་ཏེ་ འབྲས་ རྒྱུ་ འབྱུང་འཇིག་གི། རྒྱུན་ དེ་ སྲིད་ པ་ ཡིན་འགྱུར་ན། འཇིག་ལ་ ཡང་སྐྱེ་ མེད་པའི་ཕྱིར། རྒྱུ་ ནི་ ཆད་པར་ ཐལ་བར་ འགྱུར། — Notre commentaire porte |གལ་ཏེ| འབྲས་བུའི་ འབྱུང་'''| Mdo XVII lit རྒྱུ་ དེ་ སྲིད་.

2) བསྐྱེད་པར་ བྱ་བ་ལ་.

3) Chapitre XVIII. 10.

4) D'après le tibétain *çāçvatadoṣa*°.

5) དངོས་པོ་ ངོ་བོ་ཉིད་ ཡོད་ན། དངོས་མེད་ འགྱུར་བར་ མི་རིགས་སོ།

यदि हि हेतोः सद्भावः स्वभावतः स्यात्तस्य पश्चादसद्भावो न स्यात् [Tib. 158 b] स्वभावस्य[1]ानपायित्वात् । ततश्च शाश्वतदर्शनप्रस[130 b]ङ्गस्तदवस्थ[2] एव ॥

किं चान्यत् ।

निर्वाणकाले चोच्छेदः प्रशमाद्भवसंततेः[3] ॥ १७

यद्यपि हेतुफलयोरुदयव्ययसंतानप्रवृत्त्या[4] शाश्वतोच्छेददर्शनप्रसङ्गः परिह्रियते । तथापि यत्रास्य संतानस्य पुनरप्यप्रवृत्तिस्[5]तत्र निर्वाणे नियतमुच्छेददर्शनमापद्यते । उच्छेददर्शनं च प्रहातव्यमित्युक्तं भगवता ॥ एवंविधमुच्छेददर्शनं न भविष्यतीति चेदन्यद[6]पि किमर्थं [भवतां] भविष्यतीति भावविच्छेदालम्बनत्वात् । निर्वाणकाले भावविच्छेदालम्बनवदित्यभिप्रायः ॥ यच्चोक्तं ।

उदयव्ययसंतानः फलहेत्वोर्भवः स हि ।

इति तदपि नोपपद्यते । कथं कृत्वा । इह हि चरमो भवो निवृत्तिलक्षणः[7] प्रथमो गतिप्रतिसंधिलक्षणः[8] । तत्र चरमो भवो निरुध्यमानो हेतुत्वेनावतिष्ठते[9] । उपपत्तिलक्षणस्तु प्रथमो भवः फलरूपत्वेन व्यवतिष्ठते[9] । अनयोश्च भवयोः संसार इति संज्ञा[10] कृता ।

---

1) Non représenté dans le tibétain.

2) ཐལ་བ་ སོན་ འདུག་གོ.

3) མྱ་ངན་འདས་པའི་ དུས་ན་ ཆད། སྲིད་རྒྱུན་ རབ་ཏུ་ཞི་ཕྱིར་རོ.

4) རྒྱུན་ འཇུག་པས.

5) འབྱུང་བར་ མི་ འགྱུར་བ.

6) ཁྱོད་ལ་ གཞན་ཡང་ ཅིའི་ཕྱིར་ ཡིན་པར་ འགྱུར་ཏེ།

7) Mss. *bhavo gativṛttilakṣaṇaḥ* ལྡོག་པའི་ མཚན་ཉིད་ཅན.

8) འགྲོ་བ་ཉིད་ མཚམས་སྦྱོར་བའི་ མཚན་ཉིད་ཅན་.

9) གནས་པ་ཡིན་ཏེ།

10) ཞེས་ མིང་དུ་ བཏགས་པ་ཡིན་ནོ།

अत्र चेदं विचार्यते। य एष प्रथमो भवः फलरूपत्वेन व्यवस्थाप्यते[1], स किं चरमे भवे निरुद्ध उपजायते, अथानिरुद्धे, उत निरुध्यमाने, यतो हेतुफलानुप्रबन्धात्[2]संसारः स्यात्। सर्वथा च विचार्यमाणो न संभवतीति प्रतिपादयन्नाह।

चरमे न निरुद्धे च प्रथमो युज्यते भवः।
चरमे नानिरुद्धे च प्रथमो युज्यते भवः[3]॥ १८

तत्र यदि चरमे भवे निरुद्धे [Tib. 159a] प्रथमो भवो जायत इति परिकल्प्यते, तदा निर्हेतुकः स्यात्, दहनदग्धबीजादप्यङ्कुरोदयः स्यान्न चैतदिष्टं। तस्माच्चरमे निरुद्धे प्रथमो भवो न युज्यते॥

इदानीमनिरुद्धेऽपि चरमे भवे प्रथमो भवो [131a] न युज्यते। यदि स्यान्निर्हेतुकः स्यात्, द्विरूपता चैकस्य सत्त्वस्य स्यात्, अपूर्व[4]सत्त्वप्रादुर्भावश्च पूर्वस्य[5] च नित्यता स्यात्, अविनष्टे च बीजेऽङ्कुरोदयः स्यात्। न चैतदेवमिष्टमिति। अतः।

चरमे नानिरुद्धे च प्रथमो युज्यते भवः।

इति स्थितं॥ इदानीं निरुध्यमानेऽपि चरमे भवे प्रथमो भवो यथा नोपपद्यते तथा प्रतिपादयन्नाह।

---

1) རྣམ་པར་གནས་པ་.

2) རྒྱུན་གྱིས་ = °*prabandhāt*, °*saṃtānāt*.

3) ཐ་མ་ འགགས་པར་ གྱུར་པ་ན། སྲིད་པ་ དང་པོ་ རིགས་ མི་ འགྱུར། ཐ་མ་ འགགས་པར་ མ་གྱུར་ ཚེ། སྲིད་པ་ དང་པོ་ རིགས་ མི་ འགྱུར།།

4) སྔོན་མེད་པ་.

5) སྔ་མ་.

निरुध्यमाने चरमे प्रथमो यदि जायते ।
निरुध्यमान एकः स्याज्जायमानो ऽपरो भवेत्[1] ॥ १९

तत्र निरुध्यमानो वर्तमानो वर्तमानप्रत्ययान्तवाच्यत्वात्[2] ' जायत इत्यपि वर्तमान एवोच्यते वर्तमानशब्दवाच्यत्वात् ॥ अथवा निरुध्यमानो निरोधक्रियाकारकः । यश्चापि जायते ऽसावपि जनिक्रियाकारकस्तौ चैककालाविष्यमाणौ यौगपद्येनैव स्तः ' ततश्च निरुध्यमान एको भवः स्याज्जायमानश्चापर इति यौगपद्येनैव द्वौ भवौ प्राप्नुतः । न चैकस्य युगपद्द्वौ भवौ संभवत इत्ययुक्तमेतत् ॥ तदेवं यथोक्तेन विचारक्रमेण ।

न चेन्निरुध्यमानश्च जायमानश्च युज्यते ।
सार्धं च म्रियते येषु तेषु स्कन्धेषु जायते[3] ॥ २०

च[4]शब्दः [Tib. 159 b] समुच्चयार्थः । पृथक् पृथक् चेत्येन[5]त्संनिधापयति । यदेवं यथोदितन्यायेन निरुद्धे चरमे प्रथमो भवो न संभवति ' अनिरुद्धेऽपि चरमे प्रथमो भवो न संभवति ' सार्धं चैकस्मिंश्च काले चरमेन भवेन सह प्रथमो भवो न संभवति । तत्किमिदानीं येष्वेव स्कन्धेषु म्रियते तेष्वेव जायत इति स्यात् । येषु स्कन्धेषु स्थितो म्रियते तेष्वेव जायत इत्यत्यन्तविरुद्धमेतत् । न हि [131 b] म्रियमाणो जायत इति दृष्टं ॥ तद्[6]

---

1) གལ་ཏེ་ ཐ་མ་ འགགས་བཞིན་ན། དང་པོ་ སྐྱེ་བར་ འགྱུར་ན་ནི། འགག་བཞིན་པ་ ནི་ གཅིག་ འགྱུར་ཞིང་། སྐྱེ་བཞིན་པ་ ཡང་ གཞན་དུ་ འགྱུར།

2) ད་ལྟར་བའི་ རྐྱེན་གྱི་ མཐའ་ཅན་གྱིས་ བརྗོད་པར་བྱ་བ་ ཡིན་ན།

3) གལ་ཏེ་ འགག་བཞིན་ སྐྱེ་བཞིན་དག། ལྷན་ཅིག་ཏུ་ ཡང་ རིགས་མིན་ན། ཕུང་པོ་ གང་ལ་ འཆི་ འགྱུར་བ། དེ་ལ་ སྐྱེ་བའང་ འབྱུང་འགྱུར་རམ།

4) འདང་གི་ སྒྲ་ནི.

5) *etat* = དེ་དག.

6) *tad evam* དེའི་ཕྱིར། དེ་ལྟར.

एवं त्रिष्वपि कालेषु न युक्ता

भवताभिमता

भवसंततिः।[1]

चरमे भवे निरुद्धेऽनिरुद्धे निरुध्यमाने यस्मात्प्रथमो भवो न संभवति। तस्मात्त्रिष्वपि[2] कालेषु भवसंततिर्नास्ति।

[त्रिषु कालेषु या नास्ति सा कथं भवसंततिः[3]॥] २१

या चेदानीं[4] त्रिषु कालेषु नास्ति कुतः साऽन्येनात्मना भविष्यतीति सर्वथा नास्ति भवन्मता भवसंततिः। ततश्च यदुक्तं

उदयव्ययसंतानः फलहेत्वोर्भवः स हि। इति[5]

तन्न युक्तं। ततश्च भावाभ्युपगमे सति स एव शाश्वतोच्छेदवाद[6]प्रसङ्गो दुर्निवारो भवतामित्यतो नास्त्येव भावानां स्वभावत उत्पत्तिरिति सिद्धं॥

यथोक्तमार्यसमाधिराजभट्टारके।[7]

* * * * * * * * * * [132 a] * * *

---

1) དེ་ལྟར་ དུས་གསུམ་དག་ཏུ་ ཡང་། སྲིད་པའི་ རྒྱུན་ ནི་ མི་ རིགས་ན།

2) དུས་གསུམ་ཆར་དུ་ ཡང་.

3) དུས་གསུམ་དག་ཏུ་ གང་ མེད་པ། དེ་ནི་ ཇི་ལྟར་ སྲིད་པའི་ རྒྱུན།།

4) *idānīm* n'est pas traduit.

5) Voir p. 422, l. 15.

6) Le tibétain donne *darçana*.

7) Les Mss. reproduisent ici les stances qu'on a lues p. 109.5 — 112.4 et p. 205. — Le tibétain ne fournit pas cette citation et les variantes ont été relevées ci-dessus.

तथा[1] ।

बीजस्य सतो यथाङ्कुरो
न च यो बीजु स चैव अङ्कुरो ।
न च अन्यु ततो न चैव त-
देवमनुच्छेद अशाश्वत धर्मता ॥

मुद्रात्प्रतिमुद्र दृश्यते
मुद्रसंक्रान्ति न चोपलभ्यते ।
न च तत्र न चैव सान्यतो
एवं संस्कार ऽनुच्छेदशाश्वता[2] ॥

अत एवोक्तमार्यनागार्जुनपादैः[3] ।

स्वाध्यायदीपमुद्रादर्पणघोषार्ककान्त[4]बीजाम्लैः ।
स्कन्धप्रतिसंधिरसंक्रमश्च विद्वद्भिरवधार्यौ[5] ॥ इति ॥

तथा[6] भगवान् ।

---

1) Cette citation du Lalita (p. 210. 3, Lefmann, 176. 11) manque dans le tibétain. Nous l'avons rencontrée p. 26. 8 et 108. 8.

2) Nos Mss. reproduisent ici le dernier pāda de la stance précédente.

3) Nous retrouverons cette stance (*āryā*), non reproduite dans le tibétain, ci-dessous Chap. XXVI fol. 174a ad finem: malheureusement, là aussi, le tibétain fait défaut. De même, fol. 172b, l. 1. où on lit: *svādhyāyadīpamudrāpratimudrādinyāyena.*

4) Mss. *svādhyaya°*, *svādhyāya°*, *°kāntā°* et *°kānta°*.

5) Mss. *avadhāryata iti.* — Je corrige d'après la leçon fol. 174 *vidvadbhir upadhāyāv iti.*

6) Le tibétain fait précéder cette citation de celle-ci བཅོམ་ལྡན་འདས་ཀྱིས་ཀྱང་། སྲིད་གསུམ་རྒྱ་ལམ་དང་ འདྲ་ སྐྱེད་པོ་ མེད། མྱུར་དུ་ འཇིག་ ཅིང་ མི་རྟག

ज्ञायते (1) च्यवते चापि न च ज्ञातिर्न च च्युतिः ।
यस्य (2) विज्ञानत एष समाधिर्नास्य दुर्लभः ॥ इति ।

तथा ।

सूसुखिता सद ते नर[Tib. 160a]लोके
येषि अचिन्तिय ज्ञातिमि धर्माः ।
न च धर्म अधर्मविकल्पो
चित्तपपञ्चविभावित सर्वि ॥

(3) भाव अभाव विभावयि ज्ञानं
सर्वमचित्तयि सर्वमभूतं ।
ये पुन चित्तवशानुग बाला-
स्ते दुखिता भवकोटिशतेषु ॥

(4) यो पि च चित्तयि शून्यकधर्मान्
सो पि कुमार्गपपन्नकु बालः ।
अक्षरकीर्तित शून्यकधर्मा-
स्ते च अनक्षर अक्षर उक्ताः ॥

སྒྱུ་མ་ བཞིན། འོང་བ་ མེད་ཅིང་ འདི་ནས་ འགྲོ་བའང་ མེད། རྒྱུན་ རྣམས་ རྟག་ཏུ་ སྐྱེ་ཞིང་ མཚན་མ་ མེད། ཅེས་བྱ་བ་ དང་། དེ་བཞིན་དུ།

1) Mss. *vyayate.*

2) Mss. *yasyo* (*°sya*) *vijānato* | *eṣā* (*eṣām*)... གང་གིས་ ཤེས་པར་ འགྱུར་བ་ ཡིས། ཏིང་ འཛིན་ འདི་ནི་ རྙེད་ མི་དཀའ།

3) Voir ci-dessus p. 276. 3.

4) Voir ci-dessus p. 133. 14 et 348. 14.

शान्तप्रशान्त य चिन्तयि धर्मान्
सो पि च चित्तु न ज्ञातु न भूतः ।
चित्तवितर्कण सर्वि प्रपञ्चाः
सूक्ष्म अचिन्तिय बुध्यथ धर्मानिति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्न[132b]पदायां मध्यमकवृत्तौ संभवविभवपरीक्षा नामैकविंशतितमं प्रकरणं ॥

XXII.

तथागतपरीक्षा नाम द्वाविंशतितमं प्रकरणं

अत्राह । विद्यत एव [भव](1)संततिस्तथागतसद्भावात् ।

इह हि भगवता (2महाकरुणोपायप्रज्ञाद्वयज्ञानधारिणा(3) सकलत्रैधातुकाशेषसत्त्वजात्यादिदुःखव्युपशमैकमनसा2) त्रिभिः कल्पासंख्येयैः(4) सप्तभिर्वा नैरन्तर्यक्रमेणोपचक्ता तैस्तैर्निरतिशयैरतिविचित्रैः पुण्यक्रियाप्रारम्भैः सकलजगद्धितोदयैकक्रियालक्षणैः प्रियैकपुत्रादप्यधिकतरनिरवशेषजगदनुग्रहैकतत्परेण महाकरुणापरवशेन तत्र तत्रोपपत्त्याय(5)तने क्षितिसलिलज्वलनपवनसाधा(6)रणभैषज्यमहामहीरुहवज्जनानां स्वेच्छात(7) उपभोग्यतामात्मानमुपगमयता महा(8)कालेन (9)सार्वज्ञं सर्वाकारपरिच्छेदि पदमधिगतं । स एवमधिगतसर्व-

---

1) སྲིད་པའི་ རྒྱུན.

2—2) N'est pas représenté dans le tibétain.

3) D'après un Ms. qui porte °*vārinā*; les autres °*jñanarāsakala*, *jñānırāsasakala*.

4) བསྐལ་པ་ གྲངས་མེད་པ་ གསུམ་མམ་ བདུན་དུ་བར་ ཆད་མེད་པའི་ཚུལ་གྱིས… — Il est souvent admis que la carrière du Bodhisattva dure trois *asaṃkhyeyas*, voir Bodhisattvabhūmi, I. vi § 6. — Les sept *asaṃkhyeyas* me paraissent être nouveaux. — Peut-être ***nairāntarya***°.

5) འཁྲུངས་པའི་ གནས་ དེ་ དང་ དེར.

6) Dans le tibétain, *sādhāraṇa* est placé après *bhaiṣajyavṛkṣa*. — La terre, l'eau, etc., appartiennent ou plutôt sont à la disposition de toute créature. — La comparaison est classique, voir Bodhic. III. 20. 21 (où *upajīvya* correspond à notre *upabhogya*).

7) Mss. *svecchatopa*°. — རང་གི་འདོད་པས་ ལོངས་སྤྱོད་པར.

8) Mss. *mahakāreṇa*. — དུས་རིང་མོ་ཞིག་གིས་ ཐམས་ཅད་མཁྱེན་པའི་ གོ་འཕང་ བརྙེས་པ་ཡིན་ལ།

9) Forme assez rare, comp. *tāthāgata*, etc.

ज्ञानो भगवान् यथा धर्माणां तत्त्वं व्यवस्थितं तथैवाशेषतो गतत्वाद्बुद्धत्वात्तथागत[1] इत्युच्यते ।

यद्यपि भवसंततिर्न स्यात्तदा तथागतोऽपि न स्यात् । न ह्येकेन जन्मना शक्यं तथागतत्व[2]मनुप्राप्तुम् । तस्माद्विद्यत एव भवसंतति[Tib. 160b]स्तथागतसद्भावादिति ॥

उच्यते । भवदीयमेव ह्येदमतिमहदज्ञानं भवसंतानस्याविच्छेदवर्तितां चातिदीर्घकालं[3] च गमयति ' यस्य नाम भवतोऽतिमहदज्ञानघनान्धकारमेव विचित्रैरुपपत्तिशरच्चन्द्रज्ञानालोकै[4]र्विध्वस्यमानमप्यतिचिरतरकालाभ्यासवासनाविस्तराभिवृद्धमद्यापि न विध्वस्यते न निव[133a]र्तते ॥ यदि हि तथागतो नाम कश्चित्स्यात्स्वभावतस्तदा तस्य महता कालेनाभिनिष्पत्ते[5]र्भवसंततिः स्यात् । न च तथागतो नाम कश्चिद्भावस्वभावत[6] उपलभ्यते । केवलं तु भवानविद्यातिमिरोपहतमतिनयनतया द्विचन्द्रकेशमशकादिवन्मिथ्या तथागतं नाम स्वभावत उपलभते ॥ यथा च तथागतो नास्ति स्वभावतस्तथा प्रतिपादयन्नाह ।

स्कन्धा न नान्यः स्कन्धेभ्यो नास्मिन् स्कन्धा न तेषु सः ।
तथागतः स्कन्धवान्न कतमोऽत्र तथागतः[7] ॥ १

यदि हि तथागतो नाम कश्चित्[8]पदार्थोऽमलो निष्प्रपञ्चः[8] स्यात् ' स स्कन्धस्वभावो वा भवेत् ' रूपवेदनासंज्ञासंस्कारविज्ञानाख्यस्कन्धपञ्चकस्वभावो वा भवेत् । यदि वा शो-

---

1) Voir ci-dessus 31, n. 1, et aussi les remarques de Rājendralāl, trad. du Lalita (Bibl. Indica, № 455) p. 19 (d'après Csoma et Hodgson).

2) Mss. *tathāgatatatvam.*

3) Je comprends *atidīrghakālavartitāṃ ca.* Le tibétain ne répète pas *ca.*

4) Mss. *jñānalokair.*

5) མངོན་པར་ འགྲུབ་པའི་ཕྱིར.

6) Mss. *bhāvasvabhāvaḥ svabhāvata upa°.*

7) ཕུང་ མིན་ ཕུང་པོ་ལས་ གཞན་ མིན། དེ་ལ་ ཕུང་ མེད་ དེར་ དེ་ མེད། དེ་བཞིན་གཤེགས་པ་ ཕུང་ལྡན་ མིན། དེ་བཞིན་གཤེགས་པ་ གང་ཞིག་ ཡིན།

8–8) Non représenté dans le tibétain.

त्समाधिप्रज्ञाविमुक्तिविमुक्तिज्ञानदर्शनाख्यपञ्चस्कन्धस्वभावः[1]। तद्व्यतिरिक्तो वा भवेत्। पूर्वक्ता एव पञ्च स्कन्धाः सत्त्वप्रज्ञप्तिनिमित्तत्वादिह[2] विचारे परिगृह्यन्ते। नोत्तरे ग्रव्याप-क[Tib. 161a]त्वादेषां पूर्वकैरत्तर्भावितत्वादिति[3] ॥

यदि वा पञ्चस्कन्धव्यतिरिक्तो भवेत्। तत्र तथागते वा स्कन्धाः स्युः स्कन्धेषु वा न भवेत्तथागतो [वा स्कन्धवान् भवेत्] धनवानिव देवदत्तः ॥ सर्वथा च विचार्यमाणो न संभवति। कथं कृत्वा। तत्र तावत्स्कन्धा एव न तथागतः। किं कारणं। उक्तं हि[4]।

यदिन्धनं स चेदग्निरेकत्वं कर्तृकर्मणोः।

भवेदिति तदिहापि योज्यं।

स बुद्धो यो ह्युपादानमेकत्वं कर्तृकर्मणोः

भवेदिति[5] ॥ तथा।

आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्भवेत्[6]

इत्युक्तं तदिहापि योज्यं।

बुद्धः स्कन्धा यदि भवेदुदयव्ययभाग्भवेत् ॥ इति।

एवं तावत्स्कन्धा न तथागतः ॥ इदानीं नान्यः स्कन्धेभ्यस्तथागत इति। किं कारणं। उक्तं हि[7]।

---

1) Voir ci-dessus 292, n. 4. D'après Candrakīrti, Madhyamakāvatārabhāṣya 62. 8, le Bouddha a deux corps, *dharmakāya*, *rūpakāya*, lequel est constitué par les *skandhas* «spirituels» qui sont énumérés ici.

2) སེམས་ཅན་དུ་ གདགས་པའི་ རྒྱུ་ ཡིན་པས'. — «C'est parce que ces *skandhas* s'y trouvent que l'on appelle *sattva* le *sattva*». Voir ci-dessus 285, n. 4.

3) Ms. *pūrvatraiva prānte bhāvayitvād iti.* — སྔ་མའི་ ཁོངས་སུ་ འདུས་པའི་ཕྱིར.

4) = X. 1 (202. 11).

5) ཉེར་ལེན་ གང་ དེ་ སངས་རྒྱས་ན། བྱེད་པ་པོ་ དང་ ལས་ གཅིག་འགྱུར།

6) = XVIII. 1 (341. 8).

7) = X. 1 (202. 12).

अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत् ।

त[133b]था[1] ।

परत्र निरपेक्षत्वादप्रदीपनहेतुकः ।

पुनरारम्भवैयर्थ्यमेवं चाकर्मकः सतीति ॥

तथेहापि योज्यं ।

बद्धो ऽन्यश्चेदुपादानादुपादानं विना भवेत् ।

तथा ।

परत्र निरपेक्षत्वादनुपादानहेतुकः ।

पुनरारम्भवैयर्थ्यमेवं चाकर्मकः सति ॥

तथा ।

स्कन्धेभ्योऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः । इति ॥

अन्यत्वाभावाच्च स्कन्धादीनां तथागतस्य च तथागते [Tib. 161b] स्कन्धा नोपपद्यन्ते । नापि स्कन्धेषु तथागत इत्युपपद्यते ॥ उक्तं चैतन्मध्यमकावतारे[2] पक्षद्वयव्याख्यानं ।

स्कन्धेष्वात्मा विद्यते नैव चास्मिन्

सन्ति स्कन्धा[3] आत्मनीतीह यस्मात् ।

सत्यन्यत्वे स्यादियं कल्पना वै

तच्चान्यत्वं नास्त्यतः कल्पनैषा ॥

स्कन्धवानपि तथागतो यथा न भवति तथा तत्रैवोक्तं ।

इष्टो नात्मा रूपवान्नास्ति यस्माद्

आत्मा[4] मत्वर्थोपयोगो हि नातः ।

---

1) = X. 2 (203. 7).

2) Les stances citées sont extraites du Chap. VI (142 et 143). Voir Muséon, 1900, p. 226 et 1905, p 211.

3) Mss. *nānātmani.*

4) Mss. *ātmāmatvarthāya*°.

भेदे गोमान् रूपवानप्यभेदे

तत्त्वान्यत्वे [ऽ]रूपतो नात्मनः स्ततः[1] ॥

तत्त्वान्यत्वपक्ष एव तु यत्रापि पक्षा अन्तर्गता वस्तुतः सत्कायदृष्टिप्रवृत्त्यपेक्षया[2] तु यत्र पक्षाः समुपन्यस्ता आचार्येणेति विज्ञेयं । यश्चैवं स्कन्धेषु पञ्चधा विचार्यमाणो नास्ति तथागतः स केनान्येनात्मना भविष्यतीति सर्वथा न संभवत्येव तथागत इति भावस्वभावादपश्यन्त[3] आचार्यपादाः प्राहुः कतमोऽत्र तथागत इति । नास्त्येव स [4 कश्चित्सकलत्रैलोक्यवस्तुविपर्यासभावस्वभाव 4)] इत्यभिप्रायः । तथागताभावाच्च भवसंततिरपि [5] द्रव्यसंततिर्नास्तीति सिद्धं ॥

अत्रैके वदन्ति । नैव हि स्कन्धास्तथागत इति ब्रूमो यथोक्तदोषप्रसङ्गात् । नापि स्कन्धव्यतिरिक्तः । नापि तथागतेऽनास्रवान्[6] स्क[134 a]न्धान् वर्णयामो हिमवति पर्वत इव तरुखण्डं । नापि स्कन्धेषु तरुखण्ड इव सिंहं । नापि स्कन्धवन्तं वर्णयामो लक्षणव-

---

1) La version tibétaine de notre commentaire s'ecarte des deux versions de Mdo XXIII (voir Muséon, *loc. cit*). བདག་འདི་ གཟུགས་ལྡན་ མ་ཡིན་ གང་ ཕྱིར། བདག་མེད་ དེ་ཕྱིར་ ལྡན་དོན་ དང་ འབྲེལ་མེད། ཐ་དད་ ཕྱུགས་ལྡན་ ཐ་མི་ དད་ གཟུགས་ལྡན། དེ་ཉིད་ གཞན་དུ་བདག་ མེད་ དངོས་མེད་ཕྱིར༎ *ātmā rūpavān nāsti* [ou *na iṣṭaḥ*], *yasmān nāsti, ato nāsti vattvārthasaṃbandhaḥ bhede gomān abhedhe rūpavān, tattvānyatvena ātmā nāsty arūpataḥ* (= *svabhavābhārāt*)

Les autres traducteurs ont lu de même les trois premiers pādas. Pour le quatrième, ils comprennent: l'*ātman* n'est ni identique au *rupa* ni différent བདག་ནི་ གཟུགས་ལས་ དེ་ཉིད་ གཞན་ཉིད་ མེད། = *tattvānyatve rūpato nātmanaḥ*.

2) Mss. *pradṛsṭy*°.

3) D'après le tibétain *tathāgatasya sarvathāsaṃbhavaṃ paçyantaḥ*.

4—4) Manque dans le tibétain.

5) *dravyasaṃtati* manque dans le tibétain.

6) Le *Dharmakāya* est une série de *skandhas* purs: *anāsravaskandhasaṃtana*. (Abhidh. k. v. Burn. 443b; J. R. A. S. 1906, 948)

समिव [Tib. 162a] चक्रवर्तिनम्[1]एकत्वान्यत्वानभ्युपगमादेव। किं तर्हि स्कन्धानमला-[2]नुपादाय तत्त्वान्यत्वावाच्यं तथागतं व्यवस्थापयामः। तस्मान्नायं विधिरस्माकं बाधक इति॥

अत्रोच्यते।

बुद्धः स्कन्धानुपादाय यदि नास्ति स्वभावतः।
स्वभावतश्च यो नास्ति कुतः स परभावतः[3]॥ २

यदि हि बुद्धो भगवान्[2]अमलान् स्कन्धानुपादाय तत्त्वान्यत्वेनावक्तव्यः प्रज्ञप्यते[4], न तर्हि स्वभावतः सोऽस्तीति व्यक्तमापद्यते प्रतिबिम्बवदुपादाय प्रज्ञप्यमानत्वात्। यश्चेदानीं स्वभावतो नास्त्यात्मीयेन स्वरूपेण स कथमविद्यमानः स्वभावतः स्कन्धानुपादाय परभावतो भविष्यतीति। न ह्यविद्यमानो वन्ध्यातनयः परभावमपेक्ष्य भवतीति युज्यते॥

अथ स्याद्यथैव हि प्रतिबिम्बकं स्वभावतोऽसंविद्यमानमपि परभावं मुखादर्शा-[5]दिकमपेक्ष्य भवति। एवं च तथागतोऽपि स्वभावतोऽसंविद्यमानोऽनास्रवान् [6]पञ्चस्कन्धानुपादाय परभावतो भविष्यतीति। एवमपि।

---

1) འཁོར་ལོས་བསྒྱུར་བའི་ རྒྱལ་པོ.

2—2) *amalān*, non représenté dans le tibétain.

3) གལ་ཏེ་ སངས་རྒྱས་ ཕུང་པོ་ལ། བརྟེན་ན་ རང་བྱུང་ལས་ ཡོད་མིན། རང་བཞིན་ལས་ ནི་ གང་ མེད་པ། དེ་ གཞན་དངོས་ལས་ ག་ལ་ ཡོད།

4) འདོགས་ན།

5) བཞིན་ དང་ མེ་ལོང་ལ་སོགས་པ་ གཞན་གྱི་ དངོས་པོ་ལ···

6) Le tibétain porte simplement ཕུང་པོ་ལ་ བརྟེན་ནས་.

प्रतीत्य परभावं यः सो ऽनात्मेत्युपपद्यते ।
यश्चानात्मा स च कथं भविष्यति तथागतः[1] ॥ ३

यदि प्रतिबिम्बवत्परभावं प्रतीत्य तथागत इष्यते । एवं सति प्रतिबिम्बवदेव स तथागतोऽनात्मेत्युपपद्यते ' न तु स्वभावत इति युज्यते ॥ आत्म[Tib. 162b]शब्दोऽयं स्वभावशब्दपर्यायः यश्चा[ना]त्मा निःस्वभावः प्रतिबिम्बवदेव स [134b] कथं तथागतः स्व[2]भावरूपतो भविष्यति । अविपरीतमार्गगतो[3] न भविष्यतीत्यभिप्रायः ॥

किं चान्यत् । इह यदि तथागतस्य कश्चित्स्वभावः स्यात्तदा तत्स्वभावापेक्षया स्कन्धस्वभावः परभाव इति स्यात् ' तं च परभावं प्रतीत्य तथागतः स्यात् । यदा तु तथागतस्य स्वभाव एव नास्ति ' तदा कुतः स्कन्धानां परत्वं स्यादिति प्रतिपादयन्नाह

यदि नास्ति स्वभावश्च परभावः कथं भवेत् ।

यदा चैवं स्वभावपरभावौ न स्तस्तदा ।

स्वभावपरभावाभ्यामृते कः स तथागतः[4] ॥ ४

[5]पदार्थो हि भवन् स्वभावो भवेत्परभावो वा ' ताभ्यां तु विना कोऽसावपरः पदार्थोऽस्ति यस्तथागत इति व्यवस्थाप्यते । तस्मान्नास्ति स्वभावतस्तथागत इति ॥

---

1) Mss. *sa nātmepratyupa°.* གང་ཞིག་ གཞན་གྱི་ དངོས་ བརྟེན་ནས། དེ་ བདག་ཉིད་དུ་ མི་འཐད་དོ། གང་ཞིག་ བདག་ཉིད་ མེད་པ་ དེ། ཇི་ལྟར་ དེ་བཞིན་ གཤེགས་པར་ འགྱུར།།

2) Non représenté dans le tibétain

3) ལམ་ལས་ གཤེགས་པ་.

4) གལ་ཏེ་ རང་བཞིན་ ཡོད་མིན་ན། གཞན་དངོས་ ཡོད་པར་ ཇི་ལྟར་ འགྱུར། རང་ བཞིན་ དང་ ནི་ གཞན་དངོས་དག། མ་ གཏོགས་ དེ་བཞིན་གཤེགས་ དེ་ གང་།

5) དངོས་པོ་.

किं चान्यत्।

स्कन्धान्यद्यनुपादाय भवेत्कश्चित्तथागतः।
स इदानीमुपादद्यादुपादाय ततो भवेत्[1]॥ ५

यदि मन्यसे स्कन्धेभ्यस्तत्त्वान्यत्वेनावक्तव्यस्तथागतः स्कन्धानुपादाय प्रज्ञप्यत इति। तत्कदा युज्यते। यदि स्कन्धाननुपादायागृहीत्वा पूर्वं कश्चित्तथागतो नाम भवेत्स स्कन्धानुपादद्यात्[2]। व्यतिरिक्त एव हि पूर्वसिद्धो धना[Tib. 163 a]द्देवदत्तो धनस्योपा[3]दानं कुरुते तद्वदेतान् स्कन्धाननुपादाय यदि कश्चित्तथागतः स्यात्स इदानीं स्कन्धानुपादद्यात्[4]। ततश्च तान् स्कन्धानुपादाय ततो भवेत्॥ विचार्यमाणस्तु सर्वथा

स्कन्धान् चाप्यनुपादाय नास्ति कश्चित्तथागतः।

निर्हेतुकत्वप्रसङ्गात्।

यश्च नास्त्यनुपादाय [स उपादास्य]ते कथं[5]॥ ६

अविद्यमानत्वादित्यभिप्रायः। यदा चैवं न किं चिदनु[135 a]पादत्ते तदा स्कन्धाननुपादाय तथागतो नाम भविष्यतीति नोपपद्यते॥ यदा चैवं तथागत उपादानात्पूर्वमविद्यमानत्वान्न किं चिदुपादत्ते तदा तदुपादानस्यापि केन चिदप्यनुपादीयमानस्योपादानत्वं न संभवत्येवेति प्रतिपादयन्नाह।

---

1) གལ་ཏེ་ ཕུང་པོ་ མ་བརྟེན་པར། དེ་བཞིན་གཤེགས་པ་ འགའ་ ཡོད་ན། དེ་ནི་ ད་གཟོད་ བརྟེན་ འགྱུར་ཞིང་། བརྟེན་ནས་ དེ་ལས་ འགྱུར་ལ་རག།

2) ཕུང་པོ་ལ་ བརྟེན་ནས་ འགྱུར་བ. Voir ci-dessous note 4.

3) ནོར་ ལེན་པར་ བྱེད་པ.

4) ཕུང་པོ་དག་ལ་ བརྟེན་པར་ འགྱུར་ཞིང་།

5) ཕུང་པོ་རྣམས་ལ་ མ་བརྟེན་པར། དེ་བཞིན་གཤེགས་པ་ འགའ་ ཡང་མེད། གང་ཞིག་ མ་བརྟེན་ ཡོད་མིན་ན། དེ་ ནི་ ཇི་ལྟར་ ཉེར་ལེན་ འགྱུར།

न भवत्यनुपादत्तमुपादानं[1] च किं चन ।

यदा चैवमुपादानं केन चिदप्यनुपादीयमानत्वादुपादानं न भवतीति तदोपादानाभावादुपादातापि कश्चिन्नास्तीति प्रतिपादयन्नाह ।

न चास्ति निरुपादानः कथं चन तथागतः[2] ॥ ७

इति ॥ तदेवं यथोपपादितन्यायेन ।

तत्त्वान्यत्वेन यो नास्ति मृग्यमाणश्च पञ्चधा ।

उपादानेन स कथं प्रज्ञप्यते तथागतः[3] ॥ ८

यो हि तथागतो विचार्यमाणो मृग्यमाणस्तत्त्वेन स्कन्धेभ्य एकत्वेन नास्ति । अन्यत्वेन स्कन्धेभ्यः पृथक्त्वेन च यो नास्ति । एवं तत्त्वान्यत्वासत्त्वादाधाराधेयतद्वत्पक्ष[4][5][पञ्च]प्रकारैर्[Tib. 163 b]मृग्यमाणो यो नास्ति स कथमत्यन्ततोऽसंविद्यमानस्तथागत उपादानेन शक्यः प्रज्ञपयितुमित्यतोऽपि नास्ति तथागतो नाम [स्व]भावतः ॥

न च केवलमनेन विचारेण तथागत एव नास्ति ।

यदपीदमुपादानं तत्स्वभावान्न विद्यते ।

---

1) Mss. *anupādātam.*

2) ཉེ་བར་བླངས་པ་མ་ཡིན་པར། ཉེ་བར་ལེན་པར་ཅིས་མི་འགྱུར། །ཉེ་བར་ལེན་པ་མེད་པ་ཡི། དེ་བཞིན་གཤེགས་པ་ཅི་ཡང་མེད།

3) རྣམ་པ་ལྔས་ནི་བཙལ་བྱས་ན། གང་ཞིག་དེ་ཉིད་གཞན་ཉིད་དུ། མེད་པའི་དེ་བཞིན་གཤེགས་པ་དེ། ཉེ་བར་ལེན་པས་ཇི་ལྟར་གདགས།

4) Mss. ***evattvāpyāsattvāt** . ādhāra°* དེ་ཉིད་དང་གཞན་ཉིད་དུ་མེད་པས.

5) Ms. *tadvatpreksaprakārair.* — དེ་དང་ལྡན་པའི་ཕྱོགས་རྣམ་པ་ལྔས.

यदपीदमुपादानं रूपवेदनासंज्ञासंस्कारविज्ञानाख्यं स्कन्धपञ्चकं तदपि स्वभावेन न विद्यते ' प्रतीत्यसमुत्पन्नत्वात् ' स्कन्धपरीक्षायां[1] च विस्तरेण प्रतिषिद्धत्वात् ॥

अथापि स्याद्यद्यपि स्वभावत उपादानं नास्ति तथापि हेतुप्रत्ययात्मकात्परभावाद्भविष्यतीति । [135b] तदपि नोपपद्यत इति प्रतिपादयन्नाह ।

स्वभावतश्च यन्नास्ति कुतस्तत्परभावतः[2] ॥ ९

न हि वन्ध्यासूनुः स्वभावतोऽसंविद्यमानः शक्यः परभावेन प्रज्ञपयितुमिति । अत उपादानमपि नास्ति ॥ अथ वा ।

यदपीदमुपादानं तत्स्वभावान्न विद्यते ।

उपादातृमपेक्षत्वादुपादातृनिरपेक्षस्य चोपादानत्वाभावान्नास्ति स्वभावसिद्धमुपादानं । अथ यद्यप्युपादातृनिरपेक्षमुपादानं स्वभावसिद्धं न संभवति ' एवं तदुपादात्रपेक्षमेव भवतीति[3] ॥ उच्यते । एवमपि ।

स्वभावतश्च यन्नास्ति कुतस्तत्परभावतः ।

स्वभावतो यदुपादानं न सिद्धं तदविद्यमानस्वभावं [Tib. 164a] कथमुपादातुः परभावतो भविष्यतीति । तस्मादुपादानमपि नास्तीति ॥

इदानीं यथा प्रसाधितमेवार्थमुपदर्शयन्नाह ।

एवं शून्यमुपादानमुपादाता [च] सर्वशः ।

सर्वेण प्रकारेण विचार्यमाणं शून्यमुपादानं निःस्वभावमुपादाता च शून्यः स्वभावरहितः । तेनेदानीमुपादानेन

---

1) Chapitre IV.

2) གང་ཞིག་ཉེ་བར་བླང་བ་དེ། དེ་ནི་རང་བཞིན་ལས་ཡོད་མིན། བདག་གི་དངོས་ལས་གང་མེད་པ། དེ་གཞན་དངོས་ལས་ཡོད་རེ་སྐན།།

3) Mss. *evaṃ tat kumādi(ya)syapekṣaṃ.* — དེ་ལྟ་ན་ཉེ་བར་ལེན་པ་པོ་ལ་བལྟོས་པ་དང་བཅས་པ་ཉིད་དུ་འགྱུར་རོ།

प्रज्ञप्यते च शून्येन कथं शून्यस्तथागतः[1] ॥ १०

नैव तत्संभवति यदविद्यमानेनाविद्यमानस्य तथागतस्य प्रज्ञप्तिः स्यादिति । तस्मात्स्कन्धानुपादाय तथागतः प्रज्ञप्यत इति नोपपद्यते ॥

अत्राहुः । अहो[2] बत कृता प्रत्याशास्माकं । ये हि नाम वयं स्वविकल्पविकल्पितातिकठिनकुदर्शनमालुता[3]लताजालावबद्धेषु निर्वाणपुरगाम्यविपरीतमार्गगमनपरिभ्रष्टेषु अनतिक्रान्तसंसाराटवीकान्ता[136 a]रदुर्गेषु कणभक्षाक्षपाददिगम्बरजैमिनिनैयायिकप्रभृतिषु तीर्थकरेष्वविपरीतस्वर्गापवर्गमार्गोपदेशाभिमानिषु स्पृहां परित्यज्य । निरवशेषान्यतीर्थ्यमतान्धकारोपघातकं स्वर्गापवर्गानुगाम्यविपरीतमार्गसंप्रकाशकं सद्धर्मदेशनातिपटुतरकिरणव्याप्ताशेषाशामुखं[4] विविधविनेयजनमतिकमलकुड्मल[5]विबोधनतत्परं [Tib. 164 b] यथावदवस्थितपदार्थतत्त्वार्थ[6]भाजना[ना]ममलैकचक्षुर्भूतं[7] सकलजगच्छरणभूत-

---

1) དེ་ལྟར་ཉེར་བླངས་ཉེར་ལེན་པོ། རྣམ་པ་ཀུན་གྱིས་སྟོང་པ་ཡིན། སྟོང་པས་དེ་བཞིན་གཤེགས་སྟོང་པ། ཇི་ལྟ་བུར་ན་འདོགས་པར་འགྱུར.

2) Mss. *ahesitabhava ārhato praty°*, *ahesitavabhavabhavannārhato.* — ཨེ་མ་མ་ལ་ ཁོ་བོ་ཅག་གི་ རེ་ཐག་ བཅད་དོ།

3) Mss. *°mārutā°*. — P. W. corrige *mālulatā*, mais voyez Lalita, Lefm. 212. 17 (259. 2).

4) ཕྱོགས་ཀྱི་ངོས་.

5) པདྨའི་ཚོགས་ ཁ་འབྱེད་པ་ — *kuḍmala*, comme substantif, marqué de l'astérisque dans P. W.[2]; mais voir Mon. Williams. — *kuḍmalāy*, se fermer, en parlant des yeux.

6) *artha* est représenté par བསྟན་པ་.

7) Mss *°bhājanāmamalaukacakṣur* སྣོད་དུ་ གྱུར་པ་རྣམས་ཀྱི་ དྲི་མ་མེད་པའི་ མིག་ གཅིག་པུར་ གྱུར་པ།

मद्वितीयं[1] दशबलवैशारद्यावेणिकबुद्धधर्मामलमण्डलं[2] महायानमहानयसारथिवरं सप्तबोध्यङ्गोत्तुङ्गतुरंगपदातियोजितं सकलत्रिभुवनजनजातिजरामरणसंसारकान्तारसरिदुच्छोषणतत्परं चतुरसम[3]मारारातिसमरशरसंपातविजयिनं सकलजगदसद्ग्राहराहुग्रहविग्रहोद्ग्रहनिरासिनं तथागतसवितारमज्ञानघनगहनान्धकारनिराकरणाय मोक्षार्थिनो ऽनुत्तरसम्यक्संबोध्यर्थिनः शरणं प्रतिपन्नाः । तस्य च त्वया

एवं शून्यमुपादानमुपदाता च सर्वशः ।
प्रज्ञप्यते च शून्येन कथं शून्यस्तथागतः ॥

इत्यादिना स्वभावतोऽसत्त्वं ब्रुवता भवता कृतास्माकं मोक्षप्रत्याशा[4]नुत्तरसम्यक्संबोध्यागमाभिलाष इति[4)] । [(5]तदलं भवता तथागतमहादित्यप्रच्छादकेनाकालिकघनघनावलीविसरेण[6] जगदन्धकारोपमेनेति[5)] ॥

उच्यते । अस्माकमेव कृता प्रत्याशा भवद्विधेष्वबुधजनेषु ये हि [136b] नाम भवन्तो मोक्षकामतयान्यतीर्थ्यमतानि परित्यज्य भगवन्तं तथागतमप्यविपरीतं परमशास्तारं प्रतिपद्य परमगम्भीरमनुत्तरं सर्वतीर्थ्यवादासाधारणं नैरात्म्यसिंहनादं[7]मसहमानाः कुर-

---

1) ཟླ་མེད་པ = *apratisama.*

2) Le tibétain abrège: °*maṇḍalaṃ mokṣārthinaḥ çaraṇaṃ pratipannāḥ.*

3) *asama* manque dans un passage parallèle, Chap. XXIII *initio.* — Les quatre *Māras*, ci-dessus 49, n. 4. — Ajouter les références Dh.-s., LXXX; Nāmasaṃgītiṭ. VI. 11 (52); Bodhic. p. 418. 15 (*caturmārajayāj jino bhagavān*).

4—4) Manque dans le tibétain.

5—5) Le tibétain diverge དེ་ཕྱིར་ དེ་བཞིན་གཤེགས་པའི་ རྗེ་སྨན་ ཆེན་པོའི་ ལྗོན་ཤིང་ རྩད་ནས་ འདོན་པ་ ཁྱོད་ དང་ བརྩད་པས་ ཆོག་གོ། *tad alaṃ bhavatā tathāgatamahābhaiṣajyavṛkṣaṃ nirmūlayatā sārdhaṃ vivādena.*

6) Cambr. °*dānaghana*°. — Mss. *vis(ç)araṇeva.*

7) Comp. Bodhic. p. IX. 34 (417. 6) *yaḥ pratītyasamutpādaḥ çūnyatā saiva te matā | bhāvaḥ svatantro nāstīti siṃhanādas tavātulaḥ.* — On connait le rugissement de la nativité *kṣīṇā me jātiḥ...* (Mhv. I. 454); le Laṅka l'appelle un *samyaksiṃhanāda* et le met dans la bouche du fidèle qui obtient le *çrāva-*

द्रुमा इव स्वाधिमुक्तिदरिद्रतया[1] विविधकुदृष्टिव्यालमालाकुलं[2] विपर्यस्तजनानुयातं[3] तमेव महाघोरसंसाराटवीकान्तारचारकानुगमार्गमवगाहन्ते ॥ न हि तथागताः कदा चिदप्यात्मनः स्कन्धानां वास्तित्वं प्रज्ञपयन्ति ॥

यथोक्तं भगवत्यां[4] । बुद्धो ऽप्यायुष्मन् सुभूते मायोपमः स्वप्नोपमो बुद्धधर्मा अप्यायुष्मन् सुभूते मायोपमाः स्वप्नोपमा इति ।

तथा[5] ।

धर्म स्वभावतु शून्य विविक्तो
बोधि स्वभावतु शून्य विविक्ता
यो हि चरेत्स पि शून्यस्वभावो
ज्ञानवतो न तु बालजनस्य ॥ इति ॥

न च वयं सर्वथैव निःप्रपञ्चानां तथागतानां नास्तित्वं ब्रूमो यदस्माकं तदपवादकृतो दोषः स्यात् [Tib. 165a] । अपि[6] च निःस्वभावं हि तथागतं व्याचक्षाणेनाविपरीतार्थाभिधित्सुना[7] [8]योगिना सता सर्वथा[8]

---

kayānābhisamayagotra (B. T. S. p. 66). — Digne d'être noté l'emploi du mot Aṣṭ. Prajñāp. p. 479. 19: *rūpam siṃhanādasamam.* — Sources palies, Rhys Davids, Dialogues, p. 208, Aṅg. N. I. 187, II. 33, etc.

1) རང་གི་ ལྷག་པར་མོས་པས་ བཀྲེན་པ་ཉིད་.

2) Sic Mss. Le tibétain porte simplement དགུགས་པ་.

3) Mss. *anujātam.* — བསྒྲོད་པ་.

4) Voir la citation à la fin du chapitre.

5) Cette citation manque dans le tibétain — Pour le mètre *dharma sabhāvatu.*

6) = གཞན་ཡང་.

7) Mss. *abhiditsunā.*

8—8) Non représenté dans le tibétain.

[शून्यमिति न वक्तव्यम]शून्यमिति वा भवेत्।
उभयं नोभयं चेति।

सर्वमेतन्न वक्तव्यमस्माभिः ॥ किं त्वनुक्ते(1) यथावदवस्थितं स्वभावं प्रतिपत्ता प्रतिपत्तुं(2) न समर्थ इति। अतो वयमप्यारोपतो व्यवहारसत्य एव स्थित्वा व्यवहारार्थं विनेयजनानुरोधेन शून्यमित्यपि ब्रूमः। अशून्यमित्यपि शून्याशून्यमित्यपि नैव शून्यं नाशून्यमित्यपि ब्रूमः। अत एवाह।

प्रज्ञप्त्यर्थं तु कथ्यते ॥(3) इति। ११

यथोक्तं भगवता(4)। शून्याः सर्वधर्मा निःस्वभा[137a]वयोगेन। निर्निमित्ताः सर्वधर्मा निर्निमित्ततामुपादाय। [अ]प्रणिहिताः सर्वधर्मा [अ]प्रणिधानयोगेन। प्रकृतिप्रभास्वराः सर्वधर्माः प्रज्ञापारमितापरिशुद्ध्येति ॥

अन्यत्राशून्यमुक्तं(5)। अतीतं चेद्भिक्षवो रूपं नाभविष्यन्न श्रुतवानार्यश्रावकोऽतीतं रूपमभ्यनन्दिष्यत्। यस्मात्तर्हि भिक्षवोऽस्त्यतीतं रूपं तस्मादार्यश्रावकः श्रुतवानतीतं रूपमभिनन्दतीति। अनागतं चेद्भिक्षवो रूपमित्यादि। एवं यावदतीतं चेद्भिक्षवो विज्ञानं नाभविष्यदिति पूर्ववत् ॥

तथा सौत्रान्तिकमते ऽतीतानागतं शून्यमन्यदशून्यं। विप्रयुक्ता विज्ञप्तिः शून्या ॥

---

1) Mss. *kiṃ bhūktam* = *kiṃ tūktam*; mais le tibétain འོན་ཀྱང་ མ་ བརྗོད་ན.

2) Mss. *pratipattur.* D'après le tibétain *pratipattāraḥ pratipattuṃ na samarthāḥ*.

3) སྟོང་ངོ་ ཞེས་ དེ་ མི་ བརྗོད་དེ། མི་ སྟོང་ ཞེས་ ཀྱང་ མི་ བྱ་ ཞིང་། གཉིས་ དང་ གཉིས་ མིན་ མི་ བྱ་སྟེ། གདགས་པའི་ དོན་དུ་ བརྗོད་པར་ བྱ།

4) Le tibétain omet toutes les citations jusque: *yena tv abhiprāyeṇa* (445 l. 5).

5) Ce texte est cité Abhidh. k. v. 357 a—b par les partisans du Sarvāstivāda. — Voir ci-dessous ad XXV. 3.

विज्ञानवादेऽपि कल्पितस्वभावस्य शून्यत्वमप्रतीत्यसमुत्पन्नत्वात् । तैमिरिकद्विचन्द्रादिदर्शनवत् ।

न शून्यं नापि चाशून्यं तस्मात्सर्वं विधीयते ।
* * सत्त्वादसत्त्वाच्च मध्यमा प्रतिपच्च सा ॥ इति[1] ।

येन त्वभिप्रायेण शून्यत्वादिकमुपदिश्यते स आत्मपरीक्षातो[2] बोद्धव्यः ॥

यथोक्तं सूत्रे ।

मायोपमं जगदिदं भवता[3]
नटरङ्ग[4]स्वप्नसदृशं विहितं ।
नात्मा [न] सत्त्व न च जीवगती
धर्मा मरीचिदकचन्द्रसमाः ॥
शून्यं च शान्तमनुपादमयं
अविज्ञानदेव जगद्भ्रमतो ।
तेषामुपायनययुक्तिशतै-
रवतारयस्यपि कृपालुतया[5] ॥
रागादिभिश्च बहुरोगशतैः
संत्रासितं सततमी[ि]त जगत् ।
वैद्योपमो विचरसेऽप्रतिमो
परिमोचयं सुगत सत्त्वशतान् ॥

---

1) Les deux premiers pādas de cette stance sont cités dans Daçabhūmikrame Çuklavidarçanā (Bendall's fragments, IV. 6. a) comme extraits du Madhyāntavi[bhāga] ou °vibhaṅga. Sur ce *çāstra* de Maitreya, voir Tāranātha p. 123, n. 3, p. 317[7]; Th. de Stcherbatskoi, La littérature Yogācāra d'après Bouston (Muséon, 1905, p. 146) et diverses citations Nāmasaṃg. ṭ. 43 et 132.

2) Chapitre XVIII.

3) Mss. *bhagavatā*.

4) *sv* ne fait pas position.

5) Le tibétain omet les deux stances qui suivent.

रथचक्रवद्भ्रमति [137b] सर्वजगत्
तिर्यन्तु प्रेतनिरयेषु गताः ।
मूढा अदेशिक अनाथगताः
तेषां प्रदर्शयसि मार्गवरं ॥ इति ॥

सर्वास्त्वेताः कल्पना निष्प्रपञ्चे तथागते न संभवन्ति । न च केवलं शून्यत्वादिकमेव चतुष्टयं तथागते न संभवति ' अपि च

<u>शाश्वताशाश्वताद्यत्र कुतः शान्ते चतुष्टयं ।</u>
<u>अन्तानन्तादि चाप्यत्र कुतः शान्ते चतुष्टयं</u>[1] ॥ १२

इह चतुर्दशाव्याकृतवस्तूनि भगवता निर्दिष्टानि । तद्यथा । शाश्वतो लोकः ' अशाश्वतो [Tib. 165b] लोकः ' शाश्वतश्चाशाश्वतश्च लोकः ' नैव शाश्वतो नाशाश्वतश्च लोक इति चतुष्टयं । अन्तवान् लोकः ' अनन्तवान् लोकः । अन्तवांश्चानन्तवांश्च लोकः ' नैवान्तवान् नानन्तवांश्च लोक इति द्वितीयं । भवति[2] तथागतः परं मरणान्न भवति तथागतः परं मरणाद्भवति च न भवति च तथागतः परं मरणान्नैव भवति न न भवति च तथागतः परं मरणादिति तृतीयं । स जीवस्तच्छरीरमन्यो जीवोऽन्यच्छरीरमिति ॥

तान्येतानि चतुर्दश वस्तून्यव्याकृतत्वादव्याकृतवस्तूनीत्युच्यन्ते[3] ॥ तत्र यथोपवर्णितेन न्यायेन यथा शून्यत्वादिकं चतुष्टयं प्रकृत्या शान्ते निःस्वभावे तथागते न संभवति । एवं शाश्वताशाश्वतादिकमपि चतुष्टयमत्र न संभवति । असंभवादेव च चतुष्टयं वन्ध्यापु-

---

1) རྟག་ དང་ མི་རྟག་ལ་ སོགས་ པའི། ཞི་བ་ འདི་ལ་ ག་ལ་ ཡོད། མཐའ་ དང་ མཐའ་མེད་ལ་ སོགས་ པའི། ཞི་བ་ འདི་ལ་ ག་ལ་ ཡོད།

2) དེ་བཞིན་གཤེགས་པ་ གྲོངས་ པན་ཆད་ ཡོད་དོ་

3) Voir **Abhidh. k. v.** 355a 4: ***yaḥ sthāpanīyatvena na vyākṛto na kathitaḥ so 'vyākṛtapraçnas; tasya vastv adhiṣṭhānam ity avyākṛtavastu.***

त्वस्य श्यामगौरत्वादिवन्न व्याकृतं भगवता लोकस्य । यथा चैतच्चतुष्टयं तथागते न संभव-[138 a]ति ' एवमन्तानन्तादिकमपि शान्ते तथागते न संभवति ॥

इदानीं भवति तथागतः परं मरणादित्यादिकस्यापि कल्पनाचतुष्टयस्य प्रवृत्त्यसंभवमुद्भावयन्नाह ।

येन ग्राहो गृहीतस्तु घनोऽस्तीति तथागतः ।
नास्तीति स विकल्पयन् निर्वृतस्यापि कल्पयेत्[1] ॥ १३

येन हि घनतरो[2] महताभिनिवेशेनास्ति तथा[Tib. 166 a]गत इति ग्राहो गृहीतः परिकल्प उत्पादितः । स नियतं परिनिर्वृते तथागते न भवति तथागतः परं मरणान्मरणादुत्तरकालं न भवत्युच्छिन्नस्तथागतो न संविद्यत इति परिकल्पयेत् । तस्यैवं विकल्पयतः स्याद्दृष्टिकृतं[3] ॥ यस्य तु न कस्यां चिदप्यवस्थायां स्वभावशून्यत्वात्तथागतस्यास्तित्वनास्तित्वं ' तस्य पक्षे

स्वभावतश्च शून्येऽस्मिंश्चिन्ता नैवोपपद्यते ।
परं निरोधाद्भवति बुद्धो न भवतीति वा[4] ॥ १४

आकाशे चित्ररूपकल्पनावदेषा कल्पना नास्तीत्यभिप्रायः ॥ तदेवं प्रकृति-

---

1) གང་གིས་ དེ་བཞིན་གཤེགས་ ཡོད་ ཅེས། འཛིན་པ་ སྟུག་པོ་ གཟུང་ གྱུར་པ། དེ་ ནི་ མྱ་ངན་འདས་པ་ལ། མེད་ ཅེས་ རྣམ་རྟོག་ རྟོག་པར་ བྱེད། — Notre xylographe a *stug-pos*. — Les Mss. portent: .... *gṛhītas tu yenāstīti tathāgataḥ / nāstīti vā vikalpayan.*

2) Non représenté dans la version tibétaine.

3) དེ་ལྟར་ རྟོག་པ་ དེ་ལ་ ལྟ་བར་ བྱས་པར་ འགྱུར་རོ། — M. Vyut. 205. 11.

4) རང་བཞིན་གྱིས་ ནི་ སྟོང་ དེ་ལ། སངས་རྒྱས་ མྱ་ངན་འདས་ནས་ ནི། ཡོད་དོ་ ཞེ་འམ་ མེད་དོ་ ཞེས། བསམ་པ་ འཐད་པ་ ཉིད་ མི་ འགྱུར། C'est à dire *paraṃ nirvāṇād* .., malgré les Mss. *paraṃ nirodhād*... .

शान्ते निःस्वभावे तथागते सर्वप्रपञ्चातीते मन्दबुद्धितया शाश्वताशाश्वतादिकया नित्यानित्यास्तिनास्तिशून्याशून्यसर्वज्ञासर्वज्ञादिकया कल्पनया

प्रपञ्चयन्ति ये बुद्धं प्रपञ्चातीतमव्ययं ।
ते प्रपञ्चहताः सर्वे न पश्यन्ति तथागतं[1] ॥ १५

वस्तुनिबन्धना हि प्रपञ्चाः स्युरवस्तुकश्च तथागतः । कुतः प्रपञ्चानां प्रवृ[138b]त्तिसंभव इति । अतः प्रपञ्चातीतस्तथागतः । अनुत्पादस्वभावाच्च स्वभावान्तरागमनादव्ययः ॥ तमित्थंविधं तथागतं स्वोत्प्रेक्षितमिथ्यापरिकल्पमलमलिनमानसतया विविधैरभूतैः परिकल्पविशेषैर्ये [Tib. 166b] बुद्धं भगवन्तं प्रपञ्चयन्ति । ते स्वकैरेव प्रपञ्चैर्हताः सन्तस्तथागतगुणसमृद्धेरत्यन्तपरोक्षवर्तिनो भवन्ति । ततश्च शवभूता एतस्मिन् प्रवचने न पश्यन्ति तथागतं जात्यन्धा इवादित्यं ।

अत एवाह भगवान्[2] ।

ये मां रूपेण अद्राक्षुर्ये मां घोषेण अन्वयुः ।
मिथ्याप्रहाणप्रसृता [न] मां द्रक्ष्यन्ति ते जनाः ॥
धर्मतो बुद्धा द्रष्टव्या धर्मकाया हि नायकाः ।
धर्मता चाप्यविज्ञेया न सा शक्या विजानितुं ॥ इति ॥

तदत्र तथागतपरीक्षायां सत्त्वलोकः सकलः ससुरासुरनरादिः परीक्षितः । यथा चायं सत्त्वलोको निःस्वभावस्तथा भाजन[3]लोकस्यापि वायुमण्डलादेरकनिष्ठवितानभवनपर्यन्तस्य नैःस्वाभाव्यमुद्भावयन्नाह ।

तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत् ।

---

1) གང་དག་ སངས་རྒྱས་ སྤྲོས་ འདས་ མེད་། ཟད་པ་མེད་ལ་ སྤྲོ་ བྱེད་པ། སྤྲོས་པས་ ཉམས་པ་ དེ་ ཀུན་གྱིས། དེ་བཞིན་གཤེགས་པ་ མཐོང་ མི་འགྱུར།

2) Voir Vajracchedikā, p. 43; Bodhicaryāvatārap. 421. 10; J. R. A. S. 1906, p. 948.

3) Voir ci-dessus 371. 1.

इदं जगदित्ययं भाजनलोक इत्यर्थः ॥ किंस्वभावस्तथागतः पुनरित्याह ।

तथागतो [निःस्वभावो] निःस्वभावमिदं जगत् ॥ इति[1] । १६

यथा च जगतो नैःस्वभाव्यं तथा प्रत्ययपरीक्षादिभिः[2] प्रतिपादितं ॥

अत एवोक्तं सूत्रे ।

अनुपादधर्मः सततं तथागतः
सर्वे च धर्माः सुगतेन सादृशाः ।
निमित्तग्राहेण तु बालबुद्धयः
असत्सु धर्मेषु चरन्ति लोके ॥
[3]तथागतो हि प्रतिबिम्बभूतः
कुशलस्य धर्मस्य अनास्रवस्य ।
नैवात्र तथता न तथागतोऽस्ति
बि[139a]म्बं च संदृश्यति सर्वलोके ॥ इति ॥

उक्तं भगवत्यां प्रज्ञापारमितायां ।[4] अथ खलु ते देवपुत्रा आयुष्मन्तं सुभूतिं स्थविरमेतदवोचन् । किं पुनरार्यसुभूते [Tib. 167a] मायोपमास्ते सत्त्वा न ते माया ॥ एवमुक्त आयुष्मान् सुभूतिस्तान् देवपुत्रानेतदवोचत् । मायोपमास्ते देवपुत्राः सत्त्वाः स्वप्नोपमास्ते देवपुत्राः सत्त्वा इति हि माया च सत्त्वाश्चाद्वयमेतदद्वैधीकारं । इति हि स्वप्नश्च सत्त्वाश्चाद्वयमेतदद्वैधीकारं । सर्वधर्मा अपि देवपुत्रा मायोपमाः स्वप्नोपमाः । स्रोतआपन्नोऽपि मायोपमः स्वप्नोपमः । स्रोतआपत्तिफलमपि मायोपमं स्वप्नोपमं । एवं सकृदागाम्यपि सकृदागा-

1) དེ་བཞིན་གཤེགས་པའི་ རང་བཞིན་ གང་། དེ་ ནི་ འགྲོ་ འདིའི་ རང་བཞིན་ ཡིན། དེ་བཞིན་གཤེགས་པ་ རང་བཞིན་ མེད། འགྲོ་བ་ འདི་ཡི་ རང་བཞིན་ མེད།

2) Dans le premier chapitre et les suivants.

3) Cette stance est citée ci-dessous ad XXV. 24.

4) Voir Aṣṭ. prajñāp. 39. 12; Bodhicaryāv. 379. 5. — Quelques variantes.

मिफलमपि । अनागाम्यपि अनागामिफलमपि । अर्हत्वपि मायोपमः स्वप्नोपमः । अर्हत्वफलमपि मायोपमं स्वप्नोपमं । प्रत्येकबुद्धोऽपि मायोपमः स्वप्नोपमः । प्रत्येकबुद्धत्वमपि मायोपमं स्वप्नोपमं । सम्यक्संबुद्धोऽपि मायोपमः स्वप्नोपम इति सम्यक्संबुद्धत्वमपि मायोपमं स्वप्नोपममिति वदामि ॥ अथ खलु देवपुत्रा आयुष्मन्तं सुभूतिमेतदवोचन् । सम्यक्संबुद्धोऽपि मायोपमः स्वप्नोपम इति सम्यक्संबुद्धत्वमपि मायोपमं स्वप्नोपममिति (1) स आर्यसुभूते वदसि ॥ सुभूतिराह । निर्वाणमपि देवपुत्रा मायोपमं स्वप्नोपममिति वदामि किं पुनरन्यं धर्मं ॥ देवपुत्रा आहुः । निर्वाणमप्यार्यसुभूते मायोपमं स्वप्नोपममिति वदसि ॥ सुभूतिराह । यद्यपि देवपुत्रा निर्वाणाद[Tib. 167b]प्यन्यः कश्चिद्धर्मो विशिष्टतरः [139b] स्यात्तमप्यहं मायोपमं स्वप्नोपममिति वदेयमिति हि माया (2) च निर्वाणं चाद्वयमेतदद्वैधीकारमिति ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ तथागतपरीक्षा नाम द्वाविंशतितमं प्रकरणं ॥

---

1) Manque dans le tibétain et dans Aṣṭ prajñāp

2) D'après le tibétain; Mss. *māyopamasvapnaç ca nirvāṇaṃ ca*...; Aṣṭ. prajñāp. *māyā ca nirvāṇaṃ cādvayam* ....; *svapnaç ca nirvāṇaṃ cādvayam*...

XXIII.

विपर्यासपरीक्षा नाम त्रयोविंशतितमं प्रकरणं

अत्राह । विद्यत एव [भव]संततिस्तत्कारणसद्भावात् । इह हि क्लेशेभ्यः कर्म प्रवर्तते । कर्मक्लेशहेतुका जन्ममरणपरंपरोपजायते । सा च भवसंततिर्व्यपदिश्यते (1) । तस्याश्च प्रधानं कारणं क्लेशाः प्रहीणक्लेशानां भवसंततेरभावात् ' ते च रागादयः क्लेशाः सन्ति ' तस्मात्कार्यभूतापि जन्ममरणपरंपराविच्छेदप्रबन्धेन भवसंततिरपि भविष्यतीति ॥ उच्यते । स्याद्भवसंततिर्यदि तद्धेतुभूताः क्लेशाः स्युः । न तु सन्ति । कथं कृत्वा । इह भगवद्भिर्बुद्धैः (2 सकलत्रिभुवनजनसंक्लेशशत्रुविध्वंसिभिश्चतुर्माराराातिसमरपराजयैः 2) ।

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते ।
शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य हि (3) ॥ १

संकल्पो वितर्कः (4) ' संकल्पात्प्रभवतीति संकल्पप्रभवः ।

काम जानामि ते मूलं संकल्पात्किल जायसे ।
(5 न त्वां संकल्पयिष्यामि ततो मे न भविष्यसि 5) ॥

इति गाथाभिधानात् ।

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते ।

---

1) Et cette *paramparā* est ce qu'on appelle *bhavasaṃtati*.

2—2) Manque dans le tibétain.

3) འདོད་ཆགས་ ཞེ་སྡང་ གཏི་མུག་རྣམས། ཀུན་ཏུ་རྟོག་ལས་ འབྱུང་བར་གསུངས། སྡུག་ དང་ མི་སྡུག་ ཕྱིན་ཅི་ལོག །བརྟེན་པ་ཉིད་ལས་ ཀུན་ཏུ་འབྱུང་། — Voir ci-dessus ad XVIII. 5. 4) = རྟོག་པ་.

5—5) Manque dans le tibétain. — Voir ci-dessus 350. 11, Mhv. III. 190. 8, Jat. V. 450. 8. (Note de M. R. O. Franke).

एतन्मूलकत्वादन्येषां क्लेशानां मुख्यत्वादेषामेवोपादानं त्रयाणां [Tib. 168a]। एते च त्रयः क्लेशाः

शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य हि ॥

तत्र हि शुभमाकारं प्रतीत्य राग उत्पद्यते। अशुभं प्रतीत्य द्वेषः। विपर्यासान्(1) प्रतीत्य मोह उत्प[140a]द्यते। संकल्पस्त्वेषां त्रयाणामपि साधारणकारणमुत्पत्तौ ॥

कथं पुनर्मोहः(2) संकल्पप्रभव[ः।] उच्यते। उक्तं हि प्रतीत्यसमुत्पादे(3) भ[ग]वता। अविद्यापि भिक्षवः सहेतुका सप्रत्यया सनिदाना(4)। कश्च भिक्षवोऽविद्याया हेतुः। अयोनिशो(5) भिक्षवो मनस्कारोऽविद्याया हेतुः(6)। आविलो मोहजो मनस्कारो भिक्षवोऽविद्याया हेतुरित्यतोऽविद्या संकल्पप्रभवा भवति ॥ ततश्च।

---

1) Le tibétain ne marque pas le pluriel.

2) Mss. *puna mehiḥ*.

3) Il semble que ce passage soit extrait, non du Pratītyasamutpādasūtra, mais d'un 'autre sūtra'. — Voir p. 6, n. 3 et aussi Abhidh. k. v 227b: *ayoniçomanaskārahetukāvidyoktā sūtrāntara iti* Sahetusapratyayasanidānasūtre. *katham? avidyā bhikṣavaḥ sahetukā sapratyayā sanidānā kaç ca bhikṣavo 'vidyāyā hetuḥ, kaḥ pratyayaḥ, kiṃ nidānam? avidyāyā bhikṣavo 'yoniçomanaskāro hetur, ayoniçomanaskaraḥ pratyayo, 'yoniçomanaskāro nidānam iti sūtravacanāt.— avidyāhetukaç cāyoniçomanaskāra iti sūtrāntara ukta ity adhikṛtam: cakṣuḥ pratītya rūpāṇi cotpadyata āvilo manaskāro mohaja iti sūtravacanāt kim arthaṃ tasyehāvacanam? kathaṃ nāṅgāntaraṃ bhavatīty āha. sa cehāpy upādānāntarbhūtatvād ukto bhavatīti sa ity āvilo manaskāraḥ iheti* Pratītyasamutpādasūtre. *katham ukta: upādānāntarbhūtatvāt. tatra cāyoniçomanaskāro viparītacetasa ābhogo 'ntarbhūta ity ukto bhavaty, ato nāsty ahetūkatvam avidyāyāḥ; na cāṅgāntaram upasaṃkhyātavyam.*

L'auteur nie, contre Vasubandhu, que le *ayoniçomanaskāra* (= *āvilo manaskāra*) rentre dans la catégorie *upādāna*. Et quand ce serait! *asambhavantam apy antarbhāvam abhyupetya brūmaḥ: katham ayoniçomanaskāro hetur avidyāyā iti vijñapitam bhavati? na hi tathā sūtre vacanam asti.*

4) Tibétain = *sanidānā sapratyayā*.

5) ཚུལ་བཞིན་མ་ཡིན་པ་.

6) D'après le tibétain: *kaç ca bhikṣavo 'vidyāyā hetuḥ? ayoniço manaskāra iti tathāvilo manaskāro mohaja iti. ato 'vidyāpi saṃkalpaprabhavā bhavati*

शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य ये ।
ते स्वभावान्न विद्यन्ते तस्मात्क्लेशा न तत्त्वतः ॥ इति[1] । २

यदि रागादयः स्वभावसिद्धाः स्युः, नैव ते शुभाशुभविपर्यासान् प्रतीत्य संभवेयुः स्वभावस्याकृत्रिमत्वात्परनिरपेक्षत्वाच्च, भवन्ति च शुभाशुभविपर्यासान् प्रतीत्य । तस्मान्निःस्वभावा एव ते तत्त्वतो न विद्यन्ते । परमार्थतः स्वभावतो न विद्यन्त इत्यर्थः ॥

अपि च ।

आत्मनोऽस्तित्वनास्तित्वे न कथंचिच्च सिध्यतः ।
तं विनास्तित्वनास्तित्वे क्लेशानां सिध्यतः कथं[2] ॥ ३

आत्मनो यथास्तित्वनास्तित्वे न स्तस्तथोक्तं विस्तरेण, ततश्च [Tib. 168b] तदाश्रितस्य धर्मस्य कुतोऽस्तित्वनास्तित्वे भविष्यतः ॥

अथ स्याद्यद्यस्तित्वनास्तित्वे आत्मनो न स्तः, तदा किमत्र क्लेशानामायातं यतस्तेषामप्यस्तित्वनास्तित्वे न स्त इति ॥ उच्यते ।

कस्य चिद्धि भवन्तीमे क्लेशाः स च न सिध्यति ।
कश्चिदाहो विना कं चित्सन्ति क्लेशा न कस्य चित्[3] ॥ ४

---

1) གང་དག་ སྡུག་ དང་ མི་སྡུག་ དང་། ཕྱིན་ཅི་ལོག་ལ་ བརྟེན་ འབྱུང་བ། དེ་དག་ རང་བཞིན་ལས་ མེད་དེ། དེ་ཕྱིར་ ཉོན་མོངས་ ཡང་དག་ མེད།

2) བདག་གི་ ཡོད་ཉིད་ མེད་ཉིད་ ནི། ཇི་ལྟ་བུར་ ཡང་ འགྲུབ་པ་ མེད། དེ་ མེད་ ཉོན་མོངས་རྣམས་ཀྱི་ ནི། ཡོད་ཉིད་ མེད་ཉིད་ ཇི་ལྟར་ འགྲུབ།

3) ཉོན་མོངས་ དེ་དག་ གང་གི་ ཡིན། དེ་ ཡང་ གྲུབ་པ་ ཡོད་ མ་ཡིན། འགའ་ མེད་པར་ ནི་ གང་གི་ ཡང་། ཉོན་མོངས་པ་དག་ ཡོད་ མ་ཡིན། — L'édition des Kārikās (Mdo XVII) porte au troisième pāda: གང་མེད་པར་ནི''' — «Les passions sont de quelqu'un; or ce quelqu'un n'existe pas... .».

इहामी रागादयः कुड्यं चित्रवत्फलं पक्वतादिवच्चोत्पत्तावाश्रयमपे[140b]क्षन्ते । ततश्च कस्य चिदेते भवन्ति ' न विना कं चिदाश्रयं । स चाश्रयः परिकल्प्यमान आत्मा वा चित्तं वा भवेत् । स चैषामाश्रयः पूर्वमेव प्रतिषिद्धत्वान्नास्ति । तं च कं चिदाश्रयं विना कस्य क्लेशा भवन्तु । नैव कस्य चिद्भवन्ति तस्याविद्यमानत्वादित्याहो विना कं चित्सन्ति क्लेशा न कस्य चित् ॥

अत्राह । नैव हि क्लेशानां कश्चिदाश्रयः पूर्वं सिद्धोऽभ्युपगम्यते ' न चात्मा नाम कश्चिदस्ति य आश्रयत्वेन व्यवस्थाप्येत निर्हेतुकत्वाद्व्योमचूतलतावत् । किं तर्हि ' क्लिष्टं चित्तं प्रतीत्य क्लेशा उपजायन्ते ' तच्च चित्तं सहैव क्लेशैरुपजायत इति ॥ एतदपि न युक्तमित्याह ।

स्वकायदृष्टिवत्क्लेशाः क्लिष्टे सन्ति न पञ्चधा ।
स्वकायदृष्टिवत्क्लिष्टं क्लेशेष्वपि न पञ्चधा[1] ॥ ५

स्वकायो हि नाम[2] रूपादिलक्षणसंहातः । स्वकायदृष्टिः स्वकाय आत्मदृष्टिरात्मायाकारग्रहणप्रवृत्ता[3] ॥ ययेयं [Tib. 169a] पञ्चधा विचार्यमाणा स्वकाये न संभवति

स्कन्धा न नान्यः स्कन्धेभ्यो नास्मिन् स्कन्धा न तेषु सः ।
तथागतः स्कन्धवान्न कतमोऽत्र तथागतः ॥

---

1) རང་ལུས་ལྟ་བཞིན་ཉོན་མོངས་རྣམས། ཉོན་མོངས་ཅན་ལ་རྣམ་ལྔར་མེད། རང་ལུས་ལྟ་བཞིན་ཉོན་མོངས་ཅན། ཉོན་མོངས་པ་ལ་རྣམ་ལྔར་མེད། — Pour la variante *svakāya*, *satkāya*, voir Çikṣās., 289. 4 et Buddhist Psychology, 257, n. 2. On a *satkāyadṛṣṭi* = འཇིག་ཚོགས་ལ་ལྟ་བ་.

2) རང་ལུས་ཞེས་བྱ་བ་དེ་གཟུགས་ལ་སོགས་པའི་མཚན་ཉིད་ཀྱི་ཚོགས་སོ། *saṃhāta* = *saṃghāta*.

3) Mss. *svakāyarātmadṛṣṭir ātmīya°*, *svakāyadṛṣṭir ātmīya°*. — D'après le tibetain: *svakāye dṛṣṭiḥ svakāyadṛṣṭir ātmātmīyākāra°*.

इत्यनेन[1] ॥ एवं क्लिष्टे ऽपि क्लेशा विचार्यमाणाः पञ्चधा न संभवन्ति । तत्र क्लिश्नन्तीति क्लेशाः क्लिश्यत इति क्लिष्टं । तत्र यदेव क्लिष्टं तदेव क्लेशा इति न युज्यते दग्धृदाह्ययोरप्येकत्वप्रसङ्गात् । अन्यत्क्लिष्टमन्ये क्लेशा इति न युज्यते । परत्रनिरपेक्षत्वादक्लिष्टहेतुकक्लेशप्रसङ्गात् ॥ अत एव चैकत्वान्यत्वाभावादाधाराधेयतद्वत्पक्षाणां चाभावान्न क्लेशेषु क्लिष्टं । न क्लिष्टे क्लेशाः । ना[141 a]पि क्लेशवत्क्लिष्टमित्येवं क्लिष्टे पञ्चधा विचार्यमाणाः क्लेशा न संभवन्ति ॥

यथा च क्लिष्टहेतुकाः क्लेशा न संभवन्ति । एवं क्लेशहेतुकमपि क्लिष्टं क्लेशेषु विचार्यमाणं पञ्चधा न संभवति । न हि क्लेशा एव क्लिष्टं कर्तृकर्मणोरेकत्वप्रसङ्गात् नान्ये क्लेशा अन्यत्क्लिष्टं निरपेक्षत्वप्रसङ्गात् । न च क्लिष्टे क्लेशा न च क्लेशेषु [Tib. 169 b] क्लिष्टं । न क्लिष्टवन्तः क्लेशा इत्येवं स्वकायदृष्टिवदेव क्लिष्टं क्लेशेष्वपि पञ्चधा नास्ति । यतश्चैवमतः परस्परापेक्षयापि क्लेशक्लिष्टयोर्नास्ति सिद्धिः ॥

अत्राह । यद्यपि त्वया क्लेशाः प्रतिषिद्धास्तथापि क्लेशहेतवः शुभाशुभविपर्यासास्तावत्सन्ति । तत्सद्भावाच्च क्लेशाः सन्तीति ॥ उच्यते । स्युः क्लेशा यदि शुभाशुभविपर्यासा एव स्युर्यावतैतेऽपि[2]

स्वभावतो न विद्यन्ते शुभाशुभविपर्ययाः ।

प्रतीत्यसमुत्पन्नत्वाद्वक्ष्यमाणप्रतिषेधाच्च । यदा च ते न सन्ति स्वभावतस्तदा

प्रतीत्य कतमान् क्लेशाः शुभाशुभविपर्ययान्[3] ॥ ६

नैव सन्ति क्लेशास्तद्धेतुशुभाशुभविपर्ययाभावादित्यभिप्रायः ॥

---

1) Voir XXII. 1.

2) Mss. *yāvataite'pi*; tibétain = *yasmāt*.

3) སྡུག་ དང་ མི་སྡུག་ ཕྱིན་ཅི་ལོག །རང་བཞིན་ལས་ ནི་ ཡོད་ མིན་ན། སྡུག་ དང་ མི་སྡུག་ ཕྱིན་ཅི་ལོག །བརྟེན་ནས་ ཉོན་མོངས་ གང་དག་ ཡིན།

अत्राह । विद्यन्त एव क्लेशास्तदालम्बनसद्भावात् । इह हि यन्नास्ति न तस्यालम्बनमस्ति तद्यथा वन्ध्यासूनोः । अस्ति च रूपशब्दगन्धरसस्प्रष्टव्यधर्माख्यं षड्विधमालम्बनं । तस्मादालम्बनसद्भावाद्विद्यन्त एव क्लेशा इति ॥ उच्यते । अस्त्येतद्(1)यद्भवद्भिः

रूपशब्दरसस्पर्शा गन्धा ध[141 b]र्माश्च षड्विधं ।
वस्तु रागस्य द्वेषस्य मोहस्य च विकल्प्यते(2) [Tib. 170a] ॥ ७

तत्र वस्त्वालम्बनं वसतीति वास्मिन् रागादिकं तदुत्पत्तेरिति(3) कृत्वा । तच्च तदालम्बनं षोढा भवति । इन्द्रियाणां षण्णां परिच्छेदकारि(4)णामन्योन्यभेदात् । रूपं शब्दा गन्धा रसाः स्प्रष्टव्यानि धर्माश्चेति ॥

तत्रेदमिहामुत्रेति(5) निरूप(6)णात् । रूपणाच्च(7) [रूपं] । [तेन] शब्द्यन्ते प्रकाश्यन्ते पदार्था इति शब्दः । गन्ध्यन्ते हिंस्यन्ते(8) यत्र प्राणाः ततोऽन्यत्रा(9)गमनाद्गन्धाः । रस्यते आस्वा-

1) Mss. *āssetad, astetad* — དེ་ ནི་ ཡོད་ དོ།

2) གཟུགས་ སྒྲ་ རོ་ དང་ རེག་པ་ དང་། དྲི་ དང་ ཆོས་དག་ རྣམ་དྲུག་ ནི། གཞི་ སྟེ་ འདོད་ཆགས་ ཞེ་སྡང་ དང་། གཏི་མུག་གི་ ནི་ ཡིན་པར་ བརྟགས།

3) Mss. *tadutpattir.* — Comp. Çikṣās. 77. 13: *kāyaḥ ..... kleçakarmaṇāṃ vastu.*

4) Mss. *°kārīmanyo°.*

5) འདི་ ནི་ འདི་ནའོ། ཕ་གི་ ནི་ ཕ་གི་ནའོ = *idam iheti, ado 'mutreti.*

6) ངེས་པར་ བརྟག་ཏུ་ རུང་བའི་ ཕྱིར. — Comp. M. Vyut. 245. 1043.

7) གཟུགས་སུ་ རུང་བས་. — Comp. ci-dessus p. 343, n. 7.

8) Les lexiques donnent *gandhana* = *hiṃsā.* — བསྣམ་པ་ apparenté à སྣོམ་པ་ et སྣུམ་པ་ 'to smell'.

9) མི་འགྲོ་པ་ = *agamana.*

स्यत इति रसः । स्पृश्यत इति स्पर्शः । स्वलक्षणाधारणान्निर्वाणाग्रधर्माधारणाद्धर्माः[1] । तदेतत् षड्विधं वस्तु भवति ।

कस्य । रागस्य द्वेषस्य मोहस्य । तत्र रञ्जनं रागो रक्तिरध्यवसानं ' रज्यते वानेन चित्तमिति रागः । दूषणं दोषः ' आघातः सत्त्वविषयोऽसत्त्वविषयो वा ' दूष्यते वानेन चित्तमिति दोषः[2] । मोहनं मोहः संमोहः पदार्थस्वरूपापरिज्ञानं ' मुह्यते वानेन चित्तमिति मोहः ॥ तदेषां क्लेशानां रूपादिकं षड्विधं वस्त्वालम्बनं भवति । तत्र शुभाकाराध्यारोपेण यथा रूपादिभ्यो राग उपजायते ' अशुभाकाराध्यारोपेण [द्वेषः ' नित्यात्माद्यध्यारोपेण] मोहः संभवतीति ॥ सत्यं[3] विकल्प्यत एतद्बालजनैः षड्विधं वस्तु ' किं त्वविद्यमानस्वभावसत्ताकमेतद्रागादीनामालम्बनत्वेन परिकल्प्यते भवता [Tib. 170b] तैमिरिकैरिवासत्केश[4]मशकमक्षिकाद्विचन्द्रादिकमिति प्रतिपादयन्नाह '

रूपशब्दरसस्पर्शा गन्धा ध[142a]र्माश्च केवलाः ।

केवला इति परिकल्पितमात्रा निःस्वभावा इत्यर्थः ॥ यदि निःस्वभावाः कथं तर्ह्युपलभ्यन्त इति ॥ उच्यते ।

गन्धर्वनगराकारा मरीचिस्वप्नसंनिभाः ॥ इति[5] । ८

एत उपलभ्यन्ते । यथा गन्धर्वनगरादिप्रख्या एते केवलं विपर्यासादुपलभ्यन्ते । तदा

---

1) D'après le tibétain. Mss. *nirvāṇāgradharmādhāraṇāgradharma*° et *nirvāṇādharmādh*°. — Sur cette étymologie de *dharma*, voir ci-dessus 304, 3 et note 5; et XXVII. 30. — Comp. Hodgson, Essays, p. 113.

2) La confusion de *dviṣ* et de *duṣ* est fréquente.

3) «Il est vrai que....».

4) Le tibétain porte °*keçādi*°.

5) གཟུགས་ སྒྲ་ རོ་ དང་ རེག་པ་ དང་། དྲི་ དང་ ཆོས་དག་ འབའ་ཞིག་ སྟེ། དྲི་ཟའི་ གྲོང་ཁྱེར་ ལྟ་བུ་ དང་། སྨིག་རྒྱུ་ རྨི་ལམ་ འདྲ་བ་ ཡིན།

अशुभं वा शुभं वापि कुतस्तेषु भविष्यति ।

मायापुरुषकल्पेषु प्रतिबिम्बसमेषु च ॥(1) ९

तदनेन मिथ्याप्रत्ययसमुत्पन्नत्वाच्छुभाशुभयोरपि निमित्तयोर्मृषात्वमेव भवति ॥ यथोक्तं ।

(2) अहंकारोद्भवाः स्कन्धाः सोऽहंकारोऽनृतोऽर्थतः ।
बीजं यस्यानृतं तस्य प्ररोहः सत्यतः कुतः ॥
(3) स्कन्धानसत्यान्दृष्ट्वैवमहंकारः प्रहीयते ।
अहंकारप्रहाणाच्च न पुनः स्कन्धसंभवः ॥ इति ।

न च केवलमाश्रयमिथ्यात्वे शुभाशुभयोर्निमित्तयोर्मिथ्यात्वमपि चानयाप्युपपत्त्यानयोर्मिथ्यात्वमिति प्रतिपादयन्नाह ।

अनपेक्ष्य शुभं नास्त्यशुभं प्रज्ञपयेमहि ।

यत्प्रतीत्य शुभं तस्माच्छुभं नैवोपपद्यते ॥(4) १०

इह यदि शुभं नाम किं चित्स्यान्नियतं तदशुभमपेक्ष्य भवेत् पारावारवत् बीजाङ्कुरवत् ह्रस्वदीर्घवद्वा शुभस्य संबन्ध्यन्तरपदार्थसापेक्षत्वात् । तच्चाप्यपेक्षणीयमशुभं

---

1) སྒྱུ་མའི་ སྐྱེས་བུ་ ལྟ་བུ་ དང་། གཟུགས་ བརྙན་ འདྲ་བ་ དེ་དག་ལ། སྡུག་པ་ དང་ ནི་ མི་ སྡུག་པ། འབྱུང་བར་ ཡང་ ནི་ ག་ལ་ འགྱུར།

2) Cette ligne est citée Çuklavidarçanā (MSS. Bendall) fol. 12b. — Voir ci-dessus 346. 6.

3) Cette stance manque dans le tibétain.

4) གང་ ལ་ བརྟེན་ནས་ སྡུག་པ་ ཞེས། གདགས་ པར་བྱ་བ་ མི་སྡུག་པ། སྡུག་ ལ་ མ་ བལྟོས་ ཡོད་ མིན་པ། དེ་ཕྱིར་ སྡུག་པ་ འཐད་ མ་ཡིན། «Le mauvais, en raison du quel nous aurions la notion du bon, n'existe qu'en raison du bon: par conséquent.....

शुभेन [विना] नास्ति। [अनपेक्ष्य[1] शुभं नास्त्यशुभं] शुभं निरपेक्ष्याशुभं [Tib. 171a] नास्तीत्यभिप्रायः। यदशुभं प्रतीत्य यदशुभमपेक्ष्य शुभं प्रज्ञपयेमहि व्यवस्थापयेमहि॥ यच्छब्देनानन्तरस्याशुभस्य परामर्शः। प्रज्ञपयेमहीत्यनेनोत्तरस्य शुभस्य संब[142b]न्धः॥ य[त]श्चैवं शुभस्य प्रज्ञप्तौ संबन्ध्यन्तरमपेक्षणीयमशुभाख्यं पदार्थान्तरं नास्ति तस्माच्छुभं नैवोपपद्यते। ह्रस्वासंभवादिव दीर्घं पारासंभवादिवावारमित्यभिप्रायः॥

इदानीमशुभमपि यथा न संभवति तथा प्रतिपादयन्नाह।

अनपेक्ष्याशुभं नास्ति शुभं प्रज्ञपयेमहि।
यत्प्रतीत्याशुभं तस्मादशुभं नैव विद्यते[2]॥ ११

यदि ह्यशुभं नाम किंचित्स्यान्नियतं तच्छुभमपेक्ष्य भवेत् पारावारवद्दीर्घह्रस्ववद्वा [अ]शुभस्य संबन्ध्यन्तरपदार्थसापेक्षत्वात्। तच्चाप्यपेक्षणीयं शुभमशुभेन विना नास्ति अनपेक्ष्याशुभं नास्ति [शुभं] अशुभं निरपेक्ष्य शुभं न संभवतीत्यभिप्रायः। यच्छुभं प्रतीत्य यच्छुभमपेक्ष्याशुभं प्रज्ञपयेमहि अशुभं व्यवस्थापयेमहि॥ अत्रापि यच्छब्देनानन्तरस्य शुभस्य परामर्शः। प्रज्ञपयेमहीत्यनेन चोत्तरस्याशुभस्य संबन्धः। यतश्चैवमशुभस्य प्रज्ञप्तौ संबन्ध्यन्तरमपेक्षणीयं शुभाख्यं पदार्थान्तरं नास्ति तस्मादशुभं नैव विद्यते [Tib. 171b]॥

यतश्चैवं शुभाशुभयोरसंभवोऽतः।

अविद्यमाने च शुभे कुतो रागो भविष्यति।
अशुभेऽविद्यमाने च कुतो द्वेषो भविष्यति[3]॥ १२

---

1) D'après le tibétain et ci-dessous l. 11.

2) གང་ལ་ བརྟེན་ནས་ མི་སྡུག་པར། གདགས་པར་ བྱ་བ་ སྡུག་པ་ དེ། མི་སྡུག་ མ་ བལྟོས་ ཡོད་ མིན་པ། དེ་ཕྱིར་ མི་སྡུག་ ཐད་ མ་ཡིན།

3) སྡུག་པ་ ཡོད་པ་ མ་ ཡིན་ན། འདོད་ཆགས་ ཡོད་པར་ ག་ལ་ འགྱུར། མི་སྡུག་ ཡོད་པ་ མ་ ཡིན་ན། ཞེ་སྡང་ འབྱུང་བར་ ག་ལ་ འགྱུར།

शुभाशुभनिमित्तकयो रागद्वेषयोः शुभाशुभनिमित्ताभावे सति निर्हेतुकत्वान्नास्ति संभव इत्यभिप्रायः ॥

तदेवं शुभाशुभनिमित्ताभावेन रागद्वेषयोरभावमुपपाद्य विपर्यासस्वभावाभावप्रति-[143a]पादनेन मोक्षस्याप्यधुना स्वभावाभावं प्रतिपादयन्नाह ।

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः ।
नानित्यं विद्यते शून्ये कुतो ग्राहो विपर्ययः[1] ॥ १३

इह चत्वारो विपर्यासा[2] उच्यन्ते । तद्यथा । अनित्ये प्रतिक्षणविनाशिनि स्कन्धपञ्चके यो नित्यमिति ग्राहः स विपर्यासः ॥ तथा

अनित्यस्य ध्रुवा पीडा पीडा यस्य न तत्सुखं ।
तस्मादनित्यं यत्सर्वं दुःखं तदिति गायते[3] ॥

इत्यमुना न्यायेन यदनित्यं तद्दुःखं सर्वसंस्काराश्चानित्याः । तस्माद्दुःखात्मके स्कन्धपञ्चके यः सुखमिति विपरीतो ग्राहः सोऽपरो विपर्यासः । तथा हि ।

शुक्रशोणितसंपर्कबीजं विण्मूत्रवर्द्धितं[4] ।
अमेध्यद्रूपमाज्ञानन् रज्यसे[5]ऽत्र कयेच्छया ॥

---

1) གལ་ཏེ་ མི་རྟག་ རྟག་པ་ ཞེས། དེ་ལྟར་ འཛིན་པ་ ལོག་ ཡིན་ན། སྟོང་ལ་ མི་རྟག་ ཡོད་ མིན་པས། འཛིན་པ་ ཇི་ལྟར་ ལོག་ མ་ ཡིན། — Mais on a, ci-dessous, 461. 11 ལོག་པ་ཡིན་, bonne lecture.

2) Les quatre *viparyāsas* sont mentionnés, mais non énumérés, **Lalitavistara** 481. 14 et Mahāvastu III. 344. 11 (510). A chacun d'eux est consacré un des quatre premiers chapitres du Catuḥçataka d'Āryadeva.

3) Extrait du Catuḥçataka, II. 25. — Même citation ci-dessous XXIV. 21

4) *vardhita* = བསྐྱེད་གྱུར་.

5) ཚགས. — Mss. *rakṣase.*

[1]अमेध्यपुञ्जप्रच्छन्ने तत्क्लेदार्द्रेण चर्मणा ।
यः शयीत स नारीणां शयीत जघनोदरे ॥

इत्यादि । एवमिदं शरीरं सर्वात्मना सततमशुचिस्वभावं । तत्र यो मोहाच्छुचित्वेन ग्राहोऽभिनिवेशः स विपर्यासः ॥

तथा पञ्चस्कन्धकमात्मलक्षणविलक्षणमस्थिर[2]त्वादुदयव्ययधर्मित्वाच्च निरात्मकमात्म[Tib. 172 a]स्वभावशून्यं । तस्मिन् य आत्मग्राहोऽभिनिवेशो ऽनात्मन्यात्माभिनिवेशः स विपर्यासः ॥ इत्येते चत्वारो विपर्यासाः संमोहस्य हेतुभूताः ॥

अत्रेदानीं विचार्यते । [3]यदि नित्यत्वं नित्यदर्शनं स्वभावशून्येषु नित्यग्राहो विपर्यास इत्येवं व्यवस्थाप्यते । ननु च स्वभावशून्येषु स्कन्धेष्वनि[143 b]त्यत्वमपि नास्तीति '

नानित्यं विद्यते शून्ये कुतो ग्राहो विपर्ययः ॥

अनित्यत्वं हि विपरीतमपेक्ष्य नित्यत्वं विपर्यास इति व्यवस्थाप्यते । [4]न चानित्यत्वं विद्यते शून्ये । यदानित्यत्वस्याभावस्तदा कुतस्तद्विरोधि नित्यत्वं [5]नित्यदर्शनं विपर्यासो भविष्यतीति भावः । तस्मान्नास्ति विपर्यासः ॥

यथा चानित्यत्वं शून्ये न संभवति ' भावस्वभावरहिते सस्वभावेनानुत्पन्ने ' एवं दुःखत्वमपि न संभवति ' अशुचित्वमपि नास्ति ' अनात्मत्वमपि नास्ति । यदा च स्वभावशून्यत्वाद्दुःखत्वादिकं नास्ति ' तदा कुतस्तद्विपक्षभूता नित्यसुखशुच्यात्मविपर्यासा भविष्यन्ति ॥ तस्मान्न सन्ति विपर्यासाः स्वरूपतः ' तदभावे कुतो भविष्यत्यविद्या हेत्वभावात् ।

---

1) Cette stance manque dans le tibétain.

2) Notre xylographe a མི་བསྟན; lire མི་བརྟན་.

3) D'après le tibétain: *yadi skandheṣu nityatvaçūnyeṣu nityagrāho...*

4) D'après le tibétain: *yadā çūnye 'nityatvaṃ nāsti tadānityatvābhāvāt kutas tadvirodhi....*

5) *nityadarçanam* manque dans le tibétain.

यथोक्तं भगवता[1] ।

अविद्यया नैव कदाचि विद्यते अविद्यत प्रत्ययसंभवश्च ।
अविद्यमानेयमविद्य लोके तस्मान्मया उक्त अविद्य एषा ॥

तथा[2] । कथं भगवन् मोहो धारणीपदं । भगवानाह । अत्यन्तमुक्तो हि मञ्जुश्रीः मोहस्तेनोच्यते [Tib. 172b] मोह इत्यादि[ना] विपर्यय इति व्यवस्थाप्यते ॥

नन्वेवं सति स्वभावेनाविद्यमाने पदार्थेऽनित्यमित्यपि ग्राहो न संभवतीत्यसावपि कस्मान्न विपर्यास इति व्यवस्थाप्यत इति प्रतिपादयन्नाह ।

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः ।
अनित्यमित्यपि ग्राहः शून्ये किं न विपर्ययः[3] ॥ १४

यदा चोभयस्यापि वैपरीत्यं नित्यस्यानित्यस्य च , तदा तद्व्यतिरिक्तं तृ[144a]तीयमपरं नास्ति यन्न विपर्ययः स्यात् । यदा चाविपर्यासो नास्ति , तदा किमपेक्षो विपर्यासः स्यादिति । तस्मादमुनापि न्यायेन नास्ति विपर्ययः । तस्याभावाच्च नास्त्यविद्या स्वरूपतः । यथा चानित्ये नित्यमित्ययं ग्राहो विपर्यासो न संभवति , एवं शेषविपर्यासासंभवेऽपि योज्यं ॥

अत एवोक्तं भगवतार्यदृढाशयपरिपृच्छायां[4] । भगवानाह । एवमेतत्कुलपुत्र तस्य

1) Cette stance semble extraite du Suvarṇaprabhāsa (Buddhist Text Soc. p. 32), dont les lectures, si incompréhensibles qu'elles soient, soutiennent les nôtres: *avidyamāne kadā cid vidyate avidyata pratyayasambhavāç ca.* Le tibétain donne un sens très net: *avidyā yac cāvidyāpratyayaṃ saṃbhavati na kadācid vidyate.* — *avidyayā vidyate* = *avidyā vidyate* (?). — Comparer pour la doctrine Aṣṭasāh. 15. 4.

2) Voir ci-dessus, p. 50. 11.

3) གལ་ཏེ་ མི་ རྟག་ རྟག་གོ་ ཞེས། དེ་ལྟར་ འཛིན་པ་ ལོག་ ཡིན་ན། སྟོང་ལ་ མི་ རྟག་པའོ་ ཞེས། འཛིན་པའང་ ཇི་ལྟར་ ལོག་ མ་ ཡིན།

4) ལྷག་པའི་བསམ་པ་བརྟན་པས་ཞུས་པ་ལས། — Voir ci-dessus 46, note 1.

भवति यो मार्गेण निःसरणं पर्येषते । न कुलपुत्र तथागतेन रञ्जनीयान् धर्मान् परिवर्ज्य रागप्रहाणं प्रज्ञप्तं ' एवं न दोषणीयान् मोहनीयान् धर्मान् परिवर्ज्य तथागतेन दोषमोहप्रहाणं प्रज्ञप्तं । तत्कस्माद्धेतोः । न कुलपुत्र तथागताः कस्यचिद्धर्मस्योत्सर्गाय वा प्रतिलम्भाय वा धर्मं देशयन्ति न परिज्ञायै[1] न प्रहाणाय[2] [Tib. 173a] न साक्षात्क्रि[या]यै नाभिसमयाय न संसारचरणतायै[3] न निर्वाणगमनतायै नोत्क्षेपाय[4] न प्रभेदाय । न हि कुलपुत्र द्वयप्रभाविता तथागतधर्मता । तत्र ये द्वये चरन्ति न ते सम्यक्प्रयुक्ता मिथ्याप्रयुक्तास्ते वक्तव्याः । कतमच्च कुलपुत्र द्वयं ' अहं रागं प्रहास्यमीति द्वयमेतत् ' अहं द्वेषं प्रहास्यामीति द्वयमेतत् ' अहं मोहं प्रहास्यामीति द्वयमेतत् । य एवंप्रयुक्ता न ते सम्यक्प्रयुक्ता मिथ्याप्रयुक्तास्ते वेदितव्याः ॥

[5] तद्यथापि नाम कुलपुत्र कश्चिदेव पुरुषो मायाकारनाटके प्रत्युपस्थिते मायाकारनिर्मितां [144b] स्त्रियं दृष्ट्वा रागचित्तमुत्पादयेत् । स रागपरीतचित्तः पर्षच्छारद्यभयेनोत्थायासनादपक्रमेत् ' सोऽपक्रम्य तामेव स्त्रियमशुभतो मनसि कुर्यादनित्यतो दुःखतः शून्यतोऽनात्मतो मनसि कुर्यात् ॥ भगवानाह । एवमेव कुलपुत्र इहैके भिक्षुभिक्षुण्युपासकोपासिका द्रष्टव्या येऽनुत्पन्नान् धर्मानजातानशुभतो [Tib. 173b] मनसि कुर्वन्ति ' अनित्यतो दुःखतोऽनात्मतो मनसि कुर्वन्ति । नाहं तेषां मोहपुरुषाणां मार्गभावनां वदामि ' मिथ्याप्रयुक्तास्ते वेदितव्याः ॥

तद्यथापि नाम कुलपुत्र कश्चिदेव पुरुषः सुप्तः स्वप्नान्तरे[6] स्वगृहे राजभार्यां पश्येत् '

---

1) Mss. *parijñāyaiva pra*°.

2) Le tibétain ajoute *na bhāvanāyai* — བསྒོམ་པར་བྱ་.

3) Cette lecture est certainement mauvaise. Le tibétain (བསྐྱོད་པ) suggère la correction *saṃsāroccaraṇa* (?).

4) Le tibétain ajoute *na prakṣepāya* — བཞག་པར་བྱ་བ་.

5) Voir ci-dessus 46. 1.

6) Mss. °*antarasthagṛhe* — བདག་གི་ ཁྱིམ་དུ་.

स तया सार्धं शय्यां[1] कल्पयेत् ' स्मृतिसंमोषाच्चैवं कल्पयेत् ' विरुद्धोऽस्मीति ' स भीतस्त्रस्तः पलायेत् ' मा मां राजा विध्येत्स[2] मा मां जीविताद्व्यपरोपयेत् । तत्किं मन्यसे कुलपुत्रापि नु स पुरुषो भीतस्त्रस्तः पलायमानस्ततो राजभार्यानिदानभयात्परिमुच्येत्[3] ॥ आह । नो भगवंस्तत्कस्य हेतोः । तथा हि भगवंस्तेन पुरुषेणास्त्रियां स्त्रीसंज्ञोत्पादिता । अभूतं च परिकल्पितं ॥ भगवानाह । एवमेव कुलपुत्र इहैके भिक्षुभिक्षुण्युपासकोपासिका द्रष्टव्याः ' येऽरागे रागसंज्ञामुत्पाद्य रागभयभीता रागनिःसरणं पर्येषन्ते ' एवमदोषे दोषसंज्ञामुत्पाद्य दोषभयभीता दोषनिःसरणं पर्येषन्ते ' अमोहे मोहसंज्ञामुत्पाद्य मोहभयभीता मोहनिःसरणं पर्येषन्ते । नाहं तेषां मोहपुरुषाणां मार्गभावनां [145a] वदामि ' मिथ्याप्रयुक्तास्ते वेदितव्याः ॥

तद्यथापि नाम कुलपुत्र स पुरुषोऽभये भयसंज्ञामुत्पादयेदसत्समारोपेण[4] ' [Tib. 174a] एवमेव कुलपुत्र सर्वबालपृथग्जना रागकोटिं विरागकोटिमप्रजानन्तो रागकोटिभयभीता विरागकोटिं निःसरणं पर्येषन्ते । दोषकोटिमकिंचनकोटिमप्रजानन्तो दोषकोटिभयभीता अकिंचनकोटिं निःसरणं पर्येषन्ते ' मोहकोटिं शून्यताकोटिमप्रजानन्तो मोहकोटिभयभीताः शून्यताकोटिं निःसरणं पर्येषन्ते । नाहं तेषां कुलपुत्र मोहपुरुषाणां मार्गभावनां वदामि ' मिथ्याप्रयुक्तास्ते वेदितव्या इति विस्तरः ॥

अत्राह । यद्यप्यनित्ये नित्यमित्येवं ग्राहो विपर्ययो न संभवति ' तथाप्येव तावद्ग्राहोऽस्ति । ग्राहश्च नाम संग्रहणं भावरूपः[5] । तस्य चावश्यं साधनेन करणेन भवि-

---

1) Mss. *çaryā* — ཉལ་བ་.

2) Mss. *mā mām rājā vandhan* (*vandhyen, vadhyet*) *sa mā mām* .. . རྒྱལ་པོས་ མ་ ཚོར་ ཀྱང་། དེས་ བདག་ བསད་དུ་ འོང་ངོ་། — ཚོར་བ་ = percevoir = *vidhyet?* — Peut-être ཚེར་བ་ = *pīḍ., tud.*

3) Sic Mss. et aussi ailleurs.

4) Mss. *utpādayed arthasatsamāropeṇa* མེད་པ་ བཞིན་དུ་ སྒྲོ་ བཏགས་པས

5) དངོས་པོ་བྱ་བའི་ རང་བཞིན.

तव्यं [1]साधकतमेन नित्यत्वादिना । कर्त्रा च भवितव्यं स्वतन्त्रेण[2] नित्यात्मना चित्तेन वा । [3]कर्मणा च कर्तुरीप्सिततमेन विषयेण रूपादिना[3] । सत्यां च [4]भावकरणकर्तृकर्मणां सिद्धौ सर्वसिद्धेरिष्टसिद्धिः स्यादस्माकमिति ॥ उच्यते । अलौकिकेयं प्रत्याशा । ननु च यथोपवर्णितेन न्यायेन

येन गृह्णाति यो ग्राह्यो ग्रहीता यच्च गृह्यते ।
उपशान्तानि सर्वाणि तस्माद्ग्राहो न विद्यते[5] ॥ १५

इह हि कश्चिद्ग्रहीता येन विशेषेण नित्यत्वादिना करणभूतेन किं चित्कर्मभूतं रूपशब्दादिकं वस्तु गृह्णाति [145b] । तद्यथा न संभवति तथा पूर्वं [Tib. 174b] प्रतिपादितं । कथं कृत्वा ।

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्यय

इत्यादिना[6] यथा नित्य[त्व]ादिकं करणं न संभवति तथा प्रतिपादितं ॥ ग्रहीतापि यथा नास्ति तथा

आत्मनोऽस्तित्वनास्तित्वे न कथं चिच्च सिध्यत

इत्यनेन[7] प्रतिपादितं ॥ यच्च गृह्यते तदपि यथा नास्ति तथा

रूपशब्दरसस्पर्शा गन्धा धर्माश्च केवला

---

1) *sādhakatamena* manque dans le tibétain.

2) *svatantra* et *nitya* manque dans le tibétain.

3—3) Mss. *rūpādinā vā*.— གཟུགས་ལ་ སོགས་པའི་ ཡུལ་ ལས་ ཀྱང་ ཡོད་ དགོས་སོ.

4) *bhāva* = དངོས་པོ་བྱ་བ.

5) གང་གིས་ འཛིན་ དང་ འཛིན་ གང་ དང་། འཛིན་པ་པོ་ དང་ གང་ གཟུང་བ། ཐམས་ཅད་ ཉེ་བར་ ཞི་བ་ སྟེ། དེ་ཕྱིར་ འཛིན་པ་ ཡོད་ མ་ཡིན།

6) Ci-dessus XXIII, 13 et 14.

7) Ci-dessus XXIII. 3.

इत्यनेन[1] प्रतिपादितं ॥ यदा चैवं कर्तृकरणकर्माणि न सिद्धानि तदा कुतो निर्हेतुको ग्राहो भविष्यति । ततश्च

येन गृह्णाति यो ग्राहो ग्रहीता यच्च गृह्यते ।
उपशान्तानि सर्वाणि ।

स्वभावेनानुत्पन्नत्वान्निर्वृतानि सर्वाणीत्यर्थः । यतश्चैवमेव '

तस्माद्ग्राहो न विद्यते ॥

अथ वा प्रत्ययपरीक्षादिभिः प्रकरणैर्यस्मात्सर्वेषामेव करणकर्तृकर्मणां सर्वथानुत्पादः प्रतिपादितः ' तस्मात्सर्वाण्येतानि भावस्वरूपविरहादुपशान्तानि ' अतश्च ग्राहो न विद्यते ॥

अत्राह । विद्यन्त एव विपर्यया विपरीतसद्भावात् । इह हि विपर्यासानुगतो देवदत्तो न[ाम] विद्यते ' न च विना विपर्यासैः स विपर्यासानुगतः संभवति । तस्मात्सन्ति विपर्यासा विपर्यस्तसद्भावादिति ॥ उच्यते । इहास्माभिः करणकर्तृकर्मणामभावात्सर्वथा ग्राह एव नास्तीति प्रतिपादितं । ततश्च

अविद्यमाने ग्राहे च मिथ्या वा सम्यगेव वा ।
भवेद्विपर्ययः कस्य भवेत्कस्याविपर्ययः[2] ॥ १६ [Tib. 175a]

सम्य[146a]ग्वा मिथ्या वा कस्य चित्किं चिदप्यगृह्णतः कुतो विपरीतत्वमविपरीतत्वं वेति । तस्मान्न सन्ति विपर्ययाः ॥

अपि चेमे विपर्ययाः कस्य चिदिष्यमाणा विपरीतस्य परिकल्प्येरन्नविपरीतस्य वा विपर्यस्यमानस्य वा । सर्वथा च नोपपद्यन्त इति प्रतिपादयन्नाह ।

---

1) Ci-dessus XXIII. 7.

2) ལོག་པའམ་ ཡང་དག་ཉིད་དུ་ ནི། འཛིན་པ་ ཡོད་པ་ མ་ ཡིན་ན། གང་ལ་ ཕྱིན་ཅི་ལོག་ ཡོད་ཅེང་། གང་ལ་ ཕྱིན་ཅི་མ་ལོག་ ཡོད།

न चापि विपरीतस्य संभवन्ति विपर्ययाः ।
न चाप्यविपरीतस्य संभवन्ति विपर्ययाः[1] ॥ १७

न विपर्यस्यमानस्य संभवन्ति विपर्ययाः ।
विमृशस्व स्वयं कस्य संभवन्ति विपर्ययाः[2] ॥ १८

तत्र तावद्विपरीतस्य विपर्यया न संभवन्ति । किं कारणं । यस्माद्यो हि विपरीतः स विपरीत एव किं तस्य पुनरपि विपर्ययसंबन्धः कुर्यात् । निष्प्रयोजनत्वात् ॥ अविपरीतस्यापि विपर्यया न युज्यन्ते । विबुद्धबुद्धिनय[ना]नामप्यज्ञाननिद्रातिमिरोपशमाद्बुद्धानां विपर्ययप्रसङ्गात् ॥ तथा विपर्यस्यमानस्यापि न सन्ति विपर्ययाः । विपर्यस्यमानस्य भावस्याभावात् । को हि नामासावपरः पदार्थो यो विपरीताविपरीतविनिर्मुक्तो विपर्यस्यमानो नाम भविष्यति । अर्धविपरीतो विपर्यस्यमान इति चेत् । अर्धविपरीतो हि नाम यस्य किं चिद्विपरीतं किं चिदविपरीतं [Tib. 175 b] । तत्र यदस्य किं चिद्विपरीतं तद्विपर्यासो न विपर्यासयति । विपर्यस्तत्वात् । यदप्यस्याविपरीतं तदपि विपर्यासो न विपर्यासयति । अविपर्यस्तत्वात् । तस्माद्विपर्यस्यमानस्यापि कस्य चिद्विपर्यासा न संभवन्ति ॥ यदा चैवं विपरीताविपरीतविपर्यस्यमाना न संभवन्ति । भवानिदानीं विमृशतु स्वयं प्रज्ञया मध्यस्थः सन् कस्य संभवन्ति विपर्य[146 b]या इति । तदेवमाश्रयस्याभावान्न सन्ति विपर्ययाः ॥

किं चान्यत् ।

अनुत्पन्नाः कथं नाम भविष्यन्ति विपर्ययाः ।

---

1) ཕྱིན་ཅི་ལོག་ཏུ་ གྱུར་པ་ལ། ཕྱིན་ཅི་ལོག་དག་ མི་ སྲིད་དེ། ཕྱིན་ཅི་ལོག་ཏུ་ མ་ གྱུར་ལ། ཕྱིན་ཅི་ལོག་དག་ མི་ སྲིད་དོ།

2) ཕྱིན་ཅི་ལོག་ཏུ་ འགྱུར་བཞིན་ལའང་། ཕྱིན་ཅི་ལོག་དག་ མི་ སྲིད་དོ། གང་ལ་ ཕྱིན་ཅི་ལོག་ སྲིད་པ། བདག་ཉིད་ཀྱིས་ ནི་ རྣམ་པར་དཔྱོད།

विपर्ययेष्वजातेषु विपर्ययगतः कुतः[1] ॥ १९

तत्र

न स्वतो जायते भावः परतो नैव जायते ।

न स्वतः परतश्चेति विपर्ययगतः कुतः[2] ॥ २०

कुतो विपरीत इत्यर्थः । ततश्च यदुक्तं सन्ति विपर्यया विपर्ययगतसद्भावादिति तन्न युक्तं ॥ यद्यपि[3] कथं चिद्विपर्यासचतुष्टयमस्त्येवेत्यभ्युपगम्यते तथापि तस्य विपरी-[4]तत्वमशक्यमास्थातुं । किं कारणं । यस्मात्

आत्मा च शुचि नित्यं च सुखं च यदि विद्यते ।

आत्मा च शुचि नित्यं च सुखं च न विपर्ययः[5] ॥ २१

यद्येतानि आत्मशुचिनित्यसुखानि विपर्यासा इति व्यवस्थाप्यन्ते ' किमेतानि सन्ति अथ न सन्ति । यदि विद्यन्ते न तर्हि विपर्यासा विद्यमानत्वादनात्मादिवत् । अथ न विद्यन्ते ' तदैषामविद्यमानत्वान्न केवलं नास्ति विपर्यासत्वं ' विपर्यासप्रतिबन्ध्य[6][Tib. 176a]भावादनात्मादीनामप्यविपर्यासादीनां नास्ति सद्भाव इति प्रतिपादयन्नाह ।

---

1) ཕྱིན་ཅི་ལོག་རྣམས་ མ་ སྐྱེས་པ། ཇི་ལྟ་བུར་ ནི་ ཡོད་པར་འགྱུར། ཕྱིན་ཅི་ལོག་རྣམས་ སྐྱེ་ མེད་ན། ཕྱིན་ཅི་ལོག་ཅན་ ག་ལ་ ཡོད།

2) དངོས་པོ་ བདག་ལས་ མི་ སྐྱེ་ སྟེ། གཞན་ལས་ སྐྱེ་བ་ ཉིད་ མ་ཡིན། བདག་ དང་ གཞན་ལས་ ཀྱང་ མེད་ན། ཕྱིན་ཅི་ལོག་ཅན་ ག་ལ་ ཡོད།

3) Mss. *adhyesi.*

4) ཕྱིན་ཅི་ལོག་ཉིད་དུ་ གཞན་པར་ མི་ ནུས་སོ. — Corriger བཞག་པར.

5) གལ་ཏེ་ བདག་ དང་ གཙང་བ་ དང་། རྟག་ དང་ བདེ་བ་ ཡོད་ན་ ནི། བདག་ དང་ གཙང་ དང་ རྟག་པ་ དང་། བདེ་བ་ ཕྱིན་ཅི་ལོག་ མ་ ཡིན།

6) འགལ་ཟླ་ ཕྱིན་ཅི་ལོག་ མེད་པའི་ཕྱིར — par suite de l'inexistence de son contraire le *viparyāsa*....

नात्मा च शुचि नित्यं च सुखं च यदि विद्यते।
अनात्माऽशुच्यनित्यं च नैव दुःखं च विद्यते[1]॥ २२

यद्यात्मा च शुचिनित्यं च न विद्यत इति मन्यसे विद्यमानस्य विपर्यासासंभवात्। एवं सत्यात्मादीनामप्यभावाद्यदेतदनात्मादिकमविपर्यासत्वेन गृहीतं तदपि तर्हि त्यज्यतां प्रतिषेध्याभावे प्रतिषेधस्याभावात्। यदा चैवमनात्मादिकं न संभवति [147 a] तदा तदपि स्वरूपतोऽविद्यमानत्वादात्मादिवत्कथं न विपर्यासः स्यात्। तस्माज्जातिजरामरणसंसारचारकागारबन्धनान्मुमुक्षुभिरष्टावप्येते विपर्यासास्त्याज्याः॥ अस्य च यथोपवर्णितविपर्यासविचारस्याविद्यादिप्रहाणहेतुत्वेन महार्थतां प्रतिपादयन्नाह।

एवं निरुध्यतेऽविद्या विपर्ययनिरोधनात्।
अविद्यायां निरुद्धायां संस्काराद्यं निरुध्यते[2]॥ २३

यदायं योगी यथोदितेन न्यायेन विपर्यासान्नोपलभते तदैवं विपर्यासानुपलम्भेन तद्धेतुकाविद्या निरुध्यते। तन्निरोधाच्च संस्कारादयोऽविद्याहेतुका जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासपर्यन्ता धर्मा निरुध्यन्ते॥

अविद्या हि सकलस्यैव संक्लेशगणस्य जात्यादिदुःखस्य च हेतुभूता। यथा हि कायेन्द्रियहेतुकानि सर्वाणि रूपीन्द्रियाणि[3] कायेन्द्रिये निरुध्यमाने निरुध्यन्ते [Tib.

1) གལ་ཏེ་ བདག་ དང་ གཙང་བ་ དང་། རྟག་ དང་ བདེ་བ་ མེད་ན་ ནི། བདག་ མེད་ མི་གཙང་ མི་རྟག་ དང་། སྡུག་བསྔལ་ ཡོད་པ་ མ་ ཡིན་ནོ།

2) དེ་ལྟར་ ཕྱིན་ཅི་ལོག་ འགགས་པས། མ་རིག་པ་ ནི་ འགག་པར་ འགྱུར། མ་རིག་ འགགས་པར་ གྱུར་ན་ ནི། འདུ་བྱེད་ལ་ སོགས་ འགག་པར་ འགྱུར།

3) Les Mss. hésitent entre *rūpīndriya* et *rūpendriya*.— དབང་པོ་ གཟུགས་ཅན་ཐམས་ཅད.

176b] ' एवमविद्याहेतुकानि संस्कारादीनि[1] भवाङ्गानि प्रवर्तमानानि [नि]पतमविद्यायां निरुद्धायां निरुध्यन्त इति प्रतिपादयन्नाह ।

अविद्यायां निरुध्यायां संस्काराद्यं निरुध्यते ॥ इति ॥

अत्राह । यदि विपर्यासनिरोधादविद्या निरुध्यतेऽस्ति तर्ह्यविद्या यस्या एवं विपर्यासनिरोधान्निरोधो भवति । [न] तर्ह्यविद्यमानाया गगणचूतलतायाः प्रहाणोपायान्वेषणमस्ति । तस्माद्विद्यत एवाविद्या ' तन्निरोधोपायान्वेषणसद्भावात् । ततश्च सन्ति तद्धेतुका रागादयः क्लेशाः । क्लेशसद्भावाच्चास्त्येव संसारे[2] भवसंततिः ॥

उच्यते । अत्र हि नामातिमहदनर्थपाण्डित्यं परस्य यो हि नाम [3]सर्वात्मनात्यन्तदुःखायासक्लेशासमञ्जसे संसारे निरन्तरफुल्लफलप्रदसंक्लेशविषवृक्षे परार्थोदयसंबद्धकक्षैः साधुभिः प्रज्ञोपायमहानिलबलैर्निःशेषं तदुन्मूल्यमानैर्न[3] केवलं न साहाय्येनावतिष्ठते । [4]अपि खलु त[दु]न्मूलकानामतिमहानिलबलानामिव भावसद्भाववादमहाशैलायमान इवातिविरोधितयावस्थितो भवानाहोपुरुषिकया[5] तस्यैव क्लेशविषवृक्षस्य[6] जातिजरामरणशोकायासविसरदुःखैकफलस्य सुतरां भावाभिनिवेशतोयासेवैरारोपणमाद्रियते[7][4] ॥

अपि च । यद्यविद्यादीनां संक्लेशानां[8] प्रहाणं संभवेत्स्यात्तत्प्रहाणोपायान्वेषणं । न च तेषां प्रहाणं संभवति । यदि स्यात्तदा तत्स्वरूपतो विद्यमानानां वा स्यादविद्यमानाना

---

1) Mss. *saṃskārāçani.*

2) *saṃsāre* manque dans le tibétain. — Nous savons que *bhavasaṃtati* est un équivalent exact de *saṃsāra.*

3—3) Le tibétain abrège: ... *yo hi nāma sādhubhiḥ parārthodayasaṃbaddhakakṣaiḥ prajñopāyabalair niḥçeṣaṃ mahākleçaviṣavṛkṣaṃ sarvātmanā duḥkham unmūlyamānair....*

4—4) Le tibétain abrège: *api khalu tadunmūlakānām ativirodhitayāvasthita āhopuruṣikayā tasya mahākleçaviṣavṛkṣasyārohaṇam ādriyate.*

5) Mss. *avasthito bhagavān āha puruṣikayā...* — *āhopuruṣikā*, 'obstination', གཟུ་ལུམས.

6) *kleçaviṣayā upetyajāti.*

7) Mss. °*toyāsakairnnaroṣaṇamāndriyate*, °*kair nṛroṣanāṃdriyate.*

8) Peut-être *kleçānām.*

ना [Tib. 177a]। किं चातः। तत्र यदि स्वरूपतः सद्भूतानां क्लेशानां प्रहाणमिष्यते तन्नोपपद्यते। किं कारणं। यस्मात्

यदि भूताः स्वभावेन क्लेशाः के चिद्धि कस्य चित्।
कथं नाम प्रहीयेरन् कः स्वभावं प्रहास्यति (1)॥ २४

स्वभावतो विद्यमानानां भावानां न शक्यः स्वभावो विनिवर्तयितुं। न हि क्षित्यादीनां कठिन[त्व]ादिस्वभावो निवर्तते। एवं यदीमे क्लेशाः स्वभावतः सद्भूताः स्युः ' केचिदित्यविद्यादयः ' कस्यचिदिति पुद्गलस्य ' कथं नाम प्रहीयेरन्। नैव ते कस्य चित्कथं [चि]न्नाम प्रहीयेरन्॥ कस्मात्पु[148a]नर्न ते प्रहीयन्त इत्याह। कः स्वभावं प्रहास्यतीति स्वभावस्य विनिवर्तयितुमशक्यत्वात्। आकाशानावरणविनिवर्तनासंभववदित्यभिप्रायः॥

अथ स्वभावेनासद्भूता इति विकल्प्यते। एवमपि प्रहाणासंभव एवेत्याह।

यद्यभूताः स्वभावेन क्लेशाः के चिद्धि कस्य चित्
कथं नाम प्रहीयेरन् कोऽसद्भावं प्रहास्यति (2)॥ २५

अभूता अपि क्लेशाः स्वभावेनाविद्यमाना अशक्या एव प्रहातुं। न ह्यग्नेः शैत्यमसंविद्यमानं शक्यमपाकर्तुं। एवमिमेऽपि क्लेशाः के चिद्यदि कस्य चित्स्वभावतो न विद्यन्ते कस्तान् प्रहास्यति ' नैव कश्चित्प्रहास्यति॥ तदेवमुभयपक्षेऽपि प्रहाणासंभवान्नास्ति प्रहाणं क्लेशानां प्रहाणाभावाच्च कुतः क्लेशप्रहाणोपायान्वेषणमिति [Tib. 177b]।

---

1) གལ་ཏེ་ ལ་ལའི་ ཉོན་མོངས་པ། གང་དག་ རང་བཞིན་གྱིས་ ཡོད་ན། ཇི་ལྟ་བུར་ ན་ སྤོང་བར་འགྱུར། ཡོད་པ་ སུ་ཞིག་ སྤོང་བར་བྱེད། = *kaḥ sadbhāvaṃ prahāsyati.* — Voir la stance suivante.

2) གལ་ཏེ་ ལ་ལའི་ ཉོན་མོངས་པ། གང་དག་ རང་བཞིན་གྱིས་ མེད་པ། ཇི་ལྟ་བུར་ན་ སྤོང་བར་འགྱུར། མེད་པ་ སུ་ཞིག་ སྤོང་བར་བྱེད།

अतो यदुक्तं । विद्यन्त एवाविद्यादयः क्लेशास्तत्प्रहाणोपायान्वेषणादिति तद[यु]क्तमिति ॥

यथोक्तमार्यसमाधिराजे[1] । यो रज्येत यत्र वा रज्येत येन वा रज्येत । यो दुष्येत यत्र वा दुष्येत येन वा दुष्येत । यो मुह्येत यत्र वा मुह्येत येन वा मुह्येत । स तं धर्मं न समनुपश्यति तं धर्मं नोपलभते । स तं धर्ममसमनुपश्यन्ननुपलम्भमानोऽरक्तोऽदुष्टोऽमूढोऽविपर्यस्तचित्तः समाहित इत्युच्यते । तीर्णः पारग इत्युच्यते क्षेमप्राप्त इत्युच्यत इति विस्तरः ॥

[2]आदर्शपृष्ठे तथ तैलपात्रे
निरीक्षते नारिमुखमलंकृतं ।
सो तत्र रागं जनयित्व बालो
प्रधावितो कामि गवेषमाणो ॥

मुखस्य संक्रान्ति यदा न विद्यते
बिम्बे मुखं नैव कदाचि लभ्यते ।
मूढो यथा सो जनयेत रागं
तथोपमान् जानथ सर्वधर्मान् ॥

इत्यादि ॥ तथा[3] ।

रूपेण दर्शिता बोधी बोधाये[4] रूप दर्शितं ।
वि[5]षभागेन शब्देन उत्तरो धर्मु देशितः ॥

---

1) Même citation ci-dessus p. 143. 1. — Elle manque ici dans le tibétain.

2) Ces deux premières stances sont citées ci-dessus p. 108. 13. — Elles manquent ici dans le tibétain

3) Extrait du Samādhirāja d'après le témoignage de notre version tibétaine.

4) བྱང་ཆུབ་ཀྱིས = par la Bodhi.

5) མིང་མཐུངས་པ་ཡི. — Corriger མི་མཐུངས.

शब्देन उत्तरं[1] रूपं गम्भीरं[2] च स्वभावतः ।
समं रूपं च बोधिश्च नानात्वं स[3] न लभ्यते ॥
यथा निर्वाणु गम्भीरं शब्देन संप्रकाशितं ।
लभ्यते न च निर्वाणं स च[4] शब्दो न लभ्यते ॥
शब्दश्चापि[5] निर्वाणं च उभयं तत्र लभ्यते ।
एवं शून्येषु धर्मेषु निर्वाणं संप्रकाशितं ॥
निर्वाणं निवृत्तिरेव निर्वाणं च न लभ्यते[6] ।
अप्रवृत्तिर्हि[7] धर्माणां यथा पश्चात्तथा पुरा ॥
सर्वधर्माः स्वभावेन[8] निर्वाणसमसादृशाः ।
ज्ञाता[9] नैष्क्रम्यसारैर्हि ये युक्ता बुद्धबोधये ॥

---

1) Suppléez *saṃprakāçitam*. — སྒྲ་ཡིས་ གཟུགས་ཀྱི་ བླ་མ་སྐྱེ་.

2) Mss. *gambhīraṃ ca svabhāvaḥ* (*°bhāvam*) — ངོ་བོ་ཉིད་ཀྱིས་ ཟབ་པ་དག་ = *svabhāvena gambhīram.*

3) Mss. *nānātvam cet sa* ..... ཐ་དད་ བྱ་བ་ དེ་ མི་ རྙེད = *nānākriyeyaṃ na labhyate.*

4) D'après le tibétain *tan nirvāṇaṃ na labhyate tacchabdo 'pi na labhyate.*

5) Mss. *çabdaç cāpy anirvāṇām ubhayam.*

6) Peut-être *nirvāṇaṃ nivṛttivṛttam* = *nivṛttirūpam*. — Mss. *nirvāṇaṃ (ni)(r)vṛttī(i) vṛttā* — མྱ་ངན་འདས་ དང་ འདའ་བ་ ནི། མྱ་ངན་འདས་པ་ མི་རྙེད་དེ།

7) Mss. *apravṛtteṣa*, *°vṛtteṣu* འདི་ན་ ཆོས་རྣམས་ འཇུག་པ་ མེད། = *atra dharmāṇām apravṛttiḥ.*

8) Les Mss. reproduisent ici les stances qui précèdent: *sarvadharmāḥ svabhāvena nirvāṇaṃ sa ca çabdo na labhyate*, etc.

9) Mss. *jñānā* — ཆོས་རྣམས་ ཐམས་ཅད་ རང་བཞིན་གྱིས། མྱ་ངན་འདས་ དང་ མཚུངས་མཉམ་པར། སངས་རྒྱས་ བསྟན་ལ་ བརྩོན་པ་ཡི། འབྱུང་བ་ལྷུར་བྱེད་ རྣམས་ཀྱིས་ རིག། = *buddhadeçanāyām utsāhotpādaparāyanair* (*°adhiyuktair*) *jñātāḥ.*

तथा

ज्ञानेन ज्ञानाम्यहु स्कन्धशून्यतां ।
ज्ञात्वा च क्लेशेहि न संवसामि ।
व्याहारमात्रेण [हि] व्याहरामि
परिनिर्वृतो लोकमिमं चरामि ।

तथा[1]

परिनिर्वृत लोकि त शूरा
येहि स्वभावत ज्ञा[ति]मि धर्माः ।
कामगुणैर्हि चरन्ति ग्रसंगाः
सङ्गु विवर्जिय सत्त्व विनेन्ति[2] ॥ इति ॥

॥ इत्याचार्यचन्द्रकीर्तिपा[149 a]दोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ विपर्यासपरीक्षा नाम त्रयोविंशतितमं प्रकरणं ॥

---

1) Cette stance manque dans le tibétain.

2) Mss. *vineyantîti*.

XXIV.

आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं

अत्राह।

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते[(1)] ॥ १

यदि युक्त्या नोपपद्यत इति कृत्वा सर्वमिदं बाह्याध्यात्मिकं भावजातं शून्यमिति [Tib. 178a] प्रतिपादितं न[नु] चैवं सति बहवश्च महान्तश्च दोषा भवत आपद्यन्ते। कथं कृत्वा। यदि सर्वमिदं शून्यं स्यात्तदा यच्छून्यं तन्नास्ति यच्च नास्ति तदविद्यमानत्वाद्वन्ध्यापुत्रवन्नैवोत्पद्यते न चापि निरुध्यत इति न कस्यचित्पदार्थस्योदयो व्ययश्च। तदभावाच्च चतुर्णामार्यसत्यानामभावस्ते शून्यतावादिनः प्रसज्यते ॥

कथं कृत्वा। इह हि पूर्वहेतुजनिताः प्रतीत्यसमुत्पन्नाः पञ्चोपादानस्कन्धा दुःखदुःखतया विपरिणामदुःखतया संस्कारदुःखतया च प्रतिकूलवर्तित्वाच्च पीडात्मक[त्वे]न[(2)] दुःखमित्युच्यते[(3)]। एतच्च दुःखमार्या एव विपर्यासप्रहाणे सति दुःखमिति संजानते। ना-

---

1) གལ་ཏེ་ འདི་དག་ ཀུན་ སྟོང་ན། འབྱུང་བ་ མེད་ཅིང་ འཇིག་པ་ མེད། འཕགས་པའི་ བདེན་པ་ བཞི་པོ་རྣམས། ཁྱོད་ལ་ མེད་པར་ ཐལ་བར་འགྱུར॥

2) གནོད་པའི་ བདག་ཉིད་ཅན་ཉིད་ཀྱིས.

3) Voir ci-dessus 227, n. 1. — Bodhicaryāv. 346. 7. — Visuddhimagga XVI (J. P. T. S. 1893 p. 136). — Abhidh. k. v. (Soc. As.) fol. 388a et suiv. — *saṃskāraduḥkhatā* = *anityatāduḥkhatā*, d'après le passage suivant: *saṃskāreṇaiva duḥkhateti . saṃskaraṇenaiva jananenaivety arthaḥ . yad anityaṃ tad duḥkham, yan na niyatasthitaṃ tad duḥkham, yaj jāyate vinaçyati ca tad duḥkham ity arthaḥ . tenoktam [Koçe]: pratyayābhisaṃskaraṇād iti pratyayair abhisaṃskriyate yasmāt tasmāt tad duḥkham iti.* — Bhojarāja ad Yogas. II. 15 (*saṃskāraduḥkhatva*). — Nāmasaṃgītiṭ. 85 (*duḥkhaṃ saṃsāriṇaḥ skandhaḥ*). — Bhavya, 180b (Rockhill, Life, p. 189).

नार्या विपर्यासानुगतत्वात्। यथादर्शनं च पदार्थस्वभावव्यवस्थानात्। यथा हि विपर्यस्तेन्द्रियाणां मधुरस्वभावमपि गुडशर्करादिकं तिक्ततयोपलभमानानां ज्वरादिरोगातुराणां तिक्तमेव सत्यं तज्ज्ञानापेक्षया न माधुर्यं तेनात्मना तस्य वस्तुनोऽनुपलभ्यमानत्वात्। एवमिहापि यद्यपि पञ्चोपादानस्कन्धा दुःखस्वभावा भवन्ति तथापि य एतान् दुःखात्मकान् पश्यन्ति तेषामेव दुःखं व्यवस्थाप्यते। न विपर्यासानुगमादन्यथोपलभमानानामिति [149b]। अत [Tib. 178b] आर्याणामेव[1] दुःखात्मता सत्यमिति कृत्वा दुःखमार्यसत्यमित्युच्यते॥ ननु चानार्यैर्दुःखा वेदना दुःखमिति परिच्छिद्यत इति। एवं तत्कथं दुःखमार्याणामेव सत्यं। सत्यं न हि दुःखैव वेदना केवलं दुःखसत्यं किं तर्हि पञ्चाप्युपादानस्कन्धा इत्यत आर्याणामेव त[त्] सत्यमिति कृत्वा आर्यसत्यमिति व्यवस्थाप्यते॥ यथोक्तं

ऊर्णापक्ष्म[2] यथैव हि करतलसंस्थं न विद्यते पुंभिः।
अक्षिगतं तु तदेव हि जनयत्यरतिं च पीडां च॥
करतलसदृशो बालो न वेत्ति संस्कारदुःखतापक्ष्म।
अक्षिसदृशस्तु विद्वान् तेनैवोद्वेज्यते गाढं॥ इति।

तस्मादार्याणामेव तद्दुःखसत्यमिति दुःखमार्यसत्यं व्यवस्थाप्यते॥

कदा च तद्दुःखमार्यसत्यं युज्यते। यदा संस्काराणामुदयव्ययौ संभवतः। यदा तु शून्यत्वान्न किंचिदुत्पद्यते नापि किंचिन्निरुध्यते तदा नास्ति दुःखं॥

असति च दुःखे कुतः समुदयसत्यं। यतो हि हेतोर्दुःखं समुदेति समुत्पद्यते स हेतुस्तृष्णाकर्मक्लेशलक्षणः समुदय इत्युच्यते। यदा तु फलभूतं दुःखसत्यं नास्ति तदा फलरहितस्य हेतुकत्वानुपपत्तेः समुदयोऽपि नास्ति [Tib. 179a]॥

---

1) D'après le tibétain *tad [skandhapañcakam?] duḥkhātmatayā satyam*

2) *urṇāpakṣman* = སྤུ་ཉག་གཅིག་. — Comparer le *akṣipātranyāya*, Col. Jacob, Third handful, p. 103.

दुःखस्य च विगमो ऽपुनरुत्पादो निरोध इत्युच्यते। यदा तु दुःखमेव नास्ति तदा कस्य निरोधः स्यादिति। अतो दुःखनिरोधोऽपि न संभवति। अस[ति] हि दुःखे निरोधसत्यस्याप्यभावः। असति च दुःखनिरोधे कुतो दुःखनिरोधगामिनी आर्याष्टा[150a]ङ्गमार्गानुगा प्रतिपद्भविष्यतीति मार्गसत्यमपि नास्तीति॥

तदेवं शून्यत्वं भावानां ब्रुवतश्चतुर्णामार्यसत्यानामभावः प्रसज्यते। ततश्च को दोष इति। उच्यते।

परिज्ञा च प्रहाणं च भावना साक्षिकर्म च।
चतुर्णामार्यसत्यानामभावान्नोपपद्यते(1)॥ २

चतुर्णामार्यसत्यानामभावप्रसङ्गे सति यदेतदनित्यादिभिराकारैर्(2)दुःखसत्यपरिज्ञानं दुःखसमुदयस्य च प्रहाणं दुःखनिरोधगामिन्याश्च प्रतिपदो भावना दुःखनिरोधस्य च साक्षिकर्म साक्षात्(3)करणं तन्नोपपद्यते॥

यदि दुःखादीनामार्यसत्यानामभावे सति परिज्ञा[ना]दिकं नास्ति तदा को दोष इति। उच्यते।

तदभावान्न विद्यन्ते चत्वार्यार्यफलानि च।
फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः(4)॥ ३

---

1) འཕགས་པའི་བདེན་པ་ བཞི་ མེད་པས། ཡོངས་སུ་ཤེས་ དང་ སྤང་པ་ དང་། སྒོམ་ དང་ མངོན་དུ་བྱ་བ་དག །འཐད་པར་འགྱུར་པ་ མ་ཡིན་ནོ༎ — Nos Mss. portent ici *çāntikarma*, mais ci-dessous *sākṣikarma*.

2) Dh.-s. XCVII; M. Vyut. § 54.

3) མངོན་དུ་བྱ་བ་ སྟེ་ མངོན་སུམ་དུ་བྱ་བ་.

4) དེ་དག་ ཡོད་པ་ མ་ཡིན་པས། འབྲས་བུ་བཞི་ ཡང་ ཡོད་ མ་ཡིན། འབྲས་བུ་མེད་ན་ འབྲས་གནས་ མེད། ཞུགས་པ་དག་ ཀྱང་ ཡོད་ མ་ཡིན༎

संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ।
अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते(1) ॥ ४
धर्मे चासति संघे च कथं बुद्धो भविष्यति(2) ।

यदा चैवं दुःखपरिज्ञानादिकं [Tib. 179b] नास्ति तदास्मिन्नसति स्रोतआपत्तिसकृदागाम्यनागाम्यर्हत्फलाख्यं फलचतुष्टयं(3) नोपपद्यते । कथं कृत्वा । इह क्लेशानां

---

1) གལ་ཏེ་ སྐྱེས་བུ་གང་ཟག་ བརྒྱད། དེ་དག་ མེད་ན་ དགེ་འདུན་ མེད། འཕགས་པའི་ བདེན་པ་རྣམས་ མེད་ཕྱིར། དམ་པའི་ ཆོས་ ཀྱང་ ཡོད་ མ་ཡིན༎

2) ཆོས་ དང་ དགེ་འདུན་ ཡོད་ མེད་ན། སངས་རྒྱས་ ཇི་ལྟར་ ཡོད་པར་འགྱུར།

3) L'exposé qui va suivre des quatre fruits ou de la conquête de la qualité d'Arhat semble parfaitement conforme aux données de l'Abhidharmakoçavyakhyā. Bien que relevant du même principe que le système de l'Abhidharma pāli, ramenant comme lui la conquête des fruits et la pratique du chemin à l'élimination des *anuçayas* (Atthasālini, 324.1), distingant comme lui les trois *dhātus*, le *darçanamārga* et la *bhāvanā*, le système que nous avons ici s'écarte sur beaucoup de points des commentaires de Buddhaghoṣa. — Les sectes se sont beaucoup disputées sur les *anuçayas*, *paryutthānas*, etc. — Quelques références, Mde Rhys Davids, Man. of Psychology, *passim* et notamment 296, n. 1, 302, n. 1, 326, n. 1, Dhammasaṅgaṇī §§ 584, 1002—7, 1254—9; Warren, p. 193; Kathāvatthu I. 4, II. 7; Sumaṅgalavil. 19—20. Visuddhimagga (J. P. T. S. p. 158). — Ci-dessus p. 319.

D'après l'Abhidharmakoça, dont nous reproduisons ici les explications, les *anuçayas* [ཕྲ་རྒྱས] sont examinés au point de vue de leur *ākāra* ou nature propre, de leur *prakāra* ou de leur qualité d'être éliminés par la vue ou par la méditation des vérités, enfin du *dhātu* auquel ils appartiennent.

1. Le *rāga* est un dans sa nature, étant «attachement» *(saktyākāra)*; il peut appartenir aux trois *dhātus (kāma, rūpa, ārūpya)*, soit donc trois catégories dont chacune devra être éliminée par la vue de chacune des quatre vérités et par la méditation: donc 15 *anuçayas* relatifs au *rāga*.

2. De même pour le *pratigha* en ce qui regarde sa nature *(ākāra)* et son élimination *(prakāra)*; mais le *pratigha* n'existe pas dans les deux *dhātus* supérieurs: donc 5 *anuçayas* relatifs au *pratigha*.

3. Il en est du *māna* (tout *māna* est *unnatyākāra*) comme du *rāga*: donc 15 *anuçayas* relatifs au *māna*.

4. Nous avons de même 15 *anuçayas* relatifs à l'*avidyā* (toute *avidyā* étant *asaṃkhyāna-ākāra*).

प्रहाणं संपिण्डितं[1] फलाख्यां प्रतिलभते। तद्यथा। संयोजनत्रय[2]प्रहाणे[3] सति[4] षोडशे मार्गे

---

5. La ***vicikitsā*** est *saṃçaya-ākāra*; elle appartient aux trois *dhātus*; [mais elle est éliminée complètement par la vue des quatre vérités et la méditation n'a pas à intervenir] [1]); nous avons 4×3=12 *anuçayas* relatifs à la *vicikitsā*.

1) Les explications entre parenthèses sont empruntées à l'exposé de la Madhyamakavṛtti; elles ne sont pas données *in loco* dans l'Abhidh. koça. Le fait qu'elles justifient les totaux constitue une suffisante sécurité.

6. A la *dṛṣṭi* se rapportent 36 *anuçayas*. Nous savons qu'elle est multiple dans sa nature, dans les modes nécessaires d'élimination, et dans les *dhātus* auxquels elle se rattache.

On a cinq espèces de *dṛṣṭi (satkāya°, antagrāha°, mithyā°, dṛṣṭiparāmarça, çīlavrataparāmarça)*, relatives aux trois *dhātus*, exigeant pour leur élimination le *duḥkhasatyadarçana* (qui comporte les quatre premiers *kṣaṇas* du *ṣoḍaçakṣaṇa*) soit 5×3×1=15.

La *mithyādṛṣṭi* et le *dṛṣṭiparāmarça* exigent en outre le *samudaya°* et le *nirodhadarçana*. En tenant compte des trois *dhātus*, on a 2 *ākāras* ×2 */prahāṇa/prakāras* ×3 *dhātus* =12 *anuçayas*.

La *mithyādṛṣṭi*, le *dṛṣṭiparāmarça* et le *çīlavrataparāmarça* exigent en outre le *mārgadarçana*. Soit, en tenant compte des trois *dhātus* qui sont le domaine de ces *dṛṣṭis*: 3×3×1=9.

La *bhāvanā* (méditation) n'a pas à intervenir.

L'Abhidh. k. distingue donc, comme notre texte, 98 *anuçayas*, parmi lesquels 10 réclament pour leur élimination la *bhāvanā*, savoir un *pratigha* (sphère du désir), trois *rāgas*, trois *mānas*, trois *avidyās* (dans les trois sphères). [Voir p. 484, n. 2 et Additions et Corrections.]

1) = སྡོམ་པ.

2) Sur *prahāṇa*, *vihāna* et *visaṃyoga*, voir Additions.

3) Ces trois *saṃyojanas* (ཀུན་དུ་སྦྱོར་བ) sont ceux qui sont éliminés par le 'premier chemin' (chemin du *sotaāpanna*); ou, ce qui revient au même, ceux qui sont éliminés par le *satyadarçana*, sans intervention de la *satyabhāvanā*. (Voir ci-dessous, p. 484 l. 8, et Dhammasaṅgaṇi, § 1002, Man. of Psychology, p. 256, suiv.). Sur ces définitions notre texte est d'accord avec les autorités pâlies. L'accord cesse quand on passe à l'énumeration. On a, d'après la source pâlie, *satkāyadṛṣṭi, vicikitsā, çīlavrataparāmarça*. Ici nous devons entendre les cinq *dṛṣṭis* (voir ci-dessus) et la *vicikitsā*, quel que soit le procédé par lequel on les ramène à trois chefs.

4) Les seize *kṣaṇas* ou *cittakṣaṇas* du *darçanamārga*, dont le dernier correspond à l'acquisition du fruit de *srotaāpanna*, sont énumérés M. Vyut. § 56. A chaque Noble Vérité correspond une *jñānakṣānti* et un *jñāna* (adhésion à une connaissance, possession de cette connaissance ??), qui se subdivisent en 'patience',

ऽन्वयज्ञानक्षणे यत्क्लेशप्रहाणं[1] तत्स्रोतआपत्तिफलं ॥ कामावचराणां भावनाप्रहातव्यानां[2] क्लेशानामधिमात्रमध्यमृदूनां प्रकाराणां पुनरधिमात्रमध्यमृदुप्रकारभेदेन प्रत्येकं [150 b] भिद्यमानानां नव प्रकारा[3] भवन्ति । तत्र कामावचरषष्ठक्लेशप्रकारपरिक्षये[4] विमुक्तिमार्गे

'connaissance' relatives au *kāmadhātu*, et 'patience', 'connaissance' relatives aux *dhātus* de la matière et de la non-matière [a]. — On a donc:

duḥkhe
- *dharmajñānakṣānti,*
- *dharmajñāna,*
- *'nvayajñānakṣānti,*
- *'nvayajñāna.*

et ainsi de suite.

(a) *dharmajñāna* = *kāmasaṃprayukteṣu saṃskāreṣu yad anāsravaṃ jñānam* (pour la douleur), *kāmasaṃprayuktānāṃ saṃskārāṇāṃ hetau yad anāsravaṃ jñānam* (pour la production), etc. *anvayajñāna* = *rūpārūpyaprati-saṃyukteṣu saṃskāreṣu yad anāsravaṃ jñānam*, etc. (Abhidh. k. v. Burn. 425 a).

Les 'moments' d'ordre impair, à savoir les *jñānakṣāntis*, constituent l'*ānantaryamārga*, qui est préparatoire; les *jñānas* constituent le *vimuktimārga*. (M. Vyut. 54. 18—19).

D'après la définition de notre texte, on a: *srotaāpattiphala* = l'élimination des *kleças* qui correspond au seizième moment du *darçanamārga*, savoir au *mārge nvayajñāna*.

1) Les *kleças* sont ou *darçana*° ou *bhāvanāprahātavya*. L'élimination des premiers constitue le *srotaāpattiphala*; l'élimination des seconds constitue les trois autres fruits. Sur le *darçana* (seeing, vision, insight) voir la note substantielle de M^de Rhys Davids, Psychology ad 1002; sur la *bhāvanā* (practice, culture), ibidem ad 1007. L'Abhidharmakoça explique: *yo hi kleço yasya satyasyāpavādāya pravṛttaḥ, sa tasmin dṛṣṭe prahīyate, sarpabhrāntir iva rajjudarçanāt. satyānāṃ darçanamātreṇa prahāṇād iti nābhyāsena prahāṇād ity abhiprāyaḥ.*

2) C'est-à-dire *rāga, pratigha, māna* et *avidyā* (M. Vyut. § 104, 23. 24 25. 32; § 109. 69). — Le *pratigha* n'existe que dans la sphère du *kāma* (*kāmāvacara*, °*pratisaṃyukta*, °*āpta*, °*dhātuparyāpanna*, M. Vyut. § 109. 65, 70—72; འདོད་པ་ན་སྤྱོད་པ). Les trois autres *kleças* sont du domaine des trois *dhātus* (*rūpa, ārūpya*). Voir Man. of Psychology, xliv, §§ 1080—5, p 377, n. 3.

3) Les neuf catégories sont *adhimātra-adhimātra, madhya-adhimātra, mṛdu-adhimātra, adhimātra-madhya, madhya-madhya*, etc.

4) Le tibétain porte ཟད་པས = °*parikṣayāt*.

यत्प्रहाणं [तत्] सकृदागामिफलं(1)। तेषामेव कामावचराणां क्लेशानां नवमप्रकारक्लेशपरिक्षये विमुक्तिमार्गे यत्क्लेशप्रहाणं तदनागामिफलं(1)। रूपारूप्यावचराणां क्लेशानां भावनाप्रहातव्यानां भूमौ भूमौ नवप्रकारभेदभिन्नानां यावन्नैवसंज्ञानासंज्ञायतनभूमिकनवमक्लेशप्रकारपरिक्षये विमुक्तिमार्गे यत्प्रहाणं तदर्हत्फलमित्येतानि(1) चत्वारि फलानि ॥

तान्येतानि कथं युज्यन्ते ' यदि दुःखस्य परिज्ञानं संभवति समुदयस्य प्रहाणं निरोधस्य साक्षात्करणं आर्यमार्गस्य भावना भवति । यदा तु दुःखादीनामार्यसत्यानामभावे सति दुःखपरिज्ञानादिकं नास्ति ' तदा न सन्ति तानि चत्वारि च फलानि ' चतूर्णां च फलानामभावे सति ये [Tib. 180 a] तेषु व्यवस्थिताः फलस्थाश्चत्वार आर्यपुद्गलास्ते न सन्ति ' अत एव च प्रतिपन्नका(2) अपि चत्वार आर्यपुद्गला न संविद्यन्ते ।

इह हि षोडशान्मार्गेऽन्वयज्ञानक्षणात्पूर्वे ये पञ्चदश क्षान्तिज्ञानक्षणाः(3) ' तद्यथा त्रैधातुकदुःखाभिसमये(4) दुःख[सत्य](5)आलम्बनाश्चत्वारः क्षान्तिज्ञानक्षणाः ।

तत्र कतमे त्रैधातुकदुःखाभिसमये चत्वारः क्षान्तिज्ञानक्षणाः । तद्यथा(6) ' कामावच-

1) Voir p. 484, n. 2.

2) Le *pratipannaka*, ou 'candidat au fruit' de *srotaāpatti*, est celui qui se trouve dans un des quinze 'moments' antérieurs au seizième, lequel se confond avec le fruit. — Ou bien le *pratipannaka* est le possesseur du quinzième moment, voir p. 485. 9 et 12. La question reste obscure.

3) བཟོད་པ་ དང་ ཤེས་པའི་ སྐད་ཅིག་. Il faut entendre quinze moments, les uns de *[jñāna]kṣānti* et les autres de *jñāna*, à savoir huit *jñānakṣāntikṣaṇas* et sept *jñānakṣaṇas* (le huitième *jñānakṣaṇa* = le fruit).

4) མངོན་པར་ རྟོག་པ་ དེའི་ ཚེ et ci-dessous (ligne 12) མངོན་པར་ རྟོག་པའི་ དུས་ཀྱི. — Voir M. Vyut. 54. 20—21 *abhisamayāntikam, kṣayajñānalābhikam kuśalamūlam.*

5) Nous restituons *satya*, contre les Mss. et le tibétain, d'après l'analogie de p. 482, 3 etc.

6) D'après notre texte, — car l'Abhidharmakoçav. signale des divergences d'école, — les quatre moments de la 'vue' de la vérité de la douleur répartissent ainsi leur activité:

रदुःखदर्शनप्रहातव्यसत्कायान्तग्राहमिथ्यादृष्टिदृष्टिपरामर्शशीलव्रतपरामर्शविचिकित्सारागप्रतिघमानाविद्याख्यदशानुशयप्रतिपक्षो ऽनित्यदुःखशून्यानात्माकारोत्पन्नः कामावच[151 a]रदुःखसत्यालम्बन आनन्तर्यमार्ग[ल]क्षणो दुःखे धर्मज्ञानक्षान्तिक्षण एकः। तदालम्बनाकार एव [च] विमुक्तिमार्गलक्षणो दुःखे धर्मज्ञानक्षणो द्वितीयः। एवं रूपारूप्यावचरदुःखसत्यालम्बनः प्रतिघवर्जितानन्तरोक्ताष्टादशानुशयप्रतिपक्षो (1) दुःखाद्याकारोत्पन्न आनन्तर्यमार्गलक्षणो दुःखेऽन्वयज्ञान[Tib. 180b]क्षान्तिक्षणस्तृतीयः। तदालम्बनाकार एव [च] विमुक्तिमार्गलक्षणो दुःखेऽन्वयज्ञानक्षणश्चतुर्थः॥

(2) यथा चैते त्रैधातुकावचरदुःखसत्याभिसमये क्षान्तिज्ञानक्षणाश्चत्वार एवं कामावचरसमुदयदर्शनप्रहातव्यमिथ्यादृष्टिदृष्टिपरामर्शविचिकित्सारागप्रतिघमानाविद्याख्यसप्तानुशयप्रतिपक्षो हेतुसमुदयप्रभवप्रत्ययाकारोत्पन्नः कामावचरसमुदयसत्यालम्बन आन-

---

1. Le premier moment (*kṣānti*, donc *ānantaryamārga*, chemin préparatoire) exerce son pouvoir éliminatoire sur les dix *anuçayas* (voir p. 478 n. 3), en tant qu'ils sont du domaine du désir.

2. Il en est de même du deuxième, avec cette différence qu'étant *jñana*, il appartient au *vimuktimārga*.

3. Le troisième porte sur les dix *anuçayas*, moins le *pratigha*, en tant qu'ils sont du domaine de la matiére et de la non-matiére. Soit dix-huit *anuçayas*

4. Le quatrième est semblable au troisième, à cela près qu'il est du *vimuktimārga*.

En résumé, le *duḥkhasatyadarçana* s'attaque aux dix *anuçayas* de la sphére du désir, et aux neuf *anuçayas* des deux autres sphéres; il comporte l'élimination de 28 *anuçayas* définis comme *duḥkhadarçanaprahātavya* «éliminables par la vue de la vérité de la douleur» (10+9+9).

Il faut noter que dans le premier *dhātu*, *rāga* = *kāmarāga*; dans les deux *dhātus* supérieurs, *rāga* = *bhavarāga*.

1) Donc, dans les sphères supérieures, on ne tient pas compte du premier aspect (*ākāra*) de la vérité de la douleur, à savoir *anitya*. De même, pour le *samudaya*, on écarte dans les mêmes sphères le *hetv-ākāra*, voir p. 483, n. 1, et aussi 483, l. 11, 484, l. 2.

2) Pour le *samudayadarçana*, on a, pour les deux premiers moments, sept *anuçayas* de la sphére du désir; pour les deux derniers, six *anuçayas* des deux sphéres superieures (où il n'y a pas de *pratigha*). Soit donc 7, 6, 6 = 19 *anuçayas* Il y a trois *anuçayas*, à savoir trois *dṛṣṭis* (*satkāya*° *antagrāha*° et *çīlavrataparāmarça*) à l'élimination desquels ne concourt pas la vue de la vérité de la production de la douleur.

न्तर्यमार्गलक्षणः समुदये धर्मज्ञानक्षान्तिक्षण एकः। तदालम्बनाकार एव च विमुक्तिमार्गलक्षणः समुदये धर्मज्ञानक्षणो द्वितीयः। एवं रूपारूप्यावचरसमुदयसत्यालम्बनः प्रतिघवर्जितानन्तरोक्तद्वादशानुशयप्रतिपक्षः समुदयसत्याकारोत्पन्न (1) आनन्तर्यमार्गलक्षणः समुदयेऽन्वयज्ञानक्षान्तिक्षणस्तृतीयः। तदालम्बनाकार एव च विमुक्तिमार्गलक्षणः समुदयेऽन्वयज्ञानक्षणश्चतुर्थः। इत्येते त्रैधातुकावचरदुःखसमुदयसत्याभिसमये [Tib. 181 a] चत्वारः क्षणाः ॥

(2) यथा चैते चत्वारः क्षणास्त्रैधातुकदुःखसमुदयसत्याभिसमय एवं कामावचरदुःख- [151 b]निरोधदर्शनप्रहातव्यसमुदयोक्त(3)सप्तानुशयप्रतिपक्षो निरोधशान्तप्रणीतनिःसरणाकारोत्पन्नः (4) कामावचरदुःखनिरोधसत्यालम्बन आनन्तर्यमार्गलक्षणो निरोधे धर्मज्ञानक्षान्तिक्षण एकः। तदालम्बनाकार एव च विमुक्तिमार्गलक्षणो निरोधे धर्मज्ञानक्षणो द्वितीयः। एतैरेवाकारै रूपारूप्यावचरदुःखनिरोधसत्यालम्बनः प्रतिघवर्जितद्वादशानुशयप्रतिपक्ष आनन्तर्यमार्गलक्षणो निरोधेऽन्वयज्ञानक्षान्तिक्षणस्तृतीयः। तदालम्बनाकार एव च विमुक्तिमार्गलक्षणो निरोधेऽन्वयज्ञानक्षणश्चतुर्थः। इत्येते त्रैधातुकावचरदुःखनिरोधसत्याभिसमये चत्वारः क्षणाः ॥

एवं कामावचरदुःखनिरोधगामिमार्गदर्शनप्रहातव्यनिरोधोक्ता(5)नुशयेषु शीलव्रतपरामर्शमष्टमं (6) प्रक्षिप्याष्टानुशयप्रतिपक्षो मार्गन्यायप्रतिपन्नैर्याणिकाकारोत्पन्नः कामाव-

1) Lecture confirmée par le tibétain; peut-être *samudayādyakara*°.

2) Même théorie pour le *nirodhadarçana*. Même nombre d'*anuçayas* éliminables.

3) Opposé aux *anuçayas* qui doivent être éliminés par *nirodhadarçana*, c'est-à-dire aux sept qui sont nommés à propos du *samudaya*.

4) རྣམ་པར་ སྐྱེས་པ་.

5) Comparer ci-dessus l. 8. — འགོག་པ་ལ་ བསྡད་པ་དག་ལ་.

6) Pour le *mārgadarçana*, il faut ajouter le *çīlavrataparāmarça*. On aura donc pour les trois *dhātus* 8, 7, 7 *anuçayas*.

चरदुःखनिरोधगामिमार्गालम्बन आनन्तर्य[Tib. 181 b]मार्गलक्षणो मार्गे धर्मज्ञानक्षान्तिक्षण एकः। तदालम्बनाकार एव च विमुक्तिमार्गलक्षणो मार्गे धर्मज्ञानक्षणो द्वितीयः। एतैरेवाकारै रूपारूप्यावचरदुःखनिरोध[गामि]मार्गालम्बनः प्रतिघवर्जितचतुर्दशानुशयप्रतिपक्ष आनन्तर्यमार्गलक्षणो मार्गेऽन्वयज्ञानक्षान्तिक्षणस्तृतीयः। इत्येते पञ्चदश क्षणा दर्शनमार्गाभिधानाः॥

एवं व्यवस्थित आर्यः स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नक इत्युच्यते। षोडशे तु मार्गेऽन्वयज्ञानस्थितः स स्रोतआपन्न इत्युच्यते॥

त एतेऽष्टाशीतिरनुशयाः(1) सत्या[152 a]नां दर्शनमात्रेण भावनामनपेक्ष्यैव प्रहीयन्त इति कृत्वा दर्शनप्रहातव्या इत्यच्युन्ते।

यथादृष्टसत्याकारभावनया तु ये पश्चात्प्रहीयन्ते ते भावनाप्रहातव्याः। ते च दशानुशया(2) भवन्ति। कामावचरा रागप्रतिघमानाविद्याः। रूपावचरा एव प्रतिघवर्जिता-

---

1) On a 28 *anuçayas* élimines par la vue de la vérite de la douleur, 19 pour la production, 19 pour la destruction, 22 pour le chemin.

2) Les *kleças* ou *anuçayas* «qui doivent être éliminés par la méditation» sont *pratigha* (sphère du desir), *rāga*, *māna*, *avidyā* (dans les trois sphères) Soit dix *anuçayas*.

Ils forment neuf catégories: *adhimātra-adhimātra*, *madhya-adhimātra*, etc. Pour l'élimination de chacune d'elles, il faut deux moments (*jñāna-kṣaṇas*), le premier appartenant à l'*ānantaryamārga*, le second au *vimuktimārga*. Une connaissance *mṛdu-mṛdu* suffit à éliminer la passion *adhimātra-adhimātra*; mais il faut la connaissance *adhimātra-adhimātra* pour éliminer la catégorie la plus subtile de la passion. — Comparaison du blanchisseur.

Les fruits du Sakṛdāgāmin et de l'Anāgāmin, comportent l'élimination, par méditation, du *pratigha*, et des *rāga*, *māna* et *avidyā* dans la sphère du désir. Le Srotaāpanna les a déja éliminés dans la mesure où la 'vue des vérités' les élimine.

Le fruit du Sakṛdāgamin est obtenu par l'expulsion des six catégories *adhimātra* et *madhya*; celui d'Anāgāmin par l'expulsion des trois catégories *mṛdu*. Il ne reste donc plus chez ce saint aucune trace des passions de la sphère du désir: aussi ne renaît-il plus dans cette sphère, étant délivré des *kleças kāmāvacaras* = *avarabhāgīya saṁyojana* (M. Vyut. 109. 74, comp. *orambhāgiya* Childers, p. 444).

Le fruit d'Arhat correspond à l'élimination de *rāga*, *māna*, *avidyā* dans les sphères de la matière et de la non-matière. Ces deux sphères se subdivisent

त्रयः । आरूप्यावचराश्च त्रय एत एवेति दश भवन्ति ॥ एते च यथोक्तेन न्यायेन भूमौ भूमौ नवधा भिद्यन्ते कामधातौ चतुर्षु ध्यानेषु चतुर्ष्वारूप्येषु[1] । एकैकस्य च क्लेशप्रकारस्य प्रहाणार्थमानन्तर्यविमुक्तिमार्गभेदेन द्वौ द्वौ [Tib. 182a] ज्ञानक्षणौ व्यवस्थाप्येते क्लेशक्षणपर्यायेण । अधिमात्राधिमात्रो हि क्लेशप्रकारो मृदुमृदुभ्यामानन्तर्यविमुक्तिमार्गाभ्यां प्रहीयते । यावन्मृदुमृदुक्लेशप्रकारोऽधिमात्राधिमात्राभ्यां ज्ञानक्षणाभ्यां प्रहीयते । स्थूलं हि मलमल्पप्रयत्नसाध्यं सूक्ष्मं तु महायत्नसाध्यं रजकवस्त्रधावनसाधर्म्येणेति[2] विज्ञेयं ॥

तत्र दर्शनमार्गादूर्ध्वं कामावचरभावनाप्रहातव्यषष्ठक्लेशप्रकारप्रतिपक्षविमुक्तिमार्गाख्यज्ञान[क्षण]दर्वाग्ज्ञानक्षणावस्थित[3] आर्य[ः] सकृदागामिफलप्रतिपन्नक इत्युच्यते । सकृदिमं लोकमागत्य परिनिर्वाणात्सकृदागामीत्युच्यते । तत्फलार्थं प्रतिपन्नपकः प्रयोगस्थः सकृदागामिफलप्रतिपन्नक इत्युच्यते । षष्ठे तु क्षणे सकृदागामी[त्युच्यते] ॥

पश्चात्क्षणादूर्ध्वं नवमक्लेशप्रकारप्रहाणविमुक्तिमार्गक्षणादर्वाग्ज्ञानक्षणेषु[4] वर्तमान आर्यो ऽनागामि[152 b]फलप्रतिपन्नक इत्युच्यते । अनागत्येमं लोकं तत्रैव परिनिर्वाणा-

---

chacune en quatre degrés (ou *bhūmis*), correspondant aux quatre *dhyānas* et aux quatre *arūpyasamāpattis*. L'Arhat est celui qui a élimine la neuvième catégorie (*mṛdumṛdu*) des *kleças* appartenant au quatrième *ārūpya* (*naivasaṃjñānāsaṃjñāyatanabhumika* = *bhavāgrika*; comp. les dieux supérieurs de l'*arupya*, et le septième *vimokṣa*).

1) Mss. *caturṣu rūpyeṭu.* — བྱེ་བ་ ཡོད་དེ། འདོད་པའི་ ཁམས་ དང་ བསམ་གཏན་ བཞི་ དང་ གཟུགས་མེད་པ་ བཞི་པོ་དག་ཏུའོ. — M Vyut 67 68.

2) Mss. *mahāyatnarajakavastradhavanasya karmaṇeti* — ཁྲུས་མཁན་ གོས་ འཁྲུ་བ་ དང་ ཆོས་ མཚུངས་པར.

3) Ci-dessous °*kṣaṇeṣu vartamāna.* Le tibetain n'a nulle part la marque du pluriel. — Il porte à tort semble-t'il: *'arvak* [*kāmāvacarabhāraṇāprahātavyaṣaṭkleçapratipakṣe*] *jñānakṣaṇe 'vasthitaḥ*.

4) Si ces lectures sont correctes, quiconque occupe un *kṣaṇa* intermédiaire entre deux fruits, est dit *pratipannaka* du fruit supérieur.

दनागामीत्युच्यते । तत्फलार्थं प्रतिपन्नकः [प्रयोगस्थः] अनागामिफलप्रतिपन्नक इत्युच्यते । नवमे तु क्षणेऽनागामीत्युच्यते [Tib. 182b] ॥

[1]कामावचरनवमविमुक्तिमार्गक्षणादूर्ध्वं नैवसंज्ञानासंज्ञायतनभूमिकनवमक्लेशप्रकारप्रहाणविमुक्तिमार्गक्षणादर्वाग्ज्ञानक्षणेषु वर्तमान आर्योऽर्हत्फलप्रतिपन्नक इत्युच्यते । सदेवमानुषासुराल्लोकात्पूजार्हत्वादर्हन्नित्युच्यते । तत्फलार्थं प्रतिपन्नकः प्रयोगस्थः [अर्हत्फलप्रतिपन्नक इत्युच्यते] । भवाग्रिक[2]नवमक्लेशप्रकारप्रहाणात्तु नवमविमुक्तिमार्गे व्यवस्थितोऽर्हन् भवति ॥

त एते चत्वारः प्रतिपन्नकाः पुद्गलाश्चत्वारश्च फलस्था इत्येतेऽष्टौ महापुरुषपुद्गला[3] भवन्ति । परमदक्षिणार्हा उक्ता भगवता । यथोक्तं सूत्रे[4] ।

पृष्टः स देवराजेन शक्रेण वशवर्तिना[5] ।
कृषतां[6] यजमानानां प्राणिनां पुण्यकाङ्क्षिणां[7] ॥

---

1) Le tibétain diverge: སྐད་ཅིག་མ་ དགུ་པའི་ འོག་རོལ་ཏུ་ འཕགས་པ་ སྲིད་པའི་ རྩེ་མོའི་ ཉོན་མོངས་པའི་ རྣམ་པ་ དགུ་པའི་ གཉེན་པོ་ རྣམ་པར་གྲོལ་བའི་ ལམ་ཞེས་བྱ་བའི་ ཡེ་ཤེས་ཀྱི་ སྔ་རོལ་གྱི་ ཡེ་ཤེས་ཀྱི་ སྐད་ཅིག་མ་ལ་ གནས་པ་ནི་ དགྲ་བཅོམ''' = *navamakṣaṇād ūrdhvaṃ bhavāgrikanavamakleçaprakārapratipakṣavimukti-mārgākhyajñānād arvāg jñānakṣaṇe vartamāna āryo 'rhatphalapratipannaka* ..

2) *bhavāgrika* = *naivasaṃjñānāsaṃjñāyatanabhūmika.*

3) གང་ཟག་ སྐྱེས་བུ་ ཆེན་པོ.

4) Comparer Sam. N. I p. 233: *yajamānānām manussānam, puññapekkhāna pāṇinaṃ, karotam opadhikam puññam, saṃghe dinnam mahapphalam cattāro ca paṭipannā, cattāro ca phale ṭhitā, esa saṃgho ujubhūto, paññasīlasamāhito.* — Les mêmes stances citées, dans l'ordre inverse, dans Vimānavatthu (pages 32 et 41) et Aṅg. IV. 292-3 [R. O. Franke]; voir Minayeff, Recherches, p. 172.

5) Sic Camb. — Paris *kleçavartinā*, Calc. *kleçavaçavartinā.* — C'est aussi Sakka qui interroge Bhagavat dans le Saṃyutta.

6) Mss. *ṣṭaṣatām jāyamānānām, kṛṣatām*..... སྲོག་ཆགས་ ཞིང་པ་ རྒྱལ་ འགྱུར་ཞིང་ = *prāṇi[nāṃ] kṛṣīval[ānām] jayamānānām.*

7) འདོད་པ'''. — Mss. °*kāṅkhinām.*

कुर्वतां श्रद्दधानानां पुण्यमौ[1]पधिकं सदा।
[2]सुक्षेत्रं ते प्रवक्ष्यामि यत्र दत्तं महत्फलं॥
प्रतिपन्नकाश्चत्वारश्चत्वारश्च फलस्थिताः।
[3]एष संघो दक्षिणी[4]यो विद्याचरणसं[5]पदा॥ इति।

यदि चत्वार्यार्यसत्यानि न सन्ति तेषां च परिज्ञानादीनि। तदा सत्यदर्शनभावनालभ्यानां फलानामभावात्प्रतिपन्नकफलस्थपुद्गलानामभाव एव। अतश्च संघो नास्ति। तत्राधिगमधर्मेण प्रत्यन्तधर्मतया सर्वमारैरपि[6] बुद्धे [Tib. 183a] भगवत्यभेद्यत्वादवेत्यप्र[7]सादलाभेन संघः स न स्यात्। न चेत्सन्ति [153a] ते ऽष्टौ पुरुष[8]पुद्गलाः।

आर्यसत्यानां चाभावात्सद्धर्मोऽपि न संभवति। सतामार्याणां धर्मः सद्धर्मः। तत्र

---

1) རྫས་ལས་ བྱུང་བའི་ བསོད་ནམས. — Voir Minayeff, loc cit.; M. Vyut. § 93 et ci-dessus 310, note 1.

2) བཟང་པོ.

3) Mss *evam, eva*

4) Littéralement སྦྱིན་གནས་གྱུར་ཅིང་ = *dānasthānabhūta*.

5) Mss. *sāmpadeti.*

6) Sic Mss. — བདུད་ ཐམས་ཅད་ཀྱིས་ ཀྱང་། བཅོམ་ལྡན་འདས་ལས་ མི་ཕྱེད་པས། inséparable de Bhagavat même par l'effort de tous les *māras*.

7) *avetyaprasādalābhena* manque dans le tibétain. — Voir Avadānaçataka, II, p. 92 et la note. M. Vyut. 245. 418 [ཤེས་ནས་དད་པ]. Takakusu, JPTS. 1905 p. 112. — On a aussi *çraddhāvetyajñāna*, Abhidh. k. v., Burn. 134a.

8) Cette définition du Saṃgha est la définition orthodoxe: *cattāro purisayugāti* (Kathāvatthu, Comm. I. 1. 224) Les hérétiques Vetulyakas (XVII. 6) soutiennent que le Saṃgha est constitué par les seuls possesseurs des fruits. — On observe le même flottement dans le Grand Véhicule; il semble parfois que les seuls Bodhisattvas maîtres des terres constituent le Saṃgha; mais on leur adjoint souvent de simples candidats aux terres, qui correspondent aux *pratipannakas* du Petit Véhicule.

निरोधसत्यं फलधर्मः । मार्गसत्यं तु फलावतारधर्मः । एष तावदधिगमधर्मः । तत्संप्रकाशिका देशना आगमधर्मः[1] । सर्व एष आर्यसत्यानामभावे सति नास्तीति ।

अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ।
धर्मे चासति संघे च कथं बुद्धो भविष्यति ।

यदि हि यथोक्तो धर्मः स्यात्तदा धर्मानुधर्मप्रतिपत्त्या[2] सर्वाकारसर्वधर्माभिसंबोधाद्बुद्धो भवतीति युक्तं स्यात् । यदि च संघः स्यात्तदा तदुपदेशेनोपचीयमानज्ञानसंभारस्तद्दानमानशरणगमनादिभिश्चोपचीयमानपुण्यसंभारः[3] क्रमाद्बुद्धो भवेत् ।

अथ वा असति संघे स्रोतआपत्तिफलप्रतिपन्नकादीनामभावः स्यात् । न च प्रतिपन्नकादित्वमप्राप्य बुद्ध[त्व]माप्यते । अवश्यं हि पूर्वं भगवता कस्मिंश्चित्फले व्यवस्थातव्यं । तत्र च फले व्यवस्थितः संघान्तःपात्येव भगवान्भवति । संघे चासति नियतं नास्ति भगवान्बुद्धः [Tib. 183b] ।

अथ भगवानप्यशैक्षान्तर्भावात्संघान्तर्गत एव । तथा च बुद्धप्रमुखो भिक्षुसंघ इत्यभिधानात्संघान्तर्गत[4] एव भगवानिति केचिद्वर्णयन्ति । तेषां मतेन स्पष्टमेवैतत् ।

धर्मे चासति संघे च कथं बुद्धो भविष्यतीति ॥

---

1) Voir ci-dessus p. 304, 457. 1 et XXVII. 30.

2) Mss. *taddharma*°. — ཆོས་དང་རྗེས་སུ་མཐུན་པའི་ཆོས་ཀྱི་ནན་ཏན་གྱིས — Sur *anudharma*, Suttanipāta 69, Dhammapada 20; M. Vyut § 48, 49–50, § 281. 120. — Voir Bodhisattvabhūmi I, viii, § 4.

3) Sur les deux *saṃbhāras*, connaissance et mérite, voir pour le Petit Véhicule Abhidh. k. v. Burn 443 a *saṃbhārena mahāpuṇyajñānasaṃbhārasamudāgamād iti .... tatra mahāpuṇyasaṃbhāras tisraḥ pāramitāḥ, dānaçīlakṣāntipāramitaḥ . mahājñānasaṃbhāraḥ prajñāpāramitā* ... — Cette notion, étrangère aux Écritures palies, a été empruntée au Grand Véhicule par les Sautrāntikas (?).

4) Le Bouddha fait-il partie du Saṃgha? Voir les opinions divergentes des sectes, Wassiliew, p. 98, Rockhill, Life, p. 192. — La formule *buddhapramukho* ..... est courante, Çikṣās. 312. 13, etc.

मध्योद्देशिकाश्च[1] महावस्तूपदिष्टभूमिव्यवस्थया प्रथमभूमिस्थितं बोधिसत्त्वमुत्पन्नदर्शनमार्गं व्याचक्षाणाः संघान्तःपातिनं व्याचक्षते । तदा संघे चासति बोधि[153 b]सत्त्वोऽपि नास्तीति कथं बुद्धो भविष्यतीति स्पष्टमेवैतत् । तद् ।

एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे । ५

शून्यतां ।

शून्यतामित्येवं वदन् बुद्धधर्मसंघाख्यानि त्रीण्यपि दुर्लभत्वात्कदा चिदेवोत्पत्तितो ऽल्पपुण्यानां च तदप्राप्तेर्महार्घमूल्यत्वाद्रत्नानि प्रतिबाधसे ॥

किं चान्यत ।

शून्यतां फलसद्भावमधर्मं धर्ममेव च ।
सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे[2] ॥ ६

---

1) Mss. *madhyādd°*. — བར་མ་ འདོན་པར་ བྱེད་པ་དག (*madhya-pāṭhaka*). — De notre texte il résulte que, d'après le Mahāvastu, le Bodhisattva possède dès la première *bhūmi* le fruit de *srotaāpatti*; telle est, en effet, la portée du terme *utpannadarçanamārga*. Le Mahavastu est bien loin d'être clair. D'après l'éditeur (I. 78. 11): «Les Bodhisattvas, dans la première terre, d'hommes ordinaires qu'ils étaient, obtiennent l'acquitition du fruit» (voir p 437 et contra xxvii) et 102. 13: «Les Bodhisattvas des sept premières terres, par suite de leur qualité de *pṛthagjanas* ..». — Le Daçabhūmaka (cité Madhyamakāvatāra, p. 60) enseigne, que les Bodhisattvas de la troisième terre sont déja dépouillés de toute *dṛṣṭi*; que, par conséquent, ils sont des *srotaāpannas* (voir ci-dessus p 479). — Voir l'article Bodhisattva dans Hastings' Encyclopaedia of Religion and Ethics.

2) དེ་ལྟར་ སྟོང་པ་ཉིད་ སྨྲ་ན། དཀོན་མཆོག་གསུམ་ལ་ གནོད་ པ་ སྟེ། བྱེད་ཅིང་ འབྲས་བུ་ ཡོད་པ་ དང་། ཆོས་ མ་ཡིན་ དང་ ཆོས་ ཡིན་ དང་། འཇིག་རྟེན་པ་ཡི་ ཐ་སྙད་ ནི། ཀུན་ལ་ གནོད་པ་ བྱེད་པ་ ཡིན། = *evaṃ çūnyatāṃ vadan / triratnapratibādham ca / kurvan phalasadbhāvam* ... — Akutobhaya suit le texte de plus près དེ་ལྟར་ སྨྲ་ན་དཀོན་པའི་ མཆོག། གསུམ་ལ་ གནོད་པ་ བྱེད་པ་ཡིན། སྟོང་ཉིད་ འབྲས་བུ་ ཡོད་པ་····

शून्यतां ब्रुवाण इत्यनेन संबन्धः ॥ यदि सर्वमिदं शून्यं यदा सर्वमेव नास्ति तदा सर्वान्तःपातित्वाद्धर्माधर्मौ सह तद्धेतुकेनेष्टानिष्टफलेन न संभवतः [Tib. 184a] । सर्व एव चामी लौकिका व्यवहाराः कुरु पच खाद तिष्ठ गच्छागच्छेत्येवमादयो ऽपि सर्वान्तर्गतत्वात्सर्वधर्माणां च शून्यत्वान्नैव युज्यन्त इति ॥ अतो नायं यथोपवर्णितो न्यायो व्यायानिति ॥

अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनं ।
शून्यतां शून्यतार्थं च तत एवं विहन्यसे [1] ॥ ७

स भवान् स्वविकल्पनयैव नास्तित्वं शून्यतार्थ इत्येवं विपरीतमध्यारोप्य

यदि सर्वमिदं शून्यमुदयो नास्ति न व्यय

इत्यादिनोपालम्भं ब्रुवाणोऽस्मासु महान्तं खेदमापन्नोऽतीव विहन्यते । विविधैरभूतैः परिकल्पैर्हन्यत इत्यर्थः ॥ न त्वयमस्माभिरत्र शास्त्रे शून्यतार्थ उपवर्णितो यस्त्वया परिगृहीतः शून्यतार्थं चाजा[ना]नः शून्यतामपि न जानासि । न चापि शून्यतायां यत्प्रयोजनं तद्विजानासि । ततश्च यथावस्थितवस्तुस्वरूपापरिज्ञानेन एतत्त्वया बहु चायुक्तमस्मद्व्याख्यानासंबद्धमेवोप[154a]वर्णितं ।

अथ किं पुनः शून्यतायां प्रयोजनं । उक्तमेव तदात्मपरीक्षायां [2] ।

कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशा विकल्पतः ।
ते प्रपञ्चात्प्रपञ्चस्तु शून्यतायां निरुध्यते ॥ इति ।

---

1) དེ་ལ་ བཤད་པ་ ཁྱོད་ཀྱིས་ ནི། སྟོང་ཉིད་ དགོས་ དང་ སྟོང་ཉིད་ དང་། སྟོང་ཉིད་ དོན་ ནི་ མ་ རྟོག་པས། དེ་ཕྱིར་ དེ་ལྟར་ གནོད་པ་ ཡིན། — Notre xylographe porte མ་གཏོགས་པས. — Akutobhaya གནོད་པ་ བྱེད = *tata evaṃ pratibādhase.*

2) XVIII. 5.

अतो निरवशेषप्रपञ्चोपशमार्थं शून्यतोपदिश्यते [Tib. 184 b] । तस्मात्सर्वप्रपञ्चोपशमः शून्यतायां प्रयोजनं । भवांस्तु नास्तित्वं शून्यतार्थं परिकल्पयन् प्रपञ्चजालमेव संवर्धयमानो न शून्यतायां प्रयोजनं वेत्ति ॥

अथ का पुनः शून्यता । सापि तत्रैवोक्ता[1] ।

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितं ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणं ॥ इति ।

अतः प्रपञ्चनिवृत्तिस्वभावायां शून्यतायां कुतो नास्तित्वमिति शून्यतामपि न जानाति भवान् । यं चार्थमुपादाय शून्यताशब्दः प्रवर्तते तमप्यूर्ध्वं[2] प्रतिपादयिष्यामः ।

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा ॥ इति ।

यः प्रत्ययैर्जायति स ह्यजातो
न तस्य उत्पादु स्वभावतो ऽस्ति ।
यः प्रत्ययाधीनु स शून्यु उक्तो
यः शून्यतां जानति सोऽप्रमत्त

इति भगवतो गाथावचनात्[3] ॥ एवं प्रतीत्यसमुत्पादशब्दस्य योऽर्थः स एव शून्यताशब्दस्यार्थो । न पुनरभावशब्दस्य योऽर्थः स शून्यता[शब्दस्यार्थः] । अभावशब्दार्थं च शून्यतार्थमित्यध्यारोप्य भवानस्मानुपालभते । तस्माच्छून्यताशब्दार्थमपि न जानाति । अजानानश्च त्वमेवमुपालम्भं कुर्वन्नियतं विहन्यसे ॥

कश्चास्माकं यथोक्तमुपालम्भं करोति । यो भगवत्प्रवचनोपदिष्टाविपरीत[Tib.

1) XVIII. 9.

2) Ci-dessous XXIV. 18.

3) Voir ci-dessus p. 239, 10.

185 a]सत्यद्वयविभागं न जानाति । केवलं तु ग्रन्थ[1]मात्राध्ययनपर एवेति [154 b] । अत आचार्यः करुणया परस्य मिथ्याप्रवचनार्थावबोधनिरासार्थं भगवत्प्रवचनोपदिष्टाविपरीतसत्यद्वयव्यवस्थामेव तावदधिकृत्याह ।

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः[2] ॥ ८

इह हि भगवतां बुद्धानां सत्यद्वयमाश्रित्य धर्मदेशना प्रवर्तते । कतमत्सत्यद्वयं । लोकसंवृतिसत्यं च परमार्थसत्यं च ॥ तत्र ।

स्कन्धात्मा लोक आख्यातस्तत्र लोको हि निश्रित

इति वचनात्पञ्च स्कन्धानुपादाय प्रज्ञप्यमानः पुद्गलो लोक इत्युच्यते ॥

समन्ताद्वरणं संवृतिः[3] । अज्ञानं हि समन्तात्सर्वपदार्थतत्त्वावच्छादनात्संवृतिरित्युच्यते । परस्परसंभवनं[4] वा संवृतिरन्योन्यसमाश्रयेणेत्यर्थः । अथ वा संवृतिः संकेतो लोकव्यवहार इत्यर्थः । स चाभिधानाभिधेयज्ञानज्ञेयादिलक्षणः ॥

---

1) གཞུང་. — Voir la théorie des *pratisaraṇas*, ci-dessus 43, n. 5, 268, n. 1. D'ailleurs l'*adhyayana* est loué Çikṣās. 74. 3 (lire *yā na satyavatī....*); blâmable quand il est exclusif, ibid. 64. 10.

2) སངས་རྒྱས་རྣམས་ཀྱིས་ཆོས་བསྟན་པ། བདེན་པ་གཉིས་ལ་ཡང་དག་བརྟེན། འཇིག་རྟེན་ཀུན་རྫོབ་བདེན་པ་དང་། དམ་པའི་དོན་གྱི་བདེན་པའོ། — Cette stance est citée Bodhicaryāv. p. 361. 13, Nāmasaṃgītiṭīkā (voir Minayeff, Recherches, p. 226), Abhidh. k. v. Burn. 364a 2, Madhyamakāvatāra 70. 11; Nyāyaratnākaravyākhyā ad Çlokavārttika, 218. — Comparer Kathāvatthuppak. a. p. 34: *duve saccāni akkhāsi sambuddho vadatāṃ varo / sammutiṃ paramatthañ ca tatiyaṃ n'upalabbhati / saṃketavacanaṃ saccaṃ lokasammutikāraṇaṃ / paramatthavacanaṃ saccaṃ dhammānaṃ tathā lakkhaṇaṃ /*

3) Voir Bodhicaryāv. p. 352. 5.

4) Lecture douteuse; le tibétain ཕན་ཚུན་བརྟེན་པས་ = *parasparasamāçrayāt*, car བརྟེན་པ་ཉིད་ཀྱིས་ = *samāçrayeṇa*.

लोके[1] संवृतिर्लोकसंवृतिः । किं पुनरलोकसंवृतिरप्यस्ति यत एवं विशिष्यते लोकसंवृतिरिति । यथावस्थितपदार्थानुवाद एष ' नात्रैषा चिन्तावतरति । अथ वा तिमिरकामलाद्युपहतेन्द्रियविपरीतदर्शनावस्थान[ास्ते[2] ऽ]लोकास्तेषां [Tib. 185 b] या संवृतिरसावलोकसंवृतिः ' अतो विशिष्यते लोकसंवृतिसत्यमिति । एतच्च मध्यमकावतारे[3] विस्तरेणोक्तं ' ततो वेदितव्यं ॥ लोकसंवृत्या सत्यं लोकसंवृतिसत्यं । सर्व एवायमभिधानाभिधेयज्ञानज्ञेयादिव्यवहारोऽशेषो लोकसंवृतिसत्यमित्युच्यते ' न हि परमार्थत[4] एव तत्संभवति । तत्र हि

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ।

अनु[155 a]त्पन्नानिरुद्धा हि निर्वाणमिव धर्मता[5] ॥

इति कृत्वा कुतस्तत्र परमार्थे वाचां प्रवृत्तिः कुतो वा ज्ञानस्य । स हि परमार्थोऽपरप्रत्ययः[6] शान्तः प्रत्यात्मवेद्य आर्याणां सर्वप्रपञ्चातीतः ।[7] स नोपदिश्यते ' न चापि ज्ञायते उक्तं हि पूर्वं '

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितं ।

निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणं ॥ इति ।[8]

---

1) འཇིག་རྟེན་གྱི.

2) གནས་པ་ དེ་དག་ ནི་ འཇིག་རྟེན་ མ་ཡིན་ཏེ། དེ་དག་གི

3) VI. 23 et suiv.

4) D'après le tibétain, on a *na hi paramārtha ete (vyavahārāḥ) saṃbhavanti.*

5) Voir ci-dessus XVIII. 7, p. 364. 2.

6) གཞན་ལས་ཤེས་མ་ཡིན་.

7) D'après le tibétain དེ་ནི་ བསྟན་པར་བྱ་བ་ མ་ཡིན་ ཞིང་. Mss. °*atīto rasmin (m, c) upadiçyate.*

8) XVIII, 9, p. 372. 12.

परमश्चासावर्थश्चेति परमार्थः ' तदेव सत्यं परमार्थसत्यं । अनयोश्च सत्ययोर्विभागो विस्तरेण मध्यमकावतारा[1]दवसेयः । तदेतत्सत्यद्वयमाश्रित्य बुद्धानां भगवतां धर्मदेशना प्रवर्तते ॥ एवं व्यवस्थिते देशनाक्रमे '

ये ऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।
ते तत्त्वं न विजानन्ति गम्भीरं बुद्धशासने[2] ॥ ९ [Tib. 186 a]

अत्राह । यदि तर्हि परमार्थो निष्प्रपञ्चस्वभावः स एवास्तु ' तत्किमनया ऽपरया स्कन्धधात्वायतनार्यसत्यप्रतीत्यसमुत्पादादिदेशनया प्रयोजनमपरमार्थया । अतत्त्वं हि परित्याज्यं ' यच्च परित्याज्यं किं तेनोपदिष्टेन ॥ उच्यते । सत्यमेतदेव ' किं तु लौकिकं व्यवहारमनभ्युपगम्याभिधानाभिधेयज्ञानज्ञेयादिलक्षणमशक्य एव परमार्थो देशयितुं । अदेशितश्च न शक्यो ऽधिगन्तुं । अनधिगम्य च परमार्थं न शक्यं निर्वाणमधिगन्तुमिति प्रतिपादयन्नाह ।

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ इति[3] । १०

तस्मान्निर्वाणाधिगमोपायत्वादवश्यमेव यथावस्थिता संवृतिरादावे[155 b]वाभ्युपेया ' भाजनमिव सलिलार्थिनेति ॥ तदेवं यः संवृतिपरमार्थलक्षणसत्यद्वयस्य व्यवस्थामपाकृत्य शून्यतां वर्णयति तं तथाविधं पुद्गलं

1) VI. 23 et suiv.

2) གང་དག་ བདེན་པ་ གཉིས་ཀྱི་ ནི། རྣམ་དབྱེ་ རྣམ་པར་ མི་ ཤེས་པ། དེ་དག་ སངས་རྒྱས་ བསྟན་པ་ ནི། ཟབ་མོའི་ དེ་ཉིད་ རྣམ་ མི་ ཤེས། — Akutobhaya, plus correctement བདེན་པ་ དེ་ གཉིས་ཀྱི།

3) ཐ་སྙད་ལ་ ནི་ མ་ བརྟེན་པར། དམ་པའི་ དོན་ ནི་ བསྟན་ མི་ ནུས། དམ་པའི་ དོན་ ནི་ མ་ རྟོགས་པར། མྱ་ངན་འདས་པ་ འཐོབ་ མི་ འགྱུར།

विनाशयति दुर्दृष्टा शून्यता मन्दमेधसं ।
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता[1] ॥ ११

संवृतिसत्यं त्वज्ञानमात्रसमुत्थापितं निःस्वभावं बुद्ध्वा तस्य परमार्थलक्षणां शून्यतां प्रतिपद्यमानो योगी नान्तद्वये पतति [Tib. 186b] । किं तदासीद्यदिदानीं नास्तीत्येवं पूर्वं भावस्वभावानुपलम्भात्पश्चादपि नास्तितां न प्रतिपद्यते । प्रतिबिम्बाकारायाश्च लोकसंवृतेरबाधनात्कर्मकर्मफलधर्माधर्मादिकमपि न बाधते । न चापि परमार्थं भावस्वभावत्वेन समारोपयति । निःस्वभावानामेव पदार्थानां कर्मफलादिदर्शनात्सस्वभावानां चादर्शनात्[2] ॥

यस्त्वेवं सत्यद्वयविभागमपश्यन् शून्यतां संस्काराणां पश्यति स शून्यतां पश्यन् [3]संस्कारनास्तितां वा संस्काराणां परिकल्पयेद्यदि वा शून्यतां कांचिद्भावतः सतीं तस्याश्चाश्रयार्थं भावस्वभावमपि परिकल्पयेत् । उभयथा चास्य दुर्दृष्टा शून्यता नियतं विनाशयेत्[4] । कथं कृत्वा । यदि तावत्सर्वमिदं शून्यं सर्वं नास्तीति परिकल्पयेत्तदास्य मिथ्यादृष्टिरापद्यते । यथोक्तं ।

---

1) སྟོང་པ་ཉིད་ལ་ལྟ་ཉེས་ན། །ཤེས་རབ་ཆུང་རྣམས་ཕུང་བར་བྱེད། །ཇི་ལྟར་སྦྲུལ་ལ་བཟུང་ཉེས་དང་། །རིག་སྔགས་ཉེས་པར་བསྒྲུབས་པ་བཞིན།

2) Le tibét. ajoute དངོས་པོ་རང་བཞིན་དང་བཅས་པར་སྨྲ་བ་རྣམས་ཀྱི་ལྟར་ན། ལས་དང་ལས་ཀྱི་འབྲས་བུ་མ་མཐོང་བ་དང་། རྟེན་ཅིང་འབྲེལ་བར་འབྱུང་བ་ལ་སོགས་པ་ཐམས་ཅད་མ་མཐོང་བའི་ཕྱིར་རོ། = *sasvabhāvavādināṃ darçane karmaphaladarçanāt pratītyasamutpādādīnāṃ sarveṣām adarçanāc ca.*

3) Manque dans le tibétain.

4) Mss. *vināçaṃ parikalpayet.*

विनाशयति दुर्दृष्टो धर्मोऽयमविपश्चितं[1] ।
नास्तितादृष्टिसमले[2] यस्मादस्मिन्निमज्जति[3] ॥ इति ।

अथ सर्वापवादं कर्तुं नेच्छति तदा नियतमस्य शून्यतायाः प्रति[156a]क्षेप आपद्यते । कथं हि नामामी भावाः सकलसुरासुरनरलोकैरुपलभ्यमाना अपि शून्या भविष्यन्ति । तस्मान्न निःस्वभावार्थः शून्यतार्थ इत्येवं [Tib. 187a] प्रतिक्षिप्य सद्धर्मव्यसनसंवर्तनीयेन पापकेन कर्मणा नियतमपाय[ा]न्यायात् ॥

यथोक्तमार्यरत्नावल्यां[4] ।

अपरोऽप्यस्य दुर्ज्ञानान्मूर्खः[5] पण्डितमानिकः ।
प्रतिक्षेपविनष्टात्मा[6] यात्यवीचिमधोमुखः ॥ इति ।

एवं तावदभावेन[7] गृह्यमाणा शून्यता ग्रहीतारं विनाशयति ॥ अथायं[8] भावेन शून्यतां परिकल्पयेत्तदाश्रयाणां च संस्काराणामस्तित्वं ' एवमपि निर्वाणगामिनि मार्गे विप्रतिपन्नत्वाच्छून्यतोपदेश एव विह्वलो जायेत । तदेवं भावरूपेणापि शून्यता गृह्यमाणा ग्रहीतारं विनाशयति ॥

---

1) Pluriel, d'après le tibétain.

2) མི་གཙང་. = *açuci.* — *samala* = *kalka, viṣṭhā* dans les Lexx. — Bo corrige *çamala.*

3) Mss. *nimajjayati* བྱིང་བར་འགྱུར.

4) Voir ci-dessus ......

5) ལོག་པ་བཟུང་ ན. = *durgrāhāt.*

6) མ་རུང་ བདག་ཉིད་ཅན.

7) Mss. *abhāvo.*

8) Mss. *yathājaṃ bhagavān çūnyatām.* — ཅི་སྟེ་ བཅོམ་ལྡན་འདས་རྣམས་ཀྱི་ སྟོང་པ་ཉིད་ དང་ *atha bhagavatāṃ çūnyatām* ......

ननु च यदुपकारकं तदन्यथा ...[1] * * * * गृह्यमाणो महान्तं धनस्कन्धमावहति[2] शिरोमणिग्रहणात्तेन च व्यालग्राहकाणां[3] जीविकाकल्पनात्[2]। यथोद्देशतिरस्कारेण तु गृह्यमाणो ग्रहीतारमेव विनाशयति। यथा च यथोपदेशं प्रसाधिता विद्या साधकमनुगृह्णाति। उपदेशपरिभ्रष्टा तु साध्यमाना साधकमेव विनाशयति। [4]एवमिहापि यथोपदेशं शून्यता महतो विद्या साध्यमाना गृह्यमाणा [Tib. 187 b] भावाभावादिग्राहतिरस्कारेण मध्यमया प्रतिपदा ग्रहीतारं परमेण जातिजरामरणादिदुःखकृतानशमनैकरसेन निरुपधिशेषनिर्वाणजलधरधारावर्षसुखेन योज[156 b]यति। यथोपदेशविशेषविगमेन तु गृह्यमाणा नियतं यथोदितेन न्यायेन ग्रहीतारमेव विनाशयति[5]॥

---

1) གལ་ཏེ་ ཕན་འདོགས་ པ་ གང་ ཡིན་པ་ དེ་ རྣམ་པ་ གཞན་དུ་ གཟུང་ན། ཕན་འདོགས་པར་ མ་ གྱུར་ མོད། གནོད་པར་ བྱེད་པར་ ནི་ ཇི་ལྟར་ འགྱུར་ཏེ། འབྲུ་དག་ གོ་རིམ་ལས་ ཉམས་པར་ བཏབ་པ་ན། འདེབས་པ་པོ་ བརླག་པར་ བྱེད་པ་ ནི་ མ་ ཡིན་ནོ། དེའི་ ཕྱིར་ སློབ་དཔོན་གྱིས་ བརྗོད་པར་ འདོད་པའི་ དོན་ སྟོན་པའི་ དཔེ་ གསུངས་པ་སྟེ། ཇི་ལྟར་ སྦྲུལ་ལ་ བཟུང་ ཉེས་ དང་། རིག་སྔགས་ ཉེས་པར་ བསྒྲུབས་པ་ བཞིན། ཞེས་བྱ་བ་ སྟེ། ཇི་ལྟར་ སྦྲུལ་ སྨན་ དང་ སྔགས་ཀྱི[a] སྟོབས་ཀྱིས་ མན་ངག་ ཇི་ལྟ་བ་ བཞིན་ བཟུང་ན་ ནོར་གྱི་ ཕུང་པོ་ ཆེན་པོ་ འགུགས་པར་ བྱེད་ལ། . . . . . .
Soit. une chose utile, mal prise, ne rend pas de service; mais comment pourrait-elle nuire? La graine, mal semée, ne détruit pas le semeur. — Aussi le Maître dit-il un exemple qui montre la chose en cause (*vivakṣitārtha*): «comme un serpent mal pris, comme une formule mal exécutée». De même qu'un serpent, pris conformément aux règles par la force des herbes et des *mantras*, apporte une grande richesse . . . . . .

a) Xyl ཀྱིས་.

2—2) Manque dans le tibétain.

3) *grāhaka* = *vyālagrāhaka*.

4) Le tibétain porte seulement: *evam ihāpi yathopadeçam çūnyatā gṛhyamāṇā grahītāraṃ paramena nirvāṇasukhena yojayati.*

5) Sur les dangers de la *çūnyatā* et la comparaison du serpent, voir ci-dessus 249, n. 1.

यतश्चैवं शून्यता दुर्गृहीता ग्रहीतारं विनाशयति । मन्दप्रज्ञैश्चाशक्या सम्यग्ग्रहीतुं ।

अतश्च प्रत्युदावृत्तं चित्तं देशयितुं मुनेः ।
धर्मं मत्वास्य धर्मस्य मन्दैर्दुरवगाहतां[1] ॥ १२

यस्मादयं शून्यतालक्षणो धर्मो मन्दमेधसमल्पप्रज्ञं सत्त्वं विपर्यासग्रहणाद्विनाशयति । अत एवास्य धर्मस्य मन्दैर्दुरवगाहतां मत्वानुत्तरां सम्यक्संबोधिमभिसंबुध्य सर्वसत्त्वधातुं चावलोक्य धर्मस्य चातिगाम्भीर्यं सद्धर्मं देशयितुं चित्तं प्रतिनिवृत्तं मुनेर्बुद्धस्य भगवतो महोपायज्ञानविशेषशालिनः ॥

यथोक्तं सूत्रे[2] । अथ भगवतोऽचिराभिसंबुद्धस्यैतदभवत् । अधिगतो मया धर्मो गम्भीरो गम्भीरावभासोऽतर्क्योऽतर्कावचरः[3][4] सूक्ष्मः पण्डितविज्ञवेदनीयः[5] । स चेत्तमहं परेषामारोचयेयं । परे च मे न विभावयेयुः[6] । स मम विघातः स्यात् क्लमथः स्याच्चेतसोऽनुदयः

---

1) དེ་ཕྱིར་ ཞན་པས་ ཆོས་འདི་ཡི། གཏིང་ རྟོགས་ དཀའ་བར་ མཁྱེན་ གྱུར་ ནས། ཐུབ་པའི་ ཐུགས་ནི་ ཆོས་ བསྟན་ལས། རབ་ཏུ་ ལོག་པར་ གྱུར་པ་ ཡིན། — Notre xylographe a ཞེན་པས et གཏིང་གཏོགས.

2) «The agreement between the S. and the N. tradition is here very close», voir Mahāvastu III. 314; Lalitavistara XXV, au commencement; Majjhima I. 167; Saṃyutta I. 136; Mahāvagga I. 5. 2 cités Kern, Man. 22, n. 6 — Dans Lotus de la Bonne Loi, ii, 116, Bhagavat ne redoute pas la fatigue, mais il craint que les créatures ne se damnent en refusant son enseignement.

3) བརྟག་པར་ བྱ་བ་ མ་ ཡིན = *atarkya.*

4) རྟོག་གེའི་ སྤྱོད་ཡུལ་ མ་ ཡིན་པ་.

5) འཛངས་པ, d'après Jäschke et Çarad Candra, signifie: greedy, consumed; mais འཛངས་བླུན = der Weise und der Narr.

6) D'après le tibétain: *tan na vibhāvayeyuḥ* (རྟོག་པ). — Les textes pālis

स्यात् ॥ यश्चहमेकाक्यरण्ये प्रविविक्ते दृष्टधर्मसुखविहारमनुप्राप्तो विहरेयमिति वि-स्तरः ॥

तदेवं [Tib. 188b] सत्यद्वयाविपरीतव्यवस्थामविज्ञाय

शून्यतायामधिलयं यं पुनः कुरुते भवान् ।

दोषप्रसङ्गो नास्माकं स शून्ये नोपपद्यते[1] ॥ १३

योऽयं भवता महान् दोषप्रसङ्गोऽस्मासु प्रक्षिप्तः ।

यदि शून्यमिदं सर्वमुदयो नास्ति न व्यय

इत्यादिना[2] । स यस्मात्सत्यद्वयव्यवस्थानभिज्ञेन सता शून्यतां शून्यतार्थं शू[157a]-न्यताप्रयोजनं च यथावदबुद्ध्वोपक्षिप्तः सोऽस्माकं शून्ये शून्यतावादे नोपपद्यते । यतश्च नोपपद्यते । अतो यं भवान् दोषप्रसङ्गं शून्यतायामुद्भावयन् शून्यतायामधिलय[3]म[4]धिक्षेपं निरा[5]करणं [6]प्रतिक्षेपं करोति सोऽधिलयोऽस्माकं नोपपद्यते ॥ अभावार्थं हि शून्यतार्थमध्यारोप्य प्रसङ्ग उद्भावितो भवता । न च वयमभावार्थं शून्यतार्थं व्याचक्ष्महे । किं तर्हि प्रतीत्यसमुत्पादार्थमित्यतो न युक्तमेतच्छून्यतादर्शनदूषणं ॥

---

ont *pare ca me na ājāneyyum,* le Lalita *te cen nājānīyuh* (ཤེས་པ), le Mahāvastu *pare khu ca na ājānensu.*

1) སྐྱོན་དུ་ ཐལ་བར་ འགྱུར་བ་ དེ། སྟོང་ལ་ འཐད་པ་ མ་ ཡིན་པས། ཁྱེད་ནི་ སྐུར་ཉིད་ སྐྱོང་ བྱེད་པ། གང་ དེ་ ང་ལ་ མི་ འཐད་དོ།. — Mdo XVII ཁྱེད་...... བྱེད་ན.

2) Ci-dessus, p. 475. 4.

3) སྐྱོང་བ. Voir ci-dessus p. 159, n. 6.

4) འདོར་བ.

5) སེལ་བ.

6) ཟློག་པ.

न च केवलं यथोक्तदोषप्रसङ्गोऽस्मत्पक्षे नावतरति । अपि खलु सर्वमेव सत्यादिव्यवस्थानं सुतरामुपपद्यत इति प्रतिपादयन्नाह ।

सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।
सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते ॥(1) १४

यस्य हि सर्वभावस्वभावशून्यतेयं युज्यते । तस्य सर्वमेतद्यथोपवर्णितं युज्यते । कथं कृत्वा । यस्मात्प्रतीत्यसमुत्पादं हि वयं शून्यतेति व्याचक्ष्महे ।

(2 यः प्रत्ययैर्जायति स ह्यजातो
न तस्य उत्पाद स्वभावतोऽस्ति ।
यः प्रत्ययाधीनु स शून्य उक्तो
यः शून्यतां जानति सोऽप्रमत्तः ॥

इति गाथावचनात्(3) ॥ शून्याः सर्वधर्मा निःस्वभावयोगेनेति प्रज्ञापारमिताभिधानात्(4) 2)॥

तस्माद्यस्येयं शून्यता युज्यते (5 रोचते क्षमते 5) तस्य [Tib. 188b] प्रतीत्यसमुत्पादो युज्यते । यस्य प्रतीत्यसमुत्पादो युज्यते तस्य चत्वार्यार्यसत्यानि युज्यन्ते । कथं कृत्वा । यस्मात्प्रतीत्यसमुत्पन्नमेव हि दुःखं भवति नाप्रतीत्यसमुत्पन्नं । तच्च निः[157b]स्वभावत्वाच्छून्यं । सति च दुःखे दुःखसमुदयो दुःखनिरोधो दुःखनिरोधगामिनी च प्रतिपद्युज्यते । ततश्च दुःखपरिज्ञानं समुदयप्रहाणं निरोधसाक्षात्करणं मार्गभावना च युज्यते ।

---

1) གང་ལ་ སྟོང་པ་ཉིད་ རུང་བ། དེ་ལ་ ཐམས་ཅད་ རུང་བར་ འགྱུར། གང་ལ་ སྟོང་ཉིད་ མི་ རུང་བ། དེ་ལ་ ཐམས་ཅད་ མི་ རུང་ འགྱུར།

2—2) Manque dans le tibétain.

3) Voir ci-dessus 239. 10.

4) Voir ci-dessous 504. 7.

5) Manque dans le tibétain

सति च दुःखादिसत्यपरिज्ञानादिके फलानि युज्यन्ते । सत्सु च फलेषु फलस्था युज्यन्ते । सत्सु च फलस्थेषु प्रतिपन्नका युज्यन्ते । सत्सु च प्रतिपन्नकफलस्थेषु संघो युज्यते । आर्यसत्यानां च सद्भावे सति सद्धर्मोऽपि युज्यते । सति च सद्धर्मे संघे च बुद्धोऽपि युज्यते । ततश्च त्रीण्यपि रत्नानि युज्यन्ते । लौकिकलोकोत्तराश्च पदार्थाः सर्वे विशेषाधिगमा[1] युज्यन्ते । धर्माधर्मं तत्फलं सुगतिर्दुर्गतिर्लौकिकाश्च सर्वसंव्यवहारा युज्यन्ते ॥ तदेवं

सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।

यस्य[2] सर्वभावस्वभावशून्यता युज्यते तस्य सर्वमेतद्यथोदितं युज्यते संपद्यत इत्यर्थः । यस्य तु शून्यता यथोदिता न युज्यते तस्य प्रतीत्यसमुत्पादाभावात्सर्वं न युज्यते । यथा च न युज्यते तथा विस्तरेण प्रतिपादयिष्यति ।

तदेवमस्माकीने पक्षे सुपरिशुद्धतरे सर्व[Tib. 189 a]व्यवस्थास्वविरुद्धे व्यवस्थिते[3] [4]अतिस्थूलेऽत्यासन्ने तद्विरुद्धे[5] च स्वकीये पक्षे दोषवति [6]अतिमोघा यथावदवस्थितौ गुणदोषावपश्यन्

1) ཁྱད་པར་དུ་རྟོགས་པ. Voir Childers, p. 584 b. — Il est impossible qu'un être à sa dernière naissance meure sans avoir obtenu le *viçeṣādhigama*, Div 174. 1. — Pour l'Avadānaçataka, 40, 41, 45, 58, 76, 91 et 92 (*viçeṣa* et *mahāviçeṣa*), Feer, Musée Guimet XVIII, p. 488 — Çikṣas. 316. 5 *viçeṣagāmin*, comp. Saṃ. N. V 108. — MVagga, I. 6. 13, Saṃ. N. IV. 300, *ariyañāṇadassanavisesa* opposé à *uttarimanussadhamma*. — Vis. magga, J. P. T. S. 1891, p. 86 *hāna°*, *ṭhiti°*, *visesa°*, *nibbedhabhāgīya*. — Madh. avat. 51. 4.

2) Mss *yasya tu*.

3) Les Mss. reproduisent ici la stance citée ci-dessous, 505. 10, suivie de *bhagavadvacanāt*.

4) ཤིན་ཏུ་ཉེས་པའི་སྐྱོན་དང་ལྡན་པ = *atisthūladoṣavati*. — *atyāsanna* n'est pas traduit; voir la comparaison du cavalier.

5) དེ་དག་དང་འགལ་བ = en contradiction avec toutes ces données, vérités, fruits, etc.

6) ཤིན་ཏུ་བླུན་པས.

स त्वं दोषानात्मनीयानस्मासु परि[158a]पातयन् ।[1]

अश्वमेवाभिरूढः सन्नश्वमेवासि विस्मृतः ॥ १५[2]

यथा हि कश्चिदश्वमेवाश्वमारूढस्तमेव विस्मृतः संस्तदपहारदोषेण परानुपालभेत । एवमेव भवान् प्रतीत्यसमुत्पादलक्षणशून्यतादर्शनाश्व[म]ारूढ एवात्यन्तविक्षेपात्तमनुपलभमानो ऽस्मान् परिवदति ॥ के पुनस्ते परस्य दोषा याननुपलभमानः शून्यतावादिनमेवोपालभत इति तान् प्रतिपादयन्नाह ।

स्वभावाद्यदि भावानां सद्भावमनुपश्यसि ।

अहेतुप्रत्ययान् भावांस्त्वमेवं सति पश्यसि ॥ १६[3]

यदि त्वं स्वभावेन विद्यमानान् भावान् पश्यसि तदा स्वभावस्य हेतुप्रत्ययनिरपेक्षत्वात्, अहेतुप्रत्ययानविद्यमानहेतुप्रत्ययान् पदार्थान् बाह्याध्यात्मिकभेदभिन्नान्निर्हेतुकान्, त्वमेवं सति पश्यसि । सति चाहेतुकत्वाभ्युपगमे,

---

1) Mss. *doṣān ātmīyān.*

2) Mss. *bhivismṛtaḥ.* — ཁྱོད་ནི་རང་གི་སྐྱོན་རྣམས་ནི། ང་ལ་ཡོངས་སུ་སྒྱུར་བྱེད་པ། རྟ་ལ་མངོན་པར་ཞོན་བཞིན་དུ། རྟ་ཉིད་བརྗེད་པར་གྱུར་པ་བཞིན། — Mdo XVII ཁྱོད་ཉིད་ = *tvam eva* .... — Comparer la citation dans Daçabhūmikrame çuklavidarçanā (Bendall's Mss, 1ª) qui nous fournit une variante: *ghoṭām evābhirūḍhaḥ san ghoṭām evāsi vismṛtaḥ, svabhāvād yadi bhāvānāṃ sadbhāvam anupaçyasi, ahetupratyayān bhāvān tvam evaṃ sati paçyasi*; et Col. Jacob, Third handful (p. 11 et 106): *açvārūḍhāḥ kathaṃ cāçvān vismareyuḥ sacetanāḥ.*

3) གལ་ཏེ་དངོས་རྣམས་རང་བཞིན་ལས། ཡོད་པར་རྗེས་སུ་ལྟ་བྱེད་ན། དེ་ལྟ་ཡིན་ན་དངོས་པོ་རྣམས། རྒྱུ་རྐྱེན་མེད་པར་ཁྱོད་ལྟའོ།

कार्यं च कारणं चैव कर्तारं करणं क्रियां ।
उत्पादं च निरोधं च फलं च प्रतिबाधसे[1] ॥ १७

कथं कृत्वा । यदीह घटः स्वभावतोऽस्तीति परिकल्पयसि तदास्य स्वभावतो विद्यमानस्य किं मृदादिभिर्हेतुप्रत्ययैः प्रयोजनमिति तेषामभावः स्यात् । निर्हेतुकं च कार्यं घटाख्यं नोपपद्यते । असति चास्मिंश्चक्रादिकस्य करणस्य[2] कर्तुः कुम्भकारस्य [Tib 189 b] घटकरणक्रियायाश्चाभावादुत्पादनिरोधयोरभावः । असतोश्चोत्पादनिरोधयोः कुतः फलं । इति सस्वभावाभ्युपगमे सति सर्वमेतत्कार्यादिकं प्रतिबाधसे । तदेवं भवतः सस्वभावाभ्युपगमे सति सर्वमेव न युज्यते ॥ अस्माकं तु भावस्वभावशून्यतावादिनां सर्वमेतदुपपद्य[158 b]ते । किं कारणं । यस्मादयं

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा[3] ॥ १८

योऽयं प्रतीत्यसमुत्पादो हेतुप्रत्यया[न]पेत्य[ाङ्कुर][4]विज्ञानादीनां प्रादुर्भावः स स्वभावेनानुत्पादः[5] । यश्च स्वभावेनानुत्पादो भावानां[6] सा शून्यता ॥ [यथा[7] भगवतोक्तं]

---

1) འབྲས་བུ་ དང་ ནི་ རྒྱུ་ཉིད་ དང་། བྱེད་པ་པོ་ དང་ བྱེད་ དང་ བྱ། སྐྱེ་བ་ དང་ ནི་ འགག་པ་ དང་། འབྲས་བུ་ལ་ ཡང་ གནོད་པ་ བྱེད།

2) Mss. *kāraṇasya.*

3) རྟེན་ཅིང་འབྲེལ་པར་ འབྱུང་བ་ གང་། དེ་ནི་ སྟོང་པ་ཉིད་དུ་ བཤད། དེ་ནི་ བརྟེན་ནས་ གདགས་པ་ སྟེ། དེ་ཉིད་ དབུ་མའི་ ལམ་ ཡིན་ནོ།

4) Mss. *rūpavijñāna*°.

5) Sic Camb.; Paris et Calc. °*pādajñaḥ*.

6) Manque dans le tibétain.

7) Voir ci-dessus 239. 10.

यः प्रत्ययैर्जायति स ह्यजातो
न तस्य उत्पादु स्वभावतोऽस्ति ।
यः प्रत्ययाधीनु स शून्य उक्तो
यः शून्यतां जानति सोऽप्रमत्तः ॥ इति ।

तथार्यलङ्कावतारे । स्वभावानुत्पत्तिं संधाय(1) महामते सर्वधर्माः शून्या इति मया देशिता इति [विस्तरेणोक्तं] ।

द्व्यर्धशतिकायां(2) शून्याः सर्वधर्माः निःस्वभावयोगेनेति ॥

या चेयं स्वभाव(3)शून्यता सा प्रज्ञप्तिरुपादाय । सैव शून्यता उपादाय(4) प्रज्ञप्तिरिति व्यवस्थाप्यते । चक्रादीन्युपादाय रथाङ्गानि रथः [Tib. 190a] प्रज्ञप्यते । तस्य या स्वाङ्गान्युपादाय प्रज्ञप्तिः सा स्वभावेनानुत्पत्तिः । या च स्वभावे[न]ानुत्पत्तिः सा शून्यता ॥ सैव स्वभावानुत्पत्तिलक्षणा शून्यता मध्यमा प्रतिपदिति व्यवस्थाप्यते । यस्य हि स्वभावेनानुत्पत्तिस्तस्यास्तित्वाभावः । स्वभावेन चानुत्पन्नस्य विगमाभावान्नास्तित्वाभाव इति । अतो भावाभावान्तद्वयरहितत्वात्सर्वस्वभावानुत्पत्तिलक्षणा शून्यता मध्यमा प्रतिपन्मध्यमो मार्ग(5) इत्युच्यते ॥ तदेवं प्रतीत्यसमुत्पादस्यैवैता विशेषसंज्ञाः शून्यता उपादाय प्रज्ञप्तिर्मध्यमा प्रतिपदिति ॥

---

1) དགོངས་ནས.

2) བརྒྱ་ལྔ་བཅུ་པ་ — °*yogena* = ཚུལ་གྱིས. — Comparer Nanjio, 1 (j), 18, 879, 1033 Prajñāpāramitā ardhaçatikā, et Çer-phyin, vol. VI, n° 6, ཚུལ་བརྒྱ་ལྔ་བཅུ་པ་ (Feer, p. 201).

3) *svabhāva* manque dans le tibétain.

4) Voir 215, n. 1, 285, n. 4.

5) དབུ་མའི་ལམ. — Il semble que la *majjhimā paṭipadā* s'entende du chemin entre le rigorisme et la mollesse (M. Vagga i. 5. 17, Mhv. III. 331); mais l'expression *majjhena dhammaṃ deseti* se rapporte au milieu entre les deux extrêmes métaphysiques, Saṃyutta, II. 17 (et III. 135), 20 et 76, 23, 61, Mhv. III. 448.

विचार्यमाणाश्च सर्वथा ।

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते ।

यस्मात्तस्मादशून्योऽहि धर्मः कश्चिन्न विद्यते[1] ॥ १९

यो ह्यप्रतीत्यसमुत्पन्नो धर्मः [159 a] स न संविद्यते ॥ तथोक्तं शतके[2] ।

अप्रतीत्यास्तिता नास्ति कदा चित्कस्य चित्क चित् ।

न कदा चित्क चित्कश्चिद्विद्यते तेन शाश्वतः ॥ इति ।

आकाशादीनि कल्प्यन्ते नित्यानीति पृथग्जनैः ।

लौकिकेनापि तेष्वर्थान्न पश्यन्ति विचक्षणाः ॥ इति ।

उक्तं च भगवता ।

प्रतीत्यधर्मानधिगच्छते विद्व
न चान्तदृष्टीय करोति निश्रयं ।
सहेतु सप्रत्यय धर्म जानति
अहेतु अप्रत्यय नास्ति धर्मता ॥ इति

एवं ।

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते [Tib. 190b] ।

प्रतीत्यसमुत्पन्नश्च शून्यस्तस्मादशून्यो धर्मो नास्ति । यत एतदेवमतोऽस्माकं सर्वधर्माश्च शून्या न च परोक्तदोषप्रसङ्गः ॥ भवतस्तु सस्वभाववादिनः ।

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।

तदा नियतमुदयव्यययोरभावे सति ।

---

1) གང་ཕྱིར་ རྟེན་འབྱུང་ མ་ཡིན་པའི། ཆོས་ འགའ་ ཡོད་པ་ མ་ཡིན་པ། དེ་ཕྱིར་ སྟོང་པ་ མ་ཡིན་པའི། ཆོས་ འགའ་ ཡོད་པ་ མ་ ཡིན་ནོ།

2) IX. 2 et 3.

चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते [1]। २०

किं कारणं। यस्मात्,

अप्रतीत्य समुत्पन्नं कुतो दुःखं भविष्यति।
अनित्यमुक्तं दुःखं हि तत्स्वाभाव्ये न विद्यते [2]॥ २१

यद्धि सस्वभावं न तत्प्रतीत्योत्पद्यते, यच्चाप्रतीत्य समुत्पन्नं न तदनित्यं भवति। न हि गगनकुसुममविद्यमानमनित्यं। अनित्यं च दुःखमुक्तं भगवता यदनित्यं तद्दुःखमिति॥ तथा च शतक[3]शास्त्रे।

अनित्यस्य ध्रुवा पीडा पीडा यस्य न तत्सुखं।
तस्मादनित्यं यत्सर्वं दुःखं तदिति ज्ञायते॥ इति।

यच्चानित्यं स्वाभाव्ये सस्वभावत्वेऽभ्युपगम्यमाने भावानां [त]न्न विद्यत इति॥ एव तावत्स्वभावत्वे सति भावानां दुःखं न युज्यते, न च केवलं दुःखमेव न युज्यते, सात सस्वभावभावा[4]भ्युपगमे समुदयोऽपि न युज्यत इति [159 b] प्रतिपादयन्नाह।

स्वभावतो विद्यमानं किं पुनः समुदेष्यते [5]।
तस्मात्समुदयो नास्ति शून्यतां प्रतिबाधतः [6]॥ [Tib. 191 a] २२

---

1) གལ་ཏེ་ འདི་ ཀུན་ མི་ སྟོང་ ན། འབྱུང་བ་ མེད་ཅིང་ འཇིག་པ་ མེད། འཕགས་པའི་ བདེན་པ་ བཞི་པོ་རྣམས། ཁྱོད་ལ་ མེད་པར་ ཐལ་བར་ འགྱུར།

2) རྟེན་ཅིང་འབྲེལ་འབྱུང་ མ་ ཡིན་ན། སྡུག་བསྔལ་ ཡོད་པར་ ག་ལ་ འགྱུར། མི་རྟག་ སྡུག་བསྔལ་ གསུངས་པ་ དེ། རང་ བཞིན་ཉིད་ལ་ ཡོད་ མ་ཡིན།

3) Cité ci-dessus p. 460. 9.

4) རང་བཞིན་ དང་ བཅས་པར་ = *sasvabhāvābhyupagame.*

5) Mss. *samu(pa)deçyate.*

6) རང་བཞིན་ལས་ ནི་ ཡོད་ ཡིན་ན། ཅི་ཞིག་ ཀུན་ཏུ་འབྱུང་བར་ འགྱུར།

इह समुदेत्यस्माद्दुःखमिति[1] दुःखस्य हेतुसमुदय[2] इत्युच्यते। तदस्य दुःखस्य शून्यतां प्रतिबाधमानस्य सस्वभावं दुःखमभ्युपगच्छतस्तस्य पुनरुत्पादवैयर्थ्यात्तद्धेतुकल्पनावैयर्थ्यमेव। इत्येवं शून्यतां प्रतिबाधमानस्य समुदयोऽपि भवतो न युज्यते॥

स्वाभाविकमेव दुःखमभ्युपगच्छतो दुःखनिरोधोऽपि न युज्यत इति प्रतिपादयन्नाह।

न निरोधः स्वभावेन सतो दुःखस्य विद्यते।
स्वभावपर्यवस्थानान्निरोधं प्रतिबाधसे[3]॥ २३

यदि हि स्वभावतो दुःखं स्यात्तदा स्वभावस्यानपायित्वात्कुतोऽस्य निरोध इति। एवं स्वभावपर्यवस्थानात्स्वभावं गृहीत्वा प्रत्यवतिष्ठमानो दुःखनिरोधमपि प्रतिबाधसे॥

इदानीमार्यमार्गोऽपि सस्वभाववादिनो यथा नोपपद्यते तथा प्रतिपादयन्नाह।

स्वाभाव्ये सति मार्गस्य भावना नोपपद्यते।
अथासौ भाव्यते मार्गः स्वाभाव्यं ते न विद्यते[4]॥ २४

ར་ཕྱིར་སྟོང་ཉིད་གནོད་བྱེད་ལ། །ཀུན་འབྱུང་ཡོད་པ་མ་ཡིན་ནོ། — Notre xylographe, au premier pāda, ཡོད་མིན་ན.

1) Mss *samudety*, *samudayoti*.

2) རྒྱུ་ལས་ཀུན་འབྱུང་ = *hetutaḥ samudaya*.

3) སྡུག་བསྔལ་རང་བཞིན་གྱིས་ཡོད་ལ། །འགོག་པ་ཡོད་པ་མ་ཡིན་ནོ། །རང་བཞིན་ཉིད་ན་ཡོངས་གནས་ཕྱིར། །འགོག་པ་གནོད་པ་བྱེད་པ་ཡིན།

4) ལམ་ལ་རང་བཞིན་ཡོད་ན་ནི། །བསྒོམ་པ་འཐད་པར་མི་འགྱུར་རོ། །ཇི་སྟེ་ལམ་དེ་བསྒོམ་བྱ་ན། །ཁྱོད་ཀྱི་རང་བཞིན་ཡོད་མ་ཡིན།

यदि हि सस्वभावा भावा भवेयुस्तदा मार्गोऽपि सस्वभाव एवेति कृत्वा ' अभावित एवासावस्ति ' तस्य किं पुनर्भावनयेति । एवं

स्वाभाव्ये सति मार्गस्य भावना नोपपद्यते ।

अथास्य मार्गस्य भावनाभ्युपगम्यते भवता ' एवं तर्हि स्वभाववतार्यमार्गस्य न स्यात् ' कार्यत्वादित्यभिप्रायः ॥ अपि च दुःखस्य निरोधप्राप्त्यर्थं समुदयस्य च प्रहाणार्थं भावना मार्गस्येष्यते [Tib. 191b] ' पूर्वोक्तेन तु न्यायेन सस्वभाववादिनो भवतः '

यदा [160a] दुःखं समुदयो निरोधश्च न विद्यते ।
मार्गो दुःखनिरोधत्वात्कतमः प्रापयिष्यति[1] ॥ २५

[2]नास्त्येवासौ दुःखनिरोधो यन्निरोधत्वान्मार्गो भावितः सन् प्रापयिष्यति[2] । तस्मादार्यमार्गोऽप्येवं नोपपद्यत इति ॥ एवं सस्वभावभाववादिनश्चतुर्णामार्यसत्यानामभावः प्राप्नोति ॥

इदानीं दुःखादिपरिज्ञानादिकमपि यथा परस्य न संभवति तथा प्रतिपादयन्नाह ।

स्वभावेनापरिज्ञानं यदि तस्य पुनः कथं ।
परिज्ञानं ननु किल स्वभावः समवस्थितः[3] ॥ २६

---

1) གང་ཚེ་ སྡུག་བསྔལ་ ཀུན་འབྱུང་ དང་། འགོག་པ་ ཡོད་པ་ མ་ཡིན་ན། ལམ་ གྱིས་ སྡུག་བསྔལ་ འགོག་པ་ ནི། གང་ཞིག་ འཐོབ་པར་ འགྱུར་བར་ འདོད། — Notre xylographe a ལམ་གྱི་. — La deuxième ligne correspond à un original *mārgeṇa duḥkhanirodhaḥ katamaḥ prāpayiṣyati.*

2–2) Camb. *duḥkhanirodho 'yaṁ ni°*. — Il n'existe pas une destruction de la souffrance, par laquelle destruction le chemin existera étant pratiqué. ལམ་ བསྒོམས་པས་ འགོག་པ་ གང་ ཞིག་ འཐོབ་པར་ འགྱུར་བ་ སྡུག་བསྔལ་འགོག་ པ་ དེ་ ནི་ ཡོད་པ་ མ་ ཡིན་ནོ་ = *māryabhāvanayā nirodho yaḥ prāpayiṣyati duḥkhanirodhaḥ sa na vidyate.*

3) གལ་ཏེ་ རང་བཞིན་ཉིད་ཀྱིས་ ནི། ཡོངས་སུ་ཤེས་པ་ མ་ ཡིན་ན། དེ་ནི་ ཇི་ལྟར་ ཡོངས་ཤེས་ འགྱུར། རང་བཞིན་ གནས་པ་ མ་ ཡིན་ནམ།

यदि पूर्वं दुःखमपरिज्ञातस्वभावं तत्पश्चात्परिज्ञायत इति परिकल्प्यते ' तदयुक्तं। किं कारणं। यस्मान्नु किल स्वभावः समवस्थितः। यो हि स्वभावः स किल लोके समवस्थितो नैवान्यथात्वमापद्यते वह्नेरौष्ण्यवत्। यदा च स्वभावस्यान्यथात्वं नास्ति ' तदा पूर्वमपरिज्ञातस्वभावस्य दुःखस्य पश्चादपि परिज्ञानं नोपपद्यत इति। अतो दुःखपरिज्ञानमपि न संभवति ॥

यदा चैतद्दुःखपरिज्ञानमपि न संभवति ' तदा

प्रहाणसाक्षात्करणे भावना चैवमेव ते।
परिज्ञावन्न युज्यन्ते चत्वार्यपि फलानि च[1] ॥ २७

यदेतत्समुदयस्य प्रहाणं निरोधस्य च साक्षात्करणं ' ते एते द्वे प्रहाणसाक्षात्करणे [Tib. 192a]। या च मार्गस्य भावना ' एषापि। एवमेव ते दुःखपरिज्ञानासंभवान्न युज्यते। समुदयस्य स्वभावेनाप्रहीणस्य स्वभावस्यानपायित्वात्पश्चादपि प्रहाणं नोपपद्यते। एवं भावनासाक्षात्करणेऽपि योज्यं ॥ न च केवलं परिज्ञानादिकमेव न संभवति सस्वभाववादे ' अपि च

परि[160b]ज्ञावन्न युज्यन्ते चत्वार्यपि फलानि च।

यथा स्वभावेनापरिज्ञातस्य दुःखस्य परिज्ञानं न युक्तमेवं स्वभावेनाविद्यमानस्य पूर्वं स्रोतआपत्तिफलस्य पश्चादस्तित्वं न संभवति। यथा स्रोतआपत्तिफलस्य ' एवं सकृदागाम्यनागाम्यर्हत्फलानामभावो वेदितव्यः ॥

न च केवलमेतानि फलानि परिज्ञावन्न युज्यन्ते ' किं तर्ह्यधिगमोऽप्येषां न युज्यत इति प्रतिपादयन्नाह।

---

1) དེ་བཞིན་དུ་ནི་ཁྱོད་ཉིད་ཀྱི། སྤང་དང་མངོན་དུ་བྱ་བ་དང་། བསྒོམ་དང་འབྲས་བུ་བཞི་དག་ཀྱང་། ཡོངས་ཤེས་བཞིན་དུ་མི་རུང་ངོ།

स्वभावेनानधिगतं यत्फलं तत्पुनः कथं ।
शक्यं समधिगन्तुं स्यात्स्वभावं परिगृह्णतः[1] ॥ २८

[2]स्वभावस्याविनिवर्तनप्रकृतिकत्वाद्भावस्वभावत्वादभ्युपगच्छतः[2] पूर्वमनधिगतस्वभावानां पश्चादप्यधिगमो नोपपद्यते ॥ ततश्च

फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ।
संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ॥ २९
अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ।
धर्मे चासति संघे च कथं बुद्धो भविष्यति[3] ॥ ३०

अनयोश्च श्लोकयोः पूर्ववदेवार्थो वेदितव्यः ॥ अपि च [Tib. 192b] सस्वभाववाभ्यु[4]पगमे सति ।

अप्रतीत्यापि बोधिं च तव [बुद्धः] प्रसज्यते ।
अप्रतीत्यापि बुद्धं च तव बोधिः प्रसज्यते[5] ॥ ३१

---

1) རང་ བཞིན་ ཡོངས་སུ་ འཛིན་པ་ཡིས། འབྲས་བུ་ རང་བཞིན་ཉིད་ཀྱིས་ ནི། ཐོབ་པ་ མེད་པ་ གང་ ཡིན་ དེ། ཇི་ལྟར་ འཐོབ་པར་ ནུས་པར་ འགྱུར། Les xylographes, à la fin du troisième pāda, ont ཏེ ou དེས.

2—2) Mss. *svabhāvasyādvijahatapra°*. — རང་བཞིན་ ལྡོག་པ་ མེད་པའི་ ཕྱིར་ = *svabhāvasyāvyāvartanāt*.

3) Voir ci-dessus p. 477 et 478.

4) D'après le tibétain *svabhāvavādābhyupagame*.

5) ཁྱོད་ཀྱི་ སངས་རྒྱས་ བྱང་ཆུབ་ལ། མ་ བརྟེན་པར་ ཡང་ ཐལ་བར་ འགྱུར། ཁྱོད་ཀྱི་ བྱང་ཆུབ་ སངས་རྒྱས་ལ། མ་ བརྟེན་པར་ ཡང་ ཐལ་བར་ འགྱུར།

यदि हि स्वभावतो बुद्धो नाम कश्चिद्भावः स्यात्स बोधिं सर्वज्ञज्ञानमप्रतीत्यापि अनपेक्ष्यापि स्यात्।

अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च ।

इति वचनात्। तथा विनापि बुद्धेन बोधिः स्यात्। अनपेक्ष्यापि बुद्धं निराश्रया बोधिः स्यात्स्वभावसिद्धत्वात्॥ किं चान्यत्।

यश्चाबुद्धः स्वभावेन स बोधाय घटन्नपि।
न बोधिसत्त्वचर्यायां बोधिं तेऽधिगमिष्यति[1]॥ ३२

इह हि बुद्धत्वात्पूर्वमबुद्धस्वभा[161 a]व[स्य] सतः पुद्गलस्य सत्यामपि बोधिसत्त्वचर्यायां बोध्यर्थं घटमानस्यापि नैव बोधिः स्यात्। अबुद्धस्वभावस्य व्यावर्तयितुमशक्यत्वात्॥ किं चान्यत्।

न च धर्ममधर्मं वा कश्चिज्जातु करिष्यति।
किमशून्यस्य कर्तव्यं स्वभावः क्रियते न हि[2]॥ ३३

सति हि स्वभाववादाभ्युपगमे धर्माधर्मयोः करणं नोपपद्यते। किं ह्यशून्यस्य कर्तव्यं। न हि स्वभावस्याशून्यस्य का[र(3)णा]मुपपद्यते विद्यमानत्वात्॥ किं चान्यत्।

---

1) ཁྱོད་ཀྱི་ རང་བཞིན་ཉིད་ཀྱིས་ནི། སངས་རྒྱས་ མིན་པ་ གང་ ཡིན་ དེས། བྱང་ ཆུབ་ སྤྱོད་པ་ བྱང་ཆུབ་ ཕྱིར། བརྩལ་ ཀྱང་ བྱང་ཆུབ་ ཐོབ་ མི་ འགྱུར།

2) འགའ་ ཡང་ ཆོས་ དང་ ཆོས་མིན་པ། ནམ་ ཡང་ བྱེད་པར་ མི་ འགྱུར་རོ། མི་ སྟོང་པ་ལ་ ཅི་ཞིག་ བྱ། རང་བཞིན་ལ་ ནི་ བྱ་བ་ མེད།

3) བྱ་བ་.

विना धर्ममधर्मं च फलं हि तव विद्यते ।
धर्माधर्मनिमित्तं च फलं तव न विद्यते [1] ॥ ३४

यदेतद्धर्माधर्मनिमित्तकमिष्टानिष्टफलं ' यदि तत्स्वभावतोऽस्ति तद्विनापि [Tib. 183a] धर्माधर्माभ्यां स्यात् । यदा च विना धर्माधर्मं च फलं तवास्ति ' तदा धर्माधर्मनिमित्तं फलं तव न संभवति । धर्माधर्मोपार्जनवैयर्थ्यं स्यात् '

धर्माधर्मनिमित्तं च फलं तव न विद्यते ॥ इति ।

अथ धर्माधर्मनिमित्तकं फलं भवतीति परिकल्प्यते ' न तर्हि तत्फलमशून्यमिति प्रतिपादयन्नाह ।

धर्माधर्मनिमित्तं वा यदि ते विद्यते फलं ।
धर्माधर्मसमुत्पन्नमशून्यं ते कथं फलं [2] ॥ ३५

शून्यमेवैतत् ' प्रतीत्यसमुत्पन्नत्वात् ' प्रतिबिम्बवदित्यभिप्रायः ॥

अपि च । सर्व एव ह्येते गच्छ कुरु पच पठ तिष्ठेत्येवमादयो लौकिका व्यवहाराः प्रतीत्यसमुत्पन्नाः । तान् यदि सस्वभावानिच्छति भवान् ' तदा भवता प्रतीत्यसमुत्पादो बाधितो भवति ' तद्बाधनाच्च सर्व एव लौकिका व्यवहारा बाधिता भवन्तीति प्रतिपादयन्नाह ।

---

1) ཆོས་ དང་ ཆོས་མིན་ མེད་པར་ ཡང་། འབྲས་བུ་ ཁྱོད་ལ་ ཡོད་པར་ འགྱུར། ཆོས་ དང་ ཆོས་མིན་ རྒྱུས་ བྱུང་བའི། འབྲས་བུ་ ཁྱོད་ལ་ ཡོད་ མ་ཡིན།

2) ཆོས་ དང་ ཆོས་མིན་ རྒྱུས་ བྱུང་བའི། འབྲས་བུ་ གལ་ཏེ་ ཁྱོད་ལ་ཡིན། ཆོས་ དང་ ཆོས་མིན་ ལས་ བྱུང་བའི། འབྲས་བུ་ ཅི་ཕྱིར་ སྟོང་ མ་ཡིན། = *kasmān na çūnyaṃ phalam* ou *na çūnyaṃ /te/ kathaṃ phalam*. — Notre xylographe ཁྱོད་ལ་ཡོད་

सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे ।
यत्प्रतीत्यसमुत्पादशून्यतां प्रतिबाधसे[(1)] ॥ ३६

यच्छब्दः क्रियाविशेषणं । यद्बाधस इत्यनेन संबध्यते ॥ किं चान्यत् ।

न कर्तव्यं भवेत्किं चिदनारब्धा भवेत्क्रि[161 b]या ।
कारकः स्यादकुर्वाणः शून्यतां प्रतिबाधतः[(2)] ॥ ३७

यदि हि स्वरूपशून्याः पदार्था न भवेयुः सस्वभावा एव भवेयुः । तदा स्वभावस्य विद्यमानत्वान्न केन चित्कस्य चित्किं चित्कर्तव्यं स्यात् [Tib. 193 b] । न हि नभसो-ऽनावरणत्वं केन चित्क्रियते । अक्रियमाणा च क्रिया स्यात् । क्रियां चाकुर्वाणस्य कारकत्वं स्यात् । न चैतदेवमिति तस्मान्नाशून्याः पदार्थाः ॥ किं चान्यत् ।

अजातमनिरुद्धं च कूटस्थं च भविष्यति ।
विचित्राभिरवस्थाभिः स्वभावे रहितं [जगत्][(3)] ॥ ३८

स्वभावेनैव [(4)][यदि भावाः स्युस्तदा स्वभावस्याकृत्रिमत्वादव्यावर्तनत्वाच्च सर्वमिदं

---

1) རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་བ་ཡི། སྟོང་པ་ཉིད་ལ་གནོད་བྱེད་གང་། འཇིག་རྟེན་པ་ཡི་ཐ་སྙད་ནི། ཀུན་ལའང་གནོད་པ་བྱེད་པ་ཡིན།

2) སྟོང་པ་ཉིད་ལ་གནོད་བྱེད་ན། བྱ་བ་ཅི་ཡང་མེད་འགྱུར་ཞིང་། རྩོམ་པ་མེད་པའི་བྱ་བར་འགྱུར། མི་བྱེད་པ་ཡང་བྱེད་པོར་འགྱུར།

3) རང་བཞིན་ཡོད་ན་འགྲོ་བ་རྣམས། མ་སྐྱེས་པ་དང་མ་འགགས་དང་། ཐེར་ཟུག་ཏུ་ནི་གནས་འགྱུར་ཞིང་། གནས་སྐབས་སྣ་ཚོགས་བྲལ་བར་འགྱུར། — ...bhāve = *svabhāve sati*..

4) Les Mss. portent: *vicitrābhir avasthābhiḥ svabhavaracitaṃ* / *svabhāvenaiva racitam apratītyasamutpannaṃ jagat svabhāvāçūnyavādinām* — ཀྱལ་ཏེ་

जगदजातमनिरुद्धं च स्यात्। अजातानिरुद्धत्वाज्जगत्कूटस्थं[1] स्यात्। हेतुप्रत्ययानपेक्षं विचित्राभिरवस्थाभी] रहितमप्रतीत्यसमुत्पन्नं जगदशून्यवादिनां स्यात्॥

[2]यथोक्तं पितापुत्रसमागमसूत्रे। स्याद्यदि किं चिदशून्यं न वदेज्जिनु तस्य व्याकरणं तथा हि स्थितं तत् स्वकस्वके भावे कूटस्थमविकारं न तस्य वृद्धिर्न परिहाणिरिति॥

तथार्यहस्तिकक्ष्यसूत्रे[3]॥

यदि को चि धर्माण भवेत्स्वभावः
तत्रैव गच्छेय जिनः सश्रावकः।
कूटस्थधर्माण सिया न निर्वृतो
न निष्प्रपञ्चो भवि जातु पण्डितः॥ इति॥

དངོས་པོ་རྣམས་ རང་བཞིན་ དང་ བཅས་པར་ འགྱུར་ན་ ནི་ དེའི་ཚེ། རང་བཞིན་ བཅོས་མ་ མ་ ཡིན་པའི་ ཕྱིར་ དང་། ལྡོག་པ་ མེད་པའི་ ཕྱིར་ འགྲོ་བ་ འདི་དག་ ཐམས་ཅད་ སྐྱེ་བ་ མེད་པ་ དང་ འགག་པ་ མེད་པར་ འགྱུར་རོ། །སྐྱེ་བ་ མེད་པ་ དང་ འགག་པ་ མེད་པ་ཉིད་ཀྱི་ ཕྱིར་ ན། འགྲོ་བ་ ཐེར་ཟུག་ཏུ་ གནས་པར་ འགྱུར་རོ། །རྒྱུ་ དང་ རྐྱེན་ལ་ མི་ བལྟོས་པས་ ན། སྟོང་པ་ མ་ཡིན་པར་ སྨྲ་བ་རྣམས་ལ། འགྲོ་བ་ རྟག་ཅིང་ འབྲེལ་པར་ མ་ བྱུང་ ཞིང་ གནས་སྐབས་ སྣ་ཚོགས་པ་ དང་ བྲལ་བར་ འགྱུར་རོ། = *yadi bhāvāḥ sasvabhāvāḥ syuḥ* . . .

1) Voir Dīgha I, 15. 7, Sumaṅgalavil. p. 105, Saṃyutta III. 211.

2) ཇི་སྐད་དུ་ བཅོམ་ལྡན་འདས་ཀྱིས་ མི་ སྟོང་ ཅུང་ཞིག་ ཡོད་ན་ རྒྱལ་བ་ཡིས། འགའ་ ཡང་ ལུང་སྟོན་ མི་ གསུངས་ འགྱུར་མེད་པར། རང་ རང་ དངོས་ལ་ ཐེར་ཟུག་ གནས་ དེ་ལ། འཕེལ་བ་ མེད་ ཅིང་ ཡོངས་སུ་ ཉམས་པ་ མེད། La citation commence et se termine par une deuxième ligne d'*āryā*: *siyā yadi kiṁ ci açūnya na vadej jinu tasya vākaraṇam* ... *kūṭatthaṁ avikāraṁ na tasya vṛddhir na parihāniḥ.* On a quatre mesures: *tatha hi ṭhitaṁ tat sakasakabhāve.* — En tout cas faut-il lire *sthitaṁ yat* (et non *tat*) ..... *na tasya.*

3) Voir ci-dessus p. 388. 1.

न च केवलं सस्वभाववादाभ्युपगमे लौकिका एव व्यवहारा नोपपद्यन्ते। अपि च लोकोत्तरा एव व्यवहारा नोपपद्यन्त इति प्रतिपादयन्नाह।

अप्रसंप्राप्तस्य च प्राप्तिर्दुःखपर्यन्तकर्म च।
सर्वक्लेशप्रहाणं च यद्यशून्यं न विद्यते⁽¹⁾॥ ३९

यदि ह्यशून्यं [Tib. 194a] सस्वभावं सर्वमेतत्स्यात्, तदा यदसंप्राप्तं तदसंप्राप्तमेवेत्यसंप्राप्तस्य च फलस्य प्राप्तिर्न स्यात्। तदा दुःखपर्यन्तकरणं च पूर्वं नाभूदिति सांप्रतमपि न स्यात्। सर्वेषां च क्लेशानां पूर्वं प्रहाणं नाभूदिति प[162a]श्चादपि प्रहाणं न स्यात्॥ तदेवं यस्मात्सस्वभाववादाभ्युपगमे सति सर्वमेतन्न युज्यते, अतः,

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति।
दुःखं समुदयं चैव निरोधं मार्गमेव च⁽²⁾॥ ४०

यो हि सर्वधर्मप्रतीत्यसमुत्पादलक्षणां स्वभावशून्यतां सम्यक् पश्यति, स चत्वार्यार्यसत्यानि पश्यति यथाभूतानि तत्त्वतः।

1) གལ་ཏེ་ སྟོང་པ་ ཡོད་ མིན་ན། མ་ཐོབ་ ཐོབ་པར་ བྱ་བ་ དང་། སྡུག་བསྔལ་ མཐར་བྱེད་ ལས་ དང་ ནི། ཉོན་མོངས་ ཐམས་ཅད་ སྤོང་བའང་ མེད།

2) གང་གིས་ རྟེན་ཅིང་འབྲེལ་པར་ འབྱུང་། མཐོང་བ་ དེས་ ནི་ སྡུག་བསྔལ་ དང་། ཀུན་འབྱུང་ དང་ ནི་ འགོག་པ་ དང་། ལམ་ཉིད་ དེ་དག་ མཐོང་བ་ ཡིན།

3) Mdo, XIV, 1—8, Mañjuçrīparipṛcchā, འཇམ་དཔལ་གྱིས་ཞུས་པ (Csoma-Feer, p. 255; Nanjio, 264—5); mais il semble que ce sūtra soit hors de cause, car notre version tibétaine porte འཕགས་པ་ ཆོས་ཐམས་ཅད་ འཇུག་པ་ མེད་པར་ བསྟན་པའི་ མདོ་ལས = Āryasarvadharmāpravṛttinirdeçasūtra = ཆོས་ ཐམས་ཅད་ འབྱུང་བ་མེད་པར་ བསྟན་པ, Mdo XIV, 429—480.

यथोक्तमार्यमञ्जुश्रीपरिपृच्छायां । येन मञ्जुश्रीरनुत्पादः सर्वधर्माणां दृष्टस्तेन दुःखं परिज्ञातं । येन नास्तिता सर्वधर्माणां दृष्टा तस्य समुदयः प्रहीणः । येनात्यन्तपरिनिर्वृताः सर्वधर्मा दृष्टास्तेन निरोधः साक्षात्कृतः । येन मञ्जुश्रीरभावः सर्वधर्माणां दृष्टस्तेन मार्गो भावित इति विस्तरः ।

उक्तं चार्यध्यायितमुष्टिसूत्रे[1] । अथ खलु भगवान् मञ्जुश्रियं कुमारभूतमेतदवोचत् । चतुर्णां मञ्जुश्रीरार्यसत्यानां यथाभूतादर्शनाच्चतुर्भिर्विपर्यासै[Tib. 194b]र्विपर्यस्तचित्ताः सत्त्वा एवमिम[म]भूतं संसारं नातिक्रामन्ति ॥ एव[मुक्ते] मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत् । देशयतु भगवान् कस्योपलम्भतः सत्त्वाः संसारं नातिक्रामन्ति ॥ भगवानाह । आत्मात्मीयोपलम्भतो मञ्जुश्रीः सत्त्वाः संसारं नातिक्रामन्ति । तत्कस्य हेतोः । यो हि मञ्जुश्रीरात्मानं परं च समनुपश्यति तस्य कर्माभिसंस्कारा भवन्ति । बालो मञ्जुश्रीरश्रुतवान् पृथग्जनोऽत्यन्तपरिनिर्वृतान् सर्वधर्मानप्रजानान आत्मानं परं चोपलभते ' उपलभ्य[ा]भिनिवशते ' अभिनिविष्टः सन् रज्यते दुष्यते मुह्यते । स [162b]रक्तो दुष्टो मूढः सन् त्रिविधं कर्माभिसंस्करोति कायेन वाचा मनसा । सोऽसत्समारोपेण विकल्पयति ' अहं रक्तोऽहं दुष्टोऽहं मूढ इति ॥ तस्य तथागतशासने प्रव्रजितस्यैवं भवति ' अहं शीलवानहं ब्रह्मचारी ' अहं संसारं समतिक्रमिष्यामि ' अहं निर्वाणमनुप्राप्स्यामि ' अहं दुःखेभ्यो मोक्ष्यामि । स कल्पयतीमे धर्माः कुशला इमे धर्मा अकुशला इति ' इमे धर्माः प्रहातव्या इमे धर्माः साक्षात्कर्तव्याः ' दुःखं परिज्ञातव्यं स[Tib. 195a]मुदयः प्रहातव्यो निरोधः साक्षात्कर्तव्यो मार्गो भावयितव्यः । स कल्पयति ' अनित्याः सर्वसंस्कारा आदीप्ताः सर्वसंस्काराः ' यन्न्वहं सर्वसंस्कारेभ्यः पलायेयं ॥ तस्यैवमवेक्षमाणस्योत्पद्यते निर्वित्सहगतो मनसिकारः ' आनिमित्तपुरोगतः । तस्यैवं भवति ' एषा सा दुःखपरिज्ञा येयमेषां धर्माणां परिज्ञा ॥ तस्यैवं भवति ' यन्न्वहं समुदयं प्रजहेयं । स सर्वधर्मेभ्य आर्तीयते जेह्रीयते वितरति विजुगुप्सत उत्त्रस्यति संत्रस्यति संत्रासमापद्यते ॥ तस्यैवं

1) Voir ci-dessus p. 295. 12—298. 15.

भवति, इयमेषां धर्माणां साक्षात्क्रिया इदं समुदयप्रहाणं यदिदमेभ्यो धर्मेभ्यो ऽर्तीयना ॥ तस्यैवं भवति, निरोधः साक्षात्कर्तव्यः । समुदयं कल्पयित्वा निरोधं संजानाति । तस्यैवं भवति, एषा [सा] निरोधसाक्षात्क्रिया ॥ तस्यैवं भवति, यन्नूनमहं मार्गं भावयेयं । स एको रहोगतस्तान् धर्मान् मनसि कुर्वन् शमथं प्रतिलभते ॥

तस्य तेन निर्वित्सहगतेन मनसिकारेण शमथ उत्पद्यते । तस्य सर्वधर्मेषु चित्तं न प्रलीयते प्रतिवहति प्रत्युदावर्तते, तेभ्यश्चार्तीयते जेह्रीयते, अनभिनन्दनाचित्तं समुत्पद्यते ॥ तस्यैवं भवति, मुक्तोऽस्मि सर्वदुःखेभ्यो न मम भूय उत्तरो[1] किं चित्करणीयं, अर्हन्नस्मीत्यात्मानं [Tib. 195b] संजानाति [163a] ॥ स मरणकालसमय उत्पत्तिमात्मनो देवेषु[2] पश्यति । तस्य काङ्क्षा विचिकित्सा च भवति बुद्धबोधौ । स विचिकित्सापातितः कालगतो महानिरयेषु प्रपतति । तत्कस्य हेतोः । यथापीदमनुत्पन्नान् सर्वधर्मान् विकल्पयित्वा तथागते विचिकित्सां विमतिमुत्पादयति ॥

अथ खलु मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचत् । कथं पुनर्भगवन् चत्वार्यार्यसत्यानि द्रष्टव्यानि ॥ भगवानाह । येन मञ्जुश्रीरनुत्पन्नाः सर्वधर्मा दृष्टास्तेन दुःखं परिज्ञातं । येनासमुत्थिताः सर्वधर्मा दृष्टास्तस्य समुदयः प्रहीणः । येनात्यन्तपरिनिर्वृताः सर्वधर्मा दृष्टास्तेन निरोधः साक्षात्कृतः, येनात्यन्तशून्याः सर्वधर्मा दृष्टास्तेन मार्गो भावितः ॥ येन मञ्जुश्रीरेवं चत्वार्यार्यसत्यानि दृष्टानि स न कल्पयति, इमे धर्माः कुशलाः, इमे धर्मा अकुशलाः, इमे धर्माः प्रहातव्याः, इमे धर्माः साक्षात्कर्तव्याः, दुःखं परिज्ञातव्यं, समुदयः प्रहातव्यः, निरोधः साक्षात्कर्तव्यः, मार्गो भावयितव्य इति ॥ [तत्कस्य हेतोः] । तथा हि स तं धर्मं न समनुपश्यति नोपलभते यं परिकल्पयेत्, बालपृथग्जनास्त्वेतान् धर्मान् कल्पयन्तो रज्यन्ति च [द्विषन्ति च] मुह्यन्ति च । स न कं चिद्धर्ममाव्यूहति निर्व्यूहति[3], तस्यैवमनाव्यूहतोऽनिर्व्यूहतस्त्रैधातुके चित्तं न सज्जति । अजातं [Tib. 196a] सर्व-

1) *uttari* et *uttariṃ* sont mieux attestés.

2) Manque dans le tibétain.

3) = མི་ལེན་ མི་འདོར. On a aussi *āyūha, niryūha* (prâcrit *niyyūha*), Daçabhūmika, VI. — Les deux termes correspondent à *samāropa, apavāda*.

त्रैधातुकं समनुपश्यति ' मायोपमं स्वप्नोपमं प्रतिश्रुत्कोपमं ॥ एवंस्वभावान् सर्वधर्मान् पश्यन्ननुनयप्रतिघापगतो भवति सर्वसत्त्वेषु । तत्कस्य हेतोः ' तथा हि स तान् धर्मान् नोपलभते यत्रानुनीयेत वा प्रतिहन्येत वा ॥ स आकाशसमेन [163 b] चित्तेन बुद्धमपि न समनुपश्यति ' धर्ममपि न समनुपश्यति ' संघमपि न समनुपश्यति । सर्वधर्मान् शून्यानिति समनुपश्यन्न क्वचिद्धर्मे विचिकित्सामुत्पादयति ' अविचिकित्सन् निरुपादानो भवति ' निरुपादानोऽनुपादाय परिनिर्वातीति विस्तरः ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं ॥

XXV.

निर्वाणपरीक्षा नाम पञ्चविंशतितमं प्रकरणं

अत्राह ।

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमिष्यते ॥ १

इह हि भगवता उषितब्रह्मचर्याणां तथागतशासनप्रतिपन्नानां(2) धर्मानुधर्मप्रति(3)पत्तियुक्तानां पुद्गलानां द्विविधं निर्वाणमुपवर्णितं सोपधिशेषं निरुपधिशेषं च ।

तत्र निरवशेषस्याविद्यारागादिकस्य क्लेशगणस्य प्रहाणात्सोपधिशेषं निर्वाणमिष्यते । तत्रोपधीयते ऽस्मिन्नात्मस्नेह इत्युपधिः । (4)उपधिशब्देनात्मप्रज्ञप्तिनिमित्ताः पञ्चोपादानस्कन्धा उच्यन्ते [Tib. 196 b] । शिष्यत इति शेषः । उपधिरेव शेष उपधिशेषः । सह उपधिशेषेण वर्तत इति सोपधिशेषं । किं (5)तन्निर्वाणं । तच्च स्कन्धमात्रकमेव केवलं सत्कायदृष्ट्यादिक्लेशतस्कररहित[164 a]मवशिष्यते (6)निहताशेषचौरगणग्राममात्रावस्थासाधर्म्येण । तत्सोपधिशेषं निर्वाणं ॥

---

1) གལ་ཏེ་ འདི་དག་ ཀུན་ སྟོང་ན། འབྱུང་བ་ མེད་ ཅིང་ འཇིག་པ་ མེད། གང་ ཞིག་ སྤང་ དང་ འགག་པ་ལས། མྱ་ངན་འདའ་བར་ འགྱུར་བར་ འདོད།

2) བསྟན་པ་ལ་ ཞུགས་པ.

3) ཆོས་ཀྱི་ རྗེས་སུ་མཐུན་པའི་ ཆོས་ཀྱི་ ནན་ཏན་ དང་ ལྡན་པ་རྣམས་ = revêtus l' pplication au *dharmas* conformes au Dharma.

4) ཕུང་པོ.

5) དེ་ ཅི་ ཡིན་ ཞེ་ན། མྱ་ངན་ལས་ འདས་པའི = *kim tad iti cet / nirvāṇam*

6) Mss. *nihitācaura.*

यत्र तु निर्वाणे स्कन्धमात्रकमपि नास्ति तन्निरुपधिशेषं निर्वाणं। निर्गत उपधिशेषोऽस्मिन्निति कृत्वा निहताशेषचौरगणस्य ग्राममात्रस्यापि विनाशसाधर्म्येण। तदेव चाधिकृत्योच्यते।

(1)अभेदि कायो * * * * * *
* * * * * * * * * * . . .

तथा।

असंलीनेन कायेन वेदनामध्यवासयत्।
प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः॥ इति(2)।

तदेवं निरुपधिशेषं निर्वाणं स्कन्धानां निरोधाल्लभ्यते॥

एतच्च द्विविधं निर्वाणं कथं युज्यते ' यदि क्लेशानां स्कन्धानां च निरोधो भवति। यदा तु सर्वमिदं शून्यं नैव किं चिदुत्पद्यते नापि किं चिन्निरुध्यते ' तदा कुतः क्लेशाः कुतो वा स्कन्धा येषां निरोधे निर्वाणं स्यादिति तस्माद्विरुध्यत एव भावानां स्वभाव इति॥

---

1) Mss. *abhedhi kāyo nirodhi samvedanāpaṇṭhai (pathai) rahinsu(itsu) sahinsu(itsu) saccadhima samo sasvarāṇām vijānam arthagamed iti.* — གང་ན་ ལུས་ ཞིག་ འདུ་ཤེས་ འགགས། ཚོར་བ་ ཐམས་ཅད་ བྲལ་ གྱུར་ཞིང། འདུ་བྱེད་ ཉེ་བར་ ཞི་བ་ དང་། རྣམ་པར་ཤེས་པ་ ནུབ་གྱུར་པ = *abhedhi kāyo vyarodhi saṁjñā sarvavedanā vyagacchat yasya, saṁskārāṇām upaçamo vijñānasyāstaṃgamaç cābharat.* — འགགས = *vyagacchat, vyarahi*; avec une lecture འབར, on aurait *sarvá vedanā dahiṃsu.* — M. R. O. Franke me signale la stance Udāna viii. 9

abhedi kāyo nirodhi saññā vedanā pi ti dahaṃsu sabbā
vūpasamiṃsu saṅkhārā viññāṇam attham agāmā ti.

M. Ed. Müller attire mon attention sur les variantes du Ms. de Mandalay (J. P. T. S. 1890, p. 107) qui porte *vedanā sitiṃ dahiṃsu.*

2) Mss. °*vāsayan*, °*vāsadyan.* — Comparer Theragāthā, 906, Mahāparinibbāna, VI. 10 (Digha, II, p. 157, Buddhist Suttas, p. 118, Burnouf, Lotus, 339) *asallīnena cittena vedanam ajjhavāsayi, pajjotass 'eva nibbānaṃ vimokho cetaso ahū.* — Voir ci-dessous p. 525.

अत्रोच्यते । नन्वेवमपि सस्वभावभावाभ्युपगमे ।

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद्वा [Tib. 197 a] निरोधाद्वा कस्य निर्वाणमिष्यते[(1)] ॥ २

स्वभावेन हि व्यवस्थितानां क्लेशानां स्कन्धानां च स्वभावस्यानपायित्वात्कुतो निवृत्तिर्यतस्तन्निवृत्त्या निर्वाणं स्यादिति । तस्मात्स्वभाववादिनां नैव निर्वाणमुपपद्यते । न च शून्यतावादिनः [स्कन्धनिवृत्तिलक्षणं] क्लेशनिवृत्तिलक्षणं वा निर्वाणमिच्छन्ति यतस्तेषामयं दोषः स्यादिति । अतोऽनुपालम्भ एवा[164 b]यं शून्यतावादिनां ॥

यदि खलु शून्यतावादिनः क्लेशानां स्कन्धानां वा निवृत्तिलक्षणं निर्वाणं नेच्छन्ति किंलक्षणं तर्हीच्छन्ति ॥ उच्यते ।

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतं ।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते[(2)] ॥ ३

यद्धि नैव प्रहीयते रागादिवत् । नापि प्राप्यते श्रामण्यफलवत् । नाप्युच्छिद्यते स्कन्धादिवत् । यच्चापि न नित्यमशून्यवत् । तत्स्वभावतोऽनिरुद्धमनुत्पन्नं च सर्वप्रपञ्चोपशमलक्षणं निर्वाणमुक्तं ॥ तत्कुतस्तस्मिन्नित्थंविधे निष्प्रपञ्चे क्लेशकल्पना येषां क्लेशानां प्रहाणान्निर्वाणं भवेत् । कुतो वा स्कन्धकल्पना तत्र येषां स्कन्धानां निरोधा-

---

1) གལ་ཏེ་འདི་ཀུན་མི་སྟོང་ན། འབྱུང་བ་མེད་ཅིང་འཇིག་པ་མེད། གང་ཞིག་སྤོང་དང་འགག་པ་ལས། མྱ་ངན་འདས་པར་འགྱུར་བར་འདོད།

2) སྤངས་པ་མེད་པ་ཐོབ་མེད་པ། ཆད་པ་མེད་པ་རྟག་མེད་པ། འགག་པ་མེད་པ་སྐྱེ་མེད་པ། དེ་ནི་མྱ་ངན་འདས་པར་བརྗོད། — Mdo XVII འདས་པར་འདོད = *nirvāṇam iṣyate*. — Comparer Laṅkāvatāra apud Burnouf, Introduction, p. 519: «le nirvāṇa n'est ni enlevé ni acquis, ni interrompu ni éternel, ni identique ni divers».

त्तद्भवेत् । यावद्ध्येताः कल्पनाः प्रवर्तन्ते तावन्नास्ति निर्वाणाधिगमः ' सर्वप्रपञ्चपरिक्षयादेव तदधिगमात् ॥

अथ स्याद्यद्यपि निर्वाणे न सन्ति [Tib. 197b] क्लेशा न चापि स्कन्धाः ' तथापि निर्वाणादर्वाग्विद्यन्ते । ततस्तेषां परिक्षयान्निर्वाणं भविष्यतीति ॥ उच्यते । त्यज्यतामयं ग्राहो ' यस्मान्निर्वाणादर्वाक् स्वभावतो विद्यमानानां न पुनरभावः शक्यते कर्तुं ' तस्मान्निर्वाणाभिलाषिणां त्यज्यैषा कल्पना । वक्ष्यति हि ।

निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किं चित्सुसूक्ष्ममपि विद्यते ॥ इति[1] ।

तदेवं निर्वाणे न कस्य चित्प्रहाणं नापि कस्य चिन्निरोध इति विज्ञेयं ॥ ततश्च निरवशेषकल्पनाक्षयरूपमेव निर्वाणं । उक्तं च भगवता ।

[2]निर्वृत्ति धर्मा[ण] न अस्ति धर्मा
[3]ये नेह अस्ती न ते जातु अस्ति[4] ।
अस्तीति नास्तीति [च] कल्पनावताम्
ए[165a]वं चरन्तान न दुःख शाम्यति ॥ इति ।

अस्या गाथाया अयमर्थः । निर्वृतौ निरुपधिशेषे निर्वाणधातौ धर्माणां क्लेशकर्मजन्मलक्षणानां स्कन्धानां वा सर्वथास्तंगमादस्तित्वं नास्ति ' एवं च सर्ववादिनामभिमतं ।

---

1) Ci-dessous XXV. 20.

2) Mss. *nirvṛti, nivvṛti, dharmo na* ... མྱ་ངན་འདས་ལ་ ཆོས་རྣམས་ ཡོད་ཉིད་ མེད། ཆོས་ གང་ དེར་ མེད་ = *nirvṛtau dharmāṇām astitvaṃ nāsti; ye dharmā iha na santi....*

3) Mss. *ye neha nāsti na te...*

4) On a *asti* pour *hoti* pour *honti*; *dharmāṇa*, nom. pluriel; au deuxième pāda *te* = *ti*.

nibutīyi dharmāṇa na honti; dharmā
ye neha hontī na ti jātu honti /

न तर्हि धर्मा इह निर्वृतौ न सन्ति । प्रदीपोदयादन्धकारोपलब्धरज्जुसर्पभयादिवत् । न ते जातु अस्ति । न ते धर्माः क्लेशकर्मजन्मादिलक्षणाः कस्मिंश्चित्काले संसारावस्थायामपि तत्त्वतो विद्यन्ते । न हि रज्जुरन्धकारावस्थायां स्वरूपतः सर्पोऽस्ति । सद्भूतसर्पवदन्धकारेऽप्यालोकेऽपि कायचक्षुर्भ्यामग्रहणात् ॥ कथं तर्हि संसार इति चेदुच्यते । [Tib. 198a] आत्मात्मीयासद्ग्रहग्रस्तानां बालपृथग्जनानामसत्स्वरूपा अपि भावाः सत्यतः प्रतिभासन्ते तैमिरिकाणामिवासत्केशमशकादय इवेति । आह

अस्तीति नास्तीति [च] कल्पनावता-
मेवं चरन्तान न दुःख शाम्यतीति ।

अस्तीति भावसद्भावकल्पनावतां जैमिनीयकाणादकापिलादीनां वैभाषिकपर्यन्तानां । नास्तीति च कल्पनावतां नास्तिकानामपायगतिनिष्ठानां । तदन्येषां[1] चातीतानागतसंस्थानां विज्ञप्तिविप्रयुक्तसंस्कार[ाणां] नास्तिवादिनां तदन्यदास्तिवादिनां[1] । [परि]-[2]कल्पितस्वभावस्य नास्तिवादिनां परतन्त्रपरिनिष्पन्नस्वभावयोरस्तिवादिनामनयोरस्तिनास्तिवादिनामेवं चरतां न दुःखं संसारः शाम्यतीति ॥ तथा[3] ।

---

1) D'après un Ms. °*saṁsthānāri*° — Le texte n'est rien moins que sûr. — འདས་པ་ དང་ མ་ འོངས་པ་ དང་། རྣམ་པར་རིག་བྱེད་ མ་ ཡིན་ པ་། མི་ ལྡན་པའི་ འདུ་བྱེད་ མེད་པར་ སྨྲ་ཞིང་ = *atītānāgatānāṃ ca avijñaptikānam viprayuktānāṃ [ca] saṃskarāṇām nāstivādinām.* — Il s'agit des **Sautrāntikas** qui nient l'existence du passé et de l'avenir, l'existence des *cittaviprayuktas*. Comparer ci-dessus p. 414. — Voir Additions et Corrections.

2) Deuxième catégorie de philosophes disant à la fois *asti* et *nāsti*, à savoir les **Vijñānavādins** (voir ci-dessus, p. 415. 1).

3) ཇི་ལྟར་ རྟོག་པའི་ འདུ་ཤེས་ཀྱིས་ ནི་ རྣམ་ འདས་པ། རྣམ་ དེ་ ཁོང་དུ་ སོང་པ་ མེད་ ཀྱང་ བརྒྱལ་བར་ འགྱུར། དེ་བཞིན་ བྱིས་པ་ བདག་ དང་ བདག་གིར་ ངས་ ཞེན་ན། བདག་ ངེར་ འདུ་ཤེས་ ཡང་ དག་ མེད་ རྟག་ སྐྱེ་ ཞིང་ འཆི། — «Ne

[(1)] यथ शङ्कितेन विषसंज्ञ अभ्युपेति
नो चापि कोष्ठग [(2)] ------ ।
एवमेव बालु ऽपगतो [165b] [(3)] -----
* * * * ज्ञापि म्रियते सदा अभूतो ॥ इति ।

तदेवं न कस्य चिन्निर्वाणे प्रहाणं नापि कस्य चिन्निरोध इति विज्ञेयं । ततश्च सर्वकल्पनाक्षयरूपमेव निर्वाणं ॥

यथोक्तमार्यरत्नावल्यां [(4)] ।

न चाभावोऽपि निर्वाणं कुत एवास्य भावना ।
भावाभावपरामर्शक्षयो निर्वाणमुच्यते ॥ इति ।

ये तु सर्वकल्पनोपशमरूपं निर्वाणमप्रतिपद्यमाना [Tib. 198b] भावाभावतदुभयानुभयरूपं निर्वाणं परिकल्पयन्ति तान् प्रत्युच्यते ।

भावस्तावन्न निर्वाणं जरामरणलक्षणं ।
प्रसज्येतास्ति भावो हि न जरामरणं विना [(5)] ॥ ४

---

même que, par une pensée de crainte, on s'imagine avoir mangé du poison, et qu'on tombe en faiblesse, bien que le poison n'ait pas pénétré dans le corps; de même le sot, admettant le moi et le mien, ayant l'idée de ce moi, n'arrête pas de naître et de mourir, encore qu'il soit inexistant.»

1) Mss. *yathā*.

2) *koṣṭha gantu āviṣṭa papadyate.*

3) *upagato aṅgamajñaya jāpi triyate.*

4) Cette stance est citée Nāmasaṃgītiṭikā, ad 96, où la Ratnavalī est attribuée à Nāgārjuna.

5) རེ་ཞིག་ མྱ་ངན་འདས་ དངོས་ མིན། རྒ་ཤིའི་ མཚན་ཉིད་ ཐལ་བར་ འགྱུར། རྒ་ དང་ ཆི་བ་ མེད་པ་ཡི། དངོས་པོ་ ཡོད་པ་ མ་ ཡིན་ནོ།

तत्रैके भावतो निर्वाणमभिनिविष्टा एवमाचक्षते । इह क्लेशकर्मजन्मसंतानप्रवृत्तिनियतरोधभूतो जलप्रवाहरोधभूतसेतुस्थानीयो निरोधात्मकः पदार्थः ' तन्निर्वाणं ' न चाविद्यमानस्वभा[166a]वो धर्म एवं कार्यकारी दृश्यते ॥ ननु च योऽस्या नन्दीरागसहगतायास्तृष्णायाः क्षयो विरागो निरोधो निर्वाणमित्युक्तं । न च क्षयमात्रं भावो भवितुमर्हति ' तथा

प्रद्योतस्ये[व] निर्वाणं विमोक्षस्तस्य चेतस

इत्युक्तं । न च प्रद्योतस्य निवृत्तिर्भाव इत्युपपद्यते ॥ उच्यते । नैतदेवं विज्ञेयं ' तृष्णायाः क्षयस्तृष्णाक्षय इति । किं तर्हि तृष्णायाः क्षयो ऽस्मिन्निति निर्वाणाख्ये धर्मे सति भवति स तृष्णाक्षय इति वक्तव्यं[1] । प्रदीपश्च दृष्टान्तमात्रं[2] ' तत्रापि यस्मिन् सति चेतसो विमोक्षो भवतीति वेदितव्यमिति ॥

एवं भावे निर्वाणे व्यवस्थापित आचार्यो निरूपयति ' भावस्तावन्न निर्वाणं । किं कारणं । यस्माज्जरामरणलक्षणं प्रसज्येत ' भावस्य जरामरणलक्षणाव्यभिचारित्वात् । ततश्च निर्वाणमेव तन्न स्यात् ' जरामरणलक्षणत्वा[Tib. 199a]द्विज्ञानादिवदित्यभिप्रायः ॥

तामेव च जरामरणलक्षणाव्यभिचारितां स्पष्टयन्नाह ' अस्ति भावो हि न जरामरणं विनेति । यो हि जरामरणरहितः स भाव एव न संभवति खपुष्पवज्जरामरणारहितत्वात् ॥

किं चान्यत् ।

---

1) Sic Mss. — རིག་པར་ བྱའོ = *iti veditavyam*, leçon plus correcte.

2) Mss. *nirvāṇamātram* — མར་མེ་ ནི་ དཔེ་ཙམ་དུ་ ཟད་དོ.

भावश्च यदि निर्वाणं निर्वाणं संस्कृतं भवेत् ।
नासंस्कृतो हि विद्यते भावः क्व चन कश्चन[1] ॥ ५

यदि निर्वाणं भावः स्यात् ' तदा तन्निर्वाणं संस्कृतं भवेद्विज्ञानादिवद्भावत्वात् । यस्त्वसंस्कृतो नासौ भावस्तद्यथा खरविषाणवदिति व्यतिरेकमुपदर्शयन्नाह '

नासंस्कृतो हि विद्यते भावः [क्व चन कश्चन] ।

क्व[2] चनेत्यधिकरणे देशे काले सिद्धान्ते वा ' कश्चनेत्या[3]धेये आध्यात्मिको बाह्यात्मिको [166 b] वेत्यर्थः ॥

किं चान्यत् ।

भावश्च यदि निर्वाणमनुपादाय तत्कथं ।
निर्वाणं नानुपादाय कश्चिद्भावो हि विद्यते[4] ॥ ६

यदि भवन्मतेन निर्वाणं भावः स्यात्तदुपादाय भवेत् ' स्वकारणसामग्रीमाश्रित्य भवेदित्यर्थः । न चैवमुपादाय निर्वाणमिष्यते । किं तर्ह्यनुपादाय । तद्यदि भावो निर्वाणमनुपादाय तत्कथं निर्वाणं स्यात् ' नैवानुपादाय स्याद्भावत्वाद्विज्ञानादिवत् । व्यतिरेककारणमाह ' नानुपादाय [Tib. 199 b] कश्चिद्भावो हि विद्यत इति ॥

---

1) གལ་ཏེ་ མྱ་ངན་འདས་ དངོས་ ན། མྱ་ངན་འདས་པ་ འདུས་ འགྱུར། དངོས་པོ་ འདུས་བྱས་ མ་ ཡིན་པ། འགའ་ ཡང་ གང་ནའང་ ཡོད་ མ་ ཡིན།

2) གང་ནའང་ ཞེས་ བྱ་བའི་ བརྟེན་ཏེ. — Voir ci-dessus, 13.1 — «en aucun lieu, en aucun temps, dans aucun système».

3) འགའ་ ཡང་ ཞེས་ བྱ་བའི་ བརྟེན་པ་ སྟེ.

4) གལ་ཏེ་ མྱ་ངན་འདས་ དངོས་ན། ཇི་ལྟར་ མྱང་འདས་ དེ་ བརྟེན་མིན། དངོས་པོ་ བརྟེན་ནས་ མ་ཡིན་པ། འགའ་ ཡང་ ཡོད་པ་ མ་ ཡིན་ནོ།

अत्राह। यदि भावो हि [न] निर्वाणं यथोदितदोषप्रसङ्गात्। किं तर्ह्यभाव एव निर्वाणं क्लेशजन्मनिवृत्तिमात्रत्वादिति॥ उच्यते। एतदप्ययुक्तं यस्मात्।

यदि भावो न निर्वाणमभावः किं भविष्यति।
निर्वाणं यत्र भावो न नाभावस्तत्र विद्यते[1]॥ ७

यदि भावो निर्वाणं नेष्यते। यदि निर्वाणं भाव इति नेष्यते। तदा किमभावो भविष्यति निर्वाणम्। अभावोऽपि न भविष्यतीत्यभिप्रायः। क्लेशजन्मनोरभावो निर्वाणमिति चेदेवं तर्हि क्लेशजन्मनोरनित्यता निर्वाणमिति स्यात्। अनित्यतैव हि क्लेशजन्मनोरभावो नान्यदित्यतोऽनित्यतैव निर्वाणं स्यात्। न चैतदिष्टं। अयत्नेनैव मोक्षप्रसङ्गादित्ययुक्तमेवैतत्॥

किं चान्यत्।

यद्यभावश्च निर्वाणमनुपादाय तत्कथं।
निर्वाणं न ह्यभावोऽस्ति [Tib. 200 a] यो ऽनुपादाय विद्यते[2]॥ ८

तत्राभावोऽनित्यता वा भावमुपादाय[3] प्रज्ञप्यते। खरवि[167 a]षाणादीनामनित्यतानुपलम्भात्। लक्षणमाश्रित्य लक्ष्यं प्रज्ञप्यते लक्ष्यमाश्रित्य च लक्षणं। अतः परस्-

1) གལ་ཏེ་ མྱ་ངན་འདས་ དངོས་ མིན། དངོས་ མེད་ ཇི་ལྟར་ རུང་བར་ འགྱུར། གང་ལ་ མྱ་ངན་འདས་ དངོས་ མེད། དེ་ལ་ དངོས་མེད་ ཡོད་ མ་ ཡིན། — Mdo XVII གང་ལས་ ... དངོས་མེད། — C'est-à-dire: *nirvāṇe yatra* ...

2) གལ་ཏེ་ མྱ་ངན་འདས་ དངོས་ མེད། ཇི་ལྟར་ མྱང་འདས་ དེ་ བརྟེན་ མེད། གང་ཞིག་ བརྟེན་ནས་ མ་ ཡིན་པའི། དངོས་མེད་ ཡོད་པ་ མ་ ཡིན་ནོ།

3) *anityatā bhāvaṃ ropādāya.* — Le tibétain donne un sens très net: «l'*anityatā*, c'est-à-dire l'*abhāvatā*, ...» དེ་ལ་ མི་རྟག་པ་ཉིད་ དངོས་པོ་མེད་པ་ཉིད་ ཡང་ན་.

रापेक्षिकीं लक्ष्यलक्षणप्रवृत्तौ। कुतो लक्ष्यं भावमनपेक्ष्यानित्यता भविष्यति। तस्माद्भावोऽप्युपादाय प्रज्ञप्यते। ततो यश्च भावश्च निर्वाणं तत्कथमनुपादाय निर्वाणं भवेत्। उपादायैव तद्भवेद्भावत्वाद्विनाशवत्॥ एतदेव स्पष्टयन्नाह। न ह्यभावोऽस्ति योऽनुपादाय विद्यत इति॥

यदि तर्ह्यभावोऽनुपादाय नास्ति किमिदानीमुपादाय वन्ध्यापुत्रादयोऽभावा भविष्यन्ति॥ केनैतदुक्तं वन्ध्यापुत्रादयोऽभावा इति। उक्तं हि पूर्वं[1]।

भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति।
भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः॥ इति।

तस्मान्न वन्ध्यापुत्रादीनामभावत्वं। यत्राप्युच्यते[2]।

आकाशं शशशृङ्गं च वन्ध्यायाः पुत्र एव च।
असन्तश्चाभिलप्यन्ते तथा भावेषु कल्पना॥ इति।

तत्रापि भावकल्पनाप्रतिषेधमात्रं नाभावकल्पना भावत्वासिद्धेरेवेति विज्ञेयं। वन्ध्यापुत्र इति शब्दमात्रमेवैतत्। नास्यार्थ उपलभ्यते यस्यार्थस्य भावत्वम्[Tib. 200b] भावत्वं वा स्यादिति कुतोऽनुपलभ्यमानस्वभावस्य भावाभावकल्पना योक्ष्यते॥ तस्मान्न वन्ध्यापुत्रोऽभाव इति विज्ञेयं॥ ततश्च स्थितमेव न ह्यभावोऽस्ति योऽनुपादाय विद्यत इति॥

अत्राह। यदि भावो निर्वाणं न भवति। अभावो ऽपि। किं तर्हि निर्वाणमिति॥ उच्यते। इह हि भगवद्भिस्तथागतैः।

---

1) XV. 5.

2) Peut-être dans le Catuḥçataka? — Voir ci-dessus p. 505. 7.

य आजवंजवीभाव उपादाय प्रतीत्य वा ।

सोऽप्र[167b]तीत्यानुपादाय निर्वाणमुपदिश्यते[1] ॥ ६

तत्राजवंजवीभाव आगमनगमनभावजन्ममरणपरंपरेत्यर्थः । स चायमाजवंजवीभावः कदा चिद्धेतुप्रत्ययसामग्रीमाश्रित्यास्तीति प्रज्ञप्यते ' दीर्घह्रस्ववत् । कदा चिदुत्पद्यत[2] इति प्रज्ञप्यते ' प्रदीपप्रभावद्बीजाङ्कुरवत्[3] । सर्वथा[4] [5]पद्यपमुपादाय प्रज्ञप्यते ' यदि व प्रतीत्य जायत इति व्यवस्थाप्यते[5] सर्वथास्य जन्ममरणपरंपराप्रबन्धस्याप्रतीत्य वानुपादाय वा याऽप्रवृत्तिस्तन्निर्वाणमिति व्यवस्थाप्यते ॥ न चाप्रवृत्तिमात्रं भावो ऽभा[वो] वेति परिकल्पितुं पार्यत इति । एवं न भावो नाभावो निर्वाणं ॥

अथ वा येषां संस्काराः संसरन्तीति यतस्तेषां प्रतीत्य[6] प्रतीत्य य उत्पादश्च विनाशश्च सोऽप्रतीत्य[ा]प्रवर्तमानो निर्वाणमिति कथ्यते । येषां तु पुद्गलः संसरति ' तेषां तस्य नित्यानित्यत्वेना[Tib. 201a]वाच्य[स्य] तत्तदुपादानमाश्रित्य य आजवंजवीभावः

---

1) འོང་བ་ དང་ ནི་ འགྲོ་བའི་ དངོས། བརྟེན་ནམ་ རྒྱུར་བྱས་ གང་ ཡིན་པ། དེ་ ནི་བརྟེན་ མིན་ རྒྱུར་བྱས་ མིན། མྱ་ངན་འདས་པ་ ཡིན་པར་ བསྟན། — Sur l'expression *ājavaṁjavībhāva*, voir ci-dessus 218, n. 2. — Le M. Vyut. (édition rouge) a *ājacañjavasamāpanna* — འོང་བ་ དང་ འགྲོ་བར་ འགྱུར་བ — (Communiqué par M. le Dr. Cordier). — M. J. S. Speyer pense que la formation en *ī*, qui marque transition d'un état dans un autre (Pāṇ. V. 4. 50), est ici anormale.

2) རེས་ འགའ་ ནི་ རྒྱུར་བྱས་ནས་ འདོགས་ཏེ = *kadā cid upādāya prajñapyate.* — La version tibétaine doit être fautive, voir ci dessous n. 5—5).

3) Ce second exemple manque dans le tibétain.

4) *sarvathā* manque dans le tibétain.

5—5) གལ་ཏེ་ འདིར་ རྒྱུར་བྱས་ནས་ འདོགས་སམ། བརྟེན་ནས་ སྐྱེ་བོ་ (?) ཞེས་ རྣམ་པར་ འཇོག་ ཀྱང་ རྒྱུད་སྐྱེ།

6) རྟེན་ཅིང་ བརྟེན་ནས་.

स उपादाय[1] प्रवर्तते । स एवोपादायोपादाय[2] प्रवर्तमानः सन्निदानीमनुपादाय[ा]प्रवर्तयमानो निर्वाणमिति व्यपदिश्यते ॥ न च संस्काराणां पुद्गलस्य वाऽप्रवृत्तिमात्रकं भावोऽभावो वेति शक्यं परिकल्पयितुमित्यतोऽपि न भावो नाभावो निर्वाणमिति युज्यते ॥

किं चान्यत् ।

प्रहाणं चाब्रवीच्छास्ता भवस्य विभवस्य च ।
तस्मान्न भावो नाभावो निर्वाणमिति युज्यते[3] ॥ १०

तत्र सूत्र[4] उक्तं । ये केचिद्भिक्षवो भवेन भवस्य निःसरणं पर्येषन्ते विभवेन वाऽपरिज्ञानं तत्तेषामिति । उभयं ह्येतत्परित्याज्यं भवे तृष्णा विभवे तृष्णा [168a] च । न चैतन्निर्वाणं प्रहातव्यमुक्तं भगवता । किं तर्ह्यप्रहातव्यं । तद्यदि निर्वाणं भावरूपं स्यादभावरूपं वा । तदपि प्रहातव्यं भवेत् । न च प्रहातव्यं ।

तस्मान्न भावो नाभावो निर्वाणमिति युज्यते ॥

येषामपि क्लेशजन्मनोस्तत्राभावादभावरूपं निर्वाणं स्वयं च भावरूपत्वाद्भावरूपमित्युभयरूपं तेषामुभयरूपमिति निर्वाणं नोपपद्यत इति प्रतिपादयन्नाह ।

---

1) རྒྱུར་བྱས་ནས་.

2) རྒྱུར་བྱས་ཤིང་ རྒྱུར་བྱས་ནས་.

3) འབྱུང་བ་ དང་ ནི་ འཇིག་པ་དག། སྤང་བར་ སྟོན་པས་ བཀའ་ སྩལ་ཏེ། དེ་ཕྱིར་ མྱ་ངན་འདས་པ་ ནི། དངོས་ མིན་ དངོས་མེད་ མིན་པར་ རིགས།

4) Le texte pali le plus voisin de ce sūtra est, à ma connaissance, Udāna p. 33 (iii. 10); sur la *bhava*° et *vibhavaditthi*, Itivuttaka, § 49, Aṅg. n. I. 83, Majjh. I. 65. — Lotus, VI. 29; et ci-dessus 272, n. 5. Sur la *bhava* et *vibhava-tṛṣṇā*, on connaît le conflit des indianistes: Vergänglichkeitsdurst (Oldenberg), Durst nach (ewigem) Tode (Pischel), Durst nach Mehrsein (E. Hardy), craving for success (in this present life) (Rhys Davids qui cite Spence Hardy, très ingénieux: «*Wibhawa-Taṅhā* is the love of the present life, under the notion that existence will cease therewith»).

भवेदभावो भावश्च निर्वाणमुभयं यदि ।
भवेदभावो भावश्च मोक्षस्तच्च न युज्यते[1] ॥ ११

यदि [Tib. 201 b] भावाभावोभयरूपं निर्वाणं स्यात्तदा भावश्चाभावश्च मोक्ष इति स्यात् । ततश्च यः संस्काराणामात्मलाभस्तस्य च विगमः स एव मोक्षः स्यात् । न च संस्कारा एव मोक्ष इति युज्यते । अत एवाह । तच्च न युज्यत इति ॥

किं चान्यत् ।

भवेदभावो भावश्च निर्वाणमुभयं यदि ।
नानुपादाय निर्वाणमुपादायोभयं हि तत्[2] ॥ १२

यदि भावाभावरूपं निर्वाणं स्यात्तदा हेतुप्रत्ययसामग्रीमुपादायाश्रित्य भवेन्नानुपादाय । किं कारणं । यस्मादुपादायोभयं हि तत् । भावमुपादायाभावोऽभावं चोपादाय भाव इति कृत्वा उभयमेतद्भावं चाभावं चोपादायैव भवति नानुपादाय । एवं निर्वाणं भवेद्भावाभावरूपं । न चैतदेवमिति न युक्तमेतत् ॥

किं चान्यत् ।

भवेदभावो भावश्च निर्वाणमुभयं कथं ।
असंस्कृतं च निर्वाणं भावाभावौ च संस्कृतौ[3] ॥ १३

---

1) གལ་ཏེ་ རྒྱ་ངན་འདས་པ་ ནི། དངོས་ དང་ དངོས་མེད་ གཉིས་ ཡིན་ ན། དངོས་ དང་ དངོས་པོ་མེད་པ་དག། ཐར་པར་ འགྱུར་ན་ དེ་ མི་ རིགས།

2) གལ་ཏེ་ རྒྱ་ངན་འདས་པ་ ནི། དངོས་ དང་ དངོས་མེད་ གཉིས་ ཡིན་ན། རྒྱ་ངན་འདས་པ་ མ་བརྟེན་ མིན། དེ་ གཉིས་ བརྟེན་ནས་ ཡིན་ ཕྱིར་ རོ།

3) ཇི་ལྟར་ རྒྱ་ངན་འདས་པ་ནི། དངོས་ དང་ དངོས་མེད་ གཉིས་ ཡིན་ཏེ། རྒྱ་ངན་འདས་པ་ འདུས་མ་བྱས། དངོས་ དང་ དངོས་མེད་ འདུས་བྱས་ ཡིན། — Voir ci-dessus p. 175. 4.

भावो हि स्वहेतुप्रत्ययसामग्रीसंभूतत्वात्संस्कृतः । अभावोऽपि [भावं] प्रतीत्य सं[168 b]भूतत्वाज्जातिप्रत्ययजरामरणवचनाच्च[1] संस्कृतः । तद्यदि भावाभावस्वभावं निर्वाणं स्यात्तदा नासंस्कृतं संस्कृतमेव । यस्मान्न च संस्कृतमिष्यते तस्मान्न भावाभावस्वरूपं निर्वाणं युज्यते ॥

अथापि स्यान्नैव [Tib. 202 a] हि निर्वाणं भावाभावस्वरूपं । किं तर्हि निर्वाणे भावाभावाविति । एवमपि न युक्तं । कुतो यस्मात्

भवेदभावो भावश्च निर्वाण उभयं कथं ।
[न तयोरेकत्रास्तित्वमालोकतमसोर्यथा][2] ॥ १४

भावाभावयोरपि परस्परविरुद्धयोरेकत्र निर्वाणे नास्ति संभव इति ॥ अतः ।

भवेदभावो भावश्च निर्वाण उभयं कथं ।

नैव भवेदित्यभिप्रायः ॥

इदानीं यथा नैव भावो नैवाभावो निर्वाणं युज्यते तथा प्रतिपादयन्नाह ।

नैवाभावो नैव भावो निर्वाणमिति याऽञ्जना ।
अभावे चैव भावे च सा सिद्धे सति सिध्यति[3] ॥ १५

---

1) སྐྱེ་བའི་ རྐྱེན་གྱིས་ རྒ་ཤི་ ཞེས་ འབྱུང་བའི་ ཕྱིར.

2) ཇི་ལྟར་ མྱ་ངན་འདས་པ་ལ། དངོས་ དང་ དངོས་མེད་ གཉིས་ ཡོད་དེ། དེ་ གཉིས་ གཅིག་ལ་ ཡོད་མིན་ཏེ། སྣང་བ་ དང་ ནི་ མུན་པ་ བཞིན། — La deuxième ligne manque dans nos manuscrits comme dans le xylographe, mais elle est donnée dans l'édition des kārikās (Mdo XVII) et dans une citation du Madhyamakāvatāra, fol. 302a. — On est tenté de reconstituer: *parasparaviruddhayor ekatra nāsti saṃbhavaḥ* (ci-dessous l. 9); mais le tibétain ne donne pas à ce passage la forme métrique.

3) དངོས་ མིན་ དངོས་པོ་མེད་ མིན་པ། མྱ་ངན་འདས་པར་ གང་ སྟོན་པ། དངོས་པོ་ མེད་ དང་ དངོས་པོ་དག། གྲུབ་ན་ དེ་ནི་ འགྲུབ་པར་ འགྱུར།

यदि हि भावो नाम कश्चित्स्यात्तदा तत्प्रतिषेधेन नैव भावो निर्वाणमित्येषा कल्पना। यदि कश्चिदभावः स्यात्तदा तत्प्रतिषेधेन नैवाभावो निर्वाणं स्यात्। यदा च भावाभावावेव न स्तस्तदा तत्प्रतिषेधोऽपि नास्तीति। तस्मान्नैव भावो नैवाभावो निर्वाणमिति या कल्पना सापि नोपपद्यत एवेति न युक्तमेतत्॥

किं चान्यत्।

नैवाभावो नैव भावो निर्वाणं यदि [Tib. 202 b] विद्यते।
नैवाभावो नैव भाव इति केन तदज्यते[1]॥ १६

यद्येतन्निर्वाणं नैवाभाव[रूपं] नैव भावरूपमस्तीति कल्प्यते। केन तदानीं तदित्थंविधं नोभयरूपं निर्वाणमस्तीति अज्यते गृह्यते प्रकाश्यते वा। किं तत्र निर्वाणे कश्चिदेवंविधः प्रतिपत्तास्ति। अथ नास्ति। यद्यस्ति। एवं सति निर्वाणेऽपि तवात्मा[ऽ]स्यात्। न चेष्टं निरुपादानस्यात्मनो[169 a]ऽस्तित्वाभावात्। अथ नास्ति। केनैतदित्थंविधं निर्वाणमस्तीति परिच्छिद्यते। संसारावस्थितः परिच्छिनत्तीति चेत्। यदि संसारावस्थितः परिच्छिनत्ति। स किं विज्ञानेन परिच्छिनत्ति उत ज्ञानेन[2]। यदि विज्ञानेनेति परिकल्प्यते तन्न युज्यते। किं कारणं। यस्मान्निमित्तालम्बनं विज्ञानं न च निर्वाणे किंचिन्निमित्तमस्ति। तस्मान्न तत्तावद्विज्ञानेनालम्ब्यते। ज्ञानेनापि न ज्ञायते। किं कारणं। यस्माज्ज्ञानेन हि शून्यतालम्बनेन भवितव्यं। तच्चानुत्पादरूपमेवेति। कथं तेनाविद्यमानस्वरूपेण नैवाभावो नैव भावो निर्वाणमिति गृह्यते सर्वप्रपञ्चातीतरूपत्वाज्ज्ञानस्येति।

1) གལ་ཏེ་ མྱ་ངན་འདས་པ་ ནི། དངོས་ མེད་ དངོས་པོ་མེད་ མིན་ན། དངོས་ མེད་ དངོས་པོ་མེད་ མིན་ ཞེས། གང་ཞིག་གིས་ ནི་ དེ་ མངོན་ བྱེད།

2) Sur l'opposition du *jñāna* et du *vijñāna*, voir la théorie des quatre *pratisaraṇas* (ci-dessus 43, n. 5 et Additions). — Elle correspond à la définition donnée par R. Garbe, Bhagavadgītā, p. 85, ad iii. 41: «die Erkenntnis der philosophischen Wahrheit, das durch die eigene Erfahrung erworbene Wissen», avec cette nuance que le *vijñāna* est discursif, intellectuel, et que le *jñāna* est intuitif. (Voir aussi ci-dessus 65, n. 3, 74, n. 6).

तस्मान्न केन चिन्निर्वाणं [Tib. 203a] नैवाभावो नैव भाव इत्यज्यते । अनज्यमानमप्रका-श्यमानमगृह्यमाणं तदेवमस्तीति न युज्यते ॥

सर्वथा यथा च निर्वाण एताश्चतस्रः कल्पना न संभवन्त्येवं निर्वाणाधिगतर्गपि तथागत एताः कल्पना नैव संभवन्तीति प्रतिपादयन्नाह ।

परं निरोधाद्भगवान् भवतीत्येव नोह्यते ।
न भवत्युभयं चेति नोभयं चेति नोह्यते[1] ॥ १७

उक्तं हि पूर्वं[2] ।

घनग्राहगृहीतस्तु येनास्तीति तथागतः ।
नास्तीति वा कल्पयन् स निर्वृतस्य विकल्पयेत् ॥ इति ।

एवं तावत्परं[3] निरोधाद्भवति तथागतो न भवति चेति नोह्यते । एतद्द्वयस्याभावादुभयमित्यपि नोह्यते । उभयस्याभावादेव नोभयमिति नोह्यते न गृह्यते ॥

न च केवलं परं निरोधाच्चतुर्भिः प्रकारैर्भगवान्नोह्यते । अपि च ।

तिष्ठमानोऽपि भगवान् भवतीत्येव नोह्यते ।
न भवत्युभयं चेति नोभयं चेति नोह्यते[4] ॥ १८

---

1) བཅོམ་ལྡན་ མྱ་ངན་འདས་ གྱུར་ནས། ཡོད་པར་ མི་ མངོན་ དེ་བཞིན་དུ། མེད་དོ་ ཞེ་འམ་ གཉི་ག་འམ། གཉིས་ མིན་ ཞེས་ཀྱང་ མི་ མངོན་ནོ། — Mss. *nāhyate*, *nājyate*.

2) = XXII. 13 (p. 407). — Le texte, comme la version tibétaine, diverge. Nous avons ici: གང་གིས་ འཛིན་ སྟུག་ བརྒྱུང་ཀྱང་ པ། དེ་ནི་ མྱ་ངན་འདས་པ་ལ། དེ་བཞིན་གཤེགས་པ་ ཡོད་ ཅེའམ། མེད་ ཅེས་ རྣམ་རྟོག་ རྟོག་པར་བྱེད།

3) མྱ་ངན་འདས་ པན་ཆད་ = *nirvāṇāt param.*

4) བཅོམ་ལྡན་ བཞུགས་པར་ གྱུར་ན་ ཡང་། ཡོད་པར་ མི་ མངོན་ དེ་ བཞིན་དུ།

(1 यथा च नाख्यं न चोक्तं 1) तथा तथागतपरिज्ञायां प्रतिपादितं ॥ अत एव

न सं[169b]सारस्य निर्वाणात्किं चिदस्ति विशेषणं ।
न निर्वाणस्य संसारात्किं चिदस्ति विशेषणं (2) ॥ १९

यस्मात्तिष्ठन्नपि भगवान् भवतीत्येवमादिना नोच्यते । परिनिर्वृतोऽपि नोच्यते भवतीत्येवमादिना । अत एव संसारनिर्वाणयोः [Tib. 203b] परस्परतो नास्ति कश्चिद्विशेषो विचार्यमाणयोस्तुल्यरूपत्वात् ॥ यच्चापीदमुक्तं भगवता । अनवराग्रो हि भिक्षवो जातिजरामरणसंसार इति । तदप्यत एवोपपन्नं संसारनिर्वाणयोर्विशेषस्याभावात् । तथा हि

निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किं चित्सुसूक्ष्ममपि विद्यते (3) ॥ २०

न च केवलं संसारस्य निर्वाणेनाविशिष्टत्वात्पूर्वापरकोटिकल्पना न संभवति । या अप्येताः ।

མེད་དོ་ ཞེ་འམ་ གཉི་ག་ དང་། གཉིས་ མེད་ ཞེས་ ཀྱང་ མི་ མངོན་ནོ། — Pour les sources canoniques du dogme de la non-existence du Tathāgata même vivant, voir Oldenberg, **Buddha** [5], p. 330 et suiv.

1—1) Mss. *yathā ca nājyaṃ na cāhyam (cākṣyam)* — ཇི་ལྟར་ མི་ མངོན་ པ་ དེ་ལྟར.

2) འཁོར་བ་ མྱ་ངན་འདས་པ་ལས། ཁྱད་པར་ ཅུང་ཟད་ ཡོད་ མ་ཡིན། མྱ་ངན་འདས་པའང་འཁོར་བ་ལས། ཁྱད་པར་ ཅུང་ཟད་ ཡོད་ མ་ཡིན།

3) མྱ་ངན་འདས་ མཐའ་ གང་ ཡིན་པ། དེ་ནི་ འཁོར་བའི་ མཐའ་ ཡིན་ཏེ། དེ་ གཉིས་ ཁྱད་པར་ ཅུང་ཟད་ནི། ཤིན་ཏུ་ ཕྲ་བའང་ ཡོད་ མ་ཡིན།

परं निरोधादन्ताद्याः शाश्वताद्याश्च दृष्टयः ।
निर्वाणमपरान्तं च पूर्वान्तं च समाश्रिताः[1] ॥ २१

ता अप्यत एव नोपपद्यन्ते संसारनिर्वाणयोरुभयोरपि प्रकृतिशान्तत्वेनैकरसत्वात् ॥ तत्र परं निरोधादित्यनेनोपलक्षणेन चतस्रो दृष्टयः परिगृह्यन्ते । तद्यथा ' भवति तथागतः परं मरणात् ' न भवति तथागतः परं मरणात् ' भवति च न भवति च तथागतः परं मरणात् ' नैव भवति न न भवति तथागतः परं मरणादिति ' एताश्चतस्रो दृष्टयो निर्वाणपरामर्शेन प्रवृत्ताः ॥

अन्ताद्या अपि च दृष्टयः । तद्यथा ' अन्तवान् लोकोऽनन्तवांश्चा[न्तवांश्चा]नन्तवांश्च नैवान्तवान्नानन्तवान् लोक इति ' एताश्चतस्रो दृष्टयोऽपरान्तं समाश्रित्य [Tib. 204a] प्रवृ[170a]त्ताः ॥ तत्रात्मनो लोकस्य[2] वानागत[3]मुत्पादमपश्यन्नन्तवान् लोक इत्येवं कल्पयन्नपरान्तमालम्ब्य प्रवर्तते । एवमनागतमुत्पादं पश्यन्ननन्तवान् लोक इति प्रवर्तते । पश्यंश्चापश्यंश्चोभयथा प्रतिपद्यते । द्वयप्रतिषेधेन नैवान्तवान्नानन्तवानिति प्रतिपद्यते ॥ शाश्वतो लोकोऽशाश्वतो लोकः शाश्वतश्चाशाश्वतश्च नैव शाश्वतो नैवाशाश्वतो लोक इत्येताश्चतस्रो दृष्टयः पूर्वान्तं समाश्रित्य प्रवर्तन्ते । तत्रात्मनो लोकस्य[2] वातीतमुत्पादं पश्यन् शाश्वतो लोक इति प्रतिपद्यते । अपश्यन्नशाश्वत इति प्रतिपद्यते । पश्यंश्चापश्यंश्च शाश्वतश्चाशाश्वतश्चेति प्रतिपद्यते । नैव पश्यन्नैवापश्यन् नैव शाश्वतो नाशाश्वतश्चेति प्रतिपद्यते पूर्वान्तमाश्रित्य ।

---

1) གང་ འདས་ པན་ཆད་ མཐའ་སོགས་ དང་། རྟག་ལ་ སོགས་པར་ ལྟ་བ་དག། མྱ་ངན་འདས་ དང་ ཕྱི་མཐའ་ དང་། སྔོན་གྱི་ མཐའ་ལ་ བརྟེན་པ་ ཡིན།

2) བདག་ དང་ འཇིག་རྟེན = ... *lokasya ca.*

3) འོངས་པའི་. Fautif pour མ་འོངས་པའི.

ताश्चैता दृष्टयः कथं युज्यन्ते । यदि कस्य चित्पदार्थस्य कश्चित्स्वभावो भवेत्तस्य भावाभावकल्पनात्स्युरेता दृष्टयः । यदा तु संसारनिर्वाणयोरविशेषः प्रतिपादितस्तदा

शून्येषु सर्वधर्मेषु किमनन्तं किमन्तवत् ।
किमनन्तमन्तवच्च नानन्तं नान्तवच्च किं[1] ॥ २२

किं तदेव किमन्यत्किं शाश्वतं किमशाश्वतं ।
अशाश्वतं शाश्वतं च किं वा नोभयमप्यतः[2] ॥ २३

चतुर्दशा[Tib. 204b]प्येतान्यव्याकृत[3]वस्तून्यसति भावस्वरूपे नैव युज्यन्ते । यस्तु भावस्वरूपमध्यारोप्य तद्विगमाविगमत[4] एता दृष्टीकृत्याभिनिविशते तस्यायमभिनिवेशो निर्वाणपुरगामिनं पन्थानं विरुणद्धि सांसारिकेषु च दुःखेषु नियोजयतीति विज्ञेयं ॥ [170b]

अत्राह । यद्येवं भवता निर्वाणमपि प्रतिषिद्धं । ननु च य एष भगवताऽनन्तचरितसत्त्वराश्यनुवर्तकेन विदिताविपरीतसकलजगदाशय[5]स्वभावेन महाकरुणापरतन्त्रेण [6]प्रियैकपुत्रकप्रेमानुगताशेषत्रिभुवनजनेन[6] चरितप्रतिपन्नानुरूपो धर्मो देशितो लोकस्य निर्वाणाधिगमार्थं स एवं सति व्यर्थ एव जायते ॥ उच्यते । यदि कश्चिद्धर्मो नाम स्वभा-

---

1) དངོས་པོ་ ཐམས་ཅད་ སྟོང་པ་ལ། མཐའ་ཡོད་ ཅི་ ཞིག་ མཐའ་མེད་ ཅི། མཐའ་ དང་ མཐའ་མེད་ ཅི་ཞིག་ ཡིན། མཐའ་དང་ མཐའ་མེད་ མིན་པ་ ཅི།

2) དེ་ཉིད་ ཅི་ཞིག་ གཞན་ ཅི་ ཡིན། རྟག་པ་ཅི་ཞིག་ མི་རྟག་ ཅི། རྟག་ དང་ མི་རྟག་གཉིས་ག་ཅི། གཉིས་ག་ མིན་པའང་ ཅི་ཞིག་ ཡིན།

3) Les deux derniers *avyākṛtas* (*kim tad eva kim anyat*) ne sont pas expliqués par **Candrakīrti**. — Sur les diverses *dṛṣṭis*, voir Chapitre XXVII.

4) Mss. *tadvigamādhigata*. དེ་ དང་ བྲལ་བ་ དང་ མ་ བྲལ་བ་ལས་.

5) *āçaya* manque dans le tibétain.

6—6) Manque dans le tibétain.

तद्रूपतः स्यात्। के चिद्वा[1] सत्त्वास्तस्य धर्मस्य श्रोतारः स्युः। कश्चिद्वा देशिता[2] बुद्धो भगवान्नाम भावस्वभावः [स्यात्] स्यादेतदेवं। यदा तु

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्वचित्कस्यचित्कश्चिद्धर्मो बुद्धेन देशितः[3]॥ २४

तदा कुतोऽस्माकं यथोक्तदोषप्रसङ्गः। इह हि सर्वेषां प्रपञ्चानां निमित्तानां य उपशमो ऽप्रवृत्तिस्तन्निर्वाणं। स एव चोपशमः प्रकृत्यैवोपशान्तत्वाच्छिवः। वाचामप्रवृत्तेर्वा प्रपञ्चोपशमश्चित्तस्याप्रवृत्तेः शिवः। क्लेशानामप्रवृत्त्या वा प्रपञ्चोपशमो जन्म[नो]ऽप्रवृत्त्या[4] शिवः। क्लेशप्रहाणेन वा [Tib. 205a] प्रपञ्चोपशमो निरवशेषवासनाप्रहाणेन[5] शिवः। ज्ञेयानुपलब्ध्या वा प्रपञ्चोपशमो ज्ञानानुपलब्ध्या शिवः॥ यदा चैवं बुद्धा भगवन्तः सर्वप्रपञ्चोपशान्तरूपे निर्वाणे शिवेऽस्थानयोगेन नभसीव हंसराजाः[6] स्थिताः स्वपुण्यज्ञानसंभार[7]पक्षपातवाते वातगगने[8] [वा] गगनस्याकिंचनत्वात्। तदा सर्वनिमित्तानुपलम्भान्न

1) D'après le tibétain *ke cid vā*.

2) Mss. *deyitā* — སྟོན་པ་པོ།.

3) དམིགས་པ་ཐམས་ཅད་ཉེར་ཞི་ཞིང་། སྤྲོས་པ་ཉེར་ཞི་ཞི་བ་སྟེ། སངས་རྒྱས་ཀྱིས་ནི་གང་དུ་ཡང་། སུ་ལ་འང་ཆོས་འགའ་མ་བསྟན་ཏོ། — Cité ad XVIII. 7.

4) Mss. °*pravṛttyā vā çivaḥ*.

5) Mss. °*prahāṇena vā çivaḥ*.

6) Mss. *haṁsarāṇaḥ*.

7) *puṇyajñānasaṁbhāra* manque dans le tibétain. — Les deux *saṁbharas* de mérite et de savoir) du Bodhisattva sont fréquemment comparés aux deux ailes de l'oiseau.

8) Mss. *pakṣayotavāte vā toç ca gagane* རང་གི་གཤོག་པ་བརྡབས་པའི་རླུང་ལ་གནས་པའམ། ནམ་མཁའ་ཅི་ཡང་མ་ཡིན་པ་ཉིད་ཀྱི་ཕྱིར་རླུང་ནམ་མཁའ་ལ་གནས་པ་ལྟར. — «Placé sur le vent de son vol *(pakṣapāta)* ou, en raison du néant de l'espace, sur [cet] espace (c'est-à-dire sur ce néant) qu'est le vent». L'oiseau n'a pas de *sthāna*.

क्व चिद्देवेषु वा मनुष्येषु वा न कस्य चिद्देवस्य वा मनुष्यस्य वा न कश्चिद्धर्मः सांक्लेशिको वा [171 a] वैयवदानिको वा देशित इति विज्ञेयम् ॥

यथोक्तमार्यतथागतगुह्यसूत्रे[1] । यां च रात्रिं शान्तमते तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धो यां च रात्रिमनुपादाय परिनिर्वास्यति ' अत्रान्तरे तथागतेनैकमप्यक्षरं नोदाहृतं न व्याहृतं नापि प्रव्याहरति नापि प्रव्याहरिष्यति[2] । अथ च यथाधिमुक्ताः सर्वसत्त्वा नानाधात्वाशयास्तां तां विविधां तथागतवाचं निश्चरन्तीं संजानन्ति । तेषामेवं पृथक् पृथग्भवति । अयं भगवानस्मभ्यमिमं धर्मं देशयति ' वयं च तथागतस्य धर्मदेशनां शृणुमः । तत्र तथागतो न कल्पयति न विकल्पयति ' सर्वकल्पविकल्पजालवासनाप्रपञ्चविगतो हि शान्तमते तथागत इति विस्तरः ॥

तथा '

[3]अवाच ऽनक्षराः सर्व शून्याः शान्तादिनिर्मलाः ।
य एवं जानति धर्मान् कुमारो बुद्ध सोच्यते ॥ इति ॥

यदि तर्ह्येवं [न] क्व चित्कस्य चि[त्कश्चि]द्धर्मो बुद्धेन देशितस्तत्कथमिम एते विचित्राः प्रवचनव्यवहाराः प्रज्ञायन्ते ॥ उच्यते । अविद्यानिद्रानुगतानां देहिनां [4]स्वप्नायमानानामिव स्वविकल्पाभ्युदय एषः ' अयं भगवान् [5]सकलत्रिभुवनसुरासुरनरनाथ[5] इमं धर्ममस्मभ्यं देशयतीति [Tib. 205b] ॥ यथोक्तं भगवता

---

1) Voir ci-dessus 366. 1.

2) La citation s'arrête ici dans le tibétain qui passe à la l. 10.

3) Mss. *avoca*. — ཚིག་མེད་, sans voix, ineffables. — ཆོས་རྣམས་ དེ་ལྟར་ སུས་ ཤེས་པ། དེ་ནི་ གཞོན་ནུ་ སངས་རྒྱས་ བརྗོད། «On l'appelle un Bouddha-Prince, un Bodhisattva de la terre des *kumāras.*» (?)

4) རྨི་ལམ་རྨི་བཞིན་པ་རྣམས.

5—5) Manque dans le tibétain.

तथागतो हि प्रतिबिम्बभूतः
कुशलस्य धर्मस्य अनास्रवस्य ।
नैवात्र तथता[1] न तथागतोऽस्ति
बिम्बं[2] च संदृश्यति सर्वलोके ॥ इति ॥

एतच्च तथागतवाग्गुह्य[3]परिवर्ते विस्तरेण व्याख्यातं ॥ ततश्च निर्वा[171 b]णार्थं धर्मदेशनाया अभावात्कुतो धर्मदेशनायाः[4] सद्भावेन निर्वाणस्यास्तित्वं भविष्यति । तस्मान्निर्वाणमपि नास्तीति सिद्धं ॥ उक्तं च भगवता

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितं ।
आकाशेन कृतो ग्रन्थिराकाशेनैव[5] मोचितः ॥ इति ।

तथा । न तेषां भगवन् बुद्धोत्पादो ये कस्य चिद्धर्मस्योत्पादं वा निरोधं वेच्छन्ति । न तेषां भगवन् संसारसमतिक्रमो ये निर्वाणं भावतः पर्येषन्ते । तत्कस्य हेतोः । निर्वाणमिति भगवन् यः प्रशमः सर्वनिमित्तानामुपरतिः सर्वेञ्जितसंमिञ्जितानां[6] । तदिमे भगवन्मा-

---

1) On peut corriger *naivātra tattvam*; mais le tibétain porte དེ་བཞིན་ཉིད་.

2) གཟུགས་བརྙན་ aussi équivalent de *pratibimba*. — C'est la théorie du *nirmāṇakāya*, à laquelle se soude celle du *saṃbhogakāya*, voir JRAS. 1906, 943.

3) དེ་བཞིན་གཤེགས་པའི་ གསང་བ་ བསྟན་པའི་ ལེའུ. On a ci-dessus p. 539 l. 3. དེ་བཞིན་ གཤེགས་པའི་ གསང་བའི་ མདོ་.

4) Mss. °*deçanānām*.

5) ནམ་མཁའ་ཉིད་ཀྱིས་.

6) Restitution très douteuse. Mss. *sarvejita animjitānām*. རྣམ་པར་རྟོག་པ་ ཐམས་ཅད་ འགགས་པ = *uparatiḥ sarvavikalpānām*. — Sur *iñj*, *saṃmiñj* voir Leumann, Album Kern, 393. — Les formes en *iṅg*, M. Vyut. § 126. 83, § 248. 28. — Ci-dessus 334, n. 8. — *iñjita*, Suttanipāta iii. 12 — *aniṅgana* (གཡོ་བ་མེད་) Lalita 314. 14 — *unmiñjita*, M. Vyut. 133. 24, Daçabhūmaka

त्कपुरुषा [ये] स्वाख्याते धर्मविनये प्रव्रज्य तीर्थिकदृष्टौ निपतिता निर्वाणं भावतः पर्येषन्ते । तद्यथा तिलेभ्यस्तैलं क्षीरात्सर्पिः । अत्यन्तपरिनिर्वृतेषु भगवन् सर्वधर्मेषु ये निर्वाणं मार्गन्ति तानहमाभिमा(1)निकान् तीर्थिकानिति वदामि । न भगवन् योगा(2)चारः [Tib. 206 a] सम्यक् प्रतिपन्नः कस्य चिद्धर्मस्योत्पादं वा निरोधं वा करोति । नापि कस्य चिद्धर्मस्य प्राप्तिमिच्छति नाभिसमयमिति विस्तरः ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां मध्यमकवृत्तौ निर्वाणपरीक्षा नाम पञ्चविंशतितमं प्रकरणं ॥

---

cité Madh. avat. 68.14 (traduction, Muséon, 1907, 311), Çikṣās. 215.16; *unmiñja* (?), Sukhāvatī § 11. — *nimiñjita*, M. Vyut. 133.23. — *sammiñjita*, Lalita 297.7 (240.3), Çikṣās. 215 9 et sources citées Majjh. I 533, Div. 473.6.

1) Manque dans le tibétain. Voir ci-dessus 337, n. 1. — Çikṣās. 148.10.

2) རྣལ་འབྱོར་སྤྱོད་པ. = *yogin* = *yogāvacara*, «one practising yoga» (Childers) — Comparer Çikṣās. 158.3; le conflit du *dhammayoga* et du *jhānayoga*, Aṅg. III 355; je ne suis pas sûr que Mhv. I. 120 vise l'école Vijñānavādin.

XXVI.

द्वादशाङ्गपरीक्षा नाम षड्विंशतितमं प्रकरणं

अत्राह । यदुक्तं[1] '

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादा[172a]य प्रतिपत्सैव मध्यमा ॥ इति '

कः पुनरसौ प्रतीत्यसमुत्पादो यः शून्यतेत्युच्यते ॥ अथवा यदेतदुक्तं '

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति ।
दुःखं समुदयं चैव निरोधं मार्गमेव च ॥ इति '

तत्कतमोऽसौ प्रतीत्यसमुत्पाद इति ॥ अतस्तदङ्ग[3]प्रभेदविवक्षयेदमुच्यते '

पुनर्भवाय संस्कारानविद्यानिवृतास्त्रिधा ।
अभिसंस्कुरुते यांस्तैर्गतिं गच्छति [कर्मभिः][4] ॥ १

तत्राविद्या ऽज्ञानं तमो यथाभूतार्थप्रच्छादकं स्तिमितता[5] । अविद्यया निवृतः[6] छादितः पुद्गलः पुनर्भवाय पुनर्भवार्थं पुनर्भवोत्पत्त्यर्थमभिसंस्करोति ' उत्पादयति [यान्]

---

1) XXIV. 18.

2) XXIV. 40.

3) དེའི་ ཡན་ལག. — Mss. *tadasaṅga.*

4) མ་རིག་ བསྒྲིབས་པས་ ཡང་སྲིད་ ཕྱིར། འདུ་བྱེད་ རྣམ་པ་གསུམ་པོ་དག། མངོན་པར་འདུ་བྱེད་ གང་ ཡིན་པའི། ལས་ དེ་དག་གིས་ འགྲོ་བར་ འགྲོ། — Mss. *nirvṛta.*

5) Manque dans le tibétain, qui a: *tayā avidyayā nivṛtaḥ*...

6) Mss. *nirvṛtaḥ.*

कुशलादिचेतनाविशेषास्ते[1] [पुनर्भवाभिसंस्कारात्] संस्काराः । ते च त्रिविधाः कुशला अकुशला आनेञ्ज्याश्च । यदि वा कायिका वाचिका मानसाश्चेति । तांस्त्रिविधान् कर्मलक्षणान् संस्कारानविद्यानिवृतः पुद्गलः करोति । तैश्च संस्कारैरभिसंस्कृतैः[2] कर्मभिः[3] कर्मसंज्ञितैस्तद्धेतुकां [Tib. 206b] गतिं गच्छति ॥ ततोऽस्य ।

विज्ञानं संनिविशते संस्कारप्रत्ययं गतौ[4] ।

कृतोपचित[5]संस्कारस्यास्य पुद्गलस्य संस्कारानुरूपायां गतौ देवादिकायां संस्कारहेतुकं विज्ञानं संनिविशते प्रविशत्युपपद्यते संसारानर्थबीजभूतं[6] ॥ तत उत्तरकालं ।

संनिविष्टेऽथ विज्ञाने नामरूपं निषिच्यते[7] ॥ २

---

1) Mss. *kuçalākuçalāneñjyādicetanāviçeṣās te saṃskārāḥ.* — · · · ཀང་ དགེ་བ་ལ་ སོགས་པའི་ སེམས་པ་དག་ མངོན་པར་ འདུ་བྱེད་ཅིང་ སྐྱེད་པར་ བྱེད་དོ། འདུ་བྱེད་ དེ་དག་ ནི་ ཡང་སྲིད་པ་ མངོན་པར་ འདུ་བྱེད་པས་ འདུ་བྱེད་དོ། La mention de *kuçala, akuçala, āneñjya* épuise la variété des *cetanāviçeṣa*, et *ādi* n'est plus justifié: je corrige donc d'après le tibétain. — Peut-être, au lieu de *punarbhavābhisaṃskārāt*, faut-il °*abhisaṃskaraṇāt* — *āneñjya*, voir ci-dessus p. 334, n. 8.

2) Voir ci-dessus 137, n. 4.

3) མངོན་པར་ འདུ་བྱས་པ་ འདུ་བྱེད་ལས་ ཏེ་ ལས་ཀྱི་ མིང་དག་གིས་ · · · ·

4) འདུ་བྱེད་ རྐྱེན་ཅན་ རྣམ་པར་ཤེས། འགྲོ་བ་རྣམས་སུ་ འཇུག་པར་ འགྱུར། — *gatiṣu saṃniviçate.*

5) འདུ་བྱེད་ བྱས་ཤིང་ བསགས་པ་ དེའི་ · · ·། Sur *upacita*, voir ci-dessus p. 303, n. 4.

6) Mss. *saṃskāra* — «Semence de l'infortune du *saṃsāra*».

7) རྣམ་པར་ཤེས་པ་ ཞུགས་གྱུར་ ན། མིང་ དང་ གཟུགས་ ནི་ ཆགས་པར་ འགྱུར།

तत्र कर्मक्लेशाविद्धं[1] तस्मिन् तस्मिन्नुपपत्त्यायतने नामयतीति[2] नाम संज्ञावशेन[3] वार्थेषु नामयतीति[4] नाम ॥ (5 चत्वारो ऽरूपिणः स्कन्धा नामेति व्यपदिश्यते 5)।

रूप्यत[6] इति रूपं बाध्यत[7] इत्यर्थः। इदं च रूपं पूर्वकं च नाम उभयमेतदभिसंक्षिप्य नामरूपमिति व्यवस्थाप्यते ॥

तत्र बिम्बप्रतिबिम्बन्याये[8][172b]न (9 स्वाध्यायदीपमुद्राप्रतिमुद्रादिन्यायेन वा 9) म[10]रणान्तिकेषु स्कन्धेषु निरुध्यमानेष्वेकस्मिन्नेव क्षणे तुलादण्डनामोन्नामन्यायेनैव [औप]-[11]पत्त्यांशिकाः स्कन्धा यथाकर्माक्षेपत[12] उपजायन्ते[13] ॥ एवं च बिम्बप्रतिबिम्बमुद्राप्रतिमुद्रा-[14]न्यायेन प्रतीत्यसमुत्पादः सिध्यति ।

---

1) སྒྲོས་པ་. — Voir Çarad Candra sub voc. བསྒྲོ་, to direct, to defile

2) བཀྲི་བ་ de འཁྲིད་ «conduire». = *nayati*.

3) མིང་གི་ དབང་གིས་.

4) རྒྱུག་པ་, oublié par Çarad Candra, «to run, to start, to go».

5—5) En prose dans le tibétain.

6) གཞིག་ཏུ་ རུང་བས = «parce qu'il est susceptible d'être examiné».

7) གནོད་པར་ བྱ་བར་ རུང་ = «il est susceptible d'être frappé».

8) གཟུགས་ དང་ གཟུགས་ བརྙན.

9—9) Manque dans le tibétain. — Voir ci-dessus 428, n. 3 et ci-dessous 551. 14.

10) ཐ་མ་ འཆི་བའི་ ཕུང་པོ་.

11) སྐྱེ་བའི་ ཆའི་ ཕུང་པོ. — On peut lire *nyāyenaupap*°. — Voir ci-dessus p. 228, n. 5. — Comparer l'expression *aupapattibhavika vipāka* (Abhidh. k. v. 307b 7).

12) ལས་ཀྱིས་ ཇི་ལྟར་ འཕངས་པ་ལྟར

13) Le traducteur tibétain supprime ce qui suit jusque p. 552. 4.

14) Voir Visuddhimagga, apud Warren, Buddhism in translations, p. 289.

तुलादण्डनामोन्नाम[1]न्यायेन तु यद्विज्ञानं संनिविशत इत्युक्तं । तद्बाललोकबोधानुरोधेन समानकाल एव भवप्रतिसंधिरिति ।

तथा समानेन समानकालं
लोकस्य दुःखं च सुखोदयं च ।
हर्तुं च कर्तुं च सदास्तु शक्ति-
स्तमः प्रकाशं च यथैव भानोः ॥ इति[2] ।

न तु पुनः प्रतीत्यसमुत्पादस्वरूपविचक्षणानामेवं वक्तुं युज्यते साहचर्यादित्वमेकक्षणे तुलादण्डनामोन्नामदृष्टान्तेनेति ।

जन्मोन्मुखं न सदिदं यदि जायमानं
नाशोन्मुखं सदपि नाम निरुध्यमानं ।
इष्टं तदा कथमिदं तुलया समानं
कर्त्रा विना जनिरियं न च युक्तरूपा[3] ॥

इत्यादिवचनात् । यथा बिम्बप्रतिबिम्बमुद्राप्रतिमुद्रादिन्यायेन क्षणिकत्वं नेष्यते [4]भवद्भिस्तथा[5]न्यस्यापि भावस्योत्पादसम[न]न्तरध्वंसिनः क्षणिकत्वं न युक्तं । यतो जातिजरास्थित्यनित्यताख्यानि चत्वारि[6] संस्कृतलक्षणान्युत्पद्यमानस्य भावस्य बाह्यस्याध्या-

---

1) Sur cette comparaison du Çālistamba et sa portée, voir Madhyamakāvatāra. vi. 18.

2) Madhyamakāvatāra, vi.

3) Madhyamakāvatāra, vi. 19 (p. 95 de l'édition Bibl. Buddhica); le dernier pāda est cité ci-dessus 79. 13.

4) Sic Mss.

5) Mss. °*thāpi*, °*syāpi*.

6) Les textes canoniques s'accordent sur ce point qu'il y a trois *saṃskṛtalakṣaṇas* (*utpāda*, *vyaya*, *sthityanyathātva* (= *jarā*), voir ci-dessus 145, n. 1. — [Ici on a *anityatā* = *vyaya* = *bhaṅga*]. — Les Vaibhāṣikas affirment qu'il y en a quatre: *utpāda*, *vyaya*, *sthiti*, *sthityanyathātva*, le troisième étant implicitement indiqué dans le quatrième. Bhagavat, dissimulant la *sthiti* pour effrayer les disciples, a, dans les Sūtras, réduit les *lakṣaṇas* à trois: *jātijarānityatā*. Mais l'enseignement de l'Abhidharma est *lākṣaṇika*, non plus *ābhiprāyika*. — Dans

तिमकस्य वा एकस्मिन्नेव क्षणे भवन्तीत्य[1]भिधर्मपाठः । तत्र जातिजरयोः परस्परविरोधात्स्थित्यनित्यतयोश्चैकस्मिन्नेव भावे न युगपत्संभव इष्यते सद्भिः ।

[2]क्षणिके सर्वथाऽभावात्कुतः का चित्पुराणता ।
स्थैर्यादक्षणिके[3] चापि कुतः का चित्पु[173a]राणता ॥

यथान्तोऽस्ति क्षणस्यैवमादिमध्यं च कल्प्यतां ।
[4]अन्तकत्वात्क्षणस्यैवं न लोकस्य[5] क्षणास्थितिः ॥

आदिमध्यावसानानि चिन्त्यानि क्षणवत्पुनः ।
आदिमध्यावसानत्वं न स्वतः परतोऽपि वा ॥

Bodhisattvabhūmi, I. xvii, § 15, le quatrième *lakṣaṇa*, qui est la *jarā (anyatvaṃ vā anyathātvaṃ vā)*, résulte de l'analyse du texte *sthityanyathātvam (ṭhitassa aññathattam)*, «modification de ce qui dure».

D'après ce même traité, les *lakṣaṇas* existent dans et pour chaque moment, Voici la définition de la durée: *utpannasya yas tatkālāvipraṇāçaḥ sā sthitir iti* (comparer 281, n. 1).

L'Abhidh. k. v. (Burn. 124) expose le système (peut-être celui de l'auteur?) d'après lequel les trois (ou quatre *lakṣaṇas*) caractérisent la série, le *saṃskārapravandha* qui est *saṃskṛta*, et non pas le *kṣaṇa*; *na tu kṣaṇasyotpādādaya utpādavyayasthityanyathātvalakṣaṇā dharmāḥ prajñāyante . kṣaṇasya duravadhāratvāt.* Ne dites-pas qu'ils existent bien que non perçus *(aprajñāyamānāḥ)*, car c'est précisément pour écarter cette opinion que Bhagavat a dit: *utpādo 'pi . . . . prajñāyante. . . .* Par *utpāda* il faut entendre le commencement de la série *(pravāhasyādir utpāda iti)*; par *sthiti* la série même *(sa eva pravāhaḥ sthitiḥ)*, la série évoluant *(anuvart)* par l'évolution de moments semblables *(sadṛçakṣaṇānuvṛtti)*.

1) Mss. °*tīty evavad abhi*°, *etadad abhi*°. — Il est difficile, sans le secours de la version tibétaine, de s'assurer de la correction du texte.

2) L'auteur combat cette thèse des Ābhidhārmikas que le *kṣaṇa* a fin, milieu, commencement, et il aboutit à la négation du concept *kṣaṇika*. Ce concept est absurde. On ne peut pas dire que le *kṣaṇika* ou l'*akṣaṇika* vieillisse *(jarā, purāṇatā)*. Si on admet que le *kṣaṇa* prend fin (ce qui est de sa définition, *vināça* = *anityatā*), on doit admettre qu'il commence et qu'il dure, puisqu'il prend fin; et il faut appliquer au commencement, au milieu et à la fin, le même raisonnement: le commencement commence, dure, finit.

3) Mss. *ajanike.*

4) Mss. *ātmakatvāt.*

5) Or tel n'est pas l'avis du monde que le *kṣaṇa* ait une durée (?).

इति मध्यमकसिद्धान्तपाठात्[1] क्षणिकपदार्थासिद्धेरसिद्धिरवसेया । न च ज्ञातिमरणयोः परस्परभिन्नलक्षणयोरेकस्मिन् क्षणे संभवो भवेत् ' संशयनिश्चयज्ञानयोरालोकान्धकारयोर्ज्ञानाज्ञानयोर्बीजाङ्कुरयोर्[2]मरणभवोपपत्तिभवयोर्भिन्नलक्षणयोरित्यादि[वत्] ॥ परस्परनिरपेक्षयोरेव स्वहेतुप्रत्ययसिद्धयोः सहभावो युज्यते सव्येतरगोविषाणयोर्युवतिस्तनयोर्नरकर्णयोरित्यादि[वत्] ' न तु पुनः कदा चिदपि परस्परविरुद्धयोर्विनाशोत्पादयोः ॥ यथोक्तं रागरक्तपरीक्षायां[3] ।

सहैव पुनरुद्भूतिर्न युक्ता रागरक्तयोः ।
भवेतां रागरक्तौ हि निरपेक्षौ परस्परं ॥

नैकत्वे सहभावोऽस्ति न तेनैव हि तत्सह ।
पृथक्त्वे सहभावोऽथ कुत एव भविष्यति ॥

एवं रक्तेन रागस्य सिद्धिर्न सह नासह ।
रागवत्सर्वधर्माणां सिद्धिर्न सह नासह ॥

इति प्रतिषेधात्कुतः समानकालता भावानां मरणभवोपपत्तिभवयोरिति । अतः सहभावो विनेयजनबोधानुरोधप्रवृत्त एवेति लक्ष्यते । ते[न] नैकस्मिन्नेव क्षणे नामोन्नामौ तुलायाः संभवतः ' नामोन्नामयोः कालभेदात् ' बलवत्पुरुषाच्छटामात्रेण पञ्चषष्टिः क्षणा अ[173b]तिक्रामन्तीति पाठात् ' उत्पलपत्रशतसहस्रवेधवत्सूच्यग्रेणेति । अथाप्यत्र[4] उत्पलपत्रशतसहस्रवेधः सूच्यग्रेण क्रमशो वेधोऽवसेयः[5] क्षणानामतिसूक्ष्मत्वात् । एकक्षणेन श्लोकाक्षरपदोद्दा[ह]रणवत् ॥

---

1) J'ignore de quel traité il est question.

2) Nous savons que l'Abhidharma admet, contre les Sūtras, le *sahotpannayor janyajanakabhāva* (Abhidh. k. v. 242a).

3) VI. 3, 4, 10 (pages 139 et suiv.).

4) Mss. *atrāpy*.

5) Mss. *avaçeṣaḥ*.

किं च ।

अनिरोधमनुत्पादमनुच्छेदमशाश्वतं ।
अनेकार्थमनानार्थमनागममनिर्गमं ॥
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवं ।[1]

इतिपाठादुत्पादनिरोधयोरसंभव एव प्रतिपादितः शास्त्रे मध्यमके [।] [2]आगमसूत्रेषु ।

[3]अविनाशमनुत्पन्नं धर्मधातुसमं जगत् ।
सत्त्वधातुं च देशेति एषा लोकानुवर्तना ॥
[4]त्रीषु अध्वसु सत्त्वानां प्रकृतिं नोपलम्भति ।
सत्त्वधातुं च देशेति एषा लोकानुवर्तना । इत्यादि ॥

---

1) Voir ci-dessus p. 11.

2) Sic Mss., lecture probablement incorrecte. Les deux stances qui suivent présentent une grande ressemblance, d'une part avec les **çlokas** appartement à la secte des **Pūrvaçailas** [རི་བོའི་སྡེ་པ་དང་མཐུན་པའི་ཚིགས་སུ་བཅད་པ་དག་ལས] cités dans le **Madhyamakāvatārabhāṣya** (page 134, ad VI. 44), d'autre part, du moins pour le refrain *(eṣā lokānuvartanā)*, avec le **Mahāvastu**, I. 168. 170.

3) Mss. ***na viç(n)adv(bd)āṇa uparṇṇa(m) dharmmā vā usaṁmajagam / sat tadhā(thāṁ) u(tu) va daṁçes(p)i eṣ(s)ā lo āçu(anu) vatte(a)sā.*** — Le **çloka** des **Pūrvaçailas** n'est pas exactement équivalent: འཇིག་པ་མེད་ཅིང་སྐྱེ་མེད་ལ། ཆོས་དབྱིངས་དང་མཉམ་པར་གྱུར་ཀྱང་། སྲེག་པའི་བསྐལ་པ་བརྗོད་མཛད་པ། འདི་ནི་འཇིག་རྟེན་མཐུན་འཇུག་ཡིན། = «Exempt de destruction, exempt de naissance [le monde] est identiqne au *dharmadhātu*: cependant [le Bouddha] enseigne l'âge où la destruction a lieu par le feu *(tejaḥsaṁvartakalpa)*. C'est condescendance pour le monde». — Nos scribes ont peut-être pris induement le troisième pāda de la strophe suivante; on peut lire: *tejaḥkalpaṃ ca*....

4) Mss. ***tīsu adhyāsu sannānam paṁkatī nopalaṃbhatī / sattathāṃtu ca daṃçesi eṣā lo anuvarttaçetyādi.*** Le texte des **Pūrvaçailas** correspond exactement: དུས་གསུམ་དག་ཏུ་སེམས་ཅན་གྱི། རང་བཞིན་དམིགས་པ་མ་ཡིན་ལ། སེམས་ཅན་ཁམས་ཀྱང་སྟོན་མཛད་པ། འདི་ནི་······

तथा[1]।

फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा।
मरीचिसदृशी संज्ञा संस्काराः कदलीनिभाः।
मायोपमं च विज्ञानमुक्तमादित्यबन्धुना॥

एवं धर्मान् वीक्षमाणो भिक्षुरारब्धवीर्यवान्।
दिवा वा यदि वा रात्रौ संप्रजानन् प्रतिस्मृतः।
प्रतिविध्येत्पदं शान्तं संस्कारोपशमं शिवं॥ इति।

एताश्च गाथाः सर्वनिकायशास्त्रसूत्रेषु[2] पठ्यन्ते। अतः फेनपिण्डादीनां हेतुप्रत्ययसामग्रीं प्राप्य प्रतीत्य समुत्पन्नानां सारवस्तुविगतानां कुतः क्षणिकाक्षणिकचित्तेति॥ महायानसूत्रेषु च।

सुपिनोपमा भवगती सकला
न हि कश्चि जायति न चो म्रियते।
न च कर्म नश्यति कदाचि कृतं
फलुदेति कृष्णाशुभ संसरतो॥

Nos stances sont prâcrites; nous les avons reconstituées en quasi-sanscrit, désespérant de rétablir l'original. — Peut-être faut-il lire *deçeṣi ... pakatī nopalabhyate.....*

1) Ces stances sont citées ci-dessus p. 41. 9. Les trois premières lignes = Saṃyutta III. p. 142, 29—31; les trois dernières correspondent moins étroitement à 143. 8—12: *evaṃ kh·nde (?) avekkheyya bhikkhu ārabdhavīriyo / divā vā yadi vā rattiṃ sampajāno patissato / jaheyya sabbasaññogaṃ kareyya saraṇattano / careyyādittasiso va patthayaṃ accutam padan ti /*

2) «Dans les sūtras et dans les traités de toutes les sectes.» — Par traité, *çāstra (= prakaraṇa)*, il faut sans doute entendre les livres d'Abhidharma. — Dans le Madhyamakāvatāra, p. 22, Candrakīrti se sert de ces stances pour établir que le Petit Véhicule enseigne le *skandhanairātmya*.

न घ शाश्वतं न च उच्छेद पुरो
न च कर्मसंचयु [174a] न चापि स्थितिः।
न घ सोपि कृत्व पुनरास्पृशती
न च अन्यु कृत्व पुन वेदयते॥

(1) यथा कुमारी सुपिनान्तरस्मिं
स्वपुत्र जातं च मृतं च पश्यति।
जातेऽतितुष्टा मृति दौर्मनस्यिता
तथोपमान् जानथ सर्वधर्मान्॥

(2) यथैव ग्रामान्तरि लेखदर्शनात्
क्रियाः प्रवर्तन्ति पृथक् शुभाशुभाः।
न लेखसंक्रान्ति गिराय विद्यते
तथोपमाम् जानथ सर्वधर्मान्॥

(3) मुद्रात्प्रतिमुद्र दृश्यते
मुद्रसंक्रान्ति न चोपलभ्यते।
[न च तत्र न चैव सान्यतो
एवं संस्कार अनुच्छेदशाश्वताः॥

---

1) Cité ci-dessus p. 178. 5 = Samādhirāja p. 29. 20. — Je préfère la lecture *svaputra* donnée par ce texte à *sā putra* de nos Mss.

2) = Samādhirāja, p. 28, dernière ligne.

3) Voir ci-dessus 108. 10 (Lefmann, 176. 15).

बीजस्य[1] सतो यथाङ्कुरो
न च यो बीजु स चैव अङ्कुरो ।।
न च अन्यु [ततो] न चैव तद्[2]
एवमनुच्छेद अशाश्वतधर्मता ।।

[3] यथ मुंज प्रतीत्य बल्बजं
[रज्जु] व्यायामबलेन वर्तिता[4] ।
घटियन्त्र सचक्र वर्तते
तेषु एकैकशु नास्ति वर्तना[5] ।।

तथ सर्वभवाङ्गवर्तिनी[6]
अन्यमन्योपचयेन निःश्रिता ।
एकैकेषु तेषु वर्तनी
पूर्वमपरान्ततु नोपलभ्यते ।।

अत एवोक्तमाचार्य[7]नागार्जुनपादैः ।

स्वाध्यायदीपमुद्रादर्पणघोषार्ककान्तबीजाम्लैः ।
स्कन्धप्रतिसन्धिरसंक्रमश्च विद्वद्भिरुपधार्यौ ।। इति ।

---

1) Voir ci-dessus 108. 8.

2) Ms. *caiva çaçvato.*

3) Lalitavistara 209. 12 (Lefmann 176. 7), Çikṣās. 238, 5 et Bodhicaryāvat. p. ad IX. 108.

4) Nos Mss. ont °*itā*; de même Bodhic.

5) Nos Mss. ont °*anā*; Bodhic. °*inā*.

6) Nos Mss. ont °*inī* comme Bodhic. — Voir Çikṣās. 238, n. 5.

7) La même stance est citée ci-dessus p. 428. 10. — Voir 544. 5.

[1]शतकशास्त्रे चार्यदेवपादैर्महाबोधिचर्यास्थिरप्रस्थानस्थितैः ।

अलातचक्रनिर्माणस्वप्नमायाम्बुचन्द्रकैः ।
धूमिकान्तःप्रतिश्रुत्कामरीच्यभ्रैः समो भवः ॥ इति ॥

[2]तदेवं [3]बिम्बप्रतिबिम्बादिन्यायेन[3] मातुः कुक्षौ विज्ञाने संमूर्छिते[4] विज्ञानप्रत्ययं नामरूपं निषिच्यते [5]तरति प्रादुर्भवतीत्यर्थः । यदीह [6]गतौ विज्ञानं न संमूर्छितं स्यात्तदा नामरूपप्रादुर्भावो न स्यात् । सचेदानन्द वि[174b]ज्ञानं मातुः कुक्षिं नावक्रामेत । न तत्कललं कललत्वाय संवर्तेत इति वचनात्[7] ॥ तदेवं

निषिक्ते नामरूपे तु षडायतनसंभवः ।[8]

दुःखोत्पत्त्य[Tib. 207a] * * * * * [9]यद्द्वारभावेन दर्शनश्रवणघ्राणरसस्पर्शमनआख्यं

---

1) XIII. 25. — Cité ci-dessus ad VII. 32 (p. 173 l. 3).

2) Nous retrouvons ici le tibétain, 206b 6.

3—3) Manque dans le tibétain.

4) མའི་ མངལ་དུ་ རྣམ་པར་ཤེས་པ་ བརྒྱལ་བར་ འགྱུར་ན། — La *mūrchā* du *vijñāna*, soit avant l'incarnation, soit après, est attestée par diverses sources

5) ཆགས་པར་ འགྱུར་ཏེ། རེད་ཅིང་ བྱུང་བར་ འགྱུར་རོ། — རེད་ ne paraît pas donner un sens convenable; རེང་བ་ = ***peçībhavati.***

6) འགྲོ་བར་ — *iha* n'est pas traduit.

7) Voir Dīgha II. 63; Kathāv. XIV. 2, 3; Abhidh. k. v. 223a 4; Dogmatique Bouddhique, I. 66 (J. As. 1902, II, 298).

8) མིང་དང་གཟུགས་ ནི་ ཆགས་ གྱུར་ན། སྐྱེ་མཆེད་དག་ ནི་ འབྱུང་བར་ འགྱུར།

9) ***āyadvāra***, «the place where revenues are collected» (M. W.), «Einnahmestelle» (Bö.), la porte d'arrivée, la porte de naissance (སྐྱེ་བའི་སྒོ་) — Mss.

षडायतनं नामरूपहेतुकमुपजायते । [1 स चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयान्यभिनिविशते । अभिनिविष्टः सन् रागजं द्वेषजं मोहजं कर्म करो[ती]त्यादिना दुःखोत्पत्त्यायद्वारत्वं षण्णामायतनानां[1)] ॥ तदेवं संभूते षडायतन उत्तरकालं

षडायतनमागम्य संस्पर्शः संप्रवर्तते[(2)] ॥ ३

कः पुनरयं संस्पर्शः[(3)] कथं वा संप्रवर्तत इति प्रतिपादयन्नाह ।

चक्षुः प्रतीत्य रूपं च समन्वाहारमेव च ।
नामरूपं प्रतीत्यैवं विज्ञानं संप्रवर्तते[(4)] ॥ ४
संनिपातस्त्रयाणां यो रूपविज्ञानचक्षुषां ।
[(5)] स्पर्शः सः ।

---

duḥkhotpattyāyadātvāyadvārabhāvena — Voir p. 564. 2, 565 1. — སྡུག་བསྔལ་འབྱུང་བ་ལ་ སྐྱེད་པར་ བྱེད་པ་ ཉིད་དུ་གྱུར་པའི་ ཕྱིར (*duḥkhotpattau janakatvāt*)| སྐྱེ་བའི་ སྒོའི་ དངོས་པོ་ ཉིད་ཀྱིས་ ན| — On a Bodhicaryāv. 388 18 *āyadvārārthena ṣaḍāyatanam* (སྐྱེ་བའི་ སྒོའི་ ཕྱིར) que l'éditeur a eu tort de rapprocher de 225. 17 *saṃsāraduḥkhair nirmoktukāmasya ye satpuruṣaviçeṣāḥ kapātatvam apadvāratvam* (སྒོ་གླེགས) *āyatāḥ*.

1—1) Manque dans le tibétain.

2) སྐྱེ་མཆེད་ དྲུག་ལ་ བརྟེན་ནས་ ནི| རེག་པ་ ཡང་དག་ འབྱུང་བར འགྱུར|

3) རེག་པ་ — Voir p. 70, n. 2 et Atthasāl. § 289 (p. 109, l. 5).

4) མིག་ དང་ གཟུགས་ དང་ དྲན་བྱེད་ལ| བརྟེན་ནས་ སྐྱེ་བ་ ཁོ་ན་སྟེ| དེ་བཞིན མིང་གཟུགས་ བརྟེན་ནས་ནི| རྣམ་པར་ཤེས་པ་ སྐྱེ་བར་ འགྱུར|

5) མིག་ དང་ གཟུགས་ དང་ རྣམ་པར་ཤེས| གསུམ་པོ་ འདུས་པ་ གང་ ཡིན་པ| དེ་ ནི་ རེག་པའོ.

(1) चक्षुरिन्द्रियं प्रतीत्य रूपाणि [च] समन्वाहारं च प्रतीत्य मनस्कारं विषयादिविलक्षणं समनन्तर(2)प्रत्ययं विज्ञानबीजभूतं चक्षुर्विज्ञानमुत्पद्यते । तत्र चक्षुश्च रूपायतनं च रूपं । समन्वाहार(3)श्चतुःस्कन्धलक्षणं नाम । तदेतत्त्रयं प्रतीत्योत्पद्यमानं चक्षुर्विज्ञानं नामरूपं प्रतीत्योत्पद्यते ॥ तदेवमेषामिन्द्रियविषयविज्ञाना(4)नां त्रयाणां यः संनिपातः सहोत्पादोऽन्योऽन्योपकारेण तुल्यं या प्र(5)वृत्तिः स स्पृ(6)ष्टिलक्षणः स्पर्शः । तत उत्तरकालं

तस्मात्स्पर्शाच्च वेदना संप्रवर्तते(7) ॥ ५

इष्टानिष्टोभयविपरीत[Tib. 207b]विषयानुभूतिर्विषयानुभवो वेदनं वित्तिर्वेदनेत्युच्यते । दुःखा सुखा ऽदुःखासुखा [175a] च त्रिविधा । यथा चैषां रूपविज्ञानचक्षुषां त्रयाणां संनिपातलक्षणं स्पर्शमागम्य वेदनोक्ता । एवं शेषेन्द्रियविषयविज्ञानत्रयसंनिपातलक्षणस्पर्शहेतुका वेदना व्याख्येया ॥ तत उत्तरकालं

[वेदनाप्रत्यया तृष्णा(8)]

---

1) D'après le tibétain *tatra cakṣuç ca rūpāṇi ca samanvāhāraṃ ca .... pratītya cakṣurvijñānam utpadyate.* — *samanvāhāra* = *manaskāra*. ... . *vijñānabījabhūta*

Il y a *sparça* (= *sahotpada*) de
- *rūpa*
  - *cakṣus*
  - *rūpāyatana* ou *rūpāṇi*
- *nāma* = *samanvāhāra* = *catvāro 'rūpiṇaḥ skandhāḥ* = *vijñāna (samanantara pratyaya)*

et ce *sparça* donne le *cakṣurvijñāna*. Comp. 567. 6 et Majjh. I, 190, 32.

2) Voir ci-dessus, p. 77, note; Nyāyabindu 104. 9; Çlokavārt. 160.

3) Mss. °*hāram tu sk*°. — ཕུང་པོ་ བཞིའི་ མཚན་ཉིད.

4) *vijñāna* = *nāma* = *catvāro 'rūpiṇaḥ skandhāḥ.*

5) འདུ་བར་ ལྷུགས་པ་ གང་ ཡིན་པ་.

6) Mss. *saṃspṛṣṭi*°. — རེ་རེ་ རེག་པའི་····། — Que *sparça* n'est pas simplement *saṃgati*, ci-dessus p. 70, n. 2 et Atthasāl. § 289 (p. 109, 5 et suiv.).

7) རེག་ དེ་ལས། ཚོར་བ་ ཀུན་ཏུ་ འབྱུང་བར་ འགྱུར།

8) ཚོར་བའི་ རྐྱེན་གྱིས་ སྲེད་པ་ སྐྱེ།

संप्रवर्तत इति वर्तते[1]। वेदना प्रत्ययो यस्यास्तृष्णायाः सा वेदनाप्रत्यया। किंविषया पुनः सा तृष्णा वेदनाविषयैव। किं कारणं ' यस्मादसौ तृष्णालुः '

[वेदनार्थं हि तृष्यते[2]।]

वेदनानिमित्तमेवाभिलाषं[3] करोतीत्यर्थः। कथं कृत्वा। यदि तावत्सुखा वेदनास्योपजायते ' स तस्याः पुनः पुनः संयोगार्थं परितृष्यते। अथ दुःखा तदा तस्या विसंयोगार्थं परितृष्यते। अथादुःखासुखा तस्या अपि नित्यमपरिभ्रंशार्थं[4] परितृष्यते॥ स एवं

तृष्यमाणा उपादानमुपादत्ते चतुर्विधं[5]॥ ६

स एवं वेदनास्वभिनिविष्टः सक्तस्तृष्णाप्रत्ययं कामदृष्टिशीलव्रतात्मवादोपादानाख्यं चतुर्विधं कर्मान्तिपकारणं परिगृह्णाति ' तदेवमस्य तृष्णाप्रत्ययमुपादानं भवति॥ तत उत्तरकालं।

---

1) Sic Mss. — བསྐྱེགས་སོ = faire hâte, poursuivre, aspirer à

2) ཚོར་བའི་དོན་དུ་སྲེད་པར་འགྱུར།

3) Mss. *vedanām eva nimittam.*

4) *nityam* manque dans le tibétain. — Sur l'*aduḥkhāsukhā vedana*, voir Atthasālini, § 403, et Psychology, p. 50. L'impression de Buddhaghosa est malheureusement la nôtre: cette *vedana* est *sukhumā dubbiññeyyā na sakkā sukhena gahetum.* Mde Rhys Davids explique· «'neutral', or 'disinterested' (*upekkhā*), the zero point, or line, as we should say, of hedonic quantity». — L'acte bon, produisant une maturité agréable (*sukhavedyaṃ çubham*) dépasse le monde du *kāma*, et se produit encore dans le troisième *dhyāna* (*dhyānād ā tṛtiyāt*); plus haut, il ne reste que l'*aduḥkhāsukhavedaniya*, qui toutefois existe déja dans les sphères inférieures au quatrième *dhyāna* (Abhidh. k. v. 303 a–b). — Notre texte fournit un élément nouveau, à savoir que la *tṛṣṇā* peut s'attacher à cette sensation et souhaiter qu'elle persiste Est-ce la *bhavatṛṣṇā*?

5) སྲེད་པར་འགྱུར་ན་ཉེ་བར་ལེན། རྣམ་པ་བཞི་པོ་ཉེར་ལེན་འགྱུར།

उपादाने सति भव उपादातुः प्रवर्तते ।

स्याद्धि यद्यनुपादानो [Tib. 208a] मुच्येत न भवेद्भवः ॥[1] ७

पञ्च स्कन्धाः स च भवः ।[2]

[3]चतुर्विधस्य यथोक्तस्योपादानस्योपादाता ग्रहीता उत्पादयिता । तस्योपादातुरुपादानप्रत्ययो भव उपजायते । किं कारणं । यस्मात् । यो ह्यनुत्पादितवेदनातृष्णः प्रतिसंख्यानबलेन[4] तृष्णामस्वीकुर्वंश्चतुर्विधमुपादानं प्रविहायोपादाताऽमलाद्वयज्ञानसंमुखीभावात्[5]स्याद्धि यद्यनुपादानो मुच्येत स [175 b] तदानीं तस्य न भवेद्भवः ॥

कः पुनरयं भवः । पञ्चस्कन्धाः स च भवः । य उपादानात्प्रवर्तते स पञ्चस्कन्धस्वभावो वेदितव्यः ॥[6] त्रिविधमपि कायिकं वाचिकं मानसिकं च कर्म भवत्यस्मादनागतं

---

1) ཉེར་ལེན་ཡོད་ན་ལེན་པ་པོའི། སྲིད་པ་རབ་ཏུ་འབྱུང་བར་འགྱུར། གལ་ཏེ་ཉེ་བར་ལེན་མེད་ན། གྲོལ་བར་འགྱུར་ཏེ་སྲིད་མི་འགྱུར།

2) སྲིད་པ་དེ་ཡང་ཕུང་པོ་ལྔ།

3) Voir 349, n. 5.

4) སོ་སོར་རྟོག་པའི་སྟོབས་ཀྱིས.

5) Mss. *'para°*, ཉེ་མེད་པ་.

6) On sait que la scolastique pâlie et sanscrite distingue deux *bhavas*, *upapattibhava*, c'est-à-dire, en somme, la réincarnation du *vijñāna*, les cinq *skandhas* de l'être à venir, et le *karmabhava* ou *punarbhavajanakakarman*, l'acte qui produit la renaissance [Voir Deux Notes sur le Pratītyasamutpāda, Congrès d'Alger, I. 201]. — La définition de Nāgārjuna convient aux deux théories. Candrakīrti explique la seconde: «Le triple *karman* [ou bien: Le *karman*, bien que triple], porte aussi le nom de *bhava*, parce que la future pentade des *skandhas* en tire son origine; [ou encore pour cette raison que] l'acte du corps et de la voix = *rūpaskandha*, et que l'acte de l'esprit = les quatre autres *skandhas*».

स्कन्धपञ्चकं भव इति व्यपदिश्यते । तत्र कायिकं वाचिकं कर्म रूपस्कन्धस्वभावं [1]कर्मविज्ञप्तित्वात्[1] । मानसं तु [चतुः]स्कन्धस्वभावमिति ॥ एवं स भवः पञ्च स्कन्धा इति विज्ञेयं । तस्मात्

भवाज्जातिः प्रवर्तते ।[2]

अनागतस्कन्धोत्पादो जातिः सा च भवात्प्रवर्तते ॥ तत उत्तरकालं

जरामरणदुःखादि शोकाः सपरिदेवनाः ॥ ८

दौर्मनस्यमुपायासा जातेरेतत्प्रवर्तते ।[3]

जातिहेतुका एते जरामरणादयः प्रवर्तन्ते ॥ एषां च यथासूत्रमेव व्याख्यानं वेदितव्यं[4] । तत्र स्कन्धपरिपाको जरा । जीर्णस्य स्कन्धभेदो[5] मरणं । म्रियमाणस्य विगच्छतः[6] संमूढस्य साभिषङ्गो हृदयसंतापः शोकः [Tib. 208b] । शोकसमुत्थितो वाक्प्रलापः[7] परिदेवः । पञ्चेन्द्रियासातनिपातो[8] दुःखं । मनोऽनिष्टनिपातो दौर्मनस्यं । दुःखदौर्मनस्यबहुत्वसंभूता उपायासा इति ॥ तदेवं यथोपवर्णितेन न्यायेन

केवलस्यैवमेतस्य दुःखस्कन्धस्य संभवः ॥[9] ९

1—1) Manque dans le tibétain. — La *vijñapti* est *rūpa*, voir ci-dessus p 309.

2) སྲིད་པ་ལས་ ནི་ སྐྱེ་བ་ འབྱུང་། — Notre xylographe སྲིད་པ་ དེ་ལས་···

3) རྒ་ཤི་ དང་ ནི་ མྱ་ངན་ དང་། སྨྲེ་སྔགས་འདོན་ བཅས་ སྡུག་བསྔལ་ དང་། ཡིད་ མི་བདེ་ དང་ འཁྲུག་པ་རྣམས། དེ་དག་ སྐྱེ་ལས་ རབ་ཏུ་འབྱུང་། — *çoka* doit prendre la place de *duḥkha*.

4) Voir par exemple Çālistambasutra, ci-dessous p. 563 l. 7.

5) *bheda* = འཇིག་པ.

6) *vigacchataḥ* = འཕྱོ་ཞིང་.

7) ངག་གི་ བརྗོད་པ.

8) *asātanipāta* = གནོད་པ.

9) དེ་ལྟར་ སྡུག་བསྔལ་ ཕུང་པོ་ ནི། འབའ་ཞིག་པ་ འདི་ འབྱུང་བར་ འགྱུར།

केवलस्येत्यात्मात्मीयस्वभावविगतस्य[1] बालपृथग्जनपरिकल्पितमात्रस्य ' दुःखा-
त्मकस्य सुखाख्याभिमतस्यैवेत्यर्थः । (2 एवमिति हेतुप्रत्ययमात्रबलेनैवेत्यर्थः । दुःखस्कन्ध-
स्येति दुःखसमुदायस्य[3] दुःखसमूहस्य दुःखराशेरित्यर्थः 2) ॥ यतश्चैवं यथो[176 a]पवर्णिताद-
विद्यादिकादेव भवाङ्गानां प्रवृत्तिरतः

संसारमूलान् संस्कारानविद्वान् संस्करोत्यतः ।
अविद्वान् कारकस्तस्मान्न विद्वांस्तत्त्वदर्शनात्[4] ॥ १०

तत्र संसारस्य विज्ञानादिप्रवृत्तिलक्षणस्य मूलं प्रधानं कारणं संस्काराः ' ततश्च
संसारमूलान् [संस्कारान्] अविद्वान् संस्करोति ॥ अविद्यानुगतो यः[5] पुद्गलो भिक्षवः पुण्या-
नपि संस्कारानभिसंस्करोत्यपुण्यानपि संस्कारानभिसंस्करोत्यानेञ्ज्यानपि संस्कारानभि-
संस्करोतीति भगवद्वचनात् । यतश्चैवमविद्वान् कारकस्तस्मादविद्वानेव पुद्गलः कारको
भवति संस्काराणां ' न विद्वांस्तत्त्वदर्शी प्रक्षीणाविद्यः । किं कारणं [Tib. 209 a] । तत्त्व-
दर्शनात् । तत्त्वदर्शने हि सर्वपदार्थानामेवानुपलम्भान्नास्ति किं चिद्यदालम्ब्य कर्म कुर्या-
दिति ॥ यतश्चैवमविद्यायामेव सत्यां संस्काराः प्रवर्तन्ते ऽसत्यां न प्रवर्तन्ते ऽतः '

अविद्यायां निरुद्धायां संस्काराणामसंभवः[6] ।

---

1) Comparer la formule du *pratītyasamutpāda.* — L'explication *kevala* = *atmarahita*, dans Bodhicaryāv. et dans Abhidh. k. v. 237a 2.

2—2) Manque dans le tibétain.

3) Mss. °*dayasya.*

4) འཁོར་བའི་ རྩ་བ་ འདུ་བྱེད་དེ། དེ་ ཕྱིར་ མཁས་ རྣམས་ འདུ་མི་ བྱེད། དེ་ ཕྱིར་ མི་ མཁས་ བྱེད་པོ་ ཡིན། མཁས་པས་ དེ་ཉིད་ མཐོང་ ཕྱིར་རོ། = *saṃsāra-mūlāḥ saṃskārā na vidvān saṃskaroty ataḥ / avidvān kārakas tasmād vidvān (hi) tattvadarçanāt.*

5) Sic Mss. D'après le tibétain: °*taḥ puruṣapudgalo bhikṣavaḥ* . . .

6) མ་རིག་ འགག་པར་ གྱུར་ན་ ནི། འདུ་བྱེད་རྣམས་ ཀུན་འབྱུང་ མི་ འགྱུར།

हेतुवैयर्थ्यात् ॥ तस्या पुनरविद्यायाः कुतो निरोध इत्याह ।

अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात्[(1)] । ११

अस्यैव प्रतीत्यसमुत्पादस्य यथावदविपरीतभावनातोऽविद्या प्रक्षीयते ॥ यो हि प्रतीत्यसमुत्पादं सम्यक् पश्यतीति स सूक्ष्मस्यापि भावस्य न स्वरूपमुपलभते । प्रति(2बिम्बस्वप्नालातचक्रमुद्रादि2)वत्तु स्वभावशून्यतां सर्वेषां भावानामवतरति । स एव स्वभावशून्यतां सर्वेषां [भावाना]मवतीर्णो न किं चिद्वस्तूपलभते बाह्यमाध्यात्मिकं[(3)] वा । सोऽनुप[176b]लभमानो न क्व चिद्धर्मे मुह्यति । अमूढश्च कर्म न करोतीति । एवं प्रतीत्यसमुत्पादभावनया तत्त्वमवतरति । तत्त्वदर्शिनो योगिनो नियतमेवाविद्या प्रक्षीयते । प्रक्षीणाविद्यस्य संस्कारा निरुध्यन्ते ॥ यथा चैवमविद्यानिरोधात्संस्कारा निरुध्यन्ते । एवं

तस्य तस्य निरोधेन तत्तन्नाभिप्रवर्तते ।

दुःखस्कन्धः केवलोऽयमेवं सम्यग्निरुध्यते[(4)] ॥ १२

पूर्वस्य पूर्वस्याङ्गस्य निरोधेनोत्तरस्योत्तरस्याङ्गस्य निरोधो भवतीति विज्ञेयं ।

---

1) Ex conj. — Mss. *jñānasyānaiva bhāvanāt.* — Notre xyl. et Mdo XVII. མ་རིག་ འགགས་པར་ གྱུར་པ་ ནི། ཤེས་པས་ དེ་ཉིད་ བསྒོམས་པས་སོ། — Ce qui donne *jñānena*: «par le savoir résultant de la méditation de ce *[pratītyasamutpāda]*»; mais la version de l'Akutobhaya (fol. 89 a) porte ཤེས་པ་ et le commentaire = *avidyānirodha eva dvādaçāṅgajñāna[sya] a[sya] eva bhāvanām bhāvayitvā.* Ce qui donne pour notre kārikā: *jñānasyāsyaiva bhāvanāt* = «par la méditation de cette théorie».

2—2) Manque dans le tibétain.

3) Manque dans le tibétain.

4) དེ་ དང་ དེ་ ནི་ འགགས་ གྱུར་པས། དེ་ དང་ དེ་ ནི་ མངོན་ མི་ འབྱུང་། སྡུག་བསྔལ་ ཕུང་པོ་ འབའ་ཞིག་པ། དེ་ ནི་ དེ་ལྟར་ འགག་པར་ འགྱུར།

अनया चानुपूर्व्याऽयं योगो आत्मा[Tib. 209b]त्मीयाद्य[1]दर्शनायासनिरस्तः कारकवेदकविरहितं भावस्वभावशून्यं दुःखस्कन्धं दुःखराशिं पुनरनुत्पत्त्या सम्यग्निरोधयति ॥

यथोक्तमार्यशालिस्तम्ब[2]सूत्रे । एवमाध्यात्मिकोऽपि प्रतीत्यसमुत्पादो द्वाभ्यामेव कारणाभ्यामुत्पद्यते । कतमाभ्यां द्वाभ्यां । हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च ।

[3]तत्राध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः कतमो ' यदिदमविद्याप्रत्ययाः संस्काराः ' संस्कारप्रत्ययं विज्ञानं ' विज्ञानप्रत्ययं नामरूपं ' नामरूपप्रत्ययं षडायतनं ' षडायतनप्रत्ययः स्पर्शः ' स्पर्शप्रत्यया वेदना ' वेदनाप्रत्यया तृष्णा ' तृष्णाप्रत्ययमुपादानं ' उपादानप्रत्ययो भवो ' भवप्रत्यया जातिः ' जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति । एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति । अविद्या चेन्नाभविष्यन्नैव संस्काराः प्रज्ञास्यन्ते[4] ' एवं [177a] यावज्जातिश्चेन्नाभविष्यज्जरामरणं न प्रज्ञास्यते । [5]अथ वा सत्यामविद्यायां संस्काराणामभिनिर्वृत्तिर्भवति ' एवं यावज्जात्यां [सत्यां] जरामरणस्याभिनिर्वृत्तिर्भवति ॥ अत्राविद्याया नैवं भवति ' अहं संस्कारानभिनिर्वर्तयामीति । संस्काराणामपि नैवं भवति ' वयमविद्यया[भि]निर्वर्तिता[6] इति । एवं यावज्जातेरपि नैवं भवति ' अहं जरामरणमभिनिर्वर्तयामीति । जरामरणस्या-

1) On peut, à la rigueur, comprendre: «ayant chassé le trouble par la non-vue du moi, du mien, etc»; mais cela présente diverses difficultés. Le tibétain porte ···ལ་ སོགས་པ་ ཡང་དག་པར་ མ་ཡིན་པར་ ལྟ་བ་ དང་ བྲལ་བ་ = °*adyabhūtadarçanavirahitam* se rapportant à *duḥkhaskandham*.

2) De longs fragments de ce Sūtra, que j'espère publier prochainement, sont cités dans le Çikṣāsamuccaya et dans la Bodhicaryavatārapañjika. Pour le tibétain, outre la version du Kandjour, on possède les fragments trouvés par le Dr. A. Stein et publiées par L. D. Barnett. — Nos Mss., comme celui du Çikṣās., portent °*stambha*°, mais comp la note de Bendall, 219, 7.

3) Ici commence la citation Çikṣās. 219. 10.

4) མི་མངོན་པ་ཞིག་གོ.

5) Ms. *atha vā*. འོན་ཀྱང་. Çikṣās. *atha satyām* ...; mais 221. 10 *atha ca*.

6) Çikṣās. *abhinirvrttā*

पि नैवं भवत्ययं जात्याभि[1]निर्वर्तितमिति [Tib. 210 a] ॥ अत्र च सत्यामविद्यायां संस्काराणामभिनिर्वृत्तिर्भवति प्रादुर्भावः । एवं यावज्जात्यां सत्यां जरामरणस्याभिनिर्वृत्तिर्भवति प्रादुर्भावः । एवमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धो द्रष्टव्यः ॥

कथमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्य इति । षण्णां धातूनां समवायात् । कतमेषां षण्णां धातूनां समवायात् । यदिदं पृथिव्यप्तेजोवाय्वाकाशविज्ञानधातूनां समवायादाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः ॥ तत्राध्यात्मिकस्य प्रतीत्यसमुत्पादस्य पृथिवीधातुः कतमो । यः कायस्य संश्ले[2]षात्काठिन्यभावमभिनिर्वर्तयति । अयमुच्यते पृथिवीधातुः । यः कायस्यानुपरिग्रहकृत्यं करोति । अयमुच्यते ऽब्धातुः । यः कायस्याशितपीतभक्षितं परिपाचयति । अयमुच्यते तेजोधातुः । यः कायस्य आश्वासप्रश्वासकृत्यं करोत्ययमुच्यते वायुधातुः । यः कायस्यान्तः[177 b]शौ[3]षीर्यमभिनिर्वर्तयति । अयमुच्यत आकाशधातुः । यो नामरूप[4]मभिनिर्वर्तयति नडकलापयो[5]गेन । पञ्चविज्ञानकायसंयुक्तं सास्रवं च मनोविज्ञानं । अयमुच्यते [6]विज्ञानधातुः ॥ [7]तत्रासतामेषां प्रत्ययानां कायस्यो[8]त्पत्तिर्न भवति । य[9]दा त्वाध्यात्मिकः पृथिवीधातुरविक-

1) Çikṣās. *jātyā nirvṛtta iti.*

2) Çikṣās. *saṃçleṣataḥ k°* — གང་ འདི་ འདུས་ནས་ ལུས་ཀྱི་ སྲ་བའི་···

3) Sic Mss. — Çikṣās. *sauṣirya*, plus correct.

4) Mss. *rūpaṃ kula nivart.* . — Peut-être *°rūpāṅkuram.*

5) མདུང་ཁྱིམ་གྱི་ ཚུལ་དུ་ (se rapporte à *nāmarūpa*). — *naḍakalāpa* = «a shade for travellers made on the wayside by throwing a piece of cloth over three pikes or poles (མདུང་); a frame to lean spears against» (Çarad Chandra, 674 a). — On a vu, ci-dessus 351, n. 6, *kalāpa* traduit par ཚོགས་. — Ajouter les références, M. Vyut. 246. 84 (dans la série des 'grands nombres'); Laṅkāv. 126. *uttalalāpaḥ pravartate.*

6) Manque dans le tibétain et dans Çikṣās.

7) Çikṣās. *asatsu pratyayeṣu* — *tatra* manque dans le tibétain.

8) Mss. *upapattir.*

9) Çikṣās. *yadādhyātmikaḥ.*

लो भवति । एवमप्तेजोवाय्वाकाशविज्ञानधातवश्चाविकला[1] भवन्ति । ततः सर्वेषां समवायात्कायस्योत्पत्तिर्भवति ॥ तत्र [Tib. 210b] पृथिवीधातोर्नैवं भवत्यहं कायस्य काठिनभावमभिनिर्वर्तयामीति । अब्धातोर्नैवं भवत्यहं कायस्यानु[परि]ग्रहकृत्यं करोमीति । तेजोधातोर्नैवं भवत्यहं कायस्याशितपीतखादितं[2] परिपाचयामीति । वायुधातोर्नैवं भवत्यहं कायस्याश्वासप्रश्वासकृत्यं करोमीति । आकाशधातोर्नैवं भवत्यहं कायस्यान्तःशौषीर्यम्[3]अभिनिर्वर्तयामीति । [4]ऋतोरपि नैवं भवत्यहं कायस्य परिणामनाकृत्यं करोमीति[4]। विज्ञानधातोर्नैवं भवत्यहं काय[स्य नामरूप][5]मभिनिर्वर्तयामीति । कायस्यापि नैवं भवत्यहमेभिः प्रत्ययैर्जनित इति ।

अथ च पुनः सतामेषां प्रत्ययानां[6] समवायात्कायस्योत्पत्तिर्भवति[7] । तत्र पृथिवीधातुर्नात्मा न सत्त्वो न जीवो न जन्तुर्न मनुजो न मानवो न स्त्री न पुमान्न नपुंसकं न चाहं न मम न चान्यस्य कस्य चित् । एवमब्धातुस्तेजोधातुर्वायुधातुराकाशधातुर्[8]ऋतुधातुर्विज्ञानधातुर्नात्मा न सत्त्वो न जीवो न जन्तुर्न मनुजो न मानवो न स्त्री न पुमान्न नपुंसकं न चाहं न मम न चान्यस्य कस्य चित् ॥

[9]तत्राविद्या कतमा । [10]यैषामेव षण्णां धातूनामैक्यसंज्ञा पिण्डसंज्ञा नित्यसंज्ञा [178a] ध्रुवसंज्ञा शाश्वतसंज्ञा सुखसंज्ञा [आत्म[Tib. 211a]संज्ञा] सत्त्वसंज्ञा जीवपुद्गलमनुजमानव

1) Mss *vāyuvijñānākāça*°.

2) Ci-dessus 561. 9 *bhakṣita*.

3) Çikṣās. *sauṣiryaṃ karomi*.

4--4) Manque dans le Çikṣās. et dans le Kandjour.

5) ལུས་ཀྱི་ མིང་ དང་ གཟུགས་ མངོན་པར་སྒྲུབ་པོ. Çikṣās. présente une lacune: *vijñānadhātor naivaṃ bhavati: aham ebhiḥ pratyayair janita iti.*

6) Çikṣās. *satsv eṣu pratyayeṣu kāyasya* ...

7) Mss. *kāyasyopapattir*.

8) Manque dans le Çikṣās. et dans le Kandjour.

9) Çikṣās. 221. 14 Bodhicaryāv. IX. 15 (p. 387. 13).

10) Mss. *eṣām*. — Bodhic *eteṣām eva*..... *yaikasaṃjñā*. Çikṣās. *ya eṣv eva satsu dhātuṣv*.

संज्ञा अहंकारममकारसंज्ञा । एवमादिविविधमज्ञानमिदमुच्यतेऽविद्येति ॥ एवमविद्यायां सत्यां विषयेषु रागद्वेषमोहाः प्रवर्तन्ते । तत्र ये रागद्वेषमोहा विषयेष्वमी संस्कारा इत्युच्यन्ते । वस्तुप्रतिविज्ञप्तिर्विज्ञानं । विज्ञानसह[1]भुवश्चत्वारः स्कन्धा अरूपिण उपादानाख्यास्तन्नाम[2] [3]रूपं चत्वारि महाभूतानि तानि चोपादाय रूपं । तच्च नाम [तच्च रूपं] ऐकध्यमभिसंक्षिप्य तन्नामरूपं[3] । नामरूपसंनिश्रि[4]तानीन्द्रियाणि षडायतनं । त्रयाणां धर्माणां संनिपातः स्पर्शः । स्पर्शानुभवो वेदना । वेदनाध्यवसानं तृष्णा । तृष्णावैपुल्यमुपादानं । उपादाननिर्जातं पुनर्भवजनकं कर्म भवः । भवहे[5]तुकः स्कन्धप्रादुर्भावो जातिः । जातस्य स्कन्धपरिपाको जरा । जीर्णस्य स्कन्ध[6]स्य विनाशो मरणं । म्रियमाणस्य संमूढस्य साभिष्वङ्गस्यान्तर्दाहः शोकः । शोकोत्थमाला[7]पनं परिदेवः । पञ्चविज्ञानकायसंयुक्तमसातमनुभवनं दुःखं । मनसा संयुक्तं मानसं दुःखं दौर्मनस्यं । ये चाप्यन्य एवमादय उपक्लेशास्त उपायासा इति [Tib. 211b] ॥

---

1) Çikṣās. et Bodhic *sahajāç.*

2) D'après le tibétain, Çikṣās. et Bodhic *vijnanasahajaç (°bhuvaç) catvaro 'rūpiṇa upadānaskandhās tan nama.*

3–3) མིང་ ཡིན་ནོ། འབྱུང་བ་ ཆེན་པོ་ བཞི་ དང་། དེ་དག་ རྒྱུར་བྱས་པ་ ནི་ གཟུགས་ཏེ། མིང་ དེ་ དང་ གཟུགས་ དེ་ གཅིག་ཏུ་ བསྡུས་པ་ དེ་ ནི་ མིང་དང་ གཟུགས་སོ། *catvāri mahābhūtāni, tany upādaya ca, rupam tan nama tac ca rupam aikadhyam abhisaṃkṣipya tan nāmarūpam* = par *rūpa* on entend les quatre grands éléments et le *rūpa* qui en dérive, [c'est-à-dire le *ādhyātmika rupa*, le *rūpa* en tant qu'il constitue le corps et est un *upādānaskandha*]. ..... — Le passage est très troublé dans toutes les sources, voir Bodhic. 388, n. 1; Çikṣās. 222. 3.

4) Mss. *niḥsṛtāni,* བརྟེན.

5) Tib. = *taddhekutaḥ.*

6) Plutôt *skandhavināço*

7) Çikṣās. *lālapyanam.*

[1]तत्र मोहान्धकारार्थेनाविद्या । [2]अभिसंस्कारार्थेन संस्काराः । विज्ञापनार्थेन विज्ञानं । अन्योऽन्योपस्तम्भनार्थेन नामरूपं । [3]आयद्वारार्थेन षडायतनं । स्पर्शनार्थेन स्पर्शः । अनुभवनार्थेन वेदना । परितर्षणार्थेन तृष्णा । उपादानार्थेनोपादानं । पुनर्भवार्थेन भवः । [4]जन्मार्थेन जातिः । [5]परिपाकार्थेन जरा । विनाशार्थेन मरणं । शोचनार्थेन शोकः । [6]परिदेवनार्थेन परिदेवः । कायपरिपीडनार्थेन दुःखं । चित्तसंपीडनार्थेन दौर्मनस्यं । [7]उपक्लेशार्थेनोपायासाः ॥

[8]अथ वा [178b] तत्त्वेऽप्रतिपत्तिर्मिथ्याप्रतिपत्तिरज्ञानमविद्या ॥ एवमविद्यायां सत्यां त्रिविधाः संस्कारा अभिनिर्वर्तन्ते । पुण्योपगा अपुण्योपगा [9]आनेञ्ज्योपगाः ॥ तत्र पुण्योपगानां संस्काराणां पुण्योपगमेव विज्ञानं भवति । अपुण्योपगानां संस्काराणामपुण्योपगमेव विज्ञानं भवति । आनेञ्ज्योपगानां संस्काराणामानेञ्ज्योपगमेव विज्ञानं भवति । [10]इदमुच्यते [विज्ञानं ॥] विज्ञानप्रत्ययं नामरूपमिति वेदनादयोऽरूपिण[11]श्चत्वारः स्कन्धास्तत्र तत्र भवे नामयन्तीति नाम । सह रूपस्कन्धेन च नाम रूपं चेति नामरूपमुच्यते ॥ नामरूपविवृद्ध्या

1) Ce qui suit manque dans Çikṣas, mais est cite Bodhicaryav. p 388. 17.

2) On lit ailleurs *abhisaṃskaraṇa*°.

3) Voir ci-dessus p. 552. 9.

4) Mss. *janmanārthena*. — La vraie lecture, donnee par Bodhic. et par notre xylographe: *skandhaprādurbhāvarthena*.

5) Bodhic. et xyl. = *skandhaparipākārthena*.

6) Bodhic. et xyl. *vacanaparidevana*.

7) Bodhic. plus correct *upakleçana*°.

8) Voir Çikṣās 222. 11 et Bodhic. IX. 73. — Ces deux textes portent *punar aparaṃ tattve*..... — Notre lecture *atha vā* est confirmée par le xyl ཡང་ན་.

9) Çikṣās. et Bodhic. °*upagāç cema ucyante 'vidyāpratyayāḥ saṃskāra iti* / *puṇyopagānām*. .... — Notre xyl. confirme la lecture de nos Mss.

10) Lecture confirmée par le tibétain. — Çikṣās. *idam ucyate saṃskārapratyayaṃ vijñānam iti*. *evaṃ nāmarūpam*. *nāmarūpavivṛddhyā*...

11) Mss. *cattāraḥ saṃskārās*.

[Tib. 212 a] षड्भिरायतनद्वारैः कृत्यक्रियाः प्रवर्तन्ते प्रज्ञायन्ते[1] । तन्नामरूपप्रत्ययं षडायतनमित्युच्यते ॥ षड्भ्य आयतनेभ्यः षट् स्पर्शकायाः प्रवर्तन्ते । अयं[2] षडायतनप्रत्ययः स्पर्श इत्युच्यते ॥ यज्जातीयः स्पर्शो भवति तज्जातीया वेदना प्रवर्तते । इदमुच्यते भिक्षवः[3] स्पर्शप्रत्यया वेदनेति ॥ यस्तां वेदनां[4] विशेषेणास्वादयति अभिनन्दति अध्यवस्यति अध्य[5]वसाय तिष्ठति । सा वेदनाप्रत्यया तृष्णेत्युच्यते ॥ आस्वादनाभिनन्दनाध्यवसानस्थाना[6]दात्मप्रिय[रूप]सातरूपैर्वियोगो मा भून्नित्य[7]मपरित्यागो भवेदिति[7] येयं[8] प्रार्थना इदमुच्यते भिक्षवः[9] तृष्णाप्रत्ययमुपादानं ॥ यत्र[10] वस्तुनि सतृष्णस्तस्य वस्तुनो ऽर्जनाय विठपनायोपादानमुपादत्ते तत्र[11] तत्र प्रार्थयते[10] । एवं प्रार्थयमानः पुनर्भवजनकं कर्म समुत्थापयति कायेन वाचा मनसा च । स[12] उपादानप्रत्ययो भव इत्युच्यते ॥ तत्कर्मनिर्जातानां[13] स्कन्धानामभि-

---

1) Omis dans le tibétain, Çikṣās. et Bodhic.

2) D'après le tibétain et les autres sources. — Mss. *tatra te*.

3) Manque dans le tibétain et les autres sources: *iyam sparçapratyayā vedanety ucyate*.

4) Çikṣas. et Bodhic. *yas tām vedayati viçeṣeṇa*. — Notre lecture est confirmée par le tibétain.

5) Mss. °*sāye*; mais le tibétain donne le gérondif. — Çikṣas. et Bodhic. *avatiṣṭhati*.

6) Mss. *sthānāmātma*. — Çikṣās. °*adhyavasānam mā me priyarūpasātarūpair viyogo bhavatv iti.aparityāgo bhūyo bhūyaç ca prārthanā*. Bodhic. se rapproche de notre version.

7) *nityam..... iti*. Manque dans notre xylographe

8) D'après le tibétain *ity aparityāgaprārthanā, idam*.

9) Manque dans le tibétain et les autres sources.

10) Manque dans Çikṣās. et Bodhic.

11) Mss. *yac ca prārthaya sa vam prārthayamānas* . . . — དེ་དང་དེ་ལ, comme ci-dessus དེ་དང་དེར.

12) Çikṣās. *ayam*.

13) Çikṣās. *yā karma*° .... *sā bhava*°.

निर्वृत्तिर्या सा भवप्रत्यया जातिरित्युच्यते ॥ जात्याभिनिर्वृत्तानां [179a] स्कन्धानामुपच[1]यनपरिपाका[2]द्विनाशो भवति । तदिदं जातिप्रत्ययं जरामरणमित्युच्यते ॥

एवमयं द्वादशाङ्गः प्रतीत्यसमुत्पादोऽन्योन्यहेतुकोऽन्योन्यप्रत्ययो नैवानित्यो न नित्यो न संस्कृतो नासंस्कृतो [नाहेतुको नाप्रत्ययो] न वेदयिता [(3] नावेदयिता न प्रतीत्यसमुत्पन्नो नाप्रतीत्यसमुत्पन्नो [3)] न क्षयधर्मा [(3] नाक्षयधर्मा न विनाशधर्मा[4] नाविनाशधर्मा [3)] न निरोधधर्मा [(3] नानिरोधधर्मा [3)] ऽनादिकालप्रवृत्तोऽनुच्छिन्नो ऽनुप्रवर्तते नदीस्रोतवत् ॥

यद्यप्ययं [द्वादशाङ्गः][5] [Tib. 212b] प्रतीत्यसमुत्पादोऽनुच्छिन्नोऽनुप्रवर्तते नदीस्रोतवत् ' अथ चेमान्यस्य द्वादशाङ्गस्य प्रतीत्यसमुत्पादस्य चत्वार्यङ्गानि संघातक्रियायै हेतुत्वेन प्रवर्तन्ते । कतमानि चत्वारि । यदुताविद्या तृष्णा कर्म विज्ञानं च । तत्र विज्ञानं बीजस्वभावत्वेन हेतुः । कर्म क्षेत्रस्वभावत्वेन हेतुः । अविद्या तृष्णा च क्लेशस्वभावत्वेन हेतुः । कर्मक्लेशा विज्ञानबीजं जनयन्ति[6] । तत्र कर्म विज्ञानबीजस्य क्षेत्रकार्यं करोति । तृष्णा विज्ञानबीजं स्नेहयति । अविद्या विज्ञानबीजमवकिरति ॥ असतां तेषां प्रत्ययानां [विज्ञान]बीजस्याभिनिर्वृत्तिर्न भवति ॥ तत्र कर्मणो नैवं भवति ' अहं विज्ञानबीजस्य क्षेत्रकार्यं करोमीति । तृष्णाया अपि नैवं भवति ' अहं विज्ञानस्य स्नेहकार्यं करोमीति । अविद्याया अपि नैवं भवति ' अहं विज्ञानबीजमवकिरामीति । विज्ञानबीजस्यापि नैवं भवति ' अहमेभिः प्रत्ययैर्जनितमिति ॥

अत्र च विज्ञानबीजं कर्म[179b]क्षेत्रप्रतिष्ठितं तृष्णास्नेहाभिष्यन्दितमविद्यया

---

1) Mss. *upanayana;* Çikṣās. *upacaya.*

2) Sic Çikṣās. — D'après le tibétain °*pākavināçau bhavataḥ.*

3) Manque dans le tibétain, et aussi dans Çikṣās.

4) Mss. *virāga.*

5) Le tibétain répète *dvādaçāṅgaḥ pratītyasamutpādo 'nyonyahetuko 'nyonyapratyayo* ....

6) Çikṣās. *saṃjanayanti.*

स्ववकीर्णं[1] विभज्यमानं[2] [विरोहति][3] ' तत्र [Tib. 213a] तत्रोपपत्त्यायतनप्रतिसंधौ मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति । स च नामरूपाङ्कुरो न स्वयंकृतो न परकृतो नोभयकृतो नेश्वरकृतो[4] न कालपरिणामितो न प्रकृतिसंभूतो न चैककारणाधीनो नाप्यहेतुसमुत्पन्नः ॥ अथ च मातापितृसंयोगात् ' ऋतुसमवायात् ' अन्येषां प्रत्ययानां समवायात् ' आस्वादानुविद्धं विज्ञानबीजं मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति ' अस्वामिकेषु धर्मेष्वपरिग्रहेष्वममेषु[5] [आकाशसमेषु] मायालक्षणस्वभावेषु हेतुप्रत्ययानामवैकल्यात् ।

तद्यथा पञ्चभिः कारणैश्चक्षुर्विज्ञानमुत्पद्यते । कतमैः पञ्चभिः ' यदुत चक्षुः प्रतीत्य रूपं चालोकं चाकाशं [च] तज्जमनसिकारं च प्रतीत्योत्पद्यते चक्षुर्विज्ञानं । तत्र चक्षुर्विज्ञानस्य चक्षुराश्रयकृत्यं करोति ' रूपमालम्बनकृत्यं करोति ' आलोकोऽवभासकृत्यं करोति ' आकाशमनावरणकृत्यं करोति ' तज्जमनसिकारः समन्वाहरणकृत्यं[6] करोति ॥ असतामेषां[7] प्रत्ययानां चक्षुर्विज्ञानं नोत्पद्यते । यदा तु चक्षुराध्यात्मिकमायतनमविकलं भवति ' एवं रूपालोकाकाशतज्जमनसिकाराश्चाविकला भवन्ति । ततः सर्वेषां समवाया[8]च्चक्षुर्विज्ञानमुत्पद्यते ॥ तत्र चक्षुषो नैवं भवत्यहं चक्षुर्विज्ञानस्याश्रयकृत्यं करोमीति । एवं[9] रूप[180a]स्यापि नैवं भवत्यहं चक्षुर्विज्ञानस्य[Tib. 213b]लम्बनकृत्यं करोमीति । आलोकस्यापि नैवं भवत्यहं चक्षुर्विज्ञानस्यावभासकृत्यं करोमीति । आकाशस्यापि नैवं भवत्यहं चक्षुर्विज्ञानस्यानावरणकृत्यं करोमीति । तज्जमनसिकारस्यापि नैवं भवत्यहं

1) Çikṣās. *avidyāvakīrṇa* ལེགས་པར་བཏབ་པ་ལས་ སྐྱེ་བ་ཏེ།

2) Manque dans Çikṣās. et dans le tibétain, et glose *avakīrṇa*.

3) Correspond dans Bodhic. à སྐྱེ་བ་ཏེ་ de la version tibétaine.

4) Çikṣās. *īçvarādinirmito.*

5) Çikṣās. ajoute *apratyarthikeṣu*, donné aussi par Bodhic., mais qui manque dans la version tibétaine de ce texte comme dans la nôtre.

6) Çikṣās. *samanvāhāra.*

7) Ibid. *asatsu teṣu pratyayeṣu.*

8) Ibid. *tataḥ sarvasamavāyāc cakṣurvijñānasyotpattir bhavati.*

9) Manque dans Çikṣās.

चक्षुर्विज्ञानस्य समन्वाहरणाकृत्यं करोमीति । चक्षुर्विज्ञानस्यापि नैवं भवत्यहमेभिः प्रत्ययैर्जनितमिति ॥ अथ च [1]सतामेषां प्रत्ययानां समवायाच्चक्षुर्विज्ञानस्योत्पत्तिर्भवति ॥ एवं शेषाणामिन्द्रियाणां यथायोगं करणीयं ॥

तत्र न कश्चिद्धर्मोऽस्माल्लोकात्परलोकं संक्रामति । अस्ति च कर्मफलप्रतिविज्ञप्तिर्हेतुप्रत्ययानामवैकल्यात् ॥ [2]तद्यथा भिक्षवः[3] सुपरिशुद्ध आदर्शमण्डले मुखप्रतिबिम्बकं दृश्यते । न च तत्रादर्शमण्डले मुखं संक्रामति । अस्ति च मुखप्रतिविज्ञप्तिर्हेतुप्रत्ययानामवैकल्यात् ॥ एवमस्माल्लोकान्न कश्चिच्च्युतो नाप्यन्यत्रोपपन्नः । अस्ति च कर्मफलप्र[ति]वि[ज्ञ]प्तिर्हेतुप्रत्ययानामवैकल्यात् ॥ तद्यथा भिक्षवश्चन्द्रमण्डलं चत्वारिंशद्योजनशतमूर्ध्वं व्रजति । अथ च पुनः परीत्ते ऽप्युदकभाजने चन्द्रस्य प्रतिबिम्बं दृश्यते । न च [4]तस्मात्स्थानादूर्ध्वं नभसश्च्युतं परीत्त उदकस्य भाजने संक्रान्तं भवति । अस्ति च चन्द्रमण्डलप्रतिविज्ञप्तिर्हेतुप्रत्ययानामवैकल्यात् । एवमस्माल्लोकान्न कश्चिच्च्युतो नाप्यन्यत्रोपपन्नः । अस्ति च कर्मफलप्रतिविज्ञप्तिर्हेतुप्रत्ययानामवैकल्यात्[2] ॥

तद्यथाग्निरुपादानप्रत्यये सति ज्वलति [Tib. 214b] उपादानवैकल्यान्न ज्वलति[5] । एवमेव भिक्षवः कर्म[180b]क्लेशजनितं विज्ञानबीजं तत्र तत्रोपपत्त्यायतनप्रतिसंधौ मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति । [6]अस्वामिकेषु धर्मेष्वपरिग्रहेषु मायालक्षणस्वभावेष्वममेषु कृत्रिमेषु हेतुप्रत्ययानामवैकल्यात् ॥

1) Çikṣās. *satsv eṣu pratyayeṣu.*

2—2) Manque dans Çikṣās. et dans Bodhic.

3) Manque dans le tibétain.

4) Mss *tasmātthānāmūrdhvam* Tib. = *na ca candramaṇḍalam tasmāt sthānāc cyutam.*

5) D'après le tibétain: *tadyathāgnir hetupratyayavaikalyān na jvalati, hetupratyayasāmagrīto jvalati* — Çikṣās *yathāgnir upādānavaikalyān na jvalati, evam eva . .*; de même Bodhic., bien que la traduction tibétaine de ce dernier texte soit conforme à notre xylographe.

6) D'après le tibétain *asvāmikeṣv amameṣv aparigraheṣv ākāçasameṣu māyālakṣaṇasvabhāveṣu hetu°* — Çikṣās. ajoute *apratyarthikeṣu* avant *ākāça°*

तत्राध्यात्मिकः प्रतीत्यसमुत्पादः पञ्चभिः कारणैर्द्रष्टव्यः । कतमैः पञ्चभिः । न शाश्वततो नोच्छेदतो न संक्रान्तितः परीत्तहेतुविपुलफलाभिनिर्वृत्तितः तत्सदृशानुप्रबन्धतश्चेति ॥ कथं न शाश्वततो ' यस्मादन्ये मारणान्तिकाः स्कन्धा अन्य औपपत्त्यंशिकाः स्कन्धाः । न तु य एव मारणान्तिकाः स्कन्धास्त एवौपपत्त्यंशिकाः । अपि तु मारणान्तिकाः स्कन्धा निरुध्यन्ते । (1 तस्मिन्नेव च समये 1) औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति । अतो न शाश्वततः ॥ [कथं नोच्छेदतः] । न च (2) पूर्वनिरुद्धेषु मारणान्तिकेषु स्कन्धेषु औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति नाप्यनिरुद्धेषु । अपि तु मारणान्तिकाः स्कन्धा निरुध्यन्ते ' (3 तस्मिन्नेव च समये 3) औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति तुलादण्डोन्नामावनामवच्चन्द्रबिम्ब(4)प्रतिबिम्बवत् । अतो नोच्छेदतः ॥ कथं न संक्रान्तितः । विसदृशाः सत्त्वनिकायाः सभागायां (5) जात्यां जातिमभिनिर्वर्तयन्ति । अतो न संक्रान्तितः ॥ कथं परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः । परीत्तं कर्म क्रियते विपुलः फलविपाकोऽनुभूयते । अतः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः ॥ कथं तत्सदृशानुप्रबन्धतः । यथावेदनीयं [Tib. 214b]

1—1) Manque dans le xylographe. — Çikṣās. *api tu māraṇāntikāḥ skandhā nirudhyamānā aupapattyaṃçikah skandhāç ca prādurbhavanti.*

2) *pūrva*° et *māraṇāntikeṣu* manque dans Çikṣās., mais est donné par Bodhic.

3—3) Manque dans Çikṣāsamuccaya.

4) Manque dans notre xylographe et les autres sources.

5) Mss. *sabhāgatāyāṃ satyām* .... *vartayati.* — Notre xylographe comporte une lecture *sabhāgāyāṃ jatyām*, mais ajoute une négation: སེམས་ཅན་རིགས་མི་འདྲ་བ་རྣམས་སྐལ་བ་། མཉམ་པའི་སྐྱེ་བར་སྐྱེ་བ་མངོན་པར་འགྲུབ་པར་མི་བྱེད་པའོ། *na abhinirvartayanti.* — Malheureusement il n'y a accord, ni entre nos quatre sources tibétaines (Fragment Stein, Mdo XVI, traduction de Bodhic., notre xylographe), ni entre les traditions manuscrites de Madh. vṛtti, Çikṣās. et Bodhic. — Je reprendrai ce petit problème dans l'édition du Çalistambasūtra.

कर्म क्रियते तथाविदनीयो विपाकोऽनुभूयते । अतस्तत्सदृशानु[प्र][181a]बन्धतश्चेति विस्तरः[1] ॥

॥ इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ द्वादशाङ्गपरीक्षा नाम षड्विंशतितमं प्रकरणं ॥

---

1) Pour ce *vistara*, voir ci-dessous Chap. XXVII ad finem, et Çikṣās. p. 227. 3.

XXVII.

दृष्टिपरीक्षा नाम सप्तविंशतितमं प्रकरणं

यश्चैवं प्रतीत्यसमुत्पादं यथाभूतं सम्यक् पश्यति स न पूर्वान्तं प्रतिसरति[1] । नापरान्तं प्रतिसरतीत्यादि सूत्रे[2] पठ्यते । तत्र कतमः पूर्वान्तः । कतमोऽपरान्तः । कथं न प्रतिसरतीति तद्व्युत्पत्त्यर्थमिदमारभ्यते ॥

तत्र वर्तमानमात्मभावमपेक्ष्यातीता[3] आत्मभावाः पूर्वान्त इत्युच्यते । पूर्वो हि जन्मपरंपरांशः पूर्वान्तः । तं न प्रतिसरति । दृष्टिप्रकारैर्नालम्बते । प्रतीत्यसमुत्पादस्य यथावदवस्थित[त]त्त्वदर्शनात् । नान्यथावस्थितं वस्त्वन्यथाभिनिविशते । तत्राष्टौ दृष्टयः पूर्वान्तमालम्ब्यान्यथा प्रवृत्ताः । तद्यथा[4] ।

* * * * * * * * * * * * * ⏑–⏑– ।

याস্ताः शाश्वतलोकाद्याः पूर्वान्तं समुपाश्रिताः ॥ १

---

1) སྔོན་གྱི་ མཐའ་ལ་ རྟེན་པར་ མི་བྱེད།

2) Voir ci-dessous fol. 188a

3) *ātmabhāva* = བདག་གི་ དངོས་པོ་.

4) Nos Mss. présentent une lacune, provenant de la répétition de *tadyathā*. — འདི་ལྟ་སྟེ། འདས་ དུས་ བྱུང་ མ་ བྱུང་ ཞེས་ དང་། །འཇིག་རྟེན་ རྟག་པ་ ལ་ སོགས་པར། །ལྟ་བ་ གང་ ཡིན་ དེ་དག་ནི། །སྔོན་གྱི་ མཐའ་ལ་ བརྟེན་པ་ ཡིན། །དེ་ ལ་ ཞེས་ཀྱི་ སྒྲ་ ནི་ སོགས་པའི་ དོན་ལའོ། །ཡང་ན་ ལྟ་བ་ གཉིས་ ཉེ་བར་ བཀོད་པ་ ནི་ ཉེ་བར་མཚོན་པའི་ དོན་དུ་ ཡིན་ནོ། །ལྟ་བ་ འདི་དག་ ནི་ བཞི་སྟེ། འདི་ལྟ་སྟེ། ཅི་ བདག་ འདས་པའི་ དུས་ན་ བྱུང་བ་ ཞིག་གམ། — Mdo XVII donne la même version de la Kārikā. — On peut restituer:

abhūm atītam adhvānam nābhūm iti ca dṛṣṭayaḥ

mais l'analogie de la stance 2 exige que la stance commence par *dṛṣṭayaḥ*; on aurait: *dṛṣṭayo 'bhūvam nābhūvam kim nv atīte 'dhvanīti ca.*

तत्रेतिशब्द आद्यर्थः । अथ वा दृष्टिद्वयोपादानमुपलक्षणार्थं । चतस्रस्त्वेता दृष्टयः । तद्यथा । किं न्वहमभूवमतीतमध्वानं ' नाभूवमतीतमध्वानं ' अभूवं च नाभूवं च ' नैवाभूवं न नाभूवमिति । एताश्चतस्रो दृष्टयः पूर्वान्तं समाश्रिताः ॥ [Tib. 215a]

अपरा अपि चतस्र इत्याह[1] '

यास्ताः शाश्वतलोकाद्याः

पूर्वं प्रसङ्गेनोपवर्णितास्ता[2] अपि

पूर्वान्तं समुपाश्रिताः ॥

तत्र यद्यपि पूर्वान्ताद्दृष्टिचतुष्टयादुत्तरं दृष्टिचतुष्टयं नातिभिद्यते[3] तथापि ताव-[4]न्मात्रविशेषमाश्रित्य पृथगुपादीयते तच्चोत्तरत्र व्याख्यास्यामः । तत्र शाश्वतो लोक इत्येतदभूवमतीतमध्वानमित्येतस्मान्नातिभिद्यते । अथ वायं विशेषो यच्छाश्वतो लोक इत्येषा दृष्टिः सामान्येन पूर्वान्तमाश्रिता [181b] । अभूवमतीतमध्वानमित्येषा त्वात्मन एव पूर्वान्तपरामर्शेन प्रवृत्ता न सामान्येनेति । एवमन्यास्वपि दृष्टिषु विशेषो वक्तव्यः ॥ इत्येवं तावदष्टावेता दृष्टयः पूर्वान्तं समुपाश्रिताः ॥

उक्तः पूर्वान्तस्तदालम्बिकाभिर्दृष्टिभिः सार्धमिदानीमपरान्त उच्यते । तत्र वर्तमानमात्मभावमपेक्ष्य भाविन आत्मभावा अपरान्त इत्युच्यते । अपरो हि जन्मपरंपरांशोऽपरान्तः ' तं न प्रतिसरति ' दृष्टिप्रकारैर्नालम्बते । प्रतीत्यसमुत्पादस्य यथावदवस्थि-

---

1) Le tibétain ne traduit pas *āha*; il reproduit les trois derniers pādas, avec la variante དེ་དག་ཀྱང་ (*tā api*) au lieu de དེ་དག་དེ་, soit *aparā api catasra iti pūrvaṃ prasaṅgena upavarṇitāḥ / çāçvatalokādyā dṛṣṭayo yās [santi] tā api pūrvāntam samupāçritāḥ.*

2) ཞར་ལ་ *prasaṅgena.* — Aussi ཞོར་ལ་, Çarad Candra.

3) Mss. *cātibhiṣate, nābhibhidyate* — ཐ་དད་པ་ ཆེར་ མེད་ མོད་ཀྱི.

4) ཅུང་ཟད་ཙམ་.

ततश्चदर्शनात् । नान्यथावस्थितं वस्त्वन्यथाभिनिविशते ॥ तत्राष्टौ दृष्टयोऽपरान्तमालम्ब्यान्यथा प्रवृत्ताः । तद्यथा ।

दृष्टयो न भविष्यामि किमन्योऽनागतेऽध्वनि ।
भविष्यामीति चान्ताद्या अपरान्तं [Tib. 215b] समाश्रिताः[1] ॥ २

इहापि दृष्टिद्वयोपादानमुपलक्षणार्थं । चतस्रस्त्वेता दृष्टयः । तद्यथा । किं नु भविष्याम्यनागतमध्वानं । न भविष्यामि । [भविष्यामि च न भविष्यामि च।] नैव भविष्यामि न च [न] भविष्याम्यनागतमध्वानमित्येताश्चतस्रो दृष्टयो ऽपरान्तं समाश्रिताः ॥ किमेता एव चतस्रो दृष्टयो ऽपरान्तं समाश्रिताः । नेत्याह । किं तर्ह्यपरा अपि चतस्रो विद्यन्त अन्ताद्या[2] अपरान्तं समाश्रिताः । तत्रान्ताद्याश्चतस्रो[3] दृष्टयः सामान्येनापरान्तमाश्रित्य प्रवृत्ताः । किं नु भविष्याम्यनागतमध्वानमित्येतास्त्वात्मन एवापरान्तमाश्रित्य प्रवृत्ता इत्येवं दृष्टिचतुष्टयस्य विशेष इति बोद्धव्यं ॥

तत्राद्यस्य तावत्पूर्वान्तालम्बिकस्य [182a] दृष्टिचतुष्टयस्य यथा न संभवस्तथा प्रतिपादयन्नाह ।

अभूमतीतमध्वानमित्येतन्नोपपद्यते ।
यो हि जन्मसु पूर्वेषु स एव न भवत्ययं[4] ॥ ३

---

1) Mss. *kim anye nāgate 'dhvani.* — མ་འོངས་ དུས་ གཞན་ འགྱུར་ དང་། །མི་ འབྱུང་ འཇིག་རྟེན་ མཐའ་སོགས་པར། །ལྟ་བ་ གང་ ཡིན་ དེ་དག་ ནི། །ཕྱི་མའི་ མཐའ་ལ་ བརྟེན་པ་ ཡིན། — Le tibétain ne traduit pas *kim* ni *iti*; par contre il a, comme dans la première stance, *yās tas* et *lokānta°* (?) au lieu de *anta°* — གཞན་ garantit *anya.*

2) Tib. *lokāntādyāḥ* (?): འཇིག་རྟེན་ མཐའ་སོགས་པར།

3) མཐའ་ ཡོད་པ་ལ་ སོགས་པ་ ལྟ་བ་.

4) འདས་པའི་ དུས་ན་ བྱུང་ འགྱུར་ ཅེས། །བྱ་བ་ དེ་ ནི་ མི་ འཐད་དོ། །སྔོན་

तत्र य एवातीतेषु जन्मसु बभूव यदि स एवायमधुना स्यात्तदा युक्तमस्य वक्तुमभूवमहमतीतमध्वानमिति। न चैतदेवं संभवति नित्यत्वप्रसङ्गात्, नित्यस्य च संसरणानुपपत्तेः, एकगतिस्थस्यापि नानागतिसंगृहीतत्वप्रसङ्गात्। इह हि पूर्वं यदि नरकादिगतिको भूत्वा इदानीं [Tib. 216a] कर्मवैचित्र्यान्मनुष्येषूपपन्न एवं कल्पयेदहमेवासौ नारक आसमिति तदस्य न युक्तं। कथं हि नाम मनुष्यः सन्नारकादिकः स्यात्॥

यत्तर्हीदं पठ्यते सूत्रे[1]। अहमेव स तेन कालेन तेन समयेन मान्धाता नाम राजा चक्रवर्ती अभूवमिति, तत्कथं वेदितव्यमिति। अन्यत्वप्रतिषेधपरं तद्वचनं नैकत्वप्रतिपादकमिति विज्ञेयं। अत एव हि नान्यः स तेन कालेन तेन समयेनेति पठ्यते॥ यदि पुनः स एवायमिति पूर्वकस्य चाधुनातनस्य चैकत्वं स्यात्, को दोषः स्यात्। उक्तस्तावदत्र दोषो नित्यत्वं स्यादिति॥

तथापि भूय उच्यते,

स एवात्मेति तु भवेदुपादानं विशिष्यते।

यदि स एव पूर्वक आत्मायमिदानीं स्यात्तदोपादानस्य पञ्चस्कन्धलक्षणस्य विशेषो न स्यादुपादातुरविशेषात्पूर्वावस्थायामिव। न चैवमुपादानाविशेषोऽस्यात्मनः, किं तर्हि विशिष्यत एवोपादानमुपादातुः कर्मभेदात्कारकभेदाच्च। ततश्चोपादानविशे[182b]षात्स एवायमात्मेति न युज्यते॥

अथ मन्यसे, विशिष्यतामुपादानमात्मा त्वेक एवेति, अत आत्मनोऽविशिष्टत्वादभूमतीतमध्वानमित्येतद्भविष्यत्येव॥ उच्यते,

---

ཚེ་རྣམས་སུ་ གང་ བྱུང་བ། །དེ་ཉིད་ འདི་ དེ་ མ་ཡིན་ནོ། — La forme *abhūm* est répétée plusieurs fois ci-dessous, metri causa.

1) Voir Divyāvadāna 228.15: *yo Mūrdhāto rājāham eva sa tena kālena tena samayena.* — Sur ce roi, Schiefner, Ind. Erzählungen, xlv (Pet. 1877); JBTS. 1894, 3, p. 15; Takakusu, BEFEO. 1904, p. 1020.

उपादानविनिर्मुक्त आत्मा ते कतमः पुनः[1] ॥ ४

यदि ह्यन्यदुपादानमन्यश्चात्मा स्यात्तदोपादानविशेषे ऽप्यात्मनो ऽविशेषात्स्यादेतदेवं । न चैतद्भेदेन दर्शयितुं शक्यं । अयमसावात्मा इदम[Tib. 216 b]स्योपादानमिति[2] । [3]****** प्रसङ्गात् ***** ग्रहणाप्रसङ्गात् । यदा चैवमुपादानविनिर्मुक्त आत्मा दर्शयितुं न शक्यते । तदोपादानविशेषेऽपि आत्माविशेष इति न शक्यते कल्पयितुं ॥

अथापि कश्चित्परिकल्पयेत्सत्यमुपादानविनिर्मुक्त इत्येवं न संभवति । किमुपादानमेवात्मत्वेन परिकल्प्यत इति । एतदपि न युक्तमिति प्रतिपादयन्नाह ।

उपादानविनिर्मुक्तो नास्त्यात्मेति कृते सति ।
स्यादुपादानमेवात्मा नास्ति चात्मेति वः पुनः[4] ॥ ५

[5]यथा तावदुपादानमेवात्मा न संभवति तथा प्रतिपादयन्नाह ।

---

1) དེ་ཉིད་བདག་ཏུ་འགྱུར་སྙམ་ན། །ཉེ་བར་ལེན་པ་ཐ་དད་འགྱུར། །ཉེ་བར་ལེན་པ་མ་གཏོགས་པར། །ཁྱོད་ཀྱི་བདག་ནི་གང་ཞིག་ཡིན།

2) Tib. = *idam ātmana upādānam.*

3) Mss. *upādānā gati saṃgṛhītatvāt prasaṅgāt / mṛtena grahaṇaprasaṅgāt, upādānoprasaṅgāt, mṛte grahaṇa°.* — ཉེ་བར་ལེན་པ་ལས་ཐ་དད་པའི་རང་བཞིན་ཡིན་པ་ཉིད་ཀྱིས་བདག་རྒྱུ་མེད་པར་ཐལ་བའི་ཕྱིར་དང་། སོ་སོར་བཟུང་དུ་ཡོད་པར་ཐལ་བར་འགྱུར་བའི་ཕྱིར་རོ། = *upādānaviçiṣṭasvabhāvatvād ātmano 'hetukatvaprasaṅgāt, pṛthaggrahaṇaprasaṅgāc ca* (ou *bhedena grahaṇa°*, voir 216. 6).

4) ཉེ་བར་ལེན་པ་མ་གཏོགས་པའི། །བདག་ཡོད་མ་ཡིན་བྱས་པའི་ཚེ། །ཉེ་བར་ལེན་ཉིད་བདག་ཡིན་ན། །ཁྱོད་ཀྱི་བདག་ནི་མེད་པ་ཡིན། — Mss. *iti vā punaḥ.*

5) Mss. *atha* — ཇི་ལྟར་···· དེ་ལྟར་···

[न चोपादानमेवात्मा व्येति तत्समुदेति घ ।]

कथं हि नामोपादानमुपादाता भविष्यति[1] ॥ ६

तत्र यदेतत्पञ्चोपादानस्कन्धाख्यमुपादानं तत्प्रतिक्षणमुत्पद्यते च विनश्यति च ' न चैवमात्मा प्रतिक्षणमुत्पद्यते च विनश्यति च । आत्मा स्कन्धेभ्यस्तत्त्वान्यत्वादिना[2] च नित्यानित्यत्वेनाप्यशक्य एव वक्तुमनेकदोषप्रसङ्गात् ' नित्यत्वे ह्यात्मनः शाश्वतवादः स्यादनित्यत्वे चोच्छेदवादप्रसङ्गः ' तच्च तदुभयं शाश्वतोच्छेदाख्यं महानर्थकरमिति [नो[3]पगन्तव्यं] ' अ[183a]त [उपादानमे]वात्मेति तावन्न युज्यते[3] ॥

अपि च

कथं हि नामोपादानमुपादाता [Tib. 217a] भविष्यति ।

इहोपादीयत[4] इत्युपादानं कर्म ' तस्य चावश्यमुपादात्रो[5]पादकेन भवितव्यं । तस्य चोपादानस्य यद्यात्मत्वमिष्यते ' तत्रोपादानमेवोपादातेत्यपि विद्यते । ततश्च कर्तृकर्मणोरैक्यं सति छेत्तृच्छेत्तव्यघटकुम्भकाराग्नीन्धनादीनामप्यैक्यं स्यात् ' न चैतदृष्टं युक्तं वेति प्रतिपादयन्नाह ।

कथं हि नामोपादानमुपादाता भविष्यति । इति ।

अपि त्वत्यन्ता[6]संभव एवास्य पक्षस्येत्यभिप्रायः ॥

---

1) ཉེ་བར་ལེན་ཉིད་བདག་མ་ཡིན། །དེ་འབྱུང་བ་དང་འཇིག་པ་ཡིན། །ཉེ་བར་བླང་བ་ཇི་ལྟ་བུར། །ཉེ་བར་ལེན་པོ་ཡིན་པར་འགྱུར། — Voir ci-dessus 342. 2.

2) Mss. *vijñanetyas, vijñanyas.*

3—3) བྱེད་པ་ཡིན་པས་ཁས་བླང་བར་མི་བྱའོ། །དེའི་ཕྱིར་རེ་ཞིག་ཉེ་བར་ལེན་པ་དེ་ཉིད་བདག་ཡིན་ནོ་··

4) ཉེ་བར་བླང་བར་བྱ་བ་ཡིན་པས་ན.

5) ཉེ་བར་སོགས་པ་པོ.

6) གཏན་མི་སྲིད་པ་ཉིད་དོ།

अत्राह । सत्यमुपादानमात्रमात्मा न युज्यते । किं तर्ह्युपादानव्यतिरिक्त एवात्मा भविष्यति ॥ एतदपि न युक्तं । किं कारणं । यस्मात् ।

अन्यः पुनरुपादानादात्मा नैवोपपद्यते ।
गृह्येत ह्यनुपादानो यद्यन्यो न च गृह्यते[1] ॥ ७

यद्युपादानादात्मा व्यतिरिक्तः स्यात् गृह्येत स उपादानव्यतिरिक्तो घटादिव पटः । न चैवं गृह्यते । तस्मादुपादानव्यतिरिक्तोऽपि नास्ति । अनुपादान उपादानव्यतिरेकेणागृह्यमाणत्वात्खपुष्पवदित्यभिप्रायः ॥

इदानीं यथोपपादितमर्थं निगमयन्[2]नाह ।

एवं नान्य उपादानान्न चोपादानमेव सः ।
आत्मा नास्त्यनुपादानः[3] ।

अथ[4] स्याद्यद्यात्मा उपादानस्वरूपो न भवत्युपादानोपादात्रोरेकत्वप्रसङ्गादुदयव्यय[Tib. 217b]प्रसङ्गाच्च । स ह्यन्योऽपि न भवत्युपादान[5]ानपेक्षस्य भेदेन [6][ग्रहणा]प्रस-

1) བདག་ནི་ཉེ་བར་ལེན་པ་ལས། །གཞན་དུ་འཐད་པ་ཉིད་མ་ཡིན། །གལ་ཏེ་གཞན་ན་ལེན་མེད་པར། །བཟུང་ཡོད་རིགས་ན་བཟུང་དུ་མེད།

2) མཇུག་བསྡུ་བའི་ཕྱིར.

3) དེ་ལྟར་ལེན་པས་གཞན་མ་ཡིན། །དེ་ནི་ཉེར་ལེན་ཉིད་ཀྱང་མིན། །བདག་ནི་ཉེ་བར་ལེན་མེད་མིན།

4) ཅི་སྟེ་ཉེ་བར་བླང་བ་ ....

5) Mss. *upādānāpekṣā bhedena*, °*dānapekṣā*. — *bhedena* = ཐ་དད་པར.

6) བཟུང་དུ་ཡོད་པར་ཐལ་བར་འགྱུར་བའི་ཕྱིར.

ङ्गात् । न चाप्यनुपादान उपादाननिरपेक्षस्य ग्रहणप्रसङ्गात् । [1]एवं तर्हि नास्त्यात्मेत्यस्तु ॥ उच्यते

नापि नास्त्येष निश्चयः[2] ॥ ८

यो हि नाम स्कन्धानुपा[183b]दाय प्रज्ञप्यते स कथं नास्तीति स्यात् । न ह्यविद्यमानो वन्ध्यातनयः स्कन्धानुपादाय प्रज्ञप्यते । कथं सत्युपादान उपादाता नास्तीति युज्यते । तस्मान्नास्तित्वमप्यस्य न युज्यते । तस्मान्नास्त्यात्मेति[3] निश्चयोऽप्येष नोपपद्यते ॥

अस्य त्वात्मनो व्यवस्थानं विस्तरेण मध्यमकावतारादवसेयं । इहापि च पूर्वमेव स्थानस्थानेषु[4] कृता[5] व्यवस्थेति न पुनरिह तद्व्यवस्थाने यत्न आस्थीयते ॥

एवं तावदभूवमतीतमध्वानमित्येषा कल्पना नोपपद्यते । इदानीं नाभूवमतीतमध्वानमित्येतदपि यथा नोपपद्यते तथा प्रतिपादयन्नाह ।

नाभूमतीतमध्वानमित्येतन्नोपपद्यते ।
यो हि जन्मसु पूर्वेषु ततोऽन्यो न भवत्ययं[6] ॥ ९

यदि पूर्वकादात्मनोऽस्याधुनातनस्यात्मनोऽन्यत्वं स्यात्तदानीं नाभूमतीतमध्वानमिति स्यात् । न चैतदेवं संभवति । तस्मान्नाभूवमतीतमध्वानमित्येतन्नोपपद्यते ॥

---

1) དེ་ལྟ་ན་འོ་ན་བདག་མེད་དོ་ཞེས་བྱ་བ་ཡིན་ལ་རག་གི་སྙམ་ན།

2) མེད་པ་ཉིད་དུའང་དེ་མ་ངེས།

3) མེད་དོ་སྙམ་པའི་ངེས་པ་འདི་ . . . །. — སྙམ་པའི = *iti*.

4) སྐབས་སྐབས་དག་ཏུ.

5) བྱས་ཟིན་པའི་ཕྱིར.

6) འདས་པའི་དུས་ན་མ་བྱུང་ཞེས། །བྱ་བ་དེ་ཡང་མི་འཐད་དོ། །སྔོན་ཚེ་རྣམས་སུ་གང་བྱུང་བ། །དེ་ལས་འདི་གཞན་མ་ཡིན་ནོ།

यदि पुनः पूर्वकादात्मनोऽस्यान्यत्वं स्यात्को दोष इति ॥ उच्यते ।

यदि ह्ययं भवेदन्यः प्रत्याख्यायापि तं भवेत् ।

तथैव [Tib. 218a] [च स] संतिष्ठेत्तत्र जायेत वामृतः[1] ॥ १०

यदि ह्ययमधुनातन आत्मा पूर्वकादात्मनोऽन्यः स्यात्तदा तं पूर्वकमात्मानं प्रत्याख्याय परित्यज्य तन्निरपेक्षो ऽतद्धेतुक एव स्यात् ॥ किं चान्यत् । तथैव च [स] संतिष्ठेत्तत्र । यदि पूर्वकादात्मनोऽस्यान्यत्वं स्यात् । तदान्यत्वाद्घटोत्पादे पटाविनाशवत्पूर्वस्यात्मन उत्तरस्मिन्नप्यात्मनि समुत्पद्यमानेऽप्यनिरोधः स्यात् । अनिरुद्धत्वाच्च यत्र पूर्वं देवमनुष्यादिजन्मसूपपन्नो येन [184a] वर्णसंस्थानादिना पूर्वमुपलभ्यमानस्तेनैव प्रकारेण तथैव स तत्रावतिष्ठेत[2] । पूर्वत्र वामृत[3] एवेह्लोत्पद्येत । न चैष संभवोऽस्ति यदस्य मनुष्यभूतस्य पूर्वको देवाद्यात्मा तथैवावतिष्ठेतेति । तस्मान्नाभूवमतीतमध्वानमित्येतन्नोपपद्यते ॥

अत्राह । तत्र यदुक्तं ।

यदि ह्ययं भवेदन्यः प्रत्याख्यायापि तं भवेदिति ।

यदि पुनः पूर्वकमात्मानं प्रत्याख्याय ***************[4] तदा तस्य पूर्व-

1) གལ་ཏེ་ འདི་ ནི་ གཞན་ འགྱུར་ན། །དེ་ མེད་པར་ ཡང་ འབྱུང་བར་ འགྱུར། །དེ་ བཞིན་ དེ་ནི་ གནས་ འགྱུར་ ཞིང་། །དེར་ མ་ ཤི་བར་ སྐྱེ་བར་ འགྱུར། — Construire *tatrāmṛta*.

2) གནས་པ་.

3) *vā* n'est pas représenté dans le tibétain; peut-être *ca*

4) Mss. *pratyākhyāya syāt tada* . . . — གལ་ཏེ་ སྔར་གྱི་ བདག་ མེད་པར་ འདི་ འདིར་ འབྱུང་བར་ འགྱུར་ན་ ཉེས་པ་ ཅིར་ འགྱུར། དེ་ལ་ ཉེས་པ་ མང་པོར་ འགྱུར་རོ། །ཇི་ལྟར་ ཞེ་ན། གང་གི་ ཕྱིར་ དེ་ལྟར་ ཡིན་ན།

कस्यात्मनस्तत्र नष्टत्वादिह चान्यस्यैव चोत्पादनात्[1]पूर्वकस्यात्मन उच्छेदः स्यात् । तस्मिंश्चात्मन्युच्छिन्ने कर्मणामदत्त[2]फलानामेवाश्रयविच्छेदेन विच्छेदान्मोक्षश्चाभावा[Tib. 218b]न्नाश एव स्यात् । अथ पूर्वकेनात्मना कृतस्य कर्मण उत्तरेणात्मना फलपरिभोगः परिकल्प्यते । तथाप्यन्येन कृतस्य कर्मणः फलस्यान्येनोपभोगः स्यात् । ततश्च

अकृताभ्यागमभयं स्यात्कर्माकृतकं यदि[3] ।

इत्येवमाद्यनिष्टमापद्यते ॥

अपि च । यद्ययमात्मा पूर्वकादात्मनोऽन्य एवात्रो[4]पपन्नः स्यात्तदा पूर्वमभूत्वा पश्चादुत्पन्न इति स्यात् । न चैतद्युक्तमिति प्रतिपादयन्नाह ।

नाप्यभूत्वा समुद्भूतो दोषो ह्यत्र प्रसज्यते ।
कृतको वा भवेदात्मा संभूतो वाप्यहेतुकः ॥ इति[5] । १२

ཆད་ དང་ ལས་རྣམས་ ཆུད་ཟ་ དང་། །གཞན་གྱིས་ བྱས་པའི་ ལས་རྣམས་ནི།
།གཞན་གྱིས་ སོ་སོར་མྱོང་བ་ དང་། དེ་ལ་ སོགས་པར་ ཐལ་བར་ འགྱུར། ༡༡
གལ་ཏེ་ བདག་ འདི་ སྔར་གྱི་ བདག་ མེད་པར་ འབྱུང་བར་ འགྱུར་ན་ནི། དེའི་
ཚེ་ ' ' ' = *yadi [punaḥ] pūrvakam ātmānaṃ pratyākhyāya ayam iha bhavet ko doṣaḥ syāt? tatra doṣā bahavaḥ syuḥ. katham iti cet? yasmād evaṃ sati:*

ucchedaḥ karmaṇāṃ nāças tathānyena kṛtakarmaṇām /
anyena paribhogaḥ syād evamādi prasajyate // 11

yadi pūrvakam ātmānaṃ pratyākhyāya ayam ātmā bhavet, tadā pūrvakasyātmanas tatra naṣṭatvāt......

1) སྐྱེས་པའི་ཕྱིར = *utpādāt* (?).

2) ལས་ཀྱི་འབྲས་བུ་ མཇུག་ཐོགས་པ་རྣམས་.

3) = XVII. 23 (p. 325).

4) Mss. *evātmātropapannaḥ.* — སྐྱེས་པ་ *utpanna.*

5) མ་ བྱུང་བ་ལས་ བྱུང་བ་ མིན། །འདི་ལ་ སྐྱོན་དུ་ ཐལ་བར་ འགྱུར། །བདག་ནི་ བྱས་པར་ འགྱུར་བ་ དང་། །འབྱུང་བའམ་ རྒྱུ་མེད་ཅན་དུ་ འགྱུར། — Cité ci-dessus XVIII. 1.

यदि ह्यात्मा पूर्वमभूत्वा पश्चादुत्पन्नः स्यात्तदा कृतक एवात्मा स्यान्न च कृतक आत्मेष्यते ' अनित्यत्वप्रसङ्गात् ' व्यतिरिक्तस्य च तन्निष्पादकस्य कर्तुरभावात्कुतः कृतकत्वमात्मनो योक्ष्येत । कृतके चात्मनि परिकल्प्यमान आदिमान् संसारः स्यादेव[ा]पूर्वसत्त्वस्य प्रादुर्भावश्च । न चैतदेवं । तस्मान्न कृतक आत्मा ॥ अपि च [184 b] संभूतो वाप्यहेतुकः । अभूत्वा प्रागात्मा समुत्पद्यमानो निर्हेतुक एवोपपद्यते । पूर्वं ह्यात्मा नास्तीति ' अकृतको निर्हेतुकः स्यात् ॥ वाशब्दो विकल्पे ' कृतको वा भवेदात्मा यदि वा नाभूवमतीतमध्वानमित्येतन्नाभ्युपेयं ' संभूतो वाप्यहेतुको यदि वा

नाभूमतीतमध्वानमित्येतन्नोपपद्यत

इत्युपगम्यतां [Tib. 219 a] ॥ इदानीं यथोपवर्णितमेवार्थं निगमयन्नाह ।

एवं दृष्टिरतीते या नाभूमहमभूमहं ।
उभयं नोभयं चेति नैषा समुपपद्यते ॥[2] १३

एवं यथोपवर्णितेन न्यायेनाभूमतीतमध्वानमिति या दृष्टिर्नाभूमतीतमध्वानमिति च या दृष्टिरेषापि नैवोपपद्यते । एतद्द्वयस्याभावाच्चोभयमपि नोपपद्यते । किं कारणं । यस्माद्द्वयं ह्येतत्समाहृतमुभयमिति कल्प्यते[3] । एकैकस्य च पृथक् पृथगभावात्कुतस्तत्समाहार इत्युभयमपि न संभवति । उभयस्याभावात्कुतस्तत्प्रतिषेधे[न][1] नोभयं भविष्यतीति । तस्मान्नैवाभूवं न नाभूवमित्येतदपि नोपपद्यते ॥

---

1) འང་གི་ སྒྲ་ ནི་.

2) དེ་ལྟར་ བདག་ བྱུང་ བདག་ མ་བྱུང་། །གཉི་ག་ གཉི་ག་ མ་ཡིན་པར། །འདས་ལ་ ལྟ་བ་ གང་ ཡིན་པ། །དེ་ ནི་ འཐད་པ་ མ་ ཡིན་ནོ།

3) Ceci donne un demi-çloka à peu près correct, mais la traduction tibétaine n'est pas métrique. — དེ་གཉིས་ འདུས་པ་ལ་ གཉི་ག་ ཞེས་ བྱ་བར་ བརྟག་ པར་ བྱའོ། «Par *ubhaya* on entend les deux termes ensemble».

4) བཀག་པའི་ སྒྲ་ནས་.

तदेवं पूर्वान्तं समाश्रितस्य दृष्टिचतुष्टयस्यासंभवमुद्भाव्येदानीमपरान्तसमाश्रितस्य प्रतिषेधमाह ।

अध्वन्यनागते किं नु भविष्यामीति दर्शनं ।
न भविष्यामि चेत्येतदतीतेनाध्वना समं ॥ (1) १४

यथैव ह्यतीतेऽध्वनि दृष्टिचतुष्टयं निषिद्धं ' एवमनागतेऽप्यध्वनि दृष्टिचतुष्टयं निषेधनीयमुक्तपाठपरिवर्तनेन । तद्यथा '

अध्वन्यनागते किं नु भविष्यामीत्यसंगतं ।(2)
एष्य(3)जन्मनि यो भावी स एव न भवत्ययं ॥

इत्येवमादिना सर्वं समं योज्यमेकत्वप्रतिषेधे । एवमन्यत्वप्रतिषेधेऽपि समं योज्यं ।

न स्यामनागतकाल इत्येतन्नोपपद्यते ।
एष्यजन्मनि यो भावी ततोऽन्यो न भवत्ययं ।

इत्येवमादिना पूर्वश्लोक[185a]पाठपरिवर्तनेन ॥ (4) [Tib. 210b]

इदानीं पूर्वान्तं समाश्रितस्य शाश्वतादिदृष्टिचतुष्टयस्य प्रतिषेधार्थमाह ।

---

1) མ་འོངས་དུས་ གཞན་ འབྱུང་ འགྱུར་ དང་། །འབྱུང་བར་ མི་ འགྱུར་ ཞེས་ བྱ་བར། །ལྟ་བ་ གང་ ཡིན་ དེ་དག་ ནི། །འདས་པའི་ དུས་ དང་ མཚུངས་པ་ ཡིན། — Même version, Mdo XVII. — Pour གཞན voir 573. 8 et note.

2) མ་འོངས་ དུས་ན་ འབྱུང་ འགྱུར་ ཞེས། །བྱ་བ་ དེ་ ནི་ མི་ འཐད་དོ།

3) མ་འོངས་ ཚེ་ལ་ གང་ འབྱུང་བ། — *aiṣya*, manque dans M. W., = *eṣya* dans Bö.

4) སྔ་མའི་ འདོན་པ་ བསྒྱུར་ཏེ། Ci-dessus, p. 582 l. 6, འདོན་པ་ གོ་ བསྒྱུར་བས.

स देवः [स] मनुष्यश्चेदेवं भवति शाश्वतं ।
अनुत्पन्नश्च देवः स्याज्जायते न हि शाश्वतं ॥[1] १५

इह हि कश्चिन्मनुष्यगतिस्थः कुशलं कर्म कृत्वा देवगतिं गच्छति । तत्र यदि स एव देवः स एव मनुष्य इति ' एवमुभयोरैक्यं स्यात् ' तदा शाश्वतं स्यात् । न चैतदेवं यद्देव एव मनुष्यो भवेदिति । अतो नास्ति किं चिच्छाश्वतं ॥ अपि च ' शाश्वतवादे सत्ययमुत्पन्नश्च देवः स्यात् ' किं कारणं ' यस्माज्जायते न हि शाश्वतं । यद्धि वस्तु शाश्वतं तद्विद्यमानत्वान्नैव जायते । ततश्चानुत्पन्नो देवः स्यात् ' अनुत्पन्नो[2] देवो न युज्यत इति ' एवं तावच्छाश्वतं न युज्यते ॥

इदानीमशाश्वतमपि यथा न संभवति तथा प्रतिपादयन्नाह ।

देवादन्यो मनुष्यश्चेदशाश्वतमतो भवेत् ।
देवादन्यो मनुष्यश्चेत्संततिर्नोपपद्यते ॥[3] १६

[4] यदि ह्यन्यो देवोऽन्यश्च मनुष्यः स्यात्तदा पूर्वकस्य मनुष्यात्मनस्तत्र नष्टत्वादिह

---

1) གལ་ཏེ་ལྷ་དེ་མི་དེ་ན། །དེ་ལྟ་ན་ནི་རྟག་པར་འགྱུར། །ལྷ་ནི་མ་སྐྱེས་ཉིད་འགྱུར་ཏེ། །རྟག་ལ་སྐྱེ་བ་མེད་ཕྱིར་རོ།

2) དེའི་ཕྱིར་ལྷ་ནི་མ་སྐྱེས་པ་ཉིད་དུ་འགྱུར་ན། ལྷ་མ་སྐྱེས་པར་ནི་རིགས་པ་མ་ཡིན་ནོ།

3) གལ་ཏེ་ལྷ་ལས་མི་གཞན་ན། །དེ་ལྟ་ན་ནི་མི་རྟག་འགྱུར། །གལ་ཏེ་ལྷ་མི་གཞན་ཡིན་ན། །རྒྱུད་ནི་འཐད་པར་མི་འགྱུར་རོ། — **Même version Mdo XVII.**

4) **Le tibétain omet ce paragraphe.**

चान्यस्यैवोत्पादात् ' स पूर्वको मनुष्यात्मा तत्र विनष्ट इत्यशाश्वतं स्यात् ॥ तत्संतानानुवृत्त्या नाशाश्वतमिति चेदुच्यते ।

देवादन्यो मनुष्यश्चेत्संततिर्नोपपद्यते ।

यदि देवादन्यो मनुष्यो भवेत् ' तदा यथा निम्बस्य नाम्रतरुसंतानो[2] भवत्येवं मनुष्यस्य[3] देव एकसंतानपतितो न स्यात् ' ततश्च पूर्वकस्य विनाशादशाश्वतमेव भवेत ॥ अथ वा यदि देवादन्यो मनुष्यो भवेत्तदा संतानानुवृत्तिर्न स्यादस्ति चेयं संतानानुवृत्तिर्देवस्य[1] मनुष्य एकसंतानपतित इति । तस्मात्संताना[185 b]भावप्रसङ्गाद्देवादन्यो मनुष्यो न भवति । यतश्चैवमतोऽशाश्वतमपि नास्ति ॥

इदानीं शाश्वताशाश्वतप्रतिषेधार्थम[Tib. 220 a]ाह '

दिव्यो यद्येकदेशः स्यादेकदेशश्च मानुषः ।
अशाश्वतं शाश्वतं च भवेत्तच्च न युज्यते ॥ १७

यद्ययं मनुष्योंऽशेन मनुष्यतां विजह्यादंशेन विहाय मनुष्यतां देवात्मभावमुपादद्यात् ' तदा एकदेशस्य नाशा[दशा]श्वतं स्यादेकदेशस्य चाऽवस्थानाच्छाश्वतं स्यात् । एतच्चायुक्तं यद्येकस्य दिव्यगतिसंगृहीत एकदेशः स्यादेकदेशश्च मनुष्यः स्यात् ' तस्माच्छाश्वतं चाशाश्वतं च एतदुभयं नोपपद्यते ॥

इदानीं नशाश्वतनैवाशाश्वतदृष्टिप्रतिषेधार्थमाह ।

---

1) དེའི་ ཚེ་ ཨ་མྲའི་ ཤིང་ ནི་ པ་མའི་ རྒྱུད་ མ་ཡིན་པ་ དེ་བཞིན་དུ་ ' ' ' = De même que l'arbre d'āmra n'est pas *série* du nimba (*pa-ma*?).

2) ལྷ་ ཡང་ མིའི་ རྒྱུད་ གཅིག་ཏུ་ གཏོགས་པར་ མི་ འགྱུར་རོ།

3) ལྷ་ ནི་ མི་ དང་ རྒྱུད་ གཅིག་ཏུ་ གཏོགས་པ་ ཡིན་ནོ། = le dieu fait partie d'une même série avec (དང་) l'homme.

4) གལ་ཏེ་ ཕྱོགས་ གཅིག་ ལྷ་ཡིན་ལ། ཕྱོགས་ གཅིག་ མི་ ནི་ ཡིན་གྱུར་ན། །རྟག་ དང་ མི་རྟག་ འགྱུར་བ་ཡིན། །དེ་ ཡང་ རིགས་པ་ མ་ ཡིན་ནོ།

अशाश्वतं शाश्वतं च प्रसिद्धमुभयं यदि ।
सिद्धे न शाश्वतं कामं नैवाशाश्वतमित्यपि ॥ १८

यदि शाश्वतं किं चिद्वस्तु स्यात्तदा पश्चादशाश्वतदर्शनान्नैव[2] शाश्वतमिति[3] स्यात् । एवं यदि किं चिदशाश्वतं स्यात्तदा तस्य पश्चाच्छाश्वतोपपत्तितो[4] नाशाश्वतमिति स्यात् । यदा तु शाश्वताशाश्वतमेवाप्रसिद्धं तदा कुतस्तत्प्रतिषेधेन नैव शाश्वतं नाशाश्वतं स्यादिति । तस्मादेतदप्ययुक्तं ॥

अथ स्यादनादिजन्ममरणपरंपराप्रवृत्तमविच्छिन्नक्रमं संसारप्रबन्धमुपलभ्य शाश्वतमात्मानं परिकल्पयामः । अस्त्यसौ शाश्वतः कश्चित्पदार्थो यो हि नामैवमनादिमति संसारे परिभ्रमन्नद्याप्युपलभ्यत इति ॥ उच्यते । एतदपि नोपपद्यते । किं कारणं । [एवं][5]

कुतश्चिदागतः कश्चित्किं चिद्गच्छेत्पुनः [Tib. 220b] क्व चित् ।
यदि तस्मादनादिस्तु संसारः स्यान्न चा[186a]स्ति सः[6] ॥ १९

---

1) གལ་ཏེ་ རྟག་ དང་ མི་རྟག་པ། །གཉིས་ག་ གྲུབ་པར་ འགྱུར་ན་ ནི། །རྟག་པ་ མ་ ཡིན་ མི་རྟག་ མིན། །གྲུབ་པར་ འགྱུར་བར་ འདོད་ལ་ རག།

2) མཐོང་བ་ལས

3) རྟག་པ་ མ་ཡིན་པ་ ཞེས་པར་ འགྱུར་ལ

4) Mss. *çāçvatopattitānāsādaçāçvatam iti syāt.* — རྟག་པར་ འགྱུར་བ་ལས་ མི་ རྟག་པ་ མ་ ཡིན་པར་ འགྱུར་བ་ ཞེ་ག་ན།

5) Le tibétain porte འདི་ལྟར་ = *evam.* — Les Mss. ont *yo hi nāma.*

6) Mdo XVII. གལ་ཏེ་ གང་ཞིག་ གང་ནས་ གང་། །འོངས་ ཤིང་ གང་དུ་འདང་ འགྲོ་ འགྱུར་ན། །དེ་ཕྱིར་ འཁོར་བ་ ཐོག་ མེད་པར། །འགྱུར་ན་ དེ་ནི་ ཡོད་ མ་ཡིན། — Notre xyl. porte གང་ནས་ གར་ = *kaç cit kutaç cit kva cid gacchet...* — *kaç cit*, c'est-à-dire *ātman*; *kiṃ cit*, quelque chose, les *saṃskāras.*

यदि हि संस्काराणामात्मनो वा कुतश्चिद्गत्यन्तराद्[1]गमनं गत्यन्तरमागमनं स्यात् ' ततश्च गत्यन्तरात्पुनः क्व चिद्गमनं स्यात् ' तदानीमनादिः संसारः स्यात् । न च कुतश्चि-त्[2]कस्य चिदागमनं संभवति नित्यस्य वानित्यस्य वागमनानुपपत्तेः । न चापीतः पुनः क-स्य चित्[3]क्व चिद्गमनं संभवति नित्यस्य वानित्यस्य वा गमनानुपपत्तेः । यदा चैवं न संभव-ति ' तदा कुतो जन्ममरणपरंपराया अतिदीर्घत्वेनाप्यनुपलम्भादनादिमान् संसारः स्यात् । संसर्तुरभावात्कुतोऽनादिमत्त्वमादिमत्त्वं वा संसारस्य संभवेत् । यदा च न संभवति तदा यदु-क्तमस्त्ययमौ शाश्वतः कश्चित्पदार्थो यो हि नामैवमनादिमति संसारे परिभ्रमन्नप्युपल-भ्यत इति तन्न युक्तं ॥

अतश्चैवं यथोदितन्यायेन ।

नास्ति चेच्छाश्वतः कश्चित्को भविष्यत्यशाश्वतः ।
शाश्वतो ऽशाश्वतश्चापि द्वाभ्यामाभ्यां तिरस्कृतः[4] ॥ २०

यदा चैवं शाश्वत एव पदार्थो न संभवति ' तदा कस्य वि[5]गमना[द]शाश्वतः स्यात् ।

---

1) འགྲོ་བ་ གཞན་ གང་ནས་ གར་ འགྲོ་སྟེ་ འགྲོ་བ་ གཞན་དུ་ འོང་བར་ འགྱུར་ཞིང་།

2) གང་ཞིག་ གང་ནས་ གར་ འོང་བ་ ནི་ *kasya cit kutaç cit kva cid aga-manam.*

3) *kva cit* གང་ཞིག་ཏུ.

4) གལ་ཏེ་ རྟག་པ་ འགའ་ མེད་ན། །མི་རྟག་ གང་ཞིག་ ཡོད་པར་ འགྱུར། །རྟག་པ་ དང་ ནི་ མི་ རྟག་ དང་། །དེ་གཉིས་ གསལ་བར་ འགྱུར་བའི།

5) ཞིག་པས.

शाश्वताशाश्वतानुपलम्भाच्च [कुत(1) उभयं] कुतो नोभयमिति तस्मादेवं शाश्वतादिदृष्टिचतुष्टयं पूर्वान्ते संसारस्य न संभवति ॥

इदानीमन्तानन्तादिचतुष्टयमपरान्ते यथा न संभवति तथा प्रतिपादयन्नाह ।

अन्तवान् [Tib. 221 a] यदि लोकः स्यात्परलोकः कथं भवेत् ।
[अथाप्यनन्तवाँल्लोकः परलोकः कथं भवेत्(2) ॥] २१

यदि ह्यन्तवान् विनाशादूर्ध्वं पूर्व(3)लोको न(4) स्यात् ' तदा परलोको न स्यात् ' अस्ति च परलोक इति [अन्तवाँल्लोक इति] नोपपद्यते ॥

अथाप्यनन्तवाँल्लोकः स्यात् ' तदानीमपि परलोकः कथं भवेत् । नैव परलोकः स्यादित्यभिप्रायः । न च परलोको नास्ति । अतः परलोकसद्भा[186 b]वादनन्तवानपि लोको न भवति ॥

इदानीमन्तवत्त्वमनन्तवत्त्वं चोभयमेतल्लोकस्य यथा न संभवति तथा प्रतिपादयन्नाह ।

स्कन्धानामेष संतानो यस्माद्दीपार्चिषामिव ।
[प्रवर्तते] तस्मान्ना[न्ता]नन्तवत्त्वं च युज्यते(5) ॥ २२

---

1) གཉིས་ཀ་ དང་ གཉིས་ཀ་ མ་ཡིན་པ་ དེ་ཡང་ ག་ལ་ཡོད།

2) གལ་ཏེ་ འཇིག་རྟེན་ མཐའ་ ཡོད་ན། །འཇིག་རྟེན་ ཕ་རོལ་ ཇི་ལྟར་ འགྱུར། །གལ་ཏེ་ འཇིག་རྟེན་ མཐའ་ མེད་ན། །འཇིག་རྟེན་ ཕ་རོལ་ ཇི་ལྟར་འགྱུར།

3) *pūrva* manque dans le tibétain. — *vinaçād ūrdhvam* = ཞིག་ནས་ ཕྱིས་

4) མེད་པར་ འགྱུར་ན.

5) གང་ཕྱིར་ ཕུང་པོ་རྣམས་ཀྱི་ རྒྱུན། །འདི་ ནི་ མར་མེའི་ འོད་ དང་ མཚུངས། །དེ་ཡི་ཕྱིར་ མཐའ་ཡོད་ཉིད་ དང་། །མཐའ་མེད་ཉིད་ གང་ མི་ རིགས་སོ།

पूर्वोत्तरहेतुफलभावसंबन्धनैरन्तर्याविच्छिन्नक्रमवर्ती यस्मादयं प्रदीपवत्प्रतिक्षणविनाशी स्कन्धसंतानः प्रवर्तते ' तस्माद्धेतुफलप्रवृत्तिदर्शना[न्नान्तवत्त्वं] नानन्तवत्त्वं च युज्यते। कथं कृत्वा

पूर्वे यदि च भज्येरन्नुत्पद्येरन्न चाप्यमी।
स्कन्धाः स्कन्धान् प्रतीत्येमानथ लोकोऽन्तवान् भवेत्[1] ॥ २३

यदि पूर्वे मनुष्यस्कन्धा नश्येयुस्तांश्च प्रतीत्योत्तरे देवगत्युपपत्तिसंगृहीता नोपपद्येरंस्तदान्तवान् लोको भवेत्तै[2]लवर्तिक्षयनिरुद्धप्रदीपवत्। उत्तरात्मभावोत्पादा[3]न्नास्त्यन्तवत्त्वं।

पूर्वे [Tib. 221b] यदि न भज्येरन्नुत्पद्येरन्न चाप्यमी।
स्कन्धाः स्कन्धान् प्रतीत्येमान् लोकोऽनन्तो भवेदथ ॥ २४

अथ यदि पूर्वकाः स्कन्धा न नश्येयुः ' तान् प्रतीत्योत्तरे फलभूताः स्कन्धा नोत्प[5]द्येरन् ' तदानन्तोऽविनाशी लोकः स्यात् ' स्वरूपादप्रच्युतत्वात्। यदा तु पूर्वकाः स्कन्धा निरुध्यन्ते तद्धेतुकाश्चापरे स्कन्धा उत्तरकालं जायन्ते ' तदा पूर्वकाणाम[न]वस्थानात्कुतोऽनन्तवत्त्वं संसारस्य स्यात्॥ इदानीं तृतीयमुभयपक्षभावं प्रतिपादयन्नाह।

---

1) གལ་ཏེ་ སྔ་མ་ འཇིག་ འགྱུར་ཞིང་། །ཕུང་པོ་ འདི་ལ་ བརྟེན་བྱས་ནས། །ཕུང་པོ་ དེ་ནི་ མི་ འབྱུང་ན། །དེས་ན་ འཇིག་རྟེན་ མཐའ་ ཡོད་ འགྱུར།

2) ཏིལ་མར་ དང་ སྡོང་པོ་ ཟད་པས་ འགགས་པའི་ མར་མེ་ ལྟར

3) Mss. *uttarātmābhāvopādānte nāsty...* — ལུས་ ཕྱི་མ་ འབྱུང་བའི་ ཕྱིར — *ātmabhāva* = ལུས = *kāya.*

4) གལ་ཏེ་ སྔ་མ་ མི་ འཇིག་ཅིང་། །ཕུང་པོ་ འདི་ལ་ བརྟེན་བྱས་ནས། །ཕུང་པོ་ དེ་ནི་ མི་ འབྱུང་ན། །དེས་ ན་ འཇིག་རྟེན་ མཐའ་མེད་ འགྱུར།

5) Ms. *nopapadyeran* — མི་འབྱུང་ན.

अन्तवानेकदेशश्चेदेकदेशस्त्वनन्तवान् ।
स्यादन्तवाननन्तश्च लोकस्तच्च न युज्यते[1] ॥ २५

यदि हि कस्य चिदेकदेशस्य विनाशः स्यात्, एकदेशस्य च गत्यन्तरगमनं स्यात्, स्यात्तदानीमन्तवांश्च लोको ऽनन्तवांश्च । न चैत[187a]देवं संभवति यदेकदेशो नश्यत्येकदेशो न नश्यतीति । अतो ऽन्तवांश्चानन्तवांश्च लोक इति न युज्यते ॥ कस्मात्पुनरेकदेशस्य विनाश एकदेशस्य चावस्थानं न युज्यत इति प्रतिपादयन्नाह,

कथं तावदुपादातुरेकदेशो विनङ्क्ष्यते ।
न नङ्क्ष्यते चैकदेश एवं चैतन्न युज्यते[2] ॥ २६

इहैकदेशस्य विनाश [एकदेश]स्य चावस्थाने परिकल्प्यमाने, यदि वा उपादातुरेकदेशस्य विनाशो ऽवस्थानं[3] वा परिकल्प्येत, यदि वा उपादानस्य । तत्र यदि तावदुपादातुरेकदेशस्य विनाश एकदेशस्य चावस्थानं परिकल्प्यते, तन्न युज्यते [Tib. 222a], किं कारणं । यस्मात्,

कथं तावदुपादातुरेकदेशो विनङ्क्ष्यते ।
न नङ्क्ष्यत चैकदेशः ।

नैव ह्यत्र का चिदुपपत्तिरस्ति[1] यया एकदेशस्य विनाशमेकदेशस्य चाविनाशं परिकल्पयिष्यामः । अत एवोपपत्तिमपश्यन्नाचार्य आह, एवं चैतन्न युज्यते, इति ।

---

1) གལ་ཏེ་ཕྱོགས་གཅིག་མཐའ་ཡོད་ལ། །ཕྱོགས་གཅིག་མཐའ་ནི་མེད་གྱུར་ན། །འཇིག་རྟེན་མཐའ་ཡོད་མཐའ་མེད་འགྱུར། །དེ་ཡང་རིགས་པ་མ་ཡིན་ནོ།

2) ཇི་ལྟ་བུར་ན་ཉེར་ལེན་པོ། །ཕྱོགས་གཅིག་རྣམ་པར་འཇིག་འགྱུར་ལ། །ཕྱོགས་གཅིག་རྣམ་པར་མ་འཇིག་འགྱུར། །དེ་ལྟར་དེ་ནི་མི་རིགས་སོ།

3) Le tibétain répète *ekadeçasya*, comme ci-dessous.

4) འཐད་པ་.

अथ वा ' उपादाता हि नामात्मा ' स च स्कन्धेषु पञ्चधा मृग्यमाणो न संभवति[1]। यश्च न संभवति[1] तस्य कथमेकदेशो विनङ्क्ष्यते एकदेशश्च [न] नङ्क्ष्यते। अत एवाह ' एवं चैतन्न युज्यत इति।

अथ वा यद्युपादातुरेकदेशो नश्येदेकदेशश्च न नश्येत् तदा एकस्यैवोपादातुर्देवत्वमंशेना[2]न्येन मनुष्यत्वं स्यान्न चैतदिष्यत इत्याह ' एवं चैतन्न युज्यते ' इति।

एवं तावदुपादातुरन्तवत्त्वमनन्तवत्त्वं च न युक्तमिति ॥ इदानीमुपादानस्यापि यथा न संभवति तथा प्रतिपादयन्नाह।

उपादानैकदेशश्च कथं नाम विनङ्क्ष्यते।
न[Tib. 222b] नङ्क्ष्यते चैकदेशो नैतदप्युपपद्यते[3] ॥ २७

उपादातृवदेतदपि व्याख्येयं ॥ तदेव[187b]मुभयदर्शनासंभवं प्रतिपाद्येदानीं यथा नोभयमपि न संभवति तथा प्रतिपादयन्नाह।

अन्तवच्चाप्यनन्तं च प्रसिद्धमुभयं यदि।
सिद्धे नैवान्तवत्कामं [Tib. 222b] नैवानन्तवदित्यपि[4] ॥ २८

प्रतिषेध्यस्य वस्तुनोऽसंभवात्प्रतिषेधस्याप्यसंभव इति। अतोऽन्तवत्त्वे चानन्तवत्त्वे चोभयस्मिन्नप्रतीते[5] कस्य प्रतिषेधेन नैवान्तवान्नानन्तवाँल्लोक इति दृष्टिसंभवः स्यादिति ॥

---

1) ཡོད་པ་ མ་ ཡིན.

2) D'après le tibétain *ekenāmçena* .. *ekenamçena*

3) ཇི་ལྟ་བུར་ ན་ ཉེར་བླངས་པ། །ཕྱོགས་གཅིག་ རྣམ་པར་ འཇིག་ འགྱུར་ལ། ཕྱོགས་ གཅིག་ རྣམ་པར་ འཇིག་ མི་ འགྱུར། །དེ་ལྟར་ དེ་ཡང་ མི་རིགས་སོ།

4) གལ་ཏེ་ མཐའ་ ཡོད་ མཐའ་ མེད་པ། །གཉི་ག་ གྲུབ་པར་ གྱུར་ན་ ནི། མཐའ་ ཡོད་མ་ཡིན་ མཐའ་མེད་ མིན། །གྲུབ་པར་ འགྱུར་བར་ འདོད་ལ་ རག།

5) མ་ གྲུབ་པར.

एवं तावत्सांवृतं प्रतिबिम्बाकारमुपादातारमुपादानं चाभ्युपेत्यापि शाश्वतादिदृष्ट्यसंभवं प्रतिपाद्येदानीं सर्वथा भावस्वभावानुपलम्भेन वन्ध्यापुत्रश्यामगौरतादिवच्छाश्वतादिदृष्टीनामसंभवं प्रतिपिपादयिषुराह।

अथ वा सर्वभावानां शून्यत्वाच्छाश्वतादयः।
क्व कस्य कतमाः कस्मात्संभविष्यन्ति दृष्टयः[1] ॥ २९

इह सर्वभावानां प्रतीत्यसमुत्पन्नत्वाच्छून्यत्वं सकलेन शास्त्रेण प्रतिपादितं। ततश्च सर्वभावानां शून्यत्वात्कतमास्ताः सर्वभावबाह्याः शाश्वताद्या दृष्टयो भविष्यन्ति याः कश्चिद्रक्ष्यति यतस्तन्निराकरणमारप्स्यामहे। तथा किं[2] वालम्बनं यत्सर्वभावा[न्त]र्गतं यत्रैता दृष्टय उत्पत्स्यन्ते[3] यत्रैता [दृष्टीः] निवारयिष्यामः। कतमश्चासौ भावः पुद्गलो वा सर्वभावबाह्यो यस्यैता दृष्टय उत्पत्स्यन्ते यं दृष्टिभ्यो निवारयिष्यामः। [Tib. 223 a] किं वा दृष्टीनामुत्पत्तिकारणमालम्बननिमित्तं सर्वभावबाह्यं यस्मान्निमित्तादुत्पद्यमानाः शाश्वतादिकाः दृष्टीर्वारयिष्यामः। सर्वेषामेव हि पदार्थानां सर्वभावान्तर्गतत्वाच्छून्यत्वं। शून्यत्वाच्च सर्व एव हि ते पदार्था नोपलभ्यन्त इति [188 a]

क्व कस्य कतमाः कस्मात्संभविष्यन्ति दृष्टयः।

नैव काश्चिन्नैव क्व चिन्नैव कस्य चिन्नापि केन[4] चिदाकारेण संभविष्यन्तीत्यभिप्रायः। असंभवे च सत्यासां परिकल्पनैव नोत्पद्यत इत्ययुक्ता एवैता दृष्टयः॥

---

1) ཡང་ན་ དངོས་པོ་ ཐམས་ཅད་དག །སྟོང་ ཕྱིར་ རྟག་ལ་ སོགས་ ལྟ་བ། །གང་དག་ གང་དུ་ གང་ལ་ ནི། །ཅི་ལས་ ཀུན་དུ་ འབྱུང་བར་ འགྱུར། — Notre xyl. porte གང་ལས་. — Mss. *kat' m vā sarvabhāvānām.*

2) D'après le tibétain: *kim vā çāçvatādy ālambanam.*

3) Mss. *yatraivā.*

4) D'après le tibétain, plus correctement, *kena cit kāranena* རྒྱུ་ གང་ ལས་ ཀྱང་.

[1] तदेवं

सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत् ।
अनुकम्पामपादाय तं नमस्यामि गौतमं [2] ॥ ३०

तत्र संसारनिर्वाणप्रहाणाधिगमोपलम्भ[3]प्रपातपतनसंधारणाद्धर्मः। [4]सतामार्याणां कृत-[5]कार्याणां धर्मः सद्धर्मः। [6]यदि वा [7]शोभनो धर्मः सद्धर्मः [6]सकलसंसारदुःखक्षपकत्वेन प्रशंसनीयत्वात्। [यः] सद्धर्मं

अनिरोधमनुत्पादमनुच्छेदमशाश्वतं ।
अनेकार्थमनानार्थमनागममनिर्गमं ।
प्रपञ्चोपशमं शिवं [8]

प्रतीत्यसमुत्पादसंज्ञया हि देशितवान् सर्वदृष्टिप्रहाणार्थं जगतामनुकम्पामुपादाय महाकरुणामेवाश्रित्य [9] प्रियैकपुत्राधिकतरप्रेमपात्रसकलत्रिभुवनजनो [9] न लाभसत्कारप्र-

---

1) Le tibétain place ici la citation du Sūtra qui suit p. 593. 8. Puis il reprend: *tad evam*: *sarvadṛṣṭīnām*..... — Cette disposition est plus heureuse.

2) གང་གིས་ ཐུགས་བརྩེ་ ཉེར་བཟུང་ནས། །ལྟ་བ་ ཐམས་ཅད་ སྤང་བའི་ཕྱིར། །དམ་པའི་ ཆོས་ ནི་ བསྟན་མཛད་པ། །གོ་ཏམ་ དེ་ལ་ ཕྱག་འཚལ་ལོ། — Dans Mdo XVII གོ་ཏ་མ་དེ་ ཕྱག་.

3) དམིགས་པའི་ གཡང་ས་ལས་ འཛིན་པས་. — Le sens est sûrement °*upalambhāt prapāta* ..... *saṃdhāraṇāt*. — Les étymologies du mot *dharma*, ci-dessus 457, n. 1.

4) དམ་པ.

5) Manque dans le tibétain.

6—6) D'après le tibétain suit *sakala* ..... *praçaṃsanīyatvāt* qui se rapporterait à la première explication *satāṃ dharmaḥ*.

7) བཟང་པོ.

8) Voir ci-dessus p. 3. 8.

9) Manque dans le tibétain.

[1]त्युपकारादिलिप्सया । तं नमस्यामि निरुत्तरमद्वितीयं शास्तारं । किंनामधेयं गौतमं [2]परमर्षिगोत्रसंभूतमित्यर्थः ॥

यथोक्तमार्य[3]शालिस्तम्भसूत्र आर्यमैत्रेयेण महाबोधिसत्त्वेन । [4]यं इमं प्रतीत्यसमुत्पादमेवं यथाभूतं सम्यक्[5]प्रज्ञया सततसमितमजीवं [6]निर्जीवं [7]यथावदविपरीतमजातमभूतम[म]कृतमसंस्कृतमप्रतिघमनावरणं शिवम[8]भयमना[9]हार्यमव्ययमव्युपशमस्वभावं पश्यति । असतस्तुच्छत रिक्ततो ऽसारतो रोगतो गण्डतः शल्यतो ऽघतो ऽनित्यतो दुःखतः शून्यतो [10]ऽनात्मतः । न स पूर्वान्तं प्रतिसरति । किं न्वहमभूवमतीते ऽध्वनि आहोस्विन्नाभूवमतीतेऽध्वनि [188 b] । को न्वहमभूवमतीतेऽध्वनि । [11]कथं न्वहमभूवमतीते ऽध्वनि । अपरान्तं वा पुनर्न प्रतिसरति । किं न्वहं भविष्याम्यनागते ऽध्वनि आहोस्विन्न भविष्याम्यनागते ऽध्वनि । को [Tib. 223 b] नु भविष्याम्यनागते ऽध्वनि । कथं नु भविष्याम्यनागते ऽध्वनि । प्रत्युत्पन्नं वा पुनर्न प्रतिसरति । किं न्विदं कथं न्विदं के सन्तः के भविष्यामः ।

---

1) ལན་དུ་ཕན་འདོགས་པ.

2) དྲང་སྲོང་གི་ཏ་མའི་རིགས་སུ་ = *gotamarṣigotra°*.

3) Le tibétain porte simplement: *yathoktaṁ sūtre.* — Le texte qu'on va lire termine le Çālistambasūtra; comme le reste de ce sūtra, il est fait avec de vieux matériaux. Comparer Çikṣās. 227. 3; Abhidh. k. v. 226a; Saṃyutta, II, 26.

4) གང་ལ་ལ་ཞིག་གིས = *yaḥ kaç çit.*

5) ཡང་དག་པའི་ ཤེས་རབ་ཀྱིས་.

6) Manque dans le tibétain.

7) ཇི་ལྟ་བ་ ཉིད་ དང་.

8) འཇིག་པ་ pour འཇིགས་.

9) Mss. *anohārya* = མི་འཕྲོགས = *ahārya.*

10) D'après le tibétain *samyag anupaçyati.*

11) ཇི་ལྟ་བུར.

(1) अयं सत्त्वः कुत आगतः। स इतश्च्युतः कुत्र गमिष्यतीति॥ यान्येकेषां (2) श्रमणब्राह्मणानां (2) पृथग्लोके दृष्टिगतानि (3) भविष्यन्ति (4)। तद्यथा आत्मवादप्रतिसंयुक्तानि जीववादप्रतिसंयुक्तानि (5) (6) कौतुकमङ्गलप्रतिसंयुक्तानि (7)। तान्यस्य तस्मिन् समये प्रहीणानि भवन्ति परिज्ञातानि समुच्छिन्नमूलानि तालमस्तकवदनाभावगता[नि] (8) आयत्यामनुत्पादानिरोधधर्माणि॥ अथ खल्वायुष्मान् शारिपुत्रो मैत्रेयस्य बोधिसत्त्वस्य महासत्त्वस्य भाषितमभिनन्द्य[ानुप्र] (9)-मोद्योत्थायासनात् [प्रक्रान्तः] प्रक्रान्तास्ते च भिक्षव इति॥

। इत्याचार्यचन्द्रकीर्तिपादोपरचितायां प्रसन्नपदायां मध्यमकवृत्तौ दृष्टिपरीक्षा नाम सप्तविंशतितमं प्रकरणं समाप्तं ।

॥ समाप्तं चेदं मध्यमकशास्त्रं सकललौकिकलोकोत्तरप्रवचननीतनेयार्थव्याख्याननैपुण्यविशारदं श्रावकप्रत्येकबुद्धानुत्तरसम्यक्संबुद्धबोधिमण्डासनदायकमिति॥

---

1) འདི་ ཅི་ཞིག །འདི་ཇི་ལྟ་བུ་ཞིག །ཅི་ཞིག་ ཅིར་འགྱུར། སེམས་ཅན་ འདི་དག་ གང་ནས་ འོངས། དེ་ འདི་ནས་. — Remarquer l'emploi de དག.

2) *ekeṣām* et *pṛthag*, non représentés dans le tibétain.

3) ལྟ་བར་སོང་བ.

4) ཡོད་པ་ = *bhavanti.*

5) Le tibétain ajoute *sattvavādapratisaṃyuktāni*, *pudgalavāda°*, et supprime *jīvavāda°*; il marque *vā* après chaque terme.

6) D'après le tibétain *kautukamaṅgalavāda°* — དགེ་མཚན་ དང་ བཀྲ་ཤིས་སུ་ སྨྲ་བ་. — Voir **Madhyamakāvatāra**, 36, 19.

7) Le tibétain ajoute ལྡག་པར་གཡོ་བ་ དང་ ཐལ་བར་གཡོ་བ་, c'est-à-dire, d'après les équivalences du **Daçabhūmaka** (cité **Madhyamakāvatāra**, 68. 14) *unmiñjita*, *nimiñjita*. Voir Muséon, 1907, p. 311, n. 2.

8) ཏ་ལའི་ མགོ་ བཞིན་ མི་སྐྱད་པའི་ རང་བཞིན་དུ།

9) Les Mss. ont ici deux syllabes peu lisibles *abhinandyo nto dyo.* — མངོན་པར་ བསྟོད་ཅིང་ རྗེས་སུ་ཡི་རང་སྟེ། Voir **Çarad Candra 1133b** *yid-raṅs-pa* 'delighted'.

BIBLIOTHECA BUDDHICA.

СОБРАНІЕ

БУДДІЙСКИХЪ ТЕКСТОВЪ

ИЗДАВАЕМЫХЪ

ИМПЕРАТОРСКОЙ АКАДЕМІЕЮ НАУКЪ.

ТОМЪ IV.

MŪLAMADHYAMAKAKĀRIKĀ

Издалъ

Луи де-ла-Валле-Пуссэнъ.

САНКТПЕТЕРБУРГЪ, 1913.

ТИПОГРАФІЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.

Вас. Остр., 9 лин., № 12.

Цѣна: 7 Руб. = 17 Mrk. 50 Pf.

BIBLIOTHECA BUDDHICA. IV.

मध्यमकवृत्तिः

MŪLAMADHYAMAKAKĀRIKĀS

(MĀDHYAMIKASŪTRAS)

DE

NĀGĀRJUNA

avec la PRASANNAPADĀ Commentaire de CANDRAKĪRTI.

PUBLIÉE PAR

Louis de la Vallée Poussin,

CORRESPONDANT DE L'ACADÉMIE ROYALE DE BELGIQUE, PROFESSEUR À L'UNIVERSITÉ DE GAND.

ST.-PÉTERSBOURG, 1913.

IMPRIMERIE DE L'ACADÉMIE IMPÉRIALE DES SCIENCES.

Vass.-Ostr., 9e ligne, № 12.

Цѣна: 7 Руб. = 17 Mrk. 50 Pf.

Imprimé par ordre de l'Académie Impériale des Sciences.
Mai, 1913. S. d'Oldenbourg, Secrétaire Perpétuel.

Imprimerie de l'Académie Impériale des Sciences.
Vass.-Ostr., 9 ligne, № 12.

Avant Propos.

Je compte publier un sommaire de la Madhyamakavṛtti, qui sera un exposé systématique du système de Nāgārjuna-Candrakīrti, et auquel je joindrai la traduction intégrale du premier chapitre, préparée il y a déjà dix ans avec l'assistance de MM. H. Jacobi et Th. de Stcherbatskoï (Ščerbatskoj).

On trouvera ici seulement les renseignements d'usage.

L'édition a été établie d'après les MSS. de Paris, de Cambridge et de Calcutta, copies médiocres d'un original qui ne paraît pas avoir été irréprochable. L'édition de Calcutta n'a rendu que de rares services, qui sont tous signalés à l'endroit.

Les folios du MS. de Paris sont indiqués.

L'Académie de Saint-Pétersbourg a mis à ma disposition les volumes du Tandjour rouge contenant le Mūlamādhyamaka, l'Akutobhaya commentaire de Nāgārjuna, la Madhyamakavṛtti: les folios sont marqués avec la mention *Tib.*; je n'ai pas hésité à considérer la version tibétaine comme plus digne de confiance que la traduction manuscrite: ma préoccupation a été surtout d'établir un texte lisible. Les stances en quasi-sanscrit sont généralement intelligibles et se superposent au tibétain.

L'étude du Madhyamakāvatāra et de quelques autres textes Mādhyamikas a permis d'identifier un certain nombre de citations ou de références.

A M. Auguste Barth

HOMMAGE DE RESPECTUEUSE AFFECTION.

Additions et Corrections.

Page 1, ligne 1. Lire *Madhyamakavṛtti* = Commentaire du *Madhyamaka* ou *Madhyamakaçāstra*. De même *Madhyamakāvatāra* = Introduction au *Madhyamaka* ou *Mūlamadhyamaka*, le traité du Milieu, ou de l'entre-deux, de Nāgārjuna.

» » » 2. Lire *prathamam*

» » » 4 Le tibétain traduit *ārāsa* = *gnas* = *vāsa*. — Saṃ. IV, 91 *ārāsagato Mārassa Mārassa vasamgato.*

» » note 4. Les *antas* sont les thèses contradictoires entre lesquelles est tracé le chemin du milieu, par exemple, identité et non-identité du *jīva* et du *çarīra*, du *vedita* et du *vedayitar*, ou encore *astitā* et *nāstitā*, *çāçvata* et *uccheda*, en général *samāropa* et *apavāda*. D'un certain point de vue, le chemin du milieu est constitué par la thèse de la production en raison des causes, car le fruit n'est ni le même ni autre que la cause. On dira mieux que le vrai milieu, c'est le vide (*çūnyatā*), la vraie vérité, c'est le silence: écarter le *çūnya* et l'*açūnya* (Ci-dessous 270. 7; 272, n. 5; 445; Aṣṭasāhasrikā, 15. 7; Bodhic. 346. 5; cf. Itiv. 49). — Une fois admise l'existence du moi (*satkāyadṛṣṭi*), l'existence d'un *svabhāva*, se pose la question du *çāçvata* et de l'*uccheda*; et aussi celle du passé et de l'avenir du moi et du monde (*antagrāhadṛṣṭi*, *antaggāhikā diṭṭhi*, Mvagga IV, 16, 12; JPTS. 1884. 70, Suttan. 582, 778; ci-dessous chap. XXVII, Madh. avatāra, 233). — Quant aux deux *antas* de la pratique, de la vie religieuse (*ātmaklamatha*, *kāmasukhallikā*, Nettip. 110, Bodhisattvabhūmi, Kern, Man. 23, etc), il n'en est pas question dans notre livre.

» » » 5. *dharmakoça* par ex. Aṣṭasāhasr. 464. 12.

» 2, » 3. Voir Aṅg. I[a], 122; Saṃ. II, 267.

» » » 6. Madh. avatara 1. 14–15.

» 3, lignes 8—10. Voir 11. 12, 592. 7.

» » note 2. Lire *hbrel-pa*. — Voir aussi Bhojarāja ad I, 1.

» » » 5. *nirgama* = *gamana*. — Aṣṭas. 512. 6: *na hi bhūtakoṭyā āgamanaṃ vā gamanaṃ vā*....

Page 4, ligne 1. M. Vyut. 144.13–14.

» » note 4. Voir Çikṣās. 358.12; Thibaut, Vedānta, II, 2, 22.

» 5, » 9. M. Vyut. 245.1148.

» 5, » 10. L'Abhidh. k. v. (Burn. 432) explique les quatre *ākāras* de la deuxième vérité (M. Vyut. 54): *hetutas* porte contre ceux qui nient la cause *(ahetudṛṣṭicarita)*; *samudayatas* contre ceux qui admettent une cause unique, *īçvara* ou *pradhāna (ekahetudṛṣṭicarita)*; *prabhavatas* contre ceux qui affirment la transformation *(pariṇamate bhāvaḥ = pariṇāmadṛṣṭicarita)*; *pratyayatas* contre ceux qui affirment un créateur *(nedaṃ īçvarabuddhikṛtaṃ jagat, kiṃ tarhi tat tat pratītya tat tad bhavatīti vīpsārtho hi pratiçabdaḥ; tasmād anekapratyayajanitaṃ jagad iti jñāpitaṃ bhavati).*

» 6, » 2. Mentionnons encore Aṣṭas. 94.11 *dharmakāyā buddhā bhagavantaḥ . mā khalu punar imaṃ bhikṣavaḥ satkāyaṃ kāyaṃ manyadhvam; dharmakāyapariniṣpattito māṃ bhikṣavo drakṣyanty eṣa ca tathāgatakāyo bhūtakoṭiprabhāvito draṣṭavyo yad uta prajñāpāramitā.* — Et 1.5: *ākāçam iva nirlepāṃ niḥprapañcāṃ nirakṣarām / yas tvāṃ (prajñāpāramitām) paçyati bhāvena sa paçyati tathāgatam.* — (Prajñāpāramitāstotra de Nagārjuna).–Milinda p. 71.9.– Voir la stance ci-dessous 448.12 et Add.

» » » 4. Voir 452. n. 3.

» » » 5. Voir Sumaṅgalavilāsinī, p. 183.

» » » 6. Bhāvaviveka est nommé ci-dessous, voir 351, n. 4

» » 8, 3. L'Abhidh. k. v. a *bhaviṣṇu* dans le même emploi.

» 9, ligne 5. Cette ligne est citée Madh. avatāra, 228.12.

» » note 3. Lire folio 28.

» » » 7. Voir encore Udāna, p. 2; M. Vagga I. 1.1–3; Majjh. I. 262, II. 32; Saṃ II. 65 etc.

» 10, ligne 7. Cette ligne est citée Madh. avatāra, 227.1.

» » note 6. On peut encore citer M. Vyut. 245.143; Çlokavart. p. 255; Sāṃkhyapravacanabh. I. 19 et 157, Bodhic. IX. 2, 38, Lotus V. 3 (Kern, I. 333); ci-dessous 68.7.

» 11, ligne 11. *bstan par bya bai sgo nas hdod pa dam pa yin pai phyir deçanākriyayepsitatamatvāt.* — On peut préférer *deçanākriyāyā ī°.*

» » note 4. Voir 65, n. 3; Dharmasaṃgraha, p. 41 (ad XXVIII) et 69.

» 12, » 6. Cité Madh. avatāra, 81.7.

» 13, ligne 1. *na jātu* = jamais, Çikṣās. 69.5; Mhv. I. 101.14; *kvacana, kecana*, M. Vyut. 225.75–76. — Comp. 526.6.

» » note 2. M. Vyut. 199.104.

» 14, ligne 1. *utpatti* = *svarūpalābha*, Nyāyabindu 50.2. — La Bhagavatī nie l'*utpāda* de l'*utpanna* et de l'*anutpanna*. — On lit le raisonnement de Buddhapālita dans Abhidh. k. v. fol. 232. *atha sann, atha labdhātmaka utpadyata iti kal-*

pyate, utpanna utpadyata ity aniṣṭam ... utpannasya punar utpattau kalpyamānāyām anavasthāprasaṅgaḥ. dvitīye tṛtīye kṣaṇa utpadyata ity aniṣṭaprasaṅgaḥ.

Page 14, note 6. Lire 21.8 (et non 18.3).

» 15, » 1. Voir 36.13.

» » » 2. Voir 38.12 — 39.1.

» » » 4. Lire 23.4 (et non 14.5).

» » » 9. Lire 18.7 et 21.13.

» 16, ligne 4. Cité Nāmasaṃgīti ad VI. 16, Madh. avatāra, 297.9.

» 17, note *c*. L'exemple *caitanya*, 26.1, 33.4.

» 20, ligne 2. Lire *atra hi tad ity*.

» 24, note 8. Correctement *ahetuka* ou *ahaituka*.

» 26, » 9. Lire *anuccheda*.

» » » 5. Lire XVIII. 10.

» 27, » 5. Lire *gagana*.

» 28, » 1, l. 4. Lire *vastu*; voir Madh. avatāra, 138.18.

» 31, » 1. Voir 432, n. 1.

» 34, » 1. Voir 172, n. 4.

» 35, ligne 9. Lire *svarthanumāne*.

» 36, titre Lire °*parīkṣā*.

» 37, note 6. Effacer la note! Le tibétain traduit fort bien *yat kiṃ cit* par un mot qui signifie «sans valeur». Voir p. 397, n. 2.

» 38, » 5. Lire Madh. avatāra, VI, 100 (= 207.7).

» 39, » 7. C'est la célèbre stance du parinirvāṇa: Dīgha, II, 157; Dialogues, II, 176, etc.

» 40, » 1. Daçabhūmaka, VIII, initio: *api tu khalu punaḥ kulaputraiṣā dharmāṇāṃ dharmatā utpādād vā tathāgatānām anutpādad vā sthitaivaiṣā dharmatā dharmadhātusthitiḥ, yad idaṃ sarvadharmaçūnyatā sarvadharmānupalabdhiḥ. etayā tathāgatā eva ....*

» 41, » 1. Voir 44.2, 276.2. — Les Vijñānavādins ne sont pas d'accord avec les Madhyamikas sur la distribution des Sūtras dans les deux catégories; voir Madh. avatara VI, 9* (p. 199 et suiv.).

nītārtha = *vibhaktārtha* (Abhidh. k. v. 230b), «de sens clair»; tandis que *neyārthasya sūtrasya nānāmukhaprakṛtārthavibhāgo 'niçcitaḥ saṃdehakaro bhavati*. Aussi le sūtra *nītārtha* est-il *pratisaraṇa*, et non pas le *neyārtha* (Bodhisattvabhūmi, I, XVII, ci-dessous Add. 43.5).

La distinction est clairement marquée Dīpavaṃsa, p. 36 (JPTS. 1889.3) *neyyattha* = *saṃdhāya bhaṇita* (cf. *sandhābhāṣya*, Kern, Lotus = discours intentionnel). — Il faut rapprocher la distinction Saṃ. II, 267 des *suttantā tathāgatabhāsitā gambhīratthā . . suññatāpaṭisaṃyuttā* et des *suttantā ... bāhirakā*.

Page 41, note 2. Voir ci-dessous 237.11; Bodhic. 363.1; Madh. avatāra, 119.17.

» » » 5. Voir aussi Saṃ. IV, 205.

» » » 8. Voir 549.2 et Madh. avatāra 165.9.

» » » 10. Voir 549, n. 1.

» 42, lignes 1—2. Comp. Saṃ. III, 143,8—9; l. 3. Comp. Udānavarga, IV, 29.

» » note 1. Voir encore M. Vagga V. 1.21 *paṭivedharahitā śaddhā*; Sūtrālaṃkāra VIII. 1. — On a aussi *prativedhanā* (Abhidh. k. v.).

» 43, » 5. Les quatre *pratisaraṇas* sont 1) le sens *(artha)*, et non pas la lettre *(vyañjana)*; 2) la vérité en soi *(dharma)*, et non l'autorité d'une personne quelconque *(pudgala)*, voir 268, n. 1; 3) l'intuition *(jñāna)*, et non la connaissance *(vijñāna*, Saḍdaɪçana, p. 26) qui comporte toujours *vikalpa*, pensée, discursion, et parconséquent ne peut conduire au nirvāna: *hetunā sadṛçaṃ sarvaṃ phalaṃ sarvatra vidyate / na hi kodravabījebhyaḥ çālyaṅkurasamudbhavaḥ // vikalpabījasaṃbhūtaṃ savikalpaṃ phalam bhavet / nirvikalpakasaṃbhūtaṃ nirvikalpaṃ phalaṃ bhavet //* (Madh. avatāra et Namasamgīti, 46); 4) les sūtras de sens explicite *(nītārtha)* et non ceux de sens à définir *(neyārtha)*.

Les données de la littérature pâlie sont peu nombreuses; on a, par exemple, M. Vagga I. 13.4 *atthen'eva me attho, kiṃ kāhasi vyañjanaṃ bahun ti*; Majjhima II. 240. *appamattakam kho pan etaṃ yad idaṃ byañjanam; mā āyasmanto appamattakehi vivādaṃ āpajjitthāti*; — Majjh. I. 265, qui condamne la *pudgalapratisaraṇatā*; — Saṃ. II. 267 (cité ci-dessus Add. 41, n. 1). — L'énumération classique figure Abhidh. k. v. (Burn. 123b, 473b) *catvārīmāni bhikṣavaḥ pratisaraṇāni. katamāni catvāri? dharmaḥ pratisaraṇam na pudgalaḥ, arthaḥ . . . ., nītārthasūtrāntam. . . jñānam. . . . .*; et dans Bodhisattvabhūmi. Variantes: *yukti* remplace parfois *dharma*; Laṅkāv. 74 *arthānusāriṇā bhavitavyaṃ na deçanābhilāpābhiniviṣṭena*. — Un cinquième *pratisaraṇa* est le *karma* ou *karmavipāka* (Çikṣās. 316.16; Avadānaçataka, II. 86, n. 6 où le tibétain *rten* est peut-être pour *rton*); je comprends «prendre recours, croire à la rétribution de l'acte». — *pratisaraṇa (dharma°)* sans signification technique, Çikṣās. 322.15. — Voir ci-dessous 268, n. 1; 533.13 et suiv. et Wogihara, Bodhisattvabhūmi.

» 44, » 2. Voir 276.5 et Madh. avatāra, 200.7.

» 46, » 1. Voir 462, n. 4.

» » ligne 5. hkhrul hkhor mkhan gyis byas pai hkhrul hkhor gyi na chuṅ ni. . . .

Page 46, note 3. Voir Majjh. I. 72, où Bhagavat explique qu'il n'éprouve ni *bhaya* ni *sārajja* dans aucune des huit assemblées, étant *khemapatto abhayapatto vaisārajjapatto* — Milinda, p. 339. — Les Bodhisattvas sont aussi exempts de toute timidité dans l'enseignement.

» 47, ligne 7. Lire *bhagavan.*

» 48, note 4. On a plus souvent *saṃjñāveditanirodha*, par exemple Laṅkāv. 121.2, Bodhisattvabhūmi, Abhidh. k. v.

» 51, » 7. Mhv. I, n. 580, II. 119.5; Sukhāvatī, 15.14.

» 52, » 3. Lire *chandaḥ.*

» » » 7. Voir 30.3, 296.1 et 460—461 où les quatre erreurs sont expliquées.

» 55, lignes 3—4. Lokātītastava, 19; cité 234.8.

» 60, note 5. Voir Warren, p. 150.

» 61, » 6. Voir Madh. avatāra VI, 73 (p. 167 suiv.). La *svasaṃvitti* est aussi admise par les Sautrāntikas.

» 63, » 1. Voir Kathāv. V, 9 *(tena khaggena taṃ khaggaṃ chindati ... tena aṅgulaggena tam aṅgulaggaṃ parāmasati)* et Col. A. Jacob, Handful III, 138 et Add.; F. W. Thomas, JRAS. 1903, 316.

» » » 3. Voir 386, n. 1; 388.3; 514, n. 1; Gītā, XII, 3.

» 64, lignes 5—6. Lokātītastava, 11.

» » note 3. Voir Madh. avatāra VI, 146 (p. 268).

» 65, ligne 3. Extrait du Madhyāntavibhaga (ou vibhaṅga), Chap. Ier (Lakṣaṇa), st. 9: yaṅ dag ma yin kun rtog ni / sems daṅ sems byuṅ khams gsum pa / de la don mthoṅ rnam par çes / de yi khyad par sems las byuṅ /

» » note 3. Pañcaskandhaprakaraṇa (Mdo, XXIV, fol. 280a): *vijñānam arthamātragrāhi* .. — Bhavya, sur les Sectes, fol. 184 b: kha cig na re sems kyis yul gyi khyad par thob pa ni mya ṅan las hdas pa thob pa yin no = « Quelques-uns disent: la pensée atteint le *viṣayaviçeṣa*, atteint le *nirvāṇa* ». — Voir encore Yogasūtra III, 3.

» 69, ligne 4. Lire *lokarddha* = hjig rten gyi rgan rabs ltar.

» 71, » 1. Comp. Madh. avatāra 269.14; trad. Muséon, 1911.

» 74, note 4. Voir 35, n. 4.

» 76, » 1. L'expression *svayūthya*, coreligionnaire, désigne un bouddhiste quelconque étranger à l'école de l'auteur. — Madh. avatāra 87.15 reproduit presque textuellement notre 76.1—4.

» » ligne 4. *bhagavatā*... Le Madh. avatāra renvoie au *pravacana;* l'Abhidh. k. v. à un *sūtra*: *ukta ālambanapratyayaḥ sūtra iti catvāraḥ pratyayā ity atra sūtre.* — D'après Bhavya sur les Sectes (fol. 184a, Rockhill 196) quelques-uns affirment sept pratyayas: *hetu*, *ālambana*, *anantara*, *adhipati*, *karma*, *āhāra* et *« rten »*; d'autres disent que

tous les *pratyayas* sont compris dans les quatre (186b). — Voir Bodhisattvabhumi, Sommaire, Muséon, 1911, p. 176; Madh. avatāra 88.10.

Page 77, ligne 13 de la n. 7 et n. 2. Lire Visuddhim. p. 138.
» 78, note 1. Cité Madh. avatāra 93.5—8.
» » » 5. Voir *ibid.* 92.16.
» 80, » 1. Lire XXVI, 2 (p. 545).
» » ligne 7. Lire *viśeṣaṇaṃ nāsti vinā* (Madh. avatāra 148.5).
» 83, » 5. Plutôt *vandhyā*°.
» » note 3. *ālambana*, voir aussi Çi. 235, n. 3; 181.13; M. Vyut. 21.68.
» 84, » 4. = raṅ hdod kyis = *svecchayā*.
» 85, » 3. L'*ānantarya* est réfuté Çlokavārt. 841 (trad. 482—3) Tātparya, IV, 1, 14.
» 86, ligne 4 Lire °*lakṣaṇaḥ*.
» 88, note 1. Cité Madh. avatara, 93.28 où le mot *phala* est omis: ci ste de ni med par yaṅ / rkyen de dag las skyes hgyur na / rkyen ma yin pa dag las kyaṅ / ci yi phyir na skye mi hgyur /
» 89, » 2. Çunyatasaptati: gaṅ zhig bdag ñid raṅ bzhin gyis / ma grub de gzhan ji ltar bskyed / de phyir gzhan las grub pa yis / rkyen gzhan dag skyed byed min /
» 91, ligne 2. Lire *no cupapadyt.*
» » » 9. Lire *prasannapadāyām*
» 93, note 3. Lire Bodhic. IX, 86—7 (p. 592). — Voir la discussion de l'atome dans le Viṃçaka de Vasubandhu (Muséon, 1912) st. 12—14 — *digbhāga*, Jāt. mālā, 155 23.
» 94, » 1. Voir 31, n. 1; 268.2; 432.1.
» 95, » 2. Voir Walleser, Mittlere Lehre, p. 16.
» » ligne 10. Ci-dessous 550. — Sur la *mudrā*, ci-dessous 544.9.
» 108, » 1. Lire *āgati* (où ba).
» » note 2. *kramati*, voir 290.8, 296.2; Lire M. Vyut. 223.25—6; 245 508
» 109, lignes 7—10. Ci-dessous 519 11; cité Madh. avatāra 144.8.
» 110, » 3—4. Ci-dessous 519.13.
» » » 5—8. Ci-dessous 200.17, 550.1.
» 111, ligne 1. Ci-dessous 428, n. 6.
» 112, » 5. Lire *prasannapadāyām.*
» 117, » 16. Mieux *draṣṭā nāsty atiraskṛtya tiraskṛtya ca darçanam* (Walleser).
» 118, note 3. Voir 553.
» » » 8. Effacer la référence à *bhavaṅgakkhaya* qui n'a rien à faire avec les *aṅgas* du Pratītyasamutpāda (voir Aung-Rhys Davids, Compendium). Les *aṅgas* dont il s'agit ici sont les quatre «membres» de la chaîne: *vijñāna*..... *tṛṣṇā*
» 119, ligne 2. Le tibétain, pour plus de clarté, lit: *syātām yadi*. . *syāt, na tv asti, yasmāt.* Comp. 138, n. 2.

Page 120, ligne 9. Voir Lalita 210.10 (Lefmann, 176.17), Rgya cher rol pa p. 159, qui porte *na rūpe cakṣur niçritam.*

» » » 11. Lire *dharmime* avec Lefmann — *teṣr* bien douteux! — Lefmann a *punar ātmeti* comme notre tibétain *slar yaṅ* = *punar*. Le Rol-pa *de dag bdag daṅ* = *te ātma (iti) çubhāç ca.*

» 121, » 2. Lefmann: *akahim ca gataṃ anāgataṃ....*

» 126, note 1. Lire Abhidh. s VI, 4 (voir Compendium, index). — Sur *prasāda*, voir aussi Abhidharmakoça cité par Wogihara, Muséon, 1904, p 211

» 127, » 1 Cité Madh avatara 297.13.

» 128, » 1. Voir Tātparya, 26 12: *yathāhur eko bhāras tattrato yena dṛṣṭaḥ sarve bhārās tena dṛṣṭā iti.*

» » lignes 13—14 = Samādhiraja, p. 46, au bas, qui porte *kiyad bahusmi bhāṣitā.* Le tibétain donne *yāvad bahu pi....* — Comp. Madh. avatāra, 200—201.

» 129, note 1. Sources pâlies, Majjh. I, 185, III, 218, etc.

» 137, ligne 5. Même discours adressé à Mañjuçri, 296.5.

» » note 4. Sur le *karman abhisaṃskṛta*, voir 296.5, 303.4, 311, n. 1, 343, n. 7, 542.13.

» » » 3. °upapattir?

» 142, » 5. Voir 472.3.

» 143, ligne 11. Lire °*pravṛttam.*

» 135, » 3. Lire °*nivṛtti*°.

» 145, note 1. (Voir 281, n. 1 et 546, n. 6) — Les *nikāyāntariyas* de l'Abhidh. k v. sont les Mahiçasakas. Voir dans ce même texte, Ms. Burn. 122a, la discussion des trois ou quatre *lakṣaṇas.*

» 147, » 3. Voir 343, n. 6.

» 150, » 3. Comparer Akutobhaya, qui porte en *b. mi nus*; Walleser, p 39.

» 154, » 4. Voir 408.16.

» 155, ligne 1. Lire *sūramaṇiye.*

» 160, note 4. Cité Madh. avatāra, 96.6.

» 161, » 4. Voir 82, n. 5.

» 166, » 8. Lire *phuṅ po brten.*

» 174, ligne 9. Lire *bhāvaḥ.*

» » note 4. Cet *āgama (maraṇam api... ca)* est extrait d'un exposé du Pratītyasamutpāda dans Daçabhūmaka, chap. VI: *jarāpi dvividhakāryapratyupasthānā bhavati· indriyapariṇāmaṃ ca karoti hetuṃ ca dadāti maraṇasamavadhanābhinirvṛttaye; maraṇam api dvividhakāryapratyupasthānaṃ bhavati: saṃskāravidhvaṃsanaṃ ca karoti aparijñānānucchedaṃ ca.* Mais notre version tibétaine, qui concorde avec celle de Madhyamakavatāra, 189.3, suppose un texte:... *ca karoti hetuṃ ca dadāty aparijñānānucchedāya*: «...dé-

truit les saṃskāras et projette la cause de la non-interruption de l'ignorance».

Sur la mort, voir Warren 252; Compendium; Article Death dans Hastings' Encyclopaedia.

Page 176, note 3. Les Vaibhāṣikas du Magadha considèrent la *tathatā* comme *asaṃskṛtā*, Wassilieff, p. 272 (fol. 147a du Siddhanta).

» 178, » 5. Même stance 550.5.

» 185, » 4. Cité Madh. avatāra, 100.10.

» 187, ligne 7. Lire [Tib. 73a].

» 188, note 1. Effacer la référence au Kandjour.

» 189, ligne 11. Cité Madh. avatāra, 261.1.

» » note 1. Cité Madh. avat. 227 et 261.

» 190, » 3. Rectifier la graphie *blaṅ*.

» 198, ligne 2. °*bhūtāny anupādāya?*

» 199, note 1. Lire, l. 2, *med*.

» 207, ligne 1—2. Comparer Gauḍapāda, IV, 18.

» 208, note 1. Les *kārikas* 10 et 11 sont citées Madh. avatāra, 151.

» 209, » 1, l. 2. Ou *çe na*.

» 211, » 7. Cité Madh. avatāra, 285.7.

» 212, ligne 16. Cité *ibid*. 260.6 et ci-dessous 284.13.

» » » 5—6. Nirupamastava, 13.

» 215, note 1. Voir 285, n. 4; ailleurs *btags-pa*.

» 216, » 5. Voir Lefmann, 177.1–4, 19–178.2.

» » » 6. Sous entendre *pratītya*.

» 217, ligne 5. Lefmann: *sattvātma*.

» » » 7. *Ibid. iya*.

» » » 13. *Ibid.* °*sama*°.

» » » 14. *Ibid. nāyakā*.

» » note 4. De même Lefmann.

» » » 5. On a 216.6 — 217.2 = Lefmann, 177.1–4 et 213.3–14 = Lefmann, 177.19 — 178.2.

» 218, » 2. Voir 529, n. 1.

» 219, ligne 8. *alātacakravat;* voir Wassilieff 312 (284); Abhidh. k. v. 267a *yasmāt kramena paṭabuddhiḥ kaṭabuddhir vā tasmād avayaveṣv eva.... paṭabuddhiḥ kaṭabuddhir vā vikalpavaçād bhavati / alātacakravat / yathālāte çighrasaṃcārāt tatra tatrotpadyamāne 'lātacakrabuddhir bhavati tadvat.*

» 225, » 9. Comparer Gauḍapāda. IV. 93 (voir JRAS. 1910, 138); cette stance est citée Madhyamakāvatāra, p. 225, avec un intéressant commentaire.

» 227, note 2. Voir Kathāv. I. 1, 212; Udānavarga, XXVII, 6, suiv.

» 229, » 4. °*aṃçika* dans M. Vyut. 223.269.

» 234, ligne 8. Cité ci-dessus p. 55.3.

» 238, » 1. Lire *pralopa*.

Page 239, ligne 10—14. Cité Madh. avatāra, 229.2, d'après lequel il faut lire, l. 11, *utpādasvabhāvatā*.

» 243, » 6. Lire *vidyati*.

» 245, » 3. Lire *dharma pranītan*.

» » note 8. Cité Madh. avatāra 304.1.

» 247, » 1. Voir *ibid.* 119.6.

» » » 1. *asādhya* est parfois traduit *gso bya min pa* et dit des maladies *(vyādhayaç)*, Abhidh. k. v. fol. 256b.

» 248, ligne 4. Même texte cité *ibid.* 118.1.

» 249, note. Comparer p. 497, n. 5; Col. Jacob, Second Handful, 42.

» 257, lignes 1—4. Voir p. 474.7.

» 259, note 2. XV 1 et 2 cités Madh. avat. 305.11.

» 261, ligne 6. Lire *sāmānya*°.

» 262, » 8. Lire °*saṃbhūtatvena*.

» » » 4—5. Cité Madh. avatāra 160.13.

» » » 11. Cité Madh. avatāra, 201, comp. Bodhicaryāv. IX, 145.

» 264, » 6. Cité Madh. avatāra, 178.6 (variante *anakṣara* traduit par *hgyur ba med la*: «par imposition sur l'intransformable»).

» 269, » 5. Cité Madh. avatāra, 22.13.

» » note 2. Voir aussi Saṃ. III, 135.

» 270, » 1. Voir 1, n. 4 et 358, l. 10.

» 271, ligne 7. Comparer Gauḍapādak. IV, 7.

» 273, » 5. 'Cité Madh. avat. 124.15.

» » note 1. La fin de la note doit être reportée à la note 2. Lire *asti yad va, asti yad hi*.

» 275, ligne 7—10. Cité Madh. avatāra, 184 8.

» » note 7. Lecture *khud-pa* dans Madh. avatāra; Çarad Chandra 148a.

» 277, » 4. On a aussi *kaula*, M. Vyut. 245.112; pāli *kullo*.

» 283, » 4. Voir aussi Chapitre XVIII.

» 291, ligne 6. Lire *rāgādeḥ*.

» 292, note 4. Voir les trois *skandhas*, 377, n. 4.

» 297, » 1. Voir Z. D M. G. 1904, 454 (ṛtīyate).

» 298, ligne 14 *āvyūhana*, comp. Warren, p. 177 (initiatory karman = *āyūhanā saṃkhārā*).

» 290, » 9. D'après le tibétain: ..... *saṃskārāṇām, utpādānantaradhvaṃsināṃ naṣṭānām asattvān, na sambhavati. ...mokṣo, 'nityanām.. ..avidyamānatvān, naiva sambhavati.*

» 307, note 3. Mdo XVII: *ṅag daṅ spyod*.

» 311, ligne 15. Ms. *karmaṇāṃ nopapadyate*. Mais la négation manque dans le tibétain.

» 312, note 1. Lire *kha cig*. — Lire: voir p. 145, n. 1, comparer 76, n. 1.— Membre d'une secte étrangère, *nikāyāntara*, Minayeff, p. 79, citant Bodhivaṃsa; Abhidh. k. v., 336a *nikāyāntarapāṭhavacanat*.

Page 312, note 4. Lire *appakānaṃ pi kārāṇam* (honneurs rendus au Saṃgha).

» 315, ligne 12. *ekanikāyikais*, les membres d'une certaine secte.

» 318, note 1. Le ms. dev. lit *pancaycna*, peut être *pañcakena;* Tibétain «capital *(dhanaskandha)* accompagné d'intéret».

» » » 8. Lire °*kliṣṭayoḥ*.

» 319, » 3. Lire *sakṛdāgāmin*.

» 322, ligne 4. Comp. Abhidharmakoça: *bhūmityāgāt tyajaty āryas tāny anāryas tu mṛtyunā.*

» 324, note 2. Cité Madh. avatāra, 126.19.

» 325, » 1. Cité 580.5.

» 326, » 1. D'après l'Akutobhaya: *tadvipāko vipakvo 'pi (de-yi* au lieu de *de ni)*, voir Walleser, p. 99.

» 326, » 3. D'après Akutobhaya: *karma syāt tatkṛtaṃ kathaṃ (las ni de-yis ji-ltar byas)*; Walleser, *ibid.*

» 327, ligne 10. La première ligne de la *kārikā* n'est pas commentée. D'après Akutobhaya: *samudāhṛtāḥ çāstre:* les traités d'Abhidharma expliquent que l'acte et les passions sont les causes des corps. (Comp. Walleser, p. 100).

» 328, » 3. Comp. 542.12.

» » » 6. Lire *tṛṣṇāsaṃyojanā*. — *yathoktam sūtre:* d'après Akutobhaya: *thog-ma dan tha-ma med-pai mdo-dag-las* = Anavaragrasūtreṣu (Saṃ. II, 178—193), voir 218 5. Nāgārjuna cite ensuite notre texte 329.10.

» 329, note 1. Mieux *ga las yod.*

» 330, Les *kārikās* 31—33 sont citées Madh. avatāra, 125 avec variantes.

» 340, ligne 14. Lire *samanupaçyan.*

» 341, » 4 Cité Madh. avatāra, 285.

» 342, note 2. VI. 127 = p. 245.

» 343, ligne 9. Voir Madh. avatāra, VI, 202 et suiv. (316).

» 344, note 3. Lire: Chap. VI, 121.

» 345, » 1. Ces stances sont citée dans Siddhānta II, fol. 189b, comme extraites de la Ratnāvalī *(rin-chen hphren-ba).*

» 346, » 7. Lefmann, 105.13, 16.

» 348, ligne 11. Comparer Gauḍapāda. II, 38.

» 349, » 4. Cité Madh. avatāra, 219.

» 350, » 5. Voici la version tibétaine de la kārikā 5: *las dan ñon-moṅs zad-pas thar, las dan ñon-moṅs rnam-rtog-las, de dag spros-las, spros-pa ni stoṅ-pa-ñid-kyis hgag-par hgyur.*

» 350, note 2. Voir les références 451, n. 5; et Udānavarga II, 1 (JRAS. 1912, april). — Variante: *saṃkalpāt kāma jāyase.*

» 352, ligne 8 de la note. Bodhic. IX. 73 (473.3), 102 (523.5).

» 354, note 4. Voir aussi Madh. avatāra, 245.4.

» 355, » 7. Cité dans Siddhānta II, 195a 5.

» » » 4. Le Madh. avatāra explique (266.19) pourquoi le *vicāra* n'est pas quintuple.

Page 359, note 5. Ces stances sont extraites de la Ratnavali d'après Siddhanta I, fol. 178b.

» 360, » 5. Cité dans Madh. avatāra, 209.19, dans Siddhānta I, 43.

» 361, » 6. Bodhicaryāv, 493.

» 362, » 3 Sur l'*ānulomikī*, voir Daçabhūmaka, chap. VI.

» 364, » 7. Lire *ārambaṇam*.

» 366, ligne 1. Comparer le discours adressé à Subhūti, Madh. avatara, 322.8.

» » » 2. Lire .. *rātrim anupādāya*.... Voir p. 539, l. 3 et suiv. — *rātri* signifie 'jour', voir Lalita, p. 117.16 et la remarque de Rajendralāl, trad. p. 176 (Bibl. Indica).

» » note 1 Voir Anguttara, II, 24. — Sur la parole du *samāhita*, JRAS. 1910, p. 422.

» 368, ligne 4. Passage visé dans Siddhānta, II, fol. 153b et 200b.

» 369, » 14—15. Akutobhaya (Walleser 107) est intéressant.

» 370, » 2—5. Stances d'Aryadeva, citées Madh. avatāra 120.17, 133.4.

» » note 5. Comparer *ibid.* 280.20

» 371, ligne 1. Comparer 448.17

» » note 4. *de ltar gdul bai skye bo bcom ldan hdas la thams cad mkhyen pa yin no sñam du blo skyes pa la* = « aux *vineyas* en qui est née la pensée que Bhagavat sait tout... ».

» 372, » 7. Lire XXIV. 8

» 375, » 6. Cité ci-dessus 26, 11 et 222.6; Madh. avatāra, 116.18.

» 376, » 5. Voir ci-dessus 26.8, 108.8.

» 377, » 1. Akutobhaya diffère d'après Walleser, p. 109.

» 381, » 5. Bodhicaryāv., 511.

» 386, lignes 6—7 (note 4). Cité Ṣaḍdarçanasamuccaya (Bibl. Indica 1905) p. 11, où sont exposées les thèses du Kalavādin. Sur ce sujet, M. Walleser, Philosophische Grundlage, p. 130; Foe-koue-ki, p. 153.

» 389, lignes 5—6. Même texte cité Madh. avatāra, 246 18.

» 390, note 4. Aussi Avadānaçataka.

» 390, ligne 3. Lire [Tib. 144b].

» 391, » 8 Lire [Tib. 145a].

» 392, » 12. Lire [Tib. 145b].

» 393, » 11. Lire [Tib. 146a].

» » » 4. D'après le Tibétain *(gzuṅ du med do)*, il faut *san na gṛhyeta*.

» » » 14. Cité Madh. avatāra, 99.13.

» 397, note 1. Effacer la note; le tibétain lit: *saṃjñāmātrabhedāc ca, avasthābhede pi..*

» 404, » 2. Cité Madh. avatāra, 99.

» 406, ligne 9. Ou *janayati*..

» 411, » 4. Lire *naivaitat*.

» » » 6—7. Lokātītastava, 4.

» 413, note 3. Lire °*ṣaṣṭikā*.

Page 418, note 5. Lire *yan chad;* voir Madh. avat. 105.14.

» 421, » 8. Le sens est certain: «et abandon de la doctrine bouddhique».

» 423, » 16. Lire *çāçvatavādadoṣa*°.

» 428, » 1. Voir 377.1.

» » » 3. Voir 544.5 et 551.14 (note p. 607).

» » » 6. La stance ajoutée par le tibétain est Samādhirāja, 111.1—4.

» 432, » 7. Cité Madh. avatāra, 267.1.

» 434, ligne 15. Lire *skandhā nātmani*...; l. 20 *mattva* est correct. Voir Madh. avatāra, p. 465—6.

» 435, note 1. Lire, l. 6. *ātmā rūpavān nāsti, yasmād ātmā nāsti*...

» 442, » 7. La stance citée dans Bodhicaryāv. est Lokātītastava, 20.

» 444, ligne 8. Pour ce texte, voir 500.11 et 501.7.

» » note 3. Cité 264.9 et Madh. avatara, 304.

» 445, » 1. Les MSS. portent, pour la deuxième ligne *sattvād asattvat sattvācca.* Lecture confirmée par la version du Madhyānta, I, 3 dans Mdo LVIII, fol. 44a *stoṅ pa ma yin mi ston min / de lta bas na thams cad bçad / yod pas med pas yod pas na / de ni dbu mai lam yin no:* «Ni vide, ni non vide d'existence....» = *çūnyam*... *açūnyam sattvāt.*

Les fragments, jusqu'ici relevés, du Madhyānta sont les suivants

dānaṃ çīlaṃ kṣama vīryaṃ dhyānaṃ prajñā upāyatā /
praṇidhānaṃ balaṃ jñānam etaḥ pāramitā daça //

Namasaṃgīti ad 43

chādanād ropanāc caiva nayanāt saṃparigrahāt /
pūraṇāt triparicchedād upabhogāc ca karṣaṇāt /
nibandhanad ābhimukhyād duḥkhanat kliçyate jagat //

Chap. I, 11 et 12a — b; Nāmasaṃgīti ad 132. — Chacun de ces termes définissant l'action d'un des membres du Pratītyasamutpāda.

Voir ci-dessus 65.3 et Sūtrālaṃkāra XVIII, 43.

» 446, Les *kārikās* 12—14 sont citées Madh. avatāra p. 284.

» 447, » 1. Cité avec variantes p. 534.8. — Comparer l'Akutobhaya, Walleser, p. 139.

» 448, » 2. Comparer Theragāthā, 469, Aṅg. II, 71, Udānavarga XXII, 11.

» » » 17. Lire *vimāna.* — *vāyu*...... *paryantasya* manque dans le tibétain; mais on trouve cette description du *bhājanaloka* dans Madh. avat. 190.16 où il y a *gzhal yas khaṅ gi mthar* = *akaniṣṭhavimāna* (et non pas *vitāna*).

» 449, lignes 11—12. Citées Subhāṣitasaṃgraha fol. 96, comme extraites du Hastikakṣya (var. *rūpaṃ hi saṃdrçyate*).

» 452, note 3. Lire: p. 6, n. 4, et *yoniçomanaskāraḥ.*

Page 456, note 3. Comparer Mrs Rhys Davids, Psychology, p. 327, note.

» 460, » 2. Sur les *viparyāsas*, voir Nettipakaraṇa, 114 et index; Yogasūtras II, 5, Sarvadarçana, trad. p. 252.

» 462, ligne 15. Lire °*dṛḍhādhyāçaya*°.

» 474, » 2. Samādhirāja, p. 20 dernière ligne.

» 476, » 2. Lire *jvarādi*° *(rims la sogs...)*.

» » » 3. D'après le tibétain: *tasya vastuno 'tropalabhyamānatvāt*.

» 478, » 1. Les huit *pudgalas* de Saṃ, I, 233

» » note 3. Voir Aṅg. V, 17. — Pañcaskandhaprakaraṇa, fol. 298

» 481, » 2. L'étude de l'*abhisamaya*, en effet, est encore à faire. D'après l'Alaṃkāraloka, il semble que celui qui a expulsé le cinquième *prakāra* des *bhāvanāheya* soit *pratipannaka* du deuxième fruit, et non pas celui qui n'a expulsé que le quatrième *prakāra*. On ne voit pas bien à quel moment commence le *pratipannakatva*.

» 494, » 3. Cité Madh. avatāra, 178.

» 500, » 3. Voir aussi 491.11.

» » » 4. Voir aussi 444.8.

» 503, » 3. Cité Madh avatāra 228 17 qui traduit *upādāya* = *rgyur-bcas* = *sahetukā prajñaptiḥ*.

» 505, ligne 5. Voir 397 1

» 514, » 3. Ce *sūtra* parait n'avoir rien de commun avec celui du même nom cité Çikṣās. 244 11 et Bodhicaryāv 508 7 (IX. 88), ni avec le texte du Mahāvastu

» 520, note 1. Voir Udānavarga XXVI 16

» 522, » 4. Scander *te* bref

» 523, ligne 12. Lire *astivādinām evam asti*°.

» » » 5. On a bien *graha (gnod gyis gzun ba)*, corriger peut-être 442.3; voir Wogihara.

» 525, » 3 Lire *dṛçyate*.

» » » 11. Lire *nirūpayati*.

» » » 15. Lire °*lakṣaṇāvyabhicaritām*.

» 527, note 1. D'après le tibetain: *nirvāṇe yatra......tatra [nirvaṇe]*.

» 528, » 2. Cette stance est extraite du Laṅka, 106 13.

» 529, ligne 5. Lire *yadi vā*....

» 532, note 2. Madh. avatāra, p. 100. — *parasparaviruddhayor*, mesure iambique inadmissible.

» » » 3. Cité *ibidem*.

» 534, » 2. Lire XXII. 13, (447.5).

» 540, ligne 1. Voir 449.9.

» 542, » 12. Voir 328.1; Saṃ., II, 82; Suttanipata, 1032; Nettipakaraṇa, 10.

» 544, » 1. Comparer Abhidh k. v., 239a: *tad etad vedanādiskandhacatuṣkaṃ nāmaçabdenocyate. yasmāt tan nāmavaçena saṃjñākaraṇavaçenārthesv apratyakṣesv api vā namati pravar-*

tate: asya nāmno 'yam artha iti . indriyārtharaçena tu pratyaksesu rūpadiṣu namati utpadyata ity arthaḥ . namni capy artharaçena namati: asyārthasyedaṃ nāmeti . etasya punaḥ kena nāmatvam iti . etasya saṃjñākaraṇalakṣaṇasya nāmnaḥ kena kāranena nāmatvam? teṣu teṣv artheṣu tasya nāmno namanād iti.yasmāt [teṣu] teṣv artheṣu catuḥskandhalaksanaṃ nāma tan nāma vartayati, tasmād etasya nāmatvam.

āviddham = *ākṣiptam.*

Page 544, ligne 5 Comparer 108.10.

» 545, note 1. Voir Jacob *tulonnamananyāya.*

» 547, ligne 16. Voir ibid. *padmapattraçatayatibheda nyāya*; Wassilieff, 312 (284). «gleich wie ein Pfeil (dem Scheine nach auf einmal) alle acht Blatter der Utpala-Blume durchbohrt».

» 548, note 2. Lire *çar-gyi ri-boi*

» 549, ligne 3. Voir Madh. avatāra, 165.9.

» » » 12. D'après la même source, 144.8, lire *neha.* — Voir ci-dessus 109.7–8 et 110.3–4

» 551, » 14–15. Cette stance est extraite de Pratītyasamutpādakarikā, Mdo XVII, fol. 166a 4.

» 553, » 6. *samanvāhāra*, voir Majjh., I, 190.20 et Warren, p. 493.

» 558, » 8–10. Cité Madh. avat. 217.1. Lire *avidyānugato 'yam*... .

» » note 4. Meilleure version, semble-t-il dans Akutobhaya (Walleser, p. 166).

» 563, » 5. Lire *hetukaḥ.*

» 564, ligne 1. Lire *tatra mahāndhakāra°.*

» 565, » 5 Lire *°adhyavasānādhyavasāyasthānād.*

» 567, » 7. Voir Majjh., I. 190.

» 572, » 8. Lire *pūrvāntadṛṣṭi°.*

» 573, note 1. Cité Madh. avatāra, 283.

» 574, ligne 6. Voir *ibid.* 248.2.

» 575, note 1. Cité *ibid.* 284 (en *c: len las ma gtogs par*).

» 576, » 1. Cité *ibid.* 248 et 283.

» 577, » 1. Cité *ibid.* 242.

» 579, » 1. Cité *ibid.* 249.

» 580, » 5. Cité Madh. avatara, 283.

» » ligne 5. Lire *phalasya.*

» 584, » 5. Lire *bhavet.*

» 592, » 3. Lire *upādāya.* Note 3 «Retenir de tomber dans le gouffre de la croyance à l'abandon du *saṃsāra* et à l'acquisition du *nirvāṇa*».

» 593, » 3. Voir Warren, p. 243.

» » note 10. Le tibétain porte *samanupaçyati.*

» 594, » 1. Lire *ci zhig yod cir hgyur.*

INDICES.

I.

Index des Kārikās.

II.

Index des stances citées dans le commentaire.

III.

Index des stances citées dans les notes.

IV.

Fragments canoniques en prose.

V.

Sūtras, Çāstras, Ācāryas, etc.

VI.

Kalyāṇamitras.

VII.

Index général.

Table des Matières.